श्रीशिवयोगिशिवाचार्यप्रणीतः

श्रीसिद्धान्तशिखामणिः

शिवाद्वैतप्रदीपिकाख्यया संस्कृतव्याख्यया सहितः

डा. एम्. शिवकुमार स्वामी

शैव भारती शोध प्रतिष्ठान
डी.३५/७७, जंगमवाडीमठ, वाराणसी - २२१००१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शोध प्रकाशन-ग्रन्थमाला – ८२

श्रीशिवयोगिशिवाचार्यप्रणीतः

श्रीसिद्धान्तशिखामणिः

शिवाद्वैतप्रदीपिकाख्यया
संस्कृतव्याख्यया सहितः

– व्याख्यकर्ता –
डा॥ एम्. शिवकुमार स्वामी
एम्.ए., पिएच्.डि.
संस्कृत प्राध्यापकः (निवृत्तः)
बेंगलूरु विश्वविद्यालयः, बेंगलूरु

– प्रकाशनम् –
शैवभारती शोधप्रतिष्ठानम्
डि. ३५/७७, जंगमवाडीमठम्, वाराणसी - २२१ ००१

२०१६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ŚRĪ SIDDHĀNTAŚIKHĀMAṆIḤ : With the Sanskrit commentary called Śivādvaita-pradīpikā by
Dr. M. Sivakumara Swamy, Professor of Sanskrit (Retd.
Bangalore University, Bengaluru - 560 056.
Residence : No. 342, II Main Road, Jagajyothi Layout, Bengaluru - 560 056. Mobile : 94484 76938

Pages : VIII + *lii* + 820

© *Shaiva Bharati Shodha Pratisthan*

First Impression : 2016

Price : Rs. 447.00

ISBN 978-93-82639-22-0

PUBLISHED WITH THE FINANCIAL ASSISTANCE FROM
THE RASHTRIYA SANSKRIT SANSTHAN
(Deemed University), NEW DELHI

Typesetting by :

Venkatesh B. Inamati
Y.S. Colony, Vidyagiri
Dharwad - 580 004
Mobile : 98800 55583

Printed at :

Mittal Offset
Sundarpur, Varanasi - 221 005
Ph.: (0542) 2319653

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

— श्रीजगद्गुरु विश्वाराध्यः प्रसीदतु —

श्रीमत्काशी ज्ञानसिंहासनाधीश्वर

श्री श्री श्री १००८ जगद्गुरु

डा॥ चन्द्रशेखर शिवाचार्य महास्वामिपादाः

शुभाशीर्वचनम्

शैवभारती शोधप्रतिष्ठानद्वारा शिवाद्वैतप्रदीपिकाख्यया संस्कृतव्याख्यया सहितोऽयं श्रीशिवयोगिशिवाचार्यप्रणीतः श्रीसिद्धान्तशिखामणिः प्रकाशतां नीयत इति मोमुद्यते मनोऽस्माकम् । बेंगलूरुविश्वविद्यालयस्य निवृत्त प्राध्यापकाः डा॥ एम्. शिवकुमारस्वामिनोऽस्याः संस्कृतव्याख्यायाः प्रणेतारः सन्ति । एतावत्पर्यन्तम् अनेकैर्विद्वद्भिः श्रीसिद्धान्तशिखामणिः संस्कृत-कन्नड-हिन्दी-मराठी-तेलुगु-तमिळु-आंग्लादिभाषाष्वनूदितः सन्नस्मदीय-शोधप्रतिष्ठानद्वारैव प्रकाशितः । संस्कृतव्याख्यासरण्यां तावत् प्रथमा सप्त-दशशतके मरितोण्टदार्यैर्विरचिता तत्त्वप्रदीपिकाख्या । पुनरेकोनविंशतिशतकस्य मध्यभागे महाराष्ट्रस्य राजूर-अहमद्-पुरयोर्गुरुस्थलमठस्य पट्टाध्यक्षैः ष.ब्र.श्री. शिवलिङ्गशिवाचार्यैः श्रीसिद्धान्तशिखामणेः संस्कृतभाष्यमेकं विरचितं मुद्रापितं च। कञ्चित् कालपूर्वं विद्वान् - एम्.ए. पदवीविभूषिताः राजशेखरय्य महाभागाः श्रीसिद्धान्तशिखामणेरेकां संस्कृतव्याख्यां व्यरचयन् । इदानीमियं विस्तारमयी श्रीसिद्धान्तशिखामणेर्नवीना शिवाद्वैतप्रदीपिकाख्या व्याख्या प्रकाश्यते ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भारतीयधर्म-दर्शनग्रन्थेषु श्रीसिद्धान्तशिखामणिर्वैशिष्ट्यपूर्णो वर्तते । "द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञके । वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः ॥" इति श्रीकरभाष्योक्तदिशा श्रीसिद्धान्तशिखामणेर्वैशिष्ट्यं तावद्द्वैताद्वैतश्रुति-समन्वयः । अन्यदपि वैशिष्ट्यमस्य सिद्धान्ताख्यशिवागमोत्तरभागधर्म-दर्शन विचारैः सह सर्वश्रुतीनां च समन्वयः । अस्य ग्रन्थस्यैकविंशतिपरिच्छेदेषु पञ्चमपरिच्छेदादारभ्य विंशतितमपरिच्छेदपर्यन्तं षट्स्थलात्मकवीरशैव-साधनमार्गान्तर्गतत्वेन निरूप्यमाणानां चतुश्चत्वारिंशदङ्गस्थलानां सप्तपञ्चाश-ल्लिङ्गस्थलानां चाहत्यैकोत्तरशतस्थलानां सिद्धान्तः प्रतिपादितः । शिवागमा-नामुत्तरभागेभ्यः समुद्धृतधर्म-दर्शनविचारवत्त्वादयमागमोत्तरसिद्धान्त इति प्रसिद्धिं भजते । शैवपुराणानां वेदसंहितोपनिषदां च प्रभावनिर्भरत्वादयं वीरशैवसिद्धान्तो निगमागमसमन्वयसिद्धान्तत्वेनापि परिगृह्यते । अत्र संस्कृत-व्याख्याकृद्भिर् डा॥ शिवकुमारस्वामिमहाभागैरुपलभ्यमानमूलाकरान् परामृश्य प्रमाणभूतानि वाक्यानि प्रतिश्लोकं व्याख्यायाम् उदाहृतानि सविमर्शं विशदीकृतानि च । अत एवानिवार्यतया व्याख्याया विस्तारः जातः । अनेन विषयवैपुल्यं जातम् वैदुष्यं च प्रकटतां प्राप्तम् । तस्मादेते व्याख्याकर्तारः शिवकुमारस्वामिमहोदयाः सानन्दं सानुग्रहं चाऽस्माभिरभिनन्दनीयाः । इतोऽप्यतिशयं वीरशैवसिद्धान्तक्षेत्रे संशोधनछात्रमार्गदर्शनाभ्यां परिश्रमं विधाय स्वजीवनसार्थक्यं भजन्तामिति शुभाशीर्वादसुमनोभिस्ताननुगृह्णीमः। एवमेवेतेषां समस्तकुटुम्बवर्गस्योपरि कृपावर्षं विसृजन्त्विति भगवन्तं विश्वनाथं मातरमन्नपूर्णां श्रीजगद्गुरुविश्वाराध्यं च प्रार्थयामहे । अस्य ग्रन्थस्य प्रकाशनार्थम् आर्थिक-साहाय्यं कृतवद्भ्यो राष्ट्रीय-संस्कृत-संस्थानम् (मानित-विश्वविद्यालयः), इत्येतेभ्यः हार्दाः शुभाशयाः प्रदीयन्ते ॥

इत्याशिषः

CC-0. Jangamwadi Math Collection. Digitzed by eGangotri

श्रीसिद्धान्तशिखामणिः

– विषयानुक्रमणिका –

शुभाशीर्वचनम् III

भूमिका *i-li*

प्रथमः परिच्छेदः १-१७

मङ्गलाचरणम् २

कर्तुः परम्परा ११

ग्रन्थावतारक्रमः १५

द्वितीयः परिच्छेदः १८-३१

परशिवब्रह्मणः स्वरूपम् १८

शिवस्य जगत्सिसृक्षा २२

प्रमथानां सृष्टिः २८

रेणुकदारुकयोर्महिमवर्णनम् २९

तृतीयः परिच्छेदः ३२-५९

कैलासवर्णनम् ३२

परशिववर्णनम् ३५

पार्वतीवर्णनम् ४०

देवादिपरिवारकृतसेवावर्णनम् ४४

प्रमथगणकृतसेवावर्णनम् ४७

ब्रह्मोपेन्द्रादिदेवानां वसिष्ठादि-महर्षीणां च सेवावर्णनम् ४८

परमात्मनो राजव्यापारवर्णनम् ५०

रेणुकावतारकारणीभूतः प्रसङ्गः ५३

चतुर्थः परिच्छेदः ६०-७७

रेणुकगणेश्वरस्यावतारः ६०

मलयाद्रिवर्णनम् ६४

अगस्त्याश्रमवर्णनम् ६५

अगस्त्यमुनिवर्णनम् ६८

अगस्त्येन रेणुकसत्कारः, तं प्रति रेणुकवचनं च ७१

अथागस्त्यमुनिवचनम् ७४

पञ्चमः परिच्छेदः ७८-११४

सिद्धान्तभेदः ७९

शैवतन्त्रं विशिष्यते ८०

आगमभेदाः – सिद्धान्तस्य वेदसंमतत्वम् ८१

वीरशैवशब्दनिष्पत्तिः ८३

वीरमाहेश्वरशब्दनिष्पत्तिः ८४

वीरशैव-वीरमाहेश्वरयोर्भेदः ८५

वीरशैवाः षड्भेदाः ८६

षट्स्थलानां नामानि ८९

भक्तस्थलम् ९०

१.अथ पिण्डस्थलम्-(१) ९२

२.अथ पिण्डज्ञानस्थलम्-(२) १०३

३.अथ संसारहेयस्थलम्-(३) १०६

षष्ठः परिच्छेदः ११५-१४३

४.अथ दीक्षालक्षणगुरुकारुण्य-स्थलम्-(४) ११५

५.अथ लिङ्गधारणस्थलम्-(५) १२३

सप्तमः परिच्छेदः १४४-१७९

६.अथ विभूतिधारणस्थलम्-(६) १४४

७.अथ रुद्राक्षधारणस्थलम्-(७) १६७

अष्टमः परिच्छेदः १८०-२०७

८.अथ पञ्चाक्षरीजपस्थलम्-(८) १८०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नवमः परिच्छेदः २०८-२६५
९. अथ भक्तमार्गक्रिया-स्थलम्-(९) २०८
१०.अथ उभयस्थलम्-(१०) २३९
११.अथ त्रिविधसम्पत्ति-स्थलम्-(११) २४५
१२.अथ चतुर्विधसाराय-स्थलम्-(१२) २५०
१३.अथ सोपाधि-निरुपाधि-सहज-दानस्थलानि-(१३,१४,१५) २५८

दशमः परिच्छेदः २६६-३०५
माहेश्वरस्थलभेदाः २६६
१.अथ माहेश्वरप्रशंसा-स्थलम्-(१६) २६९
२.अथ लिङ्गनिष्ठास्थलम्-(१७) २७५
३.अथ पूर्वाश्रयनिरसन-स्थलम्-(१८) २८१
४.अथ सर्वाद्वैतनिरसन-स्थलम्-(१९) २८६
५.अथ आह्वाननिरसन-स्थलम्-(२०) २९०
६.अथ अष्टमूर्तिनिरसन-स्थलम्-(२१) २९२
७.अथ सर्वगत्वनिरसन-स्थलम्-(२२) २९६
८.अथ शिवजगन्मय-स्थलम्-(२३) २९९
९.अथ भक्तदेहिकलिङ्ग-स्थलम्-(२४) ३०२

एकादशः परिच्छेदः ३०६-३४३
प्रसादिस्थलभेदाः ३०६
१.अथ प्रसादिस्थलम्-(२५) ३०८
२.अथ गुरुमाहात्म्यस्थलम्-(२६) ३१३
३.अथ लिङ्गमाहात्म्यस्थलम्-(२७) ३१७
४.अथ जङ्गममाहात्म्य-स्थलम्-(२८) ३२३
५.अथ भक्तमाहात्म्यस्थलम्-(२९) ३२७
६.अथ शरणमाहात्म्यस्थलम्-(३०) ३३३
७.अथ प्रसादमाहात्म्यस्थलम्-(३१) ३३८

द्वादशः परिच्छेदः ३४४-३७२
पञ्चविधस्थलप्रसङ्गः ३४४
१.अथ प्राणलिङ्गिस्थलम्-(३२) ३४६
२.अथ प्राणलिङ्गार्चनस्थलम्-(३३) ३५१
३.अथ शिवयोगसमाधि-स्थलम्-(३४) ३५४
४.अथ लिङ्गिनिजस्थलम्-(३५) ३६२
५.अथ अङ्गलिङ्गिस्थलम्-(३६) ३६८

त्रयोदशः परिच्छेदः ३७३-३९३
१.अथ शरणस्थलम्-(३७) ३७४
२.अथ तामसनिरसन-स्थलम्-(३८) ३७८
३.अथ निर्देशस्थलम्-(३९) ३८४
४.अथ शीलसंपादन-स्थलम्-(४०) ३८९

चतुर्दशः परिच्छेदः ३९४-४२०
१.अथ ऐक्यस्थलम्-(४१) ३९५
२.अथ आचारसम्पत्ति-स्थलम्-(४२) ४०२
३.अथ एकभाजनस्थलम्-(४३) ४०९
४.अथ सहभोजनस्थलम्-(४४) ४१३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चदशः परिच्छेदः ४२१-४६५

क्रमसमुच्चयमार्गः ४२१
स्थलनामनिर्देशः ४२७
१.अथ दीक्षागुरुस्थलम्-(४५) ४२८
२.अथ शिक्षागुरुस्थलम्-(४६) ४३१
३.अथ ज्ञानगुरुस्थलम्-(४७) ४३७
४.अथ क्रियालिङ्गस्थलम्-(४८) ४४२
५.अथ भावलिङ्गस्थलम्-(४९) ४४६
६.अथ ज्ञानलिङ्गस्थलम्-(५०) ४५०
७.अथ स्वयस्थलम्-(५१) ४५४
८.अथ चरस्थलम्-(५२) ४५७
९.अथ परस्थलम्-(५३) ४६०

षोडशः परिच्छेदः ४६६-५१४

१.अथ क्रियागमस्थलम्-(५४) ४६७
२.अथ भावागमस्थलम्-(५५) ४७३
३.अथ ज्ञानागमस्थलम्-(५६) ४७९
४.अथ सकायस्थलम्-(५७) ४८५
५.अथ अकायस्थलम्-(५८) ४८९
६.अथ परकायस्थलम्-(५९) ४९३
७.अथ धर्माचारस्थलम्-(६०) ४९८
८.अथ भावाचारस्थलम्-(६१) ५०४
९.अथ ज्ञानाचारस्थलम्-(६२) ५०९

सप्तदशः परिच्छेदः ५१५-५६३

१.अथ कायानुग्रहस्थलम्-(६३) ५१६
२.अथ इन्द्रियानुग्रहस्थलम्-(६४) ५२१
३.अथ प्राणानुग्रहस्थलम्-(६५) ५२७
४.अथ कायार्पितस्थलम्-(६६) ५३४
५.अथ कर्णार्पितस्थलम्-(६७) ५३६
६.अथ भावार्पितस्थलम्-(६८) ५४२
७.अथ शिष्यस्थलम्-(६९) ५४६
८.अथ शुश्रूषुस्थलम्-(७०) ५५२
९.अथ सेव्यस्थलम्-(७१) ५५९

अष्टादशः परिच्छेदः ५६४-६०५

१.अथ आत्मस्थलम्-(७२) ५६५
२.अथ अन्तरात्मस्थलम्-(७३) ५७४
३.अथ परमात्मस्थलम्-(७४) ५७९
४.अथ निर्देहागमस्थलम्-(७५) ५८४
५.अथ निर्भावागमस्थलम्-(७६) ५८८
६.अथ नष्टागमस्थलम्-(७७) ५९२
७.अथ आदिप्रसादिस्थलम्-(७८) ५९५
८.अथ अन्त्यप्रसादिस्थलम्-(७९) ५९८
९.अथ सेव्यप्रसादिस्थलम्-(८०) ६०२

एकोनविंशः परिच्छेदः ६०६-६६०

१.अथ दीक्षापादोदक-स्थलम्-(८१) ६०७
२.अथ शिक्षापादोदक-स्थलम्-(८२) ६१२
३.अथ ज्ञानपादोदक-स्थलम्-(८३) ६१६
४.अथ क्रियानिष्पत्ति-स्थलम्-(८४) ६२२
५.अथ भावनिष्पत्ति-स्थलम्-(८५) ६२७
६.अथ ज्ञाननिष्पत्ति-स्थलम्-(८६) ६३१
७.अथ पिण्डाकाशस्थलम्-(८७) ६३४
८.अथ बिन्द्वाकाशस्थलम्-(८८) ६३९
९.अथ महाकाशस्थलम्-(८९) ६४२
१०.अथ क्रियाप्रकाश-स्थलम्-(९०) ६४८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

११.अथ भावप्रकाश-
स्थलम्-(९१) ६५३
१२.अथ ज्ञानप्रकाश-
स्थलम्-(९२) ६५६

विंशः परिच्छेदः ६६१-७०२
१.अथ स्वीकृतप्रसादि
स्थलम्-(९३) ६६२
२.अथ शिष्टोदनस्थलम्-(९४) ६६६
३.अथ चराचरलय-
स्थलम्-(९५) ६७०
४.अथ भाण्डस्थलम्-(९६) ६७५
५.अथ भाजनस्थलम्-(९७) ६७९
६.अथ अङ्गालेपस्थलम्-(९८) ६८५
७.अथ स्वपराज्ञस्थलम्-(९९) ६८८
८.अथ भावाभावलय-
स्थलम्-(१००) ६९१
९.अथ ज्ञानशून्यस्थलम्-(१०१) ६९३

एकविंशः परिच्छेदः ७०३-७१८
विभीषणाभीष्टप्रदानम् ७०३

परिशिष्टम्-१ : ७१९-७६२
अकारादि-श्लोकार्धानुक्रमणी

परिशिष्टम्-२ : ७६३-८१०
व्याख्योद्धृतानां वाक्यानाम्
अकारादिसूची

परिशिष्टम्-३ : ८११-८१९
परामृष्टग्रन्थसूची अकारादि-
संकेताक्षरसहिता

***

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रीशिवयोगिशिवाचार्यविरचितः श्रीसिद्धान्तशिखामणिः

— भूमिका —

श्रीशिवयोगिशिवाचार्यप्रणीतः श्रीसिद्धान्तशिखामणिर्वीरशैवानां धर्म-दर्शनप्रतिपादकः सर्वप्रथमः सर्वश्रेष्ठश्च प्रमाणग्रन्थो भवति । वेद-वेदान्तविदो जानन्त्येव यद्वेदसंहितासूपनिषत्सु च वीरशैवपरा मूलभूतांशाः सन्तीति । पुराणेषु शैवेषु वीरशैवविचारास्तत्र तत्रोपलभ्यन्ते । शैवागमोत्तरभागेषु तावद्वीरशैवस्य निर्दिष्टविषया निरूपिताः सन्ति । सर्वांस्तान् प्रप्रथमतया समाहृत्य तत्रभवता शिवयोगिशिवाचार्येण निर्मितः समग्रो वीरशैवसिद्धान्तः सर्वोत्कृष्टत्वेन ग्रन्थेऽस्मिन् विराजते । शिवाद्वैतं शक्तिविशिष्टाद्वैतं चेत्युभयनामभाक् सिद्धान्तोऽयमेकोत्तरशतस्थलात्मको भवति । अस्य सिद्धान्तस्य प्रतिपादनायात्र संप्रदायानुरोधेन संवादप्रकारो ग्रन्थकृताङ्गीकृतः । वीरशैवमतस्थापकेष्वेकतमः श्रीरेणुकाचार्योऽत्रोपदेशकः, कुम्भसंभव इति प्रसिद्धो महर्षिरगस्त्योऽत्रोपदेश्यः, तयोः संवादद्वाराऽत्र ग्रन्थे विषयः प्रतिपाद्यते । एवं कुरुक्षेत्रे युद्धभूमौ सञ्जातं कृष्णार्जुनसंवादं भगवद्गीतारूपेण यथा लोकोपकाराय दत्तवान् व्यासो महर्षिस्तथा कुम्भसंभवाश्रमे सञ्जातं परम्परायां प्रथितं रेणुकागस्त्यसंवादं लोकोपकाराय सङ्ग्रथितवानाचार्यः शिवयोगिशिवाचार्यः ।

श्रीसिद्धान्तशिखामणेर्विषयसङ्ग्रहः

श्रीसिद्धान्तशिखामणावेकविंशतिपरिच्छेदाः सन्ति । तत्र प्रथमे परिच्छेदे द्वादश श्लोकेषु शिवशक्त्योः स्तोत्ररूपं मङ्गलाचरणं विधाय शिवयोगिशिवाचार्यः स्वीयां गुरुपरम्परां ग्रन्थस्य मूलाकरांश्चोपवर्णयति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्वितीये परिच्छेदे ब्रह्मसृष्टेः प्राक् सृष्टिकार्यं निदर्शयता शिवेन कृता शिवगणाधीशानां सृष्टिर्वर्ण्यते । शिवगणाधीशेषु तेषु रेणुक-दारुकौ प्रसिद्धावभूताम् । तयोर्महिमावर्णनेनायं परिच्छेदः समाप्तिं नीयते । **तृतीये परिच्छेदे** शिवस्यास्थानवैभववर्णनं तस्य शासनकार्यवर्णनं च कृत्वा रेणुकाचार्यस्य भूमाववतरणकारणभूतः शापप्रसङ्गो वर्ण्यते । **चतुर्थे परिच्छेदे** दिव्यदेहधारिणः श्रीरेणुकस्य भूलोकावतरणं निरूप्यते । भारत-देशे त्रिलिङ्गप्रदेशे (अधुनातने आन्ध्रप्रदेशे) कोल्लिपाक्यभिधे (कोनलुपाक इतीदानीं प्रसिद्धे) पुरे पुरा तत्रस्थात् सोमेश्वरलिङ्गात् श्रीरेणुकः प्रादुरासीदिति श्रूयते । अवतारसमनन्तरमेव श्रीरेणुकस्तत्र संमिलितान् विस्मयसंमूढान् जनानाशिषाऽनुगृह्य मलयाचलस्थितमगस्त्याश्रमं प्रत्या-काशमार्गेण प्राचलत् । तत्र श्रीरेणुकागस्त्ययोरुभयकुशलप्रश्नपूर्वकं प्रथम-समागमसंभ्रमः, लोपामुद्राकरानीतजलैरगस्त्येन श्रीरेणुकपादप्रक्षालनपूर्वकं कृतोऽतिथिसत्कारः, वीरशैवसिद्धान्तं श्रोतुमिच्छुनाऽगस्त्येन कृता प्रार्थना च सम्यग् वर्ण्यन्ते ।

पञ्चमे परिच्छेदे रेणुकाचार्यः शिवतत्त्वोपदेशमारभते । रुचिभेदत आचारभेदतश्च भिन्नार्थप्रतिपादका अपि सांख्ययोगपाञ्चरात्रवेदपाशु-पतसिद्धान्ताः प्रमाणभूता नैव निराकरणीया युक्तिभिरिति वीरशैवस्य समन्वयदृष्टिं प्रदर्श्य, वेदस्य सिद्धान्ताख्यस्य शैवागमसमुदायस्य चैकार्थ-प्रतिपादनादैक्यमुक्त्वा, शैवागमानां कामिकादिवातुलान्तानामष्टाविंशति-संख्याकानाम् उत्तरभागेषु वीरशैवं निर्दिष्टमिति ग्रन्थकृता संसूच्यते । अनन्तरं वीरशैव-वीरमाहेश्वरशब्दयोर्निर्वचनं प्रदर्श्य श्रीशिवयोगिशिवा-चार्यो भक्तादिस्थलभेदेन वीरशैवानां षड्भेदवत्त्वं निरूप्य भक्तस्थला-न्तर्गतपञ्चदशावान्तराङ्गस्थलानां नामनिर्देशपूर्वकं तदङ्गस्थलेषु त्रयाणां वर्णनं करोति । **षष्ठपरिच्छेदान्नवमपरिच्छेदपर्यन्तं** चतुर्षु परिच्छेदेषु भक्त-स्थलस्यावशिष्टानां द्वादशाङ्गस्थलानां विषयो विशदीक्रियते । **दशमपरि-च्छेदादारभ्य चतुर्दशतमपरिच्छेदपर्यन्तं** पञ्चपरिच्छेदेषु माहेश्वरस्थलस्य नव, प्रसादिस्थलस्य सप्त, प्राणलिङ्गिस्थलस्य पञ्च, शरणस्थलस्य चत्वारि, ऐक्यस्थलस्य चत्वारि चेत्येवमन्येषामेकोनत्रिंशदङ्गस्थलानां निरूपणं क्रियते ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एवमाहत्य चतुश्चत्वारिंशदङ्गस्थलानि निरूपितानि । **दशमपरिच्छेदाद्विंश-परिच्छेदपर्यन्तं** षट्सु परिच्छेदेषु षण्णां भक्तादिस्थलानां लिङ्गस्थलानि सप्तपञ्चाशत्संख्याकानि विव्रियन्ते । तत्र भक्तस्थलस्य नव, माहेश्वर-स्थलस्य नव, प्रसादिस्थलस्य नव, प्राणलिङ्गिस्थलस्य नव, शरणस्थलस्य द्वादश, ऐक्यस्थलस्य नव चेति लिङ्गस्थलानां प्रपञ्चः । **एकविंशे परिच्छेदे** प्रसङ्गद्वयं वर्ण्यते । तत्र प्रथमो विभीषणप्रार्थनानुसारं श्रीरेणुको लङ्कां गत्वा तत्र पूर्वं रावणकृतनवकोटिलिंङ्गस्थापनसङ्कल्पं पूरयितुमवशिष्टानां त्रिकोटिलिङ्गानां स्थापनं विधिवच्चकारेति । अन्ते पुनः प्राप्य कोल्लिपाकीं पर्यवसितभूलोकावतरणोद्देशः श्रीरेणुकः सोमेश्वरलिङ्गे प्रविश्यान्तर्बभूवेति द्वितीयः ।

ग्रन्थकर्तुः परम्परा

प्रथमे परिच्छेदे श्रीशिवयोगिशिवाचार्यः स्वीयां परम्परां वर्णितवान् । तस्यां परम्परायामुक्तप्रकारेण प्रथमस्तावदाचार्यः श्रीशिवयोगिशिवा-चार्यनामा कश्चन प्रसिद्धः । तस्य वंशे श्रीमुद्ददेवशिवाचार्यः समजनि । श्रीमुद्ददेवशिवाचार्यस्य पुत्रः श्रीसिद्धनाथशिवाचार्य इति प्रथितयशा आसीत् । तस्य पुत्रो द्वितीयः श्रीशिवयोगिशिवाचार्योऽस्य ग्रन्थस्य कर्ताऽऽसीत् । अत्रैकः प्रश्नः केयं परम्परा पुत्रपौत्राणामाहोस्विद्गुरूणा-मिति। तत्र स्थूलेक्षिकया विचार्यमाणे सत्येषा पुत्रादिपरम्परेव लक्ष्यते । तथा हि – प्रथमस्य शिवयोगिशिवाचार्यस्य महिमानं संस्तुत्योच्यते "तस्य वंशे" (सि.शि., १.१५) इत्यादि । मुद्ददेवशिवाचार्यस्य वर्णनानन्तरं "तस्यासीन्नन्दनः शान्तः सिद्धनाथाभिधः" (सि.शि., १.१७) इत्युक्तम् । पुनः सिद्धनाथशिवाचार्यस्य महिमानं वैदुष्यं च संस्तुत्य ग्रन्थकृता —

"तस्य वीरशिवाचार्यशिखारत्नस्य नन्दनः ।
अभवच्छिवयोगीति सिन्धोरिव सुधाकरः ॥" (सि.शि.,१.२०)

इत्युक्तम् । एवं "वंशः", "नन्दनः" इति पदयोः सामान्यार्थे स्वीकृते सतीयं परम्परा पुत्रपौत्रादिपरम्परेवाऽवभासते । वंशशब्देनाऽन्वयः कुलं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वेत्यर्थः, नन्दनशब्देन चौरसपुत्र इत्यर्थः सामान्यतया गृह्यते । परं त्वत्र "वीरशिवाचार्यः" (सि.शि., १.२०), "शिवाचार्यः" (सि.शि., १.१७), "शिवयोगिनामग्रणीः" (सि.शि., १.१३), इत्याद्युपाधयो वीरशैव-सम्प्रदाये नैष्ठिकब्रह्मचारिणां मठाधीशानां कृते प्रयुज्यन्ते । एषा एव रूढिः । पुनरत्रावधेयं यद् "वंश" इति पदं न केवलं पुत्रादिपरम्परां प्रत्युत गुरुपरम्परामपि द्योतयति । एतच्च व्याकरणशास्त्रे विशदीकृतम् । तथा हि – "संख्या वंश्येन" (पा.अ., २.१.१९; सि.कौ., सू.सं.६७३) इत्यस्य सूत्रस्य वृत्तौ भट्टोजीदीक्षितेन यदुक्तं तद्व्याचिख्यासुर्वासुदेवदीक्षितो बालमनोरमायामाह – "वंशो द्विधा विद्यया जन्मना च । तत्र जन्मना पुत्रादिपरम्परेति प्रसिद्धमेव, विद्यया तु वंशो गुरुपरम्परा" इति । अतः शिवाचार्यादिशब्दप्रयोगबलेन वंशशब्दस्य गुरुपरम्परार्थे ग्रहणं साधीयः । प्रस्तावेनानेन नन्दनशब्दस्य "करसञ्जातः" इत्यस्मिन्नर्थे ग्रहणं समीचीनं भवति । **एवमियं परम्परा गुरुपरम्परैवेति निश्चेतुं शक्यते ।**

किमियं सिद्धरामेश्वरपरम्परा वा ?

किमेतादृशी शङ्कोद्भाव्यते? उच्यते । श्रीसिद्धान्तशिखामणिव्याख्या-तृभ्यां द्वाभ्यामुद्भावितं यदेष श्रीशिवयोगिशिवाचार्यः श्रीसिद्धरामे-श्वरान्वये जात इति । प्रथमं सोसले रेवणाराध्यः (क्रि.१६२०) स्वकीये कन्नडव्याख्याने तथा भावयामास । अनन्तरं तन्मतानुसारेण श्रीमरि-तोण्टदार्यनामा संस्कृतव्याख्याकारोऽपि तथैव भावयाञ्चक्रे । तथा हि – आदौ ग्रन्थस्य प्रथमश्लोकस्य भूमिकां निर्मातुमिच्छुर्व्याख्याता मरि-तोण्टदार्यः—"रेवणसिद्धेश्वरदृष्टिगर्भसंभूतसिद्धरामेश्वरसम्प्रदायप्रसिद्धः... शिवयोगीश्वर इत्यभिधानवान्..." इत्याद्युक्त्वा सिद्धरामेश्वरेण सह शिवयोगिशिवाचार्यस्य सम्बन्धं सूचितवान् । अनन्तरं "शिवयोगीति विख्यातः शिवज्ञानमहोदधिः" (सि.शि., १.१३) इत्यस्य व्याख्याने "... कश्चिद्रेवणसिद्धेश्वरदृष्टिगर्भसंभूतसिद्धरामेश्वरः ... शिवयोगीति विख्यातः, आसीदित्यर्थः" इत्याह । तन्मते प्रथमस्तावच्छिवयोगिशिवाचार्य एव सिद्धरामेश्वर इति ज्ञातव्यम् । पुनः "तस्यासीन्नन्दनः शान्तः सिद्धनाथा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भिधः शुचिः'' (सि.शि., १.१७) इत्यस्य व्याख्याने ''सिद्धनाथाभिधः सिद्धरामेश्वराभिधासंयुक्तः सिद्धनाथाचार्याख्यो ...'' इत्युक्तवान् । प्रथमं प्रथमशिवयोगिनं सिद्धरामेश्वरं मत्त्वा तद्व्याजेनासाधारणविग्रहपद्धति-मनुसृत्य ''सिद्धनाथ इत्यभिधानवानिति'' वक्तव्ये ''सिद्धरामेश्वराभि-धानसंयुक्तः'' इति व्याख्यातवान् ।

अत्र विचारयामः । प्रथमशिवयोगिशिवाचार्यः सिद्धरामेश्वर एवेति निर्णेतुं किं प्रमाणम्? न किमिति प्रमाणं प्रदर्शितं व्याख्यातृभ्याम् । प्रायः सिद्धरामशिवयोगीति सिद्धरामेश्वरस्य प्रसिद्धिमनुलक्ष्य शिवयोगी न कोऽपि भवितुमर्हत्यन्य इति संभाव्य तथा व्याख्यातं चेत्तर्हि तत्रापि गमकं प्रमाणमपेक्ष्यते । सिद्धरामेश्वर एव ग्रन्थकर्तुः पूर्वज आसीच्चेत्तर्हि स्पष्टं शिवयोगीत्यत्र सिद्धराम इत्यङ्कितनामप्रयोगे नासीद् बाधकः कोऽपि । अतः ''शिवयोगीति विख्यातः शिवज्ञानमहोदधिः'' (सि.शि., १.१३) इत्यत्र ''सिद्धराम इति ख्यातः शिवज्ञानमहोदधिः'' इत्युक्तं चेदपि नाऽभविष्यत् कोऽपि भाषाया छन्दसो वा दोषः । अन्यच्च ''मुद्ददेवः'' इति नाम्नि ''मुद्द'' इति- कन्नडपदम् । तत्रापि ''मुदं ददातीति मुद्दः'' इति निष्पत्तिमवलम्ब्य संस्कृतीकरणद्वारा मुद्ददेव इत्यङ्कितनामैव ग्रन्थकृता प्रयुज्यते । (सि.शि., १.१६) । एवं स्थिते तेन सिद्धराम इति किमित्य-ङ्कितनाम विहाय शिवयोगीतीतरशिवयोगिसाधारणं नाम प्रयुक्तमिति सन्देहग्रस्तोऽयं विषयः । **अतोऽत्र प्रथमः शिवयोगिशिवाचार्यः सिद्धरामे-श्वरश्च भिन्नौ । केवलमियं व्याख्यातृभ्यां कल्पिता कथेत्येवावगन्तव्यम् ।**

श्रीसिद्धान्तशिखामणेः कालः

श्रीसिद्धान्तशिखामणेः कालविषये बहवः सन्देहा उद्भाविताः सन्ति । बह्व्यश्च भ्रमितकल्पनाः प्रसार्यमाणाः सन्ति । कन्नडभाषायां विद्यमानं शरणसाहित्यमेव वीरशैवधर्मदर्शनयोर्मूलमिति केचन विद्वांसः मन्यन्ते । शरणसाहित्यात्पूर्वं वीरशैवप्रतिपादकं शैवागमादिसंस्कृतसाहित्यमस्तीति संभावयितुमपि तेषां मतिर्न प्रवर्तते । शैवागमादिवीरशैवपरे साहित्ये प्रकटिते सत्यपि तस्य प्रामाण्यविषये कालविषये च शङ्कासरणिं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पौनपुन्येनोद्धाव्य प्रसारयामासुः । विशेषतः श्रीसिद्धान्तशिखामणेः कर्तृकालविषये मिथ्यारोपाः कृताः सन्ति । तत्र प्रथम आरोपस्तावद् विंशतितमशतमानस्य पूर्वार्धे काशीनाथशस्त्र्याद्याधुनिकविद्वांसः केचन संभूयेमं ग्रन्थमरचयन्निति । तन्मते सप्रमाणं निराकृते सत्यपि पुनस्ते विविधाकरेभ्यः स्वीकृतानां लोकानां सङ्ग्रहोऽयं ग्रन्थो न प्रामाणिक इत्यभिनव-मारोपं दापयामासुः । ग्रन्थकारेण शैवागमेषु निरूपितान् शैवपुराणेषु च तत्र तत्र व्यस्ततया विद्यमानान् वीरशैवपरान् विषयानेकत्र समाहृत्य स्वकौशलेनैकोत्तरशतस्थलसिद्धान्तस्वरूपं दत्त्वा निरूपितवानिति यत्सत्य-मस्ति तन्निराकर्तुमेष प्रयत्न इति मन्यन्ताम् । एतत्प्रस्तावे निष्पक्षपातिनां वीरशैवसिद्धान्तविदां विदुषां पुरतः श्रीसिद्धान्तशिखामणेः कालविषये कांश्चन निर्णायकानाधारान् प्रस्तौतुमिच्छामि ।

(१) सोसले रेवणाराध्यः श्रीसिद्धान्तशिखामणेः सिद्धान्तबोधिन्याख्यं कन्नडव्याख्यानमरचयत् । स्वकीये महिम्नस्तवव्याख्याने तेन सोमेश्वरयोगिनो निर्देशानुसारं चिक्कनायकपुरस्य (तुमकूरुमण्डले विद्यमानस्य चिक्कनायकनहळ्ळिनाम्नो ग्रामस्य) मुदिनायकनाम्नो राज्ञः सन्तोषार्थं च लिखितमिदं व्याख्यानमित्युक्तम् । चिक्कनायकनहळ्ळि-ग्रामस्य प्रथमशिलाशासनानुसारं राजा मुदिनायकः क्रि. १६२३ तमे वर्षे राज्यमकरोत् । अनेन रेवणाराध्यस्य कालः क्रि. १६२० इति निर्णीयते । एवमेव श्रीमरितोण्टदार्यो अस्य ग्रन्थस्य तत्त्वप्रदीपिकाख्यं संस्कृत-व्याख्यानमरचयत् । एष व्याख्याता वीरशैवानन्दचन्द्रिकानाम्नः स्वकीय-ग्रन्थस्यारम्भे "सङ्कीर्तयामि बसवक्षितिपाल तुभ्यं सिद्धान्तमन्यमतमप्यथ तन्निरासम्" इति केळदिराज्यनृपस्य द्वितीयबसवप्पनायकस्य नाम कीर्तितवान् । द्वितीयबसवप्पनायकस्य कालः क्रि.१६७७ इति निर्णीतः । अतो मरितोण्टदार्यस्य कालः क्रि. १६५०-६० इति निश्चीयते । तस्मिन्नेव काले पूज्य श्री तुरैमङ्गलं शिवप्रकाशस्वामी श्रीसिद्धान्तशिखामणिं तमिळु-भाषायामनूदितवान् । एतदाधारत्रयं श्रीसिद्धान्तशिखामणेः कालः क्रि. सप्तदशतमशतमानात् पूर्व इति सूचयति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(२) ततोऽपि पूर्वं गोरकोड-मल्लिकार्जुनाचार्यस्य शिष्य उज्ञनीशनामा श्रीसिद्धान्तशिखामणेः कन्नडव्याख्यानमेकमरचयत् । मोग्गेयमायिदेवाद् (क्रि. १४३०) अनन्तरमेष आसीदिति कारणत उज्ञनीशस्य कालः क्रि. १५५० इति निर्णीत आसीत् । (पश्यत– क.क.च., पृ.२५९) । अनन्तरं श्री देवीरप्पमहोदयः संशोध्य लक्कणदण्डेशेन गोरकोडमल्लिकार्जुनाचार्यपूर्वजस्य गोरकोड-बोप्पण्णदेशिकेन्द्रस्य स्तुतिः कृतेत्यंशं पुरस्कृत्योज्ञनीशस्य कालः क्रि. १४६० इति निर्णीतवान् । (पश्यत- प्र.क., सं.२०,४,१९४९, पृ.१०५-१०६) । एवं श्रीसिद्धान्तशिखामणेः कालः क्रि. पञ्चदशतमशतमानात् प्रागेव स्यात् ।

(३) श्रीनीलकण्ठशिवाचार्यस्य कृतौ क्रियासारे श्रीसिद्धान्तशिखामणेः प्रभावः स्पष्टं दृश्यते । तत्र वीरशैवसिद्धान्तमधीतुमधिकारी क इति प्रश्नं संभाव्य तमेवं समाधीयते —

पिण्डादिज्ञानशून्यान्तमेकोत्तरशतस्थलम् ।
षट्स्थलं लिङ्गभेदं च जिज्ञासुर्भक्तिपूर्वकम् ॥
(क्रि.सा., भागः-१, पृ.२२, श्लो.६)

पिण्डादिज्ञानशून्यान्तमिति यदुक्तं तस्य विशदीकरणं श्रीसिद्धान्तशिखामणावेव लभ्यते । पिण्डस्थलादारभ्य ज्ञानशून्यस्थलपर्यन्तमेकोत्तरशतस्थलस्य सलक्षणं विशदीकरणं श्रीसिद्धान्तशिखामणावेव प्रप्रथमतया कृतमित्यस्मिन् विषये न कापि विप्रतिपत्तिरस्ति । अन्यच्च क्रियासारे श्रीसिद्धान्तशिखामणेरेकः श्लोक उदाह्रियते । अयं स श्लोकः —

अनेकजन्मशुद्धानां श्रौतस्मार्तानुवर्तिनाम् ।
विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः ॥ इति ।
(सि.शि.,९.१३; क्रि.सा., भागः-२, श्लो-१०२, पृ.१९)

क्रियासारे "मध्वबौद्धादिचार्वाकमताध्व..." (क्रि.सा., भागः-१, पृ.१८, श्लो.९९) इत्यत्र मध्वाचार्यस्य नामोल्लेखः दृश्यते । मध्वाचार्यस्य कालः क्रि.११९७-१२७२ । एवं स्थिते क्रियासारस्य कालः मध्वाचार्यस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कालादर्वाचीनः (प्रायः क्रि. १३५०-१४००) स्यात् । अतः श्रीसिद्धान्तशिखामणेः कालस्ततोऽपि प्राचीनः स्यात् ।

(४) क्रि. द्वादशशतमानस्य शरणानां वचनेषु श्रीसिद्धान्तशिखामणेः श्लोका उल्लिखिताः सन्ति । तथा हि— "नीनोलियित्ते पुण्य नीनोल्लदुदे पाप" इत्यादिनि बसवेश्वरस्य कन्नडवचने (ब.व., सं.५०५) श्रीसिद्धान्तशिखामणेरयं श्लोकः प्रमाणत्वेनोदाहृतः —

प्रसादाद्देवताभक्तिः प्रसादो भक्तिसंभवः ।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः ॥ इति ।
(सि.शि., ९.२२)

तथैव "साधकदेसेयल्लि कुलवनरसबहुदल्लदे" इत्यादिनि चन्नबसवण्णमहोदयस्य वचने (च.ब.व., सं.२३४) श्रीसिद्धान्तशिखामणेः श्लोकोऽयमुदाहृतः —

शिवभक्तिसमावेशे क्व जातिपरिकल्पना ।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते ॥ इति ।
(सि.शि., ११.५५)

पुनस्तस्यैव वचने (च.ब.व., अधिकवचन सं.३३) आदावेव श्रीसिद्धान्तशिखामणेरिदं श्लोकत्रयमुदाहृतम् —

यदा शिवकलायुक्तं लिङ्गं दद्यान्महागुरुः ।
तदारभ्य शिवस्तत्र तिष्ठत्याह्वानमत्र किम् ॥
ससंस्कारेषु लिङ्गेषु सदा सन्निहितः शिवः ।
तत्राह्वानं न कर्तव्यं प्रतिपत्तिविरोधकम् ॥
नाह्वानं न विसर्गं च स्वेष्टलिङ्गे तु कारयेत् ।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रविनिश्चयः ॥ इति ।
(सि.शि., १०.४७-४९)

अन्यच्च चन्नबसवण्ण-प्रभुदेववचनयोः श्रीसिद्धान्तशिखामणौ निरूपितमेकोत्तरशतस्थलसिद्धान्तस्योल्लेखः दृश्यते । तथा हि — चन्नबसवण्ण

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

महोदय आह — "नम्म आद्यर वचन नूरोन्दुस्थलव मीरिद महदल्लि निन्दित्तु" (च.ब.व., सं. ४७४ — अस्माकमाद्यानां वचनमेकोत्तरशतस्थलस्य महिमानमतीत्य तिष्ठति) इति । एवमेवाल्लमप्रभुदेव आह — "सर्वाचारसम्पत्ति विवरव तिळिदु नूरोन्दुस्थलद आचरणे.... षट्स्थलमार्गविडिदु" (अ.व.सं., सं. ८०० — सर्वाचारसम्पत्तिं सप्रपञ्चं विज्ञायैकोत्तरशतस्थलस्याचरणं कुर्वन्.... षट्स्थलमार्गमनुसृत्य.....) इति । द्वयोः शरणयोरेकैकस्मिन् वचने सप्तपञ्चाशल्लिङ्गस्थलानां यानि नामान्युक्तानि तानि श्रीसिद्धान्तशिखामणावुक्तानां सप्तपञ्चाशल्लिङ्गस्थलानां नामभिः संवादीनि सन्ति । एवं द्वादशशतमानस्य वचनकर्तार एकोत्तरशतस्थलसिद्धान्तं श्रीसिद्धान्तशिखामण्युक्तप्रकारेणैव जानन्ति स्मेत्यवगन्तुं शक्यते। अनेन स्पष्टं ज्ञायते श्रीसिद्धान्तशिखामणेः कालः क्रि. द्वादशशतमानात्पूर्वमेव भवितुमर्हतीति ।

(५) श्रीपतिपण्डिताराध्यस्य श्रीकरभाष्ये सन्दर्भेष्वनेकेषु श्रीसिद्धान्तशिखामणेः श्लोका विचाराश्च प्रमाणतयोदाह्रियन्ते । तथा हि—

(अ) "पवित्रम्" इति ऋग्वेदमन्त्रस्य "ऋगित्याह पवित्रं ते.... साक्षान्नाप्नुयाल्लिङ्गमुत्तमम्" (सि.शि., ६.५९-६१) इति सिद्धान्तशिखामणौ श्रीरेणुकाचार्येण लिङ्गधारणपरत्वेन निर्देशात् । (श्री.भा., भागः-१, सू.१.१.१., पृ.१९) ।

(आ) रेणुकभगवत्पादेनापि "पिण्डता पिण्डविज्ञानम्" इत्यारभ्य "एतानि शिवभक्तस्य कर्तव्यानि प्रयत्नतः" इत्यन्तेन (सि.शि., ५.२७-३१) सिद्धान्तशिखामणौ तथैवोपदिष्टम् । (श्री.भा., भागः-१, सू.१.१.१., पृ.३२) ।

(इ) इत्यादि पाराशरस्मृति-सिद्धान्तशिखामण्यादौ लिङ्गाङ्गिदेहस्य पवित्रत्वव्यपदेशाल्लिङ्गधारणपूजादेर्न विरोधः । (श्री.भा., भागः-१, सू.१.१.१., पृ.२२) ।

(ई) सिद्धान्तागमे सिद्धान्तशिखामणौ च "अगस्त्य मुनिशार्दूल समस्तागमपारग ।.... सप्तमातृपरं मिश्रं सिद्धान्तं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वेदसंमतम् ॥'' (सि.शि., ५.१-११) इत्यादिना ...... वीरशैवमेव मुमुक्षुभिरुपादेयमिति निर्दिष्टम् । (श्री.भा., भागः-२, सू.२.२.३७., पृ.४४-४५) ।

एवं श्रीकरभाष्यात्प्राचीनः श्रीसिद्धान्तशिखामणेः काल इति स्पष्टं भवति ।

कः कालः श्रीपतिपण्डिताराध्यस्य? यतस्तस्यापि कालविषये विवादोऽस्ति, इति चेदुच्यते । स च विवादो समग्रस्य तद्भाष्यस्य प्रथमसम्पादकेन श्रीहयवदनराव्महोदयेन सम्पादनशास्त्रनियमान् पक्षपातबुद्ध्याऽतिक्रामता सृष्टः । किमित्येष पक्षपातबुद्ध्यारोपः क्रियत इति चेदुच्यते । श्रीहयवदनराव्महोदयेन क्रि. १९३९ तमे वर्षे संशोध्यानेकानि हस्तलिखितपुस्तकानि श्रीपतेः श्रीकरभाष्यं प्रकटतां नीतम् । तस्मिन् भाष्यग्रन्थे त्रिषु स्थानेषु **मध्वपदविनिवेशो** दृश्यते । तथा हि —

(क) मध्व-द्वैत-क्षपणक-तार्किकादिभिर्जीवानां विभुत्वाङ्गीकारात्तन्निरासार्थमेतदधिकरणारम्भः । (श्री.भा., सू. २.३.१८) ।

(ख) मध्वादि - तार्किकादि - केवलभेदवादिनां बौद्धादिवत् सर्वश्रुतिसमन्वयाभावात्तन्मतं सुतरामसमञ्जसम् । (श्री.भा., सू. २.३.४०) ।

(ग) भागवतपाञ्चरात्रादि-मध्वादिवैष्णवमतेषु जगत्कारणेश्वरस्य शरीरपरिग्रहाद् घटपटादिवदन्तवत्त्वं विनाशित्वम् । (श्री.भा., सू. २.२.४१) ।

अत्र विचारयामः । अस्य ग्रन्थस्य सम्पादने श्रीराव्महोदयेनोपयुक्तेषु मातृकाभूतेष्वनेकेषु हस्तलिखितपुस्तकेषु मैसूरुनगरवासिनो बसवाराध्यमहोदयात् प्राप्ते केवलमेकस्मिन्नेव हस्तलिखितपुस्तके तेषु स्थानेषु **मध्वपदविनिवेशो** दृश्यते । अत्र श्री चिलकूरि-नारायणराव्महोदय आह — ''वाक्येषु तेषु मध्वशब्दमप्रस्तुतमसम्बद्धं चेति ज्ञात्वा हयवदनराव् महोदयाय मुद्रणार्थं मूलहस्तलिखितपुस्तकानि दत्तवते श्रीदेविडीजमी-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

न्दारमहोदयाय पत्रमेकं विलिख्य विज्ञापिते सति स तानि हस्तलिखित-पुस्तकानि परीक्ष्य तेषु स्थानेषु मध्वपदं नास्तीति मह्यमलिखत् ।" (पं.च., उपोद्घातः, पृ.३०-३१) । ["आ वाक्यमुललो 'मध्व' शब्दमप्रस्तुतमु, असंबद्धमनि तलचि, हयवदनरावुगारच्चुवेयडमुनकु मूलप्रतिनिच्चिन देविडी जमीन्दारुगारिकि जाबु व्रायगा वारु मूलमुनु चूचि अंदुलो आ स्थलमुलो 'मध्व' शब्दमु लेदनि नाकु व्रासिनारु ।"] एवं मातृकामेकामेव केवल-मवलम्ब्य मध्वपदस्य विनिवेशनं कृतं सम्पादकमहोदयेनेति सुतरां महदाश्चर्यस्य स्थानम् । नहि नहि, ग्रन्थसम्पादनशास्त्रनियमभङ्गस्य स्थानम् । श्रीमन्मध्वाचार्यस्य कालादर्वाचीनोऽस्य ग्रन्थस्य काल इति निर्णेतुं (क्रि. १४०० इति) मध्वपदयुक्तः पाठोऽत्र श्रीहयवदनराव्महोदयेन साधकत्वेन स्वीकृत इति पक्षपातबुद्ध्यारोपः कृतः ।

परीक्ष्यमाणेषु मध्वपदप्रयोगस्थानेषु सत्सु तेषु सर्वेषु मध्वपदप्रयोगो नितरामसमञ्जसमिति स्पष्टं ज्ञायते । प्रथमवाक्ये तावन्मध्वपदं द्वैत-क्षपणक-तार्किकादि-दर्शननामभिः सह प्रयुज्यते । तद्वाक्यानुसारं पुनः श्रीमध्वाचार्यमते विभुत्वमङ्गीकार्यं स्याज्जीवस्य । परन्तु मध्वमते जीवाना-मणुत्वं न तु विभुत्वम् । (पश्यत — "हेतूनां सकाशादणुरेव" इति, "अणोरपि जीवस्य सर्वशरीरव्याप्तिर्युज्यते" इति च — म.भा., सू.२.३.२०; २.३.२४) । द्वितीये वाक्येऽपि 'तार्किकादि-केवलभेद-वादिनाम्' इत्यनेन सह 'मध्वादि' — पदप्रयोगोऽसमञ्जसः प्रतिभाति । एवमेव तृतीयवाक्येऽप्यसामञ्जस्यं भागवतपाञ्चरात्रादिवैष्णवमतेष्वित्यनेन साकं मध्वादिपदप्रयोगस्य भासते ।

एवं विवादास्पदं निर्णयं निराकृत्य निर्णयात्मकं शासनाधारमेकं पश्यामः । विजयवाडानगरे मल्लिकेश्वरदेवालये चालुक्यवंशीयेन महा-मण्डलेश्वरेण पल्लकेतुमहाराजेन स्थापितं शिलाशासनमेकमुपलभ्यते । (मद्रास् प्रेसिडेन्सि शासनानि, भागः-२, सं.३०५; सौथ् इण्डियन् इन्स्क्रिप्षन्स्, भागः-४, पृ.४८९) । तस्मिन् श्रीपति-पण्डिताराध्य-स्याग्निस्तम्भनविद्याप्रदर्शनप्रसङ्ग एवं वर्ण्यते —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ततः पण्डिताराध्यनाम्ना भक्तोत्तमेन ।
शिवभक्त एव नूनं देवर्षिभ्योऽधिक इति ॥
चीनाम्बरेऽग्निं संस्थाप्य शमीकोमलशाखया ।
बद्धे मल्लेश्वरः प्रीतः प्रत्यक्षः समजायत ॥ इति ।

अस्य शिलाशासनस्य कालः क्रि. द्वादशशतमानमिति निश्चीयते । अनेनाधारेण श्रीपतेः कालः क्रि. १०७० इति निर्णीतमस्ति ।

श्रीपतेः कालात् प्राचीन इति निश्चितस्य श्रीसिद्धान्तशिखामणेः कालः क्रि. दशमशतमानात्प्राचीन इति निर्णेतुं शक्यते । कियान् प्राचीनः? इति पृच्छ्यते चेदुच्यते— श्रीसिद्धान्तशिखामणेः केषुचन श्लोकेषु श्रीशाङ्करवेदान्तस्य प्रभाव स्पष्टं दृश्यते । (पश्यत - सि.शि., १०.६७-६९, १७.७७) । यद्यप्येतान् श्लोकान् जगत्सत्यत्ववादस्याविरुद्धत्वेन व्याख्यातुं शक्यते तथापि शब्दशो दृष्टान्तानामुपरि श्रीशङ्करस्य प्रभावं निराकर्तुं न शक्यते । श्रीशङ्करस्य कालः क्रि. अष्टमशतमानम् । अयं कालोऽस्य श्रीसिद्धान्तशिखामणिग्रन्थस्य पूर्वसीमात्वेन स्वीकार्यो भवति । **एवं श्रीसिद्धान्तशिखामणेः कालोऽष्टमशतमानादर्वाचीनो दशमशतमानात्प्राचीनश्चेति वक्तुं पारयामः ।**

केषाञ्चन सन्देहानां निवारणम्

अत्र केचन सन्देहा अवश्यं परिहर्तव्याः सन्ति । एकोत्तरशतस्थल-सिद्धान्तस्य मूलं श्रीसिद्धान्तशिखामणिरेवेति निःसन्देहमस्माकीनः पक्षः । परन्तु केचन विद्वांसस्तद्विषये सन्देहानभिव्यञ्जन्ति । तेषु प्रथमः श्रीनन्दिमठमहोदयः । स चाह — "शिवयोगिशिवाचार्यः स्थलविभागे न किमपि नियमपालनं कृतवानिति भासते । परन्तु सूक्ष्मदृष्ट्या परिशील्यमाने सर्वेषामवान्तरस्थलानामायोजने कश्चन नियमस्तस्य मार्गदर्शनायास्तीति पश्यामः" इत्युक्तं नन्दिमठमहोदयेन । (ह्याण्ड्बुक्., पृ.१२५ – "Śivayogi Śivācārya seems to be arbitrary in his division; yet, by observing carefully all the minor

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

sthalas, we find some principle by which he is guided throughout") । अत्र श्रीनन्दिमठमहोदयेन परस्परविरुद्धे वाक्ये उक्ते इति तु स्पष्टमवगम्यते ।

तस्यैवान्यमभिप्रायं सूक्ष्मेक्षिकया विमृशामः । तेनोक्तम् — "शिवयोगिशिवाचार्येण सङ्गृह्य परम्परायै प्रदत्त एकोत्तरशतस्थलात्मकसिद्धान्तो वीरशैवस्य पारम्परिकसंस्थापकेष्वेकतमेन रेणुकाचार्येणागस्त्यमुनिमुद्दिश्य बोधित इत्युच्यते । तस्मादेकोत्तरशतस्थलानि दक्षिणादिशां प्रत्यागतस्य प्रथमस्यार्यगुरोर्मुनेरगस्त्यस्य समकालीनानीत्युक्तं स्यात् ।.... कोऽसौ रेणुकाचार्यशिष्यभूतोऽगस्त्य इति त्वस्माकं निश्चयो नास्ति । रेणुकाचार्यो रावणभ्रातुर्विभीषणस्य समकालीन इति शिवयोगिशिवाचार्य आह ।....... तथा सति यस्याश्रमे रामो वासमकरोत् स एवागस्त्य एषः । **एवमेकोत्तरशतस्थलानां प्राचीनत्वसंभावनायामपि, वसव-चन्नवसवादीनां तत्सहयोगिनां वा पुस्तकेष्वेतादृशस्थलविभाजनस्य सूचनाऽपि न लभ्यते । एवं तेषां प्राचीनताविषये प्रमाणभूतस्याधारस्याभावाद् एकोत्तरशतस्थलानां विकासः क्रि. द्वादशशतमानादर्वाचीनकाले प्रायोऽभवदिति भावयेत्**" । इति । (– "Śivayogi Śivācārya collected and handed down the doctrine of 101 sthalas said to have been formerly communicated to the sage Agastya by Reṇukācārya, one of the traditional founders of Vīraśaivism; therefore the 101 sthalas are said to be as ancient as Agastya, the mythical sage who is believed to be the first Āryan teacher to come to the South.... we are not certain which Agastya was the pupil of Reṇukācārya. Śivayogi Śivācārya mentions that Reṇukācārya was a contemporary of Vibhīṣaṇa, the brother of Rāvaṇa.... Then Agastya is the same sage in whose Āśrama Rāma lived. **In spite of this supposed antiquity of 101 sthalas, there seems to be no trace of this division in the books of Basava or**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

Cennabasava or their colleagues. For lack of authentic proof of antiquity, the development of these 101 sthalas may be taken to be later than 12th century.") ।

अत्र विचारयामः । एकोत्तरशतस्थलमित्युल्लेखयुक्तानि वचनानि श्रीसिद्धान्तशिखामणावुक्तक्रमेण सप्तपञ्चाशल्लिङ्गस्थलानामन्तर्गतनामोल्लेखानि च वचनानि (यथा च.ब.व., सं.४७४; अल्लम.व.सं., सं.८०० इत्यादि) श्रीनन्दिमठमहोदयस्य नयनपथं नाऽगतानीत्येव दुरदृष्टमयी सङ्गतिः । उक्तानुल्लेखाननुलक्ष्य श्रीनन्दिमठमहोदयस्योहां समूलमुत्पाटयितुं शक्यते । एतावदत्र सम्यगवधेयम् — श्रीरेणुकाचार्यः पुरा मुनयेऽगस्त्यायैकोत्तरशतस्थलात्मकं वीरशैवसिद्धान्तं बोधयामासेतीदं वीरशैवपरम्परायामागतम् ऐतिह्यम्, तदनुसृत्य श्रीशिवयोगिशिवाचार्यो रेणुकागस्त्यसंवादरूपेणेमं सिद्धान्तं लोकोपकाराय प्रत्यपादयद् इति ।

एकोत्तरशतस्थलानां मूलं श्रीसिद्धान्तशिखामणिर्न तु कन्नडवचनसाहित्यम्

श्रीनन्दिमठमहोदयेन तु द्वादशशतमानादनन्तरकाले एकोत्तरशतस्थलसिद्धान्तो विकासतामवापेति केवलमूहा कृता । परन्तु पूज्यश्रीइम्मडिशिवबसवस्वामिना मैसूरुनगरनिवासिना किञ्चित्कौशलमवलम्ब्य तस्यैकोत्तरशतस्थलसिद्धान्तस्य मूलं वचनसाहित्यमेवेति साधयितुं नितरां प्रयत्नः कृतः । (पश्यत— सि.शि. मत्तु श्री.भा., पृ.४३-५१) । तथा साधयितुं तेन क्रियासारस्य वाक्यद्वयमाधारत्वेन स्वीकृतम् । तत्र प्रथमं वाक्यमिदम् — "एकोत्तरशतस्थलानां षट्स्थलेष्वन्तर्गतत्वेन न तेषां पृथगुपदेशः, तद्भेदस्तु भाषाप्रबन्धादेवावगन्तव्यः" इति (क्रि.सा., भागः-३, पृ.११८) । अत्र श्रीस्वामिवर्यो भाषाप्रबन्धशब्देन वचनसाहित्यमित्यर्थं गृहीतवान् । अतस्तस्य मत एकोत्तरशतस्थलसिद्धान्तः प्रथमं कन्नडवचनसाहित्ये रूपधारणं प्राप्तः । एतन्मतं नितरामापातरमणीयम् । यथार्थतया विचार्यमाणे भाषाप्रबन्ध इत्यनेन भाषायां रचितः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कश्चन ग्रन्थ इत्येव साधीयानर्थः। अत्र भाषा नाम कन्नडभाषा, यतो हि कन्नडप्रदेशे जातस्य क्रियासारकर्तुर्भाषा कन्नडभाषैव। अत्र द्वितीयमिदं वाक्यमिमं विषयं विशदीकरोति — " 'अध्वनामध्वपते ज्येष्ठस्याध्वनः पारमशीय' इति मन्त्रेण कृतकलाविधानस्य लिङ्गस्य दीक्षापूर्वकं धारणम् इत्यागमप्रकारो भाषाप्रबन्धेऽस्मत्कृतेऽवलोकनीयः" इति (क्रि.सा., भागः-३, पृ.४९)। अनेन पूर्वमुदाहृतो भाषाप्रबन्धः क्रियासारकर्तुरेव कन्नडग्रन्थ इति स्पष्टं ज्ञायते। एवं भाषाप्रबन्धं कन्नडवचनसाहित्यमित्यसमीचीनमर्थं संभाव्यासाधनीयं साधयितुं कृतप्रयत्नेन स्वामिपादेन स्वयमेव प्रयत्न-स्यासाधुत्वमवगन्तव्यम्। **एकोत्तरशतस्थलसिद्धान्तस्य मूलं श्रीसिद्धान्त-शिखामणिरेव न तु कन्नडवचनसाहित्यम् इति तु निश्चितम्।**

दासगुप्तमहोदयस्य भ्रमाधीना कल्पना

श्रीसिद्धान्तशिखामणेः कालविषये एस्.एन्. दासगुप्तमहोदयेनाना-धारभूतमेकमंशमाधारत्वेन संभाव्य स्पष्टमेव भ्रमाधीना कल्पना कृता। दासगुप्तमहोदयो ब्रूते — "सिद्धान्तशिखामणौ बसवस्योल्लेखो विद्यते। अन्यतः श्रीपतिस्तस्य ग्रन्थस्य नामोल्लेखं कुरुते। अतः स ग्रन्थस्तयो-र्बसवश्रीपतिकालयोर्मध्यवर्तिनि काले विरचितः स्यात्" इति। (दासगुप्त, भागः-५, पृ.४४)। एतस्याधारत्वेन सव्याख्यानस्य श्रीसिद्धान्तशिखामणे-र्नवमपरिच्छेदादयं भाग उदाहृतः (९.३६) —

"अथ वीरभद्राचार-बसवेश्वराचारं सूचयन् भक्ताचारभेदं प्रतिपादयति —

शिवनिन्दाकरं दृष्ट्वा घातयेदथवा शपेत्।
स्थानं वा तत्परित्यज्य गच्छेद् यद्यक्षमो भवेत्॥" इति॥

अत्र 'बसवेश्वराचार' इत्यस्योल्लेखः श्रीमरितोण्टदार्यस्य व्याख्यानभाग-भूतायां प्रस्तुतश्लोकपीठिकायां दृश्यते न तु मूलग्रन्थभूते श्लोके। व्याख्यानभागः कः, मूलग्रन्थस्य भागः क इत्यपरिगणय्य तेन महोदयेन निर्णीयतेऽस्मिन् ग्रन्थे बसवस्य नामोल्लेखो ग्रन्थकृतैव कृत इति। अत एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तेषां वादस्य भ्रमाधीनत्वमुक्तम् । **श्रीसिद्धान्तशिखामणौ न कुत्रापि बसवेश्वरस्यान्यस्य वा तत्कालीनशरणस्य नामोल्लेखः कृतः** । अत एवास्य ग्रन्थस्य कालो द्वादशशतमानात्पूर्वतन इति निर्णीतम् ।

श्रीसिद्धान्तशिखामणेराकराः

श्रीशिवयोगिशिवाचार्यः "आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम्" (सि.शि., १.२५-३२) इत्यादि वदन् स्वग्रन्थस्याकरान् उक्तवान् । तदनुसारेण त्रयस्तावदस्य ग्रन्थस्याकराः · –

१. वेदसंहिता उपनिषदश्च ;
२. शैवागमोत्तरभागाः ;
३. शैवपुराणानि चेति ।

अत्रैषां परिचयं कारयित्वा तेभ्य आदृतान् प्रमुखविषयांश्च सङ्क्षेपेण निरूपयितुं प्रयते ।

१. वेदसंहिता उपनिषदश्च

"वेदोऽखिलो धर्ममूलम्" (म.स्मृ., १.१) इत्युक्तरीत्या सर्वासां भारतीयधर्मदर्शनपरम्पराणां मूलं वेद एवेति प्रसिद्धम् । वीरशैव-धर्मदर्शनपरम्पराया नैवापवादता । आपस्तम्बोक्तदिशा मन्त्रश्च ब्राह्मणं च वेदः – "मन्त्रब्राह्मणयोर्वेदनामधेयम्" (आ.य.प., १.१३) । सर्वा ऋगादिवेदसंहिता मन्त्रभागः, ब्राह्मणारण्यकोपनिषद आहत्य ब्राह्मण-भागः । वेदसंहितासु ऋग्वेदसंहिता प्राचीनतमा । सा च 'सूक्तानि' इति व्यवह्रियमाणानां देवतास्तोत्राणां सङ्ग्रहभूता । तत्र स्तुतिविषयीकृता देवता मूलतो निसर्गशक्तय आरोपितव्यक्तित्वशालिन्यः । अग्निः, इन्द्रः, वरुणः, रुद्रः, उषाः, पर्जन्यः, मरुत इत्यादिनामभागिन्यस्ता देवताः । देवतास्तोत्ररूपाणि सूक्तानि यानि यज्ञकार्ये स्तूयमानानि तत्राधिकानि भवन्ति । तानि धार्मिकसूक्तानीति नाम्ना पाश्चात्यविद्वांसोऽभिजानन्ति । केषुचन सूक्तेषु तत्कालीनानि सामाजिकधार्मिकाचरणानि, क्रीडाविनोद-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वैविध्यम्, साहित्यप्रकारवैविध्यं च दृश्यन्ते । तानि लौकिकसूक्तानीति नाम्ना ज्ञायन्ते । कानिचन सृष्टिविषयकाणि सूक्तानि सन्ति । तानि पुनराध्यात्मिकसूक्तानीति नाम्नाऽभिज्ञायन्ते । तेषु जगत्सृष्टिः, परमात्म-स्वरूपमित्यादिविषयेषु केचन प्रश्ना उद्भाविताः समाधत्ताश्च । अत्र शैव-वीरशैवमतेतिहासदृष्ट्या रुद्रादिसूक्तान्याध्यात्मिकसूक्तानि चाधारभूतानि । कृष्ण-शुक्लोभयसंप्रदाययुक्तायां यजुर्वेदपरम्परायां रुद्राध्यायः (तै.सं., अ.४, वा.सं., अ.१६) शैव-वीरशैवानां प्रमुख आकरः । स चैकादशानु-वाकयुक्तः । अतस्तस्य "रुद्रैकादशिनी" इति विशिष्टं नाम । ऋग्वेदीय-रुद्रसूक्तेषु यजुर्वेदीय-रुद्राध्याये च रुद्रशिवस्य स्वरूपं सम्यगवगम्यते ।

रुद्रशिवः — श्रीरुद्र-शिवस्य स्वरूपस्फुरणं तावदृग्वेदीयरुद्रसूक्तेषु दरीदृश्यते । यद्यपि ऋग्वेदे रुद्रस्तुतिपराणि समग्रसूक्तानि त्रीण्येव (ऋ.वे.,१.११४;२.३३;७.४६), तथापि केषुचन सूक्तेष्वन्यदेवताभी रुद्रस्तूयते । (ऋ.वे.,२.४३.१,२,४,५; ६.४२.११;७.४९.१२) । अन्य-स्तुतिपरेषु सूक्तेषु पञ्चसप्ततिवारं रुद्रस्य नामोल्लेखो दृश्यते । ऋग्वेदे तस्योग्रं सौम्यं चेत्युभयस्वरूपं परिभावयितुं शक्यते । तत्रोग्रस्वरूपं रुद्रत्वेन सौम्यस्वरूपं शिवत्वेन च विकासतां प्राप्ते । "स्थिरेभिरङ्गैः पुरुरूप उग्रः" (ऋ.वे., २.३३.३), "अर्हन् बिभर्षि सायकानि धन्वा अर्हन्निष्कं यजतं विश्वरूपम् । अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥" (ऋ.वे., २.३३.२०), इत्यादिषु तस्योग्रस्वरूपं वर्ण्यते । तत्कारणादेव रुद्रस्य कोपशमनाय ऋषयः प्रार्थयन्ते — "मा त्वा रुद्र चुक्रुधामा" (ऋ.वे., २.३३.४), "मा नस्तोकेषु तनयेषु रीरिषः" (ऋ.वे.,७.४६.३) इत्यादि-भिर्मन्त्रैः ।

रुद्रस्य स्वरूपं भक्तानां कृते सौम्यमेव । एतत्स्वरूपव्यञ्जकः शिव-शब्दश्च ऋग्वेदेऽष्टादशवारं प्रयुक्तः । अस्य सौम्यस्वरूपवर्णनं परिभावया-मश्चेत्तस्य रौद्रस्वरूपमेवासहजतया प्रतिभासते । ऋषिः कश्चन पृच्छति — "क्व स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः" (ऋ.वे., २.३३.७ – "हे रुद्र दयामयो रोगनिवारकः शीतलश्च कुत्र ते हस्तः")

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति । रुद्रः शतशतसहस्राण्यौषधानि सर्वरोगनिवारकाणि हस्ते बिभर्ति — "हस्ते बिभ्रद् भेषजा वार्याणि, सहस्रं ते स्वपिवाता भेषजा" (ऋ.वे., १.११४.५; ७.४६.३) । दीर्घायुष्यार्थं जनास्तस्यौषधानि प्रार्थयन्ते — "त्वादत्तेभी रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः" (ऋ.वे., २.३३.२ – "हे रुद्र भवता दत्तैः सुखकरैरौषधैः शतं वर्षाणि यावज्जीवितुमिच्छामि") इत्यादिभिर्मन्त्रैः । अत्र शिवस्याध्यात्मिकदृष्ट्या भवरोगवैद्यत्वं निरूप्यते ।

ऋग्वेदीय-दार्शनिकसूक्तानि— ऋग्वेदीयदार्शनिकसूक्तेषु "एकं सद्विप्रा बहुधा वदन्ति" (ऋवे.,१.१६४.४६) इत्यादि यदुक्तं तदेव 'सत्' जगतो कारणत्वेनोपवर्ण्यते । तदेव विश्वकर्मा (ऋ.वे., १०.८१.२), देव एकः (ऋ.वे., १०.८१.३), पुरुषः (ऋ.वे.,१०.९०.१), हिरण्यगर्भः (ऋ.वे., १०.१२१.१), तदेकम् (ऋ.वे.,१०.१२९.२) इत्यादिनामभिः स्तूयते । विश्वकर्मसूक्तद्वये (ऋ.वे.,१०.८१,८२) कथं विश्वकर्मा स्वमहिम्ना भूमिं द्युलोकं चासृजदिति वर्ण्यते । अत्र परमात्मनो जगत्सृष्टौ निमित्त-कारणत्वमुपादानकारणत्वं चेत्यभिन्नोभयकारणत्वं गम्यते । पुरुषसूक्ते (ऋ.वे., १०.९०) पुरुषेण विराट्स्वरूपधारणपूर्वकं यज्ञरूपप्रक्रियाद्वारा स्वयमेव हविरादिस्वरूपं धृत्वा जगत्सृष्टम् इति निरूप्यते । तत्र "स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्" (ऋ.वे., १०.९०.१) इत्यनेन परमात्मनो जगद्व्यापकत्वं जगदतीतस्वरूपत्वं च वर्णिते । "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" (ऋ.वे., १०.९०.२) इत्यस्मिन्नुपनिषदां "सर्वं खल्विदं ब्रह्म" (छां.उ.,३.१४.१) इत्यादिसिद्धान्तस्य मूलं दृश्यते । "पादोऽस्य विश्वा भूतानि" (ऋ.वे.,१०.९०.३), "पादोऽस्येहाभवात्पुनः" (ऋ.वे.,१०.९०.४) इत्यादिसूक्तिषु चराचरात्मकस्य जगतः परमात्मनश्च मध्येंऽशांशिभावसम्बन्धः सूचितः । एवमत्र "ममैवांशो जीवलोके जीवभूतः सनातनः" (भ.गी.,१५.७) इत्यस्य "अनाद्यविद्यासम्बन्धात्तदंशो जीवना-मकः" (सि.शि.,५.३४) इत्यस्य च मूलमभिज्ञायते । हिरण्यगर्भसूक्ते (ऋ.वे.,१०.१२१) जगतो हिरण्यगर्भमूलत्वं निरूप्यते । तेनापि जगत्सृष्टौ परमात्मनोऽभिन्ननिमित्तोपादानकारणत्वमुक्तम् । नासदीयसूक्तं (ऋ.वे.,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१०.१२९) सृष्टिविषयकसूक्तेषु महत्त्वभूतम् । तत्र सृष्टेः प्राक् न किमप्यासीत्, केवलं तदेकमिति वर्ण्यमानं परवस्तु वातरहिते तत्काले स्वशक्त्याऽनिति स्मेति वर्ण्यते — "आनीदवातं स्वधया तदेकम्" (ऋ.वे., १०.१२९.२)। तेन परमात्मनः सर्वदा शक्तिविशिष्टत्वमुक्तं भवति। एष एव वीरशैवानां मूलभूतः सिद्धान्तः । एवमनेके वीरशैवपरा मूलभूत-विचारा दर्शनिकसूक्तेषु विद्यन्ते ।

यजुर्वेदीयरुद्राध्याये परमात्मनः स्वरूपम्— अस्य रुद्राध्यायस्य महत्त्वं शैवागमोत्तरभागेषु प्रकटीकृतम् । यथा —

> विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ ।
> तत्र पञ्चाक्षरस्तत्र शिव इत्यक्षरद्वयम् ॥
>
> (का.आ., उ.भा., क्रि.पा.,८.४)

अनेन वीरशैवानामष्टावरणे विद्यमानं "नमः शिवाय" इति मन्त्र-रूपमावरणं रुद्राध्यायस्याष्टमानुवाकादादृतमिति सिद्धं भवति । केचन वीरशैवाः केवलं पक्षपातबुद्ध्या बसवेश्वरस्य कानिचन प्रासङ्गिकवचनानि प्रमाणत्वेनोद्धृत्य वीरशैवैर्वेदप्रामाण्यं नाङ्गीक्रियत इति वदन्ति । तानुद्दिश्य वक्तव्यं यत् पञ्चाक्षरमन्त्रस्य वेदमूलत्वाद् वेदप्रामाण्यानङ्गीकारे भवता-मष्टावरणमष्टावरणत्वेन नावशिष्यते परन्तु सप्तावरणत्वेन परिणमते इति। एतादृशापलापात् सर्वे सावधानाः स्युरिति सदाशयेनेतदुच्यते न त्वहं-प्रतिष्ठया। "सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिरोगता" (चं.आ., उ.भा., क्रि.पा., ८.५), "मन्त्रः पञ्चाक्षरो ह्येष सर्वश्रुतिशिरोगतः" (सि.शि.,८.७) इत्यादिवाक्यानि पञ्चाक्षरमहामन्त्रस्य सर्वमन्त्रश्रेष्ठत्वं मन्त्रसार्वभौमत्वं च प्रतिपादयन्ति ।

रुद्राध्याये परमात्मनो मङ्गलशरीरभूतस्य लिङ्गस्य वर्णनं क्रियते —

> या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
> तया न स्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥
>
> (तै.सं.,४.५.१.३)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अत्र "गिरिशन्त, अभिचाकशीहि" इति वचनं विशिष्टे कस्मिंश्चित्स्वरूपे परमात्मानं द्रष्टुं भक्तानामिच्छामभिव्यनक्ति । ["पवित्रं ते विततं ब्रह्मणस्पते" (ऋ.वे.,९.८३.१) इत्यस्य मन्त्रस्य संवादी मन्त्रोऽयम्] रुद्राध्याये द्वितीयानुवाकादारभ्य नवमानुवाकपर्यन्तमष्टस्वनुवाकेषु रुद्रं प्रति शतनामोल्लेखपूर्वकं नमस्कारः समर्प्यते । अतो रुद्राध्यायस्य शतरुद्रीय-मिति नामान्तरं प्रसिद्धम् । "अत्र वर्ण्यमानो रुद्रः सर्वव्यापी । स च जङ्गमे स्थावरे वा चेतनात्मकेऽर्धचेतनात्मकेऽचेतनात्मके वा सर्वत्र जगति सर्वांशेषु च निहितोऽस्ति ।" (रु.हि., पृ.४२ — "Rudra is described here as all-pervading. He is in every aspect of creation, moving or non-moving, conscient or subconscient.")। नामसु तेषु दिशां पतिः, अन्नानां पतिः, पुष्टानां पतिः, वनानां पतिः, पशूनां पतिः, इत्यादि पतित्वद्योतकनामानि शैवागमोक्ततत्त्वत्रयघटक-भूतस्य पतितत्त्वस्य द्योतकानि भवन्ति । श्वेताश्वतरोपनिषदि "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" (श्वे.उ.,१.१२) इति यदुक्तं तत्त्वत्रयं तत्पतिपशुपाशरूपतत्त्वत्रयस्य संवादि । श्रीसिद्धान्त-शिखामणावपि विषयोऽयं प्रतिपाद्यते । (पश्यत — सि.शि.,५.३८-४३) । इदं च शैव-वीरशैवोभयमतसंमतम् ।

अन्यच्च रुद्राध्यायस्य चतुर्थानुवाके सर्वप्रकारेभ्यो जनेभ्यः, "नमः" इत्युक्तिपूर्वकं गौरवं प्रकटीक्रियते । तथा हि —

नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमः ।
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः ।
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः ।
(तै.सं.,४.५.४.७,१२,१३)

एवमेव इषुधनुरादिनिर्मातृभ्यः, व्याधेभ्यः, श्वानपोषकेभ्यः, जलचर-ग्राहकेभ्यः, चर्मकारेभ्यः, इतरेभ्यश्च सामान्यजनेभ्यो नमस्कारः समर्प्यते । (तै.सं.,४.५.४.१५-१७) । अत्रेदमवधेयम् — विविधेषूद्योगेषु निरता जनाः स्वस्वोद्योगद्वारा समाजस्य योगक्षेमं वहन्तीति कारणतस्तेभ्यः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वेभ्यो विना तारतम्यं समानतया गौरवं प्रदर्श्यत इति । इदं च समानवृत्तिगौरवयुक्तस्य समाजस्य चित्रम् । शैवागमेषु श्रीसिद्धान्त-शिखामणौ च सर्वसमभावबन्धुरं धार्मिकं सामाजिकं च विश्वबन्धुत्वं विजृम्भते । एतदेकं वैशिष्ट्यं वीरशैवस्य । पश्यत —

(१) ब्राह्मणा क्षत्रिया वैश्याः शूद्रा ये चान्यजातयः ।
लिङ्गधारणमात्रेण शिवा एव न संशयः ॥

न बालवृद्धभेदोऽस्ति नमस्कारादिपूजने ।
सर्वेऽपि वन्दनीया हि विधवापुष्पिणीमुखाः ॥

यस्यास्ति भक्तिरीशानि वीरशैवमताश्रये ।
भक्तिमात्रपवित्रा हि सर्व एवाधिकारिणः ॥

(पार.आ.,१.५८,६१,६२)

(२) शिवभक्तिसमावेशे क्व जातिपरिकल्पना ।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते ॥ (सि.शि.,११.५५)

उपनिषदः— उपनिषदां वेदान्तदर्शनं भारतीयदर्शनमन्दिरस्य शिखरायते । वेदान्तभूता उपनिषदो वेदान्तदर्शनस्य प्रस्थानत्रये प्रथमं प्रस्थानम् । अस्य श्रुतिप्रस्थानमिति प्रसिद्धं नाम । स्मृतिप्रस्थानमिति प्रसिद्धं गीताप्रस्थानं सूत्रप्रस्थानमिति प्रसिद्धं ब्रह्मसूत्रप्रस्थानं चावशिष्टं प्रस्थानद्वयम् । चतुर्वेदीयशाखासम्बद्धानाम् उपनिषदां संख्याऽहत्य ११८० (अशीत्युत्तरैकादशशतम्) इति ज्ञायते । (मु.उ.,१.१२-१४) । तासु चोपनिषत्सु १०८ (अष्टाधिकशतम्) उपनिषदः प्रमुखाः । उक्तं च — "सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्" (मु.उ.,१.४४) । पुनस्तेषां मध्य ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीयैतरेय-छांदोग्य-बृहदारण्यक-कौशीतकी-श्वेताश्वतर-मैत्रायणीय-महानारायणोपनिषद इति चतुर्दशोपनिषदः, शैवोनिषदिति प्रसिद्धया श्वेताश्वतरोपनिषदा सहाथर्वशिखा-अथर्वशिरः-कैवल्य-दक्षिणामूर्ति-पञ्चब्रह्म-बृहज्ञाबाल-भस्मजाबाल-रुद्राक्षजाबाल-जाबाल-मैत्रेयी-हंस-रुद्रहृदय-नीलरुद्र-रुद्र-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्ग-शिवसङ्कल्प-शिव-सदानन्द-सिद्धान्तशिखा-सिद्धान्तसारादिशैवोपनिषदश्च शैवानां वीरशैवानां कृते प्रमाणभूताः सन्ति । तासामुल्लेखाः शैव-वीरशैवग्रन्थेषु बहुधा लभ्यन्ते ।

एता उपनिषदो वीरशैवस्य धार्मिक-दार्शनिकपारिभाषिकताया मूलमित्यस्मिन् विंषये न कोऽपि विरोधो विवादो वा भवितुमर्हति । यदुपनिषत्सु जगत्कारणत्वेन वक्ष्यमाणं ब्रह्मेति व्यपदिष्टं वस्तु प्रसिद्धं तदेव परशिवतत्त्वमित्युक्तम् (सि.शि.,१.२) —

ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ।
वेदान्तिनो जगन्मूलं तं नमामि परं शिवम् ॥ इति ।

तेनोपनिषत्प्रसिद्धं ब्रह्मैव शिव इति वदता शिवयोगिशिवाचार्येण यद्यद्ब्रह्मविषये चोपनिषत्सूक्तं तत्सर्वं शिवविषयेऽन्वेतीत्यभिप्रेतम् । यथोक्तं प्राक् वीरशैवानां शिव-शक्तिसमवेतत्वरूपं मूलभूतं तत्त्वं यत्स्वीकृतं तस्य मूलमृग्वेदीये नासदीयसूक्ते लभ्यते । इदमेव तत्त्वं श्वेताश्वतरोपनिषदि चैवं विशदीक्रियते —

एको हि रुद्रो न द्वितीयाय तस्थुर्य इमान् लोकानीशत ईशनीभिः ।
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।
(श्वे.उ.,३.२;४.१०;६.८) इति ।

एतासामुक्तीनां सारं सङ्गृह्य श्रीशिवयोगिशिवाचार्य आह —

इच्छाज्ञानादिरूपेण यः शम्भोर्विश्वभाविनी ।
वन्दे तां परमानन्दप्रबोधलहरीं शिवाम् ॥ (सि.शि.,१.११) इति।

भक्त-माहेश्वर-प्रसादि-प्राणलिङ्गि-शरणैक्येति षट्स्थलात्मके वीरशैवसाधनमार्गे वीरशैवानां धार्मिकाचारा दार्शनिकविचाराश्च सम्मिलिताः सन्ति । अष्टावरणानि पञ्चाचाराश्च तत्साधनमार्गे समायोजिताः सन्ति । स च साधनमार्गो ज्ञानभक्तिक्रियासमन्वयात्मक इत्यपि ज्ञायते । "अन्ध-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी'' (सि.शि.,१६.१२) इत्यनेन ज्ञानकर्मणोः समन्वय उक्तः । तत्र भक्तिस्तयोः समन्वयकारिणी । एवं कर्म पूर्वः पक्षः ज्ञानं चोत्तरपक्षो भक्तिः सन्धिरिति तैत्तिरीयोपनिषद्वाणीमनुकृत्य वक्तुं शक्यते । षण्णां स्थलानां क्रमो नाम भक्तिविकासक्रमः । एकैकस्मिन् स्थले तदाश्रितेष्ववान्तरस्थलेषु भक्तिविकासानुगुणं कर्मणः परिपाकता ज्ञानस्य स्थिरता च जायेते । भक्तस्थले श्रद्धाभक्तिः, माहेश्वरस्थले निष्ठाभक्तिः, प्रसादिस्थलेऽवधानभक्तिः, प्राणलिङ्गिस्थलेऽनुभावभक्तिः, शरणस्थल आनन्दभक्तिः, ऐक्यस्थले च समरसभक्तिरिति तत्तत्स्थलाश्रितो भक्तिविकासक्रमो दृश्यते ।

भक्तस्थलान्तर्गतत्वेन दीक्षात्रयेण शिष्ये लिङ्गत्रयानुसन्धानं सम्पाद्य श्रीगुरुस्तम् अष्टावरणसम्पन्नं करोति । गुरुः, लिङ्गम्, जङ्गमः, भस्म, रुद्राक्षः, मन्त्रः, पादोदकम्, प्रसादश्चेति घटका अष्टावरणस्य । प्रप्रथमतयैतेषामुल्लेखो रुद्रोपनिषदि दृश्यते । तत्र प्रथमं गुरु-लिङ्ग-जङ्गमानामुल्लेखः — **''जङ्गमरूपः शिवः शिव एव जङ्गमरूपः । .....ओम् आत्मा । परशिवद्वयो गुरुः शिवो गुरुः शिव एव लिङ्गम्''** (रु.उ.,उ.सं., भागः-२, पृ.३०८-९) । अनन्तरं तस्यामेवोपनिषदि मन्त्र-भस्म-पादोदक-निर्माल्यानि कथितानि—**''ब्राह्मणः पञ्चाक्षरमनुभवति। ब्राह्मणास्त्रिपुण्ड्रधृतः । लिङ्गाभिषेकं निर्माल्यं गुरोरभिषेकतीर्थं माहेश्वरपादोदकं जन्ममालिन्यं क्षालयति''** (रु.उ.,उ.सं, भागः-२, पृ.३०९)

वज्रपञ्जरोपनिषदि भस्मधारणस्थानान्युक्तानि (व.उ.,उ.सं.,भाग-२, पृ.३११-३१२)। जाबाल्युपनिषत्, बृहज्जाबालोपनिषत्, भस्मजाबालोपनिषत्, रुद्राक्षजाबालोपनिषत्, इत्यादिनीषूपनिषत्सु भस्मनिर्माणविधानम्, भस्मोद्धूलन-भस्मस्नान-त्रिपुण्ड्रधारणादिविधयः, भस्मधारणस्थानानि, रुद्राक्षोत्पत्तिः, रुद्राक्षमहत्त्वम्, रुद्राक्षधारणं चेति विषयाः प्रपञ्चिताः सन्ति (शै. उ. पृ. ६७, ६८, ८८, ८९, ९७-१२३, १५६-१६४, १२९-१३३) । सर्वेषामेवमष्टावरणघटकानामुल्लेख उपनिषत्सु लभ्यते । केवलमष्टावरणशब्दस्य प्रयोगो नास्ति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गधारणविषये सदानन्दोपनिषदि लिङ्गधारणस्य द्वैविध्यमुक्तम् अन्तर्लिङ्गधारणं बहिर्लिङ्गधारणं चेति —

अन्तर्बहिर्धारितं परं ब्रह्माभिधेयं शाम्भवं लिङ्गम् ।
आधारे दहरेऽव्यक्ते स्वर्णस्फटिकवैद्रुमम् ।
निरन्तरानुसन्धानात् तदन्तर्धारणं विदुः ॥
....
अन्तर्धारणशक्तेन ह्यशक्तेन द्विजोत्तमाः ।
संस्कृत्य गुरुणा दत्तं शैवं लिङ्गमुरःस्थले ।
धार्यं विप्रेण मुक्त्यर्थे शिवतत्त्वविदो विदुः ॥
(स.उ.,उ.सं.,भागः-२, पृ.३७८)

अयं विषयः श्रीसिद्धान्तशिखामणौ निरूपितः । (पश्यत-सि.शि.,६.३९, ४१,४८) । "इष्टप्राणभावेषु लिङ्गधारणं वदन्ति" इति, "सर्वदेहेषु लिङ्गधारणं भवति" इति च लिङ्गोपनिषद्युक्तम् । (लिं.उ.,उ.सं., भागः-२, पृ.३११) । तेनेष्टलिङ्गं स्थूलदेहे, प्राणलिङ्गं सूक्ष्मदेहे, भावलिङ्गं कारणशरीरे चेति त्रिविधदीक्षाद्वारा त्रिविधलिङ्गानां धारणक्रम उक्तः । सदानन्दोपनिषदि पुनस्त्रिविधलिङ्गानां स्वरूपं धारणविधिश्च निरूप्यते— "यदिदं लिङ्गं सकलं सकलनिष्कलं निष्कलं च स्थूलं सूक्ष्मं च तत्परं स्थूले स्थूलं सूक्ष्मे सूक्ष्मं कारणे तत्परं च" (स.उ.,सं.,भागः-२, पृ.३७९) इति । अयं लिङ्गस्वरूपधारणादिविषयाः शैवागमोत्तरभागेषु श्रीसिद्धान्तशिखामणौ च सप्रपञ्चं निरूपिताः सन्ति । (पश्यत— चं.आ., उ.भा., क्रि.पा., २.२३-२५, ४५-४७; सि.शि.,६.३०,३९-४८,५९-६२) ।

स्थलक्रमेण भक्तिविकासस्य विषय उपनिषदः— भक्तस्थले श्रद्धा भक्त्या गुरुलिङ्गजङ्गमानां पूजोपचारः पादोदकप्रसादस्वीकारश्च विधीयेते। अत्र श्वेताश्वतरोपनिषदः प्रभावः दृश्यते —

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिताः ह्यर्थाः प्रकाशन्ते महात्मनः ॥ (श्वे.उ.,६.२३)

अत्र श्रद्धाभक्तेः काचन सूचना विद्यते ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रद्धाभक्तेर्निष्ठाभक्तित्वेन विकासे जाते भक्तो माहेश्वरो भवति। शिवसर्वोत्तमत्वे विश्वासदार्ढ्यमेव निष्ठाभक्तिः। तदेव माहेश्वरस्य प्रधानं लक्षणम्। अस्य स्वरूपस्य मूलं श्वेताश्वतरोपनिषदि दृश्यते —

यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः।
हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु॥
(श्वे.उ., ३.४)

अथर्वशिखोपनिषदि चोक्तम् — "शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य" (३.४) इति। अत्र शिव एव मङ्गलकरः, मोक्षरूपशुभप्रदाता, अतः स एको ध्येयो नान्यः कोऽपि देव इति शिवनिष्ठा साग्रहं प्रदर्शिता।

प्रसादिस्थलेऽवधानभक्तिर्भवति। अवधानं नाम सर्वदा सर्वत्र शिवभावस्य जागृतिः। तदर्थं मनोनैर्मल्यमपेक्ष्यते। अयं विचारो मैत्रेय्युपनिषदा प्रभावितः। पश्यत —

चित्तस्य हि प्रसादेन हन्ति कर्म फलाफलम्।
प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते॥ (मै.उ., १.४.६)

गुरुलिङ्गजङ्गमप्रसादेनास्याहारशुद्धिः सम्भाव्यते। आहारशुद्ध्यैव तत्त्वशुद्धिरित्यंशः "आहारशुद्धौ तत्त्वशुद्धिः" इति छान्दोग्योपनिषदि (६.२६.२) समर्थितः।

प्राणलिङ्गिस्थलेऽनुभावभक्तिरवधानभक्तिपरिपाकरूपा। तत्र योगद्वाराऽन्तर्लिङ्गानुसन्धानं विशेषः। प्राणापानवाय्वोः सङ्घर्षेण दीपितं ज्योतिःस्वरूपं यत् प्राणलिङ्गं तदनुसन्धानपूर्वकं शुद्धैर्भाववस्तुभिर्मनसा पूजनं विधीयते। अस्य मूलसंस्फूर्तिः कठोपनिषदि दृश्यते। पश्यत —

ऊर्ध्वं प्राणमुन्नयत्यापानं प्रत्यगस्यति।
मध्ये वामनमासीनं विश्वे देवा उपासते॥
अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः॥ (क.उ., ५.३; ४.२३)

तत्रैव प्राणलिङ्गिस्थलाश्रिते शिवयोगिसमाधिस्थले (सि.शि., १२.२५-२७) वर्णितस्य शिवयोगस्य मूलस्फूर्तिर्हंसोपनिषदि विद्यते। तथा हि— "गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गत्वाऽनाहतमतिक्रम्य विशुद्धौ प्राणान्निरुध्याज्ञामनुध्यायन् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहमित्येवं सर्वदा ध्यायन्नथो नांदमाधाराद्ब्रह्मरन्ध्रपर्यन्तं शुद्ध-स्फटिकसंकाशं स वै ब्रह्म परमात्मेत्युच्यते।" (हं.उ.,१)।

आनन्दभक्तिविशिष्टे शरणस्थले सर्वार्पणभावः सतीपतिभावसाम-रस्यं च विद्येते। अस्य मूलप्रेरणा बृहदारण्यकोपनिषदि दृश्यते। पश्यत — "यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्।" (बृ.उ.,४.३.२१)।

तथैव समरसभक्तियुक्तस्यैक्यस्थलस्य स्वरूपं तु जले जलमिव, अग्नावग्निरिव शिवजीवयोः समरसैक्यमेव। अस्य मूलमेतदस्ति —

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तंगच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥ इति।
(मुं.उ.,३.२.८)

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापि यन्ति समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति। एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति। (छां.उ.,६.१०.१-२) इति।

एवं षट्स्थलानां मुख्यांशा उपनिषदां मूलप्रेरणया स्वरूपं धार-यन्तीति वक्तुं शक्यते।

अन्यच्च श्रीसिद्धान्तशिखामणेर्व्याख्याता श्रीमरितोण्टदार्य एकोत्तर-शतस्थलानां निरूपणक्रमे केषुचनावान्तराङ्गलिङ्गस्थलानां निरूपणारम्भे दत्तासु पीठिकासु तत्तत्स्थलस्य मूलप्रेरणात्वेनोपनिषदां वाक्यान्युदाहरति। तेन न केवलं प्रधानस्थलानां षण्णां परं त्ववान्तरस्थलानामपि निरूपणे उपनिषद्वाक्यानि प्रमाणभूतानीति ज्ञायते।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

२. शैवागमोत्तरभागाः

"सिद्धान्तः" इति प्रसिद्धानां कामिकादिवातुलान्तानाम् अष्टाविंशतिशैवागमानामुत्तरभागेषु वीरशैवमतं प्रतिपादितमिति श्रीसिद्धान्तशिखामणावुक्तम् (५.१४)। सर्वे शैवागमा नोपलभ्यन्ते। तेषां केचन पूर्वभागाः केचनोत्तरभागा इदानीमुपलब्धाः सन्ति। उपलब्धानां प्रमुखशैवागमोत्तरभागानां नामान्यत्र दत्तानि — (१) चन्द्रज्ञानागमः-क्रियाचर्यापादौ, (२) पारमेश्वरागमः, (३) सूक्ष्मागमः-क्रियापादः, (४) कारणागमः-क्रियापादः, (५) मकुटागमः-क्रियाचर्यापादौ, (६) वीरागमः, (७) सुप्रभेदागमः, (८) स्वायंभुवागमः, (९) पाशुपतागमः (उपागमः), (१०) वातुलशुद्धागमः (उपागमः)।

एतेषां शैवागमानां कालविषये बहुचर्चा प्रवर्तते। "आगमो नाम आमहेश्वरात् गुरुपरम्परागतं ज्ञानं" (पा.सू.) इत्युक्तदिशा शैवागमा दीर्घकालपर्यन्तं तत्तत्कालखण्डेषु वृद्धिं गतानां धार्मिकदार्शनिकविषयाणां प्रक्षेपद्वारा विकासतां प्राप्ताः सन्तो गात्रेऽवर्धन्त। अतः कालविषये तेषां निश्चयेन वक्तुं न शक्यते। तेषु केचन भागाः प्राचीना अपि भवितुमर्हन्ति। ते तु वेदकालादर्वाचीना इत्यस्मिन् विचारे कोऽपि विवादो नास्ति। यज्ञ-यागादिकर्मसु वेदमन्त्राणामन्वयद्वारा वेदस्य ब्राह्मणभागाः सिद्धा अभवन्। एतेषां ब्राह्मणानां कालान्तरे परिवर्तित-भागा एवागमा इत्येकोऽभिप्रायोऽस्ति। (पश्यत — शै.आ.सौ., मुन्नुडि — डा॥ एस्.के. रामचन्द्रराव्, पृ.३)। वेदमन्त्राणामनुष्ठानपद्धतिः, तया सम्बद्धाः पूजाक्रमाश्च शैवागमानामारम्भकाले विनिवेशिताः स्युः। अनन्तरं देवमन्दिरनिर्माणम्, मूर्तिरचना, प्रतिष्ठापनम्, इत्यादिविषयास्तेषु प्रपञ्चिताः स्युः। तत्रारम्भकालस्य निश्चयार्थं केचनाधारा उपलब्धेषु शैवागमेषूपलभ्यन्ते। तेषां मध्येऽयमेक आधारः —

आदौ तु सौगतमतं तच्च पञ्चविधं प्रिये।
बौद्धसौगतचार्वाकजैनार्हतविभागतः॥ (पार.आ.,१.८) इति।

अत्र स्पष्टं बौद्धजैनमतयोरुल्लेखो दृश्यते। अतः शैवागमानां कालः क्रि.पू. पञ्चमशतमानस्यादिरिति वक्तुं शक्यते। तत आरभ्य कियत्काल-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पर्यन्तं तेषां वृद्धिः जाता इति निश्चेतुं न शक्यते । विशेषतया वीर-शैवपराणां शैवागमोत्तरभागानां कालं निर्णेतुं केचनाधाराः समुपलभ्यन्ते। तत्र प्रथमः श्रीसिद्धान्तशिखामणिः । अयं ग्रन्थः शैवागमोत्तरभागानां सारसङ्ग्रह इति स्पष्टं ज्ञायते । अस्य ग्रन्थस्य कालः क्रि. दशमशतमानादपि प्राचीन इति निर्णीतमस्ति । बसवादिशरणानां कन्नडवचनानि द्वितीय आधारः । तेषु वचनेषूदाहृतानां संस्कृतश्लोकानां मध्ये तु शैवागमोत्तर-भागेभ्य उदाहृतानां श्लोकानां संख्या अधिका । तेषु केचनश्लोका उपलब्धेषु शैवागमोत्तरभागेषु लभ्यन्ते ।

तथा हि —

(अ) एकमूर्तेस्त्रयो भागा गुरुर्लिङ्गं च जङ्गमः ।

(चं.आ.,उ.भा.,क्रि.पा.,५.१५; च.ब.व.,सं.४६८)

[“गुरुलिङ्गजङ्गमव ‘एकत्रय’ वागि काणलरियदिद्दडे” इत्यदिनि बसवेश्वरवचनवाक्ये (ब.व.,सं.७८३) ‘एकत्रय’ शब्दे ‘एक-मूर्तेस्त्रयो भागाः’ इत्यस्य छाया दृश्यते ।]

(आ) ओंकारवदना देवी वायकारभुजद्वयी ।
शकारमध्यदेहा च नमःकारपदद्वयी ॥

(चं.आ.,उ.भा.,क्रि.पा.,११.३९;च.ब.व.,सं.२६०)

(इ) दीयते लिङ्गसम्बन्धः क्षीयते च मलत्रयम् ।
दीयते क्षीयते यस्मात्सा दीक्षेति निगद्यते ॥

(का.आ.,उ.भा.,क्रि.पा.,१.७; च.ब.व.,सं.५८४)

(ई) यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।

(चं.आ.,उ.भा.,क्रि.पा.,२.७;च.ब.व.,सं.६६४)

(उ) आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयं सर्वभूतानां लयनाल्लिङ्गमुच्यते ॥

(चं.आ.,उ.भा.,क्रि.पा.,३.५१;च.ब.व., अधिकवचनं सं.३३)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(ऊ) न वीरशैवसदृशं मतमस्ति जगत्त्रये । (पार.आ.,१.१२)
(इयमुक्तिर्बहुषु वचनेषूदाहृताऽस्ति)

'वीरागमे' इति नामोल्लेखपूर्वकमेतौ श्लोकौ चन्नबसवण्णस्य वचने (सं.२३४) उदाहृतौ —

किं मांसं का शिवे भक्तिः किं मद्यं कः शिवार्चकः ।
मद्यमांसरतानां च दूरे तिष्ठामि शाङ्करि ॥
पशुं हत्वा सुरां पीत्वा कृत्वा पललभोजनम् ।
येनैवं गम्यते स्वर्गं नरकः केन गम्यते ॥

एतौ श्लोकौ मुद्रितेषु वीरागमग्रन्थेषु नोपलभ्येते । एवमेव बहवो वचनेषूदाहृताः श्लोका उपलब्धेषु शैवागमोत्तरभागेषु न लभ्यन्ते । नूनं बहवः शैवागमभागा नष्टाः स्युः । ये च वचनेषु शैवागमश्लोका उपलभ्यन्ते तान् संगृह्य विषयानुसारं विभाजयामश्चेत् वीरशैवधर्मदर्शनयोः परिचयः समग्रं भवतीति मे मतिः ।

अत इदानीमुपलभ्यमानाः शैवागमोत्तरभागाः कन्नडवचनसाहित्य-कालात् क्रि.द्वादशशतमानात्प्रागेवान्तिमस्वरूपमधरन्तेति वक्तुं शक्यते । अष्टमदशमशतमानयोर्मध्यकाले विरचित इति निर्णीतस्य श्रीसिद्धान्त-शिखामणेः मूलसाहित्यं शैवागमोत्तरभागात्मकमिति स्पष्टं ज्ञातत्वात् तेषां कालः क्रि.अष्टमशतमानात्प्रागेवेति निर्णेतुं शक्यते ।

शैवागमोत्तरभागानां विषयसङ्क्षेपः

उपलभ्यमानेषु शैवागमोत्तरभागेषु **चन्द्रज्ञानागमोत्तरभागस्य** क्रिया-पादचर्यापादयो-र्वीरशैवानाम् अष्टावरणानि पञ्चाचारा अन्त्येष्टि(-शिव मेध-)क्रियाश्च निरूप्यन्ते । अतोऽस्यागमस्य प्राशस्त्यमधिकं भवति । **पारमेश्वरागमस्य** त्रयोविंशतिपटलेषु वीरशैवपरा बहुविषयाः प्रपञ्चिताः सन्ति । अयमागमो वीरशैवविश्वकोशतया प्रतिभाति । **सूक्ष्मागमे** केवलं क्रियापादीयदशपटलाः सन्ति । तेषु सूक्ष्मविचारा अनेके सम्यङ्निरूपिताः सन्ति । शिवतत्त्वस्य स्वरूपम्, तस्य सर्वदा शक्तिविशिष्टत्वम्, शिवशक्त्योः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वरूपस्य नादबिन्द्वात्मकत्वम्, पञ्चसादाख्यानि पञ्चकलाश्च, शिवतत्त्वस्य स्थूलं सूक्ष्मं परं चेति त्रैविध्यम्, शिवस्य निर्गुण-सगुण-स्वरूपे, पञ्चाक्षर-षडक्षरोभयात्मकस्य मन्त्रस्य महत्त्वम्, पञ्चयज्ञाः (वीरशैवानाम्), भावप्राणेष्टलिङ्गानामेकभावतः पूजा, आचारादिषड्विधलिङ्गेष्वेकैकस्य षड्विधभक्तत्वं परिगणय्याहत्य ३६ भक्तानां स्वरूपम्, इत्यादिविषयाः प्रतिपादिताः सन्ति वैशद्येन ।

कारणागमस्य क्रियापादीय-दशपटलेषु वीरशैवस्य महापाशुपत-व्रतम्, शाम्भवव्रतम्, शिरोव्रतम्, अत्याश्रमव्रतमित्यनेकनामभाजनत्वं प्रतिपाद्यते । दीक्षात्रयस्य वेधामन्त्रक्रियात्मकस्य निरूपणे प्रत्येकस्या दीक्षायाः सप्तविधत्वं प्रदर्श्याहत्यैकविंशतिदीक्षाप्रकारा निरूप्यन्ते । चतुर्थपटलादारभ्य सप्तमपटलपर्यन्तं चतुर्षु पटलेषु लघ्वी गुर्वी महती चेति पूजात्रयं तदर्थमपेक्षितसामग्रीश्चाधिकृत्य बहुप्रपञ्चितम् । तत्र विशेषतः सप्तमपटले षट्स्थलपूजाया विधानं नावीन्यं महत्तां च भजते । एवमेव तस्मिन्नेव पटले कथं भक्तादिस्थलेषु गन्धादिपदार्थानां नासिकादीन्द्रिय-द्वारा सद्योजातादिमुखसङ्केतभूतेभ्यः क्रियाशक्त्यादिविशिष्टेभ्य आचारादि-लिङ्गेभ्यः सुचित्तादिहस्तैः श्रद्धादिभक्तिभिर्नकारादिमन्त्रोच्चारपूर्वकं समर्पणं करणीयमिति यद्वर्ण्यते तत्सर्वं सुतरां सूक्ष्मं मनोहरं प्रेरणादायि च । अस्यागमस्यान्योऽपि विशेषो विजृम्भते । पटलेषु तत्तद्विषयप्रतिपादनावसरे देवीशिवयोः संवादाः भवन्ति । तेषु लोकबोधाय पार्वती कांश्चन प्रश्नान् करोति शिवः समाधत्ते च । अत्र कानिचिदुदाहरणानि दीयन्ते —

(अ) द्वितीय पटले —

पार्वती - 'ज्ञानादेव तु कैवल्यम्' इति वदन्ति किल । तथा चेत् शम्भवव्रतस्य (वीरशैवस्य) प्रयोजनं किम्?

शिवः - मुक्तिस्तु ज्ञानादेव; परं तु शाम्भवव्रतं विना ज्ञानं नोदेति । शाम्भवव्रतादेव मुक्तेरधिकारः । अदीक्षितायापवित्राय दत्तं ज्ञानं वृथा मरुभूमौ बीजरोपणमिव ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(आ) नवमे पटले —

पार्वती - प्राप्तशिवदीक्षोऽन्यदेवतानां स्मरणपूजने कर्तुमर्हति वा न वा?

शिवः - यथा कस्यचन राज्ञः सेवको राजानुज्ञया मन्त्र्यादिसेवां कर्तुमर्हति तथा शिवभक्तोऽवसरे सञ्जाते शिवाज्ञेयमिति मत्त्वान्यदेवतास्मरण-पूजने कर्तुमर्हति ।

(इ) दशमे पटले —

पार्वती - शयनसमये पार्श्वपरिवर्तनेनान्तर्गतेष्टलिङ्गा सज्जिका देहस्याधस्तादागच्छेत् । तस्य दोषस्य प्रायश्चित्तं किम्?

शिवः - शयने पत्या सह सुप्तायाः पत्न्याः कदापि निद्रायां पादस्पर्शः संभाव्यते । तत्प्रायश्चित्तत्वेन पत्न्या प्रातरुत्थाय पत्युः पादौ संस्पृश्येते । तथैव प्रातरुत्थानसमनन्तरमेव लिङ्गसज्जिकां नेत्रे संस्पृश्य नमस्कुर्यात् ।

मकुटागमे क्रियापादश्चर्यापादश्चेति पादद्वयमुपलभ्यते । क्रिया-पादीयपञ्चपटलेषु शाम्भवव्रतमाहात्म्यम्, पूजाप्रकाराः, पूजोपकरणानि, इत्यादि विषया प्रस्तूयन्ते । वेधामन्त्रक्रियाख्यदीक्षात्रैविध्येन कारणसूक्ष्म-स्थूलशरीरेषु विद्यमानमाणवमायीयकार्मिकात्मकं मलत्रयं निर्दग्ध्वा भावप्राणेष्टाख्यलिङ्गत्रयं स्थापयेदिति विधीयते । महती, गुर्वी, लघ्वी, अवसरा चेति चत्वारः पूजाप्रकाराः, गुरुशरणागतिपद्धतिः, इत्यादिविषया निरूप्यन्ते । चर्यापादीयदशपटलेषु विशेषतया वीरशैवानामन्त्येष्टि-(शिव-मेध)-विधिः साङ्गोपाङ्गं प्रतिपाद्यते । अनेके प्रश्नाः कृताः समाधताश्च। तत्रेकः प्रश्नः - शिवस्य नैवेद्यं स्वीकर्तव्यं वा न वेति । शिवस्य प्रसादः चतुर्विधपुरुषार्थप्रदः । ये पवित्रास्तैरेव शिवप्रसादः स्वीकार्यः, अन्यैर्न स्वीकार्य इति विधीयते ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वीरागमस्य प्रथमभागः प्रथमं डा ॥ मल्लेदेवरुमहोदयेन सम्पादितः, १९८८ तमे वर्षे मैसूरनगरे प्राच्यविद्यासंस्थाद्वारा प्रकटितश्च । अनन्तरं पूज्यश्री ज.च.नि.सम्पादितः समग्रवीरागमो गदग-बेटगेरिनगरद्वय-सम्बद्धेन जगद्गुरुपञ्चाचार्यसेवासङ्घेन १९९२ तमे वर्षे प्रकटतां नीतश्च । द्वयोर्ग्रन्थयोर्मध्ये बहुभेदोऽस्ति । द्वयोरपि ग्रन्थयोः पाठो दोषभूयिष्ठः । विषयाणां निरूपणे क्रमो वा सामञ्जस्यं वा नास्ति । विषयाणां पौनरुक्त्यं तु दृश्यते बहुत्र । ये कन्नडवचनेष्वन्यत्र च 'वीरागमे' इति नामोल्लेख-पूर्वकमुदाहृताः श्लोकाः सन्ति ते द्वयोरपि पुस्तकेषु नोपलभ्यन्ते । अतो वीरागमस्येदं पुस्तकद्वयं विहाय मूलपुस्तकमन्यत् स्यादिति सन्देहो जायते । श्रीरेणुकस्य तद्भक्तानां मातङ्ग-मणिभद्र-धर्मगुप्तादीनां कथा बहुषु पटलेषु निरूपिताः सन्ति । अस्यागमस्यायमेव विशेष इति वक्तुं शक्यते । बृहद्गात्रस्यास्यागमस्योपलभ्यमानहस्तलिखितग्रन्थान् सम्यक् सविमर्शं परिशील्य नवीनं संस्करणं प्रकटनीयम् ।

सुप्रभेदागमस्य प्रथमतः पञ्चप्रकरणानि सप्तमाष्टमप्रकरणे चोप-लभ्यन्ते । प्रथमे प्रकरणे वीरशैवमतस्थापकानां पञ्चाचार्याणां विषयः प्रस्तूयते । ते च पञ्चाचार्याः परमात्मनः सद्योजातादिपञ्चमुखोद्भूताः सन्तः प्रत्येकस्य युगस्यारम्भे भूलोकमवतितीर्षवः कोल्लिपाक्यादिस्थानेषु सोमेश्वरादिलिङ्गेभ्य उद्बभूवुरिति सम्प्रदायानुगतो वृत्तान्तस्तत्र वर्ण्यते । वीरशैवसम्प्रदायनैरन्तर्याय रम्भापुर्यादिक्षेत्रेषु वीरादिपीठानि स्थापित-वन्तस्ते । इदानीमपि ताः पञ्चपीठपरम्परास्तत्तत्क्षेत्रेषु विराजन्ते । [रम्भापुर्यां रेवणाराध्यस्य वीरसिंहासनपीठम्, उज्जयिन्यां मरुळराध्यस्य सद्धर्मसिंहासनपीठम्, केदारे एकोरामाराध्यस्य वैराग्यसिंहासनपीठम्, श्रीशैले पण्डिताराध्यस्य सूर्यसिंहासनपीठम्, काश्यां विश्वाराध्यस्य ज्ञानसिंहासनपीठं चेति वीरशैवानां पञ्चसिंहासनपीठानि] । द्वितीये प्रकरणे पड्विडीसूत्रम्, वृष्टिसूत्रम्, लम्बनसूत्रम्, मुक्तागुच्छसूत्रम्, पञ्च-वर्णसूत्रञ्चेति पञ्चसूत्राणि रेवणाराध्यादिभिः पञ्चाचार्यैः स्थापितानीति कथ्यते । वीर-नन्दि-भृङ्गि-वृषभ-स्कन्दाः क्रमेणैषां गोत्रपुरुषाः । मुरारिः, कालारिः, पुरारिः, स्मरारिः, वेदारिश्चेति परशिवस्य पञ्चमुखोद्भूताः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चमा पञ्चाचार्याणां मूलभक्ताः षड्विद्यादिसूत्राणां वीरादिगोत्राणाम् सम्प्रदायेषु स्थिताः । तेषां कुटुम्बपरम्परा अनुवर्तन्ते । रम्भापुर्यादि-पञ्चपीठानामाचार्या भक्ताश्च प्रसादादिपञ्चपञ्चाक्षरमन्त्रजपे निष्ठाः भवन्ति । पञ्चमन्त्राणां स्वरूपम् —

(क) **प्रसादपञ्चाक्षरी** – ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं नमः शिवाय - रम्भापुरी।
(ख) **मायापञ्चाक्षरी** – ॐ ह्लां ह्लीं ह्लूं ह्लैं नमः शिवाय - उज्जयिनी।
(ग) **सूक्ष्मपञ्चाक्षरी** – ॐ ह्लां ह्लीं ह्लूं नमः शिवाय - केदारः।
(घ) **स्थूलपञ्चाक्षरी** – ॐ ह्लां ह्लीं नमः शिवाय - श्रीशैलम्।
(ङ) **मूलपञ्चाक्षरी** – ॐ ह्लां नमः शिवाय - काशी।

सप्तमाष्टमप्रकरणयोः वीरशैवानां पञ्चयज्ञाः, सन्ध्योपासना, शैवभेदः, वीरशैवशब्दनिर्वचनम्, इष्टलिङ्गधारणस्यावश्यकता, इत्यादि विषयाः निरूप्यन्ते । अत्र विशेषद्वयमवधार्यम् । प्रथमस्तावत् वीरशैव-शब्दनिर्वचनम् । यन्निर्वचनमत्र दत्तं तदेव श्रीसिद्धान्तशिखामणावपि शब्दश उद्धृतम् । (पश्यत — सि.शि.,५.१८) । द्वितीयो विशेष इष्टलिङ्ग-धारणविषये भवति । सदृष्टान्तमेवम् उच्यते – काचन गौर्व्रणपीडितेति मन्यन्ताम् । तदा पशुवैद्य औषधमेकं दत्त्वा "इदं घृतेन मिश्रीकृत्य व्रणस्योपरि लेपनं कुर्यात्" इति गोस्वामिनं ब्रूते । तदा गोस्वामी गोक्षीर एव निहितमस्ति घृतमिति मन्यमानः केवलमौषधमेव व्रणस्योपरि लिम्पते। परं तु व्रणपीडाया उपशमनं न भवति । गोस्वामी तु पशुवैद्यं दूषयति । तदनुचितं खलु । गोक्षीरे निहितमस्ति घृतमिति मत्त्वा केवलम् औषध-लेपनं कृतवतो गोस्वामिन एव दोषः किल! एवमेव परमात्माऽन्तरात्मनि निहितोऽस्तीति मन्यते चेत् तस्य साक्षात्कारो न प्राप्यते । परमात्मनः प्रतिरूपत्वेन शिष्यस्य चित्कलां समावेश्य गुरुणा दत्तमिष्टलिङ्गधारणं विनाऽन्तर्लिङ्गानुसन्धानमसाध्यमिति मत्त्वा लिङ्गधारणं विधीयते इति मन्तव्यम् । इयमेवावश्यकता लिङ्गधारणस्य ।

स्वायम्भुवागमो नञ्जुण्डाराध्यमहोदयेन 'शिवागमसौरभ'नाम्नि ग्रन्थेऽनुबन्धरूपेण सम्पाद्य मुद्रितोऽस्ति । त्रयः पटला एवोपलभ्यन्ते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(८,९,१०)। अष्टमपटले पञ्चमकुलोत्पत्तिर्वर्णिता। नवमपटले पञ्चाराध्यानाम् (पञ्चाचार्याणाम्) उत्पत्तिक्रम उक्तः। दशमपटले पञ्चकलशस्थापनविधिर्निरूप्यते। कलशानां क्रमे तत्प्रतिनिधिभूतानामाराध्यानां वृत्तान्ते चान्याधारापेक्षया बहुभेदो दृश्यते।

पाशुपतागमो नामैक उपागमः 'शिवागमसौरभे' एवानुबन्धत्वेन मुद्रितः। आदिमपटलद्वयम् एकाशीतितमाध्यायस्य कश्चन भागश्चोपलभ्येते। प्रथमपटले सप्तशैवानां लक्षणमुक्त्वा द्वितीयपटले पञ्चाचार्याणामुत्पत्तिवृत्तान्तो वर्ण्यते। अत्र कुतो वेदा उद्भूताः? कथमागमानामाविष्कारः? किं वैदिकमार्गेण जना मुक्तिं प्राप्नुवन्ति वा? वेदान् विहायऽऽगमान् किमित्याद्रियामहे? इत्यादयः प्रश्ना उद्भविताः समाधत्ताश्च। वेदाः परशिवस्योच्छ्वसितम्, अष्टाविंशतिशैवागमाः परशिवस्य मुखोद्गीर्णाः, वेदेष्वधिकारिणां श्रेष्ठत्वेन मुक्तिरुक्ता परं तु शैवागमेषु तादृशं तारतम्यं नास्ति, इति कारणतो वेदान् विहाय शैवागमाऽऽद्रियन्ते, इत्यादिरीत्या प्रश्नानाम् उत्तराणि दत्तानि सन्ति। अन्ते पञ्चकलशस्थापनविधिः पट्टाभिषेकविधिश्च प्रपञ्चिते स्तः।

वातुलशुद्धागमो वातुलागमस्य द्वादशोपागमेष्वेकतमः। आगमेऽस्मिन् रहस्यांशा अनेके प्रबोध्यन्ते। तत्त्वभेदः, वर्णभेदः, चक्रभेदः, वर्गभेदः, मन्त्रभेदः, प्रणवभेदः, बह्मभेदः, अङ्गभेदः, मन्त्रकीलकश्चेति दशपटलानां नामानि। अनन्यसदृशमस्य विषयनिरूपणम्। अतः सङ्ग्रहेण ब्रवीतुं न शक्यते। शाम्भवचक्रोद्धरणम्, महालिङ्गोद्धरणं चेति विषयद्वयं तु रहस्यात्मकम् अस्मादृशजनैर्नैव शक्यतेऽवगन्तुमिति शम्।

एतेषां सर्वेषां शैवागमानां विचाराः श्रीसिद्धान्तशिखामणावेकोत्तरशतस्थलात्मिकायां व्यवस्थायाम् आयोजिताः सन्तीति स्वयमवगन्तव्यम्।

अत्रैका शङ्का तत्समाधानं च

अत्रैका शङ्का श्रीनन्दिमठमहोदयेनोद्भाविता। तथा हि — "उपलभ्यमानेषु शैवागमेषु वीरशैवम् वा षट्स्थलसिद्धान्तं वा उद्दिश्य बहव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उल्लेखा न भवन्ति । **तथापि वीरशैवसिद्धान्ते विद्यमानेषु मूलभूतांशेष्वधिकतमांशाः शैवागमेषु तत्र तत्र दृश्यन्ते ।** एवं स्थितेऽप्युपलभ्यमानास्तेषामपूर्णभागास्तु शैवसिद्धान्तिभिरङ्गीकृता वीरशैवैश्च स्वायत्तीकृताश्चाष्टाविंशतिशैवागमा वीरशैवं प्रतिपादयन्तीति वादं समर्थयितुं न पारयन्ति । **अतो वीरशैवदृष्ट्या तेषां शैवागमानां प्रामाण्यमेव प्रश्नार्हमित्यस्मभ्यं सहजतया भाति ।** अष्टाविंशतिशैवागमानां पूर्वभागेषु शैवसिद्धान्तः परमुत्तरभागेषु वीरशैवं च प्रतिपाद्येते इति वदता वीरशैवेषु केनचित् सम्प्रदायेनास्याः समस्यायाः परिहाराय प्रयत्नः कृतः । **अस्मिन् सन्दर्भे कियत्पर्यन्तमेष समर्थनीय इति वक्तुं शक्यते इति प्रश्नः, वीरशैवं प्रतिपादयन्तीति सम्भाव्यमानानां तेषामुत्तरभागानामनुपलभ्यमानत्वात् ।''** (ह्याण्ड्बुक्, पु.७) ।

["References either to Vīraśaivism or to the Ṣaṭsthala-siddhānta, etc., in the available Śaivāgamas, are not many; **yet most of the cardinal points in the doctrines of the Vīraśaivas are visible here and there in them.** However, the available fragments do not lend support to the theory that the 28 Śaivāgamas, which the Śaivasiddhāntins accept and which the Vīraśaivas claim, preach Vīraśaivism; **therefore it naturally occurs to us to question the authority of the Śaivāgamas over Vīraśaivism.** An attempt to solve this difficulty is made by a tradition current among the Vīraśaivas, which states that the former parts (pūrva-bhāga) of the 28 Śaivāgamas deal with the Śaiva-siddhānta and the latter parts (uttara-bhāga) with Vīraśaivism. **How far this is justifiable cannot be said at this stage, for the latter parts alleged to deal with Vīraśaivism are not available."]**

अस्यामुक्तौ ''वीरशैवसिद्धान्ते विद्यमानेषु मूलभूतांशेष्वधिकतमांशाः शैवागमेषु तत्र तत्र दृश्यन्ते'' इति, ''अतो वीरशैवदृष्ट्या तेषां शैवागमानां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रामाण्यमेव प्रश्नार्हमित्यसम्भ्यं सहजतया भाति'' इति च वाक्ययोर्मध्ये परस्परवैरुद्ध्यमुद्रिक्ततया भासते। ''केनचित् संप्रदायेन'' इति यः संप्रदायो निर्दिष्टः स च श्रीसिद्धान्तशिखामणावेव दृश्यते। उक्तं च तत्र —

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ॥ (सि.शि.,५.१४)

अस्य सम्प्रदायस्य समर्थनीयत्वं सन्दिहानेन महोदयेन पुनः कारणमुक्तम् — ''वीरशैवं प्रतिपादयन्तीति संभाव्यमानानां तेषाम् आगमानामनुपलभ्यमानत्वात्'' इति। अत्रेदमवगन्तव्यम् — सत्यम्, सर्वेषामष्टाविंशतिशैवागमानां उत्तरभागा नोपलभ्यन्ते। परं तु केषाञ्चन शैवागमानामुत्तरभागाः समुपलभ्यन्ते। यतीनां समाधिरूपान्त्यसंस्कार-पद्धतिं समर्थयितुं महोदयैरेव सुप्रभेदागमोत्तरभाग उल्लिखितः (ह्याण्ड्बुक्, पु.७)। षट्स्थलाष्टावरणपञ्चाचारादिवीरशैवसिद्धान्तान् निरूप्यमाणानां सूक्ष्मागम-पारमेश्वरागम-वातुलशुद्धागमानां उल्लेखोऽपि महोदयैः कृतः (तत्रैव, पु.४)। एवमेव महोदयैश्चन्नबसवण्णस्य ''करण-हसुगे'' नामा कन्नडग्रन्थो विजयभैरवागमाधारेण विरचितमित्युक्तम् (तत्रैव, पु.२)। आगमोक्तवीरशैवं बसवोत्तरकालीनवीरशैवाद् भिन्न इव प्रतिभाति, अतस्तेषामागमानां रचनाकाल एकादश-द्वादशशतमानाभ्यां पूर्वं स्यादि-त्यापि महोदयैरभिप्रेतम् (तत्रैव, पु.४-५)। **पूर्वोक्तानाम् उपलभ्यमानानां शैवागमोत्तरभागानां विषयान् परिशील्यावगन्तुं शक्यते यत् तेषु वीरशैवधर्मदर्शनयोः परिचयः समग्रतया प्राप्यत इति।**

३. शैवपुराणानि

वेदोत्तरकालीनानि धार्मिकप्रस्थानानि शिव-विष्णु-शक्ति-सूर्य-गणपत्युपासनरूपेण पर्यवसितस्य वैदिकसम्प्रदायस्यैव प्रभेदानि। एतानि पुराणैर्निष्पादितस्वरूपाणि प्रभावितानि च। ''पुराणं पञ्चलक्षणम्'' इत्युक्तरीत्या सर्गः (सृष्टिः), प्रतिसर्गः (लोकानां संहारानन्तरीया सृष्टिः), वंशः (देवानाम् ऋषीणां च वंशावली), मन्वन्तराणि (मनूनां कालावधिः), वंशानुचरितं (सूर्यवंश-चन्द्रवंशादि-प्राचीनराजवंशावली) चेति पञ्च-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विषयाः पुराणेषु वर्ण्यन्ते । अन्ये बहवो विषयाः पुराणेषु विद्यन्ते । अत इदानीं पञ्चलक्षणत्वं पुराणानां वैशिष्ट्यमिति वक्तुं न शक्यते ।

शैवपुराणम् (वायवीयपुराणम्), अग्निपुराणम्, लिङ्गपुराणम्, स्कन्द-पुराणम्, कूर्मपुराणम्, मत्स्यपुराणम्, इति शैवपुराणानि षट् । **शैवपुराणे** बहुविधाः शिवसम्बद्धाः कथाः कथ्यन्ते । योगस्य प्राशस्त्यम्, शिवपुरे निवसतां शिवध्याननिमग्नानां च योगिनां कथाः निरूप्यन्ते । **अग्निपुराणे** बहुविषयाणां मध्ये शिवलिङ्गस्य दुर्गादेव्याश्च पूजापद्धतिर्वर्ण्यते । **लिङ्ग-पुराणे** प्रथमं लिङ्गपूजाया आरम्भः कथमभवदिति वर्ण्यते । अनन्तरं देवदारुवने शिवस्याटनम्, शिवं दृष्ट्वा मुनिपत्नीनां मनोविकाराः, शिवेन कृता सृष्टिः, शिवस्य पञ्चविंशतिलीलाश्च वर्णिताः सन्ति । **स्कन्दपुराणस्य** षट्संहितासु सूतसंहिता दीर्घतमा । तस्यां चत्वारः खण्डाः सन्ति । तत्र प्रथमः खण्डः समग्रतया शिवविषयकः । चतुर्थखण्डे च वैदिकयज्ञसमा-रम्भाः, ध्यानयज्ञः, ज्ञानयज्ञः, शिवभक्तिरित्यादिविचाराः प्रतिपाद्यन्ते । **कूर्मपुराणे** ब्रह्म-विष्णु-शिवानाम् ऐकात्म्यं प्रतिपाद्यते । एकस्मिन्नध्याये (१.५३) शिवलीला वर्ण्यन्ते । शिवपूजाऽपि समर्थ्यते । ईश्वरगीता व्यासगीता चेति गीताभ्यां सदाचारेण सत्संस्कारैश्च ज्ञानं सम्पादनीयम् इत्युपदिश्यते ।

"आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम् । वातुलान्तानि शैवानि पुराणान्यखिलानि तु ॥" (सि.शि.,१.२५) इत्युक्तदिशा श्रीशिव-योगिशिवाचार्यः शैवपुराणान्यवलोक्य वीरशैवपरान् विचारांशान् संगृह्यै-कोत्तरशतस्थलसिद्धान्तं प्रत्यपादयदिति ज्ञायते । तथा हि –

(१) ब्रह्मपुराणस्योपपुराणभूते आदित्यपुराणे शिवकृतप्रमथगण-सृष्टिर्वर्णिता –

प्रजाः सृजेति निर्दिष्टश्चन्द्रमौलिर्विरिञ्चिना ।
ससर्ज मनसा रुद्रानात्मतुल्यान् महेश्वरान् ॥
नीलकण्ठांस्त्रिणेत्रांश्च जटामुकुटमण्डितान् ॥

(सि.शि.,२.२५-२६,त.प्र.व्याख्याने उद्धृतः श्लोकः)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रीसिद्धान्तशिखामणौ तु ब्रह्मणा प्रार्थितः सन् परशिवः शिवगणान् ससर्जेति वर्ण्यते –

इत्येवं प्रार्थितः शम्भुर्ब्रह्मणा विश्वयोनिना ।
ससर्जात्मसमप्रख्यान् सर्वगान् सर्वशक्तिकान् ॥
प्रबोधपरमानन्द-परिवाहितमानसान् ।
प्रमथान् विश्वनिर्माणप्रलयापादनक्षमान् ॥

(सि.शि.,२.२५-२६)

(२) स्कन्दपुराणभागभूतायां शङ्करसंहितायां श्रीसिद्धान्तशिखामणौ निरूपितानां केषाञ्चिद्विषयांशानां मूलमन्वेष्टुं शक्यते । शङ्कर-संहितायामुक्तं यत् शिवेन निश्चिता नियमा अनुसर्तव्याः, यो नानुसरति स चण्डालः, इति –

शिवोक्तां जातिमर्यादां योऽतीत्य भुवि वर्तते ।
स चण्डाल इति ज्ञेयः......... ॥

(सि.शि.,९.२९, त.प्र.व्याख्याने उद्धृतः)

श्रीसिद्धान्तशिखामणाविममंशम् आदायैवमुच्यते –

स्वमार्गाचारनिरताः सजातीया द्विजास्तु ये ।
तेषां गृहेषु भुञ्जीत नेतरेषां कदाचन ॥ (सि.शि, ९.२९)

(३) शङ्करसंहितायामेव प्राणलिङ्गिपदे स्थितं शिवयोगिनमुद्दिश्यै-वमुक्तम् –

प्राणरूप इह जीव उच्यते लिङ्गरूप इति शङ्करः स्मृतः ।
यस्तदैक्यमिति वेदितानयोः प्राणलिङ्गविदसौ शिवयोगी ॥

(सि.शि.,१२.२४, त.प्र.व्याख्याने उद्धृतः)

अयमेवाभिप्रायः श्रीसिद्धान्तशिखामणावेवमुक्तः –

परब्रह्म महलिङ्गं प्राणो जीवः प्रकीर्तितः ।
तदेकभावमननात् समाधिस्थः प्रकीर्तितः ॥

(सि.शि.,१२.२४)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(४) तस्यामेव शङ्करसंहितायां जीवशिवयोः सती-पतिभावो वर्ण्यते–

सती चाहं पतिर्लिङ्गं हृदि युक्तः स्वयं प्रभुः ।
प्रापञ्चिकसुखं नास्ति शरणस्थलमुत्तमम् ॥
(सि.शि., १३.५,त.प्र.व्याख्याने उद्धृतः)

अस्यैवार्थस्य च्छाया श्रीसिद्धान्तशिखामणौ विद्यते–

सतीव रमणे यस्तु शिवे शक्तिं विभावयन् ।
तदन्यविमुखः सोऽयं ज्ञातः शरणनामवान् ॥
(सि.शि.,१३.५)

(५) स्कन्दपुराणस्य सूतसंहितायां विद्यमानः श्लोकोऽयं तत्त्वप्रदीपिकायाम् उद्धृतः –

भोक्ता भोग्यं प्रेरयिता भोगोपकरणानि च ।
सर्वं शिवमयं भाति प्रसादात् पारमेश्वरात् ॥
(सि.शि.,११.७४.,त.प्र.)

अयमेव विषयः श्रीसिद्धान्तशिखामणावपि निरूप्यते –

प्रसादे शाम्भवे लब्धे परमानन्दकारणे ।
सर्वं शिवमयं विश्वं दृश्यते नात्र संशयः ॥
(सि.शि.,११.७४)

(६) सूतसंहितानुसारमहं शब्दो जीवात्मनि रूढः –

अहंशब्दस्य रूढत्वाल्लोके जीवात्मवस्तुनि ।
(सि.शि.,१२.२२-२३,त.प्र.)

इममंशं गृहीत्वा श्रीशिवयोगिशिवाचार्यः शिवयोगसमाधिमेवं वर्णयति –

हंसरूपं परात्मानं सोऽहंभावेन भावयेत् ।
तदेकतानतासिद्धिः समाधिः परमो मतः ॥
(सि.शि.,१२.२३)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(७) सूतसंहितायामेव सत्त्वरजस्तमोगुणानां स्वरूपमेवं विशदीकृतम्–

सत्त्वात् सुखं च ज्ञानं च वैराग्यं सौख्यमेव च ।
दुःखप्रवृत्तिरागौ च लौहित्यं रजसो भवेत् ॥
मोहो भ्रान्तिस्तथालस्यं कार्ष्ण्यं च तमसो भवेत् ॥

(सि.शि.,१३.१५-१९,त.प्र.)

श्रीसिद्धान्तशिखामणौ (१३.१५-१९) सात्त्विक-राजस-तामसाख्यानां त्रिविधभक्तानां निरूपणे त्रिगुणस्वरूपस्य छायामभिज्ञातुं शक्यते ।

इह तु श्रीसिद्धान्तशिखामणौ पुराणानां प्रभावं समर्थयितुं कानिचन एवोदाहरणानि दत्तानि । सर्वेषां पुराणानां प्रभावसन्दर्भानत्र प्रदर्शयितुं नैव शक्यते, विस्तारभयात् ।

एवं श्री शिवयोगिशिवाचार्यस्त्रिभ्य आकरेभ्यो वीरशैवपराणां विचाराणां सञ्चयनं कृत्वा स्वीयायामेकोत्तरशतस्थलव्यवस्थायां वीरशैवसिद्धान्तं विरचितवान् । कन्नडवचनसाहित्यम् एकोत्तरशतस्थलसिद्धान्तस्य मूलं इत्यस्मिन् वादे संभावितान् सर्वाधारान् निरस्य श्रीसिद्धान्तशिखामणौ प्रप्रथमतया प्रतिपादित एकोत्तरशतस्थलसिद्धान्तः श्रीशिवयोगिशिवाचार्यस्य स्वोपज्ञमिति प्रतिपादितम् । वीरशैवसिद्धान्तदृष्ट्या शैवागमानां प्रामाण्यं च समर्थितम् । तस्मिन् विषये उद्भावितानां शङ्कानां समाधानमपि दत्तमेव ।

श्रीसिद्धान्तशिखामणौ केषाञ्चन श्लोकानां प्रक्षिप्तत्वशङ्का

श्रीकाशीनाथशास्त्रिमहोदयः स्वोपज्ञकन्नडव्याख्यानेन सह मैसूरुनगरस्थे स्वीये पञ्चाचार्यविद्युन्मुद्रणालये कन्नडलिप्यां मुद्राप्य प्रकटिते श्रीसिद्धान्तशिखामणिग्रन्थे शिवागमाभिप्रायविरुद्धा वीरशैवसिद्धान्तविरुद्धाश्चेति मत्त्वा केषाञ्चन श्लोकानां प्रक्षिप्तत्वशङ्काम् उद्भावयामास । तत्तत्परिच्छेदात्तान् श्लोकान् पृथक् कृत्वा ग्रन्थस्य समाप्त्यनन्तरमन्तिमे भागे मुद्रापितवान् । अतस्तान् श्लोकान् तत्तत्सन्दर्भौचित्यदृष्ट्या विमृश्य प्रक्षिप्तत्वाप्रक्षिप्तत्वविवेकः करणीयः । तथा हि–

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(१) द्वितीये परिच्छेदे "तेषु प्रमथवर्गेषु" (सि.शि.,२.२७) इत्यारभ्य "वितेनतुः विश्वपतेस्तु सेवाम्" (सि.शि.,२.३३) इति श्लोकपर्यन्तं सप्तश्लोका न समावेशिताः। "तेषु प्रमथवर्गेषु सृष्टेषु परमात्मना। रेणुको दारुकश्चेति द्वावभूतां शिवप्रियौ ॥" इत्यस्य श्लोकस्य स्थाने "सृष्ट-प्रमथवर्गेषु वर्णाश्रमपरिक्रमान्। अप्राकृतसदाचारानुपादिशदथ प्रभुः ॥" इति श्लोक आयोजितः शास्त्रिमहोदयेन।

अत्रेदमवधार्यम्— एतेषु श्लोकेषु रेणुक-दारुकयोर्महिमा निरूप्यते। अन्तिमश्लोकद्वये तावत्तयोः परमात्मनोऽन्तःपुरद्वारपालकत्वेन सेवा-नियुक्तिर्वर्ण्यते। प्रायोऽत्र श्रीरेणुकदारुकौ तावन्तःपुरद्वारपालकवृत्तिं चक्रतुरिति विषयः शास्त्रिमहोदयस्य खेदाय कल्पते। परं त्वस्मिन् कथांशे परमात्मनः सेवात्वेन तादृशीं वृत्तिं तौ कारयामासतुरिति मन्यामहे चेन्न कस्यापि खेदाय भवेत्। अन्यच्चात्र स्वाभिप्रायमारोप्य शास्त्रिमहोदयैः श्लोकपरिवर्तनं कृतम्। तत्तु सर्वथाऽसमीचीनमेव। मूलपाठपरिवर्तनाय साधीयः कारणं नास्ति।

(२) तृतीयपरिच्छेदे "शम्भोराह्वानसन्तोष......" (सि.शि.,३.६७) इत्यारभ्य "कुतो भीतिरिहेष्यते" (सि.शि.,३.८२) इति श्लोकपर्यन्तं सप्तदशश्लोकान् ततः निष्कास्य ग्रन्थान्ते मुद्रापितवान् शास्त्रिमहोदयः। तेषु श्रीरेणुकगणेश्वरस्य भूलोकावतरणनिमित्तत्वेन शापप्रसङ्गः वर्ण्यते। श्रीरेणुकः श्रुत्वा परमात्मन आह्वानं ससंभ्रमं तस्य समीपं गच्छन् पार्श्वे स्थितं दारुकगणेश्वरम् उल्लङ्घ्य गतवान्। शिवभक्तोल्लङ्घनं पापाय इति मन्यमानः शिवस्तं रेणुकं कटुवाक्यैर्विनिन्द्य शशाप - "एष त्वं रेणुक! भूतले जन्मवान् भव" (सि.शि.,३.७७) इति। तदा भूलोके जन्मग्रहणा-द्भीतः सन् श्रीरेणुकः शिवं प्रणिपत्य – "यथा मे मानुषो भावो न भवेत्तथा, करुणानिधे! अनुगृह्णातु" इति प्रार्थयामास। "तथा" इत्यनुगृह्णन् शिवस्तमाज्ञापयत् – "मा भैषीः, त्रिलिङ्गदेशे कोल्लि-पाक्यभिधे पुरे श्रीसोमेश्वरलिङ्गात् प्रादुर्भूत्वा भूलोके वेदवेदान्तसंमतं हितकारकं च सर्वेषां शिवाद्वैतपरं शास्त्रं संस्थापय" इति।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अत्र शापप्रसङ्गे श्रीरेणुकमुद्दिश्य – ''रे रे रेणुक दुर्बुद्धे'' - इत्यादि कटुवचनं यच्छिवेनोक्तं तच्छ्रुत्वा शास्त्रिमहोदयः खेदमन्वभवदिति मन्ये। तत्र सर्वश्रेष्ठस्य परमात्मन इदं वचनं शिवभक्तमाहात्म्यप्रदर्शनाय प्रियशिष्यं प्रति 'अतिपरिचयादवज्ञा' इत्येवंरूपेण नैकट्येन प्रयुक्तमिति मन्यामहे चेन्नास्ति तादृशखेदस्यावसरः कोऽपि। अन्यच्च तादृशानामवतारपुरुषाणां भूलोकावतरणे निमित्तत्वेन कोऽपि शापप्रसङ्गः पुराणकथासु विनिवेश्यते किल। तथाऽयमपि तादृशप्रसङ्ग इति मन्तव्यम्।

इमं प्रसङ्गं ततो निष्कास्य तत्रासम्बद्धतां निवारयितुं ''सभान्तरगतं तन्त्रम्'' (सि.शि.,३.६६) इत्यादिश्लोके ''ताम्बूलं स समाह्वयत्'' इत्येवरूपं चतुर्थपादं ''आहूयेत्थं समादिशत्'' इति परिवृत्त्य ''श्रीशैलस्योत्तरेभागे'' (सि.शि.,३.८३) इत्यादिश्लोकेन सह सम्बन्धः कल्प्यते शास्त्रिमहोदयेन। एवं पुनर्मूलग्रन्थस्य स्वेच्छया परिवर्तनं ग्रन्थसम्पादनशास्त्रनियमविरुद्धमिति भाव्यम्।

(३) पञ्चमपरिच्छेदे ''आत्मत्वमीश्वरत्वं च'' (सि.शि.,५.३७) इत्यादि, ''गुणत्रयविभेदेन'' (सि.शि.,५.३८) इत्यादि च श्लोकद्वयम् ततः निष्कासितम्। ''भोक्ता भोज्यं प्रेरयिता'' (सि.शि.,५.४१) इत्यादिश्लोके ''अखण्डे ब्रह्मचैतन्ये'' इत्यादिश्लोकार्धश्च ततः निष्कासितः। अत्र श्लोकद्वये तथैव श्लोकार्धे च ''कल्पितम्'' इति पदं प्रयुक्तम्। अस्मिन् सन्दर्भे शास्त्रिमहोदयः प्रायः कल्पितशब्देनाध्यासवादं संभावयामास। अत एव विरोध इति मन्ये। परन्तु कल्पितशब्देन निर्मितमित्यर्थः स्वीक्रियते चेन्न कोऽपि दोषः। पश्यत – ''गुणत्रयात्मिका शक्तिः'' (सि.शि.,५.३९) इत्यादिश्लोकस्य व्याख्याने श्रीमरितोण्टदार्येणाध्यासवादो नितरां निराकृत इत्युक्तम्।

(४) एकादशपरिच्छेदे श्री शास्त्रिमहोदयः श्लोकद्वयमिदं निष्कासितवान् –

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवभक्तिसमावेशे क्व जातिपरिकल्पना ।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते ॥
(सि.शि.,११.५४-५५)

श्लोकद्वयमिदं प्रसादिस्थले भक्तमाहात्म्यस्थलनाम्नोऽङ्गस्थलस्य विषयं प्रतिपादयति । अत्र शैवागमानुसारेण (पार.आ., १.५८) वीरशैवेषु वर्णधर्माश्रितं तारतम्यं नास्ति (लिङ्गधारिणः सर्वे समानाः सन्ति) इति विचारः प्रतिपाद्यते । वीरशैवेष्वपि वर्णाश्रमधर्मः सम्मत इति दृढं प्रतिपादयन् श्रीशास्त्रिमहोदयः श्लोकद्वयमिदं शास्त्रविरुद्धमिति मत्वा निष्कासितवान् । परंतु श्रीसिद्धान्तशिखामणेः मूलग्रन्थे विद्यमानस्यास्य श्लोकद्वयस्य निष्कासनं ग्रन्थसम्पादनशास्त्रनियमविरुद्धमिति पुनरपि वक्तव्यम् ।

(५) द्वादशपरिच्छेदे –

वेदान्तवाक्यजां विद्यां लिङ्गमाहुस्तथापरे ।
तदसज्ज्ञेयरूपत्वाल्लिङ्गस्य ब्रह्मरूपिणः ॥
(सि.शि.,१२.३६)

इति श्लोकोऽपि शास्त्रिमहोदयेन ततो निष्कासितः । परं त्वत्रेदमवधार्यम् – "वेदान्तवाक्यजा विद्या" अर्थात् वेदान्तवाक्यैरुद्भूतं ज्ञानं शब्दप्रमाणत्वेन गृह्यते । तज्ज्ञानं तु साधनभूतं प्रमाणम्, न तु साध्यभूतं लिङ्गमेव । तज्ज्ञानद्वाराऽहमेव लिङ्गं (ब्रह्म) इति साक्षात्कारः साध्यं भवति । अतः साधनमेव साध्यमिति न मन्तव्यम् इत्यस्य श्लोकस्याशयः । इदमप्यत्र स्मरणीयम् -

द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्त्वतः ।
पलालमिव धान्यार्थी त्यजेद् ग्रन्थमशेषतः ॥
(ब्रह्म.बिं.उ.,१७-१८)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वेदान्तवाक्यजा विद्या एव शब्दब्रह्म । आत्मानुसन्धानेन ब्रह्म-साक्षात्कारे जाते तदेव परं ब्रह्म । ग्रन्थस्याध्ययनेन ज्ञानं जायते । यथा धान्यार्थी तुषं विहाय धान्यमेव गृह्णाति तथा ज्ञानी ग्रन्थं विहाय ब्रह्मैवानुसन्धत्ते ।

(६) इतरेषु परिच्छेदेषु च केचन श्लोका निष्कासिताः सन्ति । तथा हि –

"तस्माच्छिवमयं सर्वम्", "रज्जौ सर्पवद्भाति", "गन्धर्वपुर-वद्व्योम्नि" (सि.शि.,१०.६९-७१=३)

"मिथ्येति भावयन् विश्वम्", "शिवादन्यज्जगन्मिथ्या", "अयथार्थप्रपञ्चोऽयम्" (सि.शि.,१७.५५,६६,७७=३)

"परकाये क्रियापत्तिः", "चन्द्रस्य मेघसम्बन्धात्", "भावः प्रतीयमानोऽपि", "ज्ञानस्य व्यवहारेऽपि", "स्वप्नजातं यथा ज्ञानम्", "अखण्डानन्दसंवित्तिः", "सत्तात्मनानुवृत्तं यत्", "अकारणमकार्यं यत्", "परात्मनि क्रियाः सर्वाः", "मुख्यार्थेऽसम्भवे जाते" (सि.शि.,१९.२९,३२,३७,४४,४५,४७-४९,८२,९०=१०)

"मुख्यार्थो लक्षणार्थश्च", "अनाद्यविद्यामूला हि", "स्वप्ने दृष्टं यथा वस्तु", "असदेव जगत्सर्वम्", "यस्मिन् ज्योतिषि", "ज्ञेयाभावाद्विशेषेण", "आदावन्ते च मध्ये च", "ज्ञान-शून्यादिसङ्कल्पे", "यस्य कार्यदशा नास्ति" (सि.शि.,२०.६,२२,२४,२८,५८,६६,६७,६९,७०=९)

अत्र सर्वेषु श्लोकेष्वद्वैतवेदान्तिनां जगन्मिथ्यात्ववादस्य च्छाया दृश्यते इति तु शास्त्रिमहोदयस्य विरोधः । अद्वैते प्रयुक्तानां दृष्टान्तानां दर्शनेन सत्यमेव सर्वेषां तथा भासते । परं तु श्रीमरितोण्टदार्यः श्लोकानिमांस्तत्र तत्र मूलग्रन्थानुसारं संरक्ष्य जगत्सत्यत्ववादविरुद्धं यथा न भवन्ति तथा व्याख्यातवान् । विस्तरभयात्केवलमुदाहरणार्थमधस्ताद्दत्तानां श्लोकाना-मष्टानामेव व्याख्यानं सङ्क्षेपेण प्रदर्श्यते –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(१) तस्माच्छिवमयं सर्वं जगदेतच्चराचरम् ।
तदभिन्नतया भाति सर्पत्वमिव रज्जुतः ॥

(२) रज्जौ सर्पवद्भाति शुक्तौ च रजतत्त्ववत् ।
चोरत्ववदपि स्थाणौ मरीच्यां च जलत्ववत् ॥

(३) गन्धर्वपुरवद्व्योम्नि सच्चिदानन्दलक्षणे ।
निरस्तभेदसद्भावे शिवे विश्वं विराजते ॥

(सि.शि.,१०.६९-७१)

(४) मिथ्येति भावयन् विश्वं विश्वातीतं शिवं स्मरन् ।
सत्तानन्दचिदाकारं कथं बद्धुमिहार्हति ॥

(५) शिवादन्यज्जगन्मिथ्या शिवः संवित्स्वरूपकः ।
शिवस्त्वमिति निर्दिष्टो गुरुणा मुक्त एव सः ॥

(६) अयथार्थप्रपञ्चोऽयं प्रतितिष्ठति शङ्करे ।
सदात्मनि यथा शुक्तौ रजतत्वं व्यवस्थितम् ॥

(सि.शि.,१७.५५,६६,७७)

(७) अखण्डानन्दसंवित्तिस्वरूपं ब्रह्म केवलम् ।
मिथ्या तदन्यदित्येषा स्थितिर्ज्ञानमिहोच्यते ॥

(सि.शि.,१९.४७)

(८) असदेव जगत्सर्वं सदिव प्रतिभासते ।
ज्ञाते शिवे तदज्ञानं स्वरूपमुपपद्यते ॥ (सि.शि.,२०.२८)

एते श्लोकाः शाङ्कराद्वैतं प्रतिपादयन्त इव प्रतिभासन्ते । परं त्वेते हस्तलिखितग्रन्थेष्वन्येषु च मुद्रितग्रन्थेषु च तत्र तत्र स्थाने सन्तीति कारणतस्तेषां मूलपाठत्वेनाङ्गीकरणमनिवार्यमेव । तथा चेत् काऽन्या गतिः? वीरशैवसिद्धान्ते तु जगत्सत्यत्वं मूलभूतः सिद्धान्तः । तदनुसारेणैव व्याख्यानं साधीय इति मत्वा श्रीमरितोण्टदार्यः प्रयत्नं कृतवान् । तथा हि —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(१-३) तस्माच्छिवमयं सर्वम्..... इत्यादि –

रज्जुः स्वकीयदीर्घत्ववृत्तत्वादिशक्तिवशात् निर्विकारतया यथा सर्प इव भाति तथा शिवोऽपि निर्विकारत्वेन स्वनिष्ठमायाशक्त्या विश्वरूपतया प्रकाशते । विश्वं शिवमयं न तद्व्यतिरिक्तम् इत्यर्थः । शुक्तौ शुक्लत्वशक्त्या रजतत्ववत्, स्थाणौ दीर्घत्वशक्त्या पुरुषत्ववत्, मरीच्यां स्वच्छतोद्रेकशक्त्या जलत्ववत्, व्योम्नि वर्षाकालशक्त्या गन्धर्वपुरवच्च प्रापञ्चिकभेदरहिते निर्विकारे परशिवब्रह्मणि तत्समवेतविमर्शशक्तिस्फुरितमायाशक्त्या विश्वं तदभिन्नतया भाति । अत्रैतैर्दृष्टान्तैर्जगतः प्रातिभासिकत्वं स्यादिति शङ्का जायेत । तत्रैवं समाधत्तम् —

पत्रशाखादिरूपेण यथा तिष्ठति पादपः ।
तथा भूम्यादिरूपेण शिव एको विराजते ॥ (सि.शि.,१७.७२)

(४-५) मिथ्येति भावयन् विश्वम्..... इत्यादि –

अत्र "पक्षान्तरेण भावनां कथयति"– इति प्रस्तावेन श्रीमरितोण्टदार्येण श्लोकोऽयम् अध्यासपरत्वेनैव व्याख्यातम् । अयं च शरणस्थलाश्रितलिङ्गस्थलेष्वेकतमस्य भावार्पितस्थलस्य सन्दर्भे शिवस्य विश्वातीतत्वं ध्यायन् शिवयोगी कदापि विश्वस्य मिथ्यात्वं संभावयति । अयं भावः केवलं प्रासङ्गिकः न तु नित्यः । अतः "शिवादन्यज्जगन्मिथ्या" इत्येतस्य व्याख्यां कुर्वन् व्याख्याता "शिवादन्यत् जगत् (इति) मिथ्या" इतीतिकरणद्वारा शिवो जगदभिन्न इत्येव सत्यम् इति वदन् अध्यासप्रतिभासं निवारयति ।

(६) अयथार्थप्रपञ्चोऽयम्.... इत्यादि –

अत्र श्रीमरितोण्टदार्यः "अयथार्थ" शब्देनानित्यार्थं स्वीकृत्य, यथा रजतत्वं सत्तास्वरूपेण शुक्तावस्तीत्यवगम्यते तथाऽनित्यं जगत् सत्तात्मनि शिवे तिष्ठतीति व्याख्यानं कुरुते । अयथार्थोऽनित्यार्थ इति सूचना तु व्याख्यातृणा अधोनिर्दिष्टश्लोकात् प्राप्ता –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिव एव परं तत्त्वं चिदानन्दसदाकृतिः ।
स यथार्थस्तदन्यस्य जगतो नास्ति नित्यता ॥ (सि.शि., १७.७६)

अत्र विरोधः 'स यथार्थः' 'जगतो नास्ति नित्यता' इत्यनयोर्मध्ये, न तु 'स यथार्थः' 'जगतो नास्ति सत्यता' इत्यनयोर्मध्ये । शिवो नित्यो जगच्चानित्यं इत्येव भेदः ।

(७-८) अखण्डानन्दसंवित्तिः...... । असदेव जगत्सर्वम्..... ।

अत्र प्रथमे श्लोके ज्ञानस्य लक्षणं दत्तम् । अखण्डानन्दात्मकमखण्डज्ञानात्मकं च ब्रह्म यस्यां च स्थितौ नित्यं तदन्यदनित्यमिति भाति तदेव ज्ञानम् इत्युक्तम् । द्वितीये श्लोके तावद् अज्ञानस्य स्वरूपोपपत्तिरुच्यते । शिवज्ञाने समुत्पन्नेऽव्यक्ततया (असदिव) पूर्वं स्थितं जगत् व्यक्ततया (सदिव) भासत इत्येवंरूपमज्ञानं यथार्थतां भजते इत्युक्तम् । 'स्वरूपमुपपद्यते' इत्यस्य जगत्कारणभूताया चिच्छक्त्याः स्वरूपं प्राप्नोतीत्यर्थः ।

अत्र प्रश्नः — यद्यपि शक्त्या स्वसमवेतया सच्चित्स्वरूपया च युक्तः सन् शिवो जगद्रूपेण विस्तारं प्राप्नोतीति सिद्धान्तोऽङ्गीकृतः श्रीशिवयोगिशिवाचार्येण तथापि किमिति तैर्जगन्मिथ्यात्वव्यञ्जकाः श्लोकाः प्रयुज्यन्ते? इति । प्रायस्तत्र कारणमद्वैतवेदान्तस्य प्रभावः स्यात् । श्रीकरभाष्यम्, क्रियासारः, इत्यादि ग्रन्थेषु बादरायणव्यासप्रणीतस्य ब्रह्मसूत्रस्य व्याख्यानुसारेण वीरशैवसिद्धान्तः प्रतिपाद्यते । परं तु कालदृष्ट्या तेभ्यो ग्रन्थेभ्यः पूर्वतने श्रीसिद्धान्तशिखामणावन्या व्यवस्था दृश्यते । तत्र सिद्धान्तस्य ध्रुवीकरणं साध्यावस्थायां दृश्यते, न तु सिद्धावस्थायाम् । अतः शिवयोगिशिवाचार्यः केषुचन स्थलेषु शिवयोगिनः जगदवधानविमुखां स्थितिं ज्ञापयितुमद्वैतपरदृष्टान्तयुक्तान् श्लोकानद्वैतप्रभावेण निबध्नाति स्मेति वक्तुं शक्यते । अथवैतादृशाः श्लोकाः केवलं शिवजगन्मयत्वं शिवयोगिनो जीवन्मुक्तस्थितिं च द्योतयितुं प्रयुज्यन्ते इति तेषामर्थवादत्वेन ग्रहणं समुचितमिति वक्तुमुचितम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उपसंहारः

भूमिकायमस्यां श्रीसिद्धान्तशिखामणेः स्वरूपम्, विषयसङ्ग्रहः, ग्रन्थकर्तुः परम्परा, किमियं सिद्धरामेश्वरपरम्परा वा, श्रीसिद्धान्तशिखामणेः कालः, तद्विषये केषाञ्चन सन्देहानां निवारणम्, एकोत्तरशतस्थलस्य मूलं श्रीसिद्धान्तशिखामणिरेव, दासगुप्तमहोदयस्य भ्रमाधीना कल्पना, श्रीसिद्धान्तशिखामणेराकराः— १.वेदसंहिता उपनिषदश्च, २. शैवागमोत्तरभागाः, ३. शैवपुराणानि च, वीरशैवदृष्ट्या शैवागमानां प्रामाण्यशङ्का तत्समाधानञ्च, श्रीसिद्धान्तशिखामणौ केषाञ्चन श्लोकानां प्रक्षिप्तत्वशङ्का तत्समाधानञ्च, इति बहवो विचाराः सविमर्शं साधारं च प्रतिपाद्यन्ते । तेषां मुख्यांशा अधस्तन्निर्दिष्टाः —

(१) श्रीसिद्धान्तशिखामणिः श्रीरेणुकागस्त्यसंवादस्वरूपः, यथा भगवद्गीता श्रीकृष्णार्जुनसंवादस्वरूपा ।

(२) श्रीसिद्धान्तशिखामणेरेकविंशतिपरिच्छेदेषु प्रथमपरिच्छेदचतुष्टये मङ्गलाचरणम्, ग्रन्थकर्तुः शिवयोगिशिवाचार्यस्य गुरुपरम्परा, शिवेन विधत्ता शिवगणाधीशानां सृष्टिर्येषु रेणुक-दारुकौ प्रसिद्धौ, शापप्रसङ्गो येन श्रीरेणुकस्य भूमाववतरणं जातम्, त्रिलिङ्गदेशे कोल्लिपाक्यां सोमेश्वरलिङ्गाद् श्रीरेणुकस्यावतारः तस्यागस्त्याश्रमगमनं चेति विषया वर्ण्यन्ते । पञ्चमपरिच्छेदाच्चतुर्दशतमपरिच्छेदपर्यन्तं भक्तादिषटस्थलान्तर्गतचतुश्चत्वारिंशदङ्गस्थलानां पञ्चदशतमपरिच्छेदाद्विंशपरिच्छेदपर्यन्तं भक्तादिस्थलसम्बद्ध-सप्तपञ्चाशल्लिङ्गस्थलानां च निरूपणं कृतम् । एकविंशे परिच्छेदे श्रीरेणुकभगवत्पादेन लङ्कायां रावणकृतसङ्कल्पपूरणाय त्रिकोटिलिङ्गस्थापनं श्रीरेणुकस्य पुनः सोमेश्वरलिङ्गेऽन्तर्धानं च वर्णिते ।

(३) ग्रन्थकर्तुः श्रीशिवयोगिशिवाचार्यस्य परम्परायामुक्तनामसु प्रथमशिवयोगिशिवाचार्यस्य नाम प्रथमम् । अनन्तरं मुद्ददेवशिवाचार्यस्य सिद्धनाथशिवाचार्यस्य च नामनी भवतः । चतुर्थं नाम ग्रन्थकर्तुर्द्वितीयशिवयोगिशिवाचार्यस्य भवति। इयं गुरुपरम्परा न तु पुत्रपौत्रादिपरम्परा।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(४) श्रीसिद्धान्तशिखामणेः कन्नडव्याख्यात्रा सोसलेरेवणाराध्येन संस्कृतव्याख्यात्रा मरितोण्टदार्येणोद्भाविता शङ्का श्रीशिवयोगिशिवाचार्यः सिद्धारामेश्वरन्वयसञ्जात इति । सा शङ्का निराधारा । अतः श्रीशिवयोगिशिवाचार्यस्य सिद्धरामेश्वरेण नास्ति कोऽपि सम्बन्धः ।

(५) श्रीसिद्धान्तशिखामणेः कालविषये उद्भावितेषु सन्देहेषु प्रथमस्तावत् विंशतितमशतमानस्य पूर्वार्धे केचन विद्वांसः संभूयेमं ग्रन्थं रचयामासुरिति । परं तु षोडशतम-सप्तदशतम-शतमानयोः श्रीउज्जिनीशः, सोसलेरेवणाराध्यः, मरितोण्टदार्यश्च तस्य स्वीयानि व्याख्यानान्यरचयन् । श्रीपतिपण्डितस्य श्रीकरभाष्ये, नीलकण्ठशिवाचार्यस्य क्रियासारे, बसवण्णचन्नबसवण्णादीनां कन्नडवचनेषु च श्रीसिद्धान्तशिखामणेः श्लोकानामुल्लेखो दृश्यत इति कारणतस्तत्सन्देहस्य निराधारत्वमवगन्तव्यम् । श्रीकरभाष्यस्य कालम् (क्रि.१०७०) अवलम्ब्य श्रीसिद्धान्तशिखामणेः कालो दशमशतमानात्पूर्वतन इति निर्णीतः । श्रीशङ्कराचार्यस्यास्मिन् ग्रन्थे प्रभावमनुलक्ष्यास्य कालोऽष्टमशतमानादर्वाचीन इति च निर्णीतः ।

(६) केषाञ्चन सन्देहानां निवारणं साधारं कृतमस्ति । प्रथमस्तावत्सन्देहः श्रीनन्दिमठमहोदयैरुद्भावित एकोत्तरशतस्थलसिद्धान्तस्य मूलं किमित्यस्मिन् विषये । स्थलविभागे नियमपालनं नास्तीति पूर्वमारोप्यानन्तरं सर्वेषामवान्तरस्थलानामायोजने कश्चन नियमो दृश्यत इति वदन् परस्परं वचनवैरुध्यं प्रदर्शितम् । अन्यच्च बसवादिशरणानां वचनेषु नास्ति तेषामुल्लेख इति कारणत एकोत्तरशतस्थलानामाविष्कारः प्रायो द्वादशतमानादर्वाचीन इति कथितम् । परं तु वचनसाहित्य एकोत्तरशतस्थलसिद्धान्तस्योल्लेखो लभ्यते, यथा – च.ब.व., सं.४६४; अल्लम.व.,सं. ८०० इत्यादिषु । एकोत्तरशतस्थल-सिद्धान्तस्य मूलं वचनसाहित्यमिति वदता श्री इम्मडि शिवबसवस्वामिपादेन द्वितीयः सन्देह उद्भावितः । तत्रैकस्मिन् क्रियासारवाक्ये (क्रि.सा., भागः-३, पृ.११८) विद्यमानं 'भाषाप्रबन्ध'– शब्दं कन्नडवचनसाहित्यपरत्वेन गृहीत्वा तथा भावयति । परं तु 'भाषाप्रबन्ध'शब्देन क्रियासारकृतः कन्नडग्रन्थ उल्लिखित इति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्पष्टम् ज्ञायते । (पश्यत-क्रि.सा., भागः-३, पृ.४९) । अतः सोऽपि सन्देहो निराधारः ।

(७) वेदः (संहिता उपनिषश्च), शैवागमोत्तरभागाः, शैवपुराणानि च श्रीसिद्धान्तशिखामणेराकराः । तत्र, ऋग्वेदसंहितायां रुद्रसूक्तानि, दार्शनिकसूक्तानि च कृष्ण-शुक्ल-यजुर्वेदसंहितयोः श्रीरुद्राध्यायः, इत्यादयः कथयन्ति रुद्रशिवस्य स्वरूपं माहात्म्यं च । उपनिषत्सु परमात्मनः शिवस्य ब्रह्मपदवाच्यत्वमुक्तम् । यत् सृष्टिस्थितिलयकारणं ब्रह्म तदेव परशिवः । "आनीदवातं स्वधया तदेकम्" इति नासदीयसूक्तस्योक्तौ (ऋ.वे., १०.१२९.२) परशिवस्य शक्तिविशिष्टत्वं प्रप्रथमतया निर्दिष्टम् । यद्यप्युपनिषत्सु षट्स्थलाष्टावरणपञ्चाचारादि-वीरशैवपारिभाषिकशब्दा न प्रयुक्तास्तथापि तासु तत्तत्पारिभाषिकताव्याप्तौ गृह्यमाणानां विषयाणां मूलस्फूर्तिस्तत्र तत्र दृश्यते । न केवलं षट्स्थलानां प्रत्युतैकोत्तरशतस्थलेषु केषाञ्चन स्थलानामपि मूलप्रेरणा तासु समुपलभ्यते ।

"सिद्धान्तः" इति प्रसिद्धिं प्राप्तानां शैवागमानामुत्तरभागेषु वीरशैवमतं प्रतिपादितम् । शैवागमोत्तरभागा नोपलभ्यन्ते स्म तदानीमिति कारणं पुरस्कृत्य श्रीनन्दिमठमहोदयो वीरशैवसिद्धान्तदृष्ट्या तेषां प्रामाण्यमेव शङ्कते । परं तु तेनैव "ह्याण्डबुक्"-नाम्नि स्वीये ग्रन्थे तदानीमुपलब्धानां शैवागमोत्तरभागानामुल्लेखाः कृताः सन्तीति कारणतः शङ्काया आधारस्तेनैव निराकृतप्रायइति ज्ञातव्यम् । उपलब्धानां दश-शैवागमोत्तरभागानां विषयाः संक्षेपेण निरूपिताः सन्ति । तेषु भागेषु वीरशैवसिद्धान्तस्य मूलभूतांशाः सर्वे प्रपञ्चिताः सन्तीति स्पष्टम् ज्ञायते ।

शैवपुराणेषु पुनः वीरशैवविचारास्तत्र समुपलभ्यन्ते । श्रीसिद्धान्त-शिखामणेर्द्वितीयपरिच्छेदे शिवकृता या प्रमथगणसृष्टिर्वर्णिता (सि.शि., २.२५-२६) तस्याः मूलमादित्यपुराणम् । तस्य नवमपरिच्छेदे शिवोक्ता या जातिमर्यादा अस्ति (सि.शि.,९.२९) तस्याः मूलं पुनः स्कन्द-पुराणान्तर्गता शङ्करसंहिता । सा एव संहिता मूलं प्राणलिङ्गिविषये यत् सि.शि., १२.२४, इत्यस्मिन् श्लोक उक्तम् । तस्यामेव शरणस्थलवैशिष्ट्यभूतः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जीवशिवयोः सतीपतिभावः प्रप्रथमतयोक्तम् । (सि.शि.,१३.५) । प्राप्तशाम्भवप्रसादस्य साधकस्य सर्वं विश्वं शिवमयत्वेन प्रतिभातीति विचारः स्कन्दपुराणान्तर्गतसूतसंहितायामुक्तः । स एव विचारः सि.शि., ११.७४, इत्यस्मिन् श्लोके प्रतिध्वन्यते । तस्यामेव संहितायां सत्त्वरजस्तमोगुणानां यत्स्वरूपमुक्तम् तस्य प्रभावः सि.शि.,१३.१५-१९, इति श्लोकेषु सात्त्विकादित्रिविधभक्तानां स्वरूपनिरूपणे दृश्यते । एवमनेकेषु सन्दर्भेषु शैवपुराणानां प्रभावः श्रीसिद्धान्तशिखामणावभिज्ञातुं शक्यते ।

(८) श्रीकाशीनाथशास्त्रिमहोदयेन या श्लोकानां केषाञ्चन प्रक्षिप्तत्वशङ्का कृता तस्याः चर्चा सविमर्शमत्र प्रस्तुता । तत्र तेन दत्तं कारणं शैवागमविरोधः सिद्धान्तविरोधश्चेति । कांश्चनाद्वैतपरत्वेन दृश्यमानान् श्लोकान् विहायान्येषु श्लोकेषु शैवागमविरोधो वा सिद्धान्तविरोधो वा नास्तीति प्रदर्शितम् । अद्वैतपराणामपि श्लोकानां विषये श्रीमरितोण्टदार्यः जगन्मिथ्यात्ववादानुसारित्वं परिहार्यान्यथा व्याख्यातवान् । अतस्तेषां श्लोकानां तथा निष्कासनं ग्रन्थसम्पादनशास्त्रनियमविरुद्धमित्यत्र वक्तव्यम् ।

इति गुरुसेवाकिङ्करः

बेंगलूरुः
शालिवाहनशकः १९३९ दुर्मुखिसंवत्सरः
विजयदशमी [११-१०-२०१६]

डा॥ एम्. शिवकुमारस्वामी
संस्कृतप्राध्यापकः (निवृत्तः)
बेंगलूरुविश्वविद्यालयः

* * * * *

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कृतज्ञतासमर्पणम्

अस्याः शिवाद्वैतप्रदीपिकाख्यायाः श्रीसिद्धान्तशिखामणिव्याख्यायाः विरचने मम मूलस्फूर्तिदातारः **श्री जगद्गुरु डा॥ चन्द्रशेखरशिवाचार्य-महास्वामिनः**। तेषां चरणारविन्दयोः साष्टाङ्गप्रणामपुरःसरं भूयांसि नमांसि समर्पयामि ।

अस्य ग्रन्थस्य प्रकाशनार्थम् आर्थिक-साहाय्यं कृतवद्भ्यो राष्ट्रीय-संस्कृत-संस्थानम् (मानित-विश्वविद्यालयः), इत्येतेभ्यः प्रकाशनसंस्थापरतो मत्परतश्च कृतज्ञताकुसुमाञ्जलिः समर्प्यते ।

सर्वदा मम संशोधनकार्येषु साहाय्यमातन्वते बेंगलूरु बसवेश्वर-स्नातक-महाविद्यालयस्य संस्कृतप्राध्यापकाय **डा॥ सि. शिवकुमारस्वामिने** सोपकारस्मरणं शुभम् आशासे ।

अस्य ग्रन्थस्य 'टैपसेट्टिंग्'कार्यं निर्वोढवते **श्री वेंकटेश-इनामति-महोदयाय** कृतज्ञतां समर्पयामि ।

अस्य मुद्रणकार्यं सम्यक्तया कृतवद्भ्यो **मित्तल आफ्सेट्**, सुन्दरपुरम्, वाराणसी, इत्येतेभ्यः कृतज्ञभावं प्रकटयामि ।

इति शम्

बेंगलूरुः
विजयदशमी [११-१०-२०१६] **डा॥ एम्. शिवकुमारस्वामी**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रीशिवयोगिशिवाचार्यविरचितः

श्रीसिद्धान्तशिखामणिः

प्रथमः परिच्छेदः

शिवाद्वैतप्रदीपिका

जगत्सृष्टिस्थितिध्वंसाः तिरोधानमनुग्रहः ।
पञ्चकृत्यानि यस्यैवं वन्दे तं शिवमक्षरम् ॥१॥

मर्त्ये लोके परमसुखदं वीरशैवं विशिष्टं
पञ्चाचार्या हरमुखभवाः स्थापयन्ति स्म पूज्याः ।
तेषां मध्ये प्रथितयशसो रेणुकाचार्यवर्याः
तैः प्रोक्तोऽयं घटभवकृते शैवसिद्धान्तसारः ॥२॥

तयोः संवादरूपोऽयं श्रीसिद्धान्तशिखामणिः ।
ग्रथितः शिवयोगीति शिवाचार्येण धीमता ॥३॥

काशीपीठे विराजन्ते चन्द्रशेखरयोगिनः ।
शिवसिद्धान्तनिष्णाताः तेषामाज्ञानुसारतः ॥४॥

चन्नार्यः पार्वतीमाता पितरौ यस्य सात्त्विकौ ।
शिवकुमारनामाहं कुर्वे व्याख्यां शिखामणेः ॥५॥

सेयं व्याख्या भवेन्नाम्ना शिवाद्वैतप्रदीपिका ।
भवेदियं मुमुक्षूणां मुक्तिमार्गप्रदर्शिका ॥६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

[१. घटभवकृते = अगस्त्याय । ५. चन्नार्यः = चन्नय्य इति कन्नडभाषायाम्; पार्वतीमाता = पार्वतम्म इति कन्नडभाषायाम्; शिखामणेः सिद्धान्तशिखामणेः ।]

मङ्गलाचरणम्

व्याख्या— श्रीरेणुकगणेश्वरो निमित्तीकृत्याऽगस्त्यमुनीन्द्रं लोकहिताय वेदागमपुराणोद्धृतम् एकोत्तरशतस्थलात्मकं सिद्धान्तं बोधयामास । तत्संप्रदायसिद्धः श्रीशिवयोगिशिवाचार्यस्तं रेणुकागस्त्यसंवादरूपेण संगृह्य श्रीसिद्धान्तशिखामणिं प्रणीतवान् । आदौ स्वकार्यपरिसमाप्त्यर्थम् अध्येतृणां तत्त्वावधारणार्थं च निर्विघ्नतासम्पादनाय द्वादशश्लोकैर्मङ्गलाचरणं ग्रन्थकृद् विदधाति ।

त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये ।
सच्चिदानन्दरूपाय शिवाय ब्रह्मणे नमः ॥१॥

व्याख्या— तत्र प्रथमं शिवस्वरूपनिर्णयात्मकं मङ्गलं करोति— **त्रैलोक्येति । त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये** त्रैलोक्यमेव लोकत्रयमेव सम्पद् विभवः, तस्य आलेख्यं चित्रम्, तस्य समुल्लेखनं चित्रीकरणम्, तदर्थं भित्तिस्तत्फलकभूता भित्तिः, तस्यै । त्रयाणां लोकानां समाहारः त्रिलोकी इति द्विगुसमासः— "तद्धितार्थोत्तरपदसमाहारे च" (पा.अ., २.१.५१) इति । "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः" इति स्त्रीलिङ्गत्वम्, "द्विगोः" (पा.अ., ४.१.२१) इति ङीप् (स्त्रीप्रत्ययः) । त्रिलोक्याः भावः त्रैलोक्यं – "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (पा.अ., ५.१.१२४) इति ष्यञ् (य), "तद्धितेष्वचामादेः" (पा.अ., ८.२.११७) इति आदिवृद्धिः । **सच्चिदानन्दरूपाय** सत् च चित् च आनन्दश्च सच्चिदानन्दाः ते एव रूपं स्वरूपं यस्य सः तादृशः, तस्मै, **शिवाय ब्रह्मणे** ब्रह्मपदवाच्याय शिवाय **नमः** । "नमःस्वस्तिस्वाहाऽलंवषड्योगाच्च ।" (पा.अ., २.३.१६) इति नमः शब्दयोगे चतुर्थी । शिवस्य त्रैलोक्यसंपदालेख्यसमुल्लेखनभित्तित्वेन रूपणाद् रूपकं नामालंकारः ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् । रूपकं तत्....॥" (कु.आ.,२७)। इति तल्लक्षणम् । अनुष्टुप्(श्लोक)च्छन्दः । "श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥" इति तल्लक्षणम्। जगद्रूपं सम्पत्, तस्य चित्ररचनायामाधारभूतभित्तिरूपाय शिवाय ब्रह्मणे सच्चिदानन्दस्वरूपाय नमः । 'सच्चिदानन्दस्वरूपम्' इति शिवस्य ब्रह्मणः स्वरूपलक्षणम् । तथा हि श्रुतयः – "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ., २.१), "आनन्दो ब्रह्मेति व्याजानात्" (तै.उ., ३.६), "प्रज्ञानं ब्रह्म" (ऐ.उ., ५.३) । पूर्वं परशिवब्रह्मणो जगदाधारत्वमुक्तम् । "एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥" (कठ. उ., २.१७) इति श्रुतिः ॥१॥

ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ।
वेदान्तिनो जगन्मूलं तं नमामि परं शिवम् ॥२॥

व्याख्या— परशिव एवोपनिषत्प्रसिद्धं ब्रह्मेति प्रतिज्ञायते— **ब्रह्मेतीति** । **वेदान्तिनः** वेदान्ते उपनिषत्सिद्धान्ते निष्ठाः **यं जगन्मूलं** जगतां मूलकारणभूतं **'ब्रह्म' इति व्यपदेशस्य** नाम्नः **विषयं** पदार्थं **प्रचक्षते** वदन्ति **तं परं** सर्वश्रेष्ठं **शिवं नमामि** वन्दे ॥ यद्वस्तु ब्रह्मेत्युपनिषत्सु प्रसिद्धं तदेव वीरशैवसिद्धान्ते शिव इति प्रसिद्धम् । "सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः। सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः ॥" (श्वे. उ., ३.११) इति श्रुतिः ॥२॥

यस्योर्मिबुद्बुदाभासः षट्त्रिंशत्तत्त्वसञ्चयः ।
निर्मलं शिवनामानं तं वन्दे चिन्महोदधिम् ॥३॥

व्याख्या— शिवादिभूम्यन्ततत्त्वविकासरूपेण शिवस्य परब्रह्मणः जगत्कारणत्वं ब्रूते— **यस्येति** । **षट्त्रिंशत्तत्त्वसञ्चयः** शिवादिपृथिव्यन्तानां षट्त्रिंशत्संख्याकानां तत्त्वानां सञ्चयः समुदायः **यस्य** परवस्तुन **ऊर्मिबुद्बुदाभासः** तरङ्गाणां बुद्बुदवदाभासते इति तथोक्तः, **तं निर्मलं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मलत्रयरहितं **शिवनामानं** 'शिव' इति नाम्ना प्रसिद्धं **चिन्महोदधिं** चिदेव ज्ञानमेव महासमुद्रः, **तं वन्दे** नमामि । अत्र शिवं चिन्महोदधित्वेन षट्त्रिंशत्तत्त्वसञ्चयं तस्योर्मिबुद्बुदाभासत्वेन च रूपणाद्रूपकं नामालंकारः। तस्य लक्षणमुक्तं प्राक्। शैव-वीरशैवोभयसंप्रदाये षट्त्रिंशत्तत्त्वविकासः सृष्टिप्रक्रियाया अङ्गम् । सृष्टेः प्राक् पराशक्तिविशिष्टस्य परब्रह्मणः सूक्ष्म-स्थूल-चिदचिद्रूपादिनामरूपस्य अविभागदशायाम् इदमाह श्रुतिः— "यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥" (श्वे. उ., ४.१८) इति । तदा सर्वतत्त्वजनकः, स्वयं च तत्त्वातीतः, शक्तिविशिष्टः शम्भुः "सोऽकामयत बहु स्यां प्रजायेय" (तै. उ., २.६) इति श्रुत्युक्तदिशा बहुप्रपञ्चभावनात्मकविमर्शशक्तिरूपेण सृष्ट्युन्मुखो बभूव । तदा तन्निष्ठा विमर्श-शक्तिः स्वयम् इच्छाशक्तिरूपे परिणमति स्म । ततो ज्ञानशक्तिक्रियाशक्ती आविर्बभूवतुः । इच्छाशक्तेर्ज्ञानशक्तिरन्तरङ्गभूता क्रियाशक्तिर्बहिरङ्गभूता चाभवताम्। तदा परशिव इच्छाशक्त्यन्तरङ्गभूतां ज्ञानशक्तिम् अनुप्रविश्य "सर्वज्ञोऽहम्" इत्यभिनिवेशेन **शिवतत्त्वम्** – (१) बभूव । इदमेव शिवतत्त्वं कुलालः कुम्भस्येवास्य भाविप्रपञ्चस्य निमित्तकारणम् अभवत् । पुनः परशिव एव इच्छाशक्तिबहिरङ्गभूतां क्रियाशक्तिम् अनुप्रविश्य "सर्वकर्ताऽहम्" इत्यभिनिवेशेन **शक्तितत्त्वम्** –(२) अभवत् । इदं च शक्तितत्त्वं मृत्तिकेव कुम्भस्य भाविप्रपञ्चस्य उपादानकारणं बभूव । इदं शक्तितत्त्वं स्वेच्छाशक्त्यन्तरङ्गभूतं ज्ञानशक्त्युद्रेकम् अनुप्रविष्टं सत् जलाधिवसितचणकादिवत् किञ्चिद्वैलक्षण्येनाऽङ्कुरायमाणं जगत् प्रति "अहमिदम्" इत्यभिनिवेशवशात् विश्वस्फुरणरूपं **सदाशिवतत्वम्** – (३) बभूव । तदेव शक्तितत्त्वं पुनः स्वेच्छाशक्तिबहिरङ्गभूतं क्रियाशक्त्युद्रेकम् अनुप्रविश्य कृतवस्तुवदङ्कुरितं जगदुद्दिश्य "अहमिदम्" इत्यभिनिवेशेन विश्वस्फूर्तिरूपम् **ईश्वरतत्त्वम्** – (४) अभवत् । तदेव शक्तितत्त्वं क्रियाशक्तिप्रधानाया इदन्तायाः संविद्रूपायाम् अहन्तायाम् अन्तर्गतत्वेन प्रकाशमानं सत् सागरतरङ्गन्यायेनाऽहन्तेदन्तयोः ऐक्यप्रतिपत्तिस्वरूपं परशिवापरपर्यायं **शुद्धविद्यातत्त्वम्** –(५) बभूव । **एतानि पञ्चतत्त्वानि शुद्धतत्त्वानीत्युच्यन्ते** । शुद्धविद्यातत्त्वमेव मयूराण्डरसन्यायेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वान्तर्लीनेषु भवनक्रियोन्मुखेषु भावेष्वन्योन्याभावनिमित्तेन भेदबुद्धि-प्राधान्येन **मायातत्त्वम्** –(६) अभवत्। काष्ठयोगेन यथा वह्नेर्विस्फुलिङ्गा आविर्भवन्ति तथा परमेश्वरेच्छावशात् पार्थक्यबुद्धिं प्राप्य मायाशक्तौ प्रविश्य शिवांशो भूत्वा **पुरुषतत्त्वम्** – (७) बभूव । इदमेव जीवतत्त्वं यदा आत्मानात्माविवेकराहित्येन "अहं सुखी, अहम् असुखी" इत्यादि संभावयत्पञ्चकञ्चुकैर्बद्धं बभूव। कला, अविद्या, रागः, कालः, नियतिश्चेति पञ्चकञ्चुकाः । महेश्वरात् पार्थक्येन पुरुषस्य असंकुचितकर्तृताशक्तिः मायापहृतमाहात्म्यनिमित्तं किञ्चित्कर्तृतारूपं धारयत् **कलातत्त्वम्**–(८) अभवत् । तेनैव निमित्तेनाऽनन्तज्ञानत्वस्य किञ्चिज्ज्ञत्वरूपे पर्यवसानम् **अविद्यातत्त्वम्** –(९) बभूव। अपूर्णंमन्यतारूपं तत्त्वं **रागतत्त्वम्** –(१०) बभूव । तेन मनुष्यः पूर्णताम् अन्यत्राऽस्थानेऽन्विषन् स्रक्चन्दन-वनितादिविषयासक्तिम् अभजत। नित्यता एवानित्यतां प्राप्य भूतभविष्य-द्वर्तमानस्वरूपं सत् **कालतत्त्वम्**–(११) अभवत्। व्यापकता एवाव्यापकतां प्राप्य "मयेदं कर्तव्यम्" इति नियमहेतुकं तत्त्वं **नियतितत्त्वम्** –(१२) बभूव । **मायातत्त्वतो नियतितत्त्वपर्यन्तानि एतानि सप्ततत्त्वानि शुद्धा-शुद्धानीति कथ्यन्ते** । गुणसंपर्काभावात्तेषां शुद्धत्वम्, मायासंपर्कवशाच्च तेषाम् अशुद्धत्वम् । सृष्ट्यादिव्यापारोन्मुखीभूता सेयमिच्छाशक्तिरेव "ज्ञानं क्रिया न भवति, क्रिया च ज्ञानं न भवति" इति प्रतिस्फुरणगत्या स्वगतज्ञानक्रिययोः अन्योन्याभावरूपं प्राप्य सुखदुःखमोहहेतुभूतानां सत्त्वरजस्तमसां साम्यावस्थास्वरूपं धारयत् **प्रकृतितत्त्वम्** – (१३) अभवत् । इदमेव प्रकृतितत्त्वं बुद्ध्यहंकारादिपृथिवीतत्त्वपर्यन्तानां तत्त्वानां मूलकारणमित्युच्यते । "इदमित्थम्" इति निश्चयकारणं **बुद्धितत्त्वम्** – (१४), "अहं ममेदम्" इत्यभिमानकारणम् **अहंकार-तत्त्वम्** –(१५), "स्थाणुर्वा पुरुषो वा" इति संकल्पविकल्पयोः साधनं **मनस्तत्त्वम्** – (१६) । बुद्ध्यहंकारमनस्तत्त्वानि शरीरान्तःपातित्वाद् "अन्तःकरणम्" इत्युच्यन्ते । इदमन्तःकरणम् इच्छाशक्तिप्रधानम् । पूर्वोक्तं प्रकृतितत्त्वमेव शरीरबाह्ये लग्नं सत् पञ्चज्ञानेन्द्रियरूपेण परिणमते स्म। तत्र शब्दज्ञानसाधनं **श्रोत्रतत्त्वम्** –(१७), स्पर्शज्ञानसाधनं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्वक्तत्त्वम् – (१८), रूपज्ञानसाधनं **चक्षुषः तत्त्वम्** – (१९), रसज्ञानसाधनं **जिह्वातत्त्वम्** – (२०), गन्धज्ञानसाधनं च **घ्राणतत्त्वम्** – (२१)। एतद्बाह्यकरणपञ्चकं ज्ञानशक्तिप्राधान्यात् **ज्ञानेन्द्रियमित्युच्यते**। पूर्वोक्तं प्रकृतितत्त्वमेव क्रियाशक्त्युद्रेकदशां प्राप्य रजोगुणप्राधान्येन कर्मेन्द्रियपञ्चकत्वेन परिणमते स्म । तत्रोच्चारणक्रियासाधनं **वाक्तत्त्वम्** – (२२) दानादानादिक्रियासाधनं **पाणितत्त्वम्** – (२३), गमनागमनादिक्रियासाधनं **पादतत्त्वम्** – (२४), मलविसर्जनक्रियासाधनं **पायुतत्त्वम्** – (२५), रेतोमूत्रविसर्जनसाधनं **उपस्थातत्त्वम्** – (२६) च । एतद्बाह्यकरणपञ्चकं क्रियाशक्तिप्राधान्यात् **कर्मेन्द्रियमिति** कथ्यते । केवलश्रोत्रेन्द्रियग्रहणविषयीभूतं **शब्दतत्त्वम्** – (२७), केवलत्वगिन्द्रियग्रहणविषयीभूतं **स्पर्शतत्त्वम्** – (२८), केवलनेत्रेन्द्रियग्रहणविषयीभूतं **रूपतत्त्वम्** – (२९), केवलजिह्वेन्द्रियग्रहणविषयीभूतं **रसतत्त्वम्** – (३०), केवलघ्राणेन्द्रियग्रहणविषयीभूतं च **गन्धतत्त्वम्** – (३१) । अत्र ध्वन्यात्मकवर्णात्मकत्वेन शब्दस्य, शीतोष्णात्मकत्वेन स्पर्शस्य, नीलपीताद्यात्मकत्वेन रूपस्य, मधुराम्लाद्यात्मकत्वेन रसस्य, सुगन्धदुर्गन्धात्मकत्वेन गन्धस्य च विभागो न कृत इति सामान्यस्वरूपेण स्थितत्वात् **तानि तन्मात्रशब्देन व्यवह्रियन्ते** शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रं चेति । शक्तितत्त्वमेव वाय्वग्निजलपृथिवीतत्त्वानाम् अवकाशप्रदम् **आकाशतत्त्वम्** – (३२), स्पर्शगुणकं **वायुतत्त्वम्** – (३३), रूपगुणकं **तेजस्तत्त्वम्** – (३४), रसगुणकं **जलतत्त्वम्** – (३५), गन्धगुणकं च **पृथिवीतत्त्वम्** – (३६) इति पञ्चरूपेण परिणमते स्म। **प्रकृतितत्त्वादारभ्य पृथिवीतत्त्वपर्यन्तं चत्वारिंशत्तत्त्वानि अशुद्धतत्त्वानीत्युच्यन्ते** ॥३॥

यद्भासा भासते विश्वं यत्सुखेनानुमोदते ।
नमस्तस्मै गुणातीतविभवाय परात्मने ॥४॥

व्याख्या— परमात्मनः सर्वभासकत्वं संसूच्य गुणातीतं परमात्मानं वन्दते— **यद्भासेति**। **यद्भासा** यस्य भासा प्रकाशेन **विश्वं भासते** प्रकाशते।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"तस्य भासा सर्वमिदं विभाति" (कठ. उ., ५.१५) इति हि श्रुतिः। **यत्सुखेन** यस्य सुखेन आनन्देन **अनुमोदते** आनन्दम् अनुभवति। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" (बृ. उ., ४.३.३२) इति श्रुतिः। **तस्मै गुणातीतविभवाय** सत्त्वरजस्तमोगुणान् अतीतोऽतिक्रान्तो **विभवः** सम्पद् यस्य सः, तस्मै, **परात्मने** परमात्मने **नमः** ॥४॥

सदाशिवमुखाशेषतत्त्वोन्मेषविधायिने।
निष्कलङ्कस्वभावाय नमः शान्ताय शम्भवे ॥५॥

व्याख्या— सदाशिवादितत्त्वोत्पत्तिकर्तृत्वं शिवस्य उद्बोधयन् परब्रह्मस्वरूपं परशिवं नमस्करोति— **सदाशिवेति**। **सदाशिवमुखाशेषतत्त्वोन्मेषविधायिने** सदाशिवमुखं सदाशिवाद्यानि अशेषतत्त्वानि समग्राणि तत्त्वानि, तेषाम् उन्मेषः उत्पत्तिः, तं विदधातुं शीलमस्येति तद्विधायी, तस्मै, **निष्कलङ्कस्वभावाय** निष्कलङ्कः सर्वदोषरहितः स्वभावः स्वस्वरूपम् यस्य सः, तस्मै, **शान्ताय** शान्तस्वरूपाय **शम्भवे** शिवाय **नमः** ॥५॥

स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने।
स्वेच्छाकृतत्रिलोकाय नमः साम्बाय शम्भवे ॥६॥

व्याख्या— भक्तानुग्रहाय स्वेच्छया दिव्यमङ्गलशरीरधारणादि सर्वतन्त्रस्वतन्त्रत्वं परमात्मनः संसूच्य तं नमस्करोति— **स्वेच्छेति**। **स्वेच्छाविग्रहयुक्ताय** स्वेच्छया विग्रहैः शरीरैर्युज्यते इति स्वेच्छाविग्रहयुक्तः, तस्मै, **स्वेच्छावर्तनवर्तिने** स्वेच्छया वर्तनम् आचरणं तद्वर्तितुं शीलमस्येति स्वेच्छावर्तनवर्ती, तस्मै, **स्वेच्छाकृतत्रिलोकाय** स्वेच्छया कृतं त्रिलोकं - त्रयाणां लोकानां समाहारः - येन सः स्वेच्छाकृतत्रिलोकः, तस्मै, **साम्बाय**, अम्बया (शक्त्या) सह साम्बः, तस्मै, **शम्भवे** शिवाय **नमः**। "स्थिरेभिरङ्गैः पुरुरूप उग्रः" (ऋ.वे., २.३३.९) इति, "एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति" (कठ. उ., ५.१२) इति च श्रुतिप्रमाणम्। अत्र साम्बशब्देन परमात्मनः शक्तिविशिष्टत्वमुक्तम् ॥६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यत्र विश्राम्यतीशत्वं स्वाभाविकमनुत्तमम् ।
नमस्तस्मै महेशाय महादेवाय शूलिने ॥७॥

व्याख्या— परमात्मनो सर्वोत्कृष्टत्वं द्योतयन् तं वन्दते— **यत्रेति** । **यत्र** परब्रह्मणि परशिवे **स्वाभाविकं** नैसर्गिकम् अमायाकल्पितम् **अनुत्तमम्** न उत्तमं यस्मात् तदनुत्तमं सर्वश्रेष्ठं च, **ईशत्वं** परमेश्वरत्वं **विश्राम्यति** पर्यवस्यति, **तस्मै महेशाय** महेश्वराय **महादेवाय** महाप्रकाशयुक्ताय (दिवु द्युतौ = प्रकाशे इति धातोः निष्पन्नो देवशब्दः, देवः = प्रकाशयुक्तः, तस्मै), **शूलिने** शूलम् अस्याऽस्तीति शूली, तस्मै त्रिशूलधारिणे शिवाय **नमः** । "स एको रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेवः" (अथ. शिंरस्, ४४), "एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाल्लोँकानीशत ईशनीभिः" (श्वे. उ., ३.२) इत्यादिश्रुतयः प्रमाणम् ॥७॥

यामाहुः सर्वलोकानां प्रकृतिं शास्त्रपारगाः ।
तां धर्मचारिणीं शम्भोः प्रणमामि परां शिवाम् ॥८॥

व्याख्या— सर्वलोकमूलकारणभूतां परशिवशक्तिं वन्दते— **यामाहुरिति । यां शास्त्रपारगाः** वेदागमादिशास्त्रे पारंगताः **सर्वलोकानां** सर्वेषां लोकानां **प्रकृतिं** मूलकारणम् इति **आहुः** कथयन्ति, **तां** तादृशीं **शम्भोः** परशिवस्य **धर्मचारिणीं** धर्मस्वरूपेण समवेतां **परां** सर्वोत्कृष्टां **शिवां** पार्वतीं **प्रणमामि** नमस्करोमि । "धर्मचारिणीं शम्भोः" इत्यनेन शक्तेः सर्वेषु शिवधर्मेषु कार्येषु सहभागित्वमुक्तम् । "जगज्जन्मस्थिति-ध्वंसतिरोभावविमुक्तयः। कृत्यं सकारकफलं ज्ञेयमस्यैतदेव हि॥" (मृ.आ., २.३) इत्युक्तरीत्या जगतः सृष्टिः, स्थितिः, लयः, तिरोधानम्, विमुक्तिश्च (अनुग्रहश्च) इति शिवस्य पञ्चकृत्यानि । तेषु सर्वेषु शक्तिः शिवस्य सहधर्मचारिणी भवति ॥८॥

यया महेश्वरः शम्भुर्नामरूपादिसंयुतः ।
तस्यै मायास्वरूपायै नमः परमशक्तये ॥९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— शिवस्य नामरूपादिलीलाप्रदर्शिनीं मायाशक्तिं प्रणमति — **ययेति** । **यया** स्वसमवेतया शक्त्या **महेश्वरः शम्भुः** परशिवः **नामरूपादिसंयुतः** नाम, स्वरूपं, क्रिया इत्यादिभिः सम्पन्नः, **तस्यै मायास्वरूपायै**, मायास्वरूपं यस्याः सा, तादृशायै मायास्वरूपिण्यै **परमशक्तये पराशक्त्यै नमः** । "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" (श्वे. उ., ४.१०) इति प्रमाणम् ॥९॥

शिवाद्यादिसमुत्पन्नशान्त्यतीतपरोत्तराम् ।
मातरं तां समस्तानां वन्दे शिवकरीं शिवाम् ॥१०॥

व्याख्या— लोकानां मातृभूतां शिवशक्तिं वन्दते— **शिवाद्यादीति** । **शिवाद्यादिसमुत्पन्नशान्त्यतीतपरोत्तरां** शिवात् परशिवाद् आद्यादि प्रथमं समुत्पन्नाभ्यः, निवृत्तिः, प्रतिष्ठा, विद्या, शान्तिः, शान्त्यतीता चेति पञ्चकलाभ्यः, परायाः कुण्डलिनीशक्तेश्च उत्तराम् अतीताम्, **समस्तानां** सर्वलोकानां **मातरं** जननीं **शिवकरीं** शुभकरीं **तां शिवां** शिवशक्तिं **वन्दे** नमामि । निवृत्त्यादिपञ्चकलाः शैवागमेषु पञ्चसादाख्यसम्बद्धत्वेन निरूप्यन्ते । शिवसादाख्यम्, अमूर्तसादाख्यम्, समूर्तसादाख्यम्, कर्तृसादाख्यम्, कर्मसादाख्यं चेति पञ्चसादाख्यानि । तेषां मूलं क्रमेण पराशक्तिः, आदिशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिश्चेति पञ्चशक्तयः । परशिवः स्वीयायां सृष्टिलीलायां स्वीयानां पञ्चशक्तीनां द्वारा पञ्चसादाख्यस्वरूपमधारयत् । निवृत्तिकला कर्मसादाख्यसम्बद्धा, प्रतिष्ठाकला कर्तृसादाख्यसम्बद्धा, विद्याकला समूर्तसादाख्यसम्बद्धा, शान्तिकला अमूर्तसादाख्यसम्बद्धा, शान्त्यतीतकला शिवसादाख्यसम्बद्धा चेति पञ्चकलानां सादाख्यपञ्चकेन सम्बन्धः उक्तः । (सू.आ., उ.भा., क्रि.पा., १.३३-३७, ३८-३९, ४३-४७) । पौष्करागमोक्तदिशा कुण्डलिनीशक्तिर्बिन्दुशब्देन व्यवह्रियते । बिन्दुस्तावत् निवृत्त्यादिकलाः उत्पादयति । तदुक्तम् – "अन्याश्च वृत्तयो बिन्दोर्निवृत्त्यादिकलात्मिकाः । निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च । शान्त्यतीता च पञ्चैते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शुद्धमार्गे परात्मिकाः ॥" (पौ. आ., बिन्दुपटलः, ३०-३१) इति । इयं च कुण्डलिनीशक्तिः परशिवस्य विमर्शशक्तिवत् न तादात्म्यसम्बद्धा नाऽविनाभूता नाऽनादिचैतन्यात्मिका भवति, परं तु सा जडात्मिका परिग्रहशक्तिः उपादानकारणत्वेन स्थिता कुलालस्य मृत्तिकावत् । तथैवोक्तम्— "या च कुण्डलिनी शम्भोः शक्तिः शुद्धा जडात्मिका । न तादात्म्यात् स्थिता किन्तु वर्तमाना सा परिग्रहात् । उपादानत्वतो हेतुः कुलाले मृत्तिका यथा ॥" (पौ.आ., बिन्दुपटलः, ११-१२) इति । मोग्गेय-मायिदेवः शान्त्यतीतोत्तरानाम्नीं षष्ठीं चिच्छक्त्यात्मिकां परिगणयति । तन्मते शान्त्यतीतोत्तरकलाया आरभ्य निवृत्तिकलापर्यन्तं षट्कलाभिः चिच्छक्त्यादिन्यः षट्शक्तयः तादात्म्यभावं प्राप्ताः सत्यो महालिङ्गस्थलम्, प्रसादघनलिङ्गस्थलम्, चरलिङ्गस्थलम्, शिवलिङ्गस्थलम्, गुरुलिङ्गस्थलम्, आचारलिङ्गस्थलं चेति षण्णां लिङ्गस्थलानाम् अभिमानिन्यो भवन्ति । तानि षड्लिङ्गस्थलानि क्रमेण ऐक्यस्थलम्, शरणस्थलम्, प्राणलिङ्गिस्थलम्, प्रसादिस्थलम्, माहेश्वरस्थलम्, भक्तस्थलं चेति षण्णाम् अङ्गस्थलानाम् उपास्यलिङ्गस्थलत्वेन स्थितानि । लिङ्गस्थलानि परमात्मस्थलानि, अङ्गस्थलानि जीवात्मस्थलानीति विवेकः ॥१०॥

इच्छाज्ञानादिरूपेण या शम्भोर्विश्वभाविनी ।
वन्दे तां परमानन्दप्रबोधलहरीं शिवाम् ॥११॥

व्याख्या— पुनः स्वीयैरिच्छादिरूपैः शम्भुं विश्वरूपेण प्रदर्शयन्तीं परमानन्दस्वरूपिणीं शक्तिं संस्तुत्य प्रणमति— **इच्छेति । या इच्छाज्ञानादिरूपेण**, इच्छाशक्तिर्ज्ञानशक्तिरित्यादिना स्वरूपेण **शम्भोः** परमात्मनः शिवस्य **विश्वभाविनीं, तां** विश्वरूपेण भावयितुं शीलमस्या इति विश्वभाविनी, तादृशीं, **परमानन्दप्रबोधरहरीं** परमस्य उत्कृष्टस्याऽऽनन्दस्य प्रबोधः परमज्ञानं तस्य लहरी तरङ्गभूता, तादृशीं **शिवाम्** परशिवशक्तिं **वन्दे** प्रणमामि । "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥" (श्वे. उ., ६.८) इति हि श्रुतिः । परशिवस्य ज्ञानशक्तिप्रवेशेन यत् शिवतत्त्वं जातं तदेव विश्वस्य निमित्तकारणं भवति । एवमेव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्य क्रियाशक्तिप्रवेशेन यत् शक्तितत्त्वं तदेव विश्वस्य उपादानकारणं भवति । एवं परशिवः शक्तेः सहकारेण विश्वरूपेण प्रकाशते ॥११॥

अमृतार्थं प्रपन्नानां या सुविद्याप्रदायिनी ।
अहर्निशमहं वन्दे तामीशानमनोरमाम् ॥१२॥

व्याख्या— मुमुक्षुभ्यः सम्यग् ज्ञानदात्रीत्वेन संस्तुत्य पुनस्तामेव शक्तिं नमस्करोति— **अमृतार्थमिति । अमृतार्थं** मुक्तिप्राप्त्यर्थं **प्रपन्नानां** शरणागतानां **या सुविद्याप्रदायिनी** सुविद्यां सम्यग् ज्ञानं प्रदातुं शीलम् अस्या इति, तादृशीम् **ईशानमनोरमाम्** ईशानस्य परमेश्वरस्य मनः रमयतीति तां तादृशीं परशिवशक्तिं **अहर्निशम्**, अहश्च निशाश्च तयोः समाहारः, अहर्निशं यथा भवति तथाऽहं **वन्दे** नमामि । सुविद्या नाम वेदान्तज्ञानम् । सा च "तत् त्वम् असि" (छां.उ., ६.८.७) इत्यादिमहावाक्यानां ज्ञानम् । एषा एव शिवजीवैक्यज्ञानमिति लिङ्गाङ्गसामरस्यमिति च वीरशैवसिद्धान्ते व्यवह्रियते । 'ईशानमनोरमा' इति पुराणोक्तः व्यवहारः । अध्यात्मविद्यायां तु सा शिवसमवेतशक्तिरेव ॥१२॥

ग्रन्थकर्तुः परम्परा

व्याख्या— शिवशक्त्योर्नमस्कारात्मकं मङ्गलाचरणं विधाय ग्रन्थकारः स्वकीयां परम्परां परामृशति ।

कश्चिदाचारसिद्धानामग्रणीः शिवयोगिनाम् ।
शिवयोगीति विख्यातः शिवज्ञानमहोदधिः ॥१३॥

शिवभक्तिसुधासिन्दुजृम्भणामलचन्द्रिका ।
भारती यस्य विदधे प्रायः कुवलयोत्सवम् ॥१४॥

व्याख्या— स्वपरम्परायां प्रथितयशसं पूर्वाचार्यं शिवयोगिशिवाचार्यनामानं श्लोकयुगलेन स्तौति - **कश्चिदिति । आचारसिद्धानां** आचारे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सदाचारे सिद्धा निष्णताः, तेषां **शिवयोगिनां** मध्ये **अग्रणीः** अग्रेसरः, **शिवज्ञानमहोदधिः** शिवज्ञानमेव महोदधिः महान् समुद्रः, **शिवयोगीति** शिवयोगिशिवाचार्य इति विख्यातः प्रसिद्धः कश्चन आसीत् । **यस्य** शिवयोगिनः **शिवभक्तिसुधासिन्धुजृम्भणामलचन्द्रिका** शिवे भक्तिः शिवभक्तिः, सा एव सुधासिन्धुः सुधाया अमृतस्य सिन्धुः समुद्रः, तस्य जृम्भणं तरङ्गोच्चलनम्, तदर्थम् अमलचन्द्रिका अमला निर्मला चन्द्रिका ज्योत्स्ना, तद्दृशी **भारती** वाणी **प्रायः** आधिक्येन **कुवलयोत्सवं**, कुवलयं कुः भूमिः, तस्याः वलयं मण्डलम्, कुवलयमेव भूमण्डलमेव कुवलयं नीलोत्पलम्, तस्य उत्सवः, तं **विदधे** चकार ॥ 'शिवज्ञानमहोदधिः' 'शिवभक्तिसुधासिन्धुजृम्भणामलचन्द्रिका', 'कुवलयोत्सवम्' इत्यादिषु रूपकालङ्कारः । लक्षणमुक्तं प्राक् । 'कुवलयोत्संवम्' इत्यत्र श्लिष्ट-रूपकम् । "नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रयः" (कु.आ., ६४) इति श्लेषलक्षणम् । चन्द्रिकया समुद्रतरङ्गोच्चलनं कविसमयः ॥१३-१४॥

तस्य वंशे समुत्पन्नो मुक्तामणिरिवामलः ।
मुद्ददेवाभिधाचार्यो मूर्धन्यः शिवयोगिनाम् ॥१५॥

मुद्दानात्सर्वजन्तूनां प्रणतानां प्रबोधतः ।
मुद्ददेवेति विख्याता समाख्या यस्य विश्रुता ॥१६॥

व्याख्या— तद्वंशभवस्य मुद्ददेवाचार्यस्य वर्णनं क्रियते— **तस्येति** । **तस्य** शिवयोगिशिवाचार्यस्य **वंशे**ऽन्वये वेणौ वा **मुक्तामणिरिव** मुक्ताफलमिव **अमलो** निर्मलो **मुद्ददेवाभिधाचार्यो** मुद्ददेवनामाऽऽचार्यः **समुत्पन्नः** जातः **शिवयोगिनां** मध्ये **मूर्धन्यः** शिरोधारणयोग्यः श्रेष्ठः आसीत् । **सर्वजन्तूनां** सर्वेषां प्राणिनां **मुद्दानात्** मुदः सन्तोषस्य दानम्, तस्मात्, **प्रणतानां** प्रणामकृतां, शरणागतानाम् इति यावत्, **प्रबोधतः** ज्ञानजागरणात् (च) **यस्य** शिवयोगिवरेण्यस्य **मुद्ददेवेति** मुद्ददेव इति **विख्याता** प्रसिद्धा **समाख्या** सन्नामप्रतीतिः **विश्रुता** विशेषेण श्रुता श्रवण-गोचरमागता ॥ 'तस्य वंशे मुद्ददेवः वेणौ मुक्तामणिरिव अमलः'

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इत्युपमा। 'वंशे' इत्यत्र श्लिष्टा ॥ "उपमा यत्र सादृश्यलक्ष्मीरल्लसति द्वयोः।" इति हि लक्षणम् (कु. आ., ६) ॥१५-१६॥

तस्यासीन्नन्दनः शान्तः सिद्धनाथाभिधः शुचिः।
शिवसिद्धान्तनिर्णेता शिवाचार्यः शिवात्मकः ॥१७॥

वीरशैवशिखारत्नं विशिष्टाचारसम्पदम्।
शिवज्ञानमहासिन्धुं यं प्रशंसन्ति देशिकाः ॥१८॥

यस्याचार्यकुलाज्जाता सतामाचारमातृका।
शिवभक्तिः स्थिरा यस्मिन् जज्ञे विगतविप्लवा ॥१९॥

व्याख्या— सिद्धानाथाख्यम् आचार्यं प्रस्तौति— **तस्येति**। **तस्य** मुद्ददेव-शिवाचार्यस्य **शान्तो** रागद्वेषादिशून्यः, **शुचिः** निर्मलः, **शिवसिद्धान्तनिर्णेता** शिवसिद्धान्तस्य शिवाद्वैतसिद्धान्तस्य निर्णेता निर्णायको **नन्दनः** करसञ्जातः **सिद्धानाथाभिधः** सिद्धानाथ इत्याभिधानवान् **शिवात्मकः** शिवस्वरूपः **शिवाचार्यः आसीद्** अभवत् ॥ **यं** सिद्धानाथशिवाचार्यं **देशिकाः** शिवाचार्याः **वीरशैवशिखारत्नं** वीरशैवानां शिरोमणिं श्रेष्ठम्, **विशिष्टाचारसम्पदम्** विशिष्ट आचारः सदाचारः, स एव सम्पत् यस्य सः, तम्, **शिवज्ञानमहासिन्धुं** शिवज्ञानमेव शिवाद्वैतज्ञानमेव महासिन्धुः महान् समुद्रः, तम्, **प्रशंसन्ति** स्तुवन्ति ॥ **यस्य आचार्यकुलात्** शिवाचार्यवंशात् **सतां** सत्पुरुषाणाम् **आचारमातृका** मूलभूतांशप्रतीतिः **जाता** उत्पन्ना। **यस्मिन्** च वंशे **विगतविप्लवा** निर्गतदोषा **शिवभक्तिः स्थिरा** दृढा **जज्ञे** जाता अभवत् ॥ 'वीरशैवशिखारत्नम्', 'विशिष्टाचारसम्पदम्', 'शिव-ज्ञानमहासिन्धुम्' इत्यत्र रूपकालंकाराः ॥१७-१९॥

तस्य वीरशिवाचार्यशिखारत्नस्य नन्दनः।
अभवच्छिवयोगीति सिन्धोरिव सुधाकरः ॥२०॥

व्याख्या— ग्रन्थकर्तारं शिवयोगिशिवाचार्यं प्रस्तौति – **तस्येति**। **तस्य** सिद्धानाथनाम्नो **वीरशिवाचार्यशिखारत्नस्य** वीरशैवाचार्यशिरोमणेः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नन्दनः करसञ्जातः **सिन्धोरिव सुधाकरः** समुद्रस्य चन्द्र इव **शिवयोगीति** शिवयोगिशिवाचार्य इति **अभवत्** बभूव ॥ 'सिन्धोरिव सुधाकरः' इत्यत्रोपमा। तल्लक्षणमुक्तम् प्राक् ॥२०॥

चिदानन्दपराकाशशिवानुभवयोगतः।
शिवयोगीति नामोक्तिर्यस्य याथार्थ्ययोगिनी ॥२१॥

शिवागमपरिज्ञानपरिपाकसुगन्धिना।
यदीयकीर्तिपुष्पेण वासितं हरितां मुखम् ॥२२॥

येन रक्षावती जाता शिवभक्तिः सनातनी।
बुद्धादिप्रतिसिद्धान्तमहाध्वान्तांशुमालिना ॥२३॥

स महावीरशैवानां धर्ममार्गप्रवर्तकः।
शिवतत्त्वपरिज्ञानचन्द्रिकावृतचन्द्रमाः ॥२४॥

व्याख्या— स्वकीयं शास्त्रवैदुष्यं परिचाययन् ग्रन्थकृत् कथयति— **चिदानन्देति। चिदानन्दपराकाशशिवानुभवयोगतः** चिच्च आनन्दश्च तयोः समाहारः चिदानन्दम्, तदेव पराकाशः परमाकाशः चिदानन्दपराकाशः, स एव शिवानुभवः शिवाद्वैतपरिज्ञानं तस्य योगतो योगात्, **शिवयोगीति यस्य नामोक्तिः** अभिधा **याथार्थ्ययोगिनी** यथार्थस्य भावः याथार्थ्यम्, यथार्थताऽन्वर्थता इत्यर्थः, याथार्थ्येन योगिनी संयुक्ता ॥ **शिवागम-परिज्ञानपरिपाकसुगन्धिना** शिवागमानां परिज्ञानं प्रकृष्टज्ञानम् तस्य परिपाकः परिपक्वभावः, सुगन्धः (सुष्ठु गन्धः) अस्यास्तीति सुगन्धि, परिपाकेन सुगन्धि, तेन, **यदीयकीर्तिपुष्पेण** यस्य इदं यदीयम्, कीर्तिरिव पुष्पं कीर्तिपुष्पम्, यदीयं कीर्तिपुष्पं यदीयकीर्तिपुष्पम्, तेन, यस्य शिवयोगि-शिवाचार्यस्य कीर्तिकुसुमेन **हरितां मुखं** दिशानां अन्तं **वासितं** सुगन्धितमभवत् ॥ **बुद्धादिप्रतिसिद्धान्तमहाध्वान्तांशुमालिना** बुद्धादयः बौद्धादयः प्रतिसिद्धान्ता विरोधिसिद्धान्ताः, त एव महाध्वान्तं महत्तमः तन्निर्मूलनक्षमेण अंशुमालिना सूर्येण **येन** शिवयोगिशिवाचार्येण **सनातनी**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निरन्तरतया प्रवृत्ता चिरंतना **शिवभक्तिः रक्षावती** रक्षायुक्ता (रक्षिता) जाताऽभवत् **सः** तादृशः **शिवतत्त्वपरिज्ञानचन्द्रिकावृतचन्द्रमाः** शिवतत्त्वस्य परिज्ञानमेव चन्द्रिका ज्योत्स्ना तयाऽऽवृतः परिवृतः चन्द्रमाश्चन्द्रः सन् **महावीरशैवानां** महत्त्वशालिनां वीरशैवानां **धर्ममार्गप्रवर्तकः** धर्ममार्गे प्रवर्तयतीति तादृशोऽभवत् । 'चिदानन्दपराकाशशिवानुभवः', 'शिवागमपरिज्ञानपरिपाकसुगन्धि', 'कीर्तिपुष्पम्', 'बुद्धादिप्रतिसिद्धान्तमहाध्वान्तांशुमाली', 'शिवतत्त्वपरिज्ञानचन्द्रिकावृतचन्द्रमाः', इत्यत्र रूपकालंकाराः ॥२१-२४॥

ग्रन्थावतारक्रमः

आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम् ।
वातुलान्तानि शैवानि पुराणान्यखिलानि तु ॥२५॥

वेदमार्गाविरोधेन विशिष्टाचारसिद्धये ।
असन्मार्गनिरासाय प्रमोदाय विवेकिनाम् ॥२६॥

सर्वस्वं वीरशैवानां सकलार्थप्रकाशनम् ।
अस्पृष्टमखिलैर्दोषैरादृतं शुद्धमानसैः ॥२७॥

तेष्वागमेषु सर्वेषु पुराणेष्वखिलेषु च ।
पुरा देवेन कथितं देव्यै तन्नन्दनाय च ॥२८॥

तत्सम्प्रदायसिद्धेन रेणुकेन महात्मना ।
गणेश्वरेण कथितमगस्त्याय पुनः क्षितौ ॥२९॥

वीरशैवमहातन्त्रमेकोत्तरशतस्थलम् ।
अनुग्रहाय लोकानामभ्यधात् सुधियां वरः ॥३०॥

व्याख्या— ग्रन्थावतारक्रममाह— आलोक्येति । **कामिकाद्यानि** कामिकः आद्यः येषां तानि, **वातुलान्तानि** वातुलः अन्तः येषां तानि,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कामिकादिवातुलान्तानि **शैवतन्त्राणि** शैवागमाख्यानि, **शैवानि** शिव-सम्बन्धीनि **अखिलानि** सर्वाणि **पुराणानि च सादरम्** आदरेण प्रीत्या सह यथा भवति तथा **आलोक्य** अधीत्य (परिशील्य); **वेदमार्गाविरोधेन** वेद-मार्गस्य अविरोधेन विरोधराहित्येन **विशिष्टाचारसिद्धये** विशिष्टस्याऽनितर-साधारणस्यऽऽचारस्य सदाचारस्य सिद्धये सिद्ध्यर्थम्, **असन्मार्गनिरासाय** असतां असत्पुरुषाणां मार्गस्य निरासाय निराकरणाय **विवेकिनां** नित्यानित्यविवेकयुक्तानां **प्रमोदाय** सन्तोषाय **वीरशैवानां सर्वस्वं** सारभूतम्, **सकलार्थप्रकाशनं** सकलानां सर्वेषां अर्थानां तत्त्वानां प्रकाशनं बोधप्रदम्, **अखिलैः दोषैः** अखिलैः समग्रैः दोषैः **अस्पृष्टम्** अकलङ्कितम्, **शुद्धमानसैः** निर्मलबुद्धिभिः **आदृतं** प्रीत्या स्वीकृतम्, **तेषु सर्वेषु** कामिकादिवातुलान्तेषु **आगमेषु** शैवागमेषु **अखिलेषु** सर्वेषु **पुराणेषु च पुरा पूर्वं देवेन** महेश्वरेण **देव्यै** पार्वत्यै **तन्नन्दनाय** तस्याः पुत्राय षण्मुखाय च **कथितं** निरूपितम्, **तत्संप्रदायसिद्धेन** तत्संप्रदायः शैवागमसंप्रदायः तस्मिन् सिद्धेन निष्णातेन **महात्मना** महापुरुषेण **गणेश्वरेण** शिवगणस्य नायकेन **रेणुकेन** रेणुकाचार्येण **पुनः क्षितौ** भूमौ **अगस्त्याय** अगस्त्यं निमित्तीकृत्य **कथितं** बोधितम्, तादृशं **एकोत्तरशतस्थलम्** एकाधिकशत-स्थलात्मकं **वीरशैवमहातन्त्रं** वीरशैवानां महच्छास्त्रं वीरशैवसिद्धान्तम् इति यावत्, **लोकानां** जनानाम् **अनुग्रहाय** अनुग्रहार्थं **सुधियां वरः** सुज्ञानिनां श्रेष्ठः शिवयोगिशिवाचार्यो **अभ्यधाद्** उपादिदेश ॥२५-३०॥

सर्वेषां शैवतन्त्राणामुत्तरत्वान्निरुत्तरम् ।
नाम्ना प्रतीयते लोके यत्सिद्धान्तशिखामणिः ॥३१॥

व्याख्या— ग्रन्थनाम्नः महत्त्वमाह - सर्वेषामिति । **यत्सिद्धान्त-शिखामणिः** यः सिद्धान्तशिखामणिरिति नाम्ना **लोके** जगति **प्रतीयते** ज्ञायते स **सर्वेषां** सकलानां **शैवतन्त्राणां** शैवागमानाम् **उत्तरत्वाद्** उत्तर-भागस्थितत्वात् **निरुत्तरम्** उत्तररहितं पूर्वपक्षादियुक्तिपूर्वकं निरासा-तीतम् भवति ॥३१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अनुगतसकलार्थे शैवतन्त्रैः समस्तैः
प्रकटितशिवबोधाद्वैतभावप्रसादे ।
विदधतु मतिमस्मिन् वीरशैवा विशिष्टाः
पशुपतिमतसारे पण्डितश्लाघनीये ॥३२॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागम-पुराणादिसारभूते श्रीसिद्धान्तशिखामणौ मङ्गलाचरणानुक्रमप्रसङ्गो नाम प्रथमः परिच्छेदः ॥१॥

व्याख्या— समस्तै सर्वैः **शैवतन्त्रैः** शैवागमैः, **अनुगतसकलार्थे** अनुगतः सकलः तत्त्वार्थः यस्मिन्, तस्मिन्, **प्रकटितशिवबोधाद्वैतभाव-प्रसादे** प्रकटितः प्रकाशितः शिवबोधः शिवज्ञानम्, तेनाद्वैतभावः समरसभावः तेन प्रसादः प्रसन्नता यस्मिन्, तस्मिन्, **पशुपतिमतसारे** पाशुपतमतसारे शिवसिद्धान्तसारभूते इति यावत्, **पण्डितश्लाघनीये** पण्डितैर्विद्वद्भिः श्लाघनीये प्रशंसनीये अस्मिन् सिद्धान्तशिखामणौ **विशिष्टा** अनन्यसाधारणा **वीरशैवा मतिं** चित्तं **विदधतु** कुर्वन्तु, अध्ययनतत्परा भवन्त्वित्यर्थः। मालिनीवृत्तम् । तल्लक्षणम् – "ननमयय-युतेयं मालिनी भोगिलोकैः" (आप्टे, पृ.६५३) — [UUU (नगण), UUU (नगण), --- (मगण), U-- (यगण), U -- (यगण)] ।

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
प्रथमः परिच्छेदः समाप्तः ॥१॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्वितीयः परिच्छेदः

रेणुकदारुकावतरणम्

व्याख्या— अस्मिन् परिच्छेदे द्वितीये शिवयोगिशिवाचार्यः पार्वती-परमेश्वरौ प्रणम्य रेणुकदारुकावतरणं वर्णयति ।

सच्चिदानन्दरूपाय सदसद्व्यक्तिहेतवे ।
नमः शिवाय साम्बाय सगणाय स्वयंभुवे ॥१॥

व्याख्या— प्रथमं शिवं प्रणमति— **सच्चिदिति । सच्चिदानन्दस्वरूपाय** सच्च चिच्च आनन्दश्च, तेषां समाहारः सच्चिदानन्दम्, तदेव स्वरूपं यस्य सः, तस्मै, **सदसद्व्यक्तिहेतवे** सच्चासच्च सदसती भावाभावौ तयोः व्याक्तिराविर्भावः, तस्य हेतुः, तस्मै, **साम्बाय** अम्बया शक्त्या सह साम्बः, तस्मै, **सगणाय** गणैः सह सगणः, तस्मै, **स्वयंभुवे** स्वयं भवतीति स्वयंभूः, तस्मै, **शिवाय** परमात्मने **नमः** ॥१॥

सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिकाम् ।
वन्दे माहेश्वरीं शक्तिं महामायादिरूपिणीम् ॥२॥

व्याख्या— शक्तिं संस्तुत्य प्रणमति— **सदाशिवेति । सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिकां** सदाशिवः मुखम् आदिः येषां तानि सदाशिव-मुखानि, अशेषाणि सर्वाणि तत्त्वान्येव मौक्तिकानि तेषां शुक्तिका, उत्पत्तिस्थानभूता शुक्तिः, ताम्, **महामायादिरूपिणीं**, महामायाद्यः शक्तयः, तेषां रूपाण्यस्याः सन्तीति, तां **माहेश्वरीं** महेश्वरस्य इयमिति माहेश्वरी, ताम्, **शक्तिं वन्दे** प्रणमामि । सदाशिवमुखेत्यादिनि श्लोकस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूर्वार्धे रूपकालङ्कारः ॥ प्रथमपरिच्छेदस्य तृतीय-श्लोकव्याख्यायां षट्-त्रिंशत्तत्त्वानि निरूपितानि । महामाया तावत् 'शुद्धविद्या', 'ऊर्ध्वमाया' इत्यादिनामभिर्व्यवह्रियते । "मयत्यस्माज्जगद्विश्वं माया तेन समीरिता" (पौ. आ., मायापटलः, १) इत्युक्तदिशा जगदाविर्भावमूलत्वेन शक्ते-र्मायात्वम् ॥२॥

अस्ति सच्चित्सुखाकारमलक्षणपदास्पदम् ।
निर्विकल्पं निराकारं निरस्ताशेषविप्लवम् ॥३॥

परिच्छेदकथाशून्यं प्रपञ्चातीतवैभवम् ।
प्रत्यक्षादिप्रमाणानामगोचरपदे स्थितम् ॥४॥

स्वप्रकाशविराजन्तमनामयमनौपमम् ।
सर्वज्ञं सर्वगं शान्तं सर्वशक्ति निरङ्कुशम् ॥५॥

शिवरुद्रमहादेवभवादिपदसंज्ञितम् ।
अद्वितीयमनिर्देश्यं परं ब्रह्म सनातनम् ॥६॥

व्याख्या— विश्वसृष्टिक्रमं विवक्षुः परशिवब्रह्मणो मूलस्वरूपं दर्शयति-**अस्तीति** । **सनातनम्** आद्यन्तरहितं, नित्यमिति यावत्, **परं ब्रह्म** परशिवब्रह्म **अस्ति** भवति । तदस्तीत्येव मन्तव्यम् । नो चेत् "असन्नेव स भवति असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ॥" (तै.उ., २.६) इत्युक्तरीत्याऽसद्ब्रह्मेति चेत् सर्वमसदेव भवति। कीदृशं ब्रह्म? **सच्चित्सुखाकारम्** । सच्च चिच्च सुखं चेत्येषां समाहारः सच्चित्सुखं तदेवाऽऽकारः स्वरूपं यस्य तत्, सच्चिदानन्दस्वरूपम् इत्यर्थः । तदुक्तम्— "कश्चित्स्वतःसिद्धः सच्चिदानन्दलक्षणः ।" इति, "शिवस्तु सच्चिदानन्दलक्षणः परमेश्वरः ।" इति च (सू. आ., उ. भा., क्रि. पा., १.१४, १.२३) । पुनः कीदृशम् ? **अलक्षणपदास्पदम्** । अलक्षणं, न विद्यते लक्षणं चिह्नं यस्य तत्, तादृशं पदं स्थानम्, तदेवाऽऽस्पदम् आश्रयो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यस्य तत्; तत्पदं "द्वादशान्तं पदं स्थानम्" (द. मू. उ., २४) इत्युच्यते योगिभिः। योगपरिभाषायां द्वादशान्तपदं हृदयं वा सहस्रारं वा भवति; तदेव जीवात्माभिन्नस्य परशिवब्रह्मण उपलब्धिस्थानम्। तदुक्तम्— "द्वादशान्तशब्देन हृदयं सहस्रारं वा उच्यते, प्रत्यगभिन्नपरमात्मन उपलब्धिस्थानत्वात्।" (द.मू.उ., २४, उपनिषद्ब्रह्मयोगिनो व्याख्यानम्)। पुनः कीदृशम् ? **निर्विकल्पम्, निराकारम् च**। न विद्यते विकल्पो भेदो यस्मिन् तत् निर्विकल्पम्। न विद्यते आकारः यस्य तत् निराकारम्। तदुक्तम्— "विकल्परहितं तत्त्वं ज्ञानमानन्दमव्ययम्" (स्कन्द. पु., सू.सं. - शैव.प., पृ.२९) इति, "न च नामानि रूपाणि शिवस्य परमात्मनः" (तत्रैव) इति च। पुनः किदृशम् ? **निरस्ताशेषविप्लवम्**। निरस्तो निराकृतोऽशेषः संपूर्णो विप्लवो भ्रमो यस्मात् तत्। "नित्यो निरञ्जनः शुद्धो निर्मलो निरुपप्लवः" (सू. आ., उ. भा., क्रि. पा., १.१४) इति। पुनः कीदृशम् ? **परिच्छेदकथाशून्यम्**। परिच्छेदस्य विभागस्य कथया प्रसंगेन शून्यं रहितम्। सृष्टेः प्राक् परमात्मनो भेदरहितत्वम् आसीत्। सृष्ट्युन्मुखे तस्मिन् स्वशक्तिस्पन्देन विभागदशामापन्नः सन्, सृष्ट्यनन्तरं सृष्टे सर्वस्मिन् प्रविष्टवान् इति श्रुतिः— "तत् सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाऽभवत्॥" (तै. उ., २.६) इति। "अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।" (भ. गी., १३.१६) इति च प्रमाणम्। पुनः कीदृशम् ? **प्रपञ्चातीतवैभवम्**। प्रपञ्चः लोकः, प्राकृत सृष्टिरिति यावत्, तम् अतीतोऽतिक्रान्तो वैभवः सम्पत् यस्य तत्, अप्राकृत-वैभवमित्यर्थः। श्रुतिराह— "स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशङ्गुलम्" (ऋ. वे., १०.९०.१) इति, "एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।" (कठ. उ., ५.९) इति च। पुनः कीदृशम् ? **प्रत्यक्षादिप्रमाणानाम् अगोचरपदे स्थितम्**। प्रत्यक्षादीनां प्रमाणानाम् अगोचरपदे व्याप्त्यतीते स्थाने स्थितम्। प्रमाणातीतमित्यर्थः। तदुक्तम् - "प्रमाणातीतमचलं हेतुदृष्टान्तवर्जितम्" (पार. आ., २१.२४) इति। पुनः कीदृशम् ? **स्वप्रकाशविराजन्तम्**। स्वप्रकाशेन स्वदीप्त्या विराजन्तं प्रकाशमानम्। श्रुतिराह— "अत्रायं पुरुषो स्वायंज्योतिर्भवति" (बृ. उ.,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

४.३.९) इति, "तमेव भान्तमनुभाति सर्वम्" (कठ. उ.,५.१५) इति च। पुनः कीदृशम् ? **अनामयम्, अनौपमम्, सर्वज्ञम्, सर्वगम्, शान्तं च**। न विद्यते आमयो दोषः यस्मिन् तदानामयम्, न विद्यते उपमा सादृश्यं येन तद् अनौपमम्। सर्वं जानातीति सर्वज्ञम्। सर्वत्र गच्छतीति सर्वगम्। रागद्वेषादिरहितं शान्तम्। तदुक्तम्— "नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः।" (मुं. उ., १.२.६) इति, "अप्रमेयमनिर्देश्यमनौपम्यमनामयम्। सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम्" (स्वायं. आ., शैव. प., पृ. २९) इति, "अनौपम्यमसादृश्याद्विमलत्वादनामयम्। सूक्ष्ममनुपलभ्यत्वाद्व्यापकत्वाच्च सर्वगम्। नित्यं कारणशून्यत्वादचलत्वाच्च तद्ध्रुवम्॥ अव्ययं परिपूर्णत्वात् स्वामिभावात्तथेश्वरम्॥" (स्वायं. आ. - शैव. प., पृ. २९) इति च। पुनः कीदृशम् ? **सर्वशक्ति, निरङ्कुशं च**। सर्वाः शक्तयः यस्य तत् सर्वशक्ति। उक्तं च— "सर्वकर्ता सर्वकामः सर्वगन्धः सर्वरसः।" (छां. उ., ३.१४.२) इति, "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।" (मुं. उ., १.१.९) इति च। निर्गतोऽकुशो नियंत्रणं यस्मात् तत् निरङ्कुशम्। पुनः कीदृशम् ? **शिवरुद्रमहादेवभवादिपदसंज्ञितम्**। शिवः, रुद्रः, महादेवः, भवः, इत्यादिभिः पदैर्नामपदैः संज्ञितं ज्ञातम्। परशिवब्रह्म बहुभिर्नामभिः संज्ञितं येषु कानिचन मुख्यया वृत्त्याऽन्वीयन्ते कानिचनाऽन्यानि योगवृत्त्या। एतानि नामानि तस्य रूपाणीव मायाशक्तिवशान्निष्पन्नानि भवन्ति। तदुक्तम्— "तथापि मायया तस्य नामरूपे प्रकल्पिते। शिवो रुद्रो महादेवः शङ्करो ब्रह्म तत्परम्॥ विष्णुनारायणादीनि नामानि परमेश्वरे। कथंचिद्योगवृत्त्या तु वर्तन्ते न तु मुख्यया॥" (स्कन्द.पु., सू.सं. – शैव. प., पृ. २९) इति। नामस्वेतेषु शिवः, रुद्रः, महादेवः, शङ्करः, ब्रह्म च मुख्यया वृत्त्या परशिवब्रह्मण्यन्वितानि, विष्ण्वादीनि योगवृत्त्या। व्यापनाद् विष्णुः [विषलृ व्याप्तौ इति धातोर्निष्पन्नं नाम], नराणाम् अयनत्वान्नारायणः [अय गतौ धातोर्निष्पन्नं नाम]। परशिवब्रह्म नराणां सकलजीविनां चरमाश्रय इति प्रसिद्धम्। "यथा सुदीप्तात्पावकाद्विस्फुलिङ्गा सहस्रशः प्रभवन्ते सरूपाः। तथाऽक्षराद्विविधा सोम्य भावाः प्रजायन्ते तत्र

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चैवापि यन्ति ॥" (मुं. उ., २.१.१) इतिः श्रुतिः । पुनः कीदृशम् ? **अद्वितीयम्** । न द्वितीयं यस्मात् तद् अद्वितीयम्, द्वितीयशून्यमित्यर्थः । तदुक्तम्— "प्रपञ्चोपशमं शान्तं शिवमद्वैतम्" (मांडूक्य., ७) इति "एको हि रुद्रो न द्वितीयाय तस्थुः" (श्वे. उ., ३.२) इति, "एकमेवाद्वितीयं ब्रह्म" (छां. उ., ६.२.१) इति, "एको देवः सर्वभूतेषु गूढः" (श्वे. उ., ६.११) इति च । पुनः कीदृशम् ? **अनिर्देश्यम्** । न निर्देश्यम् अनिर्देश्यम्, सोऽयमित्यादिभिरसंसूच्यम् । "यदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् । कथं नु तद्विजानीयां किमु भाति विभाति वा ॥" (कठ. उ., ५.१४) इति, "अप्रमेयमनिर्देश्यम्" (स्वायं. आ. – शैव. प., पृ. २९) इति, "अप्रमेयमनन्तत्वादनिर्देश्यमलक्ष्यतः ।" (तत्रैव) इति च ॥३-६॥

शिवस्य जगत्सिसृक्षा

तत्र लीनमभूत् पूर्वं चेतनाचेतनं जगत् ।
स्वात्मलीनं जगत्कार्यं स्वप्रकाश्यं तदद्भुतम् ॥७॥

व्याख्या— पूर्वं जगत्कार्यस्य परमात्मनि लीनत्वमाह— **तत्रेति** । **पूर्वं** जगत्सृष्टेः प्राक् **चेतनाचेतनं** चेतनं चाचेतनं च तयोः समाहारः, चराचरात्मकं **जगद्** विश्वं तत्र परशिवब्रह्मणि **लीनमभूत्** तादात्म्येन मग्नमासीत् । पश्चात् **स्वात्मलीनं** स्वात्मनि स्वशक्तिस्वरूपात्मनि लीनं **जगत्कार्यं** विश्वरूपकार्यं **स्वप्रकाश्यं** स्वेनैव परमात्मना प्रकाशनीयम् अभवत् । **तदद्भुतम्** तत्सर्वम् अद्भुतम् आश्चर्यम् आसीत् ॥ सृष्टेः प्राक् चराचरात्मकं जगद्ब्रह्मणि लीनं सद्रूपेणाऽऽसीदित्यर्थः ॥ श्रुतिराह— "सदेव सोम्य इदग्र आसीदेकमेवाद्वितीयम् ।" (छां. उ., ६.२.१) इति, "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ।" (छां. उ., ६.८.४) इति च । "नासतो विद्यते भावः" इति हि गीतोक्तिः (भ. गी., २.१६) । अयमेव सत्कार्यवादः, मयूराण्डरसन्यायेन जगद्रूपं परब्रह्मणि लीनमासीदिति । "यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्संभवतीह विश्वम् ॥" (मुं. उ., १.१.७) इति प्रमाणम् ॥७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया ।
स्वरूपमादधे किञ्चित्सुखस्फूर्तिविजृम्भितम् ॥८॥

व्याख्या— जगत्सिसृक्षोः परशिवब्रह्मणः स्वरूपमाह— **शिवेति । जगन्निर्मातुमिच्छया** जगत् निर्मातुम् इच्छा, तया, विश्वसृष्ट्यपेक्षया **शिवाभिधं** शिवाख्यं **परं ब्रह्म सुखस्फूर्तिविजृम्भितं** सुखस्य स्फूर्तिरानन्दस्य स्फुरणं, तेन विजृम्भितं बाहुल्येनोद्भूतं किञ्चद् अवर्णनीयं **स्वरूपम् आदधे** अङ्गीचकार। तदुक्तम्— "शिवात्सत्यपरानन्दप्रकाशैकस्वलक्षणम् । आविर्भूतमिदं विश्वं चेतनाचेतनात्मकम् ॥" (स्कन्द.पु. – शैव.प., पृ.३७) इति, "तदैक्षत बहु स्यां प्रजायेयेति" (छां. उ., ६.२.३) इति, "सोऽकामयत । बहु स्यां प्रजायेयेति" (तै. उ., २.६) इति, "कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।" (ऋ. वे., १०.१२९.४) इति च । कामः सिसृक्षा ॥८॥

निरस्तदोषसम्बन्धं निरुपाधिकमव्ययम् ।
दिव्यमप्राकृतं नित्यं नीलकण्ठं त्रिलोचनम् ॥९॥

चन्द्रार्धशेखरं शुद्धं शुद्धस्फटिकसन्निभम् ।
शुद्धमुक्ताफलाभासमुपास्यं गुणमूर्तिभिः ॥१०॥

विशुद्धज्ञानकरणं विषयं सर्वयोगिनाम् ।
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसमप्रभम् ॥११॥

अप्राकृतगुणाधारमनन्तमहिमास्पदम् ।

व्याख्या— पुनस्तत्स्वरूपमाह— **निरस्तेति** । कीदृशं स्वरूपमादधे ? **निरस्तदोषसम्बन्धम्** । दोषैः सम्बन्धः दोषसम्बन्धः, निरस्तः दूरीकृतः दोषसम्बन्धः येन तत्, रागद्वेषादिदोषरहितमित्यर्थः । पुनः कीदृशम् ? **निरुपाधिकम्, अव्ययम्, दिव्यम्, अप्राकृतम्, नित्यं** च । निर्गत उपाधिः यस्मात्तन्निरुपाधिकम् । उपाधिर्नामऽऽगन्तुकधर्मो वोदासीनधर्मो वा ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

न विद्यते व्ययः क्षयः यस्य तदव्ययम् । क्षयरहितं परिपूर्णमित्यर्थः । दिवि भवं दिव्यं देदीप्यमानं वा (दिव द्युतौ धातोः) । न प्राकृतम् अप्राकृतम् । प्रकृतिसम्बन्धशून्यम् । प्राकृतगुणसम्बन्धरहितमित्यर्थः । नित्यमाद्यन्त-रहितम् । निरस्तदोषसम्बन्ध इत्यादि विशेषणानां श्रुत्यादिप्रमाणवाक्यानि ३-६ श्लोकानां व्याख्यायां उद्धृतानि । अन्यविशेषणानाम् प्रमाणानि उच्यन्ते । **नीलकण्ठम्, त्रिलोचनम्, चन्द्रार्धशेखरम्, शुद्धम्, शुद्धस्फटिक-सन्निभम्** इत्यादयोऽन्यविशेषणानि । नीलः कण्ठः यस्य तन्नीलकण्ठम् । त्रीणि लोचनानि यस्य तत् त्रिलोचनम् चन्द्राग्निसूर्यात्मकानि परशिवस्य त्रिलोचनानीति कथ्यन्ते । चन्द्रस्याऽर्धश्चन्द्रार्धः कलारूपो वा, चन्द्रार्धः शेखरः शिरोभूषणं यस्य तच्चन्द्रार्धशेखरम् । शुद्धं पवित्रम् । शुद्धस्फटिक-संनिभम्; शुद्धः स्फटिकः शुद्धस्फटिकः तेन संनिभं सदृशं शुद्धस्फटिक-संनिभं शुद्धस्फटिकवत्प्रकाशमानम् इत्यर्थः । **शुद्धमुक्ताफलाभासम्**, शुद्धं मुक्ताफलं शुद्धमुक्ताफलं स्वच्छमौक्तिकम्, तस्याऽऽभासः प्रकाशः इव आभासो यस्य तच्छुद्धमुक्ताफलाभासम् । पुनः कीदृशम्? **गुणमूर्तिभिः उपास्यम्**— ब्रह्मविष्ण्वादि देवैः पूजनीयम् । विशुद्धज्ञानकरणम्, विशुद्धं पवित्रं ज्ञानं विशुद्धज्ञानम् तस्य करणम् असाधारणकारणम् । सर्वेषां योगिनां सर्वयोगिनां विषयं प्रत्यक्षतया प्रमेयम् । **कोटिसूर्यप्रतीकाशम्**, कोटिसंख्याकाः सूर्याः तेषां प्रतीकाशः प्रकाशः यस्य तत् । **चन्द्रकोटि-समप्रभम्**, चन्द्राणां कोटिः चन्द्रकोटिः, तया समप्रभा प्रकाशः यस्य तत् । **अप्राकृतगुणाधारम्**, न प्राकृताः अप्राकृताः अप्रकृतिसम्बद्धा गुणाः, तेषां आधारम् आश्रयभूतम्, अनन्तकल्याणगुणाश्रयमित्यर्थः । **अनन्त-महिमास्पदम्**, न विद्यते अन्तः येषां ते अनन्ताः, अनन्तानां महिम्नाम् आस्पदम् आयतनम् । शिवाख्यं परं ब्रह्म जगत्सिसृक्षया स्वरूपमेतादृशम् आदधे इति सम्बन्धः । तदुक्तम्— "शुद्धस्फटिकवर्णाय शिवलिङ्गाय ते नमः । नीलकण्ठाय नित्याय निर्मलाय परात्मने.... । नमः शशाङ्कचूडाय शशाङ्कायुतरोचिषे । .... मृत्युञ्जयाय रुद्राय त्र्यम्बकाय त्रिमूर्तिने । .... सूर्यकोटिप्रकाशाय सूक्ष्माय सुखरूपिणे ॥" (पार. आ., ६.८०, ८१, ९६, १००) । इति ॥ ९-१२ पूर्वार्धः ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तदीया परमा शक्तिः सच्चिदानन्दलक्षणा ॥१२॥

समस्तलोकनिर्माणसमवायस्वरूपिणी ।

तदिच्छयाऽभवत् साक्षत्तत्स्वरूपानुसारिणी ॥१३॥

व्याख्या— शिवस्य शक्तेः स्वरूपं ब्रूते— **तदीयेति । तदीया** तस्येयमिति तदीया, तस्य परशिवस्य सम्बन्धिनी, परमा पररूपा शक्तिः **सच्चिदानन्दलक्षणा**, सच्च चिच्चाऽऽनन्दश्चेत्येषां समाहारः सच्चिदानन्दम्, तदेव लक्षणं स्वरूपं यस्या सा, तादृशी, **समस्तलोकनिर्माणसमवाय-स्वरूपिणी** समस्तस्य समग्रस्य चराचरात्मकस्य लोकस्य विश्वस्य निर्माणाय, समवायः स्वरूपं यस्याः सा, समवायस्वरूपिणी उपादान-करणस्वरूपिणी च अस्ति । **तदिच्छया** तस्य परशिवस्य इच्छया सिसृक्षा-रूपया सा पराशक्तिः **साक्षात्** स्वयमेव "अहमिति" **तत्स्वरूपानुसारिणी**, तस्य परशिवस्य स्वरूपानुसारिणी स्वरूपानुकारिणी **अभवत्** बभूव । "अहमस्मि प्रथमजा ऋतस्य" (तै. उ., ३.१०.६) इति हि श्रुतिः ॥१२-उत्तरार्धः-१३॥

जगत्सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनाम् ।

कर्तारं सर्वलोकानां विदधे विश्वनायकः ॥१४॥

व्याख्या— शिवशक्तिस्वरूपं निरूप्य सृष्टिक्रमो निरूप्यते— **जग-दिति । जगत्सिसृक्षुः** जगत् स्रष्टुम् इच्छुर्**विश्वनायको** विश्वप्रभुः परशिवः **प्रथमम**ादौ **सर्वदेहिनां** सर्वेषां प्राणिनां **सर्वलोकानां** सर्वेषां लोकानां **कर्तारं** निर्मातारं **ब्रह्माणं विदधे** ससर्ज । तदाह श्रुतिः— "विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्वम्" (श्वे. उ., ३.४) इति ॥१४॥

तस्मै प्रथमपुत्राय शङ्करः शक्तिमान् विभुः ।

सर्वज्ञः सकला विद्याः सानुग्रहमुपादिशत् ॥१५॥

व्याख्या— ब्रह्मणे विद्याः प्रदत्तवान् इत्याह— **तस्मै इति । प्रथम-पुत्राय** आदिसृष्टिभूताय सूनवे ब्रह्मणे **तस्मै शक्तिमान्** शक्तिविशिष्टः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शङ्करः परशिवः **सानुग्रहम्** अनुग्रहेण सह **सकलाः** सर्वा **विद्याः** सर्वाणि शास्त्राणि, उपादिशत् उपदिष्टवान् । श्रुतिराह— "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।" (श्वे. उ., ६.८) इति ॥१५॥

समस्तलोकान्निर्मातुं समुद्यमपरोऽभवत् ।
कृतोद्योगोऽपि निर्माणे जगतां शङ्कराज्ञया ॥
अज्ञातोपायसंपत्तेरभवन्माययाऽऽवृतः ॥१६॥

विधातुमखिलाँल्लोकानुपायं प्राप्तुमिच्छया ।
पुनस्तं प्रार्थयामास देवदेवं त्रियम्बकम् ॥१७॥

व्याख्या— सृष्ट्यर्थं कृतप्रयत्नो ब्रह्मा तत्कर्तुं पुनः शिवस्य मार्गदर्शनं प्रपित्सुर्बभूवेत्युच्यते— **समस्तेति** । तदा ब्रह्मा **समस्तलोकान्** सर्वाणि विश्वानि **निर्मातुं** स्रष्टुं **समुद्यमपरो** प्रयत्नशीलो **अभवत्** बभूव । **शङ्कराज्ञया** परशिवस्याज्ञया **जगतां** लोकानां **निर्माणे** सृष्टौ **कृतोद्योगोऽपि** कृतप्रयत्नोऽपि, **अज्ञातोपायसम्पत्तेः** अज्ञाता उपायानां साधनानां सम्पत्तिः येन सः, तस्य अभावाद् अविद्यमानत्वात् स **माययाऽऽवृतः** मोहेनाऽऽच्छादितोऽ**भवत्** आसीत् ॥ तदा **अखिलान्** सर्वान् **लोकान्** **विधातुं** निर्मातुम् **उपायं** साधनं **प्राप्तुमिच्छया** प्राप्त्यभिलाषेण **देवदेवं** देवानां देवं **त्रियम्बकं** त्रिलोचनं तं शम्भुं **पुनः** **प्रार्थयामास** प्रार्थयाञ्चक्रे ॥१६-१७॥

नमस्ते देवदेवेश नमस्ते करुणाकर ।
अस्मदादिजगत्सर्वनिर्माणनविधिक्षम ॥१८॥

उपायं वद मे शम्भो जगत्स्रष्टः जगत्पते ।
सर्वज्ञः सर्वशक्तिस्त्वं सर्वकर्ता सनातनः ॥१९॥

व्याख्या— किं प्रार्थयामासेति ब्रूते— **नमस्त इति** । हे **देवदेवेश** देवानां देवेशः, तस्य सम्बुद्धौ देवदेवेश, **ते** **नमः** तुभ्यं नमः । हे **करुणाकर**,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

करुणाया आकरः, दयायाः मूलाश्रयः, करुणाकरः तस्य सम्बुद्धौ **करुणाकर ते नमः** तुभ्यं नमः। हे **अस्मदादिजगत्सर्वनिर्माणनविधिक्षम**, अस्मदादीनि ब्रह्मलोकादीनि जगन्ति सर्वाणि अस्मदादिजगत्सर्वाणि, तेषां निर्माणनस्य सृजनस्य विधिः विधानं, तस्मिन् क्षमः समर्थोऽस्मदादिजगत्सर्वनिर्माणन-विधिक्षमः, तस्य सम्बुद्धौ अस्मदादि....क्षम, **शम्भो** परशिव **जगत्स्रष्टः** लोकनिर्मातः, **जगत्पते** विश्वपते, त्वं **सर्वज्ञः** सर्वस्य ज्ञाता, **सर्वशक्तिः** सर्वा शक्तिः यस्य सः, सर्वसमर्थः, **सर्वकर्ता** सर्वस्य कर्ता, **सनातन** आद्यन्त-रहितोऽसि। **मे** मह्यम् **उपायं** जगन्निर्माणसाधनं **वद** ब्रूहि ॥१८-१९॥

इति सम्प्रार्थितः शम्भुर्ब्रह्मणा विश्वनायकः।
उपायमवदत् तस्मै लोकसृष्टिप्रवर्तनम् ॥२०॥

व्याख्या— प्रार्थितं प्राप्तवान् इत्युच्यते— **इतीति**। **इति** एवं **ब्रह्मणा सम्प्रार्थितो** विज्ञापितः सन् **विश्वनायको** लोकनायकः शम्भुः परशिवो **लोकसृष्टिप्रवर्तनं** लोकानां सृष्टिः लोकसृष्टिस्तस्मिन् प्रवर्तयतीति लोकसृष्टि-प्रवर्तनं लोकसृष्टिसमर्थम् **उपायं** साधनं **तस्मै** ब्रह्मणेऽवदद् अब्रवीत् ॥२०॥

उपायमीश्वरेणोक्तं लब्ध्वापि चतुराननः।
न समर्थोऽभवत् कर्तुं नानारूपमिदं जगत् ॥२१॥

व्याख्या— तथाप्यसमर्थो बभूवेत्युच्यते— **उपायमिति**। **ईश्वरेणोक्तं** परमेश्वरेणोक्तम् **उपायं** साधनं **लब्ध्वाऽपि** प्राप्याऽपि **चतुराननः** चत्वारि आननानि यस्य सः, चतुर्वदनो ब्रह्मा, **नानारूपं** विविधरूपमिदं **जगत्** लोकं **कर्तुं** निर्मातुं **समर्थो** दक्षो **नाऽभवत्** न बभूव ॥२१॥

पुनस्तं प्रार्थयामास ब्रह्मा विह्वलमानसः।
देवदेव महादेव जगत्प्रथमकारण ॥२२॥

नमस्ते सच्चिदानन्द स्वेच्छाविग्रहराजित।
भव शर्व महेशान सर्वकारणकारण ॥२३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवदुक्तो ह्युपायो मे न किञ्चिज्ज्ञायतेऽधुना ।
सृष्टिं विधेहि भगवन् प्रथमं परमेश्वर ॥
ज्ञातोपायस्ततः कुर्यां जगत्सृष्टिमुमापते ॥२४॥

व्याख्या— ततः किं कृतवान् इत्यत्राह— **पुनरिति । पुनः विह्वलमानसः** विह्वलं प्रक्षुब्धं मनः यस्य सः, तादृशः, **ब्रह्मा तं परशिवं प्रार्थयामास** पार्थयाञ्चक्रे **देवदेव, महादेव, जगत्प्रथमकारण** जगतां प्रथमकारण आद्यकारण, **सच्चिदानन्द, स्वेच्छाविग्रहराजित** स्वेच्छया धृतः विग्रहः स्वेच्छाविग्रहः, तेन राजते इति राजित, **भव, शर्व, महेशान, सर्वकारणाकारण** सर्वेषां कारणानां कारण, **अधुना**ऽद्य **भवदुक्तो** भवता कथितो हि **उपायः किञ्चित्** किञ्चिदपि **मे** मह्यं **न ज्ञायते** नाऽवगम्यते । अतो **भगवान्, परमेश्वर, उमापते, प्रथम**मादौ **सृष्टिं विधेहि** कुरु । **ततः ज्ञातोपायो** ज्ञात उपायः येन सः, तादृशः भूत्वा **जगत्सृष्टिं** जगतां निर्माणं **कुर्यां** कुर्वीय इति ॥२२-२४॥

प्रमथानां सृष्टिः

इत्येवं प्रार्थितः शम्भुर्ब्रह्मणा विश्वयोनिना ।
ससर्जात्मसमप्रख्यान् सर्वगान् सर्वशक्तिकान् ॥२५॥

प्रबोधपरमानन्दपरिवाहितमानसान् ।
प्रमथान् विश्वनिर्माणप्रलयापादनक्षमान् ॥२६॥

व्याख्या— ततः किमभवदित्यत्राह— **इत्येवमिति । विश्वयोनिना** विश्वस्य जगतः योनिः मूलं तेन **ब्रह्मणा इत्येवमे**वंरीत्या **प्रार्थितः** विज्ञापितः **शम्भुः** परशिवः **आत्मसमप्रख्यान्** आत्मना समं प्रख्यातान्, **सर्वगान्** सर्वत्र गन्तुं समर्थान् **सर्वशक्तिकान्** सर्वसामर्थ्ययुक्तान् **प्रबोधपरमानन्दपरिवाहितमानसान्** प्रबोधः प्रज्ञानम् एव परमसुखम् तेन परिवाहितं परिप्लावितं मानसं मनः येषां ते, तादृशान्, **विश्वनिर्माणप्रलयापादन-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

क्षमान् निर्माणं च प्रलयश्च निर्माणप्रलयौ, विश्वस्य निर्माणप्रलयौ विश्वनिर्माणप्रलयौ, तयोरापादने सम्पादने क्षमान् समर्थान् **प्रमथान्** प्रमथगणान् **ससर्ज** निर्ममे ॥२५-२६॥

रेणुकदारुकयोर्महिमवर्णनम्

तेषु प्रमथवर्गेषु सृष्टेषु परमात्मना ।
रेणुको दारुकश्चेति द्वावभूतां शिवप्रियौ ॥२७॥

व्याख्या— प्रमथगणे रेणुकदारुकौ वर्ण्येते— **तेष्विति** । **तेषु** पूर्वश्लोकद्वये वर्णितेषु **परमात्मना** परशिवेन **सृष्टेषु** निर्मितेषु **प्रमथवर्गेषु** प्रमथगणेषु **रेणुको दारुकश्चेति द्वौ शिवप्रियौ** शिवस्य प्रीतियुक्तौ **अभूतां** बभूवतुः ॥२७॥

सर्वविद्याविशेषज्ञौ सर्वकार्यविचक्षणौ ।
मायामलविनिर्मुक्तौ महिमातिशयोज्ज्वलौ ॥२८॥

आत्मानन्दपरिस्फूर्तिरसास्वादनलम्पटौ ।
शिवतत्त्वपरिज्ञानतिरस्कृतभवामयौ ॥२९॥

नानापथमहाशैवतन्त्रनिर्वाहतत्परौ ।
वेदान्तसारसर्वस्वविवेचनविचक्षणौ ॥३०॥

नित्यशुद्धौ निरातङ्कौ निरङ्कुशपराक्रमौ ।
तादृशौ तौ महाभागौ संवीक्ष्य परमेश्वरः ॥३१॥

समर्थौ सर्वकार्येषु विश्वासपरमाश्रितौ ।
अन्तःपुरद्वारपालौ निर्ममे नियतौ विभुः ॥३२॥

व्याख्या— रेणुकदारुकयोर्महिमानं वर्णयति— **सर्वविद्येति** । **सर्वविद्याविशेषज्ञौ** सर्वासां विद्यानां सर्वशास्त्राणां विशेषं जानीत इति, तादृशौ,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वकार्यविचक्षणौ, सर्वेषु कार्येषु विचक्षणौ निष्णातौ, **मायामलविनिर्मुक्तौ** मायामलो ज्ञानसंकोचस्वरूपः, तेन विनिर्मुक्तौ विरहितौ, **महिमातिशयोज्ज्वलौ** महिम्नोऽतिशयः, तेन उज्ज्वलौ दीप्तौ, **आत्मानन्दपरिस्फूर्तिरसास्वादनलम्पटौ** आत्मन आनन्द आत्मानन्दः, तस्य परिस्फूर्तिः परिस्पन्दः, तस्य रसास्वादने रसानुभवे लम्पटौ लोभिनौ (लोलुपौ), **शिवतत्त्वपरिज्ञानतिरस्कृतभवामयौ** शिवतत्त्वस्य परिज्ञानेन सम्यज्ज्ञानेन तिरस्कृतो दूरिकृतः भवामयः, भव एव आमयः रोगः, याभ्यां तौ, **नानापथमहाशैवतन्त्रनिर्वाहतत्परौ** नाना बहुविधाः पन्थानः मार्गाः येषु तानि महाशैवतन्त्राणि शैवागमाः, तेषां निर्वाहः प्रयोगः तस्मिन् तत्परौ व्यापृतौ (मग्नौ), **वेदान्तसारसर्वस्वविवेचनविचक्षणौ** वेदान्तः उपनिषद्दर्शनं तस्य सारसर्वस्वं सारभूततत्त्वम्, तस्य विवेचने विमर्शने विचक्षणौ निष्णातौ, **नित्यसिद्धौ** नित्यं निरन्तरं सिद्धिमन्तौ, **निरातङ्कौ** निर्गत आतङ्कः क्लेशः याभ्यां तौ, **निरङ्कुशपराक्रमौ** निरङ्कुशः निरर्गलः (अनियन्त्रितः) पराक्रमः शौर्यं ययोस्तौ, **तादृशौ** रेणुकदारुकौ **तौ महाभागौ** महिमान्वितौ **संवीक्ष्य** दृष्ट्वा **परमेश्वरो विभुः** सर्वव्यापकः परशिवः **सर्वकार्येषु समार्थौ** दक्षौ **विश्वासपरमाश्रितौ** परमविश्रम्भभाजौ **नियतौ** प्रयतौ (पवित्रौ) (इति मत्वा) तौ **अन्तःपुरद्वारपालौ** अन्तःपुरस्य दौवारिकौ **निर्ममे** चकार ॥२८-३२॥

गणेश्वरौ रेणुकदारुकौ तौ
विश्वासभूतौ नवचन्द्रमौलेः।
अन्तःपुरद्वारगतौ सदा तौ
वितेनतुर्विश्वपतेस्तु सेवाम् ॥३३॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगि-विरचिते वेदागम-पुराणादिसारभूते श्रीसिद्धान्तशिखामणौ रेणुकदारुकावतरणं नाम द्वितीयः परिच्छेदः ॥२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — तौ गणेश्वरौ शिवस्य सेवामकार्षीदित्याह — **गणेश्वरा-विति** । तौ उभौ **नवचन्द्रमौलेः** चन्द्रकलाशेखरस्य परशिवस्य **विश्वासभूतौ** प्रत्ययार्हौ **रेणुकदारुकौ सदा** सर्वदा **अन्तःपुरद्वारगतौ** अन्तःपुरस्य द्वारे स्थितौ **विश्वपतेः** विश्वेश्वरस्य परशिवस्य **सेवां** परिचर्यां **वितेनतुः** कारयामासतुः । अत्र उपजातिः वृतम् । प्रतिपादम् एकादशवर्णाः । इन्द्रवज्रा-उपेन्द्रवज्रा-पादानां मिश्रणेन उपजातिः । अत्र प्रथमचतुर्थौ उपेन्द्रवज्रापादौ । ''स्यादिन्द्रवज्रा यदि तौ जगौ गः'' (आप्टे, पृ.६५०) [U – U (जगण), – – U (तगण), U – U (जगण), ग ग (गुरु, गुरु)]; द्वितीयतृतीयौ इन्द्रवज्रापादौ । ''उपेन्द्रवज्रा प्रथमे लघौ सा ।'' (आप्टे, पृ.६५०) [– – U (तगण), – – U (तगण), U – U (जगण), ग ग (गुरु, गुरु)] । प्रथमपादान्ते...कावुभौ इत्यत्र वर्णाधिक्येन छन्दोभङ्ग इति पाठान्तरितम् ॥ ३३ ॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यायां व्याख्यायां
द्वितीयः परिच्छेदः समाप्तः ॥२॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तृतीयः परिच्छेदः

कैलासवर्णनादिकं रेणुकावतरणकारणं च

व्याख्या— अस्मिन् परिच्छेदे कैलासवर्णनादिकं विधाय ग्रन्थकृद् रेणुकगणेश्वरस्य भूलोकावतरणाय निमित्तभूतं प्रसङ्गं निरूपयति ।

कैलासवर्णनम्

कदाचिदथ कैलासे कलधौतशिलामये ।
गन्धर्ववामनयना-क्रीडामौक्तिकदर्पणे ॥१॥

मन्दारवकुलाशोकमाकन्दप्रायभूरुहे ।
मल्लीमरन्दनिष्यन्दपानपीनमधुव्रते ॥२॥

कुङ्कुमस्तबकामोदकूलङ्कशहरिन्मुखे ।
कलकण्ठकुलालापकन्दलद्रागबन्धुरे ॥३॥

किन्नरीगीतमाधुर्यपरिवाहितगह्वरे ।
सानन्दवरयोगीन्द्रवृन्दालङ्कृतकन्दरे ॥४॥

हेमारविन्दकलिकासुगन्धिरसमानसे ।
शातकुम्भमयस्तम्भशतोत्तुङ्गविराजिते ॥५॥

माणिक्यदीपकलिकामरीचिद्योतितान्तरे ।
द्वारतोरणसंरूढशङ्खपद्मनिधिद्वये ॥६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मुक्तातारकितोदारवितानाम्बरमण्डिते ।
स्पर्शलक्षितवैडूर्यमयभित्तिपरम्परे ॥७॥

सञ्चरत्प्रमथश्रेणीपदवाचालनूपुरे ।
प्रवालवलभीशृङ्गशृङ्गारमणिमण्डपे ॥८॥

व्याख्या— आदौ ग्रन्थकारः कैलसवर्णनं कुरुते— **कदाचिदिति** । अथ रेणुकदारुकावतारानन्तरं **कदाचिद्** एकदा **कैलासे** कैलासपर्वते (परशिवो रत्नसिंहासनम् अध्यारूढः आसीत्) । कीदृशे कैलासे? **कलधौतशिलामये** । कलधौताः शिलाः कलधौतशिलाः रजतशिलाः, तेषां प्राचुर्यं कलधौत-शिलामयम्, तस्मिन् । "तत्प्रकृतवचने मयट्" (पा. अ., ५.४.२१) इति मयट् । पुनः कीदृशे ? **गन्धर्ववामनयना-क्रीडामौक्तिकदर्पणे** । गन्धर्वाणां वामनयनाः सुन्दरलोचनाः स्त्रियः, तासां क्रीडायै मौक्तिकः मुक्ताखचितो दर्पणः, तस्मिन् । पुनः कीदृशे ? **मन्दारवकुलाशोकमाकन्दप्रायभूरुहे** । मन्दारश्च वकुलश्चाऽशोकश्च माकन्दश्च मन्दारवकुलाशोकमाकन्दाः वृक्षविशेषाः, ते प्रायेण आधिक्येन ("प्रायो भूम्नि" इत्यमरः । भूम्नि बाहुल्ये)) सन्तीति मन्दारवकुलाशोकमाकन्दप्राया भूरुहाः वृक्षाः यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **मल्लीमरन्दनिष्यन्दपानपीनमधुव्रते** । मल्ल्यः मल्लिकाः (लताविशेषाः) तासां मरन्दः मकरन्दः, तस्य निष्यन्दः स्रावः, तस्य पानम् आस्वादनम्, तेन पीनाः परिपुष्टाः मधुव्रता भ्रमरा यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **कुङ्कुमस्तबकामोदकूलङ्कषहरिन्मुखे** । कुङ्कुमानां (कुसुमविशेषानां) स्तबकाः गुच्छकाः कुङ्कुमस्तबकाः तेषामामोदः सुगन्धः येषु तानि, कुङ्कुमस्तबकामोदानि, कूलंकषाः कूलं कषन्ति इति तथोक्ताः, तीरकर्षिण, नदीप्रवाहाः येषु तानि कूलंकषाणि, हरितां दिशानां मुखानि हरिन्मुखानि, कुङ्कुमस्तबकामोदानि कूलंकषाणि च हरिन्मुखानि यस्य सः, तस्मिन् । पुनः कीदृशे ? **कलकण्ठकुलालापकन्दलद्रागबन्धुरे** । कलकण्ठाः कोकिलाः, कलकण्ठानां कुलानि समूहाः, कलकण्ठकुलानाम् आलापः, तेन कन्दलद् वृद्धिमद् रागः पञ्चमस्वरः (मधुरस्वरः), तेन बन्धुरः मनोहरः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कलकण्ठ....बन्धुरः, तस्मिन् । पुनः कीदृशे ? **किन्नरीगीतमाधुर्यपरिवाहितगह्वरे ।** गीतानां माधुर्यं गीतमाधुर्यम्, किन्नरीणां गीतमाधुर्यं गीतस्वादुत्वं, तेन परिवाहिताऽऽपूर्यमाणा गह्वरा गुहा यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **सानन्दवरयोगीन्द्रवृन्दालङ्कृतकन्दरे ।** सानन्दो नाम गणेशः, सानन्दः वरः प्रमुखः येषु तानि, सानन्दवराणि योगीन्द्राणां वृन्दानि, सानन्दवरयोगीन्द्रवृन्दानि, तैरलङ्कृतानि शोभितानि कन्दराणि यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **हेमारविन्दकलिकासुगन्धिरसमानसे ।** हेमारविन्दानां कलिकाः कुड्मलाः, हेमारविन्दकलिकाः, सुगन्धोऽस्यास्तीति सुगन्धी, हेमारविन्दकलिकाभिः सुगन्धी रसः नीरः यस्मिन् तन्मानसं मानससरः, हेमारविन्द....मानसं यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **शातकुम्भमयस्तम्भशतोत्तुङ्गविराजिते ।** शातकुम्भः सुवर्णम्, तस्य प्राचुर्यं शातकुम्भमयाः स्तम्भाः, शातकुम्भमयस्तम्भानां शतम्, तस्य उत्तुङ्गम् औन्नत्यम् तेन विराजितः शात....विराजितः, तस्मिन् । पुनः कीदृशे ? **माणिक्यदीपकलिकामरीचिद्योतितान्तरे ।** माणिक्यान्येव दीपकलिकाः दीपज्वालाः, तासां मरीचयः किरणाः, तैः द्योतितानि अन्तराणि मध्यन्तरप्रदेशाः यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **द्वारतोरणसंरूढशङ्खपद्मनिधिद्वये ।** द्वारस्य महाद्वारस्य तोरणं द्वारतोरणम्, शङ्खं च पद्मं चेति निधिद्वयं निधिद्वितयं शङ्खपद्मनिधिद्वयम्, द्वारतोरणे संरूढं संलग्नं शङ्खपद्मनिधिद्वयं यस्मिन् सः, तस्मिन् । [शङ्खम् = शतलक्षकोटिनिधिः, पद्मम् = सहस्रलक्षकोटिनिधिः] । पुनः कीदृशे ? **मुक्तातारकितोदारवितानाम्बरमण्डिते ।** मुक्ताभिः मौक्तिकमणिभिः तारकितं नक्षत्रमयीकृतम् उदारं विशालं वितानस्य आच्छादकस्याऽम्बरं वस्त्रं मुक्ता.... वितानाम्बरम्, तेन मण्डितेऽलङ्कृते । पुनः कीदृशे ? **स्पर्शलक्षितवैडूर्यमयभित्तिपरम्परे ।** स्पर्शेन लक्षिता ज्ञाता वैडूर्यमय्यो भित्तयः स्पर्श....भित्तयस्तेषां परम्परा सरणिर्यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **सञ्चरत्प्रमथश्रेणीपदवाचालनूपुरे ।** सञ्चरन्तः प्रमथानां श्रेणयः सञ्चलन्तः प्रमथपङ्क्तयः, तेषां पदेषु वाचालाः मुखराः नूपुराः मञ्जीराः यस्मिन् सः, तस्मिन् । पुनः कीदृशे ? **प्रवालवलभीशृङ्गशृङ्गारमणिमण्डपे ।** प्रवालानां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विद्रुमाणां वलभी प्रासादः प्रवालवलभीः, तस्याः शृङ्गे शिखरे मणिमयो मणिखचितो मण्डपः जनाश्रयः यस्मिन् सः, तस्मिन् । तादृशे कैलासे रत्नसिंहासनारूढः परमेश्वर आसीत् ॥१-८॥

परशिववर्णनम्

वन्दारुदेवमुकुटमन्दाररसवासितम् ।
रत्नसिंहासनं दिव्यमध्यस्तं परमेश्वरम् ॥९॥

तमास्थानगतं देवं सर्वलोकमहेश्वरम् ।
त्रय्यन्तकमलारण्यविहारकलहंसकम् ॥१०॥

उदारगुणमोंकारशुक्तिकापुटमौक्तिकम् ।
सर्वमङ्गलसौभाग्यसमुदायनिकेतनम् ॥११॥

संसारविषमूर्च्छालुजीवसञ्जीवनौषधम् ।
नित्यप्रकाशनैर्मल्यकैवल्यसुरपादपम् ॥१२॥

अनन्तपरमानन्दमकरन्दमधुव्रतम् ।
आत्मशक्तिलतापुष्पत्रिलोकीपुष्पकोरकम् ॥१३॥

ब्रह्माण्डकुण्डिकाषण्डपिण्डीकरणपण्डितम् ।
समस्तदेवताचक्रचक्रवर्तिपदे स्थितम् ॥१४॥

चन्द्रबिम्बायुतच्छायादायादद्युतिविग्रहम् ।
माणिक्यमुकुटज्योतिर्मञ्जरीपिञ्जराम्बरम् ॥१५॥

चूडालं सोमकलया सुकुमारबिसाभया ।
कल्याणपुष्पकलिकाकर्णपूरमनोहरम् ॥१६॥

मुक्तावलयसम्बद्धमुण्डमालाविराजितम् ।
पर्याप्तचन्द्रसौन्दर्यपरिपन्थिमुखश्रियम् ॥१७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रातःसम्फुल्लकमलपरियायत्रिलोचनम् ।
मन्दस्मितमितालापमधुराधरपल्लवम् ॥१८॥

गण्डमण्डलपर्यन्तक्रीडन्मकरकुण्डलम् ।
कालिम्ना कालकूटस्य कण्ठनाले कलङ्कितम् ॥१९॥

मणिकङ्कणकेयूरमरीचिकरपल्लवैः ।
चतुर्भिः संविराजन्तं बाहुमन्दारशाखिभिः ॥२०॥

गौरीपयोधराश्लेषकृतार्थभुजमध्यमम् ।
सुवर्णब्रह्मसूत्राङ्कं सूक्ष्मकौशेयवाससम् ॥२१॥

नाभिस्थानावलम्बिन्या नवमौक्तिकमालया ।
गङ्गयेव कृताश्लेषं मौलिभागावतीर्णया ॥२२॥

पदेन मणिमञ्जीरप्रभापल्लवितश्रिया ।
चन्द्रवत्स्फटिकं पीठं समावृत्त्य स्थितं पुरः ॥२३॥

व्याख्या—रत्नसिंहासनम् अध्यस्तं परशिवं वर्णयति—**वन्दारुदेवेति**। **वन्दारुदेवमुकुटमन्दाररसवासितं** वन्दारवो वन्दनशीला देवा वन्दारुदेवा-स्तेषां मुकुटेषु किरीटेषु मन्दारा मन्दारपुष्पाणि मुकुटाङ्कारभूतानि मन्दारपुष्पाणि तेषां रसेन द्रवेण वासितं सुरभीकृतं **दिव्यं** दिवि भवं **रत्नसिंहासनं** रत्नमयसिंहासनम्, सिंहाकारमानसं इति यावत् **अध्यस्तम्** अध्यास्थितं तं परमेश्वरं सपरिवाराः देवादयः समन्ततोऽभजन् (३६) इति सम्बन्धः। रत्नसिंहासनम् अध्यस्तं– अत्र "अधिशीङ्स्थासां कर्म" (पा.अ., १.४.४६) इति आधारस्य कर्मसंज्ञात्वेन "कर्मणि द्वितीया" (पा.अ., २.३.२) इति रत्नसिंहासनम् इति द्वितीया । कीदृशं परमेश्वरम् ? **आस्थानगतम्, देवं च**। आस्थानं कैलासास्थानं, तद्गतं तस्मिन् विद्यमानम्, क्रीडनशीलं च (दिवु क्रीडायाम्, दीव्यति क्रिडतीति देवः)। पुनः कीदृशम् ? **सर्वलोकमहेश्वरम्**। महांश्चासौ ईश्वरश्च महेश्वरः, सर्वेषां लोकानां जगतां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

महेश्वरः, तम् । पुनः कीदृशम्? **त्र्यन्तकमलारण्यविहारकलहंसकम् ।** त्रयी वेदः, त्र्यन्तः वेदान्तः, कमलानाम् अरण्यं कमलारण्यं कमलवनम्, त्र्यन्त एव कमलारण्यम्, तस्मिन् विहरतीति त्र्यन्तकमलारण्यविहारः, तस्मिन् (त्र्यन्त....विहारे) कलहंसकः राजहंसः, तम् । रूपकालंकारः । पुनः कीदृशम् ? **उदारगुणम्, ओंकारशुक्तिकापुटमौक्तिकम् ।** उदारगुणो महोन्नतातिशयः, तम् । ओंकारः एव शुक्तिकापुटं मुक्ताकोशः, तस्मिन् मौक्तिकम्, तत् । रूपकम् । पुनः कीदृशम् ? **सर्वमङ्गलसौभाग्यसमुदाय-निकेतनम् ।** मङ्गलं च सौभाग्यं च मङ्गलसौभाग्ये सर्वे च ते मङ्गलसौभाग्ये च सर्वमङ्गलसौभाग्ये, तयोः समुदायः समूहः सर्व.......समूहः, तस्य निकेतनं वासस्थानम्, सर्व.... निकेतनम्, तत् । रूपकम् । पुनः कीदृशम् ? **संसारविषमूर्च्छालुजीवसञ्जीवनौषधम् ।** संसार एव विषं संसारविषम्, तेन मूर्च्छालवः मूर्च्छां गताः, जीवाः, तेषां सञ्जीवनाय प्रत्युज्जीवनायौ-षधम्, तत् । रूपकम् । पुनः कीदृशम् ? **नित्यप्रकाशनैर्मल्यकैवल्य-सुरपादपम् ।** नित्यं सततं प्रकाश आलोकः नित्यप्रकाशः, तेन नैर्मल्यं शुचित्वं यस्य तत् नित्यप्रकाशनैर्मल्यम्, तादृशाय कैवल्याय परममोक्षाय सुरपादपः कल्पवृक्षो नित्य....पादपः, तम् । रूपकम् । पुनः कीदृशम्? **अनन्तपरमानन्दमकरन्दमधुव्रतम्** न विद्यते अन्तो यस्य सः अनन्तः, परमश्चासौ आनन्दश्च परमानन्दः, अनन्तश्चासौ परमानन्दश्च अनन्त-परमानन्दः, तस्य मकरन्दो मधु, तस्य (तदास्वादनाय) मधुव्रतो (मधु तत्संग्रहो व्रतमस्य इति), भ्रमरः आनन्दः...मधुव्रतः, तम् । रूपकम् । पुनः कीदृशम्? **आत्मशक्तिलतापुष्यत्त्रिलोकीपुष्पकोरकम् ।** शात्मनः शक्तिः, सा एव लता, तस्यां पुष्यत्त्रिलोकीपुष्पम्, त्रयाणां लोकानां समाहारः त्रिलोकी, त्रिलोकी एव पुष्पम्, आत्म....पुष्पम्, तस्य कोरकः कुड्मलम्, तम् । रूपकम् । पुनः कीदृशम्? **ब्रह्माण्डकुण्डिकाषण्डपिण्डी-करणपण्डितम् ।** ब्रह्माण्डाः विश्वानि, कुण्डिकानां घटानां षण्डः समूहः, ब्रह्माण्डकुण्डिकाषण्डस्य पिण्डीकरणं, अपिण्डं पिण्डं सम्पद्यमानं करणं पिण्डीकरणम्, अभूततद्भावे च्विः, तत्पूर्वस्याचो दीर्घः, ब्रह्माण्ड....करणे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पण्डितः निष्णातः, तम् । अत्र रूपकमर्थालंकारः । अनुप्रासः शब्दालङ्कारः । पुनः कीदृशम् ? **समस्तदेवताचक्रचक्रवर्तिपदे स्थितम्** । समस्तानां सर्वासां देवतानां चक्रं मण्डलम्, चक्रवर्तिनः सार्वभौमस्य पदं स्थानं चक्रवर्तिपदम्, समस्तदेवताचक्रस्य चक्रवर्तिपदम्, तस्मिन् स्थितः विराजमानः तम् । पुनः कीदृशम् ? **चन्द्रबिम्बायुतच्छायादायादद्युतिविग्रहम्** । चन्द्रबिम्बाणाम् अयुतं (संख्याविशेषः, कोटीनां दशकम्) चन्द्रबिम्बायुतम्, तस्य द्युतिः कान्तिः, तस्या दायादः प्रतिस्पर्धी, चन्द्रबिम्बायुतच्छायादायादद्युतिर्यस्य सः, चन्द्र.....द्युतिः विग्रहो देहो यस्य सः, चन्द्र.....विग्रहः, तम् । पुनः कीदृशम्? **माणिक्यमुकुटज्योतिर्मञ्जरीपिञ्जराम्बरम्** । माणिक्यमुकुटस्य माणिक्यमयकिरीटस्य ज्योतिः प्रकाशः, तस्य मञ्जरीभिः अङ्कुरैः पिञ्जरो रञ्जितः अम्बरो यस्य सः, तम् । पुनः कीदृशम्? **सुकुमारबिसाभया सोमकलया चूडालम्** । सुकुमारं मृदु बिसं कमलस्य तन्तुमयनालः, तस्य आभा इव आभा यस्या सा सुकुमारबिसाभा, तया, (उपमा), सुकुमार-बिसतुल्यया सोमकलया चन्द्रकलया चूडालः शिरस्यलंकृतः, तम् । पुनः कीदृशम्? **कल्याणपुष्पकलिकाकर्णपूरमनोहरम्** । पुष्पाणां कलिकाः कोरकाणि पुष्पकलिकाः, कल्याण्यश्च ताः पुष्पकलिकाश्च कल्याण-पुष्पकलिकाः, ता एव कर्णपूरौ कर्णालङ्कारौ, ताभ्यां मनोहरः सुन्दरः, तम् । पुनः कीदृशम्? **मुक्तावलयसम्बद्धमुण्डमालाविराजितम्** । मुक्तानां मौक्तिकानां वलयाः कुण्डला मुक्तावलयाः, तैः सम्बद्धा मुक्ता...सम्बद्धा मुण्डमाला शरीरोर्ध्वभागे आकण्ठतो लम्बमाना माला मुक्ता...माला, तया विराजितः सुशोभितः, तम् । पुनः कीदृशम्? **प्रातःसंफुल्लकमल-परियायत्रिलोचनम्** । प्रातः प्रातःकाले संफुल्लानि विकसितानि कमलानि प्रातः...कमलानि, तेषां पर्यायः सदृशम्, स्त्रिलोचनम् (त्रयाणां लोचनानां समाहारः), प्रातः...त्रिलोचनं यस्य सः प्रातः...त्रिलोचनः, तम् । पुनः कीदृशम्? **मन्दस्मितमितालापमधुराधरपल्लवम्** । मन्दस्मितं मन्दहासो मितालापः परिमितवचनम्, मन्दस्मितं च मितालापश्च मन्दस्मित-मितालापौ, ताभ्यां मधुरो मनोहरः, अधरः पल्लवः किसलयः इव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अधरपल्लवः, मन्दस्मितमितालापमधुरोऽधरपल्लवः यस्य सः, तम् । पुनः कीदृशम्? **गण्डमण्डलपर्यन्तक्रीडन्मकरकुण्डलम्** । गण्डौ कपोलौ तयोः मण्डलौ गण्डमण्डलपर्यन्तं क्रीडन्तौ चलन्तौ मकरकुण्डलौ यस्य सः, तम् । पुनः कीदृशम्? **कालकूटस्य कालिम्ना कण्ठनाले कलङ्कितम्** । कालकूटस्य घोरविषस्य कालिम्ना नीलिम्ना कण्ठनाले कलङ्कितं नीलवर्णयुक्तम् । पुनः कीदृशम्? **मणिकङ्कणकेयूरमरीचिकरपल्लवैर्बाहुमन्दारशाखिभिः चतुर्भिः संविराजन्तम्** । मणिकङ्कणो मणिमयः कङ्कणो वलयः, केयूरो बाहुवलयः, मणिकङ्कणश्च केयूरश्च मणिकङ्कणकेयूरौ, तयोः मरीचयः किरणाः, मणि...मरीचयः, ता एव करपल्लवाः, येषां ते मणि...मरीचिकरपल्लवाः, तैः; बाहव एव मन्दारशाखिनो मन्दारवृक्षाः, तैः तादृशैः चतुर्भिर्विराजन्तं शोभमानम् । पुनः कीदृशम्? **गौरीपयोधराश्लेषकृतार्थभुजमध्यमम्** । गौर्याः पयोधरौ स्तनौ तयोराश्लेष आलिङ्गनम्, तेन कृतार्थः कृतकृत्यो भुजयोर्मध्यमः मध्यभागः यस्य सः, गौरी...मध्यमः, तम् । पुनः कीदृशम्? **सुवर्णब्रह्मसूत्राङ्कम्** । सुवर्णं हिरण्मयं ब्रह्मसूत्रं यज्ञोपवीतम्, तदेवाऽङ्कं चिह्नं यस्य सः, तम् । पुनः कीदृशम्? **सूक्ष्मकौशेयवाससम्** । सूक्ष्मं च तत्कौशेयं च सूक्ष्मकौशेयं चीनांशुकं, तदेव वासो वेषो यस्य सः सूक्ष्मकौशेयवासाः, तम् । पुनः कीदृशम्? **मौलिभागावतीर्णया नाभिस्थानावलम्बिन्या नवमौक्तिकमालया गङ्गयेव कृताश्लेषम्** । कृत आश्लेष आलिङ्गनं यया सः कृताश्लेषः, मौलिभागाद् अवतीर्णया शिरोभागाद् अवतरन्त्या, नाभिस्थानेऽवलम्बितुं शीलमस्या इति नाभिस्थानावलम्बिनी, तया, नवमौक्तिकमालया नवानि मौक्तिकानि तेषां मालया, गङ्गया इव कृताश्लेषः, तम् । उपमा । पुनः कीदृशम् ? **मणिमञ्जीरप्रभापल्लवितश्रिया पदेन चन्द्रवत्स्फाटिकं पीठं समावृत्य पुरः स्थितम्** । मणिमञ्जीरो मणिमयनूपुरः, तस्य प्रभया प्रकाशेन पल्लविता संवर्धिता श्रीः सौन्दर्यं यस्य तत्, तेन, मणि...पल्लवितश्रिया पदेन पादेन चन्द्रवत् चन्द्र इव स्फाटिकं पीठं स्फटिकमयं पीठं पादपीठं समावृत्य समाक्रम्य पुरः (रत्नसिंहासनस्य) पुरो भागे स्थितम् उपविष्टम् ॥९-२३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पार्वतीवर्णनम्

वामपार्श्वनिवासिन्या मङ्गलप्रियवेषया ।
समस्तलोकनिर्माणसमवायस्वरूपया ॥२४॥

इच्छाज्ञानक्रियारूपबहुशक्तिविलासया ।
विद्यातत्त्वप्रकाशिन्या विनाभावविहीनया ॥२५॥

संसारविषकान्तारदाहदावाग्निलेखया ।
धम्मिल्लमल्लिकामोदझङ्कुर्वद्भृंगमालया ॥२६॥

संपूर्णचन्द्रसौभाग्यसंवादिमुखपद्मया ।
नासामौक्तिकलावण्यनाशीरस्मितशोभया ॥२७॥

मणिताटङ्करङ्गान्तर्वलितापाङ्गलीलया ।
नेत्रद्वितयसौन्दर्यनिन्दितेन्दीवरत्विषा ॥२८॥

कुसुमायुधकोदण्डकुटिलभ्रूविलासया ।
बन्धूककुसुमच्छायाबन्धुभूताधरश्रिया ॥२९॥

कण्ठनालजितानङ्गकम्बुबिब्बोकसम्पदा ।
बाहुद्वितयसौभाग्यवञ्चितोत्पलमालया ॥३०॥

स्थिरयौवनलावण्यशृङ्गारितशरीरया ।
अत्यन्तकठिनोत्तुङ्गपीवरस्तनभारया ॥३१॥

मृणालवल्लरीतन्तुबन्धुभूतावलग्नया ।
शृङ्गारतटिनीतुङ्गपुलिनश्रोणिभारया ॥३२॥

कुसुम्भकुसुमच्छायाकोमलाम्बरशोभया ।
शृङ्गारोद्यानसंरम्भरम्भास्तम्भोरुकाण्डया ॥३३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चूतप्रवाससुषुमासुकुमारपदाब्जया ।
स्थिरमङ्गलशृङ्गारभूषणालङ्कृताङ्गया ॥३४॥

हारनूपुरकेयूरचमत्कृतशरीरया ।
चक्षुरानन्दलतया सौभाग्यकुलविद्यया ॥३५॥

उमया सममासीनं लोकजालकुटुम्बया ।
अपूर्वरूपमभजन् परिवाराः समन्ततः ॥३६॥

व्याख्या— महेश्वरस्य वर्णनानन्तरं तद्वामपार्श्वस्थां शक्तिस्वरूपिणीं पार्वतीं वर्णयति— **वामेति** । रत्नसिंहासने पार्वत्या (उमया) समं स्थितं अपूर्वरूपं परमेश्वरं परिवाराः समन्ततोऽभजन् इति सम्बन्धः । कीदृश्या उमया? **वामपार्श्वनिवासिन्या** । वामपार्श्वे परमेश्वरस्य सव्यभागे निवसितुं शीलमस्या इति वामपार्श्वनिवासिनी, तया । पुनः कीदृश्या ? **मङ्गलप्रियवेषया** । मङ्गलः शुभकरः प्रियः प्रीतिपात्रम्, मङ्गलः प्रियश्च वेषः यस्याः सा, मङ्गलप्रियवेषा, तया । पुनः कीदृश्या ? **समस्तलोकनिर्माणसमवायस्वरूपया** । समस्तः समग्रो लोको विश्वम्, तस्य निर्माणे समवायस्वरूपं उपादानकारणस्वरूपं यस्याः सा समन्त...स्वरूपा, तया । पुनः कीदृश्या ? **इच्छाज्ञानक्रियारूपबहुशक्तिविलासया** । इच्छा च ज्ञानं च क्रिया च इच्छाज्ञानक्रियाः, तासां रूपं स्वरूपं यासां ता इच्छाज्ञानक्रियारूपाः, बह्व्यः शक्तयः बहुशक्तयः, तासां विलासः लीला यस्याः सा इच्छा...विलासा, तया । पुनः कीदृश्या ? **विद्यातत्त्वप्रकाशिन्या** । विद्यातत्त्वं सद्विद्याख्यं तत्त्वं, तत् प्रकाशयितुं शीलम् अस्या इति विद्यातत्त्वप्रकाशिनी, तया । विद्यातत्त्वं नाम प्रपञ्चसृष्टिप्रक्रियायां शिवशक्तिपरिणामभूतेषु षट्त्रिंशत्तत्त्वेष्वेकतमम् । परशिवशक्तेः परिणामभूतमिदं शुद्धविद्यातत्त्वं भाविप्रपञ्चस्य विभागनिबन्धनभेदघटित-सागरतरङ्गन्यायेनाहंतेदन्तयोः ऐक्यप्रतिपत्तिरूपं ब्रह्मापरपर्यायं तत्त्वम् । इदं च शास्त्रगुरुलब्धं मुक्तिहेतुभूतं तत्त्वज्ञानमिति कथ्यते । पुनः कीदृश्या ? **विनाभावविहीनया** । विनाभावो भेदभावः, तेन विहीना, विनाभावविहीना, तया । शिवेनाऽविनाभाव-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संबन्धशालिन्या इत्यर्थः । पुनः कीदृश्या? **संसारविषकान्तारदाहदावाग्निलेखया** । दावाग्नेः दावानलस्य लेखा ज्वाला दावाग्निलेखा, संसार एव विषकान्तारो विषारण्यम्, तस्य दाहाय दावाग्निलेखा संसार ... लेखा, तया । रूपकम् । पुनः कीदृश्या ? **धम्मिल्लमल्लिकामोदझङ्कुर्वद्भृङ्गमालया ।** धम्मिल्ले केशबन्धे मल्लिकाः जातिकुसुमानि, तेषाम् आमोदेन धम्मिल्ल ...मोदेन, भृङ्गानां भ्रमराणां माला सरणिः भृङ्गमाला, धम्मिल्ल...मोदेन झङ्कुर्वती गुञ्जारवं कुर्वती भृङ्गमाला यस्याः सा, तया । पुनः कीदृश्या ? **सम्पूर्णचन्द्रसौभाग्यसंवादिमुखपद्मया ।** मुखं पद्म इव मुखपद्मम्, संपूर्णचन्द्रः पूर्णिमाचन्द्रः, तस्य सौभाग्यं सौन्दर्यम्, तेन संवादि सदृशम्, संपूर्ण...संवादि मुखपद्मं यस्याः सा संपूर्ण...पद्मा, तया । पुनः कीदृश्या ? **नासामौक्तिकलावण्यनाशीरस्मितशोभया ।** स्मितस्य शोभा स्मितशोभा, नासामौक्तिकं नासिकालंकारभूतं मौक्तिकम्, तस्य लावण्यं सौन्दर्यम् तस्माद् नाशीरा अधिका स्मितशोभा मन्दहासचारुता यस्याः सा नासा...शोभा, तया । पुनः कीदृश्या ? **मणिताटङ्करङ्गान्तर्वलितापाङ्गलीलया ।** अपाङ्गस्य कटाक्षस्य लीला विलासः अपाङ्गलीला, मणिताटङ्को मणिमयकर्णभरणम्, मणिताटङ्क एव रङ्गान्तो रङ्गभूमिः, तस्यां वलिता वक्रीभूता, मणिताटङ्करङ्गान्तर्वलिता अपाङ्गलीला यस्याः सा मणि...लीला, तया । पुनः कीदृश्या ? **नेत्रद्वितयसौन्दर्यनिन्दितेन्दीवरत्विषा** । नेत्रस्य द्वितयं द्वित्वम्, तस्य सौन्दर्यं लावण्यम्, नेत्रद्वितयसौन्दर्येण निन्दिता तिरस्कृता इन्दीवरस्य नीलकमलस्य त्विट् दीप्तिः यया सा नेत्र...त्विट्, तया । उपमा। पुनः कीदृश्या ? **कुसुमायुधकोदण्डकुटिलभ्रूविलासया ।** कुसुमायुधः (कुसुमान्येव आयुधं यस्य सः) मन्मथः, तस्य कोदण्डवत् शरासनवत् कुटिला भ्रूः कुसुमा...भ्रूः, तस्या विलासो लीला यस्या सा कुसुमा... विलासा, तया । पुनः कीदृश्या? **बन्धूककुसुमच्छायाबन्धुभूताधरश्रिया ।** बन्धूककुसुमानां बन्धूकपुष्पाणां छाया कान्तिः, तस्या बन्धुभूता सादृश्यशालिनी अधरस्य श्रीः यस्या सा बन्धूक...श्रीः, तया । पुनः कीदृश्या ? **कण्ठनालजितानङ्गकम्बुबिब्बोकसम्पदा ।** कण्ठस्य नालः कण्ठनालः, अनङ्गस्य स्मरस्य कम्बुः शङ्खः, अनङ्गकम्बुः, कण्ठनालेन जितः अनङ्गकम्बुः, तस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बिब्बोकसम्पत् निनादवैभवम्, कण्ठनालेन जितस्य अनङ्गकम्बोः बिब्बोकसम्पत् यस्याः सा, तया । पुनः कीदृश्या ? **बाहुद्वितयसौभाग्यवञ्चितोत्पलमालया** । बाह्वोः द्वितयं बाहुद्वितयम्, तस्य सौभाग्यं सौन्दर्यम्, तेन वञ्चिता तिरस्कृता उत्पलमाला इन्दीवरमाला यया सा, तया । पुनः कीदृश्या? **स्थिरयौवनलावण्यशृङ्गारितशरीरया** । स्थिरस्य यौवनस्य नित्यतारुण्यस्य लावण्यं मनोहरत्वम्, तेन शृङ्गारितम् अलंकृतं शरीरं यस्याः सा, तया । पुनः कीदृश्या ? **अत्यन्तकठिनोत्तुङ्गपीवरस्तनभारया** । अत्यन्तं कठिनौ दृढौ उत्तुङ्गौ उत्तालौ पीवरौ पीनौ च स्तनौ, तयोः भारः यस्याः सा, तया । पुनः कीदृश्या ? **मृणालवल्लरीतन्तुबन्धुभूतावलग्नया** । मृणालस्य वल्लरी मृणालवल्लरी कमलनालः, मृणालवल्लर्याः तन्तुः सूत्रम्, मृणालवल्लरीतन्तुः, तस्य बन्धुभूतः सदृशः अवलग्नः मध्यः यस्याः सा, तया । उपमा । पुनः कीदृश्या ? **शृङ्गारतटिनीतुङ्गपुलिनश्रोणिभारया** । शृङ्गारः एव तटिनी नदी शृङ्गारतटिनी, तुङ्गं च तत् पुलिनं च तुङ्गपुलिनं उत्तालपुलिनतटम्, शृङ्गारतटिन्याः तुङ्गपुलिनम्, तदेव श्रोणिभारः नितम्बभारः यस्याः सा, तया । पुनः कीदृश्या ? **कुसुम्भकुसुमच्छायाकोमलाम्बरशोभया** । कुसुम्भकुसुमानां छाया कान्तिः यस्य तत्, कुसुम्भकुसुमच्छायं तत् च कोमलं च अम्बरं कुसुम्ब...अम्बरम्, तस्य शोभा यस्याः सा, तया । पुनः कीदृश्या ? **शृङ्गारोद्यानसंरम्भारम्भास्तम्भोरुकाण्डया** । शृङ्गार एव उद्यानं शृङ्गारोद्यानम्, तस्य संभारः वस्तुसमूहः तस्मिन् शृङ्गारोद्यानसंभारे रम्भास्तम्भः कदलीकाण्डः, स एव ऊरुकाण्डः यस्याः सा, तया । पुनः कीदृश्या ? **चूतप्रवालसुषुमासुकुमारपदाब्जया** । चूतस्य प्रवालः चूतप्रवालः आम्रपल्लवः तस्य सुषुमा कान्तिः चूतप्रवालसुषुमा, तथा सुकुमारे पदाब्जे (पदे अब्जे इव) यस्याः सा, तया। पुनः कीदृश्या ? **स्थिरमङ्गलशृङ्गारभूषणालङ्कृताङ्गया** । स्थिरः मङ्गलश्च शृङ्गारः स्थिरमङ्गलशृङ्गारः दृढशुभमयशृङ्गारः, स एव भूषणम् आभरणम्, स्थिर... भूषणम्, तेन अलङ्कृतं मण्डितम् अङ्गं शरीरं यस्याः सा, तया । पुनः कीदृश्या ? **हारनूपुरकेयूरचमत्कृतशरीरया** । हारश्च नूपुरश्च केयूरश्च हारनूपुरकेयूराः, मुक्ताहारः, मञ्जीरः, प्रगण्डश्च तैः चमत्कृतं रमणीयतां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नीतं शरीरं यस्याः सा, तया । पुनः कीदृश्या ? **चक्षुरानन्दलतया** । आनन्द एव लता आनन्दलता, चक्षुषोः आनन्दलता, तया । रूपकम् । पुनः कीदृश्या ? **सौभाग्यकुलविद्यया** । कुलस्य विद्या कुलविद्या कुलवृत्तिः, सौभाग्यमेव सौमङ्गल्यमेव कुलविद्या यस्याः सा, तया । रूपकम् । पुनः कीदृश्या ? **लोकजालकुटुम्बया** । लोकानां जालः समूहः, लोकजालः एव कुटुम्बः परिवारः यस्याः सा, तया ॥२४-३६॥

देवादिपरिवारकृतसेवावर्णनम्

पुण्डरीकाकृति स्वच्छं पूर्णचन्द्रसहोदरम् ।
दधौ तस्य महालक्ष्मीः सितमातपवारणम् ॥३७॥

व्याख्या— शिवपार्वत्योर्वर्णनं विधाय समन्ततो देवादिपरिवारेण क्रियमाणां तत्सेवां वर्णयति । आदौ तावत् महालक्ष्म्याः सेवा वर्ण्यते— **पुण्डरीकेति** । **पुण्डरीकाकृति** पुण्डरीकं कमलम्, पुण्डरीकस्याऽऽकृतिरिवाऽऽकृतिः यस्य तत् पुण्डरीकाकृति तत् । उपमा । **पूर्णचन्द्रसहोदरं** पूर्णश्च असौ चन्द्रः च पूर्णचन्द्रः पूर्णिमाचन्द्रः । सः सहोदरः सदृशः यस्य तत् पूर्णचन्द्रसहोदरम्, तत् । **तस्य** तादृशस्य **सितमातपवारणम्** श्वेतच्छत्रं **महालक्ष्मीः दधौ** अधारयत् ॥३७॥

तन्त्रीझङ्कारशालिन्या सङ्गीतामृतविद्यया ।
उपतस्थे महादेवमुपान्ते च सरस्वती ॥३८॥

व्याख्या— सरस्वत्याः सेवां वर्णयति— **तन्त्रीति** । **तन्त्रीझङ्कारशालिन्या** तन्त्री वीणा, तस्य झङ्कारः झङ्कारनिनादः, तन्त्रीझङ्कारेण शालते श्लाघते इति तन्त्रीझङ्कारशालिनी, तादृश्या, **सङ्गीतामृतविद्यया** सङ्गीतस्य अमृतविद्यया मधुरकलया, **सरस्वती** विद्याधिदेवता वाणी **महादेवं** महेश्वरम् **उपान्ते** समीपे **उपतस्थे** सेवयामास ॥३८॥

झणत्कङ्कणजातेन हस्तेनोपनिषद्वधूः ।
ओङ्कारतालवृन्तेन वीजयामास शङ्करम् ॥३९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— उपनिषद्वध्वाः व्यंजनसेवा वर्ण्यते — **झणदिति। झणत्कङ्कणजातेन** झणत् कङ्कणानां वलयानां जातं समूहः यस्मिन् सः झणत्कङ्कणजातः, तेन, **हस्तेन उपनिषद्वधूः** उपनिषदेव वधूः कन्या उपनिषद्वधूः **ओंकारतालवृन्तेन** ओंकार एव तालवृन्तम् ओंकार-तालवृन्तं ओंकारव्यजनं, तेन, शङ्करं शिवं **वीजयामास** वीजयाञ्चक्रे ॥३९॥

चलच्चामरिकाहस्ता झङ्कुर्वन्मणिकङ्कणाः ।
आसेवन्त तमीशानमभितो दिव्यकन्यकाः ॥४०॥

व्याख्या— दिव्यकन्यकानां सेवां वर्णयति— **चलदिति। चलच्चामरिकाहस्ताः** चलन्त्यः चामरिकाः चामराः हस्ते यासां ताः चलच्चामरिकाहस्ताः, **झङ्कुर्वन्मणिकङ्कणाः** झङ्कुर्वन्ति मणिकङ्कणानि यासां ताः झङ्कुर्वन्मणिकङ्कणाः, **दिव्यकन्यकाः** देवकन्याः **तम्** ईशानं परमप्रभुं **अभितः** समन्ततः **आसेवन्त** सेवयाञ्चक्रुः ॥४०॥

चामराणां विलोलानां मध्ये तन्मुखमण्डलम् ।
रराज राजहंसानां भ्रमतामिव पङ्कजम् ॥४१॥

व्याख्या— चामराणां मध्ये तन्मुखं कीदृशमासीद् इत्यत्राह— **चामराणामिति। विलोलानां** चलतां **चामराणां मध्ये तन्मुखमण्डलम्** तस्य परमात्मनः मुखमण्डलं **भ्रमतां** भ्रमणशीलानां **राजहंसानां** कलहंसानां मध्ये **पङ्कजम् इव** कमलम् इव **रराज** प्रकाशते स्म ॥४१॥

मन्त्रेण तमसेवन्त वेदाः साङ्गविभूतयः ।
भक्त्या चूडामणिं कान्तं वहन्त इव मौलिभिः ॥४२॥

व्याख्या— वेदैर्विधीयमाना सेवा वर्ण्यते— **मन्त्रेणेति। साङ्गविभूतयः** अङ्गविभूतिभिः सह साङ्गविभूतयः, साङ्गविभूतयः अङ्गान्येव विभूतयः, शिक्षादिषडङ्गमहिमायुक्ताः, **वेदाः** ऋगादिवेदपुरुषाः तं परमात्मानां । (उपनिषद्रूपैः) **मौलिभिः** शिरोभागैः **कान्तं** मनोहरं **चूडामणिं** शिरोरत्नम् **भक्त्या** वहन्त इव सन्तो **मन्त्रेणाऽसेवन्त** सेवयामासुः ॥४२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तदीयायुधधारिण्यस्तत्समानविभूषणाः ।
अङ्गभूताः स्त्रियः काश्चिदासेवन्त तमीश्वरम् ॥४३॥

व्याख्या— वेदाङ्गरूपाणां स्त्रीणां सेवां वर्णयति— **तदीयेति** । **तदीयायुधधारिण्यः** तदीयानि वेदपुरुषधृतानि आयुधानि शस्त्राणि धर्तुं शीलमासाम् इति, **तत्समानविभूषणाः**, तेषां समानानि सदृशानि विभूषणानि यासां ताः, **अङ्गभूताः** शिक्षाद्यङ्गभूताः **काश्चित्** काश्चन **स्त्रियः तम् ईश्वरं** परमेश्वरं **आसेवन्त** आ समन्तात् सेवयाञ्चक्रुः । शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, ज्योतिष्यम्, छन्दश्चेति षड् वेदाङ्गानि ॥४३॥

आप्ताधिकारिणः केचिदनन्तप्रमुखा अपि ।
अष्टौ विद्येश्वरा देवमभजन्त समन्ततः ॥४४॥

व्याख्या— विद्येश्वराणां सेवाप्रकारमाह— **आप्तेति । केचित्** केचन **अनन्तप्रमुखाः अपि** अनन्तप्रभृतयः (अनन्तः, सूक्ष्मः, शिवोत्तमः, एकनेत्रः, एकरुद्रः, त्रिमूर्तिः, श्रीकण्ठः, शिखण्डी चेति ।) अपि **अष्टौ आप्ताधिकारिणः** आप्ता अधिकृताः **विद्येश्वराः** देवं परमात्मानं **समन्ततः** सर्वतः **अभजन्त** असेवन्त ॥४४॥

ततो नन्दी महाकालश्चण्डो भृङ्गी रिटिस्तथा ।
घण्टाकर्णः पुष्पदन्तः कपाली वीरभद्रकः ॥४५॥
एवमाद्या महाभागा महाबलपराक्रमाः ।
निरङ्कुशमहासत्त्वा भेजिरे तं महेश्वरम् ॥४६॥

व्याख्या— नन्द्यादिगणस्य सेवामाह— **तत इति । ततः** अनन्तरं **महाबलपराक्रमाः** महान्तौ बलपराक्रमौ येषां ते, **निरङ्कुशमहासत्त्वाः** निरङ्कुशं नियन्त्रणरहितं महत् सत्त्वं सामर्थ्यं येषां ते, तादृशाः, **नन्दी, महाकालः, चण्डः, भृङ्गी, रिटिः, घण्टाकर्णः, पुष्पदन्तः, कपाली, वीरभद्रकः, एवमाद्याः महाभागाः** महिमशालिनः **तं महेश्वरं भेजिरे** अभजन् ॥४५-४६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रमथगणकृतसेवावर्णनम्

अणिमादिकमैश्वर्यं येषां सिद्धेरपोहनम् ।
ब्रह्मादयः सुरा येषामाज्ञालङ्घनभीरवः ॥४७॥

मोक्षलक्ष्मीपरिष्वङ्गमुदिता येऽन्तरात्मना ।
येषामीषत्करं विश्वसर्गसंहारकल्पनम् ॥४८॥

ज्ञानशक्तिः परा येषां सर्ववस्तुप्रकाशिनी ।
आनन्दकणिका येषां हरिब्रह्मादिसम्पदः ॥४९॥

आकाङ्क्षन्ते पदं येषां योगिनो योगतत्पराः ।
काङ्क्षणीयफलो येषां संकल्पः कल्पपादपः ॥५०॥

कर्मकालादिकार्पण्यचिन्ता येषां न विद्यते ।
येषां विक्रमसन्नाहा मृत्योरपि च मृत्यवः ॥
ते सारूप्यपदं प्राप्ताः प्रमथा भेजिरे शिवम् ॥५१॥

व्याख्या— प्रमथगणवर्णनपूर्वकं तेषां शिवसेवां वर्णयति— **अणिमादीति** । **ते सारूप्यपदं प्राप्ताः** सारूप्यमुक्तिं प्राप्तवन्तः **प्रमथाः** प्रमथगणाः **शिवं** हरं **भेजिरे** असेवन्त । कीदृशाः प्रमथाः ? **येषाम् अणिमादिकमैश्वर्यं सिद्धेरपोहनम्** । अणिमा, लघिमा, प्राप्तिः, प्राकाम्यम्, महिमा, ईशित्वम्, वशित्वम्, कामावसायिता चेति अष्टैश्वर्यं येषां सिद्धेः सिद्ध्यपेक्षया अपोहनम् तुच्छं (अपोहनीयम् = वर्जनीयम्) ते, तद्दृशाः । पुनः कीदृशाः ? **येषां ब्रह्मादयः सुराः आज्ञालङ्घनभीरवः** । ब्रह्मादयः ब्रह्मप्रमुखाः देवाः येषाम् आज्ञालङ्घने आदेशातिक्रमणे भीरवः भीतिशीलाः, ते, तादृशाः । पुनः कीदृशाः ? **येऽन्तरात्मना मोक्षलक्ष्मी-परिष्वङ्गमुदिताः** । अन्तरात्मना अन्तरात्मद्वारा, मोक्षलक्ष्म्याः (मोक्षः एव लक्ष्मीः, तस्याः) परिष्वङ्गेन आलिङ्गनेन ये मुदिताऽऽनन्दिताः ते, तादृशाः ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पुनः कीदृशाः ? **येषां विश्वसर्गसंहारकल्पनम् ईषत्करम्** । विश्वस्य जगतः, सर्गः सृष्टिः संहारश्च लयश्च, तयोः कल्पनं करणं, विश्वसर्गसंहारकल्पनं येषाम् ईषत्करम् अल्पकार्यं ते, तादृशाः । पुनः कीदृशाः ? **येषां सर्ववस्तु-प्रकाशिनी ज्ञानशक्तिः परा** । सर्ववस्तूनि प्रकाशयितुं शीलमस्याः इति सर्ववस्तुप्रकाशिनी, तादृशी ज्ञानशक्तिः येषां परा श्रेष्ठा ते, तादृशाः । पुनः कीदृशाः ? **येषाम् आनन्दकणिका हरिर्ब्रह्मादिसम्पदः** । हरिब्रह्म-प्रभृतीनां सम्पदः विभवाः येषाम् आनन्दकणिकाः आनन्दलेशाः, ते, तादृशाः । पुनः कीदृशाः ? **येषां पदं योगतत्पराः योगिनः आकाङ्क्षन्ते** । योगतत्पराः योगैकसक्ताः योगिनः येषां पदं स्थानम् आकाङ्क्षन्ते अभिलषन्ति ते, तादृशाः । पुनः कीदृशाः ? **येषां कर्मकालादिकार्पण्यचिन्ता न विद्यते** । कर्म-काल-रागादिकार्पण्यं न्यूनभावः, तस्य चिन्ता येषां न विद्यते न वर्तते ते, तादृशाः । पुनः कीदृशाः ? **येषां विक्रमसन्नाहाः मृत्योरपि मृत्यवः** । येषां विक्रमसन्नाहाः पराक्रमसमारम्भाः मृत्योः अपि मृत्युभूताः ते, तादृशाः । [तादृशाः प्रमथाः शिवं भेजिरे — इति सम्बन्धः ॥] सारूप्यमुक्तिः, सालोक्यमुक्तिः, सामीप्यमुक्तिः, सायुज्य-मुक्तिश्चेति चतसृषु मुक्तिष्वेकतमा सारूप्यमुक्तिः । सारूप्यमुक्तिभाज एते प्रमथाः ॥४७-५१॥

ब्रह्मोपेन्द्रादिदेवानां वसिष्ठादिमहर्षीणां च सेवावर्णनम्

ब्रह्मोपेन्द्रमहेन्द्राद्या विश्वतन्त्राधिकारिणम् ।
आयुधालंकृतप्रान्ताः परितस्तं सिषेविरे ॥५२॥

व्याख्या— ब्रह्मादीनां सेवां वर्णयति— **ब्रह्मेति** । **ब्रह्मा** सृष्टिकर्ता, **उपेन्द्रः**, विष्णुः, **महेन्द्राद्याः आयुधालङ्कृत प्रान्ताः** आयुधैः शस्त्रैः अलंकृतः शोभितः प्रान्तः पार्श्वः येषां ते, तादृशाः सन्तः **विश्वतन्त्राधिकारिणम्** विश्वतन्त्रे विश्वनिर्माणे अधिकारः अस्य अस्तीति विश्वतन्त्राधिकारी, तम्, **परितः तं** समन्ततः **सिषेविरे** सेवयाञ्चक्रुः ॥५२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आदित्या वसवो रुद्रा यक्षगन्धर्वकिन्नराः ।
दानवा राक्षसा दैत्याः सिद्धविद्याधरोरगाः ॥
अभजन्त महादेवमपरिच्छिन्नसैनिकाः ॥५३॥

व्याख्या— आदित्यादीनां सेवां वर्णयति— **आदित्या इति । अदित्याः** द्वादशादित्याः, **वसवः** अष्टौ वसवः, **रुद्राः** एकदश रुद्राः, **यक्षगन्धर्वकिन्नराः** कुबेरप्रभृतयो यक्षाः, हाहाप्रभृतयो गन्धर्वाः, अश्वमुखादयः किन्नराः, **दानवाः** बाणादयो दानवाः, **राक्षसाः** रावणादयो राक्षसाः, **दैत्याः** तारकादयो दैत्याः, **सिद्धविद्याधरोरगाः** आदिनाथादयः सिद्धाः, मणिभद्रादयो विद्याधराः, शेषादय उरगाश्च **अपरिच्छिन्नसैनिकाः** अपरिच्छिन्नाः अवियुक्ताः सैनिकाः योधाः येभ्यस्ते, तादृशाः सन्तः **महादेवं** परमेश्वरम् **अभजन्त** असेवन्त ॥५३॥

वसिष्ठो वामदेवश्च पुलस्त्यागस्त्यशौनकाः ।
दधीचिर्गौतमश्चैव सानन्दशुकनारदाः ॥५४॥
उपमन्युभृगुव्यासपाराशरमरीचयः ।
इत्याद्या मुनयः सर्वे नीलकण्ठं सिषेविरे ॥५५॥

व्याख्या— वसिष्ठादिमुनिकृतसेवा वर्ण्यते— **वसिष्ठ इति । वसिष्ठः, वामदेवः, पुलस्त्यः** ब्रह्मणः षट् मानसपुत्रेष्वेकतमः, **अगस्त्यः** कलशोद्भवः, **शौनकः, दधीचिः, गौतमः, सानन्दः, शुकः** व्यासमहर्षेः पुत्रः, **नारदः, उपमन्युः** धौम्यशिष्यः, **भृगुः** परशुरामस्य पिता, **व्यासः, पाराशरः, मरीचिः, इत्याद्याः सर्वे मुनयः** ऋषयः **नीलकण्ठं** परशिवं **सिषेविरे** सेवयामासुः ॥५४-५५॥

पार्श्वस्थपरिवाराणां विमलाङ्गेषु बिम्बितः ।
सर्वान्तर्गतमात्मानं स रेजे दर्शयन्निव ॥५६॥

व्याख्या— महादेवः कथं विराजते स्मेत्यत्राह— **पार्श्वस्थेति । पार्श्वस्थपरिवाराणां** पार्श्वे स्थितानां परिवाराणां **विमलाङ्गेषु** विमलेषु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निर्मलेषु अङ्गेषु शरीरेषु बिम्बितः प्रतिबिम्बतया स्थितः **सः** परमेश्वरः, **आत्मानं सर्वान्तर्गतं** सर्वेष्वन्तर्यामित्वेन स्थितम् इति **दर्शयन्निव** साक्षात्कारयन्निव **रेजे** विराजयामास ॥ अत्र परिवाराणां विमलशरीरेषु प्रतिबिम्बभूतं स्वीयमन्तर्यामित्वं प्रदर्शयामास इति संभावनमत्र उत्प्रेक्षा-लंकारः। "**संभावना स्यादुत्प्रेक्षा**" (कु.आ., ३२) इति तस्याः लक्षणम् ॥५६॥

परमात्मनो राजव्यापारवर्णनम्

क्षणं स शम्भुर्देवानां कार्यभागं निरूपयन् ।
क्षणं गन्धर्वराजानां गानविद्यां विभावयन् ॥५७॥

ब्रह्मविष्ण्वादिभिर्देवैः क्षणमालापमाचरन् ।
क्षणं देवमृगाक्षीणां लालयन्नृत्यविभ्रमम् ॥५८॥

व्यासादीनां क्षणं कुर्वन् वेदोच्चारेषु गौरवम् ।
विदधानः क्षणं देव्या मुखे बिम्बाधरे दृशः ॥५९॥

हास्यनृत्यं क्षणं पश्यन् भृङ्गिणा परिकल्पितम् ।
नन्दिना वेत्रहस्तेन सर्वतन्त्राधिकारिणा ॥६०॥

अमुञ्चता सदा पार्श्वमात्माभिप्रायवेदिना ।
चोदितान् वासयन् कांश्चिद्विसृजन् भ्रूविलासतः ॥
संभावयंस्तथा चान्यानन्यानपि नियामयन् ॥६१॥

समस्तभुवनाधीशमौलिलिलितशासनः ।
अकुण्ठशक्तिरव्याजलावण्यललिताकृतिः ॥६२॥

स्थिरयौवनसौरभ्यशृङ्गारितकलेवरः ।
आत्मशक्त्यमृतास्वादरसोल्लासितमानसः ॥६३॥

स्वाभाविकमहैश्वर्यविश्रामपरमावधिः ।
निष्कलङ्कमहासत्त्वनिर्मितानेकविग्रहः ॥६४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अखण्डारातिदोर्दण्डकण्डूखण्डनपण्डितः।
चिन्तामणिः प्रपन्नानां श्रीकण्ठः परमेश्वरः ॥६५॥

व्याख्या— परमात्मनो राजकार्यं वर्णयति— **क्षणमिति**। **श्रीकण्ठः** नीलकण्ठः (स्वकीयास्थाने विराजते स्म) (६५)। कीदृशः? **समस्तभुवनाधीशमौलिलालितशासनः**। समस्तानां सर्वेषां भुवनानां लोकानाम् अधीशाः अध्यक्षभूताः ब्रह्मदयः, तेषां मौलिभिः शिरोभिः लालितं प्रीत्याऽऽदृतं शासनम् यस्य सः। पुनः कीदृशः? **अकुण्ठशक्तिः**। अकुण्ठाऽप्रतिहता शक्तिः यस्य सः। पुनः कीदृशः? **अव्याजलावण्यललिताकृतिः**। अव्याजम् अकृत्रिमं लावण्यं सौन्दर्यम्, तेन ललिता मनोहरा आकृतिः आकारः यस्य सः ॥६२॥ पुनः कीदृशः? **स्थिरयौवनसौरभ्यशृङ्गारितकलेवरः**। स्थिरं शाश्वतं यौवनं तारुण्यम् तस्य सौरभ्यम् अतिशयः, तेन शृङ्गारितः अलंङ्कृतः कलेवरः शरीरं यस्य सः। पुनः कीदृशः? **आत्मशक्त्यमृतास्वादरसोल्लासितमानसः**। आत्मनः शक्तिः स्वसमवेता शक्तिः, सा एव अमृतं पीयूषम्, आनन्द इति यावत्, तस्य आस्वादः अनुभवः, तस्य रसः रुचिः, तेन उल्लासितम् आनन्दितम् मानसं मनः यस्य सः ॥६३॥ पुनः कीदृशः? **स्वाभाविकमहैश्वर्यविश्रामपरमावधिः**। महच्च तदैश्वर्यं च महैश्वर्यं महाविभवः, स्वाभाविकम् अकृत्रिमं महैश्वर्यम्, तस्य विश्रामः विरामः, तस्य परमावधिः पर्यन्तभूमिः। पुनः कीदृशः? **निष्कलङ्कमहासत्त्वनिर्मितानेकविग्रहः**। निष्कलङ्कं कलङ्करहितं महासत्त्वं महाबलम्, तेन निर्मिताः सृष्टाः अनेके विग्रहाः स्वकीयलीलादेहाः यस्य सः ॥६४॥ पुनः कीदृशः? **अखण्डारातिदोर्दण्डकण्डूखण्डनपण्डितः**। अखण्डाः अपरिमिताः (समस्ताः) आरातयः शत्रवः, तेषां दोर्दण्डाः धनूंषि, तेषां कण्डूः खर्जूः, तस्याः खण्डने उपशमने पण्डितः निष्णातः। पुनः कीदृशः? **प्रपन्नानां चिन्तामणिः**। प्रपन्नानाम् आश्रितानां चिन्तामणिः सर्वेच्छाप्रदायकं चिन्तारत्नम् ॥६५॥ तादृशः श्रीकण्ठः परमेश्वरः विराजते स्म इति सम्बन्धः। किं कुर्वन् विराजते स्म? **क्षणं स शम्भुर्देवानां कार्यभागं निरूपयन्**? क्षणं क्षणमात्रं सः शम्भुः देवानां ब्रह्मादिविबुधानां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कार्यभागं कार्यजातं निरूपयन् पर्यवेक्षमाणः सन् । पुनः किं कुर्वन् ? **क्षणं गन्धर्वराजानां गानविद्यां विभावयन्** क्षणं क्षणमात्रं गन्धर्वराजानां गन्धर्वाधिपतीनां, [गन्धर्वाणां राजानः गन्धर्वराजाः, तत्पुरुषसमासान्ते 'राजाहसखिभ्यष्टच्' (पा.अ., ५.४.९१) इति टच् (अ) विधानाद् राजन्शब्दः अकारान्तः भवति], गानविद्यां संगीतकलां विभावयन् शृण्वन् ॥५७॥ पुनः किं कुर्वन् ? **ब्रह्मविष्ण्वादिभिर्देवैः क्षणमालापमाचरन् ।** क्षणं क्षणमात्रं ब्रह्मा, विष्णुः, इत्यादिभिः देवैः आलापं सम्भाषणम् आचरन् कुर्वन् । "सहयुक्तेऽप्रधाने" (पा.अ., २.३.१९) इति तृतीया । तदप्रयोगे तदर्थाक्षेपेऽपि तृतीया । पुनः किं कुर्वन् ? **क्षणं देवमृगाक्षीणां लालयन्नृत्यविभ्रमम् ।** क्षणं देवमृगाक्षीणां देवकन्यकानां नृत्यविभ्रमं नृत्यविलासं लालयन् औत्सुक्येन परिभावयन् ॥५८॥ पुनः किं कुर्वन् ? **विदधानः क्षणं देव्या मुखे बिम्बाधरे दृशः ।** क्षणं देव्याः पार्वत्याः मुखे आनने बिम्बाधरे बिम्बफलसदृशे अधरे अधरोष्ठे दृशः त्रिणेत्राणि विदधानः कुर्वन् (पातयन्) ॥५९॥ पुनः किं कुर्वन् ? **हास्यनृत्यं क्षणं पश्यन् भृङ्गिणा परिकल्पितम् ।** क्षणं भृङ्गिणा भृङ्गिनाम्ना गणाध्यक्षेन परिकल्पितं प्रदर्श्यमाणं हास्यनृत्यं विनोदनृत्यं पश्यन् विलोकयन् ॥ ६० पूर्वार्धः ॥ पुनः किं कुर्वन् ? **नन्दिना वेत्रहस्तेन ... चान्यानन्यानपि नियामयन् ।** वेत्रहस्तेन वेत्रः दण्डः हस्ते यस्य सः, तेन; सर्वतन्त्राधिकारिणा सर्वेषु तन्त्रेषु सर्वेषु व्यवहारेषु अधिकारः अस्याऽस्तीति सर्वतन्त्राधिकारी, तेन; सर्वदा शिवस्य पार्श्वम् समीपम् अमुञ्चताऽत्यजता; आत्माभिप्रायवेदिना आत्मनः (परमात्मनः) अभिप्रायम् इङ्गितं वेत्तुं शीलमस्येति आत्माभिप्रायवेदी, तेन; तादृशेन नन्दिना नन्दीश्वरेण चोदितान् (इङ्गितेन) सूचितान् कांश्चित् कांश्चन पुरुषान् भ्रूविलासतः भ्रूचालनभङ्ग्या वासयन् उपवेशयन् (कांश्चित्) विसृजन् प्रेषयन्, तथा (कांश्चित्) संभावयन् सत्कुर्वन् च (कांश्चिद्) अन्यान् अपि नियामयन् विनाययन् (विनीतान् कुर्वन्) ॥ ६० उत्तरार्धः-६२ ॥ कैलासास्थाने वैविध्यमयं देव-गन्धर्वादीनां सेवाकार्यं विलोकयन् परमेश्वरः विराजते स्म ॥५७-६५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रेणुकावतारकारणीभूतः प्रसङ्गः

सभान्तरगतं तन्त्रं रेणुकं गणनायकम् ।
प्रसादं सुलभं दातुं ताम्बूलं स तमाह्वयत् ॥६६॥

व्याख्या— शिवस्य वैभववर्णनानन्तरं शिवेन रेणुकाह्वानप्रकार-माह— **सभान्तरेति । सभान्तरगतं** सभामध्ये समासीनं **तन्त्रं** प्रधानं तं गणनायकं गणेश्वरं **रेणुकं प्रसादं** प्रसादभूतं (अनुग्रहद्योतकं) **सुलभं** सहजतया प्राप्यमाणं **ताम्बूलं** पूगीफलसमायुक्त-नागवल्लीदलानि **दातुम्** अनुग्रहीतुम् **आह्वयत्** आह्वयामास (आकारयामास) ॥६६॥

शम्भोराह्वानसंतोषसंभ्रमेणैव दारुकम् ।
उल्लङ्घ्य पार्श्वमगमल्लोकनाथस्य रेणुकः ॥६७॥

व्याख्या— संभ्रमे घटितं रेणुकदोषमाह— **शम्भोरिति । शम्भोः** परमेश्वरस्य **आह्वानसन्तोषसंभ्रमेण**, आह्वानेन आमन्त्रणेन सन्तोषः, तस्य संभ्रमः विभ्रमः, तेनैव। **दारुकं** दारुकनामानं गणेश्वरम् **उल्लङ्घ्य** अतिक्रम्य **लोकनाथस्य** विश्वेश्वरस्य **पार्श्वं** समीपम् **अगमत्** अगच्छत् ॥६७॥

तमालोक्य विभुस्तत्र समुल्लङ्घितदारुकम् ।
माहात्म्यं निजभक्तानां द्योतयन्निदमब्रवीत् ॥६८॥

व्याख्या— शिवो भक्तमाहात्म्यं दर्शयतीत्याह— **तमिति । विभुः** सर्वस्वतन्त्रः प्रभुः, तत्र तस्मिन् सभास्थाने **समुल्लङ्घितदारुकम्**, समुल्लङ्घितः दारुको येन सः, तम्, तं रेणुकम् **आलोक्य** दृष्ट्वा, **निजभक्तानां** निजानां स्वकीयानां भक्तानां **माहात्म्यं** महिमानं **द्योतयन्** निरूपयन् इदं वाक्यम् **अब्रवीत्** जगाद ॥६८॥

रे रे रेणुक दुर्बुद्धे कथमेष त्वयाधुना ।
उल्लङ्घितः सभामध्ये मम भक्तो हि दारुकः ॥६९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लङ्घनं मम भक्तानां परमानर्थकारणम् ।
आयुःश्रियं कुलं कीर्तिं निहन्ति हि शरीरिणाम् ॥७०॥

व्याख्या— शिवः किमब्रवीदित्यत्राह— **रे रे इति । रे रे रेणुक,** हे रेणुक, **दुर्बुद्धे** हे मन्दमते, **कथम् एष** कथमेवम् **अधुना** इदानीं **सभामध्ये** सभान्तरे **त्वया** भवता **मम भक्तः** मदीयभक्तो **दारुक** उल्लङ्घितः अतिक्रान्तः । **मम भक्तानां** मदीयभक्तानां **लङ्घनम्** उल्लङ्घनं **परमानर्थकारणम्,** परमम् अत्यन्तम् अनर्थानाम् आपदां कारणं हेतुः । **शरीरिणां** जीविनाम् **आयुः** वयः, **श्रियं** सम्पदम्, **कुलं** वंशम्, **कीर्तिं** यशः च **निहन्ति** विनाशयति । उभयत्र हि शब्दः प्रसिद्ध्यर्थकः ॥६९-७०॥

मम भक्तमवज्ञाय मार्कण्डेयं पुरा यमः ।
मत्पादताडनादासीत् स्मरणीयकलेवरः ॥७१॥

व्याख्या— पूर्वश्लोकोक्तविषयस्य समर्थनाय मार्कण्डेयवृत्तान्तमाह— **ममेति । पुरा** पुरातनकाले **यमः** मृत्युदेवता **मम भक्तं मार्कण्डेयं** मृकण्डोः पुत्रम् **अवज्ञाय** अवमत्य **मत्पाद-ताडनात्** मत्पादेन मदीयपादेन ताडनात् प्रहारात् (हेतुभूतात्) **स्मरणीयकलेवरः** स्मरणीयः केवलं स्मरणयोग्यः कलेवरः शरीरं यस्य सः, तादृशः, **आसीत्** अभवत् । शरीरनाशवशात् केवलं स्मरणविषयीभूतशरीरवान् बभूव इत्यर्थः ॥७१॥

भृगोश्च शङ्कुकर्णस्य मम भक्तिमतोस्तयोः ।
कृत्वाऽनिष्टमभूद् विष्णुर्विकेशो दशयोनिभाक् ॥७२॥

व्याख्या— भृगुशङ्कुवृत्तान्तौ वर्णयति— **भृगोरिति । मम भक्तिमतोः** मदीयभक्तयोः **भृगोः शंकुकर्णस्य च अनिष्टम्** अनर्थं **कृत्वा** विधाय **विष्णुः** नारायणः **विकेशः** विगतः केशः यस्य सः, केशरहितः, **दशयोनिभाक्** (च) दशावतारभाजनः (च) **अभूत्** अभवत् ॥७२॥

मद्भक्तेन दधीचेन कृत्वा युद्धं जनार्दनः ।
भग्नचक्रायुधः पूर्वं पराभवमुपागमत् ॥७३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— दधीचवृत्तान्तमाह— **मद्भक्तेनेति** । पूर्वं पुरा **मद्भक्तेन** मदीयभक्तेन **दधीचेन** (सह) **युद्धं** समरं **कृत्वा** विधाय **जनार्दनः** विष्णुः **भग्नचक्रायुधः** भग्नः त्रुटितः, चक्रमेवाऽऽयुधः यस्य सः, तादृशः सन् **पराभवम्** अवज्ञाम् **उपागमत्** उपागच्छत्, प्राप्तवानित्यर्थः ॥७३॥

कृताश्वमेधो दक्षोऽपि मद्भक्तांश्च गणेश्वरान् ।
अवमत्य सभामध्ये मेषवक्त्रोऽभवत् पुरा ॥७४॥

व्याख्या— दक्षदृष्टान्तमाह— **कृतेति** । **पुरा** पूर्वं **कृताश्वमेधः** कृतः अश्वमेधः येन सः, **दक्षः अपि सभामध्ये** सभान्तरे **मद्भक्तान्** शिवभक्तान् **गणेश्वरान्** गणनायकान् **अवमत्य** अवज्ञाय **मेषवक्त्रो** मेषस्य वक्त्रं यस्य सः, मेषाननः, **अभवत्** बभूव ॥७४॥

श्वेतस्य मम भक्तस्य दुरतिक्रमतेजसः ।
औदासीन्येन कालोऽपि मया दग्धः पुराऽभवत् ॥७५॥

व्याख्या— श्वेतस्य वृत्तान्तमाह— **श्वेतस्येति** । **पुरा** पूर्वं **दुरतिक्रमतेजसः**, कष्टेन अतिक्रमं, दुरतिक्रमं तेजः यस्य सः दुरतिक्रमतेजाः, तस्य, **मम भक्तस्य** मदीयभक्तस्य **श्वेतस्य** श्वेतनाम्नः **औदासीन्येन** अवमाननेन **कालोऽपि** यमोऽपि **मया दग्धः** विप्लुष्टः **अभवत्** बभूव ॥७५॥

एवमन्येऽपि बहवो मद्भक्तानामतिक्रमात् ।
परिभूता हताश्चासन् भक्ता मे दुरतिक्रमाः ॥७६॥

व्याख्या— भक्तमाहात्म्यम् उपसंहरति— **एवमिति** । **एवम्** अनेन प्रकारेण **अन्येऽपि बहवः मद्भक्तानाम्** अतिक्रमाद् उल्लङ्घनात् **परिभूता** अवमानिता **हताश्च** धातिताश्च **आसन्** अभवन् । **मे भक्ता** मम भक्ताः **दुरतिक्रमा** अनुल्लङ्घनीयाः ॥७६॥

अविचारेण मद्भक्तो लङ्घितो दारुकस्त्वया ।
एष त्वं रेणुकानेन जन्मवान् भव भूतले ॥७७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— रेणुकावताराय शिवाज्ञामाह— **अविचारेणेति** । **अविचारेण** अज्ञानेन त्वया **मद्भक्त एष** अयं **दारुकः लङ्घितः** अतिक्रान्तः । हे **रेणुक, अनेन** एतेन निमित्तेन **भूतले** पृथिव्यां **जन्मवान्** जन्मभाक् **भव** भूयाः ॥७७॥

इत्युक्तः परमेशेन भक्तमाहात्म्यशंसिना ।
प्रार्थयामास देवेशं प्रणिपत्य स रेणुकः ॥७८॥

व्याख्या— 'भूतले जन्मवान् भव' इत्यादेशमात्रेण भीतो रेणुकः प्रार्थयामासेत्याह— **इतीति** । **भक्तमाहात्म्यशंसिना** भक्तानां माहात्म्यं महिमा, तत् भक्तमाहात्म्यं शंसितुं शीलमस्य इति भक्तमाहात्म्यशंसी, तेन, **परमेशेन** परमेश्वरेण **इत्युक्त** एवमादिष्टः सन् **स रेणुकः देवेशं** देवानाम् ईशं स्वामिनं **प्रणिपत्य** नमस्कृत्य **प्रार्थयामास** प्रार्थनां चकार ॥७८॥

मानुषीं योनिमासाद्य महादुःखविवर्धिनीम् ।
जात्यायुर्भोगवैषम्यहेतुकर्मोपपादिनीम् ॥७९॥

समस्तदेवकैङ्कर्यकार्पण्यप्रसवस्थलीम् ।
महातापत्रयोपेतां वर्णाश्रमनियन्त्रिताम् ॥
विहाय त्वत्पदाम्भोजसेवां किं वा वसाम्यहम् ॥८०॥

यथा मे मानुषो भावो न भवेत् क्षितिमण्डले ।
तथा प्रसादं देवेश विधेहि करुणानिधे ॥८१॥

व्याख्या— परमात्मानमुद्दिश्य रेणुकप्रार्थनाप्रकारमाह— **मानुषीमित्यादि** । **महादुःखविवर्धनीं** महत् च तत् दुःखं च महादुःखम्, तत् विवर्धयितुं विस्तारयितुं शीलम् अस्याः इति महादुःखविवर्धिनी, ताम्; **जात्यायुर्भोगवैषम्यहेतुकर्मोपपादिनीं** जातिश्च आयुश्च भोगश्च जात्यायुर्भोगाः, तेषां वैषम्यं (विषमस्य भावः) वैपरीत्यम्, तस्य हेतुः कारणम्, तादृशं **कर्म** पापपुण्यात्मककर्मफलम् उपपादयितुं प्रापयितुं शीलमस्या

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति जात्यायु... कर्मोपपादिनी, ताम्; **समस्तदेवकैङ्कर्यकार्पण्यप्रसवस्थलीं** समस्तानां सर्वेषां देवानां कैङ्कर्यं सेवादि, तदेव कार्पण्यं हीनभावः, तस्य प्रसवस्थली जन्मभूमिः, ताम्; **महातापत्रयोपेतां** तापानां त्रयम्, आध्यात्मिकम्, आधिदैविकम्, आधिभौतिकं चेति तापत्रयम्, तेन उपेता युक्ता, ताम्; **वर्णाश्रमनियन्त्रिताम्**, वर्णश्च ब्रह्मणादिः, आश्रमश्च ब्रह्मचर्यादिः वर्णाश्रमौ, ताभ्यां नियन्त्रिता, ताम्; तादृशीं **मानुषीं योनिं** मानुषं जन्म **आसाद्य** प्राप्य, **त्वत्पदाम्भोजसेवाम्**, तव पदे चरणे अम्भोजे कमले इव त्वत्पदाम्भोजे, तयोः सेवा, ताम्, **विहाय** त्यक्त्वा **अहं वसामि** जीवामि **किं वा**, सर्वथा न वसामि इत्यर्थः। हे **देवेश** देवेश्वर, **करुणानिधे** वात्सल्यनिधे ! **यथा मे** मम **क्षितिमण्डले** भूमण्डले **मानुषो भावः** मानुषी स्थितिः **न भवेत्** न स्यात् **तथा प्रसादम्** अनुग्रहं **विधेहि** कुरु ॥७९-८१॥

इति संप्रार्थितो देवो रेणुकेन महेश्वरः ।
मा भैषीर्मम भक्तानां कुतो भीतिरिहेष्यति ॥८२॥

व्याख्या— रेणुकप्रार्थनां श्रुत्वा शिवस्यानुग्रहप्रकारमाह— **इतीति**। **इति** एवं **रेणुकेन सम्प्रार्थितः** विज्ञापितः सन् **महेश्वरः** परमेश्वरः अब्रवीत् इति शेषः। किमब्रवीत् ? ''**मा भैषीः...इष्यति**'' इति। **मा भैषीः** भीतिर्मास्तु। **कुतः** कुतस्त्यं **मम भक्तानाम् इह** अत्र **भीतिः** भयम् **इष्यति** आगच्छति। 'इष गतौ' दिवादिगणस्य धातुः ॥८२॥

श्रीशैलस्योत्तरे भागे त्रिलिङ्गविषये शुभे ।
कोल्लिपाक्यभिधानोऽस्ति कोऽपि ग्रामो महत्तरः ॥८३॥

व्याख्या— रेणुकावतारस्थानमाह— **श्रीशैलेति**। **शुभे** मङ्गले **त्रिलिङ्गविषये** त्रिलिङ्गाख्यप्रदेशे, आन्ध्रप्रदेशे, **श्रीशैलस्य** श्रीशैलाख्यपर्वतस्य **उत्तरे भागे** उत्तरस्यां दिशायां **कोल्लिपाक्यभिधानः** कोल्लिपाकी (इति) अभिधानं नाम यस्य सः, **महत्तरः** महिमास्पदः **कोऽपि ग्रामः अस्ति** भवति। इदानीं तस्य ग्रामस्य नाम 'कोनलुपाक' इति। हैदराबाद् नागरात् षष्टि'किलोमीटर्'दूरे वर्तते ॥८३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सोमेश्वराभिधानस्य तत्र वासवतो मम ।
अस्पृशन् मानुषं भावं लिङ्गात्प्रादुर्भविष्यसि ॥८४॥

व्याख्या— तत्र सोमेश्वरलिङ्गात् रेणुकावतारं सूचयति— **सोमेश्व-रेति । तत्र** कोल्लिपाक्यां **सोमेश्वराभिधानस्य** सोमेश्वरः (इति) अभिधानं नामधेयं यस्य सः, तस्य **वासवतः** वसतः **मम** मे **लिङ्गात्**, **मानुषं भावं** मनुष्यस्थितिम् **अस्पृशन्** अप्राप्तः सन् **प्रादुर्भविष्यसि** अवतरिष्यसि ॥८४॥

मदीयलिङ्गसम्भूतं मद्भक्तपरिपालकम् ।
विस्मिता मानुषा सर्वे त्वां भजन्तु मदाज्ञया ॥८५॥

मदद्वैतपरं शास्त्रं वेदवेदान्तसंमतम् ।
स्थापयिष्यसि भूलोके सर्वेषां हितकारकम् ॥८६॥

मम प्रतापमतुलं मद्भक्तानां विशेषतः ।
प्रकाशय महीभागे वेदमार्गानुसारतः ॥८७॥

व्याख्या— रेणुकस्य अवतारकर्तव्यमाह— **मदीयेति । मदीयलिङ्ग सम्भूतं** मम लिङ्गात् संभूतम् अवतरन्तम्, **मद्भक्तपरिपालकं** मदीय-भक्तानां परिपालकं रक्षकं च **त्वां मदाज्ञया** मदीयादेशेन **सर्वे समस्ता मानुषाः** मनुष्याः **भजन्तु** सेवन्ताम् ॥ **भूलोके** भूमण्डले **वेदवेदान्तसंमतं** वेदः संहितादिभागः वेदान्त उपनिषद्भागः, इत्युभयोः संमतम् अनुमतं **सर्वेषां** समेषां **हितकारकं** श्रेयस्करम्, **मदद्वैतपरं शास्त्रं** मदीयम् अद्वैतं तत्परं तदनुसारिणं शास्त्रं, शिवाद्वैतवेदान्तः तम् इति यावत्, **स्थापयि-ष्यसि** प्रतिष्ठापयिष्यसि ॥ **महीभागे** भूभागे **मम** मदीयं **विशेषतः** विशेषतया **मद्भक्तानाम् अतुलम्** अनुपमं **प्रतापं** महिमानं **वेदमार्गानु-सारतः** वेदोक्तस्य मार्गस्य अनुसारेण **प्रकाशय** प्रकटय ॥८५-८७॥

इत्युक्त्वा परमेश्वरः स भगवान् भद्रासनादुत्थितो
ब्रह्मोपेन्द्रमुखान् विसृज्य विबुधान् भ्रूसंज्ञया केवलम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पार्वत्या सहितो गणैरभिमतैः प्राप स्वमन्तःपुरं
क्षोणीभागमवातरत् पशुपतेराज्ञावशाद् रेणुकः ॥८८॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिशिवाचार्यविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ कैलासवर्णन-रेणुकभूलोकावतरण-निरूपणं नाम तृतीयः परिच्छेदः ॥३॥

व्याख्या— रेणुकावतारम् उक्त्वा परिच्छेदमुपसंहरति— **इतीति** । **इत्युक्त्वा** एवमभिधाय **स भगवान्** परमेश्वरः **भद्रासनाद्** पवित्र-सिंहासनाद् **उत्थाय** उत्तिष्ठन्, **ब्रह्मोपेन्द्रमुखान्** ब्रह्मा, उपेन्द्रः विष्णुः, इत्यादिप्रमुखान् **विबुधान्** देवान् **भ्रूसंज्ञया** केवलं भ्रूचेष्टारूपसङ्केतमात्रेण **विसृज्य** निर्गमनायाऽनुज्ञां दत्त्वा, **पार्वत्या सहितः** पार्वतीसमेतः **अभिमतैः** अनुग्रहभाजनैः **गणैः** शिवगणैश्च सहितः **स्वमन्तःपुरं** स्वशुद्धान्तं **प्राप** प्राप्तवान् । **पशुपतेः** परमेश्वरस्य **आज्ञावशाद्** आदेशानुसारं **रेणुकः** रेणुकाचार्यः **क्षोणीभागं** भूभागम् **अवातरत्** अवततार ॥ अत्र शार्दूल-विक्रीडितं छन्दः । "सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।" इति तल्लक्षणम् । (आप्टे, पृ. ६५५)

– – – (मगण), ᴗ ᴗ – (सगण),
ᴗ – ᴗ (जगण), ᴗ ᴗ – (सगण),
– – ᴗ (तगण), – – ᴗ (तगण),
ग (गुरु), = प्रतिपादं १९ वर्णाः ॥८८॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यायां व्याख्यायां
तृतीयः परिच्छेदः समाप्तः ॥३॥

CC-0 . Jangamwadi Math Collection. Digitized by eGangotri

चतुर्थः परिच्छेदः

रेणुकागस्त्यदर्शनप्रसङ्गः

व्याख्या— चतुर्थे परिच्छेदे रेणुकागणेश्वरस्याऽवतारः, मलयाद्रिगमनम्, अगस्त्याश्रमे अगस्त्यलोपामुद्राभ्यां कृतः रेणुकसत्कारः, अगस्त्येन रेणुकभगवत्पादं प्रति वीरशैवसिद्धान्तोपदेशाय कृता विज्ञापना च वर्ण्यन्ते ।

रेणुकगणेश्वरस्यावतारः

अथ त्रिलिङ्गविषये कोल्लिपाक्यभिधे पुरे ।
सोमेश्वरमहालिङ्गात् प्रदुरासीत् स रेणुकः ॥१॥

व्याख्या— रेणुकावतारं ब्रूते— **अथेति** । **अथा** अनन्तरं महेश्वरादेशप्राप्त्यनन्तरं **त्रिलिङ्गविषये** त्रिलिङ्गप्रदेशे **कोल्लिपाक्यभिधे** कोल्लिपाकी इत्यभिधा नाम यस्य तत् कोल्लिपाक्यभिधम्, तस्मिन् पुरे पट्टने स रेणुकः **सोमेश्वरमहालिङ्गात्** सोमेश्वरनाम्नः महालिङ्गात् प्रादुरासीद् अवततार ॥१॥

प्रादुर्भूतं तमालोक्य शिवलिङ्गात् त्रिलिङ्गजाः ।
विस्मिताः प्राणिनः सर्वे बभूवुरतितेजसम् ॥२॥

भस्मोद्धूलितसर्वाङ्गं साररुद्राक्षभूषणम् ।
जटामुकुटसंयुक्तं त्रिपुण्ड्राङ्कितमस्तकम् ॥३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कटीतटीपटीभूतकन्थापटलबन्धुरम् ।
दधानं योगदण्डं च भस्माधारं कमण्डलुम् ॥४॥

शिवाद्वैतपरिज्ञानपरमानन्दमोदितम् ।
निर्धूतसर्वसंसारवासनादोषपञ्जरम् ॥५॥

शिवागमसुधासिन्धुसमुन्मेषसुधाकरम् ।
चित्तारविन्दसंगूढशिवपादाम्बुजद्वयम् ॥६॥

यमादियोगतन्त्रज्ञं स्वतन्त्रं सर्वकर्मसु ।
समस्तसिद्धसन्तानसमुदायशिखामणिम् ॥७॥

वीरसिद्धान्तनिर्वाहकृतपट्टनिबन्धनम् ।
आलोकमात्रनिर्भिन्नसमस्तप्राणिपातकम् ॥८॥

व्याख्या— सोमेश्वरलिङ्गात् समुद्भूतं श्रीरेणुकस्वरूपं वर्णयति— **प्रादुर्भूतमित्यादि** । **शिवलिङ्गात्** सोमेश्वरलिङ्गात् **प्रादुर्भूतं** समुद्भूतम् **अतितेजसम्** अत्यधिकं तेजः यस्य सः अतितेजाः, तम्, अतितेजसं **तं** रेणुकम् **आलोक्य** दृष्ट्वा, **सर्वे** समस्ताः **त्रिलिङ्गजाः** त्रिलिङ्गप्रदेशे जाताः **प्राणिनः** प्रजाः **विस्मिता** आश्चर्ययुक्ताः **बभूवुः** अभवन् । कीदृशं रेणुकं दृष्ट्वा विस्मिता बभूवुः? **भस्मोद्धूलितसर्वाङ्गम्** । भस्मना भसितेन उद्धूलितानि उद्धूलनाख्यसंस्कारयुक्तानि सर्वाणि अङ्गानि यस्य सः भस्मोद्धूलितसर्वाङ्गः, तम् । पुनः कीदृशम् ? **साररुद्राक्षभूषणम्** । साराः उत्कृष्टाः रुद्राक्षाः (रुद्रनेत्रसमुद्भवाः तन्नामभाजः) साररुद्राक्षाः ते एव भूषणम् आभरणं यस्य सः साररुद्राक्षभूषणः, तम् । पुनः कीदृशम् ? **जटामुकुटसंयुक्तम्** । जटाः केशजूटाः ता एव मुकुटं किरीटं जटामुकुटम्, तेन संयुक्तम् । पुनः कीदृशम् ? **त्रिपुण्ड्राङ्कितमस्तकम्** । त्रिपुण्ड्रेण, तर्जनी, मध्यमा, अनामिका चेति तिसृभिः अङ्गुलीभिः कृतं तिरश्चीनं रेखात्रयं त्रिपुण्ड्रम्, तेन त्रिपुण्ड्रेण अङ्कितं मुद्रितं मस्तकं ललाटं यस्य सः, त्रिपुण्ड्राङ्कितमस्तकः, तम् । पुनः कीदृशम् ? **कटीतटीपटीभूतकन्थापटल-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बन्धुरम् । कटीतटी मध्यभागः, तत्र पटीभूता वस्त्रभूता कन्थावासः, कटीतटीपटीभूतकन्था, सा एव पटलम् आच्छादनम्, तेन बन्धुरः सुन्दरः । पुनः कीदृशम् ? **योगदण्डं भस्माधारं कमण्डलुं च दधानम्** । योगदण्डं, ध्यानसमये मणिबन्धस्याऽऽश्रयत्वेन योगिभिः ध्रियमाणः द्वादशप्रायाङ्गुलप्रमाणः उपरिभागे वृत्तार्धाकारः दण्डः, तं, **भस्माधारं** भस्माश्रयं **कमण्डलुं**, कुण्डवद्वृत्तत्वात् कुण्डी इत्यपरपर्यायं पात्रविशेषः च **दधानं** धारयन्तम् । पुनः कीदृशम् ? **शिवाद्वैतपरिज्ञानपरमानन्दमोदितम्** । शिवाद्वैतस्य परिज्ञानम् अवधानम्, परमश्चासौ आनन्दश्च परमानन्दः, शिवाद्वैतपरिज्ञानमेव परमानन्दः, तेन मोदितः हृष्टः, तम् । पुनः कीदृशम्? **निर्धूतसर्वसंसारवासनादोषपञ्जरम्** । सर्वश्च असौ संसारश्च सर्वसंसारः तस्य वासना इच्छा, सा एव दोषः, स एव पञ्जरः सर्वसंसारवासनादोष-पञ्जरः, निर्धूतः सर्वसंसारवासनादोषपञ्जरः येन सः निर्धूत....पञ्जरः, तम् । रूपकम् । पुनः कीदृशम् ? **शिवागमसुधासिन्धुसमुन्मेषसुधाकरम्** । शिवागमाः एव सुधासिन्धुः अमृतसागरः, तस्य समुन्मेषाय उच्चालनाय सुधाकरः चन्द्रः, शिवा...करः, तम् । पुनः कीदृशम् ? **चित्तारविन्दसं-गूढशिवपादाम्बुजद्वयम्** । पादौ एव अम्बुजे पादाम्बुजे, तयोः द्वयं पादाम्बुजद्वयम्, शिवस्य पादाम्बुजद्वयं, चित्तम् एवाऽरविन्दं चित्तारविन्दम्, चित्तारविन्दे मनःकमले संगूढं निलीनं शिवपादाम्बुजद्वयं यस्य सः, चित्ता...द्वयः, तम् । पुनः कीदृशम् ? **यमादियोगतन्त्रज्ञम्** । यमादियोगः, यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणम्, ध्यानम्, समाधिश्चेति अष्टाङ्गयोगः, तस्य तन्त्रं विधानं जानातीति यमादि-योगतन्त्रज्ञः, तम् । पुनः कीदृशम् ? **सर्वकर्मसु स्वतन्त्रम्** । सर्वेषु समेषु कर्मसु कार्येषु स्वतन्त्रः निरङ्कुशाधिकारवान्, तम् । पुनः कीदृशम् ? **समस्तसिद्धसन्तानसमुदायशिखामणिम्** । समस्ताः सर्वे सिद्धाः सिद्धि-मन्तः, तेषां सन्तानाः परम्पराः, तेषां समुदायः समूहः, तस्य शिरोमणिः शिरोरत्नम् समस्त...शिरोमणिः, तम् । पुनः कीदृशम् ? **वीरसिद्धान्त-निर्वाहकृतपट्टनिबन्धनम्** । वीरसिद्धान्तो वीरशैवसिद्धान्तः, तस्य निर्वाहः प्रचारः, कृतं पट्टनिबन्धनं (पट्टेन कटीतटवस्त्रेण निबन्धनं) कृतपट्ट-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निबन्धनम्, वीरसिद्धान्त निर्वाहे कृतपट्टनिबन्धनं येन सः वीर...निबन्धनः, तम्; वीरशैवसिद्धान्तप्रचारे कटिबद्धम् इत्यर्थः । पुनः कीदृशम् ? **आलोकमात्रनिर्भिन्नसमस्तप्राणिपातकम्** । यस्य आलोकमात्रेण दृष्टिपातेन केवलेन निर्भिन्नं विनष्टं समस्तानां सर्वेषां प्राणिनां जीवानां पातकं घोरपापं सः आलोकमात्र...पातकः, तम् ॥२-८॥

तमपृच्छन् जनाः सर्वे नमन्तः को भवानिति ।
इति पृष्टो महायोगी जनैर्विस्मितमानसैः ॥९॥

प्रत्युवाच शिवाद्वैतमहानन्दपरायणः ।
पिनाकिनः पार्श्ववर्ती रेणुकाख्यगणेश्वरः ॥१०॥

केनचित्कारणेनाहं शिवलिङ्गादिहाभवम् ।
नाम्ना रेणुकसिद्धोऽहं सिद्धसन्ताननायकः ॥११॥

स्वच्छन्दचारी लोकेऽस्मिन् शिवसिद्धान्तपालकः ।
खण्डयन् जैनचार्वाकबौद्धादीनां दुरागमान् ॥१२॥

इत्युक्त्वा पश्यतां तेषां विषयस्थिरचक्षुषाम् ।
उत्थाय व्योममार्गेण मलयाद्रिमुपागमत् ॥१३॥

व्याख्या— त्रिलिङ्गजानां 'को भवान्' इति प्रश्नः, रेणुकस्य उत्तरं च निरूप्येते— **तमिति** । **सर्वे जनाः** समस्ताः त्रिलिङ्गजाः **नमन्तः** नमस्कारं समर्पयन्तः सन्तः **'को भवान्'** इति तं सोमेश्वरलिङ्गात्समुद्भूतं रेणुकम् **अपृच्छन्** पृष्टवन्तः । **इति** एवं **विस्मितमानसैः** विस्मितं मानसं येषां ते विस्मितमानसाः, तैः, आश्चर्याविष्टमनोभिः **जनैः** त्रिलिङ्गजाभिः **पृष्टः** प्रश्नितः सन् **महायोगी**, महान् च असौ योगी च महायोगी, **प्रत्युवाच** प्रत्युत्तरं दत्तवान् । **शिवाद्वैतमहानन्दपरायणः**, शिवयोरद्वैतं, शिवजीवयोः सामरस्यम्, महानन्दः महान् च असौ आनन्दश्च, शिवाद्वैतम् एव महानन्दः, तस्मिन् परायणः परमासक्तः, **पिनाकिनः** पिनाकं नाम

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवस्य धनुः, पिनाकम् अस्य अस्तीति पिनाकी, तस्य पिनाकिनः, **पार्श्ववर्ती च सेवकश्च रेणुकाख्यगणेश्वरः**, रेणुकः इति आख्या नाम यस्य सः रेणुकाख्यः, रेणुकाख्यश्च असौ गणेश्वरश्च रेणुकाख्यगणेश्वरः, रेणुकानामा गणनायकः अहम् इति शेषः। **केनचित्** केनचन **कारणेन** निमित्तेन, उद्देशेन इति यावत्, अहं इह अस्मिन् क्षेत्रे **शिवलिङ्गात्** सोमेश्वरलिङ्गाद् **अभवम्** प्रादुरासम्। अहं **सिद्धसन्ताननायकः** सिद्धानां सिद्धिमतां सन्तानः परम्परा, सिद्धसन्तानस्य नायकः पुरोवर्ती नेताऽहं **नाम्ना** अभिधानेन **रेणुकसिद्धः अस्मि। अस्मिन् लोके** जगति **स्वच्छन्दचारी** स्वच्छन्देन स्वेच्छानुसारेण चरितुं शीलमस्य इति, **जैनचार्वाकबौद्धादीनां** जैनाः चार्वाकाः बौद्धाश्च, इत्यादीनां **दुरागमान्** दुष्टागमान् **खण्डयन्** निरासयन् **शिवसिद्धान्तपालकः** शिवसिद्धान्तस्य वीरशैवसिद्धान्तस्य पालकः रक्षकः। अस्मीति शेषः। **इति उक्त्वा** एवमभिधाय **विषयस्थिरचक्षुषाम्** विषये इन्द्रियार्थे स्थिराणि चक्षूंषि येषां ते विषयस्थिरचक्षुषः, तेषाम्। स्पन्दनरहितदृष्टिमताम् इत्यर्थः। तादृशां तेषां त्रिलिङ्गजानां **पश्यताम्** वीक्षतां **व्योममार्गेण** आकाशपथा **उत्थाय** ऊर्ध्वं गच्छन् **मलयाद्रिं** मलयपर्वतं प्रति **उपागमत्** प्रस्थितवान् ॥९-१३॥

मलयाद्रिवर्णनम्

नवचन्दनकान्तारकन्दलन्मन्दमारुतम्।
अभङ्गुरभुजङ्गस्त्रीसंगीतरससंकुलम् ॥१४॥

करिपोतकराकृष्टस्फुरदेलातिवासितम्।
वराहदंष्ट्रिकाध्वस्तमुस्तासुरभिकन्दरम् ॥१५॥

पटीरदलपर्यङ्कप्रसुप्तव्याधदम्पतिम्।
माधवीमल्लिकाजातीमञ्जरीरेणुरञ्जितम् ॥१६॥

व्याख्या— मलयाद्रिं वर्णयति— नवेति। (रेणुकः) 'मलयाद्रिमुपागमत्' इत्यनेन सम्बन्धः। कीदृशं मलयाद्रिम्? **नवचन्दनकान्तारकन्दलन्मन्द-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मारुतम् । नवानां प्रत्यग्राणां चन्दनानां चन्दनतरूणां कान्तारं काननं तत् कन्दलत् छेदनक्षमो मन्दमारुतः यस्मिन् सः नव...मारुतः, तम् । पुनः कीदृशम् ? **अभङ्गुरभुजङ्गस्त्रीसंगीतरससङ्कुलम्** । अभङ्गुरा अतिगाढाः भुजङ्गानां स्त्रियः सर्पयोषितः, तासां संगीतस्य गान्धर्वस्य रसेनाऽऽस्वादेन सङ्कुलः भरितः भुजङ्ग....सङ्कुलः, तम् । पुनः कीदृशम् ? **करिपोतकराकृष्ट-स्फुरदेलातिवासितम्** । करिपोतः गजकलभः, तस्य करेण शुण्डेनाऽऽकृष्टा बलादाकृष्टा स्फुरन्ती च ज्वलन्ती च एला एलालता, तया अतिवासितः अतिसुरभीकृतः करिपोत....वासितः, तम् । पुनः कीदृशम् ? **वराह-दंष्ट्रिकाध्वस्तमुस्तासुरभिकन्दरम्** । वराहस्य दंष्ट्रिकया ध्वस्ता उत्खाता मुस्ता भद्रमुस्ता, तया सुरभीणि सुगन्धितानि कन्दराणि सानुप्रदेशा यस्मिन् सः वराह....कन्दरः, तम् । पुनः कीदृशम् ? **पटीरदलपर्यङ्कप्रसुप्त-व्याधदम्पतिम्** । पटीरदलानां गन्धपत्राणां पर्यङ्के प्रसुप्तौ व्याधदम्पती किरातमिथुनं यस्मिन् सः पटीर....दम्पतिः, तम् । पुनः कीदृशम् ? **माधवीमल्लिकाजातीमञ्जरीरेणुरञ्जितम्** । माधवी च मल्लिका च जाती च माधवीमल्लिकाजातयः, तासां मञ्जर्यः गुच्छाः, तासां रेणुभिः धूलिभिः रञ्जितः वर्णमयीकृतः माधवी....रञ्जितः, तम् ॥१४-१६॥

अगस्त्याश्रमवर्णनम्

तत्र कुत्रचिदाभोगे सर्वर्तुकुसुमद्रुमे ।
अपश्यदाश्रमं दिव्यमगस्त्यस्य महामुनेः ॥१७॥

मन्दारचन्दनप्रायैर्मण्डितं तरुमण्डलैः ।
शाखाशिखरसंलीनतारकागणकोरकैः ॥१८॥

मुनिकन्याकरानीतकलशाम्बुविवर्धितैः ।
आलवालजलास्वादमोदमानमृगीगणैः ॥१९॥

हेमारविन्दनिष्यन्दमकरन्दसुगन्धिभिः ।
मरालालापवाचालुवीचिमालामनोहरैः ॥२०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इन्दीवरवरज्योतिरन्धीकृतहरिन्मुखैः ।
लोपमुद्रापदन्यासचरितार्थतटाङ्कितैः ॥२१॥

हारनीहारकर्पूरहरहासामलोदकैः ।
नित्यनैमित्तिकस्नाननियमार्थैस्तपस्विनाम् ॥२२॥

प्रकृष्टमणिसोपानैः परिवीतं सरोवरैः ।
विमुक्तसत्त्ववैरस्यं ब्रह्मलोकमिवापरम् ॥२३॥

हूयमानाज्यसन्तानधूमगन्धिमहास्थलम् ।
शुकसंसत्समारब्धश्रुतिशास्त्रोपबृंहणम् ॥२४॥

व्याख्या— अगस्त्याश्रमवर्णनं कुरुते— **तत्रेति** । **तत्र** मलयाद्रौ **सर्वर्तुकुसुमद्रुमे** सर्वे ऋतवः वसन्तादयः, तेषु, कुसुमवन्तः पुष्पिताः द्रुमाः वृक्षाः, सर्वर्तुषु कुसुमद्रुमाः यस्मिन् सः सर्वर्तु....द्रुमः, तस्मिन्, **कुत्रचित्** कस्मिंश्चिद् **आभोगे** प्रदेशे **अगस्त्यस्य महामुनेः**, महांश्च असौ मुनिश्च महामुनिः, तस्य, **दिव्यं** मनोहरम् **आश्रमम् अपश्यत्** ददर्श । कीदृशम् आश्रमम् ? **शाखाशिखरसंलीनतारकागणकोरकैः मन्दारचन्दनप्रायैः तरुमण्डलैः मण्डितम्** । शाखाया शिखरं शाखाशिखरं शाखाग्रम्, तत्र संलीनाः संलग्नाः तारकाणां नक्षत्राणां गणाः समूहा एव कोरकाणि येषु ते शाखा...कोरकाः, तैः, मन्दारश्च चन्दनश्च मन्दारचन्दनौ, तयोः आधिक्यं मन्दारचन्दनप्रायं येषु ते, मन्दार...प्रायाः, तैः, तरुमण्डलैः, तरूणां मण्डलैः वृक्षाणां समूहैः मण्डितं सुशोभितम् । पुनः कैः मण्डितम् ? **मुनिकन्या-करानीतकलशाम्बुविवर्धितैः आलवालजलास्वादमोदमानमृगीगणैः** । मुनीनां कन्याः मुनिकन्याः, कलशानां घटानाम् अम्बूनि कलशाम्बूनि कलश-जलानि, मुनिकन्यानां करैः आनीतानि कलशाम्बूनि, तैः विवर्धितैः पोषितैः, आलवालानां जलानि, तेषाम् आस्वादेन पानेन मोदमानैः मृगीणां गणैश्च मण्डितः शोभमानः, तम् । पुनः कीदृशम् ? **सरोवरैः परिवीतम्** । सरोवरैः सरोभिः परिवीतः परिवृतः, तम् । कीदृशैः सरोवरैः ?

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

हेमारविन्दनिष्यन्दमकरन्दसुगन्धितैः । हेमारविन्दानि हेमवर्णानि अरविन्दानि, स्वर्णकमलानि, तेषां निष्यन्दः, हेमारविन्दनिष्यन्दश्च असौ मकरन्दश्च हेमारविन्दनिष्यन्दमकरन्दः, तेन सुगन्धितैः सुवासितैः । पुनः कीदृशैः ? **मरालालापवाचालुवीचिमालामनोहरैः** । मरालानाम् आलापः हंसानां निनादः, तेन वाचालवः अनुरणन्त्यः वीचीनां मालाः वीचिमालाः तरङ्गसरण्यः, ताभिः मनोहरैः । पुनः कीदृशैः ? **इन्दीवरवरज्योतिरन्धीकृतहरिन्मुखैः** । इन्दीवराणि नीलकमलानि, तेषां ज्योतिः प्रकाशः (नीलद्युतिः) तेन अन्धीकृतानि आच्छादितानि हरितां दिशानां मुखानि केन्द्राणि हरिन्मुखानि यैः तानि इन्दीवर....मुखानि, तैः । पुनः कीदृशैः ? **लोपामुद्रापदन्यासचरितार्थतटाङ्कितैः** । लोपामुद्रायाः अगस्त्यपत्न्याः पदन्यासेन पदाभ्यां सञ्चारेण चरितार्थानि कृतकृत्यानि सार्थक्यभावयुक्तानि तटानि, तैः अङ्कितैः शोभितैः । पुनः कीदृशैः ? **हारनीहारकर्पूरहरहासामलोदकैः** । हारश्च माला च नीहारश्च हिमश्च, कर्पूरश्च, हरहासश्च हारनीहारकर्पूरहरहासाः तद्वत् अमलं शुभ्रम् उदकं जलं येषां तानि हार...उदकानि, तैः । पुनः कीदृशैः ? **तपस्विनां नित्यनैमित्तिकस्नाननियमार्थैः** । तपस्विनां तपोनिरतानां नित्यं च नैमित्तिकं च नित्यनैमित्तिके नित्यनैमित्तिके च ते स्नाने नित्यनैमित्तिकस्नाने प्रत्यहं नित्यविधित्वेन स्नानम् पार्वणादिनिमित्तं च नैमित्तिकस्नानं च, तयोः नियमः अर्थः उद्देशो येषां तानि नित्य....नियमार्थानि, तैः । पुनः कीदृशैः ? **प्रकृष्टमणिसोपानैः** । प्रकृष्टा उत्कृष्टाः, बहुमूल्या इति यावत्, मणयः रत्नानि, तन्मयानि सोपानानि येषां तानि प्रकृष्ट....सोपानानि, तैः । पुनः कीदृशम् आश्रमम् ? **विमुक्तसत्त्ववैरस्यं ब्रह्मलोकमिवापरम्** । विमुक्तं त्यक्तं सत्त्वानां प्राणिनां वैरस्यं वैरं यस्मिन् सः, तम् । अतः अपरं ब्रह्मलोकमिव । अन्यतः ब्रह्मलोकः इव, तम् । पुनः कीदृशम् ? **हूयमानाज्यसन्तानधूमगन्धिमहास्थलम्** । हूयमानस्य आज्यस्य समर्प्यमाणस्य घृतस्य सन्तानं निरन्तरधारा, हूयमानाज्यसन्तानस्य धूमः, तस्य गन्धः सुरभिः अस्य अस्तीति हूय....गन्धि, महच्च तत् स्थलं च महास्थलम्, हूयमानाज्यसन्तानधूमगन्धि च तत् महास्थलं च हूय....महास्थलम्, तत् । पुनः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कीदृशम् ? शुकसंसत्समारब्धश्रुतिशास्त्रोपबृंहणम् । शुकानां सारिकानां संसत् समावेशः शुकसंसत्, तस्याम् आरब्धानि आरभमाणानि, श्रुतिश्च शास्त्राणि च श्रुतिशास्त्राणि, वेदपठनं शास्त्रचर्चा चेत्यर्थः, तेषाम् उपबृंहणम् अनुरणनं यस्मिन् सः, तम् ॥१७-२४॥

अगस्त्यमुनिवर्णनम्

तस्य मध्ये समासीनं मूले चन्दनभूरुहः ।
सुकुमारदलच्छायादूरितादित्यतेजसः ॥२५॥

तडित्पिङ्गजटाभारैस्त्रिपुण्ड्राङ्कितमस्तकैः ।
भस्मोद्धूलितसर्वाङ्गैः स्फुरद्रुद्राक्षभूषणैः ॥२६॥

नववल्कलवासोभिर्नानानियमधारिभिः ।
परिवीतं मुनिगणैः प्रमथैरिव शङ्करम् ॥२७॥

समुज्ज्वलजटाजालैस्तपःपादपपल्लवैः ।
स्फुरत्सौदामिनीकल्पैर्ज्वालाजालैरिवानलम् ॥२८॥

विशुद्धभस्मकृतया त्रिपुण्ड्राङ्कितरेखया ।
त्रिस्रोतसेव सम्बद्धशिलाभागं हिमाचलम् ॥२९॥

भस्मालङ्कृतसर्वाङ्गं शशाङ्कमिव भूगतम् ।
वसानं वल्कलं नव्यं बालातपसमप्रभम् ॥३०॥

वडवाग्निशिखाजालसमालीढमिवार्णवम् ।
सर्वासामपि विद्यानां समुदायनिकेतनम् ॥३१॥

न्यक्कृतप्राकृताहन्तं निरूढशिवभावनम् ।
तृणीकृतजगज्जालं सिद्धीनामुदयस्थलम् ॥३२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मोहान्धकारतपनं मूलबोधमहीरुहम् ।
ददर्श स महायोगी मुनिं कलशसंभवम् ॥३३॥

व्याख्या— अथागस्त्यमुनिं वर्णयति— **तस्य मध्ये** इत्यादिना । **तस्य** तस्याऽऽश्रमस्य **मध्ये** मध्यभागे स **महायोगी** रेणुकः **चन्दनभूरुहः** चन्दनवृक्षस्य मूलेऽधस्तात् **समासीनम्** समुपविष्टं **कलशसंभवं मुनिं** कुम्भोद्भवं तपस्विनम्, अगस्त्यम् इति यावत्, **ददर्शाऽपश्यत्** । कीदृशस्य चन्दनवृक्षस्य ? **सुकुमारदलच्छायादूरितादित्यतेजसः** । सुकुमाराणां मृदूनां दलानां पत्राणां छायया दूरितं दूरीकृतम् आदित्यस्य सूर्यस्य तेजः आतपः येन सः सुकुमार...तेजाः, तस्य । कीदृशं मुनिं ददर्श ? **पमथैरिव शङ्करं मुनिगणैः परिवीतम्** । प्रमथैः प्रमथगणैः शङ्करं परमेश्वरम् इव मुनिगणैः तपस्विगणैः परिवीतं परिवृतम् । कीदृशैः मुनिगणैः परिवीतम् ? **तडित्पिङ्गजटाभारैः** । तडिदिव विद्युदिव पिङ्गलः धूम्रवर्णः जटाभारः कपर्दजालः येषां ते तडित्...भाराः, तैः । पुनः कीदृशैः ? **त्रिपुण्ड्राङ्कित-मस्तकैः** । त्रिपुण्ड्रेण भस्मत्रिरेखयाऽङ्कितः भूषितः मस्तकः ललाटः यैस्ते त्रिपुण्ड्र...मस्तकाः, तैः । पुनः कीदृशैः ? **भस्मोद्धूलितसर्वाङ्गैः** । भस्मना भसितेन उद्धूलितं उद्वर्तितं सर्वाङ्गं सर्वशरीरं यैः ते भस्मो...सर्वाङ्गाः, तैः । पुनः कीदृशैः ? **स्फुरद्रुद्राक्षभूषणैः** । स्फुरन्तः कम्पमानाः रुद्राक्षाः रुद्रनेत्रभवाः एव भूषणानि आभरणानि येषां ते स्फुरद्...भूषणाः, तैः । पुनः कीदृशैः ? **नववल्कलवासोभिः** । नवं प्रत्यग्रं वल्कलं वृक्षत्वग् वासः वस्त्रं येषा ते नव...वाससः, तैः । पुनः कीदृशैः ? **नानानियम-धारिभिः** । नाना विविधाः नियमाः, शरीरभिन्नैः बाह्यसाधनैः क्रिय-माणाः क्रियाः, "नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम्" इत्यमरः (२.४५५), तान् धर्तुं अनुसर्तुं शीलमासामिति नाना...धारिणः, तैः । पुनः कीदृशम् ? **अनलम् इव** । अनलम् अग्निमिव । कैः ? **ज्वालाजालैः** । ज्वालानां अग्निशिखानां जालैः समूहैः । कीदृशैः ज्वालाजालैः ? **तपःपादप-पल्लवैः समुज्ज्वलजटाजालैः** । तपः एव पादपः वृक्षः तपःपादपः, तस्य पल्लवैः किसलयैः, तादृशैः, समुज्ज्वलन्तः प्रकाशमानाः जटानां जालाः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सटानां समूहाः येषां ते समुज्ज्वलजटाजालाः, तैः । पुनः कीदृशैः ? **स्फुरत्सौदामिनीकल्पैः ।** स्फुरन्ती स्पन्दनशीला सौदामिनी विद्युत् तत्कल्पैः तत्सदृशैः । पुनः कीदृशम् ? **विशुद्धभस्मकृतया त्रिपुण्ड्राङ्कितरेखया त्रिस्रोतसा सम्बद्धशिलाभागं हिमाचलमिव ।** विशुद्धभस्मना निर्मलभसितेन कृतया रचितया त्रिपुण्ड्रेण तर्जनीमध्यमाऽनामिकाख्यत्र्यङ्गुलीचिह्नेनाऽङ्कितया रेखया, त्रिस्रोतसा त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः, तया, स्वर्गमर्त्यपातालगतप्रवाहत्रयशालिन्या गङ्गया सम्बद्धशिलाभागः सम्बद्धः सम्पर्कयुक्तः शिलानां भागः यस्य सः, तादृशः हिमाचलः हिमाद्रिः, तम् इव । उपमा । पुनः कीदृशम् ? **भस्मोद्धूलितसर्वाङ्गम् ।** भस्मना भसितेन उद्धूलितं उद्धूलनीकृतं सर्वाङ्गं येन सः, तादृशम्, तस्मादेव भूगतं भूमाववतरितं शशाङ्कं चन्द्रम् इव । उपमा । पुनः कीदृशम् ? **बालातपसमप्रभं नव्यं वल्कलं वसानम् ।** बालातपः अरुणातपः तेन समा सदृशा प्रभा यस्य सः, तम्, नव्यं नवीनं वल्कलं वृक्षत्वङ्निर्मितवस्त्रं वसानं ध्रियमाणम् । उपमा । पुनः कीदृशम् ? **वडवाग्निशिखाजालसमालीढमिवार्णवम् ।** वडवाग्निः समुद्राग्निः तस्य शिखाजालेन ज्वालासमूहेन समालीढं व्याप्तम् अर्णवं समुद्रम् इव । उपमा । पुनः कीदृशम् ? **सर्वासामपि विद्यानां समुदायनिकेतनम् ।** सर्वासामपि सकलानामपि विद्यानां शास्त्राणां समुदायस्य समूहस्य निकेतनं वासस्थानम् । पुनः कीदृशम् ? **न्यक्कृतप्राकृताहन्तम् ।** न्यक्कृता तिरस्कृता प्राकृता प्रकृतिजन्या अहन्ता अहंकारः येन सः न्यक्कृत...हन्तः, तम् । पुनः कीदृशम् ? **निरूढशिवभावनम् ।** शिवस्य भावना स्वरूपकल्पना शिवभावना, निरूढा शिवभावना यस्मिन् सः निरूढशिवभावनः, तम् । पुनः कीदृशम् ? **तृणीकृतजगज्जालम् ।** अतृणं तृणं सम्पद्यमानं कृतं तृणीकृतम्, [अभूततद्भावे च्विः, "अभूततद्भाव इति वक्तव्यम्" (वार्तिकम्, सि.कौ; सू.२११७), "च्वौ च" (सि.कौ; सू.२१२०) इति पूर्वस्य दीर्घः], जगतां जालम् जगज्जालं लोकसमुदायः, तृणीकृतं जगज्जालं येन सः तृणीकृतजगज्जालः तम् । पुनः कीदृशम् ? **सिद्धीनामुदयस्थलम् ।** सिद्धीनाम्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अणिमाद्यष्टसिद्धीनाम् उदयस्थलम् उत्पत्तिस्थानम् । पुनः कीदृशम् ? **मोहान्धकारतपनम्** । मोहः एव अन्धकारः, तस्य तपनम् प्रकाशयितारम्, निवारकमित्यर्थः । पुनः कीदृशम् ? **मूलबोधमहीरुहम्** । मूलबोधः स्वरूपज्ञानं तस्य महीरुहं भूरुहम् । तादृश कलशसम्भवं ददर्श इत्यन्वयं पूर्वमेव दत्तम् ॥२५-३३॥

अगस्त्येन रेणुकसत्कारः, तं प्रति रेणुकवचनं च

समागतं महासिद्धं समीक्ष्य कलशोद्भवः ।
गणेन्द्रं रेणुकाभिख्यं विवेद ज्ञानचक्षुषा ॥३४॥

तस्यानुभावं विज्ञाय सहसैव समुत्थितः ।
लोपामुद्राकरानीतैरुदकैरतिपावनैः ॥
पादौ प्रक्षालयामास स तस्य शिवयोगिनः ॥३५॥

संपूज्य तं यथाशास्त्रं तन्नियोगपुरस्सरम् ।
मुनिर्विनयसम्पन्नो निषसादासनान्तरे ॥३६॥

समासीनं मुनिवरं सर्वतेजस्विनां विभुम् ।
उवाच शान्तया वाचा रेणुकः सिद्धशेखरः ॥३७॥

व्याख्या— अथागस्त्येन कृतं रेणुकसत्कारं वर्णयति— **समागतमिति**। **समागतं** संप्राप्तं **महासिद्धं**, महान् च असौ सिद्धश्च महासिद्धः, तम्, **समीक्ष्य** संवीक्ष्य **कलशोद्भवः** कुम्भोद्भवोऽगस्त्यः **ज्ञानचक्षुषा**, ज्ञानमेव चक्षुः ज्ञानचक्षुः, तेन तं **रेणुकाभिख्यं** रेणुक इत्यभिख्याऽभिधानं यस्य सः, तम्, **गणेन्द्रं** गणनायकं **विवेद** विज्ञातवान् । **तस्य अनुभावं** तस्य रेणुकस्य महिमानं **विज्ञाय** ज्ञात्वा **सहसा एव** शीघ्रमेव **समुत्थितः** उत्तिष्ठन् सोऽगस्त्यः **लोपामुद्राकरानीतैः** लोपामुद्रायाः स्वपत्न्याः कराभ्याम् आनीतै प्रापितैः **अतिपावनैः** अत्यन्तं पवित्रैः **उदकैः** वारिभिः **तस्य शिवयोगिनः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्य शिवाचार्यस्य रेणुकस्य **पादौ** चरणौ **प्रक्षालयामास** धावयामास । **तं** रेणुकाचार्यं **यथाशास्त्रं** शास्त्रमनतिक्रम्य, शास्त्रानुसारम् इत्यर्थः, **संपूज्य** समभ्यर्च्य, **विनयसम्पन्नः** अनुशासनयुक्तः **तन्नियोगपुरःसरं** तस्याऽऽज्ञानुसारं **आसनान्तरे** अन्यस्मिन्नासने **निषसाद** उपविष्टवान् । **समासीनम्** उपविष्टम् **सर्वतेजस्विनां** सर्वेषां तेजःसम्पन्नानां **विभुं** प्रभुं **मुनिवरं** मुनिश्रेष्ठम् **अगस्त्यं प्रति सिद्धशेखरः** सिद्धानां शिरोभूषणं **रेणुकः** रेणुकाचार्यः **शान्तया वाचा** सौम्यवाक्येन **उवाच** जगाद ॥३४-३७॥

निर्विघ्नं वर्तसे किं नु नित्या ते नियमक्रिया ।
अथ वाऽगस्त्य तेजस्विन् कुतः स्युस्तेऽन्तरायकाः ॥३८॥

विन्ध्यो निरुद्धो भवता विश्वोल्लङ्घनविभ्रमः ।
नहुषो रोषलेशात् ते सद्यः सर्पत्वमागतः ॥३९॥

आचान्ते भवता पूर्वं पङ्कशेषाः पयोधयः ।
जीर्णस्ते जाठरे वह्नौ दृप्तो वातापिदानवः ॥४०॥

एवंविधानां चित्राणां सर्वलोकातिशायिनाम् ।
कृत्यानां तु भवान् कर्ता कस्तेऽगस्त्य समप्रभः ॥४१॥

शिवाद्वैतपरानन्दप्रकाशनपरायणम् ।
भवन्तमेकं शंसन्ति प्रकृत्या सङ्गवर्जितम् ॥४२॥

पुरा हैमवतीसूनुरवदत् ते षडाननः ।
शिवधर्मोत्तरं नाम शास्त्रमीश्वरभाषितम् ॥४३॥

भक्तिः शैवी महाघोरसंसारभयहारिणी ।
त्वया राजन्वती लोके जाताऽगस्त्य महामुने ॥४४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— अथ श्रीरेणुकोऽगस्त्यं कुशलप्रश्नपूर्वकं प्रस्तौति— **निर्विघ्नमिति । निर्विघ्नं** विघ्नो यथा न भवति तथा, **वर्तसे** भवसि ? **किं नु** किं वा **ते नियमक्रियाः** नियमाचारा **नित्या** निरातङ्काः ? **अथवा** हे **अगस्त्य** हे **तेजस्विन्** प्रभावशालिन् **ते** तुभ्यम् **अन्तरायकाः** विघ्नकारिणः **कुतः** कुतस्त्याः ? **भवता विश्वोल्लङ्घनविभ्रमः** विश्वस्योल्लङ्घनं लोकस्य अतिक्रमणम्, विश्वोल्लङ्घनस्य विभ्रमः भ्रान्तिः यस्य सः, तादृशः, **विन्ध्यः** विन्ध्यपर्वतः **निरुद्धः** नियन्त्रितः (नम्रीकृतः) । **ते** तव **रोषलेशात्** ईषदिव क्रोधात् **नहुषः सद्यः** एव क्षणादेव **सर्पत्वमागतः** सर्पतामभजत ॥ **पूर्वं** पुरा **भवता आचान्ते** आचमने कृते **पयोधयः** समुद्राः **पङ्कशेषाः** पङ्कमेव शेषः येषां ते पङ्कशेषाः निर्जलाः, अभवन् इति शेषः । **ते** तव **जाठरे वह्नौ** जठराग्नौ **दृप्तः** गर्वितः **वातापिदानवः** वातापिनामा राक्षसः **जीर्णः** जीर्णतां गतः ॥ **एवंविधानां** एतादृशानां **सर्वलोकातिशायिनां** सर्वान् लोकानतिशेतुं शीलमासाम् इति सर्वलोकातिशायिनः समस्तलोकातीताः, तेषाम्, **चित्राणां** विस्मयकराणां **कृत्यानां** कार्याणां **कर्ता** कर्तृभूतः । हे **अगस्त्य ते** तव **समप्रभः** समाना प्रभा यस्य सः, समानप्रभावः कः ? कोऽपि नास्तीत्यर्थः ॥ **शिवाद्वैतपरानन्दप्रकाशनपरायणम्**, शिवयोः अद्वैतं शिवाद्वैतम् (शिवः = परमात्मा, जीवः = शिवांशभूतः जीवात्मा च, तयोरद्वैतं सामरस्यात्मकम् ऐक्यम्), तस्य परानन्दः परमानन्दः, तस्य प्रकाशनेऽभिव्यक्तौ परायणं तत्परम्, **प्रकृत्याः सङ्गवर्जितम्** प्रकृतिसम्बन्धवर्जितम्, चेति **भवन्तम् एकम्** एकमेव **शंसन्ति** प्रशंसन्ति ॥ **पुरा** पूर्वं **हैमवतीसूनुः** हैमवत्याः पार्वत्याः सूनुः पुत्रः **षडाननः** [षड् अननानि यस्य सः] षण्मुखः **ते** तुभ्यं **शिवधर्मोत्तरं नाम ईश्वरभाषितम्**, ईश्वरेण भाषितम्, परमेश्वरोक्तं **शास्त्रम्** अवदत् उपादिदेश ॥ हे **अगस्त्य महामुने** महातपस्विन्, **महाघोरसंसारभयहरिणी** महाघोरः अत्यन्तदारुणः संसारः जननमरणचक्रः, तस्य भयं हर्तुं शीलमस्याः इति महाघोरसंसारभयहारिणी, तादृशी **शैवी भक्तिः** शिवसम्बन्धिनी भक्तिः **त्वया** भवता **लोकेऽस्मिन्** विश्वे **राजन्वती जाता** प्रकाशमाना बभूव, प्रसिद्धिं गता राजवैभवयुक्ता जाता इत्यर्थः ॥३८-४४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अथागस्त्यमुनिवचनम्

इति तस्य वचः श्रुत्वा सिद्धस्य मुनिपुङ्गवः ।
गम्भीरगुणया वाचा बभाषे भक्तिपूर्वकम् ॥४५॥

अहमेव मुनीन्द्राणां लालनीयोऽस्मि सर्वदा ।
भवदागमसम्पत्तिर्मां विना कस्य संभवेत् ॥४६॥

स्थिरमद्य शिवज्ञानं स्थिरा मे तापसक्रिया ।
भवद्दर्शनपुण्येन स्थिरा मे मुनिराजता ॥४७॥

संसारसर्पदष्टानां मूर्च्छितानां शरीरिणाम् ।
कटाक्षस्तव कल्याणं समुज्जीवनभेषजम् ॥४८॥

समस्तलोकसन्दाहतापत्रयमहानलः ।
त्वत्पदाम्बुकणास्वादादुपशाम्यति देहिनाम् ॥४९॥

रेणुकं त्वां विजानामि गणनाथं शिवप्रियम् ।
अवतीर्णमिमां भूमिं मदनुग्रहकाङ्क्षया ॥५०॥

भवादृशानां सिद्धानां प्रबोधध्वस्तजन्मनाम् ।
प्रवृत्तिरीदृशी लोके परानुग्रहकारिणी ॥५१॥

त्वन्मुखाच्छ्रोतुमिच्छामि सिद्धान्तं श्रुतिसंमतम् ।
सर्वज्ञ वद मे साक्षाच्छैवं सर्वार्थसाधकम् ॥५२॥

सद्यः सिद्धिकरं पुंसां सर्वयोगीन्द्रसेवितम् ।
दुराचारैरनाघ्रातं स्वीकृतं वेदवेदिभिः ॥
शिवात्मैक्यमहाबोधसम्प्रदायप्रवर्तकम् ॥५३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उक्त्वा भवान् सकललोकमहोपकारं
सिद्धान्तसंग्रहमनादृतबाह्यतन्त्रम् ।
सद्यः कृतार्थयितुमर्हति दिव्ययोगिन्
नानागमश्रवणवर्तिततसंशयं माम् ॥५४॥

इति श्रीवीरमाहेश्वराचार्य-शिवयोगि-विरचिते वेदागम-पुराणादिसारभूते श्रीसिद्धान्तशिखामणौ श्रीरेणुकागस्त्यदर्शनप्रसङ्गो नाम चतुर्थः परिच्छेदः समाप्तः ॥४॥

व्याख्या— अथाऽगस्त्य रेणुकदर्शनेन स्वीयां कृतकृत्यतां प्रकटयति— **इतीति** । **इति** एवं **तस्य सिद्धस्य** सिद्धिमतः रेणुकस्य **वचो** वचनं **श्रुत्वा**ऽऽकर्ण्य **मुनिपुङ्गवः**, मुनिः पुङ्गव इव, "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (पा.अ.,२.१.५६) इत्युपमितसगासः, मुनिश्रेष्ठः इत्यर्थः, भक्तिपूर्वकं भक्तिपुरस्सरं **गम्भीरगुणया** गम्भीरं गभीरं गुणः यस्या सा गम्भीरगुणा, तया, **वाचा** उक्त्या **बभाषे** भाषयामास । किं बभाषे ? उच्यते— **अहमेव** अहमेक एव **मुनीन्द्राणां** मुनिश्रेष्ठाऩां मध्ये **सर्वदा लालनीयः** लालनार्हः प्रशंसनीयः अस्मि । **मां विना** मां विहाय **कस्य भवदागमसम्पत्तिः**, भवतः आगमः आगमनम्, तदेव संपत्तिः सौभाग्यं, तत् **संभवेत्** सम्पद्येत । न कस्यापीत्यर्थः ॥ **अद्य** इदानीं **भवद्दर्शनपुण्येन**, भवतः दर्शनं भवद्दर्शनं, तस्य पुण्येन, **मे शिवज्ञानं** शिवस्वरूपविज्ञानं **स्थिरम्** दृढं जातम् **मे तापसक्रिया** तपःसम्बन्धिचर्या **स्थिरा** दृढा जाता, **मे मुनिराजता**, मुनीना राजा मुनिराजः, "राजाहःसखिभ्यष्टच्" (पा.अ., ५.४.९१) इति टच् (अ), मुनिश्रेष्ठः इत्यर्थः, मुनिराजस्य भावः मुनिराजता, सापि **स्थिरा** दृढा सञ्जाता ॥ **तव कटाक्षः** भवदीय-कृपादृष्टिरिति यावत्, **संसारसर्पदष्टानां** संसारः एव सर्पः जनन-मरणचक्रमेव भुजंगः, तेन दष्टानाम् दंशितानां, **मूर्च्छितानां** मोहं गतानां **शरीरिणां** प्राणिनां, मनुष्याणामिति यावत्, **कल्याणं** शुभकरं **समुज्ञीवनभेषजम्**, समुज्ञीवनं पुनश्चेतनं तस्य भेषजं औषधम्, सञ्जीविनी

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लता इति यावत् ॥ **त्वत्पादाम्बुकणास्वादात्** भवतः पादोदकबिन्दुनः आस्वादात् स्वीकारात् **देहिनां** शरीरिणां **समस्तलोकसन्दाहतापत्रय-महानलः,** समस्तः समग्रः लोकः विश्वम्, तस्य सन्दाहः दहनशीलं तापत्रयम्, आध्यात्मिकाधिभौतिकाधिदैविकाख्य-तापत्रितयं, तदेव महानलः महानग्निः, **उपशाम्यति** शान्तिं गच्छति ॥ अथ तं रेणुकमित्यभिज्ञाय स्ववचनमन्ववर्तत— **रेणुकमिति** । अहं **गणनाथं** गणनायकं **शिवप्रियं** शिववल्लभं **मदनुग्रहकाङ्क्षया,** मह्यम् अनुग्रहः उपकारः मदनुग्रहः, तस्य काङ्क्षया चिकीर्षया, **इमां भूमिं पृथिवीम् अवतीर्णम्** आगतं **त्वां** भवन्तं **रेणुकं विजानामि** रेणुक इति ज्ञातवानस्मि ॥ **भवादृशानां** युष्मादृशानां **प्रबोधध्वस्तजन्मनां,** प्रबोधेन सम्यज्ज्ञानेन ध्वस्तं नष्टं जन्मपुनर्जननं येषांते प्रबोध...जन्मानः, तेषाम्, **सिद्धानां** सिद्धिमतां **लोके** विश्वे **प्रवृत्तिः** जीवनरीतिः, **ईदृशी** एतादृशी **परानुग्रहकारिणी,** परेषाम् अनुग्रहं कर्तुं शीलम् अस्या इति, तथा भवतीति शेषः ॥ **श्रुतिसंमतं** वेदसंमतं वेदानुसारि, **सिद्धान्तं** दर्शनम्, **त्वन्मुखात्** तव वदनात् **श्रोतुमिच्छामि** शुश्रूषुः अस्मि । हे **सर्वज्ञ** सर्ववित्, **साक्षात्** स्वानुभवगोचरत्वेन **सर्वार्थ-साधकं** सर्वफलप्रदायकं **शैवं** वीरशैवसिद्धान्तं **मे** मह्यं **वद** कथय ॥ कीदृशं सिद्धान्तम् ? **पुंसां सद्यः सिद्धकरम्** । पुंसां मनुष्याणां सद्यः क्षणादेव सिद्धिकरं सिद्धिप्रदायकम् । पुनः कीदृशम् ? **सर्वयोगीन्द्रसेवितम्** । सर्वैः योगीन्द्रैः योगिश्रेष्ठैः सेवितम् आश्रितम् । पुनः कीदृशम् ? **दुराचारै-रनाघ्रातम्** । दुराचारैः, दुष्टः आचारः येषां ते दुराचाराः, तैः, अनाघ्रातम् अननुसृतम् (अस्वीकृतम्) । पुनः कीदृशम् ? **वेदवेदिभिः स्वीकृतम्** । वेदवेदिभिः वेदं विदन्तीति वेदविदः वेदज्ञानिनः, तैः, स्वीकृतम् आश्रितम् । पुनः कीदृशम् ? **शिवात्मैक्यमहाबोधसम्प्रदायप्रवर्तकम्** । शिवात्मैक्यं शिव-जीवैक्यं सामरस्यात्मकः लोलीभावः, तस्य महाबोधः तस्य ज्ञानम्, महावाक्यानां ज्ञानम् इति यावत्, तस्य सम्प्रदायः परम्परा प्रवर्तयतीति, तादृशम् शिवसिद्धान्तं वद इति रेणुकं प्रत्यगस्त्यस्य संप्रार्थना ॥ अगस्त्यः स्ववचनमुपसंहरति— **उक्त्वेति** । हे **दिव्ययोगिन्** देवतपस्विन् **सकललोकमहोपकारम्,** सकलः सर्वः लोकः विश्वं, महांश्च

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

असौ उपकारश्च महोपकारः महदनुग्रहः सकललोकस्य महोपकारं करोतीति सकललोकमहोपकारः, **अनादृतबाह्यतन्त्रम्**, न आदृतं न स्वीकृतम्, बाह्यं च तत् तन्त्रं च बाह्यतन्त्रं येन तत्, **सिद्धान्तसंग्रहम्** सिद्धान्तसारम् **उक्त्वा** कथयित्वा **भवान्**, **नानागमश्रवणवर्तितसंशयं** नानागमाः विविधागमाः, तेषां श्रवणेनाऽऽकर्णनेन वर्तितः जनितः संशयः यस्य सः नाना...संशयः, तम्, **मां कृतार्थयितुं** कृतार्थं कर्तुम् **अर्हसि** समर्थोऽसि । अत्र वसन्ततिलकावृत्तम् । तल्लक्षणम्— उक्ता वसन्त-तिलका तभजाः जगौ गः (आप्टे, पृ. ६५३) — – – ∪ (तगण), – ∪ ∪ (भगण), ∪ – ∪ (जगण), ∪ – ∪ (जगण), ग (गुरु), ग (गुरु) ॥४५-५४॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेवृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
चतुर्थः परिच्छेदः समाप्तः ॥४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चमः परिच्छेदः

भक्तस्थले पिण्डपिण्डज्ञानसंसारहेयस्थलप्रसङ्गः

व्याख्या— अथागस्त्यवचनं श्रुत्वा वीरशैवसिद्धान्तप्रचारायैव भूतलमागतो रेणुकगणेश्वरः क्षणमेकाग्रमनसा परमात्मानं ध्यात्वाऽगस्त्यमुद्दिश्य तत्सिद्धान्तं बोधयितुं प्रचक्रमे ।

अथागस्त्यवचः श्रुत्वा रेणुको गणनायकः ।
ध्यात्वा क्षणं महादेवं साम्बमाह समाहितः ॥१॥

व्याख्या— रेणुकः कथमुपदेशमारेभे इत्यत्राह— **अथ** अनन्तरम् **अगस्त्यवचः** अगस्त्यवचनं **श्रुत्वा** आकर्ण्य **गणनायको** गणाधीश्वरो **रेणुकः क्षणं** क्षणमात्रं **समाहितः** सन् एकाग्रचित्तो भूत्वा **साम्बं** अम्बया सहितं शक्तिविशिष्टं **महादेवं** महेश्वरं **ध्यात्वा आह** अगस्त्यमुद्दिश्य ब्रवीति ॥१॥

अगस्त्य मुनिशार्दूल समस्तागमपारग ।
शिवज्ञानकरं वक्ष्ये सिद्धान्तं शृणु सादरम् ॥२॥

व्याख्या— किमाह इत्यत्राह— अगस्त्येति । हे **अगस्त्य मुनिशार्दूल** मुनिः शार्दूल इव मुनिश्रेष्ठ, **समस्तागमपारग** समस्तानाम् आगमानां पारं गत इति समस्तागमपारगः, समस्तागमविशारदः, तत्सम्बुद्धौ; **शिवज्ञानकरं** शिवस्वरूपबोधजनकं **सिद्धान्तं** दर्शनं **वक्ष्ये** वदामि, **सादरम्** आदरेण सह **शृणु** आकर्णय ॥२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सिद्धान्तभेदः

अगस्त्य खलु सिद्धान्ता विख्याता रुचिभेदतः ।
भिन्नाचारसमायुक्ता भिन्नार्थप्रतिपादकाः ॥३॥

व्याख्या— भिन्नाः सिद्धान्ताः सन्तीत्याह— **अगस्त्येति** । हे **अगस्त्य**, **रुचिभेदतः** अभिप्रायभेदात् **भिन्नाचारसमायुक्ताः** सदाचारभेदसम्पन्नाः **भिन्नार्थप्रतिपादका** भिन्नविषयप्रतिपादनपराः **सिद्धान्ताः** शास्त्रनिर्णययुक्ताः **विख्याताः** प्रसिद्धाः सन्ति ॥३॥

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
एतानि मानभूतानि नोपहन्यानि युक्तिभिः ॥४॥

व्याख्या— के ते इत्याकाङ्क्षायामाह— **सांख्यमिति** । **सांख्यं** कापिलदर्शनम्, **योगः** पतञ्जलिकृतः, **पाञ्चरात्रं** वासुदेववीरचितम्, **वेदाः** मन्त्रब्राह्मणात्मकाः, तथा **पाशुपतं** शिवप्रणीतं च सिद्धान्ताः । **एतानि** दर्शनानि **मानभूतानि** प्रमाणसिद्धानि, तानि **युक्तिभिः** तर्कादिभिः **नोपहन्यानि** न खण्डनीयानि॥ तत्र **कापिलं सांख्यं** प्रकृतिपुरुषात्मकपदार्थद्वयप्रतिपादकम्, पुरुषस्य भोगमोक्षार्थं सत्त्वरजस्तमसां साम्यावस्थाविक्षेपेण विकासं प्राप्तानां पञ्चविंशतितत्त्वानां प्रतिपादकं च शास्त्रम् । तस्मिन् शास्त्रे ईश्वरो नाङ्गीक्रियते । अतः सांख्यं शास्त्रं निरीश्वरं दर्शनम्। **पतञ्जलिप्रणीतो योगः** सांख्यमतानुसरं प्रकृतिपुरुषौ पञ्चविंशतितत्त्वानि चाङ्गीकृत्य, यमनियमासनप्राणायामप्रत्याहारध्यानधारणसमाध्यात्मंकाष्टाङ्गयोगप्रक्रियां प्रतिपादयति । पञ्चविंशतितत्त्वेष्वेकतमे पुरुषतत्त्वे "क्लेशकर्मविपाकाशयैरपरामृष्टं पुरुषविशेषम्" ईश्वरत्वेन मन्यमानाः योगप्रवक्तारः सेश्वरवादिनः । योगस्य सेश्वरसांख्यमित्यपरं नाम । **वासुदेवप्रणीतं** पाञ्चरात्रं वैष्णवशास्त्रं वैष्णवदीक्षाङ्गभूतं तप्तमुद्राधारणं प्रतिपाद्य चिदचिदीश्वरात्मकतत्त्वत्रयबोधकम् । **वेदाः** ऋग्यजुस्सामाथर्वरूपाः, कर्मकाण्डाख्यतत्पूर्वकाण्डानुसारं जैमिनिप्रोक्तं यागादिप्रतिपादकं पूर्वमीमांसादर्शनम् । तदापि निरीश्वरं शास्त्रम् । **शिवप्रणीतं पाशुपतं** पशुपाशपत्या-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्मकतत्त्वत्रयप्रतिपादकं शास्त्रम् । एतानि सांख्यादीनि दर्शनानि मान-भूतानि प्रमाणभूतानि । अतस्तानि युक्तिभिस्तर्कादियुक्तिभिर्नोपहन्यानि न खण्डनीयानि ॥४॥

वेदः प्रधानं सर्वेषां सांख्यादीनां महामुने ।
वेदानुसरणादेषां प्रामाण्यमिति निश्चितम् ॥५॥

व्याख्या— उक्तसांख्यादीनां प्रामण्यं कुत इत्यत्राह— **वेद इति** । हे **महामुने, सर्वेषां** समेषां **सांख्यादीनां** सांख्यादिशास्त्राणां मध्ये **वेदः प्रधानं** मुख्यं प्रमाणम्, तस्याऽपौरुषेयत्वात् । **एषां** सांख्यादीनां **वेदानु-सरणात्** वेदसंमतत्वात् **प्रामाण्यम्** उपादेयत्वमिति **निश्चितं** शास्त्र-विद्भिर्निर्णीतम् ॥५॥

शैवतन्त्रं विशिष्यते

पाञ्चरात्रस्य सांख्यस्य योगस्य च तथा मुने ।
वेदैकदेशवर्तित्वं शैवं वेदमयं मतम् ॥६॥

व्याख्या— तत्र शैवस्य पाशुपतस्य वैशिष्ट्यमाह— **पाञ्चरात्रस्येति** । हे **मुने, पाञ्चरात्रस्य सांख्यस्य तथा योगस्य वेदैकदेशवर्तित्वं** वेदस्य एकदेशे एकभागे वर्तित्वं विद्यमानत्वम् । **शैवं** पाशुपतं नाम शैवशास्त्रं **वेदमयं** सर्ववेदात्मकमिति **मतम्** वेदागमनिष्णातैरभिप्रेतम् । सांख्यादीनां त्रयाणां वेदे व्याप्तिः परिमिता शैवशास्त्रस्य त्वपरिमिता इत्यवधेयम् ॥६॥

वेदैकदेशवर्तिभ्यः सांख्यादिभ्यो महामुने ।
सर्ववेदानुसारित्वाच्छैवतन्त्रं विशिष्यते ॥७॥

व्याख्या— तदेवाह— **वेदेति** । हे **महामुने, वेदैकदेशवर्तिभ्यः** वेदैकभागप्रतिपादितेभ्यः **सांख्यादिभ्यः** सांख्यादि शास्त्रेभ्यः **सर्ववेदानु-सारित्वात्** समग्रवेदसंमतत्वात् **शैवतन्त्रं** शैवशास्त्रं **विशिष्यते** उत्कर्षेण महीयते ॥७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शैवतन्त्रमिति प्रोक्तं सिद्धान्ताख्यं शिवोदितम् ।
सर्ववेदार्थरूपत्वात् प्रमाणं वेदवम् सदा ॥८॥

व्याख्या— शैवशास्त्रस्य कथं प्रामाण्यमित्यत्राह— **शैवतन्त्रमिति** । **शिवोदितं** शिवेनोक्तं **सिद्धान्ताख्यं** सिद्धान्तनाम्ना प्रसिद्धं **शैवतन्त्रं** शैवशास्त्रं **सर्ववेदार्थरूपत्वात्** समग्रवेदोक्तविषयस्वरूपत्वात् **सदा** निरन्तरं सर्वकालेषु **वेदवत् प्रमाणं** प्रमाणभूतम् ॥८॥

आगमभेदाः – सिद्धान्तस्य वेदसंमतत्वम्

आगमा बहुधा प्रोक्ताः शिवेन परमात्मना ।
शैवं पाशुपतं सोमं लाकुलं चेति भेदतः ॥९॥

व्याख्या— आगमवैविध्यमाह— **आगमा इति** । **शिवेन परमात्मना शैवं पाशुपतं सोमं लाकुलं चेति भेदतः** प्रकारभेदात् **बहुधा** बहुविधाः आगमाः **प्रोक्ताः** बोधिताः । ये शैवपाशुपतसोमलाकुलसम्प्रदायभेदेन तैस्तैर्नामभिः प्रसिद्धास्ते सर्वेऽपि शिवेनोपदिष्टाः । अतस्ते स्थूलदृष्ट्या सर्वे शैवाः । तत्त्वभेदेनाऽऽचारभेदेन मुक्तिस्वरूपभेदेन च भिन्नाः ॥९॥

तेषु शैवं चतुर्भेदं तन्त्रं सर्वविनिश्चितम् ।
वामं च दक्षिणं चैव मिश्रं सिद्धान्तसंज्ञकम् ॥१०॥

व्याख्या— शैवभेदानाह— **तेष्विति** । **तेषु** तेषां पूर्वोक्तानां मध्ये **शैवं तन्त्रं** शैवागमशास्त्रं **वामं दक्षिणं मिश्रं सिद्धान्तसंज्ञकं** सिद्धान्ताख्यं चेति चतुर्भेदम् इति **सर्वविनिश्चितं** सर्वैरागमविशारदैर्निर्णीतम् ॥१०॥

शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम् ।
सप्तमातृपरं मिश्रं सिद्धान्तं वेदसंमतम् ॥११॥

व्याख्या— वामादीनां विशेषमाह— **शक्तीति** । **वामाख्यं** तन्त्रं **शक्तिप्रधानं** शक्तिपरम् । **दक्षिणं भैरवात्मकं** भैरवपरम् । **मिश्रं** च

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सप्तमातृपरं ब्राह्म्यादिसप्तमातृकापरम् । ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा चेति सप्तमातृकाः । **सिद्धान्तं** नाम **वेदसंमतं** वेदानुसारि शास्त्रम् ॥ तदेव वेदवत् प्रमाणम् । तदितरेषां सर्ववेदसंमतत्वाभावाद् अंशतः प्रामाण्यम् ॥११॥

वेदधर्माभिधायित्वात् सिद्धान्ताख्यः शिवागमः ।
वेदबाह्यविरोधित्वाद् वेदसंमत उच्यते ॥१२॥

व्याख्या— सिद्धान्तः कथं वेदसंमतम् इत्यत्राह— **वेदेति** । **वेद-धर्माभिधायित्वात्**, वेदधर्मान् वेदोक्तलिङ्गभस्मरुद्राक्षधारणादिधर्मान् अभिदधातीति वेदधर्माभिधायी, तस्य भावः वेदधर्माभिधायित्वम्, तस्मात्, **वेदबाह्यविरोधित्वात्** वेदबाह्यानां वेदभिन्नमार्गानुसारिणां चार्वाकजैन-बौद्धादीनां विरोधित्वात्, विरोधयतीति विरोधी, तस्य भावः, तस्माच्च **सिद्धान्ताख्यः** सिद्धान्त इति प्रख्यातः **शिवागमः** कामिकादि-वातुला-न्ततन्त्रसमुदायः **वेदसंमत उच्यते** वेदानुसारीति कथ्यते ॥ कामिकादि – वातुलान्तानि शिवागमाः अष्टाविंशतिसंख्याकाः । तेषां नामानि – १. कामिकागमः, २. योगजागमः, ३. अचिन्त्यागमः, ४. कारणागमः, ५. अजितागमः, ६. दीप्तागमः, ७. सूक्ष्मागमः, ८. सहस्रागमः, ९. अंशु-मानागमः, १०. सुप्रभेदागमः, ११. विजयागमः, १२. निःश्वासागमः, १३. स्वायंभुवागमः, १४. अनलागमः, १५. वीरागमः, १६. रौरवागमः, १७. मकुटागमः, १८. विमलागमः, १९. चन्द्रज्ञानागमः, २०. बिम्बागमः, २१. प्रोद्गीतागमः, २२. ललितागमः, २३. सिद्धागमः, २४. शर्वोक्ता-गमः, २५. सन्तानागमः, २६. पारमेश्वरागमः, २७. किरणागमः, २८. वातुलागमश्चेति । एते प्रधानागमाः । एकैकस्य प्रधानागमस्य उपागमा अपि भवन्ति । आहत्योपगमानां संख्या अष्टाधिकद्विशतम् । प्रधानोपागमोभयसमुदायः सिद्धान्तशब्देन गीयते ॥१२॥

वेदसिद्धान्तयोरैक्यमेकार्थप्रतिपादनात् ।
प्रामाण्यं सदृशं ज्ञेयं पण्डितैरेतयोः सदा ॥१३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— वेदसिद्धान्तयोः प्रामाण्यसादृश्यमाह— **वेदेति**। **एकार्थप्रतिपादनात्** एकश्चासौ अर्थश्च एकार्थः, तस्य प्रतिपादनात् एकार्थप्रतिपादनात् समानविषयबोधनात् **वेदसिद्धान्तयोः** वेदश्च सिद्धान्तश्च वेदसिद्धान्तौ, तयोः, **ऐक्यं** एकत्वम्। **एतयोः** वेदसिद्धान्तयोः **प्रामाण्यं** प्रमाणत्वं **सदृशं** समानम् इति **सदा** सर्वदा **पण्डितैः** विद्वद्भिः **ज्ञेयं** ज्ञातव्यम् ॥१३॥

वीरशैवशब्दनिष्पत्तिः

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ॥१४॥

व्याख्या— वीरशैवं कुत्र निर्दिष्टम् इत्यत्राह— **सिद्धान्तेति**। **शिवोदिते** शिवेनोक्ते **कामिकाद्ये** कामिकः अद्यं यस्य सः कामिकाद्यः, तस्मिन्, **सिद्धान्ताख्ये** सिद्धान्तनाम्नि **महातन्त्रे** महाशास्त्रे शिवागमात्मके, **उत्तरे भागे** अपरभागे **परं** श्रेष्ठं **वीरशैवमतं** वीरशैवाख्यं मतं **निर्दिष्टम्** उपदिष्टम्। अत एव वीरशैवमतस्य आगमोत्तरसिद्धान्त इत्यपरं नाम ॥१४॥

विद्यायां शिवरूपायां विशेषाद् रमणं यतः।
तस्मादेते महाभागा वीरशैवा इति स्मृताः ॥१५॥

व्याख्या— वीरशैवाः के इत्यत्राह— **विद्यायामिति**। **शिवरूपायां** शिवः रूपं यस्याः सा शिवरूपा तस्याम्, **विद्यायां** ज्ञाने, शिवस्वरूपज्ञाने सच्चिदानन्दनित्यपरिपूर्णत्वस्वरूपज्ञाने **यतः** यस्मात् कारणात् **विशेषाद्** अनितरसाधारणत्वेन **रमणम्** आनन्दरसास्वादनम्, **तस्मात्** तस्मात्कारणाद् **एते** इमे **महाभागाः** परमभाग्यवन्तो **'वीरशैवाः'** इति **स्मृता** ज्ञाता इत्यर्थः ॥१५॥

वीशब्देनोच्यते विद्या शिवजीवैक्यबोधिका।
तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः ॥१६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या—'वीरशैव' शब्दस्याऽर्थानुसारि निर्वचनमाह— **वीशब्देनेति।** **'वी' शब्देन** "वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु" इति धातुना **शिवजीवैक्यबोधिका** शिवजीवसामरस्यात्मकैक्यप्रतिपादिनी **विद्या** ज्ञानम् **उच्यते** बोध्यते । **ये शैवाः** शिवमतावलम्बिनः जना **तस्यां** लिङ्गाङ्ग-सामरस्यात्मिकायां विद्यायां **रमन्ते** आनन्दमनुभवन्ति ते तु **वीरशैवा** इति **मता** अभिमताः ॥ वीरशब्दे वी च रेफश्च विद्येते । तयोर्मध्ये वीशब्दं ज्ञानार्थक'वी'धातुत्वेन रेफं च रमणार्थक'रमु'धातुनिष्पन्नत्वेन गृहीत्वा वीरशब्दस्य परमार्थम् उद्घाट्य वीरशैवानां चरमोद्देशं द्योतयति । वीराश्च ते शैवाश्चेति कर्मधारयविग्रहमाश्रित्य वीरशैवशब्दः निष्पादितः । अत्र 'वी'धातोः ज्ञानार्थकत्वं तु 'गत्यर्थका धातवो ज्ञानार्थका अपि' इति न्यायेन स्वीकृतम् ॥१६॥

वीरमाहेश्वरशब्दनिष्पत्तिः

विद्यायां रमते यस्मान्मायां हेयां श्ववद्रहेत् ।
अनेनैव निरुक्तेन वीरमाहेश्वरः स्मृतः ॥१७॥

व्याख्या— तथैव वीरमाहेश्वरशब्दनिर्वचनं ब्रूते— **विद्यायामिति।** **यस्मात्** कारणात् **विद्यायां** लिङ्गाङ्गसामरस्यात्मिकायां **रमते** आनन्द-मनुभवतीति, **हेयां** त्यजनीयां **मायां श्ववत्** शुनकवद् **रहेत्** त्यजनीयत्वेन निवारयेदिति चेति **अनेनैव** एतेनैव **निरुक्तेन** निर्वचनेन **'वीरमाहेश्वरः'** इति **स्मृतो** ज्ञातः ॥ अत्र विद्यायां रमते इति वीरः, मायां श्ववद्रहेदिति माहेश्वरः, वीरश्चासौ माहेश्वरश्चेति वीरमाहेश्वरः ॥१७॥

वेदान्तजन्यं यज्ज्ञानं विद्येति परिकीर्त्यते ।
विद्यायां रमते तस्यां वीर इत्यभिधीयते ॥१८॥

व्याख्या— पुनर्वीरशब्दनिर्वचनं ब्रूते— **वेदान्तेति** । **वेदान्तजन्यं,** वेदान्तो नामोपनिषदः, वेदस्याऽन्तत्वात् वेदसारत्वात् वेदतात्पर्यत्वाच्च, तस्मात् जन्यं जायमानं यत् ज्ञानं (सा) **विद्येति** विद्या इति **परिकीर्त्यते**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कथ्यते । **तस्याम्** उपनिषद्विद्यायां यो **रमते स वीर इत्यभिधीयते** उच्यते ॥ विद्यायां रमते इति वीर इति निर्वचनम् ॥१८॥

वीरशैव-वीरमाहेश्वरयोर्भेदः

शैवैर्माहेश्वरैश्चैव कार्यमन्तर्बहिः क्रमात् ।
शिवो महेश्वरश्चेति नात्यन्तमिह भिद्यते ॥१९॥

यथा तथा न भिद्यन्ते शैवा माहेश्वरा अपि ।
शिवाश्रितेषु ते शैवा ज्ञानयज्ञरता नराः ॥२०॥

माहेश्वराः समाख्याताः कर्मयज्ञरता भुवि ।
तस्मादाभ्यन्तरे कुर्युः शैवा माहेश्वरा बहिः ॥२१॥

व्याख्या— वीरशैव-वीरमाहेश्वरयोर्भेदाभेदमाह — **शैवैरित्यादि** । **शैवैः** वीरशैवैः **माहेश्वरैः चैव** वीरमाहेश्वरैः चैव **कार्यम् अन्तर्बहिःक्रमात्** शिवलिङ्गार्चनादिकं कर्म वीरशैवैः आभ्यन्तररीत्या वीरमाहेश्वरैश्च बाह्यरीत्या च भवति ॥ तयोर्भेदः किम् आत्यन्तिकम् ? अत्रोच्यते— **इह यथा शिवो माहेश्वरश्चेति न अत्यन्तं भिद्यते,** अत्र नाममात्रे भेदः, आत्यन्तिको भेदो नास्ति, **तथा** एवमेव **शैवा माहेश्वरा अपि** वीरशैवा वीरमाहेश्वरा अपि **न भिद्यन्ते** भेदं न भजन्ते । **भुवि** लोके **शिवाश्रितेषु** शिवं शरणं प्राप्तेषु **ते शैवाः** वीरशैवा **ज्ञानयज्ञरताः** बाह्यकर्म संन्यस्य ज्ञानयोगे निरूढा **नराः** जनाः भवन्ति ॥ **कर्मयज्ञरता** बाह्यक्रियारूपकर्म-योगे निष्ठाः सन्तः **माहेश्वराः** वीरमाहेश्वरा इति **समाख्याताः** सम्यग् वर्णिताः । **तस्मात्** तत्कारणात् **शैवा** वीरशैवा **आभ्यन्तरे** अन्तः **कुर्युः** शिवलिङ्गपूजादिकं प्राणलिङ्गपूजाक्रमेण कुर्वीरन् । **माहेश्वरा** वीरमाहेश्वरा **बहिः** बाह्ये बाह्यसामग्रीद्वारा भावलिङ्गप्राणलिङ्गानुसन्धानबुद्ध्या कुर्युः ॥ अत्रेदमनुसन्धेयम्— 'विद्यायां रमन्ते' (शिवजीवैक्यज्ञाने आनन्दं ये भजन्ते ते वीराः) इति वीरत्वं तु उभयोः समानमेव । क्रियायां लिङ्गार्चस्वरूपिण्यां तयोः या आभ्यन्तरबाह्यभिदा दृश्यते सा तु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आत्मसाक्षात्कारार्थं लोकसङ्ग्रहार्थं च। आभ्यन्तरपूजाक्रियायाम् इष्टलिङ्गे दृष्टियोगद्वारा अन्तः प्रविश्य भाववस्तुभिः प्राणलिङ्गपूजा विहिता। बाह्यक्रियायामपि भावलिङ्ग-प्राणलिङ्गाभ्याम् अनुसन्धानबुद्ध्या इष्टलिङ्ग-पूजा प्रवर्तते। 'शिवाश्रितेषु' इत्याद्युक्त्या शिवाश्रितत्वम् उभयोरपि समानमिति सूचितम्। "तस्मादसक्तः सततं कार्यं कर्म समाचर। असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥" (भ.गी., ३.१९-२०) इति भगवदुक्त्यनुसारेण वीरमाहेश्वराः कर्मयोगिनः। "योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्। आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥" (भ.गी., ४.४१) इति पुनर्भगवदुक्त्यनुसारेण वीरशैवाः संन्यस्तकर्मिणो ज्ञानयोगिनो भवन्ति। ज्ञानकर्मणोः साहित्यमुभयोरप्यपेक्षितम्। तदुक्तम्— "ज्ञानं हि परमेशस्य गदितं मुक्तिदं मुने। तत्कर्मसहितं प्रोक्तं मुक्तिदानक्षमं त्विति॥ अपश्यन्नन्धको दग्धः पश्यन् दहति पङ्गुलः। अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी॥" (चं.आ., उ.भा., क्रि.पा., १२.५-६) इति। एवमेव भगवताऽप्युक्तम्— "साङ्ख्ययोगौ पृथग्बाला प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥" (भ.गी., ५.४) इति॥१९-२१॥

वीरशैवाः षड्भेदाः

वीरशैवास्तु षड्भेदाः स्थलधर्मविभेदतः।
भक्तादिव्यवहारेण प्रोच्यन्ते शास्त्रपारगैः ॥२२॥

व्याख्या— वीरशैवभेदानाह— वीरेति। **वीरशैवाः तु** वीरशैवाः तावत् **स्थलधर्मविभेदतः** स्थलानां धर्माः, तेषां भेदानुसारतः **भक्तादिव्यवहारेण** (च) भक्ताद्याचारभेदेन च **षड्भेदाः** षट्प्रकाराः इति **शास्त्रपारगैः** शास्त्रस्य पारं गच्छन्ति इति शास्त्रपारगाः, तैः, शैवागमशास्त्रविशारदैः इत्यर्थः, **प्रोच्यन्ते** प्रकर्षेण कथ्यन्ते॥ स्थलं नाम वीरशैवे विशिष्टः पारिभाषिकशब्दः। तच्च परमार्थतः परशिवब्रह्मवाचकः।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तथा चोक्तम्— **“स्थीयते लीयते यस्मिन् मुक्तः संसारपद्धतेः । तदेव स्थलमित्युक्तं स्थलतत्त्वविशारदैः ॥”** (सू.आ., उ.भा., क्रि.पा., ४.५४) इति । स्थीयते लीयते यत्र इति स्थलम् । चराचरात्मकमिदं जगत् सृष्टेः प्राक् परशिवब्रह्मणि तिष्ठति स्म । सृष्टेः पश्चात् परशिवब्रह्मण्याधारभूते तिष्ठति । पुनः प्रलये परशिवब्रह्मण्येव विलीयते । अतः परशिवब्रह्म एव स्थलम् । उक्तं चान्यत्र— **“अहमेव जगत्स्रष्टा पुनर्मय्येव लीयते । अहमेव स्थलं विद्धि षड्विधं मम रूपकम् ॥”** (पार.आ., ४.७) इति । स्थलं तत् उपास्योपासकभावात्मकेन स्वशक्तिस्पन्देन द्विधा जातम्— लिङ्गस्थलम् अङ्गस्थलं चेति । (अनु.सू., २.१०) । तत्र परमात्मा परशिवो लिङ्गस्थल-वाच्यः, जीवात्मा च अङ्गस्थलवाच्यः । पुनस्तत्र लिङ्गस्थलमुपास्यं भक्तानुग्रहार्थम्, अङ्गस्थलं तु उपासकस्थलम् । लिङ्गस्थलं गुरुदत्त दीक्षाप्रभावेण भक्तस्य (जीवात्मनः) स्थूलसूक्ष्मकारणरूपेषु शरीरेषु यथाक्रमम् इष्टलिङ्ग-प्राणलिङ्ग-भावलिङ्गरूपेण धार्यते । एवमङ्गस्थलमपि त्यागाङ्ग-भोगाङ्ग-योगाङ्गात्मना त्रिप्रकारतया परिणमते । तथा चोक्तम्— “लिङ्गस्थलं त्रिधा ज्ञेयं तद्भेदो वर्ण्यते क्रमात् । प्रथमं भावलिङ्गं स्याद् द्वितीयं प्राणलिङ्गकम् ॥ तृतीयमिष्टलिङ्गं स्यादित्येतत् त्रिविधं स्मृतम् ॥” (अनु.सू., ३.५-६) इति, “अङ्गस्थलं त्रिधा ज्ञेयमाचार्यैः सूक्ष्मदर्शिभिः । योगाङ्गं प्रथमं प्रोक्तं भोगाङ्गं तु द्वितीयकम् । त्यागाङ्गं तु तृतीयं स्यादेवमेव त्रिधा भवेत् ॥” (अनु.सू., ४.५) इति च । अत्र लिङ्गत्रैविध्यम् अङ्गत्रैविध्यं चाऽवरोहक्रमेणोक्तम् । पुनर्लिङ्गाङ्गस्थलानि प्रत्येकं द्वैविध्यं प्राप्नुवन्ति । तथा हि— लिङ्गस्थलेषु प्रथमं भावलिङ्गस्थलं महालिङ्गं प्रसादलिङ्गं चेति, द्वितीयं प्राणलिङ्गस्थलं चरलिङ्गं शिवलिङ्गं चेति, इष्टलिङ्गस्थलं च गुरुलिङ्गम् आचारलिङ्गं चेति प्रत्येकं द्विधा भूत्वाऽऽहत्य षड्लिङ्गस्थलानि भवन्ति । उक्तं च— “महालिङ्गं प्रसादाख्यं लिङ्गमित्युभयस्थलम् । भावलिङ्गं भवत्येव स्वानुभूतिप्रमाणतः ॥ तथा च चरलिङ्गं च शिवलिङ्गमिति द्वयम् । प्राणलिङ्गं भवत्येव तात्पर्यार्थो न संशयः ॥ गुरुलिङ्गं तथाऽऽचारलिङ्गमित्युभयस्थलम् । इष्टलिङ्गं भवत्येव सत्यमुक्तमिदं मया॥” (अनु.सू., ३.१८-२०) इति । एवमेव अङ्गस्थलेषु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रथमं योगाङ्गस्थलम् ऐक्यस्थलं शरणस्थलं चेति, द्वितीयं योगाङ्गस्थलं प्राणलिङ्गिस्थलं प्रसादिस्थलं चेति, त्यागाङ्गस्थलं च माहेश्वरस्थलं भक्तस्थलं चेति प्रत्येकं द्विधा भूत्वाऽऽहत्य षडङ्गस्थलानि भवन्ति। तदेवोक्तम् — **"योगाङ्गमैक्यं शरणस्थलमित्युभयं भवेत्। प्राणलिङ्गिप्रसादीति द्वयं भोगाङ्गमिष्यते॥ माहेश्वरस्थलं भक्तस्थलमित्युभयं तथा। त्यागाङ्गं भवतीत्येवं प्रोच्यते पारमार्थिकैः॥"** (अनु.सू., ४.१२-१३) इति। एवं षडङ्गस्थलापेक्षया षड्लिङ्गस्थलानि भवन्ति। तत्राङ्गस्थलानां लिङ्गस्थलानां च उपासकोपस्यसम्बन्धः आरोहक्रमेण एवं भवति — १. भक्तस्थलम् - आचारलिङ्गस्थलम्, २. माहेश्वरस्थलम् - गुरुलिङ्गस्थलम्, ३. प्रसादिस्थलम् - शिवलिङ्गस्थलम्, ४. प्राणलिङ्गिस्थलम् - चरलिङ्गस्थलम्, ५. शरणस्थलम् - प्रसादलिङ्गस्थलम्, ६. ऐक्यस्थलम् - महालिङ्गस्थलम् चेति। तत्र भक्ताद्यङ्गस्थलानाम् अवान्तरस्थलानि चतुश्चत्वारिंशत् (४४) भवन्ति। तथा हि— भक्तस्थलस्य पञ्चदश (१५), माहेश्वरस्थलस्य नव (९), प्रसादिस्थलस्य सप्त (७), प्राणलिङ्गिस्थलस्य पञ्च (५), शरणस्थलस्य चत्वारि (४), ऐक्यस्थलस्य च चत्वारि (४), इत्याहत्य चतुश्चत्वारिंशत् स्थलानि। आचारादिलिङ्गस्थलानाम् अवान्तरस्थलानि सप्तपञ्चाशत् (५७)। तथा हि— भक्तस्थलसम्बद्धाऽऽचारलिङ्गस्थलस्य, माहेश्वरस्थलसम्बद्धं गुरुलिङ्गस्थलस्य, प्रसादिस्थलसम्बद्धशिवलिङ्गस्थलस्य, प्राणलिङ्गिस्थलसम्बद्धचरलिङ्गस्थलस्य च प्रत्येकं नव (९), शरणस्थलसम्बद्धप्रसादलिङ्गस्थलस्य द्वादश (१२), पुनरैक्यस्थलसम्बद्धमहालिङ्गस्थलस्य चाऽपि नव (९), इत्याहत्य सप्तपञ्चाशत् (५७) स्थलानि॥ एवं अङ्गलिङ्गस्थलानि आहत्य एकोत्तरशतस्थलानि (१०१) भवन्ति। अत एव वीरशैवसिद्धान्तस्य एकोत्तरशतस्थलसिद्धान्त इति प्रसिद्धिः॥

स्थलशब्दः परमार्थतः परशिवपरब्रह्मवाचक इत्युक्तम्। सामान्यार्थे स्थलं नाम स्थानम्, स्तरः, सोपानं, आध्यात्मिकयात्रायां साधकस्य किञ्चिद्विश्रान्तिस्थानं तात्कालिकम्। तादृशानि स्थलानि प्रथमतः षट् भक्तस्थलादीनि यान्यङ्गस्थलानीति पूर्वमुक्तानि। तत्सम्बद्धानि आचार-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गस्थलादीनि शिवलिङ्गैक्यं प्राप्तस्य शिवात्मकस्य शिवयोगिन स्थलानि। अत एव लिङ्गस्थलानीति कथितानि। लिङ्गस्थलानि लिङ्गैक्यस्य गुरु-लिङ्ग-जङ्गमात्मकस्वरूपं विशदीकृत्य भक्ताद्यङ्गस्थलेषु स्थितानाम् साधकानां तत्तत्कालानुसारेणाऽपेक्षिताय ज्ञानाय कल्पन्ते। अत्र वीरशैवानां स्थल-भेदेन धर्मभेदेनाऽधिकारिभेदेन च शास्त्रस्य षड्भेदत्वमुक्त्वा षट् स्थलानां नामनिर्देशः क्रियते ॥२२॥

षट्स्थलानां नामानि

शास्त्रं तु वीरशैवानां षड्विधं स्थलभेदतः।
धर्मभेदसमायोगाद् अधिकारिविभेदतः ॥२३॥

व्याख्या— वीरशैवशास्त्रं षड्विधमित्याह— **शास्त्रमिति। स्थल-भेदतः** स्थलभेदात् **धर्मयोगसमायोगात्** स्थलसम्बद्धसदाचारयुक्तत्वाद्, **अधिकारिविभेदतः** भक्ताद्यधिकारिभेदाच्च **वीरशैवानां शास्त्रं षड्विधं** षट्प्रकारं भवतीत्यर्थः ॥ अत्रानुबन्धचतुष्टयम्। वीरशैवाचारविचार-ज्ञानम्, षट्स्थलान्तर्गतानाम् एकोत्तरशतस्थलानां ज्ञानमिति यावत्, विषयः। अस्य ज्ञानस्य शास्त्रेण सह प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। वीरशैव धर्मानुयायी मुमुक्षुः अधिकारी। शिवभक्तिज्ञानक्रियात्मक-साधनद्वारा प्राप्यमाणशिवैक्यरूपमुक्तिः प्रयोजनम् ॥२३॥

आदौ भक्तस्थलं प्रोक्तं ततो माहेश्वरस्थलम्।
प्रसादिस्थलमन्यत्तु प्राणलिङ्गिस्थलं ततः ॥
शरणस्थलमाख्यातं षष्ठमैक्यस्थलं मतम् ॥२४॥

व्याख्या— अथ षट्स्थलानां नामान्याह— **आदाविति। आदौ** प्रथमतः **भक्तस्थलम् प्रोक्तम्** उक्तम्। **ततो**ऽनन्तरं **माहेश्वरस्थलं** प्रोक्तम्। तद् द्वितीयं स्थलम्। **प्रसादिस्थलम् अन्यत्तु** तदतिरिक्तं तृतीयम्। **ततो**ऽनन्तरं **प्राणलिङ्गिस्थलम्**। तत् चतुर्थमित्यर्थः। **शरणस्थलम् आख्यातम्** उक्तम्। इदं पञ्चमं स्थलम्। **ऐक्यस्थलं षष्ठं मतम्** अभिप्रेतम्॥ उक्तं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

च पारमेश्वरे— **“भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः । शरणं शिवलिङ्गैक्यः स्थलषट्कं मम प्रियम् ॥”** (पार.आ., ६.८) इति । एतान्यङ्गस्थलानीति कथ्यन्ते । तदुक्तम्— **“अङ्गस्थलं समासेन वक्ष्ये षड्विधमादितः । यस्मिन् ज्ञाने महादेवि ज्ञायते चाधिकं ततः ॥ भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः । शरणं शिवलिङ्गैक्यः षट्स्थलानि हि पार्वति ॥”** (सू.आ., उ.भा., क्रि.पा., ८.३१-३२) इति ॥२४॥

भक्तस्थलम्

भक्तस्थलं प्रवक्ष्यामि प्रथमं कलशोद्भव ।
तदवान्तरभेदांश्च समाहितमनाः शृणु ॥२५॥

व्याख्या— सप्रभेदं भक्तस्थलं प्रवक्तुं संकल्पयति— **भक्तेति** । हे कलशोद्भव कुम्भोद्भव अगस्त्य, **प्रथमम्** आदौ **भक्तस्थलं तदवान्तरभेदांश्च**, तस्य उपस्थलप्रकारांश्च **प्रवक्ष्यामि** कथयिष्यामि । **समाहितमनाः** समाहितं मनः यस्य सः समाहितमनाः, एकाग्रचित्तो भूत्वा शृणु ॥२५॥

शैवी भक्तिः समुत्पन्ना यस्यासौ भक्त उच्यते ।
तस्यानुष्ठेयधर्माणामुक्तिर्भक्तस्थलं मतम् ॥२६॥

व्याख्या— भक्तः कः ? भक्तस्थलं किम् ? इत्यत्रोक्तम्— **शैवीति** । **शैवी** शिवसम्बन्धिनी **भक्तिः** शिवविषया रतिः **यस्य समुत्पन्ना** समुद्भूताऽसौ सः **भक्त उच्यते** ‘भक्तः’ इति कथ्यते । **तस्य** भक्तस्याऽ**नुष्ठेयधर्माणाम्**, अनुष्ठेया धर्माः अनुष्ठेयधर्माः, तेषाम्, आचरणीयानां सदाचाराणाम् **उक्तिः** प्रतिपादनं **भक्तस्थलं मतम्** अभिप्रेतम् ॥ सदाचारो नाम शिवे भक्तिः, गुरुजङ्गमयोरपि, गुरौ लिङ्गे जङ्गमे च एकधीः । समासतोऽष्टावरणपञ्चाचारसम्पन्नता सदाचारः । अष्टावरणानि पञ्चाचाराश्च वक्ष्यन्ते ॥२६॥

अवान्तरस्थलान्यत्र प्राहुः पञ्चदशोत्तमाः ।
पिण्डता पिण्डविज्ञानं संसारगुणहेयता ॥२७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दीक्षा लिङ्गधृतिश्चैव विभूतेरपि धारणम् ।
रुद्राक्षधारणं पश्चात् पञ्चाक्षरजपस्तथा ॥२८॥

भक्तमार्गक्रिया चैव गुरोर्लिङ्गस्य चार्चनम् ।
जङ्गमस्य तथा ह्येषां प्रसादस्वीकृतिस्तथा ॥२९॥

अत्र दानत्रयं प्रोक्तं सोपाधि निरुपाधिकम् ।
सहजं चेति निर्दिष्टं समस्तागमपारगैः ।
एतानि शिवभक्तस्य कर्तव्यानि प्रयत्नतः ॥३०॥

व्याख्या— अवान्तरस्थलान्याह— **अवान्तरेति** । **अत्र** अस्मिन् भक्तस्थले **अवान्तरस्थलानि** उपस्थलानि **पञ्चदश** पञ्चदशेति **उत्तमाः** सज्जनाः **प्राहुः** वदन्ति । कानि तानि ? **पिण्डता** पिण्डस्थलम् – (१), **पिण्डविज्ञानं** पिण्डज्ञानस्थलम् – (२), **संसारगुणहेयता** संसारहेय-स्थलम् – (३), **दीक्षा** दीक्षास्थलम् (दीक्षालक्षणगुरुकारुण्यस्थलमिति प्रसिद्धम्) – (४), **लिङ्गधृतिः** लिङ्गधारणस्थलम् – (५), **विभूतेरपि धारणं** विभूतिधारणस्थलम् – (६), **पश्चाद्** अनन्तरं **रुद्राक्षधारणं** रुद्राक्षधारणस्थलम् – (७), **तथा** एवमेव **पञ्चाक्षरजपः** पञ्चाक्षर-जपस्थलम् – (८), **भक्तमार्गक्रिया च एव** भक्तमार्गक्रियास्थलम् – (९), **गुरोर्लिङ्गस्य चार्चनम्** गुरुलिङ्गार्चनस्थलम् (उभयस्थलमिति प्रसिद्धम्) – (१०), **जङ्गमस्य तथा** तथा एवमेव जङ्गमार्चनस्थलम् (त्रिविधसम्पत्ति-स्थलमिति प्रसिद्धम्) – (११), **तथा हि एषां प्रसादस्वीकृतिः** तथा हि एतेषां गुरुलिङ्गजङ्गमानां प्रसादस्वीकारात्मकं प्रसादस्वीकारस्थलम् (चतुर्विधसारायस्थलमिति ज्ञायते) – (१२), **अत्र दानत्रयं प्रोक्तम्** अनन्तरं त्रीणि दानस्थलानि कथितानि – तथा हि – **सोपाधि** सोपाधिदानस्थलम् – (१३), **निरुपाधिकं** निरुपाधिदानस्थलम् – (१४), **सहजं चेति** सहज-दानस्थलं – (१५) चेति **समस्तागमपारगैः** समस्तानां सर्वेषाम् आगमानां शैवागमानां पारं गता इति समस्तागमपारगाः, तैः, शैवागमविशारदैः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इत्यर्थः, **निर्दिष्टं** निश्चयेनाऽऽदिष्टम् । **एतानि** पिण्डस्थलात् सहजदान-स्थलपर्यन्तं पञ्चदशस्थलानि **शिवभक्तस्य प्रयत्नतः** प्रयत्नपूर्वकं **कर्तव्यानि** अवश्यं करणीयानि ॥२७-३०॥

१. अथ पिण्डस्थलम् – (१)

व्याख्या— अङ्गषट्स्थल-लिङ्गषट्स्थलान्तर्गततया समाचरणीयानां पिण्डस्थलादि-ज्ञानशून्यस्थलन्ताम् एकोत्तरशतस्थलानाम् मध्ये मूलभूतं पिण्डस्थलं ग्रन्थकारो निरूपयति ।

बहुजन्मकृतैः पुण्यैः प्रक्षीणे पापपञ्जरे ।
शुद्धान्तःकरणो देही पिण्डशब्देन गीयते ॥३१॥

व्याख्या— आदौ पिण्डलक्षणं ब्रूते— **बहुजन्मेति** । **बहुजन्मकृतैः** बहुजन्मसु अनेकजन्मसु कृतैः **पुण्यैः** सत्कर्मफलैः **पापपञ्जरे** दुष्कर्म-फलसमुदाये **प्रक्षीणे** प्रनष्टे सति **शुद्धान्तःकरणः** शुद्धानि निर्मलानि अन्तःकरणानि बुद्ध्यहंकारचित्तानि यस्य सः, **देही** शरीरी, आत्मा इति यावत्, **पिण्डशब्देन** 'पिण्ड' – इति संज्ञया **गीयते** भण्यते ॥ शुद्धन्तःकरण आत्मा पिण्डशब्दवाच्य इत्यर्थः। "आत्मलाभान्न परं विद्यते" इति श्रुतिः, "नात्मनः परदेवता" इत्यागमः । ताभ्यां प्रतिपादितरीत्याऽऽत्मनः स्वरूपज्ञानं प्राप्तव्यं सर्वैर्भक्तिमद्भिः साधकैः । पूजोपासनादिसर्वकर्मणो भक्तिपूर्वकम् आचरमाणस्य, जपतपोरूपानुष्ठानस्य योगपूर्वकं साधनीयस्य, सर्वज्ञानस्य सर्ववेदान्ताध्ययनसत्फलभूतस्य च पर्यवसानम् आत्मज्ञानमेव। अत एवोक्तम्— "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदि-ध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्" (बृ.उ., २.४.५) इति ॥३१॥

शिवशक्तिसमुत्पन्ने प्रपञ्चेऽस्मिन् विशिष्यते ।
पुण्याधिकः क्षीणपापः शुद्धात्मा पिण्डनामकः ॥३२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— पिण्डो जगति सर्वोत्कृष्टत्वेन भातीत्युक्तम्— शिवेति । **शिवशक्तिसमुत्पन्ने** शिवश्च शक्तिश्च शिवशक्ती, ताभ्यां समुत्पन्ने सञ्जाते **अस्मिन् प्रपञ्चे** चराचरात्मके जगति अस्मिन् **पुण्याधिकः** पुण्यम् अधिकं यस्य सः, सुकृतबाहुल्येन युक्तः, **क्षीणपापः** क्षीणं पापं यस्य सः, नष्टदुष्कृतः **शुद्धात्मा** निर्मलात्मा **पिण्डनामकः** पिण्ड इति नाम यस्य सः पिण्डनामा, पिण्डनामा एव पिण्डनामकः, स्वार्थे कप्प्रत्ययः । **विशिष्यते** श्रेष्ठत्वेन राजते ॥ "शिवशक्त्यात्मकं जगत्" (पार.आ., २१.५०) इत्यागमप्रमाणम् ॥३२॥

एक एव शिवः साक्षाच्चिदानन्दमयो विभुः ॥३३॥

निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः ।
अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः ॥३४॥

देवतिर्यङ्मनुष्यादिजातिभेदे व्यवस्थितः ।
मायी महेश्वरस्तेषां प्रेरको हृदि संस्थितः ॥३५॥

व्याख्या— मूलतः शिवजीवसम्बन्धमाह— **एकेति** । **एक एव** "एकमेवाद्वितीयं ब्रह्म" (छां.उ., ६.२.१) इति श्रुत्यनुसारेणाद्वितीयः शिवः । स च **साक्षात्** स्वानुभवगोचरत्वेन **चिदानन्दमयो प्रभुः** चिच्च आनन्दश्च चिदानन्दौ ज्ञानानन्दौ तौ आधिक्येन वर्तेते इति चिदानन्दमयः, **विभुः** प्रभुः **निर्विकल्पः** निर्गतः विकल्पः यस्मात् सः, भेदरहितः, **निराकारः** आकाररहितः, **निर्गुणः** प्राकृतिकसत्त्वरजस्तमोगुणनिर्मुक्तः **निष्प्रपञ्चकः** मायिकप्रपञ्चविदूरः ॥ शिवातिरक्तत्वेन किमपि पदार्थान्तरं नास्ति । तथापि **अनाद्यविद्यासम्बन्धाद्** न आदिः यस्याः सा अनादिनी, अनादिन्या अविद्याया सम्बन्धात् सम्पर्कात् **तदंशः** तस्य परमात्मनः शिवस्यांशः **जीवनामकः** 'जीवः' इति संज्ञावान् । स च जीवो **देवतिर्यङ्मनुष्यादिजातिभेदे व्यवस्थितः** देवाः, तिर्यञ्चः प्राणिनः, मनुष्याः, इत्यादिजातिभेदे प्रकारभेदे व्यवस्थितः विशेषेणाऽऽयोजितः ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मायी मायाशक्तियुक्तः **महेश्वरो** महेशानः **तेषां** जीवानां **हृदि** हृदये, प्रेरकः प्रेरकरूपेण **संस्थितः** सम्यक् स्थापितः । एवं जीवशिवयोः सम्बन्धो अंशांशिभावात्मकः । तदेवोक्तम्— "ममैवांशो जीवलोके जीवभूतः सनातनः" (भ.गी., १५.७) इति, "अंशो नानाव्यपदेशात्" (ब्र.सू., २.३.४०) इति, "जीवो मदंशो ज्ञानात्मा साक्ष्यज्ञानीव दृश्यते" (पार. आ., २१.८०) इति च । "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" (श्वे.उ., ४.१०) इति श्रुत्यनुसारं शिवः स्वमायाशक्त्या सर्वेषां हृदयेषु प्रेरकरूपेण निवसति । एतत्प्रस्तावे श्रुत्युक्तवह्निस्फुलिङ्गदृष्टान्तो वैशद्य-कारी । तदुक्तम्— "यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद्विविधा सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥" (मुं.उ., २.१.१) इति । इयं च श्रुतिः शिवजीवयोः स्वरूपं तत्सम्बन्धं च द्योतयति । शिवः अंशी सुदीप्तपावकवत्, जीवास्तदंशा स्फुलिङ्गवत् । शिवः सूक्ष्मचिच्छक्ति(सर्वज्ञत्व)विशिष्टः, सूक्ष्माचिच्छक्ति(सर्वकर्तृत्व)-विशिष्टश्च । जीवस्तु स्थूलचिच्छक्ति(किञ्चिज्ज्ञत्व)विशिष्टः, स्थूलाचि-च्छक्ति(किञ्चतकर्तृत्व)विशिष्टश्च । अयं शिवजीवयोः सम्बन्धोऽत्र न केवलं भेदात्मकः परं तु अभेदात्मकोऽपि । तत्र दृष्टान्तोऽग्निस्फुलिङ्ग-सम्बन्धः । यथाऽग्नेः सकाशात्सञ्जातानां विस्फुलिङ्गानाम् अग्नेश्चा-ऽत्यन्तभेदोऽत्यन्ताभेदो वा वक्तुं न शक्यते, किन्तु भेदाभेद एव वक्तव्यः । तथैव शिवात्समुत्पन्नानां शिवांशभूतानां जीवानां शिवस्य चात्यन्त-भेदोऽत्यन्ताभेदो वा वक्तुं न शक्यते किन्तु भेदाभेद एव वक्तव्यः । अंशांशिनोरत्यन्तभेदे सति अग्नेरत्यन्तभिन्नैः जलादिभिरिवाऽग्निकणैरपि दाहक्रिया न संभवेत् । परन्तु तूलादिकं रञ्जकं वस्तु प्रविश्याऽग्निकणो दाहमुत्पादयतीति लोकप्रसिद्धिः । अत्यन्ताऽभेदेऽग्निकणाः पाकादि-क्रियाः अग्न्यंशभूतविस्फुलिङ्गैरपि भवेयुः । एवमेव शिवस्य शिवांशभूत-जीवस्य चाऽत्यन्तभेदाङ्गीकारे शिवाद्भिन्नैः घटपटादिभिरिव जीवेनापि ज्ञानरूपकार्यसिद्धिर्न भवेत् । किन्तु जीवानामपि घटपटादिवस्तुज्ञानं प्रसिद्धमेव । अत्यन्ताभेदाङ्गीकारे शिवनिष्ठाः सर्वज्ञत्वादयो जीवात्मन्यपि संभवेयुः । किन्तु जीवात्मनि ते न संभवन्ति । अत एव द्वैताद्वैतात्मकं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विशेषाद्वैतमङ्गीकृतम् । उक्तं च— "द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञके । वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः ॥" (श्रीकर., भूमिका, श्लो.१५) इति । श्रुतिषु "द्वा सुपर्णा सयुजा सखाया" (मुं.उ., ३.१.१) इत्यादिषु शिवजीवयोः द्वैतं प्रतिपादितम् । "तत्त्वमसि" (छां.उ., ६.८.७), "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०) इत्यादिषु अद्वैतं प्रतिपादितम् । एवमुभयार्थप्रतिपादकानां श्रुतिवाक्यानां समन्वयसम्पादनमेव वीरशैवसिद्धान्तस्य परमलक्ष्यम् ॥३३-३५॥

चन्द्रकान्ते यथा तोयं सूर्यकान्ते यथानलः ।
बीजे यथाङ्कुरः सिद्धस्तथात्मनि शिवः स्थितः ॥३६॥

व्याख्या— जीवे शिवस्थितिं सदृष्टान्तमाह— **चन्द्रकान्त इति । यथा चन्द्रकान्ते** । चन्द्रकान्तो नाम शिलाविशेषः । तदुपरि चन्द्रकिरणपाते जलबिन्दवः निःसरन्तीति प्रसिद्धिः । यथा तादृशे चन्द्रकान्ते **तोयं** जलम् । **यथा सूर्यकान्ते** । सूर्यकान्तो नाम शिलाविशेषः तदुपरि सूर्यकिरणपातेऽग्निकणाः निःसरन्तीति प्रसिद्धिः । यथा तादृशे सूर्यकान्ते **अनलः** अग्निः । **यथा बीजेऽङ्कुरः सिद्धः** स्वाभाविकत्वेन स्थितः । **तथा आत्मनि** तथा जीवात्मनि **शिवः** परमात्मा **स्थितः** तिष्ठति । "तेषां प्रेरको हृदि स्थितः" इति यत्पूर्वमुक्तं तदत्र सदृष्टान्तं विशदीकृतम् । "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै.उ., २.६) इति श्रुत्युक्तदिशा परमात्मा जीवात्मानं प्रविशति । तत्र तादात्म्यसम्बन्धेन तिष्ठति ॥३६॥

आत्मत्वमीश्वरत्वं च ब्रह्मण्येकत्र कल्पितम् ।
बिम्बत्वं प्रतिबिम्बत्वं यथा पूषणि कल्पितम् ॥३७॥

गुणत्रयविभेदेन परतत्त्वे चिदात्मनि ।
भोक्तृत्वं चैव भोज्यत्वं प्रेरकत्वं च कल्पितम् ॥३८॥

व्याख्या— जीवश्च ईश्वरात्मकः शिवश्च परशिवब्रह्मणोऽतिरिक्तौ किन्तु तस्मिन्नेव स्थितौ इति विवक्षुः ग्रन्थकृदेवं निरूपयति— **आत्मत्वमिति ।**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आत्मत्वम् अविद्यायां प्रतिबिम्बितं परशिवब्रह्मत्वम् **ईश्वरत्वं** मायायां प्रतिबिम्बितं परशिवब्रह्मत्वं **चेति** उभयमपि **ब्रह्मणि** परशिवब्रह्मणि **एकत्र** एकस्मिन्नेव कल्पितं स्थितम् । तत्र दृष्टान्तः— बिम्बत्वं स्वमण्डलस्वरूपत्वं **प्रतिबिम्बत्वं** तत्प्रतिच्छायात्वं **यथा पूषणि** सूर्ये **कल्पितं** (एकत्र) स्थितं तथेति । अतः प्रतिबिम्बस्य दर्पणाद्युपाधिकृतत्वेन प्रतिबिम्बत्वं तन्निरूपितबिम्बत्वं च सूर्ये कल्पितमिति यद्यपि वक्तुं शक्यते तथापि परशिवब्रह्मणि तद्व्यतिरिक्तोपाधिरहितत्वात् तथा जीवत्वमीश्वरत्वं तत्र कल्पितमिति वक्तुं न शक्यते । तस्मात् तद्दृष्टान्तो विषम इति नापादनीयम्, बिम्बत्वं प्रतिबिम्बत्वं चेत्युभयमपि सूर्ये एकत्र कल्पितम्, तथैव जीवत्वम् ईश्वरत्वं चेत्युभयमपि परशिवब्रह्मण्येकत्र कल्पितम् इति वक्तुं शक्यत्वात् ॥ **गुणत्रयविभेदेन** सत्त्वरजस्तमोरूपगुणत्रयस्य भेदेन **चिदात्मनि** ज्ञान स्वरूपिणि **परतत्त्वे** परशिवब्रह्मणि **भोक्तृत्वं** सुखदुःखादिकर्मफलानुभोक्तृत्वं **चैव** च एव **भोज्यत्वं** भोगविषयत्वं (भोगपदार्थत्वं) **प्रेरकत्वं च** प्रेरयितृत्वम् अन्तर्यामित्वम् अपि परशिवब्रह्मणि **कल्पितं** स्थितम् । उक्तं च— "भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" (श्वे.उ., १.१२) इति । तत्र भोक्ता जीवः (पशुः), भोज्यं पदार्थजातं (अचरात्मकं जडजगत्) (पाशः) प्रेरकश्च ईश्वरः (पतिः) इति वक्ष्यते ॥३७-३८॥

गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी ।
तद्वैषम्यात् समुत्पन्ना तस्मिन् वस्तुत्रयाभिधा ॥३९॥

व्याख्या— वस्तुत्रयं भोक्तृ-भोज्य-प्रेरकात्मकम् । तस्य समुत्पत्तिकारणमाह— **गुणेति** । **ब्रह्मनिष्ठा** परशिवब्रह्मणि सामरस्याभेदलक्षणतादात्म्यसम्बन्धेन वर्तमाना **सनातनी** नित्या **शक्तिः** इच्छाज्ञानक्रियात्मिका स्वाभाविकी विमर्शशक्तिः **गुणत्रयात्मिका** गुणानां त्रयं तदात्मिका सत्त्वरजस्तमोरूपत्रिगुणात्मिका अस्ति । "परास्य शक्तिर्विविधैव श्रूयते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वाभाविकी ज्ञानबलक्रिया च” (श्वे.उ., ६.८) इति प्रमाणम्। **तद्वैषम्यात्** गुणत्रयस्य समावस्थाविचलनात्मकवैषम्यात् **तस्मिन्** परशिवब्रह्मणि **वस्तुत्रयाभिधा** भोक्त्रादिवस्तुत्रयाभिधानम् ॥३९॥

किञ्चित्सत्त्वरजोरूपं भोक्तृसंज्ञकमुच्यते ।
अत्यन्ततामसोपाधिर्भोज्यमित्यभिधीयते ॥
परतत्त्वमयोपाधिर्ब्रह्मचैतन्यमीश्वरः ॥४०॥

व्याख्या— वस्तुत्रयं गुणवैषम्यादित्युक्तम्, तत्कथमित्यत्राह— **किञ्चिदिति** । **किञ्चिद्** अल्पमात्रं **सत्त्वरजोरूपं** सत्त्वगुणेन मिश्रितरजोगुणस्वरूपं वस्तु **भोक्तृसंज्ञकं** 'भोक्ता इति' संज्ञा यस्य तद् भोक्तृसंज्ञं, स्वार्थे कप्-विधानात् भोक्तृसंज्ञकं भोक्तृनामकम् **उच्यते** कथ्यते । किञ्चित्सत्त्वमिश्रणाद् अगूढचैतन्यात्मको भोक्ता । **अत्यन्ततामसोपाधिः** तामसश्चासौ उपाधिश्च तामसोपाधिः अत्यन्तम् अत्यधिकं तमोगुणवैशिष्ट्ययुक्तं गूढचैतन्यवद् वस्तु **भोज्यम् इति** भोगविषयात्मकम् **इति अभिधीयते** इत्येवं कथ्यते । **परतत्त्वमयोपाधिः** परतत्त्वस्वरूपवैशिष्ट्ययुक्तं **ब्रह्मचैतन्यं** परशिवब्रह्मचैतन्यं **ईश्वरः** परशिवब्रह्मणो मायाशक्ति प्रतिबिम्बितस्वरूप ईश्वरः 'प्रेरक' इत्यपरनामभाक् ॥४०॥

भोक्ता भोज्यं प्रेरयिता वस्तुत्रयमिदं स्मृतम् ।
अखण्डे ब्रह्मचैतन्ये कल्पितं गुणभेदतः ॥४१॥

अत्र प्रेरयिता शम्भुः शुद्धोपाधिर्महेश्वरः ।
संमिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः ॥४२॥

भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम् ।
सर्वज्ञः प्रेरकः शम्भुः किञ्चिज्ज्ञो जीव उच्यते ॥
अत्यन्तगूढचैतन्यं जडमव्यक्तमुच्यते ॥४३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— अथोक्तं वस्तुत्रयविषयं विशदयति— **भोक्तेति** । पूर्वोक्तरीत्या वस्तुत्रयं समुपकल्पितम् । कस्मिन् ? **अखण्डे** भेदरहितत्वेन **पूर्णे ब्रह्मचैतन्ये** परशिवब्रह्मस्वरूपे चैतन्ये **गुणभेदतः** सत्त्वादिगुण-तारतम्यात् **कल्पितं** रूपितम् **इदम्** एतादृशं **भोक्ता** भोगकर्ता **भोज्यं** भोगसामग्री **प्रेरयिता** प्रेरक ईश्वर इति **वस्तुत्रयं** त्रिविधं वस्तु **स्मृतम्** ज्ञातम् ॥ **अत्र** अस्मिन् वस्तुत्रये **शम्भुः** शं भावयिता शान्तिप्रदाता **शुद्धोपाधिः** निर्मलविशेषणविशिष्टः **महेश्वरः** परमेश्वरः **प्रेरयिता** प्रेरकः। स पतिशब्देन ज्ञायते । **संमिश्रोपाधयः** संमिश्रः उपाधिः येषां ते, तथोक्ताः, गुणमिश्रणविशेषचैतन्ययुक्ताः इत्यर्थः, **सर्वे** समस्ताः **भोक्तारः** सुखदुःखभोगयुक्ताः सन्तः **पशवः** पशुशब्दवाच्याः **स्मृता** ज्ञाताः ॥ **शुद्धतामसरूपकं** केवलतमोगुणस्वरूपं **भोज्यं** भोगवस्तु **अव्यक्तम् इत्युक्तम्** अव्यक्तं नाम प्रकृतिः, अव्यक्तचैतन्यं वेति कथितम् । एतदेव पाशशब्देन ज्ञायते । **सर्वज्ञः** सर्ववित् **प्रेरकः** अन्तर्यामित्वेन शुभाशुभकर्मचोदकः, **शम्भुः** शान्तिप्रदाता शिवः । स एव पतिः । **किञ्चिज्ज्ञः** परिमितज्ञानवान् **जीव उच्यते** 'जीवः' इति कथ्यते । स एव पशुः । **अत्यन्तगूढचैतन्यं** अत्यन्तम् अतिशयेन गूढम् अव्यक्तं चैतन्यं प्रज्ञाशालित्वं यस्य तत्, अनभिव्यक्तचैतन्यम् इत्यर्थः, तादृशं **जडम्** अचेतनम् **अव्यक्तम् उच्यते** 'अव्यक्तम्' इति भण्यते । एतदेव पाशः । एवं प्रेरकः, भोक्ता, भोज्यं चेति वस्तुत्रयं क्रमेण पतिः, पशुः, पाशश्चेति पदार्थत्रयम् । तदुक्तम्— "ब्रह्मादिस्तम्बपर्यन्तं पशवः परिकीर्तिताः । शिवः पतिरिति प्रोक्तः पाशः कर्ममलादिकम् ॥" (सू.आ., उ.भा., क्रि.पा., ५.२०) इति, "ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः। पशवः परिकीर्त्यन्ते संसारवशवर्तिनः॥ तेषां पतित्वाद्विश्वेशः शिवः पशुपतिः स्मृतः । मलमायादिभिः पाशैः स बध्नाति पशून् पतिः ॥" (चं.आ., उ.भा., क्रि.पा., १.१०-११) इति च ॥४१-४३॥

उपाधिः पुनराख्यातः शुद्धाशुद्धविभेदतः ।
शुद्धोपाधिः परा माया स्वाश्रया मोहकारिणी ॥४४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अशुद्धोपाधिरप्येवमविद्याश्रयमोहिनी ।
अविद्याशक्तिभेदेन जीवा बहुविधाः स्मृताः ॥४५॥

व्याख्या— परशिवजीवस्वरूपं दर्शयितुं पूर्वोक्तमायोपाधिं द्विधा विभजते— **उपाधिरिति । उपाधिः** पूर्वोक्तमायारूपः विशेषधर्मः **पुनः** पुनरपि **शुद्धाशुद्धविभेदतः** शुद्धश्चाऽशुद्धश्च शुद्धाशुद्धौ तयोर्भेदः शुद्धाशुद्धभेदः, तस्मात्, शुद्धोपाधिः अशुद्धोपाधिश्चेति भेदवशात् **आख्यातः** उक्तः, द्विधा इति शेषः । तत्र **शुद्धोपाधिः** गुणैरमिश्रितः उपाधिः **परा माया** ऊर्ध्वमाया, इति कथ्यते इति शेषः । सा माया **स्वाश्रया** स्वं परमात्मानं शिवम् आश्रयते इति तथोक्ता । **मोहकारिणी** मोहोत्पादिका भवति । **अशुद्धोपाधिः अपि** गुणमिश्रितः उपाधिः अपि **एवं** तथैव **अविद्या** अविद्याख्या माया **आश्रयमोहिनी** आश्रयं मोहयतीति स्त्री आश्रयमोहिनी । सा अधोमायेति कथ्यते । **अविद्याशक्तिभेदेन** अविद्या-स्वरूपिण्याः मायाशक्त्याः भेदेन अंशभेदेन **जीवाः** शरीरिणः **बहुविधाः** बहुप्रकाराः **स्मृताः** ज्ञाताः ॥४४-४५॥

मायाशक्तिवशादीशो नानामूर्तिधरः प्रभुः ।
सर्वज्ञः सर्वकर्ता च नित्यमुक्तो महेश्वरः ॥४६॥

किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान् ।
अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः ॥४७॥

परिभ्रमन्ति संसारे निजकर्मानुसारतः ।
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः ॥४८॥

व्याख्या— शिवजीवयोः स्वस्वमायावशात् स्वरूपमाह— **मायेति । मायाशक्तिवशात्** मायाशक्तिः परमात्मनः सहजशक्तिर्न भवति, किन्तु परिग्रहशक्तिः, तस्याः कारणात् **ईशः** ईश्वरः **प्रभुः** कर्तुमकर्तुमन्यथाकर्तुं समर्थः स्वतन्त्रश्च **सर्वज्ञः** सर्ववित् **सर्वकर्ता** समस्तप्रपञ्चसृष्टिस्थिति-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लयतिरोधानानुग्रहात्मकपञ्चकृत्यकुशलः । "सर्वज्ञः पञ्चकृत्यसम्पन्नः सर्वेश्वर ईशते" (जा.उ., २) इति, "जगज्जन्मस्थितिध्वंसतिरोभावविमुक्तयः । कृत्यं सकारकफलं ज्ञेयमस्यैतदेव हि ॥" (मृ. आ., २.३) इति च प्रमाणम् । तथापि **नित्यमुक्तः** नित्यं संसारविदूरः **महेश्वरः** परमेश्वरः (अपि) **नानामूर्तिधरः** पञ्चविंशतिलीलामूर्तिधारी भवति । जगद्धिताय जीवानां बुद्धिप्रेरणाय केवलं परमात्मनो जगद्व्यापारः । अत्र न तस्य कोऽपि स्वार्थः । लोकसंग्रहार्थमेव तद्व्यापारः । तदुक्तं भगवता— "न मे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानावाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः॥" (भ.गी., ३.२२-२४) इति ॥ **किञ्चित्कर्ता** परिमितकर्तृत्वशक्तिमान् **किञ्चिज्ज्ञः** परिमितज्ञानसम्पन्नः **बद्धः** आणवादिभिः अनादिमलैः बद्धः संसारी **अनादिशरीरवान्** अनादिकालात् मनुष्याद्यपरिमितशरीरयुक्तः जीवः इति शेषः । **च** इति समुच्चये । **अविद्यामोहिताः** अविद्यया अनाद्यज्ञानेन मोहिताः भ्रमिताः अत एव **ब्रह्मैक्यज्ञानवर्जिताः** "अहं ब्रह्मास्मि" (भृ.उ., १.४.१०) इत्यादि ब्रह्मैक्यज्ञानरहिताः सन्तः **संसारे** जननमरणचक्रे **निजकर्मानुसारतः** सञ्चितादिस्वीयकर्मानुसारेण **देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः** देवाः तिर्यञ्चः मनुष्याः इत्यादि नानायोनीनां विविधजन्ममूलानां विभेदवशात् **परिभ्रमन्ति** पुनः पुनः सञ्चरन्ति । "अनीशश्चात्मा बध्यते भोक्तृभावात्" (श्वे.उ., १.८) इति हि श्रुतिः ॥४६-४८॥

चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः ।
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम् ॥४९॥

व्याख्या— शरीरिणां स्थितिमाह— **चक्रेति** । **शरीरिणः** जीवात्मानः **चक्रनेमिक्रमेण एव** चक्रं रथाङ्गं तस्य नेमिः तन्मण्डलान्तर्गतलोहवलयः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्य क्रमेण रीत्या ऊर्ध्वाधःसञ्चलनेन परिवर्तनम्, तेनैव **भ्रमन्ति** भ्रमणं कुर्वन्ति । तत्र **केवलम्** अनितरसाधारणं **कर्म** पुण्यपापात्मककर्मफलं **जात्यायुर्भोगवैषम्यकारणम्** जातिः जन्म, आयुः जीवितावधिः, भोगः सुखदुःखानुभवः, तेषां वैषम्यं वैपरीत्यं तस्य कारणम् हेतुः । तथा चोक्तम्— "क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः । सति मूले तद्विपाको जात्यायुर्भोगाः ।" (यो.सू., २.१२-१३) इति ॥४९॥

एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः ।
एतेषां भ्रमतां नित्यं कर्मयन्त्रनियन्त्रणे ॥५०॥

व्याख्या— पूर्वोक्तदिशा जात्यायुर्भोगवैषम्यकारणं यदि केवलं कर्म, तर्हि किमर्थम् ईश्वरः अङ्गीकरणीय इति चेदुच्यते— **एतेषामिति । भ्रमतां** संसारचक्रे परिभ्रमतां **एतेषां देहिनां** पूर्वोक्तस्वरूपिणां जीवात्मनां **कर्मयन्त्रनियन्त्रणे** कर्मणः यन्त्रं निर्बन्धः तस्य नियन्त्रणे नियमने **नित्यं** निश्चयेन **एतेषां** कर्मणां **प्रेरकः** प्रेरणादाता **परमेश्वरः** महेश्वरः **साक्षी** प्रत्यक्षदर्शी निर्देशकः नियामकश्च । उक्तं च— "त्रिषु धामसु यद्भोज्यं भोक्ता भोगश्च यद्भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः" (कै.उ., १८) इति ॥५०॥

देहिनां प्रेरकः शम्भुर्हितमार्गोपदेशकः ।
पुनरावृत्तिरहितमोक्षमार्गोपदेशकः ॥५१॥

व्याख्या— न केवलं प्रेरकः किन्तु विशेषफलप्रदाताऽपि इत्याह— **देहिनामिति । देहिनां** शरीरिणां **प्रेरकः** प्रचोदकः, **हितमार्गोपदेशकः** हितकरो मार्गः हितमार्गः सोपकारः पन्थाः, तम् उपदिशतीति हितमार्गोपदेशकः हितमार्गप्रबोधकः **शम्भुः** शम्-भावयिता परशिवः **पुनरावृत्तिरहितमोक्षमार्गोपदेशकः** 'न पुनरावर्तते, न पुनरावर्तते' इति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रुत्युक्तदिशा पुनरावृत्तिरहितः पुनरागमनरहितः मोक्षस्य मार्गो मुक्तेः पन्थाः, तम् उपदिशतीति तथोक्तः ॥५१॥

स्वकर्मपरिपाकेन प्रक्षीणमलवासनः ।
शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः ॥५२॥

शुद्धान्तःकरणो जीवे शुद्धकर्मविपाकतः ।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी ॥५३॥

जन्तुरन्त्यशरीरोऽसौ पिण्डशब्दाभिधेयकः ॥५४॥

व्याख्या— मोक्षमार्गः कथमुद्घाट्यते? इति चेदुच्यते— **स्वकर्मेति**। **स्वकर्मपरिपाकेन** स्वस्य कर्म स्वकर्म, तस्य परिपाकः परिणामः, तेन, **प्रक्षीणमलवासनः** मलस्य वासना संस्कारः मलवासना, प्रक्षीणा विनष्टा मलवासना यस्य सः, तादृशः, **अयं जीवः** अयं जीवात्मा **शिवप्रसादात्** शिवस्य प्रसादाद् अनुग्रहात् **शुद्धमानसः** शुद्धं मानसं यस्य सः, तादृशः, निर्मलचित्तः **जायते** भवति ॥ **शुद्धान्तःकरणे** शुद्धम् अन्तःकरणं बुद्ध्यहंकारमनोरूपं यस्य सः, तस्मिन्, **जीवे** जीवात्मनि **शुद्धकर्मपरिणामतः** शुद्धं कर्म निर्मलं कर्मफलं, तस्य परिणामतः विपाकात्, **शिवकारुण्यात्** परशिवकृपावशात् **प्रस्फुटा** सुस्पष्टा **ऐश्वरी** ईश्वरसम्बन्धिनी **भक्तिः** जायते उत्पद्यते ॥ **असौ** जागृतशिवभक्तिः अयम्, **जन्तुः** शरीरी **अन्त्यशरीरः** अन्तिमं शरीरं यस्य सः, तादृशः, चरमदेही, पुनर्जन्मरहितः इति यावत्, **पिण्डशब्दाभिधायकः** 'पिण्डः' इति शब्दः पिण्डशब्दः, स एव **अभिधायकः** अभिधावृत्त्याऽर्थप्रतिपादकः, वाचकः इति यावत् ॥ स्वकर्मविपाकेन विनष्टमलवासनः सन् यदा जीवः शिवप्रसादं प्राप्नोति तदा शिवे भक्तिर्जायते। शिवानुग्रहात्मिका शक्तिरेव जीवात्मनि भक्तिरूपेण परिणमते। अत एव जीवात्मनि भक्तेर्जागृतिः 'शक्तिपात' शब्देन व्यवह्रियते। "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" (कठ. उ., ६.१४; बृ. उ., ४.४.७) इति "यमेवैष वृणुते तेन लभ्यः, तस्यैष आत्मा विवृण्वते तनूं स्वाम्" (कठ. उ., २.२३) इति च श्रुतिप्रमाणम् । अयं पिण्ड-शब्दवाच्यः जीवः 'अन्त्यशरीरी' इत्युच्यते । "तदस्य तृतीयं जन्म" (ऐ.उ., ४.४) इति वर्णितम् । शङ्करभाष्यानुसारं 'तृतीयं जन्म' एव 'चरमं' जन्म । मातुर्गर्भे पितुवीर्यस्थापनं प्रथमं जन्म । मातुर्गर्भात् शिशोर्जननं द्वितीयं जन्म । वर्णयित्वेदं सर्वं ऋषिर्वामदेव आह— "शतं मा पुर आयसीररक्षन्नश्चः श्येनो जवसा निरदीयम्" इति । (ऐ. उ., ४.५) । अस्यार्थः— शतमासन् अयःसदृशानि शरीराणि । आत्मज्ञानेन तानि विभज्य बहिरागतोऽहम् इति । ऋषिरिदं वाक्यं स्वमातुर्गर्भे शयानोऽवदत् । तदेव पितुरारभ्य तस्य तृतीयं जन्म । अतस्तदेव तृतीयं जन्म । 'पिडि' संघाते धातोः अच् प्रत्यय (अ) योजनेन (पा. अ., ३.१.१३४) निष्पन्नः पिण्डशब्दः वीरशैवपरिभाषायां शुद्धन्तःकरणजीवे वर्तते ॥ स एवान्त्य-शरीरः ॥५२-५४॥

— इति पिण्डस्थलम् —

२. अथ पिण्डज्ञानस्थलम् – (२)

शरीरात्मविवेकेन पिण्डज्ञानी स कथ्यते ।
शरीरमेव चार्वाकैरात्मेति परिकीर्त्यते ॥५५॥

इन्द्रियाणां तथात्मत्वमपरैः परिभाष्यते ।
बुद्धितत्त्वगतैर्बौद्धैर्बुद्धिरात्मेति गीयते ॥५६॥

व्याख्या— शरीरात्मविवेक एव पिण्डज्ञानम् । तदेवोच्यते— **शरीरेति** । **शरीरात्मविवेकेन** शरीरम् अन्यद् आत्मा तद्भिन्न इति विवेकः विवेचनं शरीरात्मविवेकः, तेन सः जीवः **'पिण्डज्ञानी'** इति **कथ्यते** उच्यते । तत्सम्बन्धि स्थलं पिण्डज्ञानस्थलम् इत्यवधेयम् । तत्स्वरूपविषये

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मतभेदोऽस्ति । कीदृशः इति चेदुच्यते— **चार्वाक्यैः** लोकायतिकैः **शरीरमेव** देह एव **आत्मा इति** जीवात्मा इति **परिकीर्त्यते** निरूप्यते । "चैतन्यविशिष्टः कायः पुरुषः" इति बार्हस्पत्यसूत्रम् (सर्वदर्शनसंग्रहे उल्लिखितम्) । **अपरैः** अन्यैः इन्द्रियाणां मनसः आरभ्य ज्ञानेन्द्रिय-कर्मेन्द्रियाणां आत्मत्वम् जीवात्मत्वं **परिभाष्यते** परिकीर्त्यते । **बुद्धितत्त्वगतैः** बुद्धितत्त्वे निष्ठैः **बौद्धैः** बुद्धमतानुयायिभिः **बुद्धिः आत्मा** बुद्धिरेव आत्मा इति गीयते कीर्त्यते ॥ गृहक्षेत्रादेः वृद्धिक्षयाभ्यां सुखदुःखोदयाद् गृहक्षेत्रादिकमात्मेति चावकिभ्योऽपि स्थूलतरबुद्धयो विषयात्मवादिनो परमलौकिकाः मन्वते । ततोऽपि किञ्चिदधिकबुद्धयः चार्वाका गृहक्षेत्रादि चैतन्यरहितमिति मत्वा चैतन्ययुक्तं शरीरमेवाऽऽत्मेति मन्यन्ते । शरीरे प्राणपरिस्पन्दाभावे ज्ञानानुदयात् प्राण एवात्मेति केचन वदन्ति । स्वप्नावस्थायां प्राणपरिस्पन्दे सत्यपि, इन्द्रियव्यापारराहित्ये ज्ञानाभावात् इन्द्रियाण्येवात्मेति केचित् कथयन्ति । सूक्ष्मेक्षिकतया विचार्यमाणे शरीरादे-र्ज्ञानाभावेन जडात्मकत्वेन चात्मत्वं न संभवतीति बुद्धेरात्मताऽङ्गीकर-णीयेति बौद्धा भावयन्ति । बुद्धेश्चक्षुरादिकानामवलम्बनात् बुद्धेरात्मता न संभवति । अतः मम गृहक्षेत्रादि, मम शरीरम्, मम इन्द्रियम्, मम बुद्धिः इत्याद्युक्तिज्ञापनात् गृहक्षेत्रशरीरेन्द्रियबुद्ध्युत्तीर्णः अहंप्रत्ययवेद्यः चैतन्ययुक्तः शरीरी आत्मेति निर्णीयते ॥५५-५६॥

नेन्द्रियाणां न देहस्य न बुद्धेरात्मता भवेत् ।
अहंप्रत्ययवेद्यत्वाद् अनुभूतस्मृतेरपि ॥५७॥

शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः ।
आत्मस्थितिविवेकी यः पिण्डज्ञानी स कथ्यते ॥५८॥

व्याख्या— पूर्वोक्तं निराकृत्याऽऽस्तिकमतं स्थापयति— **नेन्द्रि-याणमिति । न इन्द्रियाणां न देहस्य न बुद्धेः** (वा) **आत्मता** आत्मत्वं **भवेत्** स्यात् । परं तु **अहंप्रत्ययवेद्यत्वात्** 'अहं' इति प्रत्ययो ज्ञानम्, तेन वेद्यः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्य भावः अहंप्रत्ययवेद्यत्वं तस्मात् । **अनुभूतस्मृतेः अपि** अनुभूता ज्ञानविषयीकृता स्मृतिः स्मरणम् अनुभूतस्मृतिः, तस्याः । द्वे अपि कारणवचने । अहंप्रत्ययवेद्यत्वम् प्रथमम् । इन्द्रियादीनां तदभावः स्पष्टः । अनुभूतस्मृतित्वं च द्वितीयम् । पूर्वदृष्टस्य पूर्वानुभूतस्य वा प्रियादीनां पुनश्चिन्तनं स्मृतिः । पूर्वानुभूतस्य पुनश्चिन्तनस्य च समानम् अधिकरणं स्यात् । तादृशाधिकरणत्वं शरीरेन्द्रियबुद्धीनां न संभवतीति तेषाम् आत्मत्वं न भवति । 'अहं पूर्वं देवदत्तमपश्यत् तमेवेदानीमहं स्मरामि' इति एकाधिकरणत्वम् अहंप्रत्ययवेद्यस्य संभवत्येव । अतः **शरीरेन्द्रियबुद्धिभ्यः** शरीरश्च, इन्द्रियश्च, बुद्धिश्च, शरीरेन्द्रियबुद्धयः, ताभ्यः, **व्यतिरिक्तः** भिन्नः **सनातनः** शाश्वतः, "सनातनोऽच्युते । पितॄणामतिथौ शाश्वते स्थिरे" इति हेमकोशः, इति **यः आत्मस्थितिविवेकी** आत्मनः स्थितिः स्वरूपम् आत्मस्थितिः, विवेकोऽस्याऽस्तीति विवेकी, आत्मस्थितेः विवेकी, तादृशः, **सः पिण्डज्ञानी** पिण्डज्ञानी इति **कथ्यते** उच्यते ॥ उक्तं तर्कदीपिकायां (तर्कसंग्रहः, चौखाम्बा संस्कृत सीरीज्, वाराणसी, २००९, पृ. १२)— "ननु 'मनुष्योऽहं' 'ब्राह्मणोऽहं' इत्यादौ सर्वत्राहंप्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मेति चेन्न, शरीरस्यात्मत्वे करपादादि नाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात् । नापीन्द्रियाणामात्मत्वम्, तथात्वे 'योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामि' इत्यनुसन्धानाभाव-प्रसङ्गात्, अन्यानुभूतेऽन्यस्यानुसन्धानायोगाच्च । तस्माद् देहेन्द्रियव्यति-रिक्तो जीवः" इति ॥५७-५८॥

नश्वराणि शरीराणि नानारूपाणि कर्मणा ।
आश्रितो नित्य एवासाविति जन्तोर्विवेकिता ॥५९॥
शरीरात् पृथगात्मानमात्मभ्यः पृथगीश्वरम् ।
प्रेरकं यो विजानाति पिण्डज्ञानीति कथ्यते ॥६०॥

व्याख्या— न केवलम् आश्रिताश्रयभावसम्बन्धेन शरीरात्मविवेकः परं तु पृथक्त्वेन स्थितोऽप्यन्तर्यामित्वेन च आत्मनो नियन्त्रक

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ईश्वरबोधोऽपि प्राप्तव्य इत्याह— **नश्वराणीति । शरीराणि** कलेवराणि (देहाः) **कर्मणा** कर्मवशात् **नानारूपाणि** बह्वाकारयुक्तानि, तानि **आश्रितः** आश्रयत्वेन प्राप्तः, **नित्यः** शाश्वतः **असौ इति** अयम् इति **जन्तोः** शरीरिणः **विवेकिता** विवेकिनो भाव, विवेकयुक्तता इत्यर्थः ॥ तत्र **आत्मानं** जीवात्मानं **शरीरात् पृथक्** शरीराद् भिन्नम् इति, **ईश्वरं** परमेश्वरम् **आत्मभ्यः** जीवात्मभ्यः **पृथक्** भिन्नम् इति, **प्रेरकम्** अन्तर्यामित्वेव अन्तरात्मनः प्रेरकं इति च **यः विजानाति** यो विशेषेण जानाति सः **पिण्डज्ञानी** इति **कथ्यते** उच्यते ॥ "चन्द्रकान्ते यथा तोयम्" इत्यादि पूर्वमेव (५.३६) उक्तम् । अयमेव नित्यानित्यविवेचनस्वरूपः क्षेत्रक्षेत्रज्ञविवेकः । तदुक्तं भगवता गीतायाम्— "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । एतद्यो वेद तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥" (भ.गी., १३.१) इति । क्षेत्रज्ञत्वमेवात्र पिण्डज्ञानित्वम् ॥५९-६०॥

– इति पिण्डज्ञानस्थलम् –

३. अथ संसारहेयस्थलम् – (३)

निरस्तहृत्कलङ्कस्य नित्यानित्यविवेकिनः ।
संसारहेयताबुद्धिर्जायते वासनाबलात् ॥६१॥

व्याख्या— पिण्डज्ञानिनः संसारहेयस्थलमाह— **निरस्तेति । निरस्तहृत्कलङ्कस्य** हृदः कलङ्कः हृत्कलङ्कः हृदयदोषः, निरस्तः निर्मूलितः हृत्कलङ्कः यस्य सः निरस्तहृत्कलङ्कः, तस्य प्रक्षीणपापस्येत्यर्थः । **नित्यानित्यविवेकिनः** नित्यम् अनित्यं चेति विवेकः विवेचनम् अस्यास्तीति नित्यानित्यविवेकी, तस्य । **वासनाबलात्** तत्संस्कारवशात् **संसारहेयताबुद्धिः** हेयस्य भावः हेयता वैराग्यम्, हेयताया बुद्धिः हेयताबुद्धिः वैराग्यभावना **जायते** उत्पद्यते ॥ संसारहेयता वैराग्यम् । वैराग्यं प्रज्ञादीपं प्रज्वालयति । उक्तं तत्— "वैराग्यतैलसंपूर्णे भक्तिवर्तिसमन्विते । प्रबोधपूर्णपात्रे तु ज्ञानदीपं विलोकयेत्" (द.मू.उ., २७) इति ॥६१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ऐहिके क्षणिके सौख्ये पुत्रदारादिसंभवे ।
क्षयित्वादियुते स्वर्गे कस्य वाञ्छा विवेकिनः ॥६२॥

व्याख्या— नश्वरत्वबोधो वैराग्यस्य कारणमित्याह— **ऐहिके इति । ऐहिके** लौकिके **क्षणिके** विद्युत्स्फुरणवच्चञ्चले, नश्वरे इत्यर्थः, **पुत्रदारादिसंभवे** पुत्रः सुतः, दाराः पत्नी, इत्यादिभ्यः संभवतीति पुत्रदारादिसंभवः, तस्मिन्, **सौख्ये** सुखे, **क्षयित्वादियुते** क्षयित्वं नश्वरत्वं, इत्यादिभिः युते क्षयित्वादियुते क्षयित्वादियुक्ते; **स्वर्गे** परलोके सुखाद्युपलब्धिस्थानत्वेन प्रसिद्धे च **कस्य विवेकिनः** विवेकशालिनः कस्य **वाञ्छा** इच्छा भवति ? न कस्यापीत्यर्थः । लौकिकसुखं त्वनुभवगोचरम् । सत्कर्मद्वारा प्राप्यमाणस्य स्वर्गसुखस्यापि नश्वरत्वमेव । तदुक्तं भगवता— "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।" (भ.गी., ९.२१) इति । "तद्यथेहकर्मचितो लोकः क्षीयते एवमेव पुण्यचितो लोकः क्षीयते" (छां.उ., ८.१.६) इति । [कर्मचितो लोकः = इहलोकः; पुण्यचितोलोकः स्वर्गलोकः] । नश्वरत्वाद् हेयबुद्धिरिति तु स्पष्टम् ॥६२॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
जन्तुर्मरणजन्माभ्यां परिभ्रमति चक्रवत् ॥६३॥

व्याख्या— बद्धस्य जीवात्मनः संसारे भ्रमणमाह— **जातस्येति । जातस्य** जन्म प्राप्तस्य **मृत्युः** मरणं **ध्रुवं** निश्चितम्, **मृतस्य च** मरणं प्राप्तस्य च **जन्म** जननमपि ध्रुवं निश्चितम् । **जन्तुः** जीवः **मरणजन्माभ्यां** मरणं च जन्मं च मरणजन्मंनी, ताभ्याम्, **चक्रवत्** रथाङ्गवत् **परिभ्रमति** परिवर्तते ॥ तदुक्तं भगवता— "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥" (भ.गी., २.२७) इति ॥ शोकेन किं प्रयोजनम्, ततो मुक्त्यर्थं प्रयतस्व, इति भगवता चोद्यते ॥६३॥

मत्स्यकूर्मवराहाद्यैर्नृसिंहमनुजादिभिः ।
जातेन निधनं प्राप्तं विष्णुनापि महात्मना ॥६४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— कर्मवशात् जननमरणेऽनिवार्ये इति सदृष्टान्तमाह— **मत्स्येति** । दुरात्मनां दैत्यादीनां विनाशाय भक्तानुग्रहाय च **मत्स्यकूर्म-वराहाङ्गैः** मत्स्यः मीनः, कूर्मः कच्छपः, वराहः सूकरः, तेषां अङ्गैः शरीरैः, **नृसिंहमनुजादिभिः** नृसिंहः नरसिंहः, मनुजः मनुष्यः, इत्यादिभिः शरीरैश्च **जातेन** अवतारं धृतवता **महात्मना** महापुरुषेण **विष्णुना अपि** विष्णुभगवता अपि **निधनं** मरणं **प्राप्तम्** आसादितम् ॥ महाविष्णुनापि जननमरणावस्थाऽनुभूता, अन्येषां किमु वक्तव्यम् इति तात्पर्यम् ॥६४॥

भूत्वा कर्मवशाज्जन्तुर्ब्राह्मणादिषु जातिषु ।
तापत्रयमहावह्निसन्तापाद् दह्यते भृशम् ॥६५॥

व्याख्या— कर्मवशादेव जन्म प्राप्य जीवस्तापत्रयाग्नौ प्लुष्टो भवतीत्याह— **भूत्वेति** । **कर्मवशात्** कर्मणः कारणात् **जन्तुः** जीवः **ब्राह्मणादिषु जातिषु** ब्राह्मणादिषु वर्णेषु **भूत्वा** जन्म प्राप्य **तापत्रयमहावह्निसन्तापात्** तापानां त्रयं तापत्रयम्, महांश्च असौ वह्निश्च महावह्निः, तापत्रयमेव महावह्निः तापत्रयमहावह्निः (रूपकम्), तस्य सन्तापः दाहः, तापत्रय-महावह्निसन्तापः, तस्मात्, **भृशम्** अत्यन्तं **दह्यते** तप्यते ॥६५॥

कर्ममूलेन दुःखेन पीड्यमानस्य देहिनः ।
आध्यात्मिकादिना नित्यं कुत्र विश्रान्तिरिष्यते ॥६६॥

व्याख्या— कर्म अस्ति चेद् दुःखमप्यस्त्येव, अवश्यमनुभोक्तव्यं तदित्याह— **कर्मेति** । **कर्ममूलेन** कर्म मूलं यस्य तत् कर्ममूलं, तेन, **आध्यात्मिकादिना** आध्यात्मिकम् आदि यस्य तत् आध्यात्मिकादि, तेन, **दुःखेन** तापेन **पीड्यमानस्य** बाध्यमानस्य **देहिनः** शरीरिणः **नित्यं** निश्चयेन **कुत्र** कस्मिन्नपि स्थाने **विश्रान्तिः** उपशमनं **इष्यते** प्राप्यते ? न कुत्रापि इत्यर्थः ॥६६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आध्यात्मिकं तु प्रथमं द्वितीयं चाधिभौतिकम् ।
आधिदैविकमन्यच्च दुःखत्रयमिदं स्मृतम् ॥६७॥

व्याख्या— दुःखत्रयमाह— **आध्यात्मिकमिति** । **प्रथमम्** आदिमम् **आध्यात्मिकम्** आध्यात्मिकाख्यम्, **द्वितीयं चाधिभौतिकं** द्वितीयस्थानीयं चाधिभौतिकाभिधम्, **अन्यच्च** तृतीयमित्यर्थः, **आधिदैविकम्** आधिदैविकनामकम् इति **इदं** एतत् त्रयं **दुःखत्रयं** तापत्रयम् इति **स्मृतम्** ज्ञातम् ॥६७॥

आध्यात्मिकं द्विधा प्रोक्तं बाह्याभ्यन्तरभेदतः ।
वातपित्तादिजं दुःखं बाह्यमाध्यात्मिकं मतम् ॥६८॥

रागद्वेषादिसम्पन्नमान्तरं परिकीर्त्यते ।
आधिभौतिकमेतद्धि दुःखं राजादिभूतजम् ॥६९॥

आधिदैविकमाख्यातं ग्रहयक्षादिसम्भवम् ।
दुःखैरेतैरुपेतस्य कर्मबद्धस्य देहिनः ॥
स्वर्गे वा यदि वा भूमौ सुखलेशो न विद्यते ॥७०॥

व्याख्या— दुःखत्रयस्वरूपमाह— **आध्यात्मिकमिति** । तत्र **आध्यात्मिकम्** आध्यात्मिकाख्यं दुःखं **बाह्याभ्यन्तरभेदतः** बाह्यं बहिर्व्यक्तम् आभ्यन्तरम् आन्तरं चेति भेदवशात् **द्विधा** द्विप्रकारं **प्रोक्तं** कथितम् । **वातपित्तादिजं** वातः, पित्तं, कफश्च, तैः सम्भवं **दुःखं** तापः **बाह्यमाध्यात्मिकं** बहिरभिव्यक्तम् आध्यात्मिकं **मतम्** अभिप्रेतम् । वातपित्तकफाः देहसंभवहेतव इत्युच्यन्ते । तैरेवाधोमध्योर्ध्वस्थितैः शरीरमिदं धार्यते, यदि तेऽव्यापन्ना भवन्ति । ते एव यदि व्यापन्नाः प्रलयहेतवः । (सु. सू., २२.३) । वातः नितम्बगुदसंश्रयः, तदुपरि नाभेरधः पक्वाशयमध्ये पित्तम्, कफश्चाऽऽमाश्रयः । (सु. सू., २१.६) ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रागद्वेषादिसम्पन्नं रागः अभिमतविषयाभिलाषः, द्वेषः अरुचिः अप्रीतिर्वा इत्यादिभिः सम्पन्नं संभवम् **आन्तरम्** आभ्यन्तरमाध्यात्मिकम् इति **परिकीर्त्यते** कथ्यते । **एतद्धि** एतत् हि **राजादिभूतजं** राजा इत्यादिभ्यः प्राणिभ्यः संभवं **दुःखम् आधिभौतिकम्** आधिभौतिकाख्यम् ॥ **ग्रहायक्षादिसम्भवं** ग्रहाः यक्षादयः, एतेभ्यः सम्भवं **आधिदैविकम्** आधिदैविकं दुःखम् इति **आख्यातम्** उक्तम् । **एतैः दुःखैः उपेतस्य** एतैस्त्रिभिः तापैः युक्तस्य **कर्मबद्धस्य** कर्मणा बन्धं प्राप्तस्य **देहिनः** शरीरिणः **स्वर्गे वा** परलोके वा, **यदि वा भूमौ** इहलोके वा **सुखलेशो** अल्पमपि सुखं **न विद्यते** नैव भवति ॥ "दुःखेष्वनुद्विग्नमनाः" (भ.गी., २.५६) इत्यस्य भाष्ये शंकर आध्यात्मिकादिदुःखत्रयस्वरूपं विशदयति । सांख्यकारिकाया प्रथमकारिकायां दुःखत्रयाभिघातद् इत्युक्तम् । तत्र वाचस्पतिमिश्र आह— "दुःखानां त्रयं दुःखत्रयम् तत्खलु आध्यात्मिकम् आधिभौतिकम् आधिदैविकं चेति । तत्राध्यात्मिकं द्विविधम् शारीरं मानसं च । शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविशेयविशेषादर्थनिबन्धनम् । सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम् । बाह्योपायसाध्यं दुःखं द्वेधा— आधिभौतिकम् आधिदैविकं च । तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्, आधिदैविकं तु यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम् ॥" (सा.त.कौ., का. १) इति ॥६८-७०॥

तटित्सु वीचिमालासु प्रदीपस्य प्रभासु च ।
सम्पत्सु कर्ममूलासु कस्य वा स्थिरतामतिः ॥७१॥

व्याख्या— कर्ममूलसम्पदां चाञ्चल्यं सदृष्टान्तं वर्णयति— **तटित्स्विति** । **तटित्सु** विद्युत्स्फुरणेषु **वीचिमालासु** तरङ्गसरणीसु **प्रदीपस्य प्रभासु च** दीपस्य शिखासु च **कर्ममूलासु** कर्म मूलं यासां ताः कर्ममूलाः, तासु, **कस्य वा** कस्य पुरुषस्य वा **स्थिरतामतिः** स्थिरस्य भावः स्थिरता, तस्याः मतिः बुद्धिः स्थिरतामतिः, स्यात् इति शेषः, न कस्यापीत्यर्थः ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

'कर्ममूलासु सम्पत्सु' इति वर्णनीयत्वात्प्रस्तुतार्थः । 'तटित्सु' 'वीचिमालासु' 'प्रदीपस्य प्रभासु' इत्यप्रस्तुतार्थाः । 'स्थिरतामतिराहित्यम्' धर्मः। प्रस्तुताप्रस्तुतयोर्धर्मैक्ये दीपकं नामालङ्कारः । "वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।" (कु. आ., ४६) इति तस्य लक्षणम् ॥ "न वित्तेन तर्पणीयो मनुष्यः" (कठ. उ., १.२७) इति श्रुतिः ॥७१॥

मलकोशे शरीरेऽस्मिन् महादुःखविवर्धने ।
तडिदङ्कुरसङ्काशे को वा रुच्येत पण्डितः ॥७२॥

व्याख्या— सर्वाशुचिनिदानभूते शरीरे कस्य वा रुचिः स्यादिति प्रश्नद्वारा न कस्यापि रुचिरिति सूचयति— **मलकोशे इति । मलकोशे** मलमूत्रादिचर्मस्यूते **महद्दुःखविवर्धने** महत् च तत् दुःखं च महद्दुःखं, तत् विवर्धते इति महद्दुःखविवर्धनम् तस्मिन्, **तडिदङ्कुरसंकाशे** तडिदङ्कुरं विद्युत्सञ्चलनम् तत्सदृशे **अस्मिन् शरीरे** एतस्मिन् देहे **को वा** कोऽपि वा **पण्डितः** धीमान् **रुच्येत** आस्वादेत । न कोऽपि इत्यर्थः ॥७२॥

नित्यानन्दचिदाकारमात्मतत्त्वं विहाय कः ।
विवेकी रमते देहे नश्वरे दुःखभाजने ॥७३॥

व्याख्या— आत्मतत्त्वापेक्षया देहस्य हेयतां प्रदर्शयति - **नित्येति । नित्यानन्दचिदाकारं** आनन्दश्च चिच्च आनन्दचिदौ, नित्यौ आनन्दचिदौ, तयोः आकारः स्वरूपं यस्य तत् नित्यानन्दचिदाकारं, तत्, **आत्मतत्त्वम्** शिवजीवैक्यतत्त्वं **विहाय** परित्यज्य **कः विवेकी** को धीमान् **नश्वरे** विनाशिनि **दुःखभाजने** दुःखाश्रये **देहे** शरीरे **रमते** आनन्दमनुभवति । न कोऽपि इत्यर्थः ॥७३॥

विवेकी शुद्धहृदयो निश्चितात्मसुखोदयः ।
दुःखहेतौ शरीरेऽस्मिन् कलत्रे च सुतेषु च ॥७४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सुहृत्सु बन्धुवर्गेषु धनेषु कुलपद्धतौ ।
अनित्यबुद्ध्या सर्वत्र वैराग्यं परमश्नुते ॥७५॥

विवेकिनो विरक्तस्य विषयेष्वात्मरागिणः ।
संसारदुःखविच्छेदहेतौ बुद्धिः प्रवर्तते ॥७६॥

व्याख्या— विवेकेन सर्वेषु लौकिकसम्बन्धेष्वनासक्तमनाः वैराग्यं प्राप्य संसारविमोचनाय प्रयतते इत्याह— **विवेकीति । शुद्धहृदयः** शुद्धं हृदयं यस्य सः, निर्मलहृदयः, **निश्चितात्मसुखोदयः** आत्मनः सुखम् आत्मसुखम् आत्मानन्दः, निश्चितं आत्मसुखं निश्चितात्मसुखं तस्य उदयः यस्मिन् सः, तादृशः **विवेकी** नित्यानित्यवस्तुभेदज्ञः, **दुःखहतौ** दुःखस्य हेतुः, तस्मिन्, **अस्मिन् शरीरे** एतस्मिन् देहे, **कलत्रे**— कलत्रं नपुंसकान्तं पदं पत्नीवाचकम्— भार्यायां, **सुतेषु च** पुत्रेषु च, **सहृत्सु** स्नेहितेषु, **बन्धुवर्गेषु** बान्धवजनेषु **धनेषु** सम्पत्सु, **कुलपद्धतौ** वंशसंप्रदाये च **सर्वत्र** सर्वस्मिन् विषये **अनित्यबुद्ध्या** अशाश्वतमिति प्रत्ययेन **परम्** अत्यन्तं **वैराग्यम्** अनासक्तिम् **अश्नुते** प्राप्नोति ॥ एतादृशस्य **विवेकिनः** नित्यानित्यविवेकयुक्तस्य **विरक्तस्य** वैराग्यसम्पन्नस्य **विषयेषु** इन्द्रियार्थेषु **आत्मरागिणः** आत्मनि रागः अस्यास्तीति आत्मरागी, तस्य, **बुद्धिः** निश्चयात्मकप्रवृत्तिः **संसारदुःखविच्छेदहेतौ** संसारस्य दुःखम्, तस्य विच्छेदः निर्मूलनं, तत्र हेतुः संसारदुःखविच्छेदहेतुः, तस्मिन्, **प्रवर्तते** युक्तो भवति ॥ इदं प्रवर्तनं च "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" (मुं. उ., १.२.१२) इत्युक्तदिशा "प्राप्य वरान्निबोधत" (कठ. उ., ३.१४) इत्युक्तरीत्या च सद्गुरुं समाश्रित्य दुःखोपशमनमार्गं साधकोऽवगच्छेत् ॥ तदुक्तम्— "पुत्रदार-धनादीनां सङ्गमः पान्थसङ्गमः । अनुदेहं नयन्त्येते स्वप्नो निद्रानुगो यथा ॥ नेहामुत्र फलं किञ्चिदिच्छेद् भक्तो मम प्रिये । अपि कैवल्यमीशानि मया दत्तमपि क्वचित् ॥ कियती सार्वभौमादिसम्पत्तिश्चाणिमादिका । तृणीकृताणिमाद्यष्टसिद्धेर्वै भक्तिरंहता ॥ ..... पुरा कृतेन पुण्येन निर्विण्णः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सुखसङ्गमे । गुरुं समाश्रयेद्भक्त्या दुःखोत्तरणहेतवे ॥" (पार. आ., २२.४१-४३,५४) इति । श्रीगुरुस्तं दीक्षानुग्रहपूर्वकं मोक्षमार्गे नियोजयति ॥७४-७६॥

नित्यानित्यविवेकिनः सुकृतिनः शुद्धाशयस्यात्मनो
ब्रह्मोपेन्द्रमहेन्द्रमुख्यविभवेष्वस्थायितां पश्यतः ।
नित्यानन्दपदे निराकृतजगत्संसारदुःखोदये
साम्बे चन्द्रशिरोमणौ समुदयेद्भक्तिर्भवध्वंसिनी ॥७७॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते
वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ भक्तस्थले
पिण्डपिण्डज्ञानसंसारहेयस्थलप्रसङ्गो नाम
पञ्चमः परिच्छेदः समाप्तः ॥५॥

व्याख्या— नित्यानित्यविवेकीत्यादिभिर्धर्मैर्युक्तो भक्तः शिवे भक्तिं साधयेद् इत्युपदेशेन परिच्छेदम् उपसंहरति— **नित्येति । नित्यानित्यविवेकिनः** नित्यानित्यभेदज्ञः, तस्य, **सुकृतिनः** सुकृतं पुण्यमस्यास्तीति सुकृती पुण्यभाक्, तस्य, **शुद्धाशयस्य** शुद्धः आशयः यस्य सः शुद्धाशयः निर्मलहृदयः, तस्य, **ब्रह्मोपेन्द्रमहेन्द्रमुख्यविभवेषु** ब्रह्मा सृष्टिकर्ता, उपेन्द्रः विष्णुः, महेन्द्रः वासवः, इत्यादिमुख्याः प्रमुखाः, तेषां विभवेषु सम्पत्सु, **अस्थायितां** नश्वरतां **पश्यतः** विलोकयतः, **आत्मनः** शरीरिणः, **नित्यानन्दपदे** शाश्वतानन्दास्पदे **निराकृतजगत्संसारदुःखोदये** जगतः संसारः जगत्संसारः, तस्य दुःखं, तस्य उदयः उद्गमः, जगत्संसारदुःखोदयः, निराकृतः तिरस्कृतः जगत्संसारदुःखोदयः यस्मिन् सः, तस्मिन्, **साम्बे** अम्बया शक्त्या सहिते, **चन्द्रशिरोमणौ** चन्द्रशेखरे परशिवे **भवध्वंसिनी** भवः पुनर्जन्म, तत् ध्वंसितुं शीलम् अस्याः अस्तीति (स्त्री) भवध्वंसिनी भवनाशिनी **भक्तिः** भगवदनुरागः **समुदयेत्** समुत्पन्ना भवेत् ॥ अत्रैतत्परिच्छेदोक्तेषु त्रिषु स्थलेषु भक्त्युदयस्यात्मनि हेतुभूता अंशा निरूपिताः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सन्ति । तत्र पुण्याधिक्येन निर्मलान्तकरणत्वं प्रथमः । तादृशे पिण्डाख्ये आत्मनि शक्तिपातः संभवति । शक्तिपातो नाम परमात्मनोऽनुग्रहस्वरूपिणी शक्तिर्भक्तिरूपेणात्मनि प्रवेशः । नित्यानित्यविवेक आत्मनि शिवानुग्रहपात्रतां निर्मिमीते । वीरशैवपरिभाषायाम् एतदेव पिण्डज्ञानमिति कथ्यते । संसारे वैराग्यभावनानैरन्तर्यम् आत्मनि इहपरसुखानुभवस्य नश्वरताभावनां जागरयति । एषा संसारहेयता । मुक्तेरिच्छा तदा स्वयमेव जागर्ति । मुक्तिं प्रति जीवात्मनो यात्रायामिदं स्थलत्रयं साधनचतुष्टयं प्रतिपादयति । नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वं चेति साधनचतुष्टयशब्देन वेदान्ते व्यवह्रियन्ते ॥ शार्दूलविक्रीडितं नाम छन्दः । तृतीयपरिच्छेदान्ते तल्लक्षणमुक्तम् ॥७७॥

— इति संसारहेयस्थलम् —

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
पञ्चमः परिच्छेदः समाप्तः ॥५॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

षष्ठः परिच्छेदः

दीक्षालक्षणगुरुकारुण्यप्रसङ्गः

व्याख्या— पूर्वपरिच्छेदोक्तानां पिण्ड-पिण्डज्ञान-संसारहेयस्थलानाम् अनुभवसम्पन्नस्य साधकस्य साधनमार्गप्रवर्तनाय दीक्षालक्षण गुरुकारुण्यस्थलं श्रीरेणुको निरूपयति –

४. अथ दीक्षालक्षणगुरुकारुण्यस्थलम् – (४)

ततो विवेकसम्पन्नो विरागी शुद्धमानसः ।
जिज्ञासुः सर्वसंसारदोषध्वंसकरं शिवम् ॥१॥

उपैति लोकविख्यातं लोभमोहविवर्जितम् ।
आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम् ॥२॥

शिवसिद्धान्ततत्त्वज्ञं छिन्नसन्देहविभ्रमम् ।
सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनम् ॥३॥

कुलक्रमागताचारं कुमार्गाचारवर्जितम् ।
शिवध्यानपरं शान्तं शिवतत्त्वविवेकिनम् ॥४॥

भस्मोद्धूलननिष्णातं भस्मतत्त्वविवेकिनम् ।
त्रिपुण्ड्रधारणोत्कण्ठं धृतरुद्राक्षमालिकम् ॥५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम् ।
लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनम् ॥६॥

लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुं शिववादिनम् ॥

व्याख्या— सद्गुरुलक्षणमाह – **तत इति** । ततः अनन्तरम् **विवेकसम्पन्नः** नित्यानित्यविवेकसंयुक्तः **विरागी** वैराग्यसम्पन्नः **शुद्धमानसः** शुद्धचित्तः, साधकः, **सर्वसंसारदोषध्वंसकरं** सर्वस्य समस्तस्य संसारस्य जननमरणचक्रस्य दोषाणां रागद्वेषाद्यसद्भावानां ध्वंसं करोतीति, सर्वसंसारदोषध्वंसकरः, तम्, **शिवं** परमात्मानं **जिज्ञासुः** ज्ञातुमिच्छुः, साक्षात्कर्तुमुत्सुकः सन्, **शिववादिनं** शिवसिद्धान्तप्रतिपादकं **श्रीगुरुं** दीक्षादिसंस्कारनिष्णातम् आचार्यम् **उपैति** प्रति गच्छति ।

कीदृशं श्रीगुरुम्? **लोकविख्यातं** सर्वलोकप्रसिद्धम् । पुनः कीदृशम्? **लोभमोहविवर्जितं** लोभश्च मोहश्च लोभमोहौ दुराशाविभ्रमौ, ताभ्यां विवर्जितः तम् । पुनः कीदृशम्? **आत्मतत्त्वविचारज्ञम्** आत्मतत्त्वम् आत्मैक्यतत्त्वम्, तस्य विचारः, तं जानातीति, आत्मतत्त्वविज्ञारज्ञः, तम् । पुनः कीदृशम्? **विमुक्तविषयभ्रमम्** विमुक्तः निर्मुक्तः विषयस्य इन्द्रियार्थस्य भ्रमः यस्य सः विमुक्तविषयभ्रमः, तम् । पुनः कीदृशम्? **शिवसिद्धान्ततत्त्वज्ञं** शिवसिद्धान्तः शिवाद्वैतसिद्धान्तः, तस्य तत्त्वं याथार्थ्यं जानातीति शिवसिद्धान्ततत्त्वज्ञः, तम् । पुनः कीदृशम्? **छिन्नसन्देहविभ्रमम्** सन्देहश्च विभ्रमश्च सन्देहविभ्रमौ संशयभ्रान्ती छिन्नौ सन्देहविभ्रमौ येन सः छिन्नसन्देहविभ्रमः, तम् । पुनः कीदृशम्? **सर्वतन्त्रप्रयोगज्ञं** सर्वेषां तन्त्राणां सर्वेषां शास्त्राणां प्रयोगं प्रायोगिकविनियोगं जानातीति सर्वतन्त्रप्रयोगज्ञः, तम् । पुनः कीदृशम्? **धार्मिकं** धर्मानुसारवृत्तिमान् । पुनः कीदृशम्? **सत्यवादिनं** सत्यं वदतीति सत्यवादी सत्यवचनः, तम् । पुनः कीदृशम्? **कुलक्रमागताचारं** कुलस्य क्रमः कुलक्रमः कुलपरम्परा, तदागतः वंशानुक्रमेणाऽऽगतः आचारः यस्य सः, कुलक्रमागताचारः, तम् । पुनः कीदृशम्? **कुमार्गाचारवर्जितं** कुमार्गः दुर्मार्गः, तस्य आचारः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तं वर्जयतीति कुमार्गाचारवर्जितः, तम् । पुनः कीदृशम्? **शिवध्यानपरं** शिवस्य ध्यानं शिवध्यानम्, तत्परः तस्मिन् तन्मयः शिवध्यानपरः, तम् । पुनः कीदृशम्? **शान्तं** विकल्पविभ्रमादिरहितम् । पुनः कीदृशम्? **शिवतत्त्वविवेकिनं** शिवतत्त्वस्य विवेकः विवेचनम् अस्यास्तीति शिव-तत्त्वविवेकी, तम् । पुनः कीदृशम्? **भस्मोद्धूलननिष्णातं** भस्मना भसितेन उद्धूलनम् उद्वर्तनं तस्मिन् निष्णातं विचक्षणम् । भस्मस्नानम्, भस्मो-द्धूलनम्, भस्मत्रिपुण्ड्रधारणं चेति त्रयो भस्मप्रयोगाः । पुनः कीदृशम्? **भस्मतत्त्वविवेकिनं** भस्मनः तत्त्वं भस्मतत्त्वम्, परमात्मरूपनिरूपा-धिकभस्म, कृतकसाधनैर्गोमयादिभ्यः मन्त्रपठनपूर्वकं वह्नौ विप्लोषणेन निर्मीयमाणं सोपाधिकभस्म इत्यादि भस्मस्वरूपं भस्मतत्त्वम्, तस्य विवेकः परिज्ञानमस्यास्तीति भस्मतत्त्वविवेकी, तम् । पुनः कीदृशम्? **त्रिपुण्ड्र-धारणोत्कण्ठं** मध्याङ्गुलीभिस्त्रिसृभिः क्रियमाणं रेखात्रयं त्रिपुण्ड्रम्, शैवानां वीरशैवानां च भस्मना तिर्यक्त्रिपुण्ड्रं विधीयते ॥ वैष्णवानां तु मृदा ऊर्ध्वत्रिपुण्ड्रम्, त्रिपुण्ड्रस्य धारणे उत्कण्ठा उत्कटेच्छा यस्य सः त्रिपुण्ड्रधारणोत्कण्ठः, तम् । पुनः कीदृशम्? **धृतरुद्राक्षमालिकं** धृता रुद्राक्षाणां मालिका येन सः धृतरुद्राक्षमालिकः, तम् । पुनः कीदृशम्? **लिङ्गधारणसंयुक्तं** लिङ्गस्य धारणं लिङ्गधारणं स्थूलसूक्ष्मकारणशरीरेषु क्रमेण इष्टप्राणभावलिङ्गानां गुरुणा स्थापनम्, तेन संयुक्तः, तम् । पुनः कीदृशम्? **लिङ्गपूजापरायणं** लिङ्गस्य इष्टप्राणभावलिङ्गसमन्वयस्य पूजा लिङ्गपूजा, तस्यां परायणः श्रद्धावान्, तम् । पुनः कीदृशम्? **लिङ्गाङ्गयोग-तत्त्वज्ञं** लिङ्गं शिवः, अङ्गं जीवः, तयोर्योगः सामरस्यात्मकमैक्यं, तस्य तत्त्वं याथार्थ्यं जानातीति लिङ्गाङ्गयोगतत्त्वज्ञः, तम् । पुनः कीदृशम्? **निरूढा-द्वैतवासनं** निरूढा सम्यग्वृद्धिं प्राप्ताऽद्वैतस्य वासना संस्कारः यस्मिन् सः निरूढाद्वैतवासनः, तम् । पुनः कीदृशम्? **लिङ्गाङ्गस्थलभेदज्ञं** लिङ्गस्थलम् आचारलिङ्गादिपरमात्मस्थलम्, अङ्गस्थलं भक्तादिजीवात्मस्थलं चेति भेदं जानाति इति लिङ्गाङ्गस्थलभेदज्ञः, तम्। अत्र श्रीगुरोः समग्रलक्षणमुक्तम्। गुरुस्तावद् अष्टावरणेष्वादिमम् आवरणम् । आवरणं नाम आव्रियते अनेन इति निष्पत्त्या रक्षकत्वेन साधकम् आसमन्ताद् आव्रियमाणं तत्त्वम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तच्चाष्टविधं गुरुः, लिङ्गम्, जङ्गमः, भस्म, रुद्राक्षः, मन्त्रः, पादोदकम्, प्रसादश्चेति। आहृत्येतानि अष्टावरणम् इति शब्देन व्यवह्रियन्ते वीरशैवैः। अष्टावरणशब्दः प्रथमतः शैवागमेषु प्रयुक्तः । तथा हि– "गुरुर्लिङ्गं जङ्गमश्च तीर्थं चैव प्रसादकः । भस्मरुद्राक्षमन्त्राश्चेत्यष्टावरणसंज्ञिताः।" (चं.आ., उ.भा., क्रि.पा., २.२) इति । तत्र गुरुः, लिङ्गम्, जङ्गमश्चेति त्रीणि पूज्यानि आवरणानि। भस्म, रुद्राक्षः, मन्त्रश्चेति त्रीणि पूजासाधन-भूतान्यावरणानि । पादोदकप्रसादौ पूजाफलरूपं आवरणद्वयम् । लिङ्ग-धारणस्थलम्, रुद्राक्षधारणस्थलम्, पञ्चाक्षरीजपस्थलम्, गुरुलिङ्गार्चन-स्थलम्, जङ्गमार्चनस्थलम्, प्रसादस्वीकृतिस्थलम् इति भक्तस्थलान्तर्गतेषु स्थलेषु अष्टावरणानां स्वरूपं निरूपितम् । इयं त्वाश्चर्यसङ्गतिः, यत् सिद्धान्तशिखामणौ अष्टावरणानि उक्तानि, किन्तु अष्टावरणशब्दः न कुत्रापि प्रयुक्तः ॥१-७ पूर्वार्धः॥

सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः ॥७॥
षण्मासान् वत्सरं वापि यावदेष प्रसीदति ।

व्याख्या— सद्गुरुं प्राप्य तत्सेवा कर्तव्येत्याह – **सेवेतेति । शिष्यः** भक्तः **भक्तिभयान्वितः** भक्तिश्च भयं च भक्तिभये, ताभ्याम् अन्वितः संयुक्तः, सन्, **षण्मासान्** षण्मासपर्यन्तं **वत्सरं वा अपि** अथवा वर्षपर्यन्तं, अथवा **यावदेष प्रसीदति** यावत्पर्यन्तं गुरुः प्रसन्नो भवति तावत्पर्यन्तं **परमाचार्यं** परमगुरुं **सेवेत** परिचरेत् ॥ ७ उत्तरार्धः – ८ पूर्वार्धः ॥

प्रसन्नं परमाचार्यं भक्त्या मुक्तिप्रदर्शकम् ॥८॥
प्रार्थयेदग्रतः शिष्यः प्राञ्जलिर्विनयान्वितः ।
भो कल्याण महाभाग शिवज्ञानमहोदधे ॥९॥
आचार्यवर्य सम्प्राप्तं रक्ष मां भवरोगिणम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— श्रीगुरुमुद्दिश्य कथं प्रार्थयेदित्यत्राह – **प्रसन्नमिति । मुक्तिप्रदर्शकं** मुक्तिः मुक्तिमार्गः मोक्षस्य पन्थाः, तं प्रदर्शयतीति मुक्तिमार्गप्रदर्शकः, तम्, **भक्त्या** भक्तिभावेन **प्रसन्नं** संप्रीतं **परमाचार्यं** परमगुरुं (उद्दिश्य) **शिष्यः** भक्तः **प्राञ्जलिः** अञ्जलिं बद्ध्वा **विनयान्वितः** विनीतभावयुक्तः सन् **अग्रतः** पुरतः **प्रार्थयेत्** विज्ञापयेत् – **भो कल्याण** भो मङ्गलस्वरूप, **महाभाग** महात्मन् **शिवज्ञानमहोदधे** शिवज्ञानस्य महोदधे समुद्र; **आचार्यवर्य** आचार्यश्रेष्ठ, **सम्प्राप्तं** समीपमागतं **भवरोगिणं** भवः पुनर्जन्म, तदेव रोगः, भवरोगः अस्य अस्तीति भवरोगी, तादृशं **मां रक्ष** उद्धर, इति ॥ ८ उत्तरार्धः - १० पूर्वार्धः ।

इति शुद्धेन शिष्येण प्रार्थितः परमो गुरुः ।
शक्तिपातं समालोक्य दीक्षया योजयेदमुम् ॥१०॥

व्याख्या— गुरुः शिष्यं दीक्षयाऽनुगृह्णातीत्याह – **इतीति । इति** एवं रीत्या **शुद्धेन** निर्मलहृदयेन **शिष्येण** भक्तेन **प्रार्थितो** विज्ञापितः **परमो गुरुः** परमाचार्यः (तस्मिन्) **शक्तिपातं** परमात्मानुग्रहशक्तिरूपभक्त्युदयं **समालोक्य** साक्षात् परिभाव्य **दीक्षया** त्रिविधलिङ्गधारणरूपत्रिविध-दीक्षया **अमुम्** इमं शिष्यं **योजयेत्** सन्मार्गे स्थापयेत् ॥ परमात्मनः जीवात्मपृथक्करणात्मके प्रवृत्तिमार्गे या शक्तिः सा एव परमात्मनि जीवात्मानं समरसैक्यं प्रति नीयमाने निवृत्तिमार्गे भक्तिरिति कथ्यते । तदुक्तम् –"शक्तिः प्रवृत्तिराख्याता निवृत्तिर्भक्तिरीरिता" (अनु. सू., २.२७) इति । शक्तिपातं भक्त्युदयमेव ॥१०॥

दीयते च शिवज्ञानं क्षीयते पाशबन्धनम् ।
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः ॥११॥

व्याख्या— दीक्षाशब्दं सनिष्पत्ति व्याख्याति – **दीयते इति । यस्मात्** यद्वशात् **शिवज्ञानं** परशिवब्रह्माख्यमहालिङ्गज्ञानं स्वात्माभेदेन **दीयते**ऽनु-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गृह्यते, **पाशबन्धनं** मलमायाकर्मबन्धनं **च क्षीयते** विनाश्यते, **अतः** तस्माद् **इयम्** ईदृशी दानक्षयकारणीभूता **दीक्षेति** दीक्षा इति **विचक्षणैर्ज्ञानिभिः समाख्याता** कथिता ॥ अत्राऽक्षरनिष्पत्तिद्वारा "दा दाने" इति धातुगत्या किञ्चिद्दीयत इति 'क्षि क्षये' इति धातुगत्या किञ्चित्क्षीयत इति च दीयते क्षीयते इति दीक्षारूपसंस्कारस्य लक्षणं दत्तम् ॥ उक्तं च – "दीयते लिङ्गसम्बन्धः क्षीयते च मलत्रयम् । दीयते क्षीयते यस्मात् सा दीक्षेति निगद्यते ॥" (का.आ., उ.भा., क्रि.पा., १.१२) इति, "दीयते लिङ्ग-सम्बन्धः क्षीयते कर्मसञ्चयः । दीयते क्षीयते साक्षाद् यया दीक्षेति कथ्यते ॥" (सू.आ., उ.भा., क्रि.पा., ८.११) इति च ॥११॥

सा दीक्षा त्रिविधा प्रोक्ता शिवागमविशारदैः ।
वेधारूपा क्रियारूपा मन्त्ररूपा च तापस ॥१२॥

व्याख्या— दीक्षायास्त्रैविध्यमाह – **सेति** । हे **तापस** आगस्त्यमुने, **सा** पूर्वोक्ता **दीक्षा** दीक्षाख्या **त्रिविधा** त्रिप्रकारा इति **शिवागमविशारदैः** शिवागमपारंगतैः **प्रोक्ता** कथिता, **वेधारूपा** वेधादीक्षा, **क्रियारूपा** क्रियादीक्षा, **मन्त्ररूपा** मन्त्रदीक्षा चेति ॥१२॥

गुरोरालोकमात्रेण हस्तमस्तकयोगतः ।
यः शिवत्वसमावेशो वेधादीक्षेति सा मता ॥१३॥

मान्त्री दीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी ।
कुण्डमण्डलिकोपेता क्रियादीक्षा क्रियोत्तरा ॥१४॥

व्याख्या— **गुरोः** आचार्यस्य **आलोकमात्रेण** निरीक्षणमात्रेण **हस्त-मस्तकयोगतः** शिष्यशिरसि गुरोर्हस्तस्य संयोगेन च **यः** यादृशः **शिवत्वसमावेशः** शिवभावप्रवेशः **सा** तादृशी **वेधादीक्षेति** वेधादीक्षा इति **मता** स्मृता । विध विधाने धातोः घञ्प्रत्ययस्य (पा.अ., ३.३.१८) टाप्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति स्त्रीप्रत्ययस्य (पा.अ., ४.१.४) च योगेन निष्पन्नः वेधाशब्दः अन्तःप्रवेशनार्थकः । **मन्त्रमात्रोपदेशिनी** पञ्चाक्षरमन्त्रमात्रस्य ओंकार-पूर्वकत्वे षडक्षरमन्त्रमात्रस्य च उपदेशः शिष्यस्य दक्षिणकर्णे गुरुणा अनन्यश्रवणं यथा भवति तथा दीयमानः अस्याम् अस्तीति मन्त्र-मात्रोपदेशिनी **या सा मान्त्री दीक्षेति** मन्त्रदीक्षा इति प्रोक्ता कथिता ॥ **कुण्डमण्डलिकोपेता** कलशस्थापनस्वस्तिकमण्डलसंयुक्ता **क्रियोत्तरा** लिङ्ग-संस्कारलिङ्गधारणादिक्रियाप्रधाना या सा क्रियादीक्षा ॥ दीक्षात्रयस्य साध्यं फलं कारणागमे सम्यगुक्तम् – "तनुत्रयगतानादिमलत्रयमसौ गुरुः । दीक्षात्रयेण सन्दह्य लिङ्गत्रयमुपादिशेत् ॥" (का.आ., उ.भा., क्रि.पा., १.१०) इति। तनुत्रयं नाम स्थूल-सूक्ष्म-कारण-शरीराणि। अनेककार्येषु व्यापृतं बाह्यशरीरं तावत्स्थूलम् । शब्दादिपञ्चतन्मात्रैः मनःप्राणादि-सहितैरुदितं शरीरं सूक्ष्मम् । परशिवस्य संकुचितस्वरूपं यत् तत् कारणम् ॥ कार्मिकमलं मायीयमलमाणवमलं चेति मलत्रयम् । तत्र क्रियाशक्तिसंकोचः कार्मिकमलम् । तच्च शुभाशुभानुष्ठानमयम् । ज्ञान-शक्तिसंकोचो मायीयमलम् । भिन्नवेद्यप्रथारूपं (शिवाद्भिन्नोऽहमिति जीवे विद्यमानं) तत् । अपूर्णंमन्यतारूपम् आणवमलम् । (प्र.हृ., सू.९, क्षेमराजव्याख्या)। इदं मलत्रयं क्रमेण स्थूल-सूक्ष्म-करणशरीरेषु भवति ॥ श्रीगुरुर्वेधादीक्षया कारणशरीरगतम् आणवमलं निष्कास्य तत्र "शिवोऽहं-प्रज्ञात्मकं" भावलिङ्गं स्थापयति। मन्त्रदीक्षया सूक्ष्मशरीरगतं मायीयमलं निष्कास्य तत्र प्राणलिङ्गं स्थापयति । पुनः क्रियादीक्षया स्थूलशरीरगतं कार्मिकमलं निष्कास्य तत्रेष्टलिङ्गं स्थापयति ॥ तिसृषु दीक्षासु पुनः प्रत्येकस्मिन् सप्तदीक्षाः भवन्तीत्याहत्य दीक्षाः एकविंशति । [तासां नामस्वरूपे कारणागमोत्तरभागे क्रियापादे प्रथमपटले ४३-१२८ श्लोकेषु द्रष्टव्ये] ॥१३-१४ ॥

शुभमासे शुभतिथौ शुभकाले शुभेऽहनि ।
विभूतिं शिवभक्तेभ्यो दत्त्वा ताम्बूलपूर्वकम् ॥१५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यथाविधि यथायोगं शिष्यमानीय देशिकः ।
स्नातं शुक्लाम्बरधरं दन्तधावनपूर्वकम् ॥१६॥

मण्डले स्थापयेच्छिष्यं प्राङ्मुखं तमुदङ्मुखः ।
शिवस्य नाम कीर्तिं च चिन्तामपि च कारयेत् ॥१७॥

विभूतिपट्टं दत्त्वाऽग्रे यथास्थानं यथाविधि ।
पञ्चब्रह्ममयैस्तत्र स्थापितैः कलशोदकैः ॥१८॥

आचार्यः सममृत्विग्भिस्त्रिः शिष्यमभिषिञ्चयेत् ॥१९॥

व्याख्या— तत्र क्रियादीक्षाङ्गभूतानि कार्याणि निरूपयति – **शुभमासे इत्यादिना । शुभमासे** माघादिप्रशस्तमासे, **शुभतिथौ** प्रतिपदेत्यादिशोभनतिथौ, **शुभकाले** अमृतघटिकादिप्रशस्तसमये, **शुभेऽहनि** सोमशुक्रादिशुभदिने, **शिवभक्तेभ्यः** वीरशैवभक्तेभ्यः **ताम्बूलपूर्वकं** पूगीफलसहित नागवल्लीदलप्रदानपूर्वकं **विभूतिं** भस्मगुटिकाः **दत्त्वा** वितीर्य (एवं तेषामनुज्ञां प्राप्य), **यथाविधि** विधिमनतिक्रम्य यथाविधि, शास्त्रनियमानुसारं, **यथायोगं** योगमनतिक्रम्य यथायोगम्, योगः शुभयोगः, तम् अनतिक्रम्य, **देशिकः** श्रीगुरुः **दन्तधावनपूर्वकं** दन्तधावनं कृत्वाऽनन्तरं **स्नानं** कृतस्नानं **शुक्लाम्बरधरं** श्वेतवस्त्रधारिणं **शिष्यं** दीक्षां प्राप्तुमिच्छावन्तं भक्तम् **आनीय** नीत्वा **मण्डले** स्वस्तिकाख्यमण्डले तं **प्राङ्मुखं** पूर्वाभिमुखं यथा भवति तथा **स्थापयेत्** उपवेशयेत् (स्वयं) **उदङ्मुखः** उत्तराभिमुखः (उपविश्य), (तेन शिष्येण) **शिवस्य** परशिवस्य **नाम कीर्तिं च** नामकीर्तनं कीर्तिस्मरं च **चिन्तामपि** ध्यानमपि **कारयेत्** कर्तुं प्रेरयेत् । (अनन्तरम्) **अग्रे** प्रथमं तस्मै **यथास्थानं** स्थानम् अनतिक्रम्य यथास्थानम्, शास्त्रोक्तशरीरस्थानानि अविहाय **यथाविधि** विधिम् अनतिक्रम्य यथाविधि, शास्त्रोक्ताभिमन्त्रणादिविधिम् अविहाय च, **आचार्यः** गुरुः **ऋत्विग्भिः समम्** याजकैः सह, "ऋत्विजो याजकाश्च ते" (अमर.,२ .४२२), **तत्र मण्डले स्थापितैः** प्रतिष्ठापितैः **पञ्चब्रह्ममयैः** सद्योजत-वामदेवाघोर-तत्पुरुषेशानात्मकैः (परशिवस्य पञ्चमुखानि सद्योजातादीनि, तन्येव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चब्रह्माणि, तेषां संकेतात्मकैरित्यर्थः) **कलशोदकैः** कुम्भोदकैः **शिष्यं** तं भक्तम् **त्रिः** त्रिवारं **अभिषिञ्चयेत्** प्रोक्षणं कुर्यात् । अत्र क्रियादीक्षान्तर्गतयोः भूतिपट्ट-कलशाभिषेकदीक्षयोः स्वरूपमुक्तम् ॥१५-१९॥

अभिषिच्य गुरुः शिष्यमासीनं परितः शुचिम् ।
ततः पञ्चाक्षरीं शैवीं संसारभयतारिणीम् ॥२०॥

तस्य दक्षिणकर्णे तु निगूढमपि कीर्तयेत् ।
छन्दो रूपमृषिं चास्य देवतान्यासपद्धतिम् ॥२१॥

व्याख्या— मन्त्रदीक्षाक्रममाह – **अभिषिच्येति** । **गुरुः** आचार्यः **आसीनम्** (समीपे) उपविष्टं **परितः शुचिं** सर्वतः शुद्धं **शिष्यं** तं भक्तम् **अभिषिच्य** उक्तप्रकारेण कलशोदकैः संप्रोक्ष्य, **ततः** अनन्तरं **तस्य** शिष्यस्य **दक्षिणकर्णे तु** वामेतरश्रवणे **शैवीं** शिवसम्बन्धिनीं **पञ्चक्षरीं** पञ्चाक्षरघटितं मन्त्रं **निगूढमपि** पार्श्वस्थश्रवणगोचरं यथा न भवति तथा, **अस्य** मन्त्रस्य **छन्दः** छन्दःस्वरूपं **रूपं** क्रमस्वरूपं **ऋषिं च** मन्त्रद्रष्टारं, **न्यासपद्धतिं च** – पञ्चाक्षरमन्त्रप्रयोगपूर्वकम् अङ्गन्यास-करन्यासादिकयोः विधानं च **कीर्तयेत्** उपदिशेत् ॥ शिवपञ्चाक्षरीमन्त्रोऽयं यजुर्वेदीयरुद्राध्यायस्य नमकविभागेऽष्टमानुवाके (तै.सं., ४.५.८) "नमः शिवाय च शिवतराय च" इत्येवंस्वरूपं भजते । अतोऽस्य मन्त्रस्य छन्दः पङ्क्तिः, **रूपं** नमःशब्दः पूर्वं शिवायेति पश्चात् इत्येवं क्रमस्वरूपम्, **ऋषिः** परमेष्ठी, [देवता तु रुद्रः] । न्यासपद्धतिस्तु शिवपूजविधिषु द्रष्टव्या ॥२०-२२॥

– इति दीक्षालक्षणगुरुकारुण्यस्थलम् –

५. अथ लिङ्गधारणस्थलम् – (५)

व्याख्या— पूर्वं दीक्षास्थले (गुरुकारुण्यस्थले) गुर्वनुग्रहरूपदीक्षालक्षणं दीक्षात्रयनामोक्तिपूर्वकं क्रियामन्त्रदीक्षयोः स्वरूपं निरूप्य, शिष्यहस्ते इष्टलिङ्गधारणात्मक्रियादीक्षांशं वेधा दीक्षाद्वारा भावप्राणेष्टलिङ्गानुसन्धानं गुरूपदेशं चास्मिन् स्थले प्रतिपाद्यते ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्फाटिकं शैलजं वापि चन्द्रकान्तमयं तु वा ।
बाणं वा सूर्यकान्तं वा लिङ्गमेकं समाहरेत् ॥२२॥

व्याख्या— तत्रादौ धारणार्थं किं लक्षणं लिङ्गं चयनीयम् इत्यत्राह – **स्फाटिकमिति । स्फाटिकं** स्फटिकमयम्, **वा अपि** अथवा **शैलजं** श्रीशैलादि-पर्वतशिलानिर्मितम्, **तु वा** अथ वा **चन्द्रकान्तमयं** चन्द्रकान्तशिलानिर्मितम्, **बाणं** नर्मदाबाणमयम्, **वा** अथवा **सूर्यकान्तं** सूर्यकान्तशिलानिर्मितम् **वा एकं लिङ्गं** तेष्वेकं लिङ्गं **समाहरेत्** गृह्णीयात् ॥२२॥

सर्वलक्षणसम्पन्ने तस्मिँल्लिङ्गे विशोधिते ।
पीठस्थितेऽभिषिक्ते च गन्धपुष्पादिपूजिते ॥२३॥
मन्त्रपूते कलां शैवीं योजयेद्विधिना गुरुः ।

व्याख्या— लिङ्गस्य स्फटिकादिमयस्य गृहीतस्य संस्कारविशेषमाह- **सर्वेति । सर्वलक्षणसम्पन्ने** शिल्पशास्त्रोक्तरीत्या पञ्चसूत्रघटितत्वादि सर्वलक्षणयुक्ते, **तस्मिन्** आदृते तस्मिन् **विशोधिते** जलाधिवास-धान्यादिवास-शयनाधिवासाऽष्टत्रिंशत्कलान्यास-षडध्वशुद्ध्यादिसंस्कारैः संशोधिते, **पीठस्थिते** करपीठस्थिते, **अभिषिक्ते** पञ्चामृतादिभिः पञ्च-ब्रह्मादिमन्त्रपूर्वकम् अभिषेचिते **गन्धपुष्पादिपूजिते** भस्मगन्धाक्षत-पुष्पधूपदीपनैवेद्यादिभिः पूजिते **मन्त्रपूते** पञ्चाक्षरीमन्त्रेण पवित्रीकृते च **लिङ्गे, गुरुः** आचार्यः **शैवीं कलां** शिष्यमस्तकस्थितचिच्छक्तीत्यपर-नाम्ना प्रसिद्धां शिवकलां **विधिना** नियमानुसारेण **योजयेद्** विनिवेशयेत् । कलायोजनक्रममुक्तम् – "शिष्यमस्तके सुगन्धेन पञ्चारचक्रं विलिख्य मध्ये प्रणवं पञ्चदलेषु पञ्चाक्षराणि विभाव्य 'नित्यानन्दां निरुपमपदां निष्कलां निर्विशेषां निर्व्याजेनोर्ध्वमायाविरचितवपुषं विश्ववन्द्यां परां ताम् । आधारामादिशक्तिं गुणगणनमितां देवदेवीं शिवाख्यां वन्दे हृत्पद्मपीठे परमशिवपदां श्रीमतीमूर्ध्वसंज्ञाम् ॥ ...... शिवकलां ध्यात्वा गन्धादि-नाभ्यर्च्य प्रदीपाद्दीपान्तरमिव 'क्रोम्' इत्यङ्कुशमुद्रयाऽऽकृष्याऽऽवाह्य तदारं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विचिन्त्य पुनर्गन्धाद्युपचारैः संपूजयेत् ॥'' एवमाकृष्य शिष्यमस्तकात्तां कलां लिङ्गे योजयेत् ॥ (सि.शि., त.प्र.)। उक्तं च – ''शैवीं कलां स्वमनसा विभाव्य च ततः परम् । दृष्टावानीय च तथा शिष्यवामकरस्थिते । लिङ्गे निवेशयेत्क्षिप्रं मूलमन्त्रमनुस्मरन् ॥'' (का.आ., उ.भा., क्रि.पा., १.१२०) इति । अत्र भिन्नक्रमः उक्तः । तत्रैव शिवकलास्वरूपमुक्तम् – ''जलकुम्भाग्रव्याप्ततैलबिन्दुर्यथा तथा । देहप्राणात्मसु व्याप्ता संस्थिता शाम्भवी कला । ज्वलत्कालानलाभासा तडित्कोटिसमप्रभा । तस्योर्ध्वे तु शिखा सूक्ष्मा चिद्रूपा परमा कला ॥ या कला परमा सूक्ष्मा तत्त्वानां बोधिनी परा । तामाकृष्य यथान्यायं लिङ्गे समुपवेशयेत् ॥'' (का.आ., उ.भा., क्रि.पा., १.१२२-१२४) इति । पञ्चाक्षरीमन्त्राभिमन्त्रितं स्वदक्षिणहस्तं शिष्यस्य मस्तके निवेश्य श्रीगुरुः शिवकलां ध्यात्वा चित्कला-स्वरूपां तामाकृष्य हस्ते तं हस्तमानीय शिष्यवामकरस्थिते लिङ्गस्योपरि निवेश्य तां कलां तस्मिन् विनिवेशयेत्, एष एव क्रमः ॥१३-१४ पूर्वार्धः॥

शिष्यस्य प्राणमादाय लिङ्गे तत्र निधापयेत् ॥२४॥

तल्लिङ्गं तस्य तु प्राणे स्थापयेदेकभावतः ।
एवं कृत्वा गुरुर्लिङ्गं शिष्यहस्ते निधापयेत् ॥२५॥

व्याख्या— प्राण-लिङ्गयोः सामरस्यं विधाय शिष्यहस्ते स्थापनमाह– **शिष्यस्येति** । **तत्र** तस्मिन् **लिङ्गे** शिवकलासमायुक्ते लिङ्गे **शिष्यस्य** भक्तस्य **प्राणम्** जीवकलाम् **आदाय** आकृष्य **निधापयेत्** विनिवेशयेत् । **तल्लिङ्गं** तत् चित्कला-जीवकलायुक्तं लिङ्गं **तस्य तु** शिष्यस्य तु **प्राणे** जीवतत्त्वे **एकभावतः** तादात्म्येन **स्थापयेत्** योजयेत् । **एवं कृत्वा** एवं विधाय **गुरुः** श्रीगुरुः **लिङ्गम्** एवं संस्कारयुक्तं लिङ्गं **शिष्यहस्ते** शिष्यस्य करस्थले **निधापयेत्** स्थापयेत् ॥ तदुक्तम् – ''लिङ्गे प्राणं विनिक्षिप्य प्राणे लिङ्गं तु शाम्भवम् । तल्लिङ्गं स्थापयेच्छिष्ये सम्यग् ध्यात्वैकभावतः ॥'' (सू.आ., उ.भा., क्रि.पा., ५.४४) इति ॥ २४ उत्तरार्धः - २५ ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्राणवद्धारणीयं तत्प्राणलिङ्गमिदं तव ।
कदाचित्कुत्रचिद्वापि न वियोजय देहतः ॥२६॥

व्याख्या— शिष्यस्य वामकरपीठे शिव-जीवकलायुक्तम् इष्टलिङ्गं संस्थाप्य गुरुः शिष्यं प्रशास्ति – **प्राणवदिति । तत्** तल्लिङ्गं, यद् दत्तं मया तत्, **प्राणवत्** स्वकीयं प्राणमिव **धारणीयं** भरणीयम्, **इदम्** एतल्लिङ्गं **तव** त्वदीयं **प्राणलिङ्गं** प्राणे तादात्म्येन विनिवेशितं प्राणरूपं लिङ्गम् । **कदाचित्** कदापि **कुत्रचिद् वाऽपि** कुत्रापि वा **देहतः** स्वशरीरतः **न वियोजय** न पृथक्कुर्याः ॥ श्लोकस्य द्वितीयार्धस्तु कदाप्यनुल्लङ्घनीया गुर्वाज्ञा । किमितीष्टलिङ्गं देहतो न वियोजयेत्? इति पृष्टे उत्तरं तु पूर्वोक्तसंस्कारे एव निहितं वर्तते । शिष्यहस्ते स्थापनात् पूर्वं श्रीगुरुः शिष्यमस्त-कस्थचित्कलारूपां शिवकलामाकृष्य लिङ्गे विनिवेशयति । चैतन्या-त्मकजीवकलामपि तल्लिङ्गे योजयति । शिवकला-जीवकलयोर्योजनेनैव तल्लिङ्गस्येष्टलिङ्गता । यावत्पर्यन्तं स्वशरीरसम्पर्को भवति तावत्पर्यन्तमे-तल्लिङ्गस्य चैतन्यात्मकता इष्टलिङ्गता च । तत्सम्पर्के त्रुटिते सति तदनु-सन्धानमपि त्रुटितं भवति । अतस्तस्य चेतन्यरूपचित्कलासम्बन्धोऽपि नष्टो भवति । पुनस्तदनुसन्धानसम्पादनाय शिष्यः श्रीगुरुमेव गत्वा पुनरपि लिङ्गसंस्कारं प्राप्नुयात् । अत एवोक्तम् – "प्राणे लिङ्गं प्रतिष्ठाप्य लिङ्गे प्राणं निधाय च । लिङ्गं निरीक्षमाणः सन् लिङ्गप्राणी सदा भव॥" (का.आ., उ.भा., क्रि.पा., १.१०५) । अयं संस्कारो वेधादीक्षान्तर्गतसप्त-दीक्षास्वेकतमयाऽध्यात्मदीक्षया प्राप्यते ॥२६॥

यदि प्रमादात्पतिते लिङ्गे देहान्महीतले ।
प्राणान् विमुञ्च सहसा प्राप्तये मोक्षसम्पदः ॥२७॥

इति सम्बोधितः शिष्यो गुरुणा शास्त्रवेदिना ।
धारयेच्छाङ्करं लिङ्गं शरीरे प्राणयोगतः ॥२८॥

व्याख्या— लिङ्गपतने किं कार्यम्? लिङ्गं शरीरे कथं धार्यम्? इत्यत्राह – **यदीति । यदि** यदा **प्रमादात्** अनवधानात् **लिङ्गे** इष्टलिङ्गे **देहात्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शरीरात् **महीतले** भूतले **पतिते** च्युते सति, तदा **मोक्षसम्पदः** मुक्तिरूप-विभवस्य **प्राप्तये** लाभाय **सहसा** तत्क्षणे एव **प्राणान्** जीवं **विमुञ्च** त्यज ॥ **इति** एवं **शास्त्रवेदिना** शास्त्रं वेत्तीति शास्त्रवेदी, तेन, शास्त्रज्ञेन गुरुणा आचार्येण **सम्बोधितः** सम्यगुपदिष्टः सन् **शिष्यः** भक्तः **शरीरे** देहे **शाङ्करं लिङ्गं** शिवलिङ्गं **प्राणयोगतः** प्राणलिङ्गसम्बन्धेन **धारयेत्** धारणं कुर्यात् ॥ अत्र प्राणत्याग आत्महत्यात्वेन न गृह्यते । स चात्र यदि अप्रयत्नसिद्धस्तर्हि भक्त्युत्कर्षत्वेन गृह्यते । तथा कृते सति मोक्षसम्पत्प्राप्तिर्भवति नो चेन्नरकप्राप्तिरिति भावः । इदं चोक्तं शैवागमानुसारेण । तथा चोक्तम् – "प्रमादात् पतिते लिङ्गे भिन्ने चोरादिभिर्हृते । पीठादुत्क्रमिते वापि तूर्णं प्राणं परित्यज ॥" (सू.आ., उ.भा., क्रि.पा., ५.४८) । प्रस्तावेऽन्यत्रान्य-लिङ्गधारणमपि शैवागमेषु विहितम् । तथा हि – "दीक्षायां गुरुणा लिङ्गं धारितं गिरिजे यदा । तदाप्रभृति लिङ्गाङ्गसम्बन्धी स्यन्निरन्तरम् ॥ इष्टलिङ्गे परे लुप्ते लिङ्गमन्यन्न धारयेत् । पुनस्तदेव लब्धं चेद् धारयेद् देव्यशङ्कितः ॥ जले वा पतिते लिङ्गे पुन दृष्टं तदेव हि । धारयेदवधानेन वीरशैवो न दुष्यति ॥" (सू.आ., उ.भा., क्रि.पा., ७.५३-५५) । अत्रेय-मनुमतिः सामान्यवीरशैवकृते दीयते । विशेषवीरशैवकृते निराभार-वीरशैवकृते वा तादृशानुमतिर्नास्ति । (सू.आ., उ.भा., क्रि.पा., ७.६०-६२; ७.७५-७६) । मतान्तरमुक्तं पारमेश्वरे । तथा हि – "लिङ्गादिनाशे दैवाद्वा धारयेद् विधिवत्पुनः । यथा न व्रतलोपः स्यात्तथा साध्यं व्रतं मम ॥" (पार.आ., १५.४१) । अयमनुमतिर्विशेषवीरशैवकृतेऽपि दीयते – "लिङ्गादिनाशाद्दैवेन धारयेद्विधितः पुनः ।" (पार.आ., १५.४९) । निरभारवीरशैवकृते तूक्तं तत्रैव – "मृगयित्वापि तल्लिङ्गं लभ्यते न यदीश्वरि । तदाऽलाभं विनिश्चित्य त्यजेद्देहमतन्द्रितः ॥" (पार.आ., १५.७४) । कारणागमे तु नष्टे लिङ्गे पुनर्धारणमेव विधीयते । तथा हि – "हन्त ते कथयामीदं रहस्यमपि सुव्रते । द्वित्रिखण्डतया भङ्गे बद्ध्वा सर्जरसेन तु ॥ कृत्वा तत्त्वकलान्यासं पूजयेदविशेषतः ॥ चूर्णीकृते तु लिङ्गस्य चान्यस्मिंस्तद्गताः कलाः । आरोप्य बिभृयाल्लिङ्गं पुनर्लब्धं गुरोःकरात् ॥ अथ लिङ्गस्य लोपे तु कर्तव्यं शृणु सुन्दरि । लिङ्गस्यादर्शने

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्याज्याः प्राणाः स्युर्भक्तियोगतः ॥ प्राणत्यागे त्वशक्तश्चेदेकविंशति-दिनावधि निराहारो जपेन्मूलं लिङ्गमन्वेषयेच्छनैः ॥ यदा वै लभते लिङ्गं धृत्वा भक्त्या तदैव तत् । गुरुं माहेश्वरांश्चैव यथाशक्ति समर्चयेत् ॥ तदाप्यलाभे विसृजेदसून् सद्भक्तियोगतः ॥ प्राणत्यागे त्वशक्तश्चे-ल्लिङ्गमन्यद् गुरोः करात् ॥ आकृष्टपूर्वलिङ्गीयकलान्यासादिशोभितम् । षडध्वन्यासकलितं बिभृयादप्रमादतः ॥'' (का.आ., उ.भा., क्रि.पा., १०.३०-३६) इति ॥ शैवागमादिशास्त्रपारङ्गतो चन्नबसवण्णस्तु लिङ्गनाशे प्राणत्यागः सर्वथाऽनुचित इत्यभिप्रायमत्यन्तं तीक्ष्णैः शब्दैः प्रति-पादयति । तथा हि – ''प्रतियिल्लद लिङ्गवु भिन्नवायित्तेंदु तनुव मेले शस्त्रवनिक्किकोण्डु आत्मघातव माडिकोम्ब द्रोहिय मुखव नोडलागदु अदेंतेंदडे मन्त्रभिन्नविल्लवागि पूजे भिन्नविल्ल; महाबयलोळगण सञ्च-वनरियदे आत्मघातव माडुव नरकिगळनेनेंबेनय्या कूडल चन्न सङ्गमदेव।'' (च.ब.व., सं., ६.५३) –''अनुपममिदं लिङ्गं भिन्नमिति कारणात् शस्त्रप्रयोगेन शरीरं भित्त्वाऽऽत्मघातोद्युक्तस्य द्रोहिणो मुखं न द्रष्टव्यम् । कथमिति चेदुच्यते– मन्त्रो न भिन्नः पूजाऽपि न भिन्ना । महाकाशस्यान्तरे सम्बन्दमविज्ञाय ये चात्मघातायाऽऽत्मानं विषयीकुर्वन्ति तानुद्दिश्य किमु वक्तव्यमिति न जानामि, हे कूडलचन्नसङ्गमदेव!'' अत्रेदमनुसन्धेयम् – श्रीसिद्धान्तशिखामणौ तु केषुचन प्रसङ्गेषु शैवागमेषूक्तदिशा नष्टे इष्टलिङ्गे प्राणत्याग एव शरणम् इत्यभिप्रायः प्रस्तूयते । अत्रेष्टलिङ्गरक्षणे तात्पर्यं न तु प्राणत्यागे ।

लिङ्गस्य धारणं पुण्यं सर्वपापप्रणाशनम् ।
आदृतं मुनिभिः सर्वैरागमार्थविशारदैः ॥२९॥

व्याख्या— लिङ्गधारणस्य प्रयोजनमाह – **लिङ्गस्येति** । **लिङ्गस्य** इष्टलिङ्गस्य **धारणं** धृतिः **पुण्यं** पुण्यकरं **सर्वपापप्रणाशनं** सर्वेषां पापानां दुःस्कृतानां प्रणाशनम् नाशकरं (च) । इदं तु **आगमविशारदैः** शैवागम-पारंगतैः **सर्वैः** समस्तैर्**मुनिभिः** योगिभिः **आदृतं** आदरेण स्वीकृतम् ॥२९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गधारणमाख्यातं द्विधा सर्वार्थसाधकम् ।
बाह्यमाभ्यन्तरं चेति मुनिभिर्मोक्षकाङ्क्षिभिः ॥३०॥

व्याख्या— लिङ्गधारणस्य द्वैविध्यमाह – **लिङ्गधारणमिति । सर्वार्थ-साधकं** इह भोगः परे मोक्षः इत्युभयफलप्रदं **लिङ्गधारणं** इष्टलिङ्गधृतिः **बाह्यं** क्रियादीक्षादिप्रकारेण क्रियमाणम्, **आभ्यन्तरं** बाह्यक्रियानिरपेक्षत्वेन स्वयमेव साक्षात्क्रियमाणम् आन्तरिकं **चेति मोक्षकाङ्क्षिभिः** मुमुक्षुभिः **मुनिभिः** योगिभिः **आख्यातम्** उक्तम् ॥ [सर्वार्थसाधकम् इति पाठः मरितोण्टदार्येण स्वीकृतः । अयमेव उत्तमः पाठः । अन्यत्र 'धर्मार्थ-साधकैः' इति पाठोऽङ्गीकृतः (पश्यत – उज्जिनीशकृत-कन्नडव्याख्या-सहिते श्रीसिद्धान्तशिखामणौ, पृ.२३)] ॥३०॥

चिद्रूपं परमं लिङ्गं शाङ्करं सर्वकारणम् ।
यत्तस्य धारणं चित्ते तदान्तरमुदाहृतम् ॥३१॥

व्याख्या— आभ्यन्तरं लिङ्गधारणं नाम किम्? उच्यते– **चिद्रूपमिति। चिद्रूपं** चित्स्वरूपं **परमं** सर्वश्रेष्ठं **सर्वकारणं** देशकालाकाराद्यवच्छिन्नस्य सर्वस्य जगतो मूलं **शाङ्करं** शङ्करसम्बन्धि **लिङ्गं** शिवलिङ्गं **यत्** यदस्ति तस्य लिङ्गस्य **चित्ते** मनसि **धारणं** स्थापनं च यत् **आन्तरम्** आभ्यन्तरम् **उदाहृतम्** कथितम् । महालिङ्गस्य हृत्पद्मे धारणम् आभ्यन्तरलिङ्गधारणम् इत्युच्यते । अत्र धारणं नाम नैरन्तर्येण तत्स्वरूपानुसन्धानमेव ॥३१॥

चिद्रूपं हि परं तत्त्वं शिवाख्यं विश्वकारणम् ।
निरस्तविश्वकालुष्यं निष्कलं निर्विकल्पकम् ॥३२॥

व्याख्या— तदेव शिवाभिधानं परं तत्त्वमित्याह – **चिद्रूपमिति । चिद्रूपं** चित्स्वरूपं, **हि** इति प्रसिद्धौ, चित्स्वरूपमिति यत् प्रसिद्धं तत्, **विश्वकारणं** विश्वस्य जगतः सृष्ट्यादिकारणं **निरस्तविश्वकालुष्यं** कलुषस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावः कालुष्यम्, विश्वस्य कालुष्यं दोषो विश्वकालुष्यम्, निरस्तं विश्वकालुष्यं येन तत्, **निष्कलं** निरवयवं **निर्विकल्पकं** भेदरहितं यत्तत् **शिवाख्यं** शिवाभिधानं **परं तत्त्वं** परमोत्कृष्टं तत्त्वम् ॥३२॥

सत्तानन्दपरिस्फूर्तिसमुल्लासकलामयम् ।
अप्रमेयमनिर्देश्यं मुमुक्षुभिरुपासितम् ॥३३॥

परं ब्रह्म महालिङ्गं प्रपञ्चातीतमव्ययम् ।
तदेव सर्वभूतानामन्तस्त्रिस्थानगोचरम् ॥३४॥

व्याख्या— तत्स्वरूपं बहुधा निरूपयति – **सत्तानन्देति । सत्तानन्दपरिस्फूर्तिसमुल्लासकलामयं** सत्ता चानन्दश्च सत्तानन्दौ, तयोः परिस्फूर्तिः अभिव्यक्तिः, तस्याः समुल्लासः प्रकाशः, तस्य कला, तस्याः बाहुल्यं यस्मिन् तत्, **अप्रमेयं** प्रत्यक्षादिप्रमाणैरगम्यम् **अनिर्देश्यं** इदमेतदिति वक्तुमशक्यं **मुमुक्षुभिः** मोक्षकाङ्क्षिभिः **उपासितं** सेवितं **प्रपञ्चातीतं** जगदतीतम् **अव्ययं** त्रिकालाबाध्यं **महालिङ्गं** महालिङ्गात्मकं **परं ब्रह्म** परमं ब्रह्म यत् **तदेव** तत् एव **सर्वभूतानां** सर्वप्राणिनां **अन्तः** अन्तरङ्गे **त्रिस्थानगोचरम्** त्रिपु स्थानेषु विद्यमानम् अस्ति ॥३३-३४॥

मूलाधारे च हृदये भ्रूमध्ये सर्वदेहिनाम् ।
ज्योतिर्लिङ्गं सदा भाति यद्ब्रह्मेत्याहुरागमाः ॥३५॥

व्याख्या— कानि त्रिस्थानानीत्यत्राह – **मूलाधार इति । यद् ब्रह्मेति** यत् परब्रह्म इति **आगमाः** उपनिषदः **आहुः** प्रतिपादयन्ति (तत्) **ज्योतिर्लिङ्गं** ज्योतिस्वरूपं लिङ्गं **सर्वदेहिनां** सर्वप्राणिनां **मूलाधारे** गुह्यस्थान-जननेन्द्रियमध्ये द्व्यङ्गुलस्थानं मूलाधारः, तस्मिन्, **हृदये** हृत्पद्मे, **भ्रूमध्ये** भ्रुवोर्मध्यस्थाने **च सदा** सर्वदा **भाति** प्रकाशते । मूलाधार आधारचक्रस्थानम्। तत्र चतुर्दलपद्मं तिष्ठति। हृदयम् अनाहतचक्रस्थानम्। तत्र द्वादशदलपद्मं भवति । भ्रूमध्यस्थानम् आज्ञाचक्रस्थानम् । तत्र

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्विदलपद्मं विद्यते । एतानि योगिभिः परिभावितानि । मूलाधारादित्रिस्थानेषु स्थितानां तत्तत्पद्मानां मध्ये ब्रह्मपदवाच्यं ज्योतिर्लिङ्गं प्रकाशते इत्यवगन्तव्यम् ॥३५॥

अपरिच्छिन्नमव्यक्तं लिङ्गं ब्रह्म सनातनम् ।
उपासनार्थमन्तःस्थं परिच्छिन्नं स्वमायया ॥३६॥

व्याख्या— अखण्डं तन्महालिङ्गं भक्तानुग्रहार्थं परिच्छेदं प्राप्तवदित्यत्राह – **अपरिच्छिन्नमिति । अपरिच्छिन्नम्** अखण्डम् **अव्यक्तम्** अनभिव्यक्तं **सनातनम्** अनाद्यनन्तं **ब्रह्म** ब्रह्मस्वरूपम् **लिङ्गं** महालिङ्गम् **उपासनार्थं** पूजाध्यानाद्यर्थं **स्वमायया** स्वीयया मायाशक्त्या **परिच्छिन्नं** विभक्तं सद् **अन्तस्थं** शरीराभ्यन्तरे त्रिषु स्थानेषु स्थितम् भवति ॥ अथवा उपासनार्थं महालिङ्गं लिङ्गत्रयात्मकं बभूव । शैवागमोक्तदिशा महालिङ्गं भावप्राणेष्टलिङ्गत्वेन त्रिधा बभूव । भावप्राणलिङ्गे अन्तःस्थे भूत्वा तयोरनुसन्धानपूर्वकम् इष्टलिङ्गरूपेण पूजां स्वीकुरुतः । तदुक्तम् – "महालिङ्गं त्रिधा जातं सुजनानुजिघृक्षया । प्रथमं भावलिङ्गं तु द्वितीयं प्राणलिङ्गकम् । तृतीयमिष्टलिङ्गं स्यादित्येवं त्रिविधं मतम् ॥" (चं.आ., उ.भा., क्रि.पा., ३.२३); "इष्टप्राणभावेषु लिङ्गधारणं वदन्ति" (लिङ्ग.उ., पृ.३११); "इष्टं स्थूलतनोः प्रोक्तं प्राणं सूक्ष्मतनोः स्मृतम् । भावाख्यं कारणस्यैवं तनुत्रयगतं त्रयम् ॥" (चं.आ., उ.भा., क्रि.पा., ३.४५); "भावप्राणेष्टलिङ्गानि पूजयेदेकभावतः ॥" (सू.आ., उ.भा., क्रि.पा., ६.४४) ॥३६॥

लयं गच्छति यत्रैव जगदेतच्चराचरम् ।
पुनः पुनः समुत्पत्तिं तल्लिङ्गं ब्रह्म शाश्वतम् ॥३७॥

व्याख्या— लिङ्गपदनिष्पत्तिमाह – **लयमिति । यत्र** यस्मिन् **चराचरम् एतत् जगत्** जङ्गमस्थावरात्मकम् एतद्दृश्यमानं विश्वं **लयं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गच्छति प्रलयकाले लीनं भवति (यस्मात् च) **पुनः पुनः** पौनःपुन्येन **समुत्पत्तिं** (गच्छति) जन्म लभते, **तत् शाश्वतं ब्रह्म** तन्नित्यनिरन्तरं ब्रह्मस्वरूपं **लिङ्गं** महालिङ्गम् ॥ लिङ्गमिति द्विवर्णघटितं लिङ्गपदं 'लिम्' लीयते इति 'गम्' गम्यते इति (लीयते गम्यते इति) निष्पन्नम् । तथा चोक्तं शैवागमे – "लिकारो लयबुद्धिस्थो बिन्दुना स्थितिरुच्यते । गकारात् सृष्टिरित्युक्ता लिङ्गं सृष्ट्यादिकारणम् ॥ लीनं प्रपञ्चरूपं हि सर्वमेतच्चराचरम् । सर्गादौ गम्यते यस्मात्तस्माल्लिङ्गमुदीरितम् ॥" (सू.आ., उ.भा., क्रि.पा., ६.५-६); "जठरे लीयते सर्वं जगत् स्थावरजङ्गमम् । पुनरुत्पद्यते यस्मात्तद् ब्रह्म लिङ्गसंज्ञकम् ॥" (चं.आ., उ.भा., क्रि.पा., ३.८) । उपनिषदुक्त्यनुसारमेवेयं निष्पत्तिः । तथा हि – "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।" (छां.उ., ३.१४.१) – इदं सर्वं ब्रह्म । तज्जम् ततः जायते (विश्वम्), तल्लं-तस्मिँल्लीयते, तदन्-तेन अनिति (श्वसिति) इति शान्तः उपासीत इति ॥ अन्यत्राप्युक्तम् – "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्ति अभिसंविशन्ति । तद् विजिज्ञासस्व । तद्ब्रह्म ।" (तै.उ., ३.१) ॥३७॥

तस्माल्लिङ्गमिति ख्यातं सत्तानन्दचिदात्मकम् ।
बृहत्त्वाद् बृंहणत्वाच्च ब्रह्मशब्दाभिधेयकम् ॥३८॥

व्याख्या— उक्तार्थं विवृणोति – **तस्मादिति** । **तस्मात्** तत्कारणात् लीयते गम्यत इति व्युत्पत्तिवशात्, तत् **सत्तानन्दचिदात्मकं** सच्च आनन्दश्च चिच्च स्वरूपं यस्य तत्, लिङ्गम् इति महालिङ्गम् इति यत् **ख्यातं** प्रसिद्धं तदेव **बृहत्त्वात्** महदाकारत्वात् **बृंहणत्वात्** विश्वसृष्टिद्वाराऽऽत्मानो वृद्धिपरत्वात् च **ब्रह्मशब्दाभिधेयकम्** ब्रह्मपदवाच्यम् ॥ "तस्माल्लिङ्गं परं ब्रह्म सच्चिदानन्दलक्षणम् ।" (सू.आ., उ.भा., क्रि.पा., ६.११) इत्यस्यानुस्वानमत्र दृश्यते ॥३८॥

आधारे हृदये वापि भ्रूमध्ये वा निरन्तरम् ।
ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणम् ॥३९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— अन्तर्लिङ्गधारणं नाम त्रिषु स्थानेष्वेकतमेऽन्तर्लिङ्गानुसन्धानमित्याह **आधारे इति** । **आधारे** मूलाधारे **हृदये** हृत्स्थाने **भ्रूमध्ये** भ्रुवोर्मध्ये **निरन्तरम्** अव्यवधानं यत् **ज्योतिर्लिङ्गानुसन्धानं** ज्योतिर्लिङ्गस्वरूपान्तर्लिङ्गस्य ध्यानात्मकानुचिन्तनम् **आन्तरं** आभ्यन्तरं **लिङ्गधारणम्** लिङ्गस्य योजनम् ॥ शैवागमेष्वस्य प्राणलिङ्गमिति नामान्तरम् ॥ तथा चोक्तम् – "प्राणेष्वन्तमनःस्थानं हृदयाब्जगतं शिवम् । लिङ्गं यदिह ग्राह्यम् प्राणलिङ्गसमाह्वयम् । ज्योतीरूपं तदेव स्यात् स्थानं मुख्यं महेशितुः ॥" (चं.आ., उ.भा., क्रि.पा., ३.३५-३६)। सदानन्दोपनिषद् अस्य आधारत्वेन भासते – "आधारे दहरेऽव्यक्ते स्वर्णस्फटिकवैद्रुमम् । निरन्तरानुसन्धानात् तदन्तर्धारणं विदुः ।" (उ.सं., द्वि.भा., पृ.३७८) ॥३९॥

आधारे कनकप्रख्यं हृदये विद्रुमप्रभम् ।
भ्रूमध्ये स्फटिकच्छायं लिङ्गं योगी विभावयेत् ॥४०॥

व्याख्या— आधारादिस्थानेषु लिङ्गस्य कान्तिविशेषमाह – **आधारे इति** । **आधारे** मूलाधारे **कनकप्रख्यं** हिरण्यकान्तियुक्तं **हृदये** हृत्पीठे **विद्रुमप्रभं** प्रवालप्रकाशयुक्तं **भ्रूमध्ये** भ्रुवोर्मध्ये **स्फटिकच्छायं** स्फटिकप्रभायुक्तं **लिङ्गं** प्राणलिङ्गं **विभावयेत्** संभावयेत् । ध्यायेदित्यर्थः । "आधारे कनकप्रख्यं हृदये विद्रुमप्रभम् । भ्रूमध्ये दीपसंकाशं प्राणलिङ्गं प्रकीर्तितम् ॥" (चं.आ., उ.भा., क्रि.पा., ३.३३) इत्यस्यानुस्वानोऽयम् ॥४०॥

निरुपाधिकमाख्यातं लिङ्गस्यान्तरधारणम् ।
विशिष्टं कोटिगुणितं बाह्यलिङ्गस्य धारणात् ॥४१॥

ये धारयन्ति हृदये लिङ्गं चिद्रूपमैश्वरम् ।
न तेषां पुनरावृत्तिर्घोरसंसारमण्डले ॥४२॥

व्याख्या— निरुपाधिकात्मकस्याऽऽन्तरलिङ्गधारणस्य सत्फलमाह – **निरुपाधिकमिति** । **लिङ्गस्य** परशिवस्वरूपस्य महालिङ्गस्य **आन्तरधारणम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आभ्यन्तरे निरन्तरध्यानरूपेण धारणं **निरुपाधिकमाख्यातं** निरुपाधिकम्, रूपगुणाद्युपाधिरहितम् इति वर्णितम् । तच्च **वाह्यलिङ्गस्य धारणात्** वाह्ये शरीरे लिङ्गस्य धारणापेक्षया **कोटिगुणितं** कोटिवारम् अधिकं **विशिष्टम्** असाधारणं च ॥ **ये** ये भक्ताः **चिद्रूपं** चिदाकारम् **ऐश्वरं** ईश्वरसम्वन्धि **लिङ्गं** महालिङ्गं **हृदये** हृत्पीठे **धारयन्ति** स्थापयन्ति **तेषां** तादृशानां भक्तानां **घोरसंसारमण्डले** भयङ्करे जननमरणात्मकस्य संसारस्य चक्रे **न पुनरावृत्तिः** न पुनरागमनम् । ते परमुक्तिभाज इत्यर्थः ॥४१-४२॥

अन्तर्लिङ्गानुसन्धानमात्मविद्यापरिश्रमः ।
गुरूपासनशक्तिश्च कारणं मोक्षसम्पदाम् ॥४३॥

व्याख्या— मोक्षसम्पदः कारणं ब्रूते — **अन्तर्लिङ्गेति** । **अन्तर्लिङ्गानुसन्धानम्** आभ्यन्तरे लिङ्गस्य ध्यानद्वारा ऐक्यानुसन्धानम् **आत्मविद्यापरिश्रमः** उपनिषन्महावाक्यानां साक्षात्कारात्मिकायाम् अध्यात्मविद्यायां नितरां निरतत्वं **गुरूपासानशक्तिश्च** गुरुसेवासामर्थ्यं चेत्यैतत्त्रयं **मोक्षसम्पदां** मोक्षरूपसम्पदां **कारणम्** प्राप्तिनिमित्तम् ॥ त्रयोऽत्र समुदिता मोक्षकारणमिति मन्तव्यम् ॥ आत्मज्ञानमेवाऽऽत्मलाभः । अन्तर्लिङ्गानुसन्धानादिना स नितरां निशितत्वं भजते ॥४३॥

वैराग्यज्ञानयुक्तानां योगिनां स्थिरचेतसाम् ।
अन्तर्लिङ्गानुसन्धाने रुचिर्बाह्ये न जायते ॥४४॥

व्याख्या— शिवयोगिनामन्तर्लिङ्गानुसन्धाने रुचिर्न बाह्ये इत्याह — **वैराग्येति** । **वैराग्यज्ञानयुक्तानां** वैराग्यं वीतरागत्वं ज्ञानं विवेकश्च वैराग्यज्ञाने, ताभ्यां युक्ताः विशिष्टाः वैराग्यज्ञानयुक्ताः, तेषाम्, **स्थिरचेतसां** स्थिरं चेतः (मनः) येषां ते स्थिरचेतसः स्थिरमनसः, तेषाम्, **योगिनां** शिवयोगिनां **अन्तर्लिङ्गानुसन्धाने** अन्तर्लिङ्गनिदिध्यासने **रुचिः** आसक्तिः, **बाह्ये** बाह्यलिङ्गे **न जायते** न प्रवर्तते ॥ अचञ्चलहृदयानाम् अन्तर्लिङ्गानुसन्धानं वैराग्यज्ञानयुक्तत्वे सुकरमिति भावः ॥४४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ब्रह्मा विष्णुश्च रुद्रश्च वासवाद्याश्च लोकपाः ।
मुनयः सिद्धगन्धर्वा दानवा मानवास्तथा ॥४५॥

सर्वे च ज्ञानयोगेन सर्वकारणकारणम् ।
पश्यन्ति हृदये लिङ्गं परमानन्दलक्षणम् ॥४६॥

व्याख्या— ब्रह्मादिदेवाः, लोकपाः, मुनयः, दानवाः, मानवाश्चेति सर्वे अन्तर्लिङ्गानुसन्धानेनाऽऽनन्दम् अनुभवन्तीत्याह – **ब्रह्मेति** । **ब्रह्मा** सृष्टिकृद् ब्रह्मा, **विष्णुः च** स्थितिकृद्विष्णुश्च, **रुद्रः च** संहारकृद्रुद्रश्च, इति त्रिमूर्तयः, **वासवाद्याश्च** इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशाः **लोकपालाः** अष्टदिक्पालकाः; **मुनयः** गौतमादयो मुनयः, **सिद्धगन्धर्वाः** अदिनाथादयः सिद्धाः, हाहादयो गन्धर्वाः; **दानवाः** वाणादयो दानवाः, **मानवाः तथा** मनुष्याश्च तथैव **सर्वे** एते त्रिमूर्त्यादयः सकलाः **ज्ञानयोगेन** "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत् स्वयं योगसंसिद्धः कालेनात्मानि विन्दति ॥" (भ.गी., ५.३९) इति भगवदुक्तरीत्या महावाक्यज्ञान-साक्षात्कारात्मकब्रह्मैक्यज्ञानयोगेन, **सर्वकारणकारणं** सर्वेषामवान्तर-कारणानां मूलकारणभूतं **परमानन्दलक्षणं** परमानन्दस्वरूपं **लिङ्गं** महालिङ्गं **हृदये** स्वस्वहृदयमन्दिरे **पश्यन्ति** साक्षात्कुर्वन्ति ॥ "सर्वमिदं ब्रह्मविष्णु-रुद्रेन्द्रास्ते सम्प्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शम्भुः ।" (अथ. शिखा. उ., ३.४) इति श्रुतिरत्र प्रमाणम् ॥४५-४६॥

तस्मात्सर्वप्रयत्नेन शाङ्करं लिङ्गमुत्तमम् ।
अन्तर्विभावयेद्विद्वान् अशेषक्लेशमुक्तये ॥४७॥

व्याख्या— संसारक्लेशनिवारणायाऽन्तर्लिङ्गं विभावयेदित्याह – **तस्मादिति** । **तस्मात्** पूर्वोक्तवचनसूचनात् **विद्वान्** धीमान् **अशेषक्लेश-मुक्तये** सर्वविधदुःखनिर्मूलनाय **सर्वप्रयत्नेन** सकलरीत्या प्रयत्नपूर्वकम्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उत्तमं श्रेष्ठं शाङ्करं लिङ्गं परशिवात्मकं महालिङ्गम् **अन्तर्विभावयेत्** आभ्यन्तरे ध्यायेत् ॥४७॥

अन्तर्धारयितुं लिङ्गमशक्तः शक्त एव वा ।
बाह्यं च धारयेल्लिङ्गं तद्रूपमिति निश्चयात् ॥४८॥

व्याख्या— अन्तर्लिङ्गधारणशक्तो वाऽशक्तो वा बाह्यलिङ्गधारणं तस्याऽवश्यंभावीति कथ्यते – **अन्तरिति** । **अन्तर्धारयितुम्** आभ्यन्तरे आधार-हृदय-भ्रूमध्येषु लिङ्गध्यानात्मकं लिङ्गधारणं साधयितुम् **अशक्तः शक्तो वा** असमर्थः समर्थो वा **तद्रूपमिति निश्चयात्** अन्तर्लिङ्गस्य तस्य रूपं बाह्यस्वरूपम् इति अवधारणात् **बाह्यं लिङ्गं** बहिरङ्गे शरीरे बाह्यं दीक्षाद्वारा प्रदीयमानं लिङ्गं **धारयेत्** विभृयात् ॥ "अन्तर्धारणशक्तेन ह्यशक्तेन द्विजोत्तमाः । संस्कृत्य गुरुणा दत्तं शैवं लिङ्गमुरःस्थले । धार्यं विप्रेण मुक्त्यर्थं शिवतत्त्वविदो विदुः ॥" (सदा. उ., ५.३७९) इति श्रुतिप्रमाणम् ॥४८॥

लिङ्गं तु त्रिविधं प्रोक्तं स्थूलं सूक्ष्मं परात्परम् ।
इष्टलिङ्गमिदं स्थूलं यद्बाह्ये धार्यते तनौ ॥४९॥

प्राणलिङ्गमिदं सूक्ष्मं यदन्तर्भावनामयम् ।
परात्परं तु यत्प्रोक्तं तृप्तिलिङ्गं तदुच्यते ॥५०॥

व्याख्या— अथ महालिङ्गस्य त्रैविध्यं ब्रूते – **लिङ्गमिति** । **लिङ्गं तु** महालिङ्गं **स्थूलं सूक्ष्मं परात्परम्** इति **त्रिविधं** त्रिप्रकारमिति **प्रोक्तं** कथितम् । तत्र **इदम् इष्टलिङ्गं** एतदिष्टलिङ्गं **यद् बाह्ये तनौ** यत् बाह्ये शरीरे **धार्यते** ध्रियते तत् **स्थूलं** साकारत्वाद् दृश्यमानम् । **इदं प्राणलिङ्गं** एतद् प्राणलिङ्गं **यदन्तरे** यदाभ्यन्तरे हृत्पद्मे **भावनामयं** सन्मात्रभावनात्मकं तत् **सूक्ष्मं** निरवयवं योगिभिर्भाव्यमानं ज्योतिर्लिङ्गस्वरूपम् । **यत् परात्परम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(इति) **प्रोक्तं** यत् परात्परम् इति कथितं **तत्तु तृप्तिलिङ्गम्** तृप्तिस्वरूपं लिङ्गमिति **उच्यते** कथ्यते ॥ महालिङ्गस्य त्रैविध्यम्, त्रिषु शरीरेषु तेषां स्थानम् इत्यनर्योविषये शैवागमानाम् उक्तिः पूर्वमस्मिन्नेव परिच्छेदे षट्त्रिंशत्तमश्लोकस्य व्याख्यायां द्रष्टव्या । अत्र सदानन्दोपनिषदुक्तिरियं सर्वस्यास्य विषयस्य मूलसूत्रमिव भाति – "यदिदं लिङ्गं सकलं सकल-निष्कलं निष्कलं च स्थूलं सूक्ष्मं च तत्परम्, स्थूले स्थूलं सूक्ष्मे सूक्ष्मं कारणे तत्परं च ॥" इति (सदा.उ., उ.सं., ३७९) ॥४९-५०॥

भावनातीतमव्यक्तं परब्रह्म शिवाभिधम् ।
इष्टलिङ्गमिदं साक्षादनिष्टपरिहारतः ॥
धारयेदवधानेन शरीरे सर्वदा बुधः ॥५१॥

व्याख्या— कस्मादुच्यते इष्टलिङ्गम् इत्यत्राह – **भावनातीतमिति । भावनातीतम् अव्यक्तम्** अबाह्येन्द्रियविषयत्वात् सकलमनोवृत्त्यग्राह्यत्वाच्च भावनातीतम्, अत एवाऽव्यक्तं रूपादिरहितं **शिवाभिधं** निगमागम-प्रसिद्धशिवाख्यं यत् तत् (लिङ्गं) **साक्षात्** प्रत्यक्षतया **अनिष्टपरिहारतः** संसारचक्रात्मकानिष्टपरिहारात्, पञ्चम्यास्तसिल्, **इष्टलिङ्गम्** स्वेष्टरूपत्वाद् इष्टलिङ्गम्, **बुधः** सुधीः **इदम्** एतल्लिङ्गं **सर्वदा** सर्वकालं **शरीरे** तनौ शिरसि कण्ठस्थाने वक्षसि वा नाभेरूर्ध्वभागे यथा भवति तथा **अवधानेन** सावधानतया **धारयेद्** बिभृयात् ॥ अनिष्टं संसारपाशबन्धनम्, तस्य परिहारः, इष्टं तु मोक्षः, तदवाप्तिपरत्वम् । एवमनिष्टपरिहाराद् इष्टावाप्तिपरत्वाच्च तदिष्टलिङ्गमित्यन्वर्थं नाम ॥ "मोक्षमेव धारणं विद्यात् इति लिङ्गोपनिषत्" (लिङ्ग.उ., उ.सं., ५.३११) । यद्देहे लिङ्गं न धृतं तद्देहं न पश्येदित्येव श्रुतिः । तथा हि – "धारणं यस्य न विद्यते तद्देहं न पश्येत्" इति । (लिङ्ग.उ., उ.सं., पृ.३१०) ॥५१॥

मूर्ध्नि वा कण्ठदेशे वा कक्षे वक्षःस्थलेऽपिवा ।
कुक्षौ हस्तस्थले वापि धारयेल्लिङ्गमैश्वरम् ॥५२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— कुत्र देहे लिङ्गं धारयेदित्याह – **मूर्ध्नि वेति । मूर्ध्नि वा** शिरसि वा **कण्ठदेशे वा** कण्ठस्थाने वा **कक्षे** पार्श्वे **वक्षःस्थलेऽपि वा** अथवा उरःस्थले **कुक्षौ** उदरप्रदेशे **हस्तस्थले वापि** पाणौ वा **ऐश्वरं लिङ्गम्** इष्टलिङ्गस्वरूपं शिवलिङ्गं **धारयेत्** बिभृयात् ॥ तत्र हस्तस्थले धारणं पूजासमये स्यात् । हृदयस्थाने धारणमुत्तमम् । तदुक्तम् – "शीर्षे कण्ठे वक्षसि कक्षदेशे नाभौ हस्ते सर्वदा प्राणलिङ्गम् । धार्यं यथासम्प्रदायं पुरस्ताद्गुरोर्विदित्वा हृदये मुख्यमुक्तम् ॥" इति । (सि.शिखा.उ., उ.सं., भाग २, पृ.३८०) ॥५२॥

नाभेरधस्तल्लिङ्गस्य धारणं पापकारणम् ।
जटाग्रे त्रिकभागे च मलस्थाने न धारयेत् ॥५३॥

व्याख्या— कुत्र लिङ्गं न धारयेदित्याह – **नाभेरिति । नाभेः** नाभिप्रदेशात् **अधस्तात्** अधः **लिङ्गस्य धारणम्** इष्टलिङ्गस्य धृतिः **पापकारणम्** पापस्य निमित्तं भवति । **जटाग्रे** केशवन्धाग्रे **त्रिकभागे च** कटिप्रदेशे पृष्ठास्थिनोऽधो भागे च **मलस्थाने** गुदसमीपे (च) **न धारयेत्** न बिभृयात् ॥५३॥

लिङ्गधारी सदा शुद्धो निजलिङ्गं मनोरमम् ।
अर्चयेद् गन्धपुष्पाद्यैः करपीठे समाहितः ॥५४॥

बाह्यपीठार्चनादेतत् करपीठार्चनं वरम् ।
सर्वेषां वीरशैवानां मुमुक्षूणां निरन्तरम् ॥५५॥

व्याख्या— लिङ्गधारिणः शुचित्वमुक्त्वा कुत्र लिङ्गं पूजनीयमित्याह – **लिङ्गधारीति । लिङ्गधारी** लिङ्गं धर्तुं शीलमस्येति लिङ्गधारी, ताच्छील्ये णिनिः, लिङ्गधृत्, **सदा शुद्धः** सर्वदा शुचिः; **करपीठे** पाणिपीठे **मनोरमं** मनोहरं **निजलिङ्गम्** इष्टलिङ्गं **समाहितः** एकाग्रचित्तो भूत्वा **गन्धपुष्पाद्यैः** चन्दनकुसुमादिभिः **अर्चयेत्** पूजयेत् । **सर्वेषां वीरशैवानां** समेषां वीरशैव-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मतावलम्बिनां **मुमुक्षूणां** मोक्षकाङ्क्षिणां **निरन्तरं** सर्वदा **वाह्यपीठार्चनात्** वाह्यासन्यादिपीठे अर्चनात् **करपीठार्चनं** हस्तपीठे पूजनं **वरम्** उत्तमम्। लिङ्गधारी सदा शुद्धः। तदुक्तम् – "गच्छंस्तिष्ठन्निमिपन्नुन्मिषन् वा स्वपञ्चाग्राल्लिङ्गधारी शुचिः स्यात्। भुञ्जन् मूत्राद्युत्सृजन् वा कदाचिन्न तस्योच्छिष्टं भजते शुद्धदेही ॥" इति। (सि.शिखा.उ., उ.सं., भाग २, पृ.३८१)। करपीठार्चनं श्रेष्ठमिति शैवागमेषूक्तम्। तथा हि – "भक्तस्य सकलं पीठं मज्ज्ञस्य मम योगिनः। पाणिपीठं महल्लिङ्गं जगदेतच्चराचरम् ॥ अथोच्यते बहिः पीठं ततो न्यूनाधिकारिणः। लिङ्गस्य नित्यपूजायां करपङ्कजमादितः ॥ .... तत्र सर्वोत्तमं देवि पीठार्थं करपङ्कजम् ॥" इति। (पार.आ., १३.८, १०, १६) ॥५४-५५॥

व्रह्मविष्ण्वादयो देवा मुनयो गौतमादयः।
धारयन्ति सदा लिङ्गमुत्तमाङ्गे विशेषतः ॥५६॥

लक्ष्म्यादिशक्तयः सर्वाः शिवभक्तिविभाविताः।
धारयन्त्यलिकाग्रेषु शिवलिङ्गमहर्निशम् ॥५७॥

व्याख्या— लिङ्गधारणपरम्परामाह – **व्रह्मेति। व्रह्मविष्ण्वादयः** जगसृष्टिकृद् व्रह्मा जगत्स्थितिकृद्विष्णुः, इत्यादयो **देवाः** दिविजाः **गौतमादयो मुनयः** गौतमप्रभृतयस्तपस्विनः **सदा** सर्वदा **विशेषतः** विशेषतया **उत्तमाङ्गे** शिरसि **लिङ्गं** शिवलिङ्गं **धारयन्ति** बिभ्रति। **सर्वाः** सकलाः **लक्ष्म्यादिशक्तयः** लक्ष्मी इत्यादिन्य शक्तिदेवताः **शिवभक्तिविभाविताः** शिवे भक्तिः शिवभक्तिः तया विशेषेण प्रभाविताः सन्तः **अलिकाग्रेषु** ललाटाग्रे **शिवलिङ्गं** शिवस्वरूपभूतं लिङ्गम् **अहर्निशं** दिवा रात्रौ च **धारयन्ति** बिभ्रति ॥ यथा व्रह्मादिदेवता गौतमादयश्च मुनयः शिवलिङ्गं धारयन्ति तथा लक्ष्म्यादिशक्तिदेवता अपि शिवलिङ्गं धारयन्तीत्युक्तम्। अनेन स्त्रीपुरुषयोरुभयोरपि लिङ्गधारणं सम्प्रदायेऽस्मिन् वीरशैवे विहितमिति ज्ञायते। शैवागमेषु स्त्रीणां दीक्षाकृते निमित्तद्वयमुक्तम्। तत्र पतिपत्न्योः परस्पर सहधर्माचरणमाद्यम्। तदुक्तम् – "अदीक्षासंस्कृता

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नारी दीक्षितस्य निजेशितुः। न योग्या परचर्यायै दीक्षणीया सती ततः॥" इति। (का.आ., उ.भा., क्रि.पा., २.६७; २.६८-६९)। मोक्षार्थित्वं द्वितीयम्। यद्यपि धर्माचरणेषु स्वर्ग्येषु स्त्रीणां पत्यनुसरणवशात् पारतन्त्र्यं तथापि मोक्षप्राप्त्यर्थसाधने स्वातन्त्र्यमित्यवगन्तव्यम्। तथा चोक्तं– "पारतन्त्र्यं तु नारीणामुक्तं स्वर्ग्येषु कर्मसु। ऐहिकेष्वपि मोक्षार्थे न स्वातन्त्रं विहन्यते॥ तस्मादवश्यं नारीणां दीक्षा देया बुधोत्तमैः॥" इति। (का.आ., उ.भा., क्रि.पा., २.७०)। स्त्रीस्वातन्त्र्यपारतन्त्र्यविवादो मास्तु, अत्र नारीणामपि लिङ्गधारणे तत्पर्यम्॥५६-५७॥

वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च।
लिङ्गधारणमाख्यातं वीरशैवस्य निश्चयात्॥५८॥

व्याख्या— लिङ्गधारणस्य वेदादिमूलत्वमाह – **वेदेति**। **वेदशास्त्रपुराणेषु** वेदसंहितासु, धर्मशास्त्रेषु, लैङ्ग्यादिपुराणेषु च **कामिकाद्यागमेषु** कामिकादिवातुलान्ताष्टाविंशतिशैवागमेषु पाशुपताद्युपागमेषु **च वीरशैवस्य** वीरशैवमतावलम्बिनो **निश्चयात्** निश्चिततया **लिङ्गधारणं** शिवलिङ्गस्य धारणम् **आख्यातम्** उक्तम्, विहितमित्यर्थः॥५८॥

ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते।
तस्मात्पवित्रं तल्लिङ्गं धार्यं शैवमनामयम्॥५९॥

व्याख्या— अथ वेदे कुत्र लिङ्गधारणमुक्तमित्यत्राह– **ऋगित्याहेति**। **ऋगित्याह** ऋग् इति आह, ऋग् ऋग्वेदः इति एवम् आह ब्रूते – 'पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनुर्न तदामो अश्नुते शृतास इद्वहंस्तत्सत्समाशते॥' इति। (ऋ.वे., ९.८३.१)। अस्यार्थः – "हे ब्रह्मणस्पते लिङ्गरूपशरीरावच्छेदेन शरीरभावेनाधिष्ठित परमशिव, ते तव तद् ब्रह्मपदवाच्यलिङ्गरूपं शरीरं पवित्रम् उक्तरीत्या शुच्यशुचिकालेऽपि धर्तुं योग्यम्; विततम् इष्टादिभेदेन भक्तशरीरभेदेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वा बहुविधम्; प्रभुः निग्रहानुग्रहसमर्थस्त्वम्; विश्वतः समस्तानि, 'सार्वविभक्तिकस्तसिल्', गात्राणि भक्तगात्राणि भक्तशरीराणि पर्येषि व्याप्नोषि; धार्यमाणः सन् लिङ्गरूपशरीरद्वारा भक्ताङ्गसंयुक्तोऽसीत्यर्थः। अतप्ततनुः, तप्ता वेधामनुक्रियादीक्षादित्रयेण निर्दग्धपापपञ्जरा तनुर्यस्य स न भवतीति अतप्ततनुः, दीक्षात्रयरहितः, आमः अपरिपक्वान्तकरणः सन्, तत् परशिवरूपं न अश्नुते (न प्राप्नोति)'' इति। (लिं.धा.चं., पृ.१२४, १३३)। **तस्मात्** कारणादेतस्मात् **पवित्रं** परिशुद्धं **अनामयम्** दोषरहितं च **तल्लिङ्गं शैवं** तच्छिवलिङ्गं (इष्टलिङ्गं) **धार्यम्** धारणीयम् ॥५९॥

ब्रह्मेति लिङ्गमाख्यातं ब्रह्मणः पतिरीश्वरः।
पवित्रं तद्धि विख्यातं तत्सम्पर्कात्तनुः शुचिः ॥६०॥

अतप्ततनुरज्ञो वै आमः संस्कारवर्जितः।
दीक्षया रहितः साक्षान्नाप्नुयाल्लिङ्गमुत्तमम् ॥६१॥

व्याख्या— श्लोकद्वयेऽत्र 'पवित्रं ते विततं ब्रह्मणस्पते' इत्यस्या ऋचो व्याख्यानं दीयते – **ब्रह्मेतीति**। **ब्रह्मेति** ब्रह्म इति शब्देन **लिङ्गं** शिवलिङ्गम् **आख्यातम्** उक्तम्, **ब्रह्मणः पतिः** ब्रह्मणः स्वामी **ईश्वरः** परमेश्वरः शिवः, **तद्धि** तद् हि तदेव महालिङ्गं **पवित्रम्** (इति) परिशुद्धम् इति **विख्यातं** प्रसिद्धम्, **तत्सम्पर्कात्** तस्य महालिङ्गस्य इष्टलिङ्गात्मकस्य संसर्गात् **तनुः** शरीरं **शुचिः** शुद्धा ॥ **अतप्ततनुः** त्रिविधदीक्षाराहित्येनाऽसंस्कृतशरीरः **अज्ञः** नित्यानित्यवस्तुविवेकहीनः (अत एव) **आमः** अपरिपक्वः, वैराग्यशून्य इत्यर्थः, **संस्कारवर्जितः** शिवसंस्काररहितः **दीक्षया रहितः** गुरुकारुण्यद्योतकदीक्षारहितः, **साक्षात्** प्रत्यक्षतया **उत्तमं** श्रेष्ठं **लिङ्गं** शिवलिङ्गं **न आप्नुयात्** न बिभृयात् ॥ शैवागमेषूक्तमिदमेव। तथा हि – ''शिवदीक्षां विना देवि यः कुर्याल्लिङ्गधारणम्। स याति नरकं घोरं यस्त्यजेत्तदभक्तितः॥'' इति। (पार.आ., १.७६) ॥ अनेन सूच्यते यत् सुप्रसन्नेन गुरुणाऽनुगृहीतं लिङ्गमेव भोगमोक्षप्रदम्, स्वेच्छया धृतं फलरहितमिति ॥६०-६१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अघोराऽपापकाशीति या ते रुद्र शिवा तनूः ।
यजुषा गीयते यस्मात्तस्माच्छैवोऽघवर्जितः ॥६२॥

व्याख्या— लिङ्गधारणे याजुषी श्रुतिर्विद्यते इत्याह – **अघोरेति** । "**या ते रुद्र शिवा तनूरघोराऽपकाशिनी**" इति श्रीरुद्रश्रुतिः । (तै.सं., ४.५.१.१) श्लोकेऽस्मिन्नस्याः श्रुतेरर्थो द्वीयते । तथा हि – भो **रुद्र** परशिव, **ते** तव **शिवा** मङ्गलात्मिका **या तनूः** "लिङ्गं तु शिवयोर्देहः" इत्यागमोक्तेरिति मरितोण्टदार्यः, तदनुसारेण या शक्तिविशिष्ट-शिवस्वरूपिणी लिङ्गमूर्तिः सा **अघोरा** शान्ता **अपापकाशी** अपापेषु दीक्षामहिम्ना निर्मूलितपापेषु काशते प्रकाशत इति तथोक्ता, **इति यजुषा** एवं याजुष्या श्रुत्या **यस्मात्** यस्मात्कारणाद् **गीयते** प्रशस्यते **तस्मात्** तस्मात्कारणात् **शैवो** इष्टलिङ्गसम्बन्धभाग् वीरशैवः **अघवर्जितः** पाप-निर्मुक्तः, इति ॥ "लिङ्गं तु शवयोर्देहः" इत्यस्याकरो न ज्ञायते । तदनुरणनं च शैवागमोक्तावस्यां श्रूयते – "लिङ्गं शैवमिदं साक्षाच्छिवशक्त्युभयात्मकम् ।" (सू.आ., उ.भा., क्रि.पा., ६.७) ॥ अयमेव विशदीक्रियते – "नादरूपः शिवसाक्षाल्लिङ्गमित्यभिधीयते । तत्पीठिका महाशक्तिः सा च वै विन्दुरूपिणी ॥ तयोः संमेलनाद्देवि कला तत्र प्रतिष्ठिता । सा कला परमा सूक्ष्मा व्याप्ता सर्वत्र सर्वदा । तस्माल्लिङ्गमिति ख्यातं नादबिन्दुकलात्मकम् ॥" (सू.आ., उ.भा., क्रि.पा., ६.३-४) । अन्यत्राप्युक्तम् – "सा देवी जगतां माता स शिवो जगतः पिता । .... पितृमातृस्वरूपं हि शिवलिङ्गं प्रपूजयेत् ॥" इति । (चं.आ., उ.भा., क्रि.पा., ३.१८-१९) । तस्मादात्मानन्दप्राप्त्यर्थम् इष्टलिङ्गात्मकशिव-लिङ्गपूजनमवश्यं करणीयम् ॥६२॥

यो लिङ्गधारी नियतान्तरात्मा नित्यं शिवाराधनबद्धचित्तः ।
स धारयेत् सर्वमलापहत्यै भस्मामलं चारु यथाप्रयोगम् ॥६३॥

– इति लिङ्गधारणस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ गुरुकारुण्य-लिङ्गधारणप्रसङ्गो नाम षष्ठः परिच्छेदः समाप्तः ॥६॥

व्याख्या— लिङ्गधारणसम्पन्नस्य भस्मधारणस्थलं सूचयन् षष्ठं परिच्छेदं परिसमापयति— **य इति। यो नियतान्तरात्मा** यः संयमितान्तः-करणो **नित्यं** निश्चिततया **शिवाराधनबद्धचित्तः** शिवस्य इष्टलिङ्गस्वरूपस्य परमात्मन आराधनं पूजनम्, तस्मिन् बद्धं निमग्नं चित्तं मनः यस्य सः, **लिङ्गधारी** लिङ्गधारणवान् **सः** स पुरुषः **सर्वमलापहत्यै** सर्वेषां मलानाम् आणव-माया-कार्मिकाख्यानां त्रयाणाम् **अपहत्यै** विनाशाय **अमलं** पवित्रं **चारु** सुन्दरं च **भस्म** विभूतिं **यथाप्रयोगं** प्रयोगमनतिक्रम्य शास्त्रोक्त-प्रकारेण इति यावत्, **धारयेत्** उद्धूलनत्रिपुण्ड्रधारणक्रमेण बिभृयात् । अत्रोपजातिवृत्तम् इन्द्रवज्रोपेन्द्रवज्रापादयोः संमिश्रणात्मकम् । प्रथम-द्वितीय-चतुर्थ-पादेष्वेन्द्रवज्रा तृतीयपादे केवलमुपेन्द्रवज्रा । द्वितीय-परिच्छेदान्ते लक्षणमुक्तम् ॥६३॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
षष्ठः परिच्छेदः समाप्तः ॥६॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सप्तमः परिच्छेदः

विभूतिरुद्राक्षधारणप्रसङ्गः

६. अथ विभूतिधारणस्थलम् – (६)

व्याख्या— विभूतिधारणस्थलं प्रतिपिपादयिषुः शिवयोगिशिवाचार्य आदौ निरुपाधिकभस्मधारणं श्लोकद्वयेनाह –

भस्मधारणसंयुक्तः पवित्रो नियताशयः ।
शिवाभिधानं यत्प्रोक्तं भासनाद् भसितं तथा ॥१॥

महाभस्मेति संचिन्त्य महादेवं प्रभामयम् ।
वर्तन्ते ये महाभागा मुख्यास्ते भस्मधारिणः ॥२॥

व्याख्या— महाभस्मेति महादेवस्य ध्यानमेव निरुपाधिकभस्मधारणमित्याह – **भस्मेति** । **भस्मधारणसंयुक्तः** विभूतिधारणसम्पन्नः **पवित्रः** पावनः **नियताशयः** नियमितचित्तवृत्तिः भक्तः **शिवाभिधानं** शिव इति नामयुक्तं **यत्** **भसितं** यद्विभूतिरिति **प्रोक्तम्** उक्तं तत् **भासनात्** प्रकाशनात् **तथा** तथाविधं भस्म । **प्रभामयं** प्रकाशमयं **महादेवं** परमेश्वरं **महाभस्म** **इति** महद्विभूतिरिति **संचिन्त्य** संभाव्य **ये** **महाभागाः** ये महात्मानः **वर्तन्ते** भवन्ति **ते** तादृशाः **मुख्याः** प्रधानाः **भस्मधारिणः** भस्मधारणसम्पन्नाः ॥ **भासनाद्भसितमिति** – तदुक्तम् – "यस्य कस्यचिच्छरीरे त्रिपुण्ड्रस्य लक्ष्म वर्तते प्रथमा प्रजापतिर्द्वितीया विष्णुस्तृतीया

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सदाशिव इति स एष भस्मज्योतिः स एष भस्मज्योतिरिरिति ।" (बृ.जा.उ., ७.१४) । भस्म एव शिवज्योतिः – "भस्मेदं शाम्भवं ज्योतिस्तद्ध्यानाद् ध्यात ईश्वरः । भस्मसन्दर्शनादेव शिवदर्शनमश्नुते ॥" (चं.आ., उ.भा., क्रि.पा., ६.६६) । यद् महाभस्मेति शिवध्यानं तदेव निरुपाधिकभस्मधारणम् ॥१-२॥

शिवाग्न्यादिसमुत्पन्नं मन्त्रन्यासादियोगतः ।
तदुपाधिकमित्याहुर्भस्मतन्त्रविशारदाः ॥३॥

व्याख्या— सोपाधिकभस्मस्वरूपमाह – **शिवाग्न्यादीति** । **मन्त्रन्यासादियोगतः** पञ्चब्रह्मादिमन्त्राङ्गादिन्यासप्रयोगात् यद् भस्म **शिवाग्न्यादिसमुत्पन्नं** शिवमन्त्रपवित्रिताग्निसमुद्भूतं भवति तद् भस्म **भस्मतन्त्रविशारदाः** शिवागमादिशास्त्रपारंगताः **सोपाधिकमिति** सोपाधिकभस्मेति **आहुः** वदन्ति । गोमयाहरणाग्निकार्यमन्त्रन्यासादिबाह्योपाधिसिद्धत्वात् तस्य सोपाधिकत्वम् ॥३॥

विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः ।
एतानि पञ्च नामानि हेतुभिः पञ्चभिर्भृशम् ॥४॥

विभूतिर्भूतिहेतुत्वाद् भसितं तत्त्वभासनात् ।
पापानां भर्त्सनाद्भस्म क्षरणात् क्षारमापदाम् ॥
रक्षणात् सर्वभूतेभ्यो रक्षेति परिगीयते ॥५॥

व्याख्या— विभूतिनामानि पञ्च सहेतूक्तानि – **विभूतिरिति** । **विभूतिः, भसितम्, भस्म, क्षारम्, रक्षा,** इति **भस्मनः** विभूतेः **पञ्चभिः हेतुभिः** पञ्चनिमित्तानुसारेण **भृशं** सातिशयं **एतानि पञ्च नामानि** पञ्चाभिधानानि विभूत्यादीनि, उक्तानि इति शेषः । तत्र निमित्तानि – **भूतिहेतुत्वाद्** अणिमाद्यैश्वर्यनिमित्तत्वाद् **विभूतिः, तत्त्वभासनात्** शिवतत्त्वप्रकाशनाद् **भसितम्, पापानां भर्त्सनाद्** दुरितानां भयोत्पादनाद्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भस्म, आपदां **क्षरणाद्** तापादिविपत्तीनां क्षयीकरणात् **क्षारम्**, **सर्वभूतेभ्यः रक्षणात्** सर्वभूतप्रेतग्रहयक्षादिभ्यः सर्वेभ्यो रक्षणाद् **रक्षा**, **इति परिगीयते** एवंरीत्या भस्म पञ्चनिमित्तैः पञ्चनामभिः प्रशंस्यते ॥ तथा चोक्तं बृहज्जाबालश्रुतौ – "पञ्चभिर्नामभिर्भृशमैश्वर्यकारणाद्भूतिः। भस्म सर्वाघभक्षणात् । भासनाद्भसितम् । क्षारणादापदां क्षारम् । भूतप्रेतपिशाचब्रह्मराक्षसापस्मारभवभीतिभ्योऽभिरक्षणाद्रक्षेति ॥" इति । (बृ.जा. उ., १.१५) । पारमेश्वरागमेऽप्युक्तम् – "भासनाद्भसितं प्रोक्तं भस्म कल्मशभक्षणात् । भूतिर्भूतिकरी यस्माद्रक्षा रक्षाकरी यतः ॥" इति । (पार.आ., १७.६०-६२) ॥४-५॥

नन्दा भद्रा च सुरभिः सुशीला सुमनास्तथा ।
पञ्चगावो विभोर्जाताः सद्योजातादिवक्त्रतः ॥६॥

कपिला कृष्णा च धवला धूम्रा रक्ता तथैव च ।
नन्दादीनां गवां वर्णाः क्रमेण परिकीर्तिताः ॥७॥

सद्योजाताद्विभूतिश्च वामाद्भसितमेव च ।
अघोराद्भस्म सञ्जातं तत्पुरुषात्क्षारमेव च ॥
रक्षा चेशानवक्त्राच्च नन्दादिद्वारतोऽभवत् ॥८॥

व्याख्या— प्रभोः पञ्चमुखेभ्यो जाता नन्दादिपञ्चगावस्ताभ्यो विभूत्यादिपञ्चभस्मानि जातानीत्याह – **नन्देति** । **नन्दा, भद्रा, सुरभिः, सुशीला, तथा** एवं **सुमनाः**, इति **पञ्चगावो** पञ्चगोविशेषाः, **विभोः** प्रभोः परमेश्वरस्य **सद्योजातादिवक्त्रतः** क्रमेण सद्योजातवामदेवाघोरतत्पुरुषेशानमुखेभ्यः **जाताः** जन्म लेभिरे ॥ **कपिला** कपिशा, गोरोचनवद् रक्तद्युतिमिश्रहरिद्रवर्णः, **कृष्णा** कृष्णवर्णः, श्यामलवर्णः, **धवला** शुभ्रशुक्लता **धूम्रा** धूम्रवर्णः, **तथैव** एवमेव **रक्ता** रक्तवर्णः, इति **क्रमेण** उक्तक्रमेण **नन्दादीनां** नन्दाभद्रासुरभिसुशीलासुमनसां **गवां** गोविशेषानां **वर्णाः** कान्तिविशेषाः । भवन्तीति शेषः ॥ **सद्योजातात्** सद्योजाताख्य-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मुखात् **विभूतिः** विभूत्याख्यं भस्म, **वामाद्** वामदेवमुखाद् **भसितं** भसिताख्यं भस्म, **अघोराद्** अघोरमुखाद् **भस्म** भस्माख्या विभूतिः, **तत्पुरुषात्** तत्पुरुषवक्त्रात् **क्षारं** क्षाराख्यं भस्म **ईशानवक्त्रात् च** ईशानाख्यमुखाच्च **रक्षा** रक्षाख्यं भस्म चेति भस्मपञ्चकं **सञ्जातम्** उत्पन्नम् । तत्पञ्चकम् प्रत्येकं **नन्दादिद्वारतः** नन्दादिगोविशेषद्वारा **अभवद्** बभूव ॥ एवं सद्योजातमुखोद्भूतनन्दाद्वारा विभूतिः, वामदेवमुखोत्पन्नभद्राद्वारा भसितम्, अघोरमुखसञ्जातसुरभिद्वारा भस्म, तत्पुरुषमुखाविर्भूतसुशीलाद्वारा क्षारम्, ईशानमुखनिर्गतसुमनोद्वारा रक्षा च क्रमेण अभवन्नित्यर्थः ॥ सर्वस्यास्य विषयस्य मूलं बृहज्जाबालश्रुतिः । तथा हि – "ओं तथेति । सद्योजातात्पृथिवी । तस्याः स्यान्निवृत्तिः । तस्याः कपिलवर्णा नन्दा । तद्गोमयेन विभूतिर्जाता ॥ वामदेवादुदकम् । तस्मात् प्रतिष्ठा । तस्याः कृष्णवर्णा भद्रा । तद्गोमयेन भसितं जातम् ॥ अघोराद्वह्निः । तस्माद् विद्या । तस्या रक्तवर्णा सुरभिः । तद्गोमयेन भस्म जातम् ॥ तत्पुरुषाद् वायुः । तस्माच्छान्तिः । तस्याः श्वेतवर्णा सुशीला । तद्गोमयेन क्षारं जातं ॥ ईशानादाकाशम् । तस्माच्छान्त्यातीता । तस्याश्चित्रवर्णा सुमनाः ॥ तद्गोमयेन रक्षा जाता ॥" इति । (बृ.जा.उ., १.१०-१४) । अत्र प्रभोः सद्योजातादि मुखानि पञ्च, पृथिव्यादीनि पञ्चभूतानि निवृत्त्यादि पञ्चकलाः, नन्दाद्याः कपिलादिवर्णकान्तिवत्यो पञ्चगावः, क्रमेण तत्तद्गोमयजातानि विभूत्यादिभस्मानि च परस्परसम्बद्धत्वेन निरूपितानि ॥६-८॥

धारयेन्नित्यकार्येषु विभूतिं च प्रयत्नतः ।
नैमित्तिकेषु भसितं क्षारं काम्येषु सर्वदा ॥९॥

प्रायश्चित्तेषु सर्वेषु भस्म नाम यथाविधि ।
रक्षा च मोक्षकार्येषु प्रयोक्तव्या सदा बुधैः ॥१०॥

व्याख्या— पञ्चभस्मनां नित्यादिकर्मसु कस्मिन् कस्मिन् कर्मणि प्रयोक्तव्यमित्याह – **धारयेदिति** । **नित्यकार्येषु** लिङ्गपूजादिषु कर्मसु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विभूतिं विभूतिनामकं भस्म **प्रयत्नतः** अनिवार्यतया **धारयेत्** बिभृयात्, **नैमित्तिकेषु** शिशूनां जातकर्मनामकरणादिकर्मसु **भसितं** भसिताख्यं भस्म धारयेत्, **सर्वदा** सदा **काम्येषु** पुत्रकामेष्ट्यादिषु कर्मसु **क्षारं** क्षारनामकं भस्म धारयेत्, **सर्वेषु** सकलेषु **प्रायश्चित्तेषु** मनोवाक्काय-दोषघातार्थं क्रियमाणेषु कर्मसु **यथाविधि** विधिमनतिक्रम्य यथाविधि, विध्यनुसारेण **भस्म नाम** भस्माख्यं विभूतिं धारयेत्, **मोक्षकार्येषु** – "तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥" (भ.गी., १७-२५) इति भगवदुक्तरीत्या मोक्षार्थं क्रियमाणेषु फलाननुबन्धिषु यज्ञतपोदानकर्मसु **सदा** सर्वदा **बुधैः** ज्ञानिभिः **रक्षा च** रक्षाख्यं भस्म **प्रयोक्तव्या** धारणीया ॥९-१०॥

नन्दादीनां तु ये वर्णाः कपिलाद्याः प्रकीर्तिताः।
त एव वर्णा विख्याता भूत्यादीनां यथाक्रमम् ॥११॥

व्याख्या— विभूत्यादीनां वर्णाः के इत्यत्राह – **नन्दादीनामिति**। **नन्दादीनां** नन्दा, भद्रा, सुरभिः, सुशीला, सुमनाश्चेति गवां तु निश्चयेन **ये** यादृशाः **वर्णाः कपिलाद्याः** कपिलादयो (कपिला, कृष्णा, धवला, धूम्रा, रक्ता चेति) वर्णविशेषाः, **ते एव** कपिलादय एव **यथाक्रमम्** क्रममनतिक्रम्य यथाक्रमं क्रमेण **भूत्यादीनां** विभूतिः, भसितम्, भस्म, क्षारम्, रक्षा चेति भस्मनां **वर्णाः** वर्णविशेषा इति **विख्याताः** प्रसिद्धाः॥ नन्दोत्पन्ना विभूतिः कपिलवर्णा, भद्रोत्पन्नं भसितं कृष्णवर्णम्, सुरभ्युत्पन्नं भस्म धवलवर्णम्, सुशीलोत्पन्नं क्षारं धूम्रवर्णम्, सुमनसोत्पन्ना रक्षा रक्तवर्णा चेत्यर्थः॥११॥

भस्मोत्पादनमुद्दिष्टं चतुर्धा तन्त्रवेदिभिः।
कल्पं चैवानुकल्पं तूपकल्पकमकल्पकम् ॥१२॥
एषामादिममुत्कृष्टमन्यत् सर्वमभावतः।

व्याख्या— भस्मोत्पादनपद्धत्यनुसारेण चतुर्धेत्याह – **भस्मेति**। **भस्मोत्पादनं** भस्मनो निर्माणं **चतुर्धा** चतुर्विधमिति **तन्त्रवेदिभिः** तन्त्रं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विदन्तीति तन्त्रविदः, तैः, तन्त्रविशारदैः **उद्दिष्टम्** उक्तम् । **कल्पम्, अनुकल्पम्, उपकल्पम्, अकल्पकम्** इति । **एषाम्** एतेषां मध्ये **आदिमम्** आद्यं कल्पम् **उत्कृष्टम्** प्रशस्तम्, **सर्वम् अन्यत्** शिष्टं सर्वमर्थात् त्रिविधं भस्म **अभावतः** कल्पस्य प्राप्त्यभावात्, स्वीकार्यमिति शेषः ॥१२-१३ पूर्वार्धः॥

यथाशास्त्रोक्तविधिना गृहीत्वा गोमयं नवम् ॥१३॥

सद्येन वामदेवेन कुर्यात् पिण्डमनुत्तमम् ।
शोषयेत्पुरुषेणैव दहेद्घोराच्छिवाग्निना ॥१४॥

कल्पं तद्भस्म विज्ञेयमनुकल्पमथोच्यते ।
वनेषु गोमयं यच्च शुष्कं चूर्णीकृतं तथा ॥१५॥

दग्धं चानुकल्पाख्यमापणादिगतं तु यत् ।
वस्त्रेणोत्तारितं भस्म गोमूत्राबद्धपिण्डितम् ॥१६॥

दग्धं प्रागुक्तविधिना भवेद्भस्मोपकल्पकम् ।
अन्यैरापादितं भस्माप्यकल्पमिति निश्चितम् ॥१७॥

व्याख्या— कल्पादिभस्मनाम् उत्पादनप्रकारमाह – **यथेति** । **यथाशास्त्रोक्तविधिना** शास्त्रोक्तविधानेन **नवं गोमयम्** अभिनवं भूमिपतनात् पूर्वं **गोमयं** गोविष्ठां **सद्येन** सद्योजातमन्त्रेण **गृहीत्वा** संगृह्य, **वामदेवेन** वामदेवमन्त्रेण (तस्य गोमयस्य) **अनुत्तमं** न विद्यते उत्तमं यस्मात्तत् अनुत्तमं, उत्कृष्टं **पिण्डं** गोलाकारं पिण्डं **कुर्यात्** कुर्वीत । **तत्पुरुषेण** तत्पुरुषमन्त्रेण **शोषयेत्** (तं पिण्डं) शुष्कं कुर्यात् । **घोराद्** अघोरमन्त्रेण **शिवाग्निना** शिवमन्त्रपवित्रिताग्निद्वारा **दहेत्** दग्धं कुर्यात् । **तद्भस्म** तदेव भस्म **कल्पं** कल्पमिति **विज्ञेयं** विज्ञातुं योग्यम् ॥ **अथ** अनन्तरम् **अनुकल्पम्** अनुकल्पभस्मन उत्पादनविधिः **उच्यते** कथ्यते । **यच्च** यत् च **वनेषु** अरण्यप्रदेशेषु **शुष्कं गोमयं** करीष इति कथ्यमानं तद् गोमयं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चूर्णीकृतं घट्टनेन चूर्णरूपमानीतं **तथा** तथैव **दग्धं चैव** प्लुष्टं च पुनः गोमूत्रेण पिण्डीकृतं च **अनुकल्पाख्यम्** अनुकल्पाभिधानं भस्म स्यात्। **यत् यद् आपणादिगतम्** आपणादिप्राप्तं **वस्त्रेण उत्तारितं** वस्त्रेण परिशोधितं **गोमूत्राबद्धपिण्डितं** गोमूत्रेणाऽऽबद्ध्य पिण्डीकृतं सत् **प्रागुक्तविधिना** पूर्वोक्तरीत्या **दग्धं** प्लुष्टं चेद् तद् **भस्म तद्भसितं उपकल्पकम्** उपकल्पाख्यं **भवेत्** स्यात् । **अन्यैः** मन्त्रज्ञानरहितैः **आपादितं** सम्पादितं **भस्म** भसितम् **अकल्पम् इति** अकल्पाख्यम् इति **निश्चितं** निर्णीतम् ॥ १७-तमश्लोकान्ते निश्चितमिति पाठः स्वीकृतः । मरितोण्टदार्यप्रणीतव्याख्यासहिते ग्रन्थे च कल्पितम् इति पाठः स्वीकृतः ॥ उत्पादनविधानमनुलक्ष्य यद्भस्मन-श्चातुर्विध्यमुक्तं तस्य मूलं तु बृहज्जाबालश्रुतिरेव । तथा हि – "अथ चतुर्विधं भस्मकल्पम् । प्रथममनुकल्पम् । द्वितीयमुपकल्पम् । उपोपकल्पं तृतीयम् । अकल्पं चतुर्थम् । अग्निहोत्रसमुद्भूतं विरजानलजम् अनुकल्पम्। वने शुष्कं शकृत्संगृह्य कल्पोक्तविधिना कल्पितमुपकल्पं स्यात् । अरण्ये शुष्कगोमयं चूर्णीकृत्य अनुसंगृह्य गोमूत्रैः पिण्डीकृत्य यथाकल्पं संस्कृतं उपोपकल्पम् शिवालयस्थमकल्पं शतकल्पं च ॥" इति (बृ.जा.उ., २.३४)। अत्र प्रथमं यदुक्तम् अग्निहोत्रसमुद्भूतमिति तद् अनुकल्पं कल्पमनति-क्रम्याऽनुकल्पम् इत्यनुकल्पमिति विग्रहेण अत्रोक्तकल्पभस्मेति ज्ञेयम् । अत्रोक्तमनुकल्पं बृहज्जाबालश्रुत्युक्तोपकल्पोपोपकल्पाभ्यां समानम् । अत्रोक्तमकल्पमन्यदन्यच्च श्रुत्युक्तमकल्पमिति तु स्पष्टम् । चन्द्रज्ञानागमे तु शान्तिकं पौष्टिकं कामदं चेति भस्मनस्त्रैविध्यमुक्तम् । प्रथमं तत्र गोगुदसम्बद्धं यथा भवति तथा गोमयं हस्ते गृहीत्वा निर्मितं भस्म । द्वितीयं भूमौ पतनात्पूर्वमेव गोमयं हस्ते गृहीत्वा निर्मितं भस्म । तृतीयं तावद् शुभ्रस्थले पतितेन गोमयेन निर्मितं भस्म । अत्र शान्तिकपौष्टिके प्रायोऽत्रोक्त-कल्पभस्मना सदृशे । कामदस्तु नात्र ज्ञायते ॥

भस्मोत्पादनविधानं तावत्प्रथमतया बृहज्जाबालश्रुतौ निरूपितम् । तथा हि– "आ गावो अग्मन्नुत भद्रमक्रन्" इति मन्त्रेण धेनुमभिमन्त्रयेत्। "गावो भगो गाव इन्द्रो मे अच्छात्" इति मन्त्रेण धेनुं प्राशयेद्घासेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तर्पयेज्जलेन च । शुक्ले कृष्णे वा चतुर्दश्यां सोपवासं व्रतं रात्रावाचरेत् । परेद्युः प्रतरेवोत्थाय कृतस्नानो धृतधौतवस्त्रः सन् गाम् उत्थाप्य "तत्सवितुः" इति गायत्रीं पठन् सौवर्णे राजते ताम्रे मृण्मये घटे वा पौष्करे पलाशे वा पात्रे गोशृङ्गे वा गोमूत्रं संगृह्णीयात् । एवमेव "गन्धद्वारां" इत्यादिमन्त्रेण कस्मिंश्चिदपि पात्रे अभूमिपातं गोमयमप्यादधीत । "श्रीर्मे भजतु अलक्ष्मीर्मे नश्यतु" इति मन्त्रद्वारा गोमयमभिमन्त्रयेत् । "सं त्वा सिञ्चामि" इति मन्त्रेण गोमयं गूमूत्रेण सह मिश्रीकुर्यात् । "पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि" इति मन्त्रं पठन् चतुर्दशपिण्डान् कुर्वीत । तान् सौरकैः किरणैः संशोष्य पुनः पात्रे संगृह्णीयात् ॥ गृह्यसूत्रोक्तविधानेनाऽग्निं प्रतिष्ठाप्य तस्मिन् पिण्डान् प्रक्षिपेत् "सद्योजाताय स्वाहा", "परब्रह्मणे स्वाहा", "अग्नये स्वाहा", "सोमाय स्वाहा" इत्यादिस्वाहाकारैराहुतीर्जुहुयात् । पुररनन्तरं "निधनपतये नमः" इत्यारभ्य त्रयोदशमन्त्रैः, पञ्चब्रह्ममन्त्रैः, इतरमन्त्रैश्च जुहुयात् । पूर्णाहुतिश्च दद्यात् । "आहरिष्यामि देवानां सर्वेषां कर्मगुप्तये । जातवेदसमेनं त्वां पुलकैश्छादयाम्यहम् ॥" इति मन्त्रेण तं वह्निं छादयेत् । चतुर्थे दिवसे प्रातः स्नात्वा शुक्लाम्बरधारी भूत्वा प्रशान्ताग्नित्वादनुष्णान् पिण्डान् संगृह्य पात्रे "ओं तद्ब्रह्म" इत्युच्चार्य पौलकं भस्म संत्यजेत् । "अग्नेर्भस्मास्यग्नेः पुरीषमसि" इति मन्त्रेण पिण्डभस्म स्वीकृत्य "अग्निरिति भस्म" इति मन्त्रेण चूर्णीकृत्य परिशोध्य च गुम्फीकृत्य गन्धसलिलैश्चन्द्रकुङ्कुमकाश्मीरचन्दनैः कपिलामूत्रेण च मिश्रीकरणीयम् । तत "ओमिति भस्म", "अणोरणीयान्" इति मन्त्राभ्यां तन्मिश्रीकृतभस्मनश्चतुर्भुजाकारं पिण्डकान् कुर्यात् । एवं भस्म सम्पादनीयम् । (बृ.जा.उ., ३.५-३२) । अस्यैव संक्षेपः भस्मजाबाले – "पूतं प्रातरुदयाद् गोमयं ब्रह्मपर्णे निधाय 'त्र्यम्बकम्' इति मन्त्रेण शोषयेत् । येन केनापि तेजसा तत्स्वगृह्योक्तमार्गेण प्रतिष्ठाप्य वह्निं तत्र गोमयद्रव्यं निधाय 'सोमाय स्वाहा' इति मन्त्रेण ततस्तिलव्रीहिभिः साज्यैर्जुहुयात् । अयं तेनाष्टोत्तरसहस्रं सार्धमेतद्वा तत्राज्यस्य पर्णमयी जुहूर्भवति । तेन न पापं न शृणोति । तद्धोममन्त्रः 'त्र्यम्बकम्' इत्येव अन्ते स्विष्टकृत्पूर्णाहुति-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्तेनैवाष्टदिक्षु बलिप्रदानम् । तद्भस्म गायत्र्या संप्रोक्ष्य तद्धैमे राजते ताम्रे मृण्मये वा पात्रे निधाय रुद्रमन्त्रैः पुनरभ्युक्ष्य शुद्धदेशे संस्थापयेत् । ततो भोजयेद् ब्राह्मणान् । ततः स्वयं पूतो भवति । 'मानस्तोके' इति 'सद्योजातम्' इत्यादि पञ्चब्रह्ममन्त्रैर्भस्म सङ्गृह्य 'अग्निरिति भस्म वायुरिति भस्म' इति शिरसाभिनम्य । पूते वामहस्ते 'वामदेवाय' इति निधाय ..... ।'' (भ.जा.उ., १) । चन्द्रज्ञानागमे बृहज्जाबालश्रुत्युक्तदिशा एव भस्मोत्पादनविधिर्निरूप्यते । परंतु प्रत्येकस्मिन् स्तरेऽत्र प्रयुक्तमन्त्रा-स्ततो भिन्ना वर्तन्ते । (चं.आ., उ.भा., क्रि.पा., ६.६-२८) । अन्यरीत्या सरलविधानेन भस्मोत्पादनमुच्यते । तदनुसारेण सद्योजातमन्त्रेण गोमयं संगृह्णीयात्, वामदेवमन्त्रेण शोषयेत्, गोमयपिण्डानघोरमन्त्रेण दाहयेत्, तत्पुरुषमन्त्रेण हस्ते भस्म स्वीकार्यम्, ईशानमन्त्रेण च देहे धारयेत्, इति । (चं.आ., उ.भा., क्रि.पा., ६.२९-३०) । अत्र ग्रन्थे कल्पभस्मनिर्माणेऽय-मेव क्रमो निरूप्यते ॥

पञ्चब्रह्ममन्त्राः

१. **सद्योजातमन्त्रः** – सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥

२. **वामदेवमन्त्रः** – वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

३. **अघोरमन्त्रः** – अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वे-भ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

४. **तत्पुरुषमन्त्रः** – तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

५. **ईशानमन्त्रः** – ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधि-पतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

[तै.आ., ७.४३-४७; म.ना.उ.,१७.१-५] ॥१३ उत्तरार्धः-१७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एष्वेकतममादाय पात्रेषु कलशादिषु ।
त्रिसन्ध्यमाचरेत् स्नानं यथासंभवमेव वा ॥१८॥

व्याख्या— बृहज्जाबालोपनिषत्, भस्मजाबालोपनिषत् शैवागमाश्च भस्मस्नानम्, भस्मोद्धूलनम्, त्रिपुण्ड्रधारणं चेति भस्मन प्रयोगत्रयम् उपदिशन्ति । तत्राद्यमाह – **एष्वेकतममिति । कलशादिषु पात्रेषु** कलश-घटादिषु पात्रेषु प्रत्येकतया संगृहीतेषु, **एषु** एतेषु भस्मप्रकारेषु **एकतमम्** एकमात्रम् **आदाय** स्वीकृत्य **त्रिसन्ध्यं** तिसृषु सन्ध्यासु यथा भवति तथा **यथासम्भवम् एव वा** यथासन्दर्भम् एव वा, यथाऽवकाशं वा **स्नानं** शरीराद्यन्तम् उद्वर्तनरूपं स्नानम् **आचरेत्** कुर्यात् ॥१८॥

स्नानकाले करौ पादौ प्रक्षाल्य विमलाम्भसा ।
वामहस्ततले भस्म क्षिप्त्वाऽऽच्छाद्यान्यपाणिना ॥१९॥

अष्टकृत्वाथ मूलेन मौनी भस्माभिमन्त्र्य च ।
शिर ईशानमन्त्रेण पुरुषेण मुखं तथा ॥२०॥

हृत्प्रदेशमघोरेण वामदेवेन गुह्यकम् ।
पादौ सद्येन सर्वाङ्गं प्रणवेनैव सेचयेत् ॥२१॥

व्याख्या— मन्त्रपूर्वकं भस्मस्नानप्रकारमाह – **स्नानकाल इति । स्नानकाले** स्नानसमये **विमलाम्भसा** शुद्धवारिणा **करौ पादौ** (च) पाणिपादं **प्रक्षाल्य** प्रधाव्य, **वामहस्ततले** वामपाणितले **भस्म** भसितं **क्षिप्त्वा** प्रक्षिप्य **अन्यपाणिना** अन्येन हस्तेन, दक्षिणहस्तेन इति यावत्, **आच्छाद्य** आच्छादनं कृत्वा **अथ** अनन्तरं **मौनी** मौनधारी **मूलेन** मूलमन्त्रेण, बीजाक्षररहितत्वेन केवलमोंकारसहितेन पञ्चाक्षरीमन्त्रेण **भस्म** भसितम् **अष्टकृत्वा** अष्टवारम् **अभिमन्त्र्य** मन्त्रपूतं कृत्वा, **ईशानमन्त्रेण** "ईशानः सर्वभूतानाम्" इत्यादिनेशानमन्त्रेण **शिरः** मस्तकम्, **तथा पुरुषेण** एव-मेव "तत्पुरुषेण विद्महे" इत्यादितत्पुरुषमन्त्रेण **मुखं** वदनम् **अघोरेण**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"अघोरेभ्योऽथ घोरेभ्यो" इत्यघोरमन्त्रेण **हृत्प्रदेशं** वक्षः, **वामदेवेन** "वामदेवाय नमो" इत्यादिना वामदेवमन्त्रेण **गुह्यकं** उपस्थं **सद्येन** "सद्योजातं प्रपद्यामि" इति सद्योजातमन्त्रेण **पादौ** चरणौ, **प्रणवेनैव** ओंकारमन्त्रेण एव **सर्वाङ्गं** सर्वाणि अङ्गानि च **सेचयेत्** प्रोक्षयेत् ॥ बृहज्जाबालश्रुतौ भस्मस्नानभस्मोद्धूलनयोर्मध्ये भेदो न संलक्ष्यते । तत्र मलस्नानं विधिस्नानमित्युभयस्नानस्योल्लेखो विद्यते । उभयमप्युद्धूलन-स्वरूपेण वर्ण्यते । तथा हि– "अथ प्रणवेन विमृज्याथ सप्तप्रणवे-नाभिमन्त्रितमागमेन तु तेनैव दिग्बन्धनं कारयेत्पुनरपि तेनास्त्र-मन्त्रेणाङ्गानि मूर्धादीन्युद्धूलयेन्मलस्थानमिदम् । ईशाद्यैः पञ्चभिर्मन्त्रैस्तनुं क्रमादुद्धूलयेत् । ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु । ऊरूदेशमघोरेण गुह्यं वामेन । सद्योजातेन वै पादौ सर्वाङ्गं प्रणवेन च । आपादमस्तकं सर्वाङ्गं तत उद्धूल्याचम्य वसनं धौतं श्वेतं प्रधारयेद् विधिस्नानमिदम् ॥" इति (बृ.जा.उ., ४.२-३) । [तुलयत– "नद्यादिकान् समागम्य स्नानं कुर्याद्विचक्षणः । मलस्नानम्.... ॥" (का.आ., उ.भा., क्रि.पा., ३.२४)। विधिस्नानस्य कारणागमे मन्त्रस्नानमिति नामान्तरम् । (का.आ., उ.भा., क्रि.पा., ३.४२-४३)। चन्द्रज्ञानागमेऽपि भस्मस्नानविधानमिदमेव। तथा हि – "भस्मस्नानविधिं वक्ष्याम्यशेषाघौघनाशनम् । भस्ममुष्टिं समादाय संहितामन्त्रमन्त्रितम् ॥ मस्तकात्पादपर्यन्तं भस्मस्नानं समाचरेत् ॥ ईशेन पञ्चधा भस्म विकिरेन्मूर्ध्नि यत्नतः । मुखे चतुस्तत्पुरुषेणाघोरेणाष्टधा हृदि ॥ वामेन गुह्यदेशे तु त्रिदशधा ततः पुनः । अष्टधा सद्यमन्त्रेण पादमुद्धूल्य यत्नतः ॥ सर्वाङ्गोद्धूलनं कुर्यात् पञ्चभिर्ब्रह्मभिः पुनः ॥" इति । (चं.आ., उ.भा., क्रि.पा., ६.३७-३९) । सिद्धान्तशिखमणावुक्त-मिदमेव । अस्मिन्नेवागमे भस्मना उद्धूलनस्नानयोर्भेदः प्रदर्शितः । तथा हि– "पञ्चभिर्ब्रह्मभिर्वाऽपि मूलमन्त्रेण वा पुनः । संमन्त्र्य निर्जलं भस्म तेन लिम्पेत् सुसंयुतः ॥ सर्वाङ्गमापादशिखमुद्धूलनिमिदं मतम् ॥ भस्मना मन्त्रितेनैव सजलेनानुलेपनम् । अवगुण्ठनमाख्यातं त्रिपुण्ड्रमथ कथ्यते ॥" इति । (चं.आ., उ.भा., क्रि.पा., ६.४१-४२) ॥ स्नानस्य अवगुण्ठनमिति नामान्तरम्, सजलभस्मना शरीरस्याऽऽच्छादनात् ॥१९-२१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भस्मना विहितं स्नानमिदमाग्नेयमुत्तमम् ।
स्नानेषु वारुणाद्येषु मुख्यमेतन्मलापहम् ॥२२॥

व्याख्या— जलस्नानादिदमेवोत्कृष्टम् इत्युच्यते – **भस्मनेति । भस्मना** इदम् एतत् भसितेन **विहितं** कृतं **स्नानम्** लेपनात्मकं स्नानम् **आग्नेयम्** सर्वभस्मीकरणत्वादग्नेराग्नेयमिति कथ्यमानं स्नानम् **उत्तमं** सर्वोत्कृष्टम् । **एतत्** इदं **मलापहम्** आणवादिमलत्रयापहारि सद् **वारुणाद्येषु** वारुणादिषु **स्नानेषु** स्नानप्रकारेषु **मुख्यं** प्रधानम् ॥ स्नानं चेदं (१) मान्त्रम्, (२) भौमम्, (३) आग्नेयम्, (४) वायव्यम्, (५) दिव्यम्, (६) वारुणम्, (७) मानसम्, इति सप्तविधम् । तत्र 'अपो हि ष्ठा' इति मन्त्रपठनं मान्त्रम्, मृदालम्भः पार्थिवम् (भौमम्), आग्नेयं भस्मना स्नानम्, गोरजः वायव्यम्, सातपवर्षेण स्नानं दिव्यम्, अवगाहनं जले वारुणम्, मानसं च परमात्मचिन्तनम् ॥ तेषु स्नानेषु भस्मना स्नानं यदुच्यते 'आग्नेयम्' इति तन्मुख्यम् । उक्तं च कारणे – "भस्मना विहितं स्नानमिदमाग्नेयमुत्तमम् ।" इति । (का.आ.,उ.भा.,क्रि.पा.,३.४४) । कूर्मपुराणे, २.१८.१०-१६; विज्ञानभैरवे, पृ.१३४ – इत्यादिष्वप्युक्तम् ॥२२॥

भस्मस्नानवतां पुंसां यथायोगं दिनेदिने ।
वारुणाद्यैरलं स्नानैर्बाह्यदोषापहारिभिः ॥२३॥

व्याख्या— वारुणादिस्नानानि केवलं बाह्यमलापहारीणीत्युच्यते – **भस्मेति । यथायोगं** शास्त्रोक्तसन्दर्भानुसारं **दिनेदिने** प्रतिदिनं **भस्मस्नानवतां** भस्मस्नानकृतवतां **पुंसां** पुरुषाणां **बाह्यदोषापहारिभिः** केवलं बहिःशरीरगतमलापहरणशीलैः [बाह्याः दोषाः, तान् अपहर्तुं शीलमासाम् इति बाह्यदोषापहारीणि, तैः] **वारुणाद्यैः स्नानैः अलम्** जलस्नानादिभिः मज्जनैः किमप्यपेक्षा मास्तु ॥ बाह्याभ्यान्तरमलक्षयाद्भस्मस्नानं केवलबाह्यमलक्षयनिर्वतकिभ्यो वारुणादिस्नानेभ्यो वरमित्यर्थः ॥२३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आग्नेयं भस्माना स्नानं यतिभिस्तु विधीयते ।
आर्द्रस्नानात्परं भस्म आर्द्रे जन्तुवधो ध्रुवम् ॥२४॥

व्याख्या— यतिभिः किं स्नानमुक्तमिति सहेतु निरूप्यते – **आग्नेयमिति । भस्मना स्नानं** शुष्क भसितेन लेपनात्मकं स्नानम् **आग्नेयम्** आग्नेयमिति **यतिभिः** संन्यासिभिः **विधीयते** क्रियते । **आर्द्रस्नानात्** जलाद्यार्द्रस्नानात् **भस्म** भस्मस्नानमिति यावत्, **परम्** श्रेष्ठम्, किमिति चेदुच्यते – **आर्द्रे इत्यादि । आर्द्रे** जलस्नाने **ध्रुवं** निश्चयेन **जन्तुवधः** जलचरप्राणिसंहारो भवतीत्यर्थः ॥ प्राणिहिंसाकरत्वादार्द्रं जलस्नानं दोषयुक्तम् आग्नेयं भस्मस्नानं तु तादृशदोषाराहित्वांततः परमित्यर्थः ॥ अत्र भस्मस्नानस्य सर्वोत्कृष्टत्वसमर्थने तात्पर्यं न सर्वथा जलस्नानंस्य निषेधे इत्यवगन्तव्यम् ॥२४॥

आर्द्रं तु प्रकृतिं विद्यात् प्रकृतिं बन्धनं विदुः ।
प्रकृतेस्तु प्रहाणार्थं भस्मना स्नानमिष्यते ॥२५॥

व्याख्या— आर्द्रं प्रकृतिं प्रकृतिं च बन्धनं तन्निवारणाय भस्मस्नामित्याह – **आर्द्रमिति । आर्द्रं** सिक्तं यत्तत् **प्रकृतिं** गर्भवासनिमित्तभूतं **विद्यात्** विजानीयात्, **प्रकृतिं** पूर्वोक्तनिमित्तभूतं प्रकृतिं **बन्धनं** पाशरूपं बन्धनिमित्तम् इति **विदुः** जज्ञुः (जानन्ति स्म) । **प्रकृतेः तु** संसारनिमित्तभूतायाः प्रकृतेः **प्रहाणार्थं** निवारणार्थं **भस्मना** भसितेन **स्नानम्** लेपनरूपं स्नानम् **इष्यते** इच्छाविषयीक्रियते ॥ गर्भवासप्रकृतिर्नाम रक्तशुक्लरूपद्रवमयत्वमेव । अत एवोक्तम् – "स वा एष पुरुषोऽन्नरसमयः" इति । (तै.उ., २.१) । एतदेव बन्धनम् । संसारबन्धने निमग्न एव पुरुषः प्रकृतिस्थः सन् प्रकृतिघटकभूतगुणपरिणामान् सुखदुःखमोहादिकान् अनुभवति । तदुक्तं भगवता – "पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्" इति । (भ.गी., १३.३१) ॥२५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ब्रह्माद्या विबुधाः सर्वे मुनयो नारदादयः ।
योगिनः सनकाद्याश्च बाणाद्या दानवा अपि ॥२६॥

भस्मस्नानयुताः सर्वे शिवभक्तिपरायणाः ।
निर्मुक्तदोषकलिला नित्यशुद्धा भवन्ति हि ॥२७॥

व्याख्या— ब्रह्मादिदानवान्ताः सर्वे भस्मस्नानवन्त इत्याह – **ब्रह्माद्या इति** । **सर्वे** एते **ब्रह्माद्याः** ब्रह्मप्रभृतयः **विबुधाः** देवाः, **नारदादयः** नारदप्रभृतयः **मुनयः** मौनिनः, **सनकाद्याः** सनकप्रभृतयः **योगिनः** योगनिष्णाताः, **बाणाद्याः** बाणासुरप्रभृतयः **दानवाः** दनोः अपत्यानि पुमांसः, दनु+अण्+जस्; 'दानुः' इति दीर्घादिशब्दः ऋग्वेदे लभ्यते – "दानुः शये सहवत्सा न धेनुः" (ऋ.वे., १.३२.९), दनुजाः इत्यर्थः – "असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः" इत्यमरः (१.१.१२) । एते **सर्वे** ब्रह्मादिदानवान्ताः **भस्मस्नानयुताः** भस्मस्नानयुक्ताः, **शिवभक्तिपरायणाः** शिवे भक्तिः शिवभक्तिः तस्यां परायणाः मग्नाः, **निर्मुक्तदोषकलिलाः** दोषाणां कलिलाः समूहाः दोषकलिलाः, निर्मुक्ताः दोषकलिलाः येभ्यः ते, तथोक्ताः, **नित्यशुद्धाः** नित्यं पवित्राश्च **भवन्ति हि** भवन्त्येव ॥ भस्मस्नानमाहत्म्यादेतेषां शिवभक्तिपरायणत्वं निर्मुक्तदोषत्वं नित्यशुद्धत्वं चेति तात्पर्यम् ॥२६-२७॥

नमश्शिवायेति भस्म कृत्वा सप्ताभिमन्त्रितम् ।
उद्धूलयेत्तेन देहं त्रिपुण्ड्रं चापि धारयेत् ॥२८॥

व्याख्या— उद्धूलनं त्रिपुण्ड्रधारणं च भस्मना विधीयते – **नम इति**। **नमश्शिवायेति** नमः शिवाय इति पञ्चाक्षरमन्त्रेण **सप्त** सप्तवारं **भस्म** विभूतिम् **अभिमन्त्रितं कृत्वा** तन्मन्त्रेण अभिमन्त्रणं विधाय, **तेन** भस्मना **देहं** शरीरम् **उद्धूलयेत्** शुष्कभस्मना लेपयेत् । **त्रिपुण्ड्रं चापि** मध्याङ्गुलीभिः क्रियमाणतिर्यग्रेखत्रयरूपत्रिपुण्ड्रमपि **धारयेत्** वक्ष्यमाणस्थानेषु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

धारयेत्, रचयेत् । सप्तजन्मकृतपापानि निर्मूलयतीति संभाव्य सप्तवारं भस्माभिमन्त्रयेदित्युच्यते ॥२८॥

सर्वाङ्गोद्धूलनं चापि न समानं त्रिपुण्ड्रकैः ।
तस्मात् त्रिपुण्ड्रमेवैकं लिखेदुद्धूलनं विना ॥२९॥

व्याख्या— भस्मोद्धूलनात् त्रिपुण्ड्रमधिकमित्याह – **सर्वाङ्गेति** । **सर्वाङ्गोद्धूलनं** सर्वाङ्गेषूद्धूलनं **चापि** च अपि **त्रिपुण्ड्रकैः** त्रिपुण्ड्ररेखाभिः **न समानं** न सदृशम् । **तस्मात्** तत्करणाद् **उद्धूलनं विना** उद्धूलनं विहाय **एकं त्रिपुण्ड्रम् एव** त्रिपुण्ड्रमात्रं लिखेत् धारयेत् ॥२९॥

त्रिपुण्ड्रं धारयेन्नित्यं भस्मना सलिलेन च ।
स्थानेषु पञ्चदशसु शरीरे साधकोत्तमः ॥३०॥

व्याख्या— भस्मत्रिपुण्ड्रं शरीरे कति स्थानेषु धारणीयमित्याह – **त्रिपुण्ड्रमिति** । **साधकोत्तमः** साधकेषु उत्तमः, उत्तमो भक्तः **नित्यं** निश्चयेन प्रतिदिनं **सलिलेन** सजलेन **भस्मना** भसितेन **शरीरे** स्वकीये देहे **पञ्चदशसु** पञ्चाधिकदशसु **स्थानेषु** स्थलेषु **त्रिपुण्ड्रं** तिस्रः रेखाः **धारयेत्** लिखेत् ॥३०॥

उत्तमाङ्गे ललाटे च श्रवणद्वितये तथा ।
गले भुजद्वये चैव हृदि नाभौ च पृष्ठके ॥३१॥

बाहुयुग्मे ककुद्देशे मणिबन्धद्वये तथा ।
त्रिपुण्ड्रं भस्मना धार्यं मूलमन्त्रेण साधकैः ॥३२॥

व्याख्या— कानि तानि स्थानानि इत्याह – **उत्तमाङ्गे इति** । **उत्तमाङ्गे** शिरसि (१), **ललाटे** मस्तके (२), **तथा** एवमेव **श्रवणद्वितये** कर्णद्वये (३-४), **गले** कण्ठस्थाने (५), **भुजद्वये** अंसद्वये (६-७), **हृदि** वक्षसि (८),

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नाभौ नाभिप्रदेशे (९), **पृष्ठके** पृष्ठभागे (१०), **बाहुयुग्मे** बाहुद्वये (११-१२), **ककुद्देशे** स्कन्धप्रदेशे (१३), **मणिबन्धद्वये** प्रकोष्ठद्वये (१४-१५) च **साधकैः भक्तैः भस्मना** भसितेन **त्रिपुण्ड्रं** तिस्रःरेखाः **मूलमन्त्रेण** मूलपञ्चाक्षरमन्त्रेण **धार्यं** धारणीयम् ॥ बृहज्जाबालोपनिषदि त्रिपुण्ड्र-धारणस्थानानां संख्याविषये मतवैविध्यं प्रदर्शितम् । तथा हि – "द्वात्रिंश-त्स्थानके चाथ षोडशस्थानकेऽपि वा । अष्टस्थाने तथा चैव पञ्चस्थानेऽपि योजयेत् ॥" इति । (बृ.जा.उ., ४.१६)। तत्र – "उत्तमाङ्गे ललाटे च कर्णयोर्नेत्रयोस्तथा । नासावक्त्रे गले चैवमंसद्वयमतः परम् ॥ कूर्परे मणिबन्धे च हृदये पार्श्वयोर्द्वयोः । नाभौ गुह्यद्वये चैवमूर्वोः स्फिग्बि-म्बजानुनी ॥ जङ्घाद्वये पादौ च द्वात्रिंशत्स्थानमुत्तमम् ॥" इति द्वात्रिंश-त्स्थानानि । (बृ.जा.उ., ४.१७-१९; ११.१३-१५) । [१. उत्तमाङ्गं (शिरः), २. ललाटम्, ३-४. कर्णौ, ५-६.नेत्रे, ७-८.नासारन्ध्रौ, ९.वक्त्रम्, १०.कण्ठः, ११-१२. अंसद्वयम्, १३-१४. कूर्परौ, १५-१६.मणि-बन्धौ, १७.वक्षः, १८-१९.पार्श्वौ, २०.नाभिः, १२-२२.गुह्यद्वयम्, २३-२४.ऊर्वौ, २५-२६.स्फिग्बिम्बौ, २७-२८.जानुनी, २९-३०.जङ्घे, ३१-३२. पादौ च] । ततः षोडशस्थानानि – "शीर्षके ललाटे च कण्ठे चांसद्वये तथा । कूर्परे मणिबन्धे च हृदये नाभिपार्श्वयोः ॥ पृष्ठे चैकं प्रतिष्ठायाम् .... ।" इति । (बृ.जा.उ., ४.२२-२३) । [१. शीर्षकम्, २. ललाटम्, ३. कण्ठः, ४-५. अंसौ, ६-७. कूर्परौ, ८-९. मणि-बन्धौ, १०. वक्षः, ११. नाभिः, १२-१३. पार्श्वौ, १४. पृष्ठम्, १५-१६. स्फिग्द्वयं च] । अथाष्ट स्थानानि – "गुरुस्थानं ललाटं च कर्णद्वयमनन्तरम् । अंसयुग्मं च हृदयं नाभिरित्यष्टमं भवेत् ॥" इति । (बृ.जा.उ., ४.२९) । [१. गुरुस्थानं (शीर्षम्), ललाटम्, ३-४. कर्णौ, ५-६. अंसौ, ७. वक्षः, ८. नाभिश्च] । अन्ते पञ्चस्थानानि – "अथवा मस्तकं बाहू हृदयं नाभिरेव च ।" इति । (बृ.जा.उ., ४.३०)। [१. मस्तकम्, २-३. बाहू, ४. वक्षः, ५. नाभिश्च] ।

तस्यामेवोपनिषदि भस्मत्रिपुण्ड्रधारणस्थानसंख्यानुगुण्येन तत्तत्संख्याक-देवतानां स्मरणमपि विधीयते । तथा हि – द्वात्रिंशत्स्थानेषु त्रिपुण्ड्रधारणे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्वात्रिंशदधिदेवता एताः स्मरणीयाः – "अष्टमूर्त्यष्टविद्येशान् दिक्पालान् वसुभिः सह । धरो ध्रुवश्च सामश्च कृपश्चैवानिलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टावितीरिताः ॥" इति । (बृ.जा.उ., १५-१६) । [अष्टमूर्तयः शिवस्य (भवः, शर्वः, रुद्रः, पशुपतिः, उग्रः, महान्, भीमः, ईशानश्चेत्यष्टौ **अथवा** पञ्चभूतानि, चन्द्रः, सूर्यः, यजमानश्चेत्यष्टौ) – ८+अष्टविद्येशाः (अनन्तः, सूक्ष्मः, शिवोत्तमः, एकनेत्रः, एकरुद्रः, त्रिमूर्तिः, श्रीकण्ठः, शिखण्डिश्चेति) – ८+अष्टदिक्पालाः (इन्द्रः, अग्निः, यमः, निर्ऋतः, वरुणः, वायुः, कुबेरः, ईशानश्चेति) – ८+अष्टौ वसवः (महाभारतानुसारेण – धरः, ध्रुवः, सोमः, विष्णुः, अनिलः, अनलः, प्रत्यूषः, प्रभासश्चेत्यष्टौ; बृहज्जाबालश्रुत्यनुसारेण विष्णुस्थाने कृपः, अन्ये समानाः; भागवतानुसारेण – द्रोणः, प्राणः, ध्रुवः, अर्कः, अग्निः, दोषः, वास्तु, विभावसुश्चेत्यष्टौ) – ८; आहत्य – ८+८+८+८=३२]। षोडशस्थानानुगुण्येन ध्येयाः षोडशदेवतास्तावत् – "शिवं शक्तिं च सादाख्यम् ईशं विद्याख्यमेव च । वामादिनवशक्तीश्च एते षोडशदेवताः। नासत्यो दस्रकश्चैव अश्विनौ द्वौ समीरितौ ॥" इति । (बृ.जा.उ., ४.१९-२०) । [शिवः, शक्तिः, सादाख्यम् (सदाशिवः), ईशः, विद्या (रुद्रः) (इति पञ्चदेवताः); वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथनी, सर्वभूतदमनी, मनोन्मनी चेति नव शक्तयः; नसत्या, दस्रकश्चेति (अश्विनौ) – आहत्य ५+९+२=१६] । अथाष्टस्थानप्रस्तावे अष्टौ देवता एताः – "ब्रह्मा च ऋषयः सप्त देवताश्च प्रकीर्तिताः ।" इति । (बृ.जा.उ., ४.२६) । [ब्रह्मा; वैवस्वतमन्वन्तरीयाः वसिष्ठः, कश्यपः, अत्रिः, जमदग्निः, गौतमः, विश्वामित्रः, भारद्वाजश्चेति सप्तर्षयश्च = ८] । पञ्चस्थानसम्बन्धिपञ्चदेवतानामानि बृहज्जाबालश्रुतौ नोक्तानि ॥ चन्द्रज्ञानागम-कारणागमयोरपि द्वात्रिंशत्स्थानानि त्रिपुण्ड्र-धारणस्थानत्वेनोक्तानि । (चं.आ., उ.भा., क्रि.पा., ६.४४; का.आ., उ.भा., क्रि.पा., ३.४७-४९) । विशेषतश्चन्द्रज्ञानागमे बृहज्जाबाल-श्रुत्युक्तमनुसृत्य द्वात्रिंशत्स्थानेषु षोडशस्थानेषु अष्टस्थानेषु पञ्चस्थानेषु वा भस्मत्रिपुण्ड्रधारणमुक्तम् । तत्सम्बन्धिद्वात्रिंशद्देवतानां षोडशदेवता-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नाम् अष्टदेवतानां च नामान्युक्तानि च । पञ्चदेवतानां नामान्यनुक्तानि श्रुताविति पूर्वमेवोक्तम् । परन्तु चन्द्रज्ञानागमे पञ्चदेवतानामान्युक्तानि – सद्योजातादिपञ्चब्रह्मदेवता इति । (चं.आ., उ.भा., क्रि.पा., ४.४४-५६) ।

श्रीसिद्धान्तशिखामणौ भस्मत्रिपुण्ड्रधारणीयानि स्थानानीति पञ्चदशोक्तानि। बृहज्जाबालश्रुत्युक्तषोडशस्थानेभ्यस्तुलना क्रियते चेदत्र १. शीर्षम्, २. ललाटः, ३. कण्ठः, ४-५. असंद्वयम्, ६-७. मणिबन्धद्वयम्, ८. वक्षः, ९. नाभिः, १०. पृष्ठभागश्चेति दशस्थानानि समानानि । १-२. कूर्परद्वयम्, ३-४. पार्श्वौ, ५-६. स्फिग्बिम्बौ, इति षट्स्थानानि ततो विहाय, १-२. कर्णौ, ३. स्कन्धभागः, ४-५. बाहुद्वयमिति पञ्चस्थानान्यायोजितानि ।

अत्रेदमवधेयम् – द्वादशशताब्दीयशरणेष्वेकतमः श्रीचन्नबसवण्णः स्वीये एकस्मिन् 'वचने' त्रिपुण्ड्रधारणस्थानानां संख्यां साधकानां दीक्षाभेदमवलम्ब्य निर्णीतवान् । तद्यथा – (कन्नडवचनम्) – "अय्या विभूतिय धरिसुवभेदवेन्तेन्दडे, सहजलिङ्गधारकरु एण्टु स्थानदल्लि धरिसुवुदय्या । क्रियादीक्षान्वितराद उपाधिभक्तरु हदिनारु स्थानदल्लि धरिसुवदय्या । क्रियादीक्षे मन्त्रदीक्षेयुक्तराद निरुपाधिकभक्तरु मूवत्तेरडु स्थानदल्लि धरिसुवुदय्या । क्रियादीक्षे मन्त्रदीक्षे वेधादीक्षे सच्चिदानन्ददीक्षायुक्तराद निर्वञ्चकभक्तरु नाल्वत्तुनाल्कु स्थानदल्लि धरिसुवदय्या । क्रिया-मन्त्र-वेधा-सच्चिदानन्द-निर्वाणपददीक्षासमन्वितराद सद्भक्तशरणगणङ्गळु आपादमस्तक परियन्तर स्नानधूलनव माडि नाल्वत्तेण्टु स्थानदल्लि मन्त्रस्मरणेयिन्द त्रिपुण्ड्रव धरिसुवदय्या, कूडलचन्नसङ्गमदेवा ॥" इति । (चन्न.व., १५४) । [अस्यार्थः – आर्य, विभूतिधारणक्रमः क इति पृष्टे उच्यते – सहजलिङ्गधारिणोऽष्टस्थानेषु धारयेयुः, क्रियादीक्षान्विता उपाधिभक्ता षोडशस्थानेषु धारयेयुः, क्रियादीक्षा-मन्त्रदीक्षायुक्ता निरुपाधिकभक्ता द्वात्रिंशत्स्थानेषु धारयेयुः, क्रियादीक्षा-मन्त्रदीक्षा-वेधादीक्षायुक्तास्सहजभक्ताः षट्त्रिंशत्स्थानेषु धारयेयुः । क्रियादीक्षा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मन्त्रदीक्षा-वेधादीक्षा-सच्चिदानन्ददीक्षायुक्ता निर्वञ्चकभक्ता चतुश्चत्वारिंशत्स्थानेषु धारयेयुः, क्रिया-मन्त्र-वेधा-सच्चिदानन्द-निर्वाणपददीक्षा-समन्विता सद्भक्तशरणगणा पादान्मस्तकपर्यन्तं स्नानोद्धूलने कृत्वा अष्टाचत्वारिंशत्स्थानेषु मन्त्रस्मरणपूर्वकं त्रिपुण्ड्रं धारयेयुः, हे कूडलचन्नसङ्गमदेव!] । एवं चन्नबसवण्णः श्रुत्यागमोक्तत्रिपुण्ड्रधारणस्थानेभ्योऽधिकतया षट्त्रिंशत्स्थानानि अष्टत्रिंशत्स्थानानि चतुश्चत्वारिंशत्स्थानानि अष्टाचत्वारिंशत्स्थानानि चोक्तवान् । पञ्चस्थानानि तु नोक्तानि । यथोक्तं पूर्वं बृहज्जाबालश्रुतौ मस्तकम्, बाहुद्वयम्, हृदयम्, नाभिश्चेति पञ्चस्थानानि कथितानि । मरितोण्टदार्येणोद्धृतायां श्रुतौ शिरः, ललाटम्, कण्ठः, स्कन्धः वक्षःस्थलमिति पञ्चस्थानान्युक्तानि । तथा हि – "शिरोललाटकण्ठस्कन्धवक्षःस्थलेषु त्रियायुषत्रियम्बकैस्तिस्रो रेखाः कुर्वीत । व्रतमेतच्छाम्भवम्" इति । (सि.शि., त.प्र., ७.३२-३३) ॥३१-३२॥

वामहस्ततले भस्म क्षिप्त्वाच्छाद्यान्यपाणिना ।
अग्निरित्यादिमन्त्रेण स्पृशन् वाराऽभिमन्त्र्य च ॥३३॥

त्रिपुण्ड्रमुक्तस्थानेषु दध्यात् सजलभस्मना ।
शिवं शिवङ्करं शान्तं स प्राप्नोति न संशयः ॥३४॥

व्याख्या— मन्त्रेणाभिमन्त्रणपूर्वकं त्रिपुण्ड्रधारणं विधेयमित्याह – **वामेति** । **वामहस्ततले** सव्यहस्तमध्ये **भस्म** विभूतिं **क्षिप्त्वा** विन्यस्य **अन्यपाणिना** सव्येतर-(दक्षिण)-पाणिना **आच्छाद्य** आवार्य **अग्निरित्यादिमन्त्रेण** "अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मान्यग्निः" (अथ.शिर.उ., ६७) इति मन्त्रेण **स्पृशन्** अभिमृश्य **वारा** जलेन (मूलमन्त्रेण सप्तवारं) **अभिमन्त्र्य च** संमन्त्र्य पावयित्वा च **जलभस्मना** वारिमिश्रितभसितेन **उक्तस्थानेषु** पूर्वोक्तपञ्चदशस्थानेषु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्रिपुण्ड्रं तिस्रःरेखाः **दध्यात्** धारयेत् । तदा सः भक्तः **शिवङ्करं** मङ्गल-दायकं **शान्तं** निर्विकारं **शिवं** परशिवं **प्राप्नोति** अधिगच्छति, **न संशयः** अस्मिन् विषये नास्ति संशीतिः (सन्देहः) ॥ ''अग्निरिति भस्म'' इत्यस्य भस्मजाबाल्युपनिषदि ''अग्निरिति''....... इत्यादि– ''व्योमेति भस्म'' इत्यन्तादनन्तरं ''देवा भस्म ऋषयो भस्म सर्वं ह वा एतदिदं भस्म'' इति पाठान्तरं दृश्यते। त्रिपुण्ड्रधारणपद्धतिरुक्ता बृहज्जाबालश्रुतौ – ''त्रिपुण्ड्रं कारयेत् पश्चाद् ब्रह्मविष्णुशिवात्मकम् । मध्याङ्गुलीभिरादाय तिसृभिर्मूलमन्त्रितम् ॥'' इति (बृ.जा.उ., ४.१०) । चन्द्रज्ञानागमेऽपि – ''त्रिपुण्ड्रं कारयेद्धीमान् ब्रह्मविष्णुशिवात्मकम् । मध्याङ्गुलीभिरादाय तिसृभिर्मूलमन्त्रितम् ॥'' इत्युक्तम् । (चं.आ., उ.भा., क्रि.पा., ६.४३) । जाबाल्युपनिषदि तिसृणां रेखानां ब्रह्मविष्णुशिवात्मकत्रिमूर्तिस्वरूपत्वं सिद्धम् । तथा हि – ''याऽस्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजो भूर्लोकः स्वात्मा क्रियाशक्तिः ऋग्वेदः प्रातःसवनं प्रजापतिर्देवो देवतेति । याऽस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यन्दिनसवनं विष्णुर्देवो देवतेति । याऽस्य तृतीया रेखा साऽऽहवनीयो मकारस्तमो द्यौर्लोकः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयसवनं महादेवो देवतेति त्रिपुण्ड्रं भस्मना करोति ।'' इति । (जा.उ., उ.सं., भागः १, पृ.६२८) । अभिमन्त्रणप्रकारः, तत्र विनियुक्ता मन्त्राः, इत्यादिनिरूपणमुक्तं त्रिपुण्ड्रधारणमार्गदर्शकत्वेन जाबाल्युप-निषदि । तथा हि – ''सद्योजातादिपञ्चब्रह्ममन्त्रैर्भस्म संगृह्य 'अग्निरिति भस्म' इत्यनेनाभिमन्त्र्य 'मा नः स्तोके' इति समुद्धृत्य जलेन संमृज्य त्र्यायुषमिति शिरोललाटवक्षःस्कन्धेष्विति तिसृभिः त्र्यायुषैस्त्रियम्बकै-स्तिस्रो रेखा प्रकुर्वीत । व्रतमेतच्छाम्भवम्, सर्वेषु वेदेषु वेदवादिभिरुक्तं भवति । तत्समाचरेन्मुमुक्षुर्न पुनर्भवाय ॥'' इति । (जा.उ., उ.सं., भाग १, पृ.६२८) ॥३३-३४॥

मध्याङ्गुलित्रयेणैव स्वदक्षिणकरस्य तु ।
षडङ्गुलायतं मानमपि वाऽलिकमानकम् ॥३५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नेत्रयुग्मप्रमाणेन फाले दध्यात् त्रिपुण्ड्रकम् ।
मध्यमानामिकाङ्गुष्ठैरनुलोमविलोमतः ।
धारयेद्यस्त्रिपुण्ड्राङ्कं स रुद्रो नात्र संशयः ॥३६॥

व्याख्या— त्रिपुण्ड्रधारणप्रकारद्वयमाह – **मध्याङ्गुलीति । स्वदक्षिणकरस्य तु** स्वकीयसव्येतरकरस्य तावत् **मध्याङ्गुलित्रयेणैव** तर्जनीमध्यमानामिकाख्यमध्याङ्गुलित्रितयेन एव **षडङ्गुलायतं** षडङ्गुलदैर्घ्यं यावत् तावत् **मानं** प्रमाणं **अपि वा** अथवा **अलिकमानकं** मस्तकप्रमाणं **त्रिपुण्ड्रकं** रेखत्रयात्मकं चिह्नं रचयेत् । **फाले** मस्तके तावत् **नेत्रयुग्मप्रमाणेन** उभयनेत्रान्तदैर्घ्यं यावत् तावत् त्रिपुण्ड्रकं दध्यात् ॥ अयमेकतरः प्रकारस्त्रिपुण्ड्ररचनायाः । अन्यतरप्रकारस्तु– **मध्यमानामिकाङ्गुष्ठैः** मध्यमानामिकाभ्याम् अङ्गुष्ठेन च **यः** यो भक्तः **अनुलोमविलोमतः** मध्यमानानामिकाभ्यां अनुलोमतः (सव्यात् दक्षिणं प्रति) अङ्गुष्ठेन च विलोमतः (दक्षिणात् सव्यं प्रति) **त्रिपुण्ड्राङ्कं** रेखात्रितयचिह्नं **धारयेत्** रचयेत् **सः** तादृशः **रुद्रः** रुद्र एव, **अत्र न संशयः** अस्मिन् सन्देहो नास्ति। अत्र किञ्चिद् विशदीकरणमपेक्ष्यते – प्रथमं मध्यमानामिकाभ्यां प्रदक्षिणतः रेखाद्वयं रचनीयम्, अनन्तरं अङ्गुष्ठेन तन्मध्ये अप्रदक्षिणतः रेखामेकां रचनीयम् । एष क्रमोऽत्र ॥३५-३६॥

ऋजुश्वेतमनुव्याप्तं स्निग्धं श्रोत्रप्रमाणकम् ।
एवं सल्लक्षणोपेतं त्रिपुण्ड्रं सर्वसिद्धिदम् ॥३७॥

व्याख्या— सल्लक्षणं त्रिपुण्ड्रं सर्वसिद्धिप्रदमित्याह – **ऋज्विति । ऋजु** अजिह्मं **श्वेतं** शुभ्रवर्णम् **अनुव्याप्तं** निरन्तरं **स्निग्धं** प्रगाढं **श्रोत्रप्रमाणकं** सव्यश्रोत्राद् दक्षिश्रोत्रपर्यन्तं, **एवम्** एतादृशं **सल्लक्षणोपेतं** शुभस्वरूपयुक्तं **त्रिपुण्ड्रं** रेखात्रयं **सर्वसिद्धिदम्** सर्वासां सिद्धीनां प्रदायकम् ॥३७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रातःकाले च मध्याह्ने सायाह्ने च त्रिपुण्ड्रकम् ।
कदाचिद्भस्मना कुर्यात् स रुद्रो नात्र संशयः ॥३८॥

एवंविधं विभूत्या च कुरुते यस्त्रिपुण्ड्रकम् ।
स रौद्रधर्मसंयुक्तस्त्रयीमय इति श्रुतिः ॥३९॥

व्याख्या— त्रिपुण्ड्रधारणस्य महत्त्वं प्रकटयति – **प्रातरिति** । **प्रातःकाले** सूर्योदयसमये **च मध्याह्ने** अहर्मध्यसमये **च सायाह्ने** सायंकाले (यः) **कदाचित्** जातुचित् **भस्मना** भसितेन **त्रिपुण्ड्रकं** रेखात्रितयं **कुर्यात्** करोति चेत् **सः** तादृशः **रुद्रः** शिव एव, **नात्र संशयः** अस्मिन् विषये नास्ति सन्देहः । **यः च** यो भक्तः **एवंविधम्** एवंप्रकारेण **विभूत्या** भस्मना **त्रिपुण्ड्रकं** मध्याङ्गुलीभिस्त्रिभिः तिर्यग्रेखात्रयं **कुरुते** धारयति **सः** तादृशः **रौद्रधर्मसंयुक्तः** रुद्रसम्बन्धी धर्मः रौद्रधर्मः शिवधर्म इत्यर्थः, तेन संयुक्तः सम्बद्धः, **त्रयीमयः** वेदत्रयविद्यास्वरूपः **इति श्रुतिः** इत्युपनिषत्प्रमाणम् ॥ 'इति श्रुतिः' इत्यत्र मरितोण्टदार्यः तत्त्वप्रदीपिकायां वृद्धजाबालादिश्रुतिसिद्धोऽयमर्थ इति श्रुतिमेकामुल्लिखति – "य इदं त्रिपुण्ड्रं धरते स वेदत्रयधारी भवति, स सन्ततं त्रेताग्निर्भवति, स पुष्करत्रये स्नातो भवति। यस्त्रिपुण्ड्रधारी पुरुषः स रुद्रः, स परमेष्ठी, य इदं त्रिपुण्ड्रं धृतवन्तं पुरुषं पश्यति स सर्वपापेभ्यो विनिर्मुक्तो भवति, स सर्ववेदाध्ययनजन्यफलवान् ।" इति । अस्य मूलं न ज्ञायते । त्रिपुण्ड्रं त्रयीमयम् इत्यत्र बृहज्जाबालश्रुतिप्रमाणमेवं विद्यते – "ऊर्ध्वपुण्ड्रं भवेत् साम मध्यपुण्ड्रं त्रियायुषम ॥" इति । (बृ.जा.उ., ५.१)। अत्राधःपुण्ड्रस्य स्वरूपं नोक्तम् । अस्य श्रुतेर्व्याख्यात्रा उपनिषद्ब्रह्मयोगिना तत्स्वरूपमुक्तम् अध्याहार्यमिति च सूचितम् । तथा हि – "त्रियायुषं याजुषमित्यर्थः । .... अधःस्थतिर्यक्पुण्ड्रे तु ऋग्वेददृष्टिः कर्तव्येत्यध्याहार्यम्" इति । चन्द्रज्ञानागमे तु स्पष्टमुक्तम् – "ऊर्ध्वपुण्ड्रं भवेत् साम मध्यपुण्ड्रं यजूंषि च । अधःपुण्ड्रमृचः साक्षात्तस्मात्त्रिपुण्ड्रं त्रियायुषम् ॥" इति । (चं.आ., उ.भा., क्रि.पा., ६.५८) । भस्मत्रिपुण्ड्रधारणस्य माहात्म्यं तु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बृहज्जाबाल-जाबाल्युपनिषदोः सम्यक् प्रतिपादितम् । तथा हि – "जनको ह वैदेहः पैप्पलादेन सह प्रजापतिलोकं जगाम तं गत्वोवाच भो प्रजापते त्रिपुण्ड्रस्य माहात्म्यं ब्रूहीति । तं प्रजापतिरब्रवीद्यथैवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्येति । .... यथैवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्येति विष्णुराह ।" इति । (बृ.जा.उ., ७.५-६) । "यो विद्वान् ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स महापातकोपपातकेभ्यः पूतो भवति । स सर्वान् वेदान् ध्यातो भवति । स सर्वेषु तीर्थेषु स्नातो भवति । स सकलरुद्रमन्त्रजापी भवति । न स पुनरावर्तते न स पुनरावर्तते ।" इति च । (जा.उ., उ.सं., भाग-१, पृ.६२८) । चन्द्रज्ञानागमेऽप्युक्तम् – "भस्मज्योतिः समाम्नातमवश्यं तस्य धारणात् । संसारसागरं तीर्त्वा कैवल्यफलमश्नुते ॥ भस्मसंधारणादेव सर्वतीर्थफलं भवेत् । भस्मसंधारणात्सर्वं भस्मीभवति किल्बिषम् ॥ भस्मेदं शाम्भवं ज्योतिस्तद्ध्यानाद्ध्यात ईश्वरः । भस्मसंदर्शनादेव शिवदर्शनमश्नुते ॥" इति । (चं.आ., उ.भा., क्रि.पा., ६.६४-६६) ॥३८-३९॥

शैवागमेषु वेदेषु पुराणेष्वखिलेषु च ।
स्मृतीतिहासकल्पेषु विहितं भस्मपुण्ड्रकम् ॥
धारणीयं समस्तानां शैवानां च विशेषतः ॥४०॥

व्याख्या— त्रिपुण्ड्रधारणं कुत्र विहितमिति चेद् उच्यते – **शैवागमेष्विति । शैवागमेषु** कामिकादिवातुलान्तेषु शैवतन्त्रेषु **वेदेषु** ऋग्वेदादिषु **स्मृतीतिहासकल्पेषु** स्मृतिश्च इतिहासश्च कल्पश्च स्मृतीतिहासकल्पाः, तेषु, मन्वादिस्मृतिषु, रामायणादिष्वितिहासेषु, कल्पसूत्रेषु च **भस्मपुण्ड्रकं** भस्मना क्रियमाणं तिर्यग्रेखात्रितयं **समस्तानां** सर्ववर्णानां **वेशेषतश्च** विशेषतया **शैवानां** शिवभक्तानां **धारणीयम्** अनिवार्यतया धर्तव्यम् इति **विहितं** नियमितम् ॥ कल्पो नाम वेदाङ्गेष्वेकतमः । स च सूत्रग्रन्थसमुदायः ॥ स च श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रम् चेति चतुर्विधः ॥४०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नास्तिको भिन्नमर्यादो दुराचारपरायणः ।
भस्मत्रिपुण्ड्रधारी चेन्मुच्यते सर्वकिल्बिषै ॥४१॥

व्याख्या— भस्मत्रिपुण्ड्रस्य सर्वपापभञ्जकत्वमुक्त्वा भस्मधारणस्थलं समापयति – **नास्तिक इति । नास्तिकः** मिथ्यादृष्टियुक्तो धर्मविरोधी, **भिन्नमर्यादः** अतिक्रान्तौचित्यः **दुराचारपरायणः** दुष्टाचारनिरतश्चापि **भस्मत्रिपुण्ड्रधारी चेद्** यदि स भस्मना त्रिपुण्ड्रं धरतीति भस्म-त्रिपुण्ड्रधारी भवति तर्हि **सर्वकिल्बिषै** सर्वपापैः **मुच्यते** मुक्तो भवति ॥ यदि भस्मत्रिपुण्ड्रधारणे श्रद्धा जायते चेत् नास्तिक्यादिजीवनपद्धति-र्धार्मिकजीवनपद्धतिरूपेण विपरिणमते । तदा नास्तिक्यादिनिमित्तेन कृतानि पापानि पाकदशां प्राप्नुवन्ति । तानि दुःखाद्यनुभवेन निर्मूलयितुं शक्तिः सञ्जायते ॥ अतो नास्त्यत्राऽर्थवादशङ्कालेशोऽपि ॥४२॥

– इति विभूतिधारणस्थलम् –

७. अथ रुद्राक्षधारणस्थलम् – (७)

व्याख्या— विभूतिधारणस्थलनिरूपणानन्तरं क्रमप्राप्तं रुद्राक्षधारण-स्थलं ग्रन्थकृन्निरूपयति ।

भस्मना विहितस्नानस्त्रिपुण्ड्राङ्कितमस्तकः ।
शिवार्चनपरो नित्यं रुद्राक्षमपि धारयेत् ॥४३॥

व्याख्या— भस्मस्नानभस्मत्रिपुण्ड्रधारणकृतः भक्तस्य रुद्राक्षधारणं विधीयते – **भस्मनेति । भस्मना** भसितेन **विहितस्नानः** विहितं विधीय-मानत्वेन कृतं स्नानं आप्लवनं येन सः, तादृशः, **त्रिपुण्ड्राङ्कितमस्तकः** त्रिपुण्ड्रेण अङ्कितं चिह्नितं मस्तकं शिरः यस्य सः, तादृशः, **शिवार्चनपरः** शिवार्चनासक्तः भक्तः **नित्यं** नियमेन **रुद्राक्षमपि** रुद्रनेत्रभवं रुद्राक्षमपि **धारयेत्** बिभृयात् ॥४३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रुद्राक्षधारणादेव मुच्यन्ते सर्वपातकैः ।
दुष्टचित्ता दुराचारा दुष्प्रज्ञा अपि मानवाः ॥४४॥

व्याख्या— रुद्राक्षधारणात् किं फलमित्याह – **रुद्राक्षेति** । **रुद्राक्षधारणादेव** रुद्राक्षधारणमात्रेण **दुष्टचित्ताः** दुष्ठं चित्तं येषां ते, दुष्टबुद्धयः इत्यर्थः, **दुराचाराः** कुत्सिताचाराः **दुष्प्रज्ञाः** दुष्टप्रज्ञाशालिनः **अपि** तादृशा अपि **मानवाः** मनुष्याः **सर्वपातकैः** सर्वैरपि घोरपापैः **मुच्यन्ते** मुक्ता भवन्ति ॥ यदि दुष्टचित्तादिविशिष्टा अपि रुद्राक्षधारणेन पावित्र्यं भजन्ते किमुत सुचित्तादिविशिष्टाः इति भावः ॥ रुद्राक्षजाबालोपनिषदि तत्फलमाह – "तद्रुद्राक्षे वाग्विषये कृते दशगोप्रदानेन यत्फलमवाप्नोति तत्फलमश्नुते । स एष भस्मज्योती रुद्राक्ष इति । तद्रुद्राक्षं करेण स्पृष्ट्वा धारणमात्रेण द्विसहस्रगोप्रदानफलं भवति ।" इति । (रु.जा.उ.,४८) ॥४४॥

पुरा त्रिपुरसंहारे त्रिनेत्रो जगतां पतिः ।
उदपश्यत् पुरां योगमुन्मीलितविलोचनः ॥४५॥

निपेतुस्तस्य नेत्रेभ्यो बहवो जलबिन्दवः ।
तेभ्यो जाता हि रुद्राक्षा रुद्राक्षा इति कीर्तिताः ॥४६॥

व्याख्या— रुद्राक्षोत्पत्तिप्रसङ्गमाह – **पुरेति** । **पुरा** चिरातीते काले **त्रिपुरसंहारे** आकाशे रक्षोभिर्लोकपीडनाय निर्मितानां त्रिपुराणां संहारे **जगतां पतिः** जगदीश्वरः **त्रिनेत्रः** त्रियम्बकः, सोमसूर्याग्न्यात्मकनेत्र इत्यर्थः, तादृशः **उन्मीलितविलोचनः** उन्मीलितानि विकसितानि विलोचनानि नयनानि येन सः, विकसितनेत्रत्रय इत्यर्थः, तादृशः सन् **पुरां** त्रिपुराणां ['पूः स्त्री पुरीनगर्यौ .... पुरम् ।' इत्यमरः (१-२१), पूःशब्दस्य षष्ठी बहुवचने 'पुरां' इति रूपम्], **योगं** सम्बन्धम् **उदपश्यत्** ऊर्ध्वमुखं दृष्टवान् [उत्+दृश् – दृश्धातो पश् आदेशः]। **तस्य** परमात्मनः शिवस्य **नेत्रेभ्यः** नयनेभ्यः **बहवः** अगणितसंख्याकाः **जलबिन्दवः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वारिविप्रुषः, **तेभ्यो** जलबिन्दुभ्यो **हि** निश्चयेन **रुद्राक्षा** रुद्राक्षनामभाज **जाताः** उत्पन्नाः, ते हि रुद्रनेत्रोद्भवत्वाद् **रुद्राक्षाः** रुद्राक्षा इति **कीर्तिताः** प्रसिद्धाः ॥ तदुक्तं रुद्राक्षजाबालोपनिषदि – "त्रिपुरवधार्थमहं निलीलिताक्षोऽभवम् । तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जाताः ॥ सर्वानुग्रहार्थाय तेषां नामोच्चारणमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणफलमत ऊर्ध्वं वक्तुं न शक्नोमि ॥" इति । (रु.जा.उ.२) । अस्यामेवोपनिषदि पुनरिदमुक्तम् – "दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया । भूमावक्षिपुटाभ्यां तु पतिता जलबिन्दवः । तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः । स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात् ॥" इति । (रु.जा.उ., ४-५) । अयमेव वृत्तान्तो विद्यते चन्द्रज्ञानागमे – "त्रिपुराणां वधार्थाय विभुना शम्भुना पुनः । उन्मीलितानि चक्षूंषि दिव्यं वर्षसहस्रकम् । उभाभ्यां चारुपक्ष्मभ्यां पतिता जलबिन्दवः । त एव बिन्दवो जाता महारुद्राक्षवृक्षकाः । स्थावरत्वमनुप्रापुर्भक्तानुग्रहकारणात् ॥" इति । (चं.आ., उ.भा., क्रि.पा., ७.४-५) । बृहज्जाबालोपनिषदि पुनरन्यादृशो वृत्तान्तो दृश्यते । तथा हि – "रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायन्ते । सदाशिवः संहारं कृत्वा संहाराक्षं मुकुलीकरोति तन्नयनाज्जाता रुद्राक्षा इति होवाच (कालाग्निरुद्रः) तस्माद्रुद्राक्षत्वम् इति ।" इति (बृ.जा.उ., ७.१६) ॥ एवं रुद्राक्षोत्पत्तिवृत्तान्तेषु वैविध्यं दृश्यते । रुद्राक्षजाबालोपनिषदि त्रिपुरसंहाराय एकाग्रचित्तेन ध्यायतः शिवस्य निमीलितेभ्यो नयनेभ्यो पतिता जलबिन्दव रुद्राक्षा जाता इत्येको वृत्तान्तः । बृहज्जाबालोपनिषदि पुनः त्रिपुरसंहारानन्तरं शिवेन संहाराक्षमात्रे (अग्निनेत्रमात्रे) निमीलिते सति तस्मान्नयनाज्जलबिन्दवः पतिता सन्तो रुद्राक्षाऽभवन्निति द्वितीयो वृत्तान्तः । रुद्राक्षजाबालोपनिषदो द्वितीयवृत्तान्ते चन्द्रज्ञानागमस्य वृत्तान्ते च त्रिपुरसंहार समये उन्मीलितेभ्यो त्रिभ्योऽपि नयनेभ्यो पतिता जलबिन्दवो रुद्राक्षतां प्राप्ता इति तृतीयवृत्तान्तः ॥ विशेषस्त्वत्रेदम् अवधेयम् – रुद्रस्याऽक्ष्णाऽक्षिभ्यो वोत्पन्नत्वाद्रुद्राक्षस्य रुद्राक्षत्वम् इति । एतदेव रुद्राक्षस्य पावित्र्यनिमित्तम् । "अत

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ऊर्ध्वं वक्तुं न शक्नोमि'' इति परशिवोऽपि समग्रतया रुद्राक्षमाहात्म्यवर्णने असामर्थ्यं प्रदर्शितवान् । किमुत तत्राऽन्येषां सामर्थ्यम्! ॥४५-४६॥

रुद्रनेत्रसमुत्पन्ना रुद्राक्षा लोकपावनाः ।
अष्टत्रिंशत्प्रभेदेन भवन्त्युत्पत्तिभेदतः ॥४७॥

व्याख्या— रुद्राक्षाणां लोकपावनत्वमुक्त्वा उत्पत्तिभेदेन तेषां प्रभेद-माह – **रुद्रेति** । **रुद्रनेत्रसमुत्पन्नाः** रुद्रस्याऽक्षिभ्यो जाताः अत एव **लोकपावनाः** लोकान् पावयन्तीति, पवित्रीकुर्वन्तीति, लोकपावनाः, **रुद्राक्षाः** रुद्राक्षनाम्ना प्रसिद्धा, **उत्पत्तिभेदतः** उत्पत्तिस्थानभेदबलात् **अष्टत्रिंशत्प्रभेदेन** अष्टोत्तरत्रिंशत्प्रकारेण **भवन्ति** भाव्यन्ते ॥

नेत्रात्सूर्यात्मनः शम्भोः कपिला द्वादशोदिताः ।
श्वेताः षोडश सञ्जाताः सोमरूपाद्विलोचनात् ॥४८॥

कृष्णा दशविधा जाता वह्निरूपाद्विलोचनात् ।
एवमुत्पत्तिभेदेन रुद्राक्षा बहुधा स्मृताः ॥४९॥

व्याख्या— के ते प्रकाराः कति च, इति पृष्टे उच्यते – **नेत्रादिति** । **शम्भोः** परशिवस्य **सूर्यात्मनः** सूर्यस्वरूपिणः **नेत्रात्** नयनात् **द्वादश** द्वादश प्रकाराः **कपिलाः** कपिलवर्णा रुद्राक्षाः **उदिताः** उत्पन्नाः । **सोमरूपात्** चन्द्रस्वरूपिणः विलोचनान्नयनात् **षोडश** षोडश प्रकाराः **श्वेताः** शुक्लवर्णा रुद्राक्षाः **सञ्जाता** उत्पन्नाः । **वह्निरूपाद्** अग्निस्वरूपिणो **विलोचनात्** नयनाद् **दशविधाः** दशप्रकाराः **कृष्णाः** कृष्णवर्णा रुद्राक्षा जाता उत्पन्नाः । अत्र सूर्यनेत्राज्जाता द्वादशभेदवन्तो रुद्राक्षास्तन्नेत्रस्य तपिन्यादिकलात्मकाः, सोमनेत्रात् षोडशप्रकारास्ते जातास्तन्नेत्रस्याऽमृतादि षोडशकलात्मकाः, अग्निनेत्राच्च दशप्रकारा उत्पन्नास्तन्नेत्रस्य धूम्रार्चिःप्रभृतिदशकलात्मका इति मरितोण्टदार्यस्तत्त्वप्रदीपिकायाम् । **त्रिनेत्रस्य त्रिनेत्राणां कलाः – सूर्यनेत्रस्य द्वादश –** १. तपिनी, २. तापिनी,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

३. धूम्रा, ४. मरीची, ५. ज्वलिनी, ६. रुची, ७. सुषुम्ना, ८. भोगदा, ९. विश्वा, १०. बोधिनी, ११. धारिणी, १२. क्षमा चेति; **चन्द्रनेत्रस्य षोडश** – १. अमृता, २. मानदा, ३. पूषा, ४. तुष्टिः, ५. पुष्टिः, ६. रतिः, ७.धृतिः, ८.शालिनी, ९.चन्द्रिका, १०.कान्तिः, ११.ज्योत्स्ना, १२.श्रीः, १३. प्रीतिः, १४. अगदा, १५. पूर्णा, १६. पूर्णामृता चेति; **अग्निनेत्रस्य दश** – १. धूम्रा, २. अर्चिः, ३. ऊष्मा, ४. ज्वलिनी, ५. ज्वालिनी, ६. विस्फुलिङ्गिनी, ७. सुश्रीः, ८. सुरूपा, ९. कपिला, १०. हव्यकव्यवहा चेति । आहत्य अष्टत्रिंशत्कलाः (१२+१६+१०=३८) (शब्द. कौ., संपुट २, पृ.६३८-६३९) । अयं विषय उपलब्धेषूपनिषत्सु शैवागमेष्वपि नोपलभ्यते । तेषु पुना रुद्राक्षाणामन्ये प्रकारा उक्ताः । तथा हि – रुद्राक्षजाबालोपनिषदि त्रयो विभजनक्रमा दृश्यन्ते । आद्यविभजनक्रमानुसारं गात्रानुगुण्येन रुद्रक्षाः श्रेष्ठ (उत्तम) मध्यमाधमत्वेन त्रिविधाः, तत्र धात्रीफल-(आमलकी)-प्रमाणं श्रेष्ठम्, बदरीफलगात्रं मध्यमम् [बदरी-'बारि' 'एलची' इति कन्नडभाषायाम्], चणकगात्रम् अधमम् [चणक-'कडले' इति कन्नडभाषायाम्]। (रु.जा.उ., ८-९) । वर्णानुसारं ब्राह्मण-क्षत्रिय-वैश्य-शूद्रा इति विभजनं द्वितीयम् । तत्र श्वेता रुद्राक्षा ब्रह्मणा, रक्तवर्णकाः क्षत्रियाः, पीतवर्णा वैश्याः, कृष्णाश्च शूद्राः । (रु.जा.उ., १०-११) । इमावेव विभागक्रमौ चन्द्रज्ञानागमेऽपि दृश्यन्ते । (चं.आ., उ.भा., क्रि.पा., ७.९-१२) । उत्तममध्यमत्वेन विभागोऽपि रुद्राक्षजावालश्रुतौ चन्द्रज्ञानागमे चोपलभ्यते । तत्र स्वयमेव रन्ध्रयुक्त उत्तमः, पुरुषयत्नेन कृतरन्ध्रो मध्यमः । (रु.जा.उ., १४-१५; चं.आ., उ.भा., क्रि.पा., ७.१५) । ॥४८-४९॥

अच्छिद्रं कनकप्रख्यमनन्यधृतमुत्तमम् ।
रुद्राक्षं धारयेत्प्राज्ञः शिवपूजापरायणः ॥५०॥

व्याख्या— धार्यस्य रुद्राक्षस्य लक्षणमाह – **अच्छिद्रमिति** । **शिवपूजापरायणः** शिवपूजायां परायणः, साकल्येनासक्तः, **प्राज्ञः** धीमान्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भक्तः **अच्छिद्रं** न विद्यते छिद्रं यस्मिन्, तादृशम्, कृमिकृतछिद्ररहितम् इत्यर्थः, **कनकप्रख्यं** कनकवत्कान्तियुक्तं **अनन्यधृतम्** न अन्यैः धृतम् **उत्तमं** श्रेष्ठं **रुद्राक्षं धारयेत्** रुद्राक्षं बिभृयात् ॥ धारणीय-रुद्राक्षस्वरूपमुक्तम्। रुद्राक्षजाबाले चन्द्रज्ञानागमे च के रुद्राक्षेषु धार्याः के च न धार्या इति सूच्यते । तथा हि – "समा (ताम्रा) श्निग्धा दृढाः स्थूला कण्टकैः संयुता शुभाः ॥ क्रिमिदष्टं छिन्नभिन्नं कण्टकैर्हीनमेव च । व्रणयुक्तमवृत्तं च षड्रुद्राक्षान् विवर्जयेत् ॥" इति । (रु.जा.उ., १३-१४; चं.आ., उ.भा., क्रि.पा., ७.१४) ॥५०॥

यथास्थानं यथावक्त्रं यथायोगं यथाविधि ।
रुद्राक्षधारणं वक्ष्ये रुद्रसायुज्यसिद्धये ॥५१॥

व्याख्या— कुत्र स्थाने कथं कति च धारणीया इत्युच्यते – **यथास्थानमिति** । **रुद्रासायुज्यसिद्धये** रुद्रेण सायुज्यं रुद्रैक्यम्, तत्सिद्धये, **यथास्थानं** स्थानमनतिक्रम्य, कुत्र कुत्र धारणीयमङ्गेषु तान्यविहाय, **यथावक्त्रं** वक्त्रमनतिक्रम्य, वक्त्रसंख्यानुगुण्येन तत्तदङ्गेषु धारणीयत्वात्तन्नियममनुल्लङ्घ्य, **यथायोगं** योगं सम्बन्धमनतिक्रम्य स्थानसम्बन्धमनतिक्रम्य, **यथाविधि** विधिं शास्त्रमनतिक्रम्य शास्त्रोक्तप्रकारेण **रुद्राक्षधारणं** रुद्राक्षाणां धारणं **वक्ष्ये** वदामि ॥ श्रूयन्ताम् इत्यर्थः ॥

शिखायामेकमेकास्यं रुद्राक्षं धारयेद् बुधः ।
द्वित्रिद्वादशवक्त्राणि शिरसि त्रीणि धारयेत् ॥५२॥

षट्त्रिंशद्धारयेन्मूर्ध्नि नित्यमेकादशाननान् ।
दशसप्तपञ्चवक्त्रान् षट् षट् कर्णद्वये वहेत् ॥५३॥

षडष्टवदनान् कण्ठे द्वात्रिंशद्धारयेत् सदा ।
पञ्चाशद्धारयेद् विद्वान् चतुर्वक्त्राणि वक्षसि ॥५४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्रयोदशमुखान् बाह्वोर्धरित् षोडश षोडश ।
प्रत्येकं द्वादश वहेन्नवास्यान् मणिबन्धयोः ॥५५॥

चतुर्दशमुखं यज्ञसूत्रमष्टोत्तरं शतम् ।
धारयेत् सर्वकालं तु रुद्राक्षं शिवपूजकः ॥५६॥

व्याख्या— पूर्वोक्तरीत्या रुद्राक्षधारणस्थानानि वक्त्रानुसारमाह – **शिखायामित्यादिना । शिखायां** शिखास्थाने **एकास्यम्** एकमुखं **रुद्राक्षं** रुद्रनेत्रोद्भवत्वाद् रुद्राक्षस्तं **बुधः** ज्ञानी भक्तः **धारयेत्** वहेत् । **द्वित्रिद्वादश-वक्त्राणि** द्विवक्त्रम् एकम्, त्रिवक्त्रमेकम्, द्वादशवक्त्रमेकं चाहत्य **त्रीणि** रुद्राक्षाणि **धारयेत्** बिभृयात् । **नित्यं** सर्वदा **मूर्ध्नि** मस्तके **एकादशाननान्** एकादशवक्त्रयुक्तान् **षट्त्रिंशत्** षडधिकत्रिंशत् रुद्राक्षान् **धारयेत्** वहेत् । यद्यपि रुद्राक्षशब्दः वृक्षार्थे पुल्लिङ्गः, तद्बीजार्थे नपुंसकलिङ्गः, तथाप्यत्र उभयलिङ्गित्वेन, पुंनपुंसकत्वेनेति यावत्, बीजार्थे रुद्राक्षशब्दः स्वीकृतः । एवमन्यत्रापि ज्ञेयम् । **कर्णद्वये** कर्णयोः **षट् षट्** प्रत्येकस्य कर्णस्य षट् इत्येवं **दशसप्तपञ्चवक्त्रान्** दशमुखं द्वयं सप्तमुखं द्वयं पञ्चमुखं द्वयं चेत्याहत्य षड्रुद्राक्षान् प्रतिकर्णं **वहेत्** धारयेत् । **कण्ठे** कण्ठप्रदेशे **षडष्टवदनान्** षड्वदनान् अष्टवदनांश्च **द्वात्रिंशत्** समत्वेन षोडशषड्वदनान् षोडशाष्ट-वदनांश्च आहत्य द्वात्रिंशद् रुद्राक्षान् **सदा** सर्वदा **धारयेत्** बिभृयात् । **विद्वान्** ज्ञानी भक्तः **चतुर्वक्त्राणि** चतुर्वदनानि **पञ्चाशत्** पञ्चाशत्संख्या-कानि रुद्राक्षाणि **वक्षसि** हृदयस्थाने **धारयेत्** वहेत् । **बाह्वोः** बाहुद्वये **त्रयोदशमुखान्** त्रयोदशवदनयुक्तान् **षोडश षोडश** प्रतिबाहु षोडश इत्येवंरीत्या रुद्राक्षान् **धरेत्** वहेत् । **मणिबन्धयोः** मणिबन्धद्वये **प्रत्येकं** प्रत्येकस्मिन् मणिबन्धे **द्वादश** द्वादश **नवास्यान्** नववदनयुक्तान् रुद्राक्षान् **वहेत्** धारयेत् । **चतुर्दशमुखं** चतुर्दशवक्त्रयुक्तम् **अष्टोत्तरं शतम्** अष्टा-धिकशतरुद्राक्षघटितं **यज्ञासूत्रं** यज्ञोपवीतं धारयेत् इति शेषः । एवं **शिवपूजकः** शिवपूजानिष्ठः **रुद्राक्षं** स्थानानुसारेण वक्त्रानुसारेण च **सर्वकालं** सर्वदा **धारयेत्** बिभृयात् । बृहज्जाबालोपनिषत्, रुद्राक्षजाबालो-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पनिषत्, सिद्धान्तशिखोपनिषत्, चन्द्रज्ञानागमः, कारणागम इत्यादिषु रुद्राक्षधारणस्थानानां स्थानानुसारं धारणीयरुद्राक्षसंख्यानां च विषयः बहुधा प्रपञ्चितः। सिद्धान्तशिखामण्युक्तविषयापेक्षया केचन समानांशाः दृश्यन्ते। तथा हि – रुद्राक्षजाबालोपनिषदि शिखायामेकं बाह्वोः षोडश षोडश मणिबन्धयोः द्वादश द्वादश रुद्राक्षाणां धारणमुक्तम्। अस्मिन् विषये सिद्धान्तशिखामणौ ऐकमत्यमस्ति। एष एवाभिप्रायः चन्द्रज्ञानागमे कारणागमे च। अष्टोत्तरशतरुद्राक्षघटिताया यज्ञसूत्रत्वेन धारणीयाया रुद्राक्षमालाया विषयेऽपि साम्यमस्ति। केचन मतभेदा अपि सन्ति। तथा हि – रुद्राक्षजाबालोपनिषदि चन्द्रज्ञानागमे कारणागमे च शिरसि धार्यमाणानां रुद्राक्षाणानां संख्या त्रिंशत्, सिद्धान्तशिखामणौ तु त्रीणि। सिद्धान्तशिखामणौ पुनः मूर्धन्यं षट्त्रिंशद्रुद्राक्षधारणीयस्थानत्वेनोक्तम्। रुद्राक्षजाबालोपनिषदि चन्द्रज्ञानागमे कारणागमे च तत्स्थानस्य उल्लेख एव नास्ति। बृहज्जाबालोपनिषदि तु तत्स्थानमुक्तम्, परंतु तत्र चत्वारिंशद्रुद्राक्षाणां धारणं विहितम्। कण्ठस्थाने रुद्राक्षजाबालोपनिषत्कारणागमयोरुक्तरीत्या षट्त्रिंशद्रुद्राक्षाणि धारणीयानि, परंतु बृहज्जाबालोपनिषच्चन्द्रज्ञानागमसिद्धान्तशिखामणिषु उक्तरीत्या तत्र धारणीयानि रुद्राक्षाणि द्वात्रिंशत्। बृहज्जाबालोपनिषदि रुद्राक्षजाबालोपनिषदि सिद्धान्तशिखोपनिषदि चन्द्रज्ञानागमे च वक्षःस्थानं नोक्तम्, परं तु सिद्धान्तशिखामणौ पुनः तत्स्थानमुक्तम्, तत्र पञ्चाशद्रुद्राक्षाणि धारणीयानीति विहितं च। रुद्राक्षजाबालोपनिषदि चन्द्रज्ञानागमे च द्वौ त्रयः पञ्च वा रुद्राक्षहाराः कण्ठतः अधस्ताद् धारणीयत्वेन उक्ताः। ते एव लम्बमानाः सन्तः वक्षःप्रदेशमाक्रामन्तीति ज्ञेयम्। बृहज्जाबालोपनिषदुक्तरीत्या कर्णयोः द्वादश द्वादश रुद्राक्षाणि धारणीयानि, परं तु सिद्धान्तशिखामण्युक्तदिशा तत्र षट् षट् रुद्राक्षाणि धारणीयानि। रुद्राक्षजाबालोपनिषदि चन्द्रज्ञानागमे कारणागमे च ऐतन्नोक्तम्। रुद्राक्षजाबालोपनिषदि चन्द्रज्ञानागमे कारणागमे स्कन्धस्थानमुक्तम्, तत्र पञ्चशतं रुद्राक्षाणि धारणीयत्वेन उक्तानि। सिद्धान्तशिखामणौ तत्स्थानमेव नोक्तम्। बृहज्जाबालोपनिषदि केवलं अङ्गुष्ठयोः षट् षट्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रुद्राक्षाणि विहितानि । अन्यत्र एतन्नोक्तम् । [बृ.जा.उ., ७.८; रु.जा.उ., १७-२२; सि. शिखा. उ., उ.सं., भाग-२ पृ.३८२; चं.आ., उ.भा., क्रि.पा., ७.१८-२२; का.आ., उ.भा., क्रि.पा., ३.५०-५४] । इदमत्र ज्ञेयम् । सिद्धान्तशिखामणौ एकादारभ्य चतुर्दशपर्यन्तं मुखयुक्तानि रुद्राक्षाणि विविधस्थानेषु धारणीयत्वेन उक्तानि । रुद्राक्षाजाबोलोपनिषदि चन्द्रज्ञानागमे च रुद्राक्षधारणफलनिरूपणसन्दर्भे मुखसंख्यानुसारं फल-मुक्तम् । अन्यत्र रुद्राक्षमुखानि नोक्तानि । [रु.जा.उ., उ.सं., भाग-१, पृ.५३८; चं.आ., उ.भा., क्रि.पा., ७.२५-३८] ॥५२-५६॥

एवं रुद्राक्षधारी यः सर्वकाले तु वर्तते ।
तस्य पापकथा नास्ति मूढस्यापि न संशयः ॥५७॥

ब्रह्महा मद्यपायी च स्वर्णहृद् गुरुतल्पगः ।
मातृहा पितृहा चैव भ्रूणहा कृतघातकः ॥
रुद्राक्षधारणादेव मुच्यते सर्वपातकैः ॥५८॥

व्याख्या— रुद्राक्षधारणफलत्वेन सर्वपापप्रमोक्षं सार्थवादं वदति – **एवम् इति । एवम्** अनया रीत्या **यः** यद्भक्तः **सर्वकाले** सर्वदा **रुद्राक्षधारी** रुद्राक्षधारणयुक्तः **वर्तते** भवति **तस्य** तादृशस्य **मूढस्यापि** मूर्खदशायां स्थितस्यापि **पापकथा** पापसम्पर्कः **नास्ति** नैव वर्तते । **न संशयः** अस्मिन् विषये न कोऽपि संशयः कार्यः । **ब्रह्महा** – ब्राह्मणघातकः **मद्यपायी** मद्यपानकृत् **स्वर्णहृत्** सुवर्णचोरः **गुरुतल्पगः** गुरुकलत्रभोगी **मातृहा** मातृघातकः **पितृहा** पितृघातकः **च एव** एवमेव **भ्रूणहा** गर्भघातकः **कृतघातकः** उपकारकृतोऽपि हन्तकश्च, एवं महापातककृदपि **रुद्राक्षधारणाद् एव** रुद्राक्षधारणमात्रेण **सर्वपातकैः** उक्तैरनुक्तैश्च पापैः **मुच्यते** मुक्तो भवति । "रुद्राक्षधारणात् सद्यः सर्वपापैः प्रमुच्यते" इत्याह रुद्राक्षजाबालोपनिषत् (रु.जा.उ., ४४) । चन्द्रज्ञानागमेऽपि इदमुक्तम् (चं.आ., उ.भा., क्रि.पा., ७.३९) ॥५७-५८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दर्शनात् स्पर्शनाच्चैव स्मरणादपि पूजनात् ।
रुद्राक्षधारणाल्लोके मुच्यन्ते पातकैर्जनाः ॥५९॥

व्याख्या— सर्वपापप्रमोक्षमाह विशेषतया – **दर्शनादिति । दर्शनात्** रुद्राक्षस्य प्रेक्षणात् **स्पर्शनात्** हस्तेन स्पर्शनात् **च एव** तथैव **स्मरणाद् अपि** स्मृतिपथमानयनाद् अपि **पूजनाद्** अर्चनाद् **रुद्राक्षधारणाद्** रुद्राक्षधृतेश्च **जनाः** सर्वे भक्ताः **पातकैः** घोरैरपि पापैः **मुच्यन्ते** मुक्ता भवन्ति ॥५९॥

ब्राह्मणो वान्त्यजो वापि मूर्खो वा पण्डितोऽपि वा ।
रुद्राक्षधारणादेव मुच्यन्ते सर्वपातकैः ॥६०॥

व्याख्या— रुद्राक्षधारणाद् सर्वपापक्षये वर्णभेदो वा ज्ञानभेदो वा नास्तीत्याह –. **ब्राह्मण इति । ब्राह्मणो वा अन्त्यजो वा** ब्राह्मण-क्षत्रिय-वैश्य-शूद्र वर्णीयाः, **मूर्खो वा पण्डितः अपि वा** मूर्खादिपण्डितपर्यन्तं सर्वे भक्ताः **रुद्राक्षधारणाद् एव** रुद्राक्षधारणमात्रेण **सर्वपातकै** सर्वैः घोरपापैः **मुच्यन्ते** प्रमुच्यन्ते ॥६०॥

गवां कोटिप्रदानस्य यत्फलं भुवि लभ्यते ।
तत्फलं लभते मर्त्यो नित्यं रुद्राक्षधारणात् ॥६१॥

व्याख्या— न केवलं पापनाशः परं पुण्यप्राप्तिरपीत्याह – **गवामिति। गवां कोटिप्रदानस्य** कोटिगोदानस्य **यत् फलं** यादृशं फलं **भुवि** प्रपञ्चे **लभ्यते** प्राप्यते **तत्फलं** तदेव फलं **नित्यं रुद्राक्षधारणात्** प्रत्यहं रुद्राक्षधृत्या **मर्त्यः** संसारी **लभते** प्राप्नोति ॥ कोटिगोप्रदानेन यत्फलं तद् गणनातीतम्। तादृशमगणितं फलं भस्मधारणेन प्राप्यते इति भावः । बृहज्जाबालोपनिषदि रुद्राक्षधारणफलमुक्तं सविशेषम् । तथा हि – "तद्रुद्राक्षे वाग्विषये कृते दशगोप्रदानेन यत्फलमवाप्नोति तत्फलमश्नुते । स एष भस्मज्योती रुद्राक्षः । यद्रुद्राक्षं करेण स्पृष्ट्वा धारणमात्रेण द्विसहस्रगोप्रदानफलं भवति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एकादशरुद्रत्वं च गच्छति । तद्रुद्राक्षे सिरसि धार्यमाणे कोटिगोप्रदानफलं भवति ।" इति (बृ.जा.उ., ७.१७) । रुद्राक्षजाबालोपनिषद्यपि वाक्यमिदं विद्यते । (रु.जा.उ., ४८) । चन्द्रज्ञानागमे तदेवोक्तं रीत्याऽन्यया । तथा हि– "श्रोत्रियाय सवत्साया धेनोर्दानेन यत् फलम्। तत्फलं लक्षगुणितं दर्शनाल्लभते नरः ॥ पुनस्तु कोटिगुणितं फलं तत्स्पर्शनाद् भवेत् । तस्य कोटिशतं पुण्यं लभते धारणान्नरः ॥" इति । (चं.आ., उ.भा., क्रि.पा., ७.६-७) ॥६१॥

मृत्युकाले च रुद्राक्षं निष्पीड्य सह वारिणा ।
यः पिबेच्चिन्तयन् रुद्रं रुद्रलोकं स गच्छति ॥६२॥

व्याख्या— रुद्रलोकप्राप्तिः शक्यते रुद्राक्षमहिम्ना इत्यवगमयति **मृत्युकाल इति । मृत्युकाले** मरणसमये **च** पुनः **यः** यो भक्तः **रुद्राक्षं निष्पीड्य** रुद्राक्षं निष्पेष्य **वारिणा सह** जलेन सह **रुद्रं चिन्तयन्** रुद्रं ध्यायन् **पिबेत्** पानं कुर्यात् **सः** स भक्तः **रुद्रलोकं** रुद्राधिष्ठितं लोकं **गच्छति** प्राप्नोति ॥६२॥

भस्मोद्धूलितसर्वाङ्गा धृतरुद्राक्षमालिकाः ।
ये भवन्ति महात्मानस्ते रुद्रा नात्र संशयः ॥६३॥

व्याख्या— रुद्राक्षधारिणः साक्षाद्रुद्रा एवेत्याह – **भस्मेति** । **ये महात्मानः** ये महाभागाः **भस्मोद्धूलितसर्वाङ्गाः** भस्मना उद्धूलितानि सर्वाणि अङ्गानि येषां ते, तादृशाः, **धृतरुद्राक्षमालिकाः** धृताः रुद्राक्षाणां मालिकाः यैः ते, तादृशाः **भवन्ति** सन्ति **ते** ते भक्ताः **रुद्राः** एव रुद्र-स्वरूपा एव, **अत्र** अस्मिन् विषये **संशयः न** सन्देहलेशोऽपि नास्ति ॥६३॥

नित्यानि काम्यानि निमित्तजानि
कर्माणि सर्वाणि सदापि कुर्वन् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

योऽभस्मरुद्राक्षधरो यदि स्याद्
द्विजो न तस्यास्ति फलोपपत्तिः ॥६४॥

व्याख्या— भस्मरुद्राक्षधारणरहितस्य कृतनित्यादिकर्मफलरहितत्वमाह – **नित्यानीति । यः** यो भक्तः **नित्यानि** इष्टलिङ्गपूजादीनि कर्माणि **काम्यानि** फलाभिलाषया क्रियमाणानि दानजपादिकर्माणि, तदुक्तम् – "यत्किञ्चित्फलमुद्दिश्य यज्ञदानजपादिकम् । क्रियते कायिकं यच्च तत्काम्यं परिकीर्तितम् ॥" इति । **निमित्तजानि** निमित्तमात्रमाश्रित्य क्रियमाणानि ग्रहणस्नानप्रायश्चित्तादीनि कर्माणि, इति **सर्वाणि कर्माणि** समग्राणि आचरणानि **सदा** सर्वदा **कुर्वन् अपि** आचरन्नपि **यो द्विजः** यः शिव-दीक्षासम्पन्नः **यदि अभस्मरुद्राक्षधरः स्यात्** न भस्मरुद्राक्षे न धरति इति तादृशः भवति चेत् तर्हि **तस्य** तादृशस्य **फलोपपत्तिः** फलप्राप्तिः **न अस्ति** न भवति ॥६४॥ इन्द्रवज्रावृत्तम् । "**स्यादिन्द्रवज्रा यदि तौ जगौ गः**" इति तल्लक्षणम् (त = – – U, त = – – U, ज = U–U, ग = गुरुः, ग = गुरुः) (आप्टे, पृ.६५०) ॥६४॥

सर्वेषु वर्णाश्रमसंगतेषु
नित्यं सदाचारपरायणेषु ।
श्रुतिस्मृतिभ्यामिह चोद्यमाने ।
विभूतिरुद्राक्षधरः समानः ॥६५॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते
वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ
विभूतिरुद्राक्षधारणप्रसङ्गो नाम
सप्तमः परिच्छेदः समाप्तः ॥७॥

व्याख्या— वर्णाश्रमधर्मपालकेषु भस्मरुद्राक्षधारणशीलः एव विशिष्यते इत्याह – **सर्वेषु इति । नित्यं** निरन्तरं **सदाचारपरायणेषु** सदाचारे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परायणाः सदाचारे निष्ठया निरताः, तेषु, **वर्णाश्रमसंगतेषु** ब्राह्मणादिवर्णः ब्रह्मचर्याद्याश्रमश्च तयोः संयुतेषु **विभूतिरुद्राक्षधरः** विभूतिरुद्राक्षधारणशीलः **इह लोके समानः** भेदभावरहितः पक्षपातहीनः, विकल्परहित इति यावत् । विकल्परहितो वीर एव वीरशैवः । एवं सः **श्रुतिस्मृतिभ्यां** संहितोपनिषदात्मकश्रुतिः शैवागमादिस्मृतिश्च ताभ्यां **चोद्यमानः** प्रशंस्यते। अत्रापि इन्द्रवज्रा एव वृत्तम् । उक्तं च तल्लक्षणम् ॥६५॥

— इति रुद्राक्षधारणस्थलम् —

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
सप्तमः परिच्छेदः समाप्तः ॥७॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अष्टमः परिच्छेदः

पञ्चाक्षरीजपप्रसङ्गः

व्याख्या— अथ इष्टलिङ्गभस्मरुद्राक्षधारणसम्पन्नः सद्भक्तः शिवतत्त्वप्रकाशिकां पञ्चाक्षरीं नित्यं जपद्वारा स्वायत्तीकुर्यादित्यभिप्रायेण ग्रन्थकृत् पञ्चाक्षरीजपस्थलं निरूपयन् अष्टमपरिच्छेदमारभते ।

८. अथ पञ्चाक्षरीजपस्थलम् – (८)

धृतश्रीभूतिरुद्राक्षः प्रयतो लिङ्गधारकः ।
जपेत्पञ्चाक्षरीविद्यां शिवतत्त्वप्रबोधिनीम् ॥१॥

व्याख्या— भूतिरुद्राधारिणः पञ्चाक्षरीमन्त्रजपो विधीयते – **धृतेति**। **धृतश्रीभूतिरुद्राक्षः** श्रीभूतिः विभूतिः रुद्राक्षं च श्रीभूतिरुद्राक्षे धृते श्रीभूतिरुद्राक्षे येन सः, विभूतिरुद्राक्षधारणसम्पन्नः इत्यर्थः । **प्रयतः** पवित्रीकृतः **लिङ्गधारकः** इष्टादिलिङ्गत्रयधारणशीलसम्पन्नः, लिङ्गं धारयतीति लिङ्गधारकः, धृ-धारणे; धृधातोर्णिजन्तात्स्वार्थे कर्तरि ण्वुल्— "ण्वुल्तृचौ" (पा.अ., ३.१.१३३)— "युवोरनाकौ" (पा.अ., ७.१.१) वु = अक । **शिवतत्त्वप्रबोधिनीम्** शिवस्य परशिवस्य तत्त्वं शिवतत्त्वम्, तत् प्रबोधयितुं प्रकाशयितुं शीलम् अस्याः इति शिवतत्त्वप्रबोधिनी, ताम्, **पञ्चाक्षरीविद्यां** शिवपञ्चाक्षरीमन्त्रं **जपेत्** मानसजपस्वरूपेण ध्यायेत्, उपांशुजपस्वरूपेण पार्श्वस्थैर्यथा न श्रूयते तथा मन्दमुच्चरेत् वाचिकजपस्वरूपेण पार्श्वस्थैर्यथा श्रूयते तथा किञ्चिदुच्चैः उच्चरेत् । (त्रिविध-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जपस्य स्वरूपं वक्ष्यते ॥) **पञ्चाक्षरी**— पञ्चानाम् अक्षराणां समाहारः, पञ्चाक्षरी। "तद्धितार्थोत्तरपदसमाहारे च" (पा. २.१.५१) इति द्विगु-समासः। "द्विगोः" (पा.४.१.२१) इति अदन्ताद्विगोर्ङीप्। "अकारान्तो-त्तरपदो द्विगुः स्त्रियामिष्टः" इति स्त्रीत्वम् ॥१॥

शिवतत्त्वात् परं नास्ति यथा तत्त्वान्तरं महत्।
तथा पञ्चाक्षरीमन्त्रान्नास्ति मन्त्रान्तरं महत् ॥२॥

व्याख्या— पञ्चाक्षरीमहामन्त्रस्य महत्त्वं प्रतिपादयति – **शिवेति**। **यथा** येन प्रकारेण **शिवतत्त्वात्** परशिवतत्त्वात् **परं** श्रेष्ठं **महत्** महीयः **तत्त्वान्तरम्** अन्यतत्त्वं **नास्ति** न विद्यते **तथा** तेन प्रकारेण **पञ्चाक्षरी-मन्त्रात्** पञ्चाक्षरघटितमनोः (परं श्रेष्ठं) **महत्** महीयः तत्त्वान्तरम् अन्यत्तत्त्वं **नास्ति** न विद्यते ॥ "शिव एको ध्येयः" इत्याह श्रुतिः (अथ.शिखा.उ.,३.४)। शिवागमेषूक्तम्। तथा हि– "वेदाः साङ्गा पुराणानि मन्त्राश्च बहवस्तथा। आगमा विविधा देवि विद्यास्थानानि यानि च। पञ्चाक्षरे प्रलीयन्ते निर्गच्छन्ति पुनस्ततः" (सू.आ., उ.भा., क्रि.पा. ३.७५) इति। एवं पञ्चाक्षरोऽयं मन्त्रः वेदवेदाङ्गपुराणाग-माद्यानां विद्यास्थानानां विलयोद्गमस्थानमिति प्रशंस्यते। पञ्चाक्षरमन्त्रस्य मूलमुक्तं "विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ। तत्र पञ्चाक्षरस्तत्र शिव इत्यक्षरद्वयम्।" (का.आ., उ.भा., क्रि.पा. ८.४) इति। यजुर्वेदीयस्य रुद्राध्यायस्याष्टमानुवाकोऽस्य मन्त्रस्य मूलम् ("नमः शिवाय च शिवतराय च") इत्यनेन ज्ञायते ॥२॥

ज्ञाते पञ्चाक्षरीमन्त्रे किं वा मन्त्रान्तरैः फलम्।
ज्ञाते शिवे जगन्मूले किं फलं देवतान्तरैः ॥३॥

व्याख्या— पञ्चाक्षरीमहामन्त्रे परमशिवे च ज्ञाते मन्त्रान्तरैः देवतान्तरैश्च न किमपि प्रयोजनमित्याह – **ज्ञाते इति**। **ज्ञाते** अवगते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

साक्षात्कृते इति यावत् **पञ्चाक्षरीमन्त्रे** पञ्चाक्षरीमहामनौ **मन्त्रान्तरैः** अन्यैः मन्त्रैः **किं वा फलं** किं वा प्रयोजनम् । न किमपि प्रयोजनमित्यर्थः । **ज्ञाते** अवगते ध्यानविषयीकृते इति यावत् **शिवे** परशिवे **देवतान्तरैः** अन्याभिर्देवताभिः **किं फलं** किं प्रयोजनम् । न किमपि प्रयोजनमित्यर्थः ॥३॥

सप्तकोटिषु मन्त्रेषु मन्त्रः पञ्चाक्षरो महान् ।
ब्रह्मविष्ण्वादिदेवेषु यथा शम्भुर्महत्तरः ॥४॥

व्याख्या— शम्भुर्यथा देवेषु तथा पञ्चाक्षरी मन्त्रेषु महानित्याह— **सप्तेति** । **सप्तकोटिषु** कोटिसप्तकसंख्याकेषु **मन्त्रेषु** महामनुषु **पञ्चाक्षरो मन्त्रः** पञ्चाक्षरात्मको मनुः **महान्** महीयान् **यथा** यादृशः **ब्रह्मविष्ण्वादिदेवेषु** ब्रह्मा, विष्णुः इत्यादिषु देवताविशेषेषु **शम्भुः** शं भावयिता परशिवः **महत्तरः** महीयान् ॥ "शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य" इत्याह अथर्वशिखोपनिषत् (३.४) । सिद्धान्तशिखोपनिषदप्याह— "साम्बं देवप्रकृष्टं शिवं वरेण्यं पक्वचित्ताः शिवस्य प्रसादतो ज्ञानमात्राद्विदन्ति ।" (अप्रकटितोपनिषदः, पृ.३१०) इति । एवमेव पारमेश्वरे पञ्चाक्षरस्य महत्त्वमुक्तम्— "नास्ति ज्ञानात्परं मित्रं न भक्तेः साधनं परम् । न शैवादधिको मर्त्यो मन्त्रः पञ्चाक्षरः परः ॥" (पार.आ., १०.९०) इति ॥४॥

अशेषजगतां हेतुः परमात्मा महेश्वरः ।
तस्य वाचकमन्त्रोऽयं सर्वमन्त्रैककारणम् ॥५॥

तस्याभिधानमन्त्रोऽयमभिधेयश्च स स्मृतः ।
अभिधानाभिधेयत्वान्मन्त्रात् सिद्धः परः शिवः ॥६॥

व्याख्या— परमेश्वरवाचकत्वात् सर्वमन्त्रमूलत्वाच्च पञ्चाक्षरमहामनोर्महत्त्वमित्याह युग्मेन— **अशेषेति** । **परमात्मा** विश्वाधिक आत्मा सर्वमहान् **महेश्वरः** परमेश्वरः **अशेषजगतां** सर्वेषां लोकानां **हेतुः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सृष्टिस्थितिप्रलयकारणम् । अनेकानि जगन्ति तत्कारणं परमेश्वरश्चैक एव । **तस्य** तादृशस्य महादेवस्य **वाचकमन्त्रः अयम्** वाचकश्चासौ मन्त्रश्च अभिधानभूतो मन्त्र इत्यर्थः, **सर्वमन्त्रैककारणम्** सर्वेषां मन्त्राणाम् एकमेवाद्वितीयं कारणं हेतुः । अनेके मन्त्राः तत्कारणं पञ्चाक्षरमन्त्रस्त्वेक एव ॥ **तस्य** परमेश्वरस्य **अभिधानमन्त्रः अयम्** नामधेयभूतः एषः मन्त्रः **अभिधेयः च** अभिधातुं योग्यः परमपुरुषश्च **स स्मृतः** परमेश्वर एव प्रथितः । **अभिधानाभिधेयत्वात्** अभिधानेन अभिधेयः तस्मात् वाच्य-वाचकभावसम्बन्धेन स्थितत्वात् **मन्त्रात्** तस्मात्पञ्चाक्षरीमनोः **परः शिवः** परमात्मा शिवः **सिद्धः** स्फुरणरूपेण ज्ञातः ॥ शैवागमेष्वस्य मन्त्रस्य महत्त्वं बहुधा प्रतिपाद्यते । तथा हि– "तस्माद् (अघोरमन्त्राद्) अपि श्रेष्ठतरा मम पञ्चाक्षरी शिवे । अस्य मन्त्रस्य चैवान्ये उपमन्त्राः प्रकीर्तिताः ॥" (सू.आ., उ.भा., क्रि.पा., ३-६) इति; "मन्त्रान्तरेषु सिद्धेषु मन्त्र एष न सिद्ध्यति । अस्मिन् सिद्धे महामन्त्रे तेऽपि सिद्धा भवन्ति हि॥" (चं.आ., उ.भा., क्रि.पा., ८.९२) इति च। परशिवस्य पञ्चाक्षरमनोश्च वाच्यवाचकभावसम्बन्ध इत्युक्तं पारमेश्वरे– "मन्त्रस्त्वक्षरतः सूक्ष्मः पञ्चब्रह्मतनुः शिवः । वाच्यवाचकभावेन स्थितः साक्षात् स्वभावतः ॥ वाच्यः शिवः प्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः । वाच्यवाचकभावोऽय-मनादिः संस्थितस्तयोः ॥" (पार. आ., ११.१७-१८) इति । "पञ्च-ब्रह्मतनुः शिवः" इति यदुक्तं तस्यायमाशयः– "सद्योजातं प्रपद्यामि", "वामदेवाय नमो", "अघोरेभ्योऽथ घोरेभ्यो", "तत्पुरुषाय विद्महे", "ईशानः सर्वविद्यानां" इति पञ्चब्रह्ममन्त्राः, तैः पञ्चब्रह्ममनुभि-र्घटितत्वात् शिवस्य ब्रह्मणः पञ्चब्रह्मतनुत्वम्, इति । तत्रैवान्यदपि महत्त्वमुक्तं पञ्चाक्षरमहामनोः– "ईशानाद्यानि सूक्ष्माणि ब्रह्मण्येका-क्षराणि तु । मन्त्रे नमःशिवायेति संस्थितानि यथाक्रमम् ॥" (पार. आ., ११.१६) इति । ईशान-तत्पुरुषाघोर-वामदेव-सद्योजाताः ये पञ्च-ब्रह्माणः इति प्रसिद्धाः ते एव सूक्ष्मरूपेण 'न-मः-शि-वा-य' इति पञ्चाक्षराणि भवन्तीत्यर्थः ॥५-६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नमःशब्दं वदेत्पूर्वं शिवायेति ततः परम् ।
मन्त्रः पञ्चाक्षरो ह्येष सर्वश्रुतिशिरोगतः ॥७॥

व्याख्या— मन्त्रे वर्णक्रमः सम्यगवधेयः, क्रमव्यत्यासेन मन्त्रत्वनाशः इति सूचयन् ब्रवीति— **नमःशब्दमिति** । **पूर्वम्** आदौ **नमःशब्दं** "नमः" इति शब्दं **वदेत्** उच्चरेत् **शिवायेति** "शिवाय" इति **ततः परम्** तदनन्तरं वदेत् इति शेषः । **एष हि** यत्क्रमेणोक्तस्तत्क्रमेणोच्चार्यमाणो मन्त्रः **पञ्चाक्षरो मन्त्रः** पञ्चाक्षरात्मको मनुः **सर्वश्रुतिशिरोगतः** सर्वाः श्रुतयः सर्वश्रुतयः, तासां शिरसि गतः सर्वश्रुतिशिरोगतः सर्वश्रुतीनाम् अग्रे स्थितः ॥ शिवजीवैक्यबोधकोऽयं मन्त्रः इति प्रतिपाद्यते । तथा हि— "अङ्गं नमःपदमसौ शिव एव लिङ्गं सम्बन्ध एष यदायेतिपदं तदुक्तम् । लिङ्गाङ्गसङ्गमपदत्रयबोधनार्थं पञ्चाक्षरोऽयमभिधास्यति मन्त्रराजः ॥" (अनु.सू.६.४५) इति । नमः-शब्दः 'अङ्ग' इत्यपरनामभाग्जीवपरः, 'शिव'-शब्दः 'लिङ्गम्' इत्यपरनामभाक्परमात्मपरः, "नमः स्वस्तिस्वाहा-स्वधाऽलंवषड्योगाच्च" (पा. २.३.१६) इति चतुर्थीविधानेन प्राप्तः 'आय' इत्ययं प्रत्ययभागस्तयोः शिवजीवयोः (लिङ्गाङ्गयोः) सामरस्यरूपं सम्बन्धं व्यनक्ति । पञ्चाक्षरमन्त्रक्रमः शैवागमेषूक्तम् । तथा हि— "आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम् । सैषा पञ्चाक्षरीविद्या सर्वश्रुतिशिरो-गतः ॥" (चं.आ., उ.भा., क्रि.पा., ८.५); "नमः पदं वदेत्पूर्वं यान्तं शिवपदं ततः । प्रणवेन समायुक्तं षडक्षरमिति स्मृतम् ॥" (सू.आ., उ.भा., क्रि.पा., ३.१३); "आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम् । एषा पञ्चाक्षरीविद्या प्रणवाद्या षडक्षरी ॥" (पार.आ., ११.३०-३१) ॥७॥

आदितः परिशुद्धत्वान्मलत्रयवियोगतः ।
शिव इत्युच्यते शम्भुश्चिदानन्दघनः प्रभुः ॥८॥

व्याख्या— कथं शिवत्त्वं शम्भोः इत्यत्रोच्यते— **आदित इति** । **चिदानन्दघनः** चित् च आनन्दश्च चिदानन्दौ ताभ्यां घनः सान्द्रः, सच्चिदानन्दस्वरूप इति यावत्, **प्रभुः** कर्तुमकर्तुमन्यथाकर्तुं समर्थः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वतन्त्रस्वतन्त्रः इत्यर्थः, **शम्भुः** शं भावयिता सुखप्रदश्च **आदितः** अनादेः शम्भोः अनादित्वमेवादित्वम्, सर्वदा इत्यर्थः, **मलत्रयवियोगतः** मलत्रयाणां वियोगः, तस्मात्, आणव-मायीय-कार्मिकाख्यानां मलानां त्रयम्, तस्माद् वियोगः निमोचनं, तस्मात् **परिशुद्धत्वात्** निर्मलत्वात्; [मलत्रयस्वरूपवैशद्याय पश्यत—६.१३-१४ इत्यनयोः व्याख्याम्]; **शिव इति उच्यते** शिव इत्यन्वर्थशब्देन कथ्यते ॥ शिवः कान्तिमान्, स्वच्छप्रकाशरूपः इत्यर्थः । 'वष्टि इति शिवः' – वश कान्तौ इति धातोः पचाद्यच् (अच्) प्रत्यययोजनेन, पृशोदरादित्वात् 'वश' इत्यस्य 'शव' इति वर्णविपर्ययेण अद्याकारस्य इकारादेशेन च सिद्धः शिवशब्दः शम्भोः कान्तिमत्त्वं व्यनक्ति । तदुक्तम्– "हिंसिधातोः सिंहशब्दो वश कान्तौ शिव स्मृतः । वर्णव्यत्ययतः सिद्धे पश्यकः कश्यपो यथा ।" इति । कान्तिमत्त्वं शम्भोः शिवत्वमिति समर्थ्यतेऽन्यत्र । तथा हि– "शुद्धत्वात् शिवमुद्दिष्टम्" (वा.शु.आ., १.२२) इति ॥८॥

आस्पदत्वादशेषाणां मङ्गलानां विशेषतः ।
शिवशब्दाभिधेयो हि देवदेवस्त्रियम्बकः ॥९॥

व्याख्या— शिवशब्दस्य मङ्गलवाचकत्वमाह – **आस्पदत्वादिति** । **अशेषाणां** सर्वेषां **मङ्गलानां** शुभानाम् **विशेषतः** सर्वाधिक्येन **आस्पदत्वात्** आश्रयत्वात् **देवदेवः** देवानां ब्रह्मविष्ण्वादीनां देवः परमेश्वरः **त्रियम्बकः** त्रीणि अम्बकानि यस्य सः; अम्बकं चक्षुः– "ईक्षणं नयनं चक्षुरक्षि लोचनमम्वकम्" इति वैजयन्तीकोशः; सूर्यचन्द्राग्नयः शिवस्य त्रीणि नेत्राणि; **शिवशब्दाभिधेयो हि** शिवशब्देन अभिधेयः, शिवशब्दवाच्यः; हि इति प्रसिद्धौ; शम्भुः शिवशब्देन प्रसिद्धः । "श्वश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" इत्यमरः (१.१४९) ॥९॥

शिव इत्यक्षरद्वन्द्वं परब्रह्मप्रकाशकम् ।
मुख्यवृत्त्या तदन्येषां शब्दानां गुणवृत्तयः ॥१०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— शिवशब्द एव मुख्यवृत्त्या परब्रह्मशम्भुवाचकः, नान्ये इति ब्रूते – **शिवेति । शिव इति अक्षरद्वन्द्वं** शिव इत्यक्षरद्वयं **मुख्यवृत्त्या** मुख्यया वृत्त्या अभिधया **परब्रह्मप्रकाशकम्** परब्रह्मणः प्रकाशकम्; परब्रह्म शम्भोः प्रकाशकम्; प्रकाशयति इति प्रकाशकम्; प्र + काशृ(काश्) + ण्वुल्(वु)– "ण्वुल्तृचौ" (पा.अ. ३.१.१३३); वु = अक – "युवोरनाकौ" (पा.अ. ७.१.१); **तदन्येषां** तद्भिन्नानां **शब्दानां** पदानां, पर्यायपदानामित्यर्थः, **गुणवृत्तयः** गुणयोगेन वृत्तिः (अर्थप्रतिपादकत्वं) येषां ते, शब्दाः; गुणवृत्तिर्नाम लक्षणावृत्तिः; शिवव्यतिरिक्तानां शब्दानां भवादीनां लक्षणावृत्त्या परब्रह्मप्रकाशकत्वम् इत्यर्थः ॥१०॥

तस्मान् मुख्यतरं नाम शिव इत्यक्षरद्वयम् ।
सच्चिदानन्दरूपस्य शम्भोरमिततेजसः ॥११॥

एतन्नामावलम्बेन मन्त्रः पञ्चाक्षरः स्मृतः ।
यस्मादतः सदा जप्यो मोक्षकाङ्क्षिभिरादरात् ॥१२॥

व्याख्या— शिव इति मुख्यनाम्ना घटितत्वात् पञ्चाक्षरस्य मोक्षप्रदत्वम् इत्याह युग्मेन – **तस्मादिति । तस्मात्** पूर्वोक्तकारणात् **शिवः इति अक्षरद्वयं** शिव इति द्व्यक्षरघटितं पदं **सच्चिदानन्दरूपस्य** सच्चिदानन्दात्मकस्य **अमिततेजसः** अमितं तेजः यस्य सः अमिततेजाः, तस्य, अपरिमिततेजोयुक्तस्य **शम्भोः** शङ्करस्य **मुख्यतरं नाम** अत्यन्तमुख्यम् अभिधानम् । **एतन्नामावलम्बेन** एतस्य नाम्नः अवलम्बेन आश्रयेण **पञ्चाक्षरः मन्त्रः** पञ्चाक्षरात्मको मनुः, **स्मृतः** स्मर्यते, महान् इति स्मर्यते इत्यर्थः । **यस्मात्** यस्मात्कारणात् महान् इति स्मृतः, **अतः** तस्मात् **मोक्षकाङ्क्षिभिः** मोक्षं मुक्तिं काङ्क्षन्ति इति मोक्षकाङ्क्षिणः, तैः, **आदरात्** सादरं **सदा** सर्वदा **जप्यः** जप्तुं योग्यः, जपनीयः इत्यर्थः ॥

पञ्चाक्षरीमन्त्रस्य श्रेष्ठत्वमुक्तम् – "मन्त्राणामपि शैवानां मुख्या एकादश स्मृताः । तत्राघोरो महामन्त्रः सर्वाभीष्टप्रदो नृणाम् । तस्मादपि श्रेष्ठतरा मम पञ्चाक्षरी शिवे ॥" (सू.आ., उ.भा., क्रि.पा., ३.५-६) इति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"पञ्चाक्षरात् परं नास्ति परित्राणं कलौ युगे" इत्युक्तं चन्द्रज्ञाने (चं.आ., उ.भा., क्रि.पा., ८-८३) । पारमेश्वरेप्युक्तम् – "पञ्चाक्षरमनुं नित्यं भावयेच्छिववाचकम् । भुक्तिमुक्तिप्रदं दिव्यं प्रणवं च परं शिवम् ॥" (पार.आ., १२.५६) इति । अकारः, उकारः, मकारः, नादः, बिन्दुश्चेति पञ्चभिः घटितत्वात् ओंकारोऽपि पञ्चाक्षरः ॥११-१२॥

यथाऽनादिर्महादेवः सिद्धः संसारमोचकः ।
तथा पञ्चाक्षरो मन्त्रः संसारक्षयकारकः ॥१३॥

व्याख्या— महादेवस्येव पञ्चाक्षरस्य संसारमोक्षकत्वमाह – **यथेति**। यथा यादृशः **अनादिः** आदिरहितः **महादेवः** महेश्वरः **संसारमोचकः** संसारात् जननमरणचक्रात् मोचयति इति संसारमोचकः; मोचकः, इत्यत्र मृच्लृ (मृच्) मोक्षणे, प्रेरणार्थे णिच्, "ण्वुल्तृचौ" (पा.अ. ३.१.१३३) इति ण्वुल् (वु), "युवोरनाकौ" (पा.अ. ७.१.१) इति । "वु" इत्यस्य स्थाने "अक" इत्यस्य आदेशः; **तथा** तादृशः **पञ्चाक्षरो मन्त्रः** पञ्चाक्षरात्मकः मनुः **संसारक्षयकारकः** संसारस्य क्षयः नाशः, तं कारोति इति कारकः निवर्तकः; कारकः, इत्यत्र डुकृञ् (कृ) करणे इति धातोः ण्वुल् (वु = अक) ["ण्वुल्तृचौ", "युवोरनाकौ"] ॥ यथा शिवः जीवस्य संसरणपाशेभ्यो प्रमोचकः, तथा एव पञ्चक्षरीमनुः संसारप्रमोचकः ॥ अत्र दृष्टान्तभागः एवं विशदीकृतः – "अयं हृदि स्थितः साक्षी सर्वेषामविशेषतः । तेनायं हृदयं प्रोक्तः शिवः संसारमोचकः ॥" (पञ्च. ब्र. उ., ४१) इति । दार्ष्टान्तिकभागस्त्वन्यश्रुत्या समर्थ्यते, यथा – "तारकोऽयं पञ्चाक्षरः । कोऽयं शैवो मनुः । शैवस्तरकोऽयम् उपदिश्यते मनुरविमुक्ते शैवेभ्यो जीवेभ्यः । शैवोऽयमेव मन्त्रस्तारयति । स एव प्रह्मोपदेशः ॥" (भ.जा.उ., २.४) इति ॥१३॥

पञ्चभूतानि सर्वाणि पञ्चतन्मात्रकाणि च ।
ज्ञानेन्द्रियाणि पञ्चापि पञ्चकर्मेन्द्रियाणि च ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चब्रह्माणि पञ्चापि कृत्यानि सह कारणैः ।
बोध्यानि पञ्चभिर्वर्णैः पञ्चाक्षरमहामनोः ॥१५॥

व्याख्या— शिववत् भवक्षयकारणत्वे पञ्चाक्षरमन्त्रस्य किं तद्वत् जगत्कारणत्वमपि इत्यत्रोच्यते – **पञ्चेति** । **सर्वाणि** समग्राणि **पञ्चभूतानि** पृथिव्यप्तेजोवाय्वाकाशात्मकानि; **पञ्चतन्मात्रकाणि** पञ्चभूतानां सूक्ष्मांशरूपाणि तन्मात्राणि इति कथ्यन्ते, तानि पृथिवीतन्मात्रम्, अप्-तन्मात्रम्, तेजोतन्मात्रम्, वायुतन्मात्रम्, आकाशतन्मात्रं चेति; **पञ्चापि** पञ्चसंख्यानि **ज्ञानेन्द्रियाणि** ज्ञानशक्तियुक्तानि, अत एव रूपादि ज्ञानं ग्रहीतुं योग्यानि, नासिकाचक्षूरसनाकर्णचर्माणि; **पञ्चकर्मेन्द्रियाणि** क्रियाशक्तियुक्तानि वाक्पाणिपादपायूपस्थरूपाणि पञ्च; **पञ्चब्रह्माणि** सद्योजातवामदेवाघोरतत्पुरुषेशानस्वरूपाणि पञ्च; एतानि शिवस्य पञ्चमुखानि; **पञ्चापि** पञ्च पुनः शिवस्य **कृत्यानि** सृष्टिस्थितिलयतिरोधानानुग्रहाख्यानि; **कारणैः सह** भवशर्वमृढरुद्रहरस्वरूपैः कारणेशैः सहितम्; एतानि **पञ्चाक्षरमहामनोः** पञ्चाक्षरमहामन्त्रस्य **पञ्चभिः वर्णैः** पञ्चभिः 'न-मः-शि-वा-य' इति वर्णैः **बोध्यानि** ज्ञेयानि, सङ्केतितानि इत्यर्थः ॥ सूक्ष्मागमोक्तिसंवादी चाऽयं विषयः । तथा हि – "सर्वाणि सर्वभूतानि तन्मात्राणां च पञ्चकम् । ज्ञानेन्द्रियाणि पञ्चापि तथा कर्मेन्द्रियाणि च ॥ पञ्चब्रह्माणि कृत्यानि पञ्च पञ्चात्मकानि च । तानि सर्वाणि बोध्यानि पञ्चवर्णैर्महामनोः ॥" (सू.आ., उ.भा., क्रि.पा., ४.५८-५९) । तत्र पञ्चब्रह्माणि आचारादिप्रसादान्तपञ्चलिङ्गानां स्वरूपाणीत्युक्तम् । तथा हि – "आचारलिङ्गमाख्यातं सद्योजातमुखात्मकम् । गुरुलिङ्गं तथा वामदेववक्त्रात्मकं भवेत् ॥ शिवलिङ्गं तथाऽघोरमुखरूपं भवेत्पुनः । चरलिङ्गं भवत्येव तत्पुरुषमुखात्मकम् ॥ प्रसादलिङ्गं कथितमीशानमुखसंज्ञकम् ॥ (महालिङ्गं तथाऽखण्डशिवरूपं प्रकीर्तितम्) ॥" (सू.आ., उ.भा., क्रि.पा., ३.२८-३०) । पञ्चकृत्यानि मृगेन्द्रे उक्तानि, यथा – "जगज्जन्मस्थितिध्वंसतिरोभावविमुक्तयः । कृत्यं सकारकफलं ज्ञेयमस्यैतदेव हि ॥" (मृ.आ., २.३) इति ॥१४-१५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चधा पञ्चधा यानि प्रसिद्धानि विशेषतः ।
तानि सर्वाणि वस्तूनि पञ्चाक्षरमयानि हि ॥१६॥

व्याख्या— पञ्चात्मकत्वेन विद्यमानानि सर्वाणि पञ्चाक्षरमयानीत्याह – **पञ्चधेति** । **पञ्चधा** पञ्च पञ्च प्रकारेण **यानि** यानि यानि **विशेषतः** सर्वाधिक्येन **प्रसिद्धानि** विश्रुतानि **तानि वस्तूनि** द्रव्यादीनि **पञ्चाक्षरमयानि** हि पञ्चाक्षरस्वरूपाणि, हि इति प्रसिद्धौ ॥ शैवागमोक्तविषयसंवादी अयं विषयः । तथा हि – "लोके हि पञ्चधा यानि प्रसिद्धानि विशेषतः । ज्ञेयानि तानि सर्वाणि पञ्चाक्षरमयानि हि ।" (सू.आ., उ.भा., क्रि.पा., ४.६०) इति ॥

ओंकारपूर्वो मन्त्रोऽयं पञ्चाक्षरमयः परः ।
शैवागमेषु वेदेषु षडक्षर इति स्मृतः ॥१७॥

व्याख्या— मन्त्रस्योंकारपूर्वकत्वम् अवश्यमित्याह – **ओंकारेति** । **अयम्** एषः **पञ्चाक्षरमयः** पञ्चाक्षरघटितः **मन्त्रः** मनुः **ओंकारपूर्वः** ओंकाराग्रः सन् **षडक्षर इति** षडक्षरात्मक इति **शैवागमेषु** शैवतन्त्रेषु **वेदेषु** यजुर्वेदादिषु **स्मृतः** स्मर्यते ॥ शैवागमेषु सूक्ष्मादिषु एतदुक्तम् – "एषा पञ्चाक्षरीविद्या प्रणवाद्या षडक्षरी" (पार.आ., ११-१२); "पञ्चाक्षरो महामन्त्रः प्रणवेन युतः शिवे । षडक्षर इति प्रोक्तो मन्त्रराजाह्वयः परः ॥" (सू.आ., उ.भा., क्रि.पा., ४.३५) । अ-उ-म-नाद-बिन्दुभिः पञ्चभिर्घटितत्वादोंकारोऽपि पञ्चाक्षरः इति पूर्वमुक्तम् । 'न-मः-शि-वा-य' इति पञ्चाक्षरमन्त्रस्य शिवस्य च यथा वाच्य-वाचकभावसम्बन्धः उक्तः तथा एव ओंकार-शिवयोरपि इत्युच्यते पारमेश्वरे, यथा – "शिवरुद्रादिशब्दानां प्रणवादिपरः स्मृतः । शम्भोः प्रणववाच्यस्य भावनात् तज्जपादपि ॥ या सिद्धिश्च परा प्राप्या भवत्येव न संशयः । तस्मादेकाक्षरं देवमाहुरागमवादिनः ॥ वाच्यवाचकयोरैक्यं मन्यमाना मनस्विनः ।" (पार.आ., ११.१३-१५) इति ॥ श्रीरुद्रे –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"नमस्ताराय नमः शम्भवे च" (तै.सं., ४.५.८), इत्यत्र तारशब्देन ओंकारः प्रोक्तः "शिवो मे अस्तु सदाशिवोम्" (तै.आ., ७.४७) इति ओंकारशब्देनैव प्रणवः प्रोक्तः ॥१७॥

मन्त्रस्यास्यादिभूतेन प्रणवेन महामनोः ।
प्रबोध्यते महादेवः केवलश्चित्सुखात्मकः ॥१८॥

व्याख्या— ओंकारस्य माहात्म्यमुक्तम् – **मन्त्रस्येति** । **अस्य मन्त्रस्य** एतस्य पञ्चाक्षरमन्त्रस्य, **महामनोः** महान् मन्त्र इति प्रसिद्धस्य **आदिभूतेन** आदौ विद्यमानेन **प्रणवेन** "सर्वान् प्राणान् प्रणामयति नामयति चैतस्मात्प्रणवः" इति अथर्वशिखोपनिषदुक्तरीत्या (अथ. शिखा., २) परमात्मनि प्रपत्तिं कारयति इति महत्साधनभूतेन प्रणवेन **केवलः** एकमेवाद्वितीयः **चित्सुखात्मकः** सच्चिदानन्दस्वरूपः **महादेवः** परमेश्वरः **प्रबोध्यते** विज्ञायते, साक्षात्कारविषयीक्रियते इत्यर्थः ॥ ओंकारपरमात्मनोरभेदमाहेयं श्रुतिः – "य ओंकारः स प्रणवो यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तो योऽनन्तस्तत्तारं यत्तारं तत्सूक्ष्मं यत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद् वैद्युतं यद् वैद्युतं तत्परं ब्रह्म स एकः स रुद्रः स ईशानः स भगवान् स महेश्वरः स महेश्वरः" (अथ.शिर.उ., ३) इति ॥१८॥

प्रणवेनैकवर्णेन परब्रह्म प्रकाश्यते ।
अद्वितीयं परानन्दं शिवाख्यं निष्प्रपञ्चकम् ॥१९॥

व्याख्या— प्रणवेन परब्रह्मदर्शनमाह – **प्रणवेनेति** । **प्रणवेन एकवर्णेन** 'प्रणवः' इत्यपरनामभाजा ओंकारात्मकेन एकवर्णेन **अद्वितीयं** न विद्यते द्वितीयं यस्य तत् अद्वितीयम्, "एकमेवाद्वितीयं ब्रह्म" इति श्रुतेः (छां.उ., ६.२.१), **परानन्दं** परमसुखस्वरूपं **निष्प्रपञ्चकम्** निर्गतः प्रपञ्चः यस्मात् तत् निष्प्रपञ्चम्, स्वार्थे कप्, निष्प्रपञ्चकम्, **शिवाख्यं** शिवनामभाजं **परब्रह्म** परं ब्रह्म **प्रकाश्यते** साक्षात्कारविषयतां नीयते ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"ओमित्यक्षरम् आदौ प्रयुक्तं ..... एतदक्षरं परं ब्रह्म" इति श्रुतिः (अथ.शिखा.उ.,१) ॥१९॥

परमात्ममनुर्ज्ञेयः सोऽहंरूपः सनातनः ।
जायते हसयोर्लोपाद् ओमित्येकाक्षरो मनुः ॥२०॥

व्याख्या— 'सोऽहं' स्वरूपोऽयं मन्त्र एव ओंकारत्वेन शिष्यते इत्याह – **परमात्मेति । परमात्ममनुः** परमात्मवाचको मन्त्रोऽयं **सनातनः** प्राचीनः, आद्यन्तरहितः **सोऽहं रूपः** स परमात्मा एव अहं अहंप्रत्यय-वेद्यः जीवात्मा, तयोरैक्यरूपः, लिङ्गाङ्गसामरस्यात्मकः इत्यर्थः । भवति इति शेषः । तस्मिन् 'सोऽहम्' पदे **हसयोः** हकारसकारयोर्लोपात् **ओमित्येकाक्षरः मनुः** 'ओम्' इति एकाक्षरात्मकः मन्त्रः **जायते** उत्पद्यते ॥ सो-इत्यत्र सकारलोपे 'ओ' इत्यक्षरमवशिष्यते, 'हं' इत्यत्र हकारलोपे बिन्दुमात्रम् (अनुस्वारः) अवशिष्यते, द्वयोर्मेलनेन 'ओं' इत्येकाक्षरो मनुर्जायते ॥ तदित्थम् – मनुष्यस्य निःश्वासोच्छ्वासौ दिने षट्शतोत्तरैकविंशतिसहस्रवारं प्रवर्तते । प्रक्रियायामस्याम् आत्मप्रसाद-स्वरूपो "हंसः" इति मन्त्रः प्राकृतप्राणायामत्वेन श्वासे सञ्चलति । स एव श्रुतिज्ञान-गुरूपदेश-स्वानुभवैः "सोऽहम्" इति वैकृतप्राणायामतां भजते। तत्र सकारस्य चन्द्रबीजत्वात् ज्ञेयस्वरूपत्वम्, हकारस्य च सूर्यबीजत्वात् ज्ञानरूपत्वम् । इन्द्रियवृत्त्युपाधिबीजभूतयोः सकार-हकारयोः कुम्भकप्राणायामक्रमेण परित्यागे सकारोत्तरस्य ओकारस्य हकारोत्तरस्य अनुस्वारस्य च मेलनेन "ओम्" इत्येकाक्षरमन्त्रः सञ्जायते । स एव प्रणवः प्रकाशश्चेति व्यवह्रियते । "प्राणान् सर्वान् परमात्मनि प्रणामयतीत्येतस्मात् प्रणवः" (अथ. शिखा. उ., १.१०) इति तस्य प्रणवत्वम् । "सर्वेभ्योऽन्तःस्थानेभ्यो ध्येयेभ्यः प्रदीपवत् प्रकाशयतीति प्रकाशः" (अथ. शिखा. उ., २.४) इति तस्य प्रकाशत्वम् ॥ स एव निष्प्रपञ्चब्रह्मवाचकः । तद्ध्यानेन शिवजीवैक्यस्वरूपिणी मुक्तिः प्राप्यते ॥२०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रणवेनैव मन्त्रेण बोध्यते निष्कलः शिवः ।
पञ्चाक्षरेण मन्त्रेण पञ्चब्रह्मतनुस्तथा ॥२१॥

निष्कलः संविदाकारः सकलो विश्वमूर्तितः ।
उभयात्मा शिवो मन्त्रे षडक्षरमये स्थितः ॥२२॥

व्याख्या— प्रणव-पञ्चाक्षर-षडक्षरमन्त्रैः शिवस्य निष्कलत्वं सकलत्वं सकल-निष्कलत्वं च द्योत्यन्ते इत्याह युग्मेन – **प्रणवेनेति** । **प्रणवेन मन्त्रेण एव** ओंकारस्वरूपेण मनुमात्रेण **निष्कलः** निरवयवः शुद्ध सच्चिदानन्दात्मकः **शिवः** परशिवः **बोध्यते** ज्ञायते । **तथा** तथैव **पञ्चाक्षरेण मन्त्रेण** पञ्चाक्षरात्मकेन मनुना **पञ्चब्रह्मतनुः** सद्योजातवामदेवाघोर तत्पुरुषेशानाख्यैः पञ्चब्रह्ममन्त्रैः घटितमन्त्रशरीरित्वात् पञ्चब्रह्मतनुः, पञ्चब्रह्माणः एव तनुः यस्य सः इति विग्रहात् । **निष्कलः** निरवयवः **संविदाकारः** शुद्धचित्स्वरूपः (शिवः) । **सकलः** सावयवः **विश्वमूर्तितः** विश्वं प्रपञ्च एव मूर्तिः आकारः यस्य सः, तस्मात्, पञ्चम्यर्थे तसिल् विश्वमूर्तिस्वरूपेण शिवः सकलः इत्यर्थः । **षडक्षरमये मन्त्रे** षडक्षर-घटिते मनौ **उभयात्मा शिवः** निष्कलसकलोभयात्मकः परमेश्वरः **स्थितः** तिष्ठति ॥ प्रणवः निष्कलात्मकशिवद्योतकः, पञ्चाक्षरः सकला-त्मकशिवद्योतकः षडक्षरश्च मन्त्रो निष्कलसकलोभयात्मकशिवद्योतकः इत्युक्तम् ॥२१-२२॥

मूलं विद्या शिवः शैवं सूत्रं पञ्चाक्षरस्तथा ।
एतानि नामधेयानि कीर्तितानि महामनोः ॥२३॥

व्याख्या— पञ्चाक्षरमहामनोः पर्यायनामानि उक्तानि– **मूलमिति**। **मूलं** सर्वमन्त्रमूलत्वात्, **विद्या** शुद्धविद्याप्रकाशकत्वात्, **शिवः** सर्वमङ्गल-प्रदत्वात्, **शैवं सूत्रं** शिवसम्बन्धिनां सर्वतत्त्वानां प्रकाशकत्वात्, **पञ्चाक्षरः** पञ्चाक्षरघटितत्त्वात्, इति **एतानि** पूर्वोक्तानि **महामनोः** पञ्चाक्षर-महामन्त्रस्य **नामधेयानि** पर्यायनामानि **कीर्तितानि** कथितानि ॥ शैवा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गमेष्वेतानि नामानि उक्तानि । तथा हि – "मूलं विद्या शिवः शैवं सूत्रं पञ्चाक्षरं तथा । षडक्षरं च तस्याहुर्नामानि मुनयो मनोः ॥" (पार.आ., ११.४४) इति; "मूलं विद्या शिवं चैव सूत्रं पञ्चाक्षरस्तथा ॥" (चं.आ., उ.भा., क्रि.पा., ८.१७) इति च ॥२३॥

पञ्चक्षरीमिमां विद्यां प्रणवेन षडक्षरीम् ।
जपेत् समाहितो भूत्वा शिवपूजापरायणः ॥२४॥

व्याख्या— पञ्चक्षरीजपः शिवपूजापरायणेभ्यो विधीयते – **पञ्चक्षरीमिति । शिवपूजापरायणः** शिवलिङ्गपूजायां परायणः मग्नो भक्तः, **समाहितो भूत्वा** एकाग्रचित्तो भूत्वा **प्रणवेन षडक्षरीं** ओंकारयोजनेन षडक्षरात्मिकां **इमां पञ्चाक्षरीं विद्यां** एतां पञ्चाक्षरात्मिकां विद्यां, पञ्चाक्षरमन्त्रं इति यावत्, **जपेत्** वाचिकत्वेन उच्चरेत् उपांशुरीत्या मन्दमुच्चरेत् मानसरीत्या वर्णरूपेण भावयेद् वा ॥२४॥

प्राणायामत्रयं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा ।
चिन्तयन् हृदयाम्भोजे देवदेवं त्रियम्बकम् ॥२५॥

सर्वालङ्कारसमायुक्तं साम्बं चन्द्रार्धशेखरम् ।
जपेदेतां महाविद्यां शिवरूपामनन्यधीः ॥२६॥

व्याख्या— कथं जपेदित्यत्राह – **प्राणायामेति** । (शुद्धे स्थले, मृगाजिनादिष्वेकतमे आसने) **प्राङ्मुखोदङ्मुखो अपि वा** पूर्वाभिमुखः उत्तराभिमुखोऽपि वा (उपविश्य) **प्राणायामत्रयं कृत्वा** त्रिवारं प्राणायामानां त्रयं, तद् विधाय, त्रिवारं प्राणायामं कृत्वेत्यर्थः, **हृदयाम्भोजे** हृदयमेव अम्भोजं, तस्मिन्, **सर्वालङ्कारसमायुक्तं** सर्वे च ते अलङ्काराश्च सर्वालङ्काराः सर्वभूषणानि, तैः समायुक्तं सम्यग् भूषितं **चन्द्रार्धशेखरं** चन्द्रस्य अर्धं, चन्द्रार्धं शेखरः यस्य सः चन्द्रार्धशेखरः, तम्, **साम्बम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अम्बया सह साम्बः, तम्, **देवदेवं** देवानां देवः, तम्, **त्रियम्बकं** त्रीणि अम्बकानि यस्य सः त्रियम्बकः, तम्, परमशिवं **चिन्तयन्** ध्यायन्, **एतां शिवरूपां** इमां शिवस्वरूपिणीं **महाविद्यां** महामन्त्रं **अनन्यधीः** विगलितवेद्यान्तरो भूत्वा **जपेत्** उच्चरेद् ध्यायेद् वा ॥ शैवागमेषु उक्तः जपक्रमः अस्य आधारः । तथा हि – "स्नानं कृत्वा शुचौ देशे बद्ध्वा रुचिरमासनम् । शङ्करं हृदि सञ्चिन्त्य स्वगुरुं तद्गुरुंस्तथा ॥ प्राङ्-मुखोदङ्मुखो वापि मौनी चैकाग्रमानसः । विशोध्य पञ्चतत्त्वानि दहनप्लावनादिभिः ॥ मन्त्रन्यासादिकं कृत्वा सकलीकृतविग्रहः । देवं देवीयुतं ध्यायेत् प्राणापानौ च नियम्य च ॥ विद्यां स्थानं स्वरं रूपं ऋषिं छन्दोऽधिदैवतम् । बीजं शक्तिं तथा वाच्यं स्मृत्वा पञ्चाक्षरं जपेत् ॥" (चं.आ., उ.भा., क्रि.पा., ८.५२-५५; पार.आ., ११.७९-८३–प्रथमश्लोकस्य उत्तरार्धे "शङ्करं हृदि सञ्चिन्त्य स्वगुरुं तद्गुरुंस्तथा" इत्यस्य स्थाने "शिवभक्त्या शिवं ध्यात्वा स्वगुरोः सन्निधौ हृदि" इति पाठान्तरम्) इति। "प्राणायामत्रयं कृत्वा" इत्यनेन सगर्भजपं ग्रन्थकृत् सूचयति । तदुक्तम् – "प्राणायामसमायुक्तः सगर्भो जप उच्यते । प्राणायामेन रहितो ह्यगर्भो जप उच्यते ॥" (चं.आ., उ.भा., क्रि.पा., ३.४०) इति । [तुलयत – "कुम्भकेन समायुक्तः सगर्भो जप उच्यते । आद्यन्तयोरगर्भोऽपि प्राणायामः प्रशस्यते ॥" (पार.आ., ११.८९)] जपक्रमः सूक्ष्मागमेऽप्युक्तः । तथा हि – "पद्मासने समासीनः प्राङ्मुखोदङ्मुखोऽपि वा । समकायशिरोग्रीवस्त्रपालस्यादिवर्जितः ॥" (सू.आ., उ.भा., क्रि.पा., ३.४०) ॥२५-२६॥

जपस्तु त्रिविधः प्रोक्तो वाचिकोपांशुमानसः ।
श्रूयते यस्तु पार्श्वस्थैर्यथावर्णसमन्वयम् ॥२७॥

वाचिकः स तु विज्ञेयः सर्वपाशप्रभञ्जनः ।
ईषत्स्पृष्ट्वाधरपुटं यो मन्दमभिधीयते ॥२८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पार्श्वस्थैरश्रुतः सोऽयमुपांशुः परिकीर्तितः ।
अस्पृष्ट्वाधरमस्पन्दिजिह्वाग्रं योऽन्तरात्मना ॥
भाव्यते वर्णरूपेण स मानस इति स्मृतः ॥२९॥

व्याख्या— जपभेदमाह श्लोकत्रयेण – **जपस्त्विति । वाचिकोपांशुमानसः** वाचिकः, उपांशुः, मानसः इति नामभिः प्रसिद्धः, **जपः तु** जपः तावत्, **त्रिविधः** त्रिप्रकारः **प्रोक्तः** कथितः । **यः तु** यः तावत् जपः **पार्श्वस्थैः** पार्श्वे समीपे स्थितैः जनैः **यथावर्णसमन्वयं** वर्णानां समन्वयः सम्यग्विन्यासः, वर्णसमन्वयम् अनतिक्रम्य यथावर्णसमन्वयं, क्रियाविशेषणमेतत्, **श्रूयते** आकर्ण्यते, **सः तु** तादृशः जपस्तु **वाचिकः** वाचिकः इति **विज्ञेयः** अवगन्तव्यः । स च **सर्वपाशप्रभञ्जनः** सर्वेषां पाशानां प्रभञ्जनः, पाशान् प्रकृष्टं भनक्ति इति, प्र+भञ्जो (आमर्दने) धातोः उणदि-युच् (उ.२.७८) योजनेन प्रभञ्जनः (प्र + भञ्ज् + यु = अन – "युवोरनाकौ" – पा.अ. ७.१.१) इति रूपम्, विनाशकः इत्यर्थः । **यः** यो जपः **ईषत्** किञ्चिदिव **अधरपुटं** दन्तच्छदयोः सन्धिभागं **स्पृष्ट्वा ।** स्पृशन् **पार्श्वस्थै** समीपे स्थितैः जनैः **अश्रुतः** अनाकर्णितः सन् **मन्दम्** अस्पष्टतया **अभिधीयते** उच्चार्यते **सोऽयं** तादृशः अयं जपः **उपांशुः** उपांशुः इति **प्रकीर्तितः** कथितः । **यः** यो जपः **अधरम् अस्पृष्ट्वा** रदच्छदम् अस्पृशन् **अस्पन्दिजिह्वाग्रं** स्पन्दनरहितं चलनरहितं जिह्वाग्रं रसनाग्रं यथा भवति तथा **वर्णरूपेण अन्तरात्मना** मन्त्रवर्णस्वरूपभाजा चित्तेन **भाव्यते** ध्यायते, **सः** तादृशी जपः **मानसः इति** मानसजपः इति **स्मृतः** ज्ञायते । जपत्रैविध्यस्य उल्लेखो मनुस्मृतौ २.८५ श्लोके दृश्यते ॥२७-२९॥

यावन्तः कर्मयज्ञाद्या व्रतदानतपांसि च ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥३०॥

व्याख्या— जपयज्ञस्य सर्वस्मात् श्रेष्ठत्वमाह – **यावन्त इति । कर्मयज्ञाद्याः** ज्योतिष्ठोमादि कर्मयज्ञाः **यावन्तः** यावत्संख्याकाः **सन्ति**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवन्ति, ते ते सर्वे **व्रतदानतपांसि च** व्रतं च दानं च तपश्च व्रतदानतपांसि च यावत्संख्याकानि भवन्ति, सर्वाणि तानि **जपयज्ञस्य** मन्त्रजपात्मकस्य यज्ञस्य **षोडशीं कलां** षोडशांसेषु एकांशेन समाना भवितुं **न अर्हन्ति** न पारयन्ति । अत्र मनुराह– "विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥" (मनु, २.८५) । मनुस्तान् कर्मयज्ञान् विधियज्ञनाम्ना व्यवहरति । दर्शपूर्णमासादयो विधियज्ञाः । जपयज्ञः सर्वेभ्यस्तेभ्य श्रेष्ठः इत्याह ॥३०॥

माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥३१॥

वाचिकात् तदुपांशोश्च जपादस्य महामनोः ।
मानसो हि जपः श्रेष्ठो घोरसंसारनाशकः ॥३२॥

व्याख्या— जपेषु त्रिविधेषु मानसजपः श्रेष्ठ इत्याह – **माहात्म्यम्** इति । **वाचिकास्य** वाचिकप्रकारस्य **एतज्जपयज्ञस्य** एतस्य जपयज्ञस्य **माहात्म्यं कीर्तितं** महत्ता वर्णिता । **तस्मात्** वाचिकजपयज्ञात् **उपांशुः** उपांशुजपः **शतगुणः** शतगुणम् अधिकः, **मानसः** मानसजपः तस्मादप्युपांशोः **सहस्रः** सहस्रगुणम् अधिकः । **अस्य महामनोः** अस्य महामन्त्रस्य **वाचिकात्** वाचिकजपात् **तदुपांशोश्च** तस्मादुपांशुजपादपि **घोरसंसारनाशकः** घोरस्य भयङ्करस्य संसारस्य जननमरणात्मकस्य चक्रस्य **नाशकः** ध्वंसकः **मानसो जपः** मनसि क्रियमाणं मन्त्रध्यानं **श्रेष्ठः** श्रेष्ठत्वं भजते । तदुक्तम् – "वरं स्यादुत्तरोत्तरम्" (सू.आ., उ.भा., क्रि.पा., ३.४३) इति ॥ चन्द्रज्ञानपारमेश्वरागमयोः वाचिकोपांशुमानसजपानां क्रमेण अधम-मध्यमोत्तमात्त्वेन परिगणनमस्ति । (चं.आ., उ.भा., क्रि.पा., ८.५६; पार.आ., ११.८३) । ग्रन्थेऽस्मिन् तत्प्रमाणस्य तार्किकपर्यवसानं दृश्यते । मनोधारणस्य अत्युत्कृष्टस्वरूपत्वात् मानसजपस्य श्रेष्ठत्वम् ॥३१-३२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एतेष्वेतेन विधिना यथाभावं यथाक्रमम् ।
जपेत् पञ्चाक्षरीमेतां विद्यां पाशविमुक्तये ॥३३॥

व्याख्या— एष विधिरेष च क्रमो जपस्येत्याह – एतेष्विति । **एतेषु** वाचिकोपांशुमानसजपसन्दर्भेषु **एतेन विधिना** उक्तेनानेन विधानेन **यथाभावं** भावम् अनतिक्रम्य, भक्त्युत्कर्षेण इति यावत्, **यथाक्रमम्**, क्रमम् अनतिक्रमम् उक्तक्रममनुसृत्य इति यावत्, **पाशविमुक्तये** पाशानां मलमायादिपाशानां विमुक्तिः, पाशविमुक्ति, तस्यै, पाशनिर्मुक्त्यर्थं **एतां** इमां **पञ्चाक्षरीं विद्यां जपेत्** पञ्चाक्षरघटितं मन्त्रम् उच्चारणक्रमेण ईषदधरपुटस्पर्शपूर्वकं मन्दक्रमेण वा मनोधारणस्वरूपेण ध्यानक्रमेण वा जपेत् ॥ मन्त्रजपे वर्णपदव्यत्यासो न करणीयः । मन्त्रत्वं तावद् वर्णपदक्रमे प्रतिष्ठितम् । क्रमभङ्गे मन्त्रत्वभङ्गः । "नमः शिवाय" इति मन्त्रः, "शिवाय नमः" इति केवलं वाक्यम्, अमन्त्रं तत् । अत एव "यथाक्रमम्" इत्युक्तम् । "यथाभावम्" इत्यत्र भावशब्दो भक्तिवाचकोऽवस्थावाचको वा । अवस्थावाचकत्वे मन्त्रस्य जपे आरम्भावस्था प्रौढावस्था परिणत्यवस्था चेति तिस्रः अवस्थाः भवन्ति । आरम्भावस्थावतां वाचिकजपः, प्रौढावस्थावताम् उपांशुजपः, परिणत्यवस्थावतां मानसजपश्चेति यथाभावत्वम् । पाशविमुक्तये इत्युक्तम् । आणवमलः, तिरोधायकशक्तिः, बिन्दुः, माया, कर्म चेति पञ्चपाशाः । "आत्मा मलावृतः सर्वज्ञत्वे किञ्चिज्ज्ञता यतः" (पौ.आ., पशुपटल, १२५); "कर्मादिर्योगे एतत्कृतिमनुकलिता रोधयित्री शक्तिः" (सि.सा.,६); बिन्दुर्नाम शिवस्य परिग्रहशक्तिः । कुण्डलिनी इति तस्य नामान्तरम् । तदुक्तम् – "लयादिभेदः प्रागुक्तो यदुपाधौ शिवस्य तु । स बिन्दुरिति मन्तव्यः सैव कुण्डलिनी मता । किञ्च रुद्राणवो येन बध्यन्ते यत्र वा स्थिताः । विमुच्यन्ते यतो वाऽयं स बिन्दुरिति गम्यताम् ॥" (पौ.आ., बिन्दुपटलम्, १-३) इति । "मयत्यस्माज्जगद्विश्वं माया तेन समीरिता ।" (पौ.आ., मायापटलः, १) । सा च "नित्यैका व्यापिनी वस्तुरूपा कर्माश्रया शिवा ।" (पौ.आ., मायापटलः, २) । "यद्भोज्यं भोजकं नैकं तस्मात्कर्मान्यदिष्यताम् ।"

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(पौ.आ., मायापटलः, ३३-३४) । एते खलु पञ्च पाशाः यैर्बध्यते पुरुषः । एष मन्त्रः पञ्चाक्षरः सर्वपाशविमोचकः ॥३३॥

अनेन मूलमन्त्रेण शिवलिङ्गं प्रपूजयेत् ।
नित्यं नियमसम्पन्नः प्रयतात्मा शिवात्मकः ॥३४॥

व्याख्या— शिवलिङ्गार्चने अस्यैव मन्त्रस्य जपः विहित इत्याह – **अनेनेति । नियमसम्पन्नः** नियमेन सदाचारसंहितारूपेण नियमेन सम्पन्नः युक्तः सन्, **प्रयतात्मा** प्रयतः शुद्धः आत्मा अन्तःकरणं यस्य सः, शुद्धान्तःकरणः सन्, **शिवात्मकः** शिवस्वरूपमापन्नः भस्म-रुद्राक्षादिशिव-चिह्नैः युक्तः सन् **अनेन मूलमन्त्रेण** एतेनैव पञ्चाक्षरात्मकेन मूलमन्त्रेण **शिवलिङ्गं** इष्टलिङ्गाख्यं शिवलिङ्गं **नित्यं** सदा **प्रपूजयेत्** प्रकर्षेण वैभवेन अर्चयेत् ॥ पञ्चाक्षरमन्त्रजपध्यानादिपूर्वकं लिङ्गपूजाकरणेन शिवत्व-सिद्धिरुक्तम् पारमेश्वरे – "शिवपञ्चाक्षरं जप्त्वा लिङ्गपूजां करोति यः। सोऽपि मानुषदेहस्थः शिव एव न संशयः ।" (पार.आ., १०-९७) इति। तत्फलमुक्तं सूक्ष्मचन्द्रज्ञानागमयोः – "षडक्षरेण मन्त्रेण भक्त्या परमया युतः । सम्यग् लिङ्गार्चनं कुर्यान्मत्समीपमवाप्नुयात् ॥" (सू.आ., उ.भा., क्रि.पा., ३.५५) इति; "यदिष्टलिङ्गं सम्पश्यन् वामहस्तस्थितं परम् । जपते तत्फलं वक्तुं न मया शक्यते गुरो ॥" (चं.आ., उ.भा., क्रि.पा., ८.७४) इति च ॥ (गुरो = बृहस्पते) । शिवात्मकः सन् इत्यत्र अयमाशयः – "नाऽशिवः शिवमभ्यस्येन्नाऽशिव शिवमर्चयेत् । नाऽशिवस्तु शिवं ध्याये-न्नाऽशिवः शिवमाप्नुयात् ॥" (चं.आ., उ.भा., क्रि.पा., ११.३८) ॥३४॥

भक्त्या पञ्चाक्षरेणैव यः शिवं सकृदर्चयेत् ।
सोऽपि गच्छेच्छिवस्थानं मन्त्रस्यास्यैव गौरवात् ॥३५॥

व्याख्या— सभक्ति पञ्चाक्षरमन्त्रजपस्य फलमाह – **भक्त्येति । यः** यो भक्तः **भक्त्या** भक्तिभावेन युक्तः सन् **पञ्चाक्षरेणैव** पञ्चाक्षरमन्त्रेणैव **शिवं** परशिवं **सकृत्** एकवारं **अर्चयेत्** पूजयेत् चेत्, **सः अपि** स भक्तोऽपि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अस्य मन्त्रस्य एतस्य मनोः **गौरवात्** वलात् **शिवस्थानं** शिवसन्निधिं **गच्छेत्** प्राप्नुयात् ॥ ३४- तममन्त्रस्य व्याख्यायाम् उदाहृता अगमोक्तीः पुनः परिभावयत ॥३५॥

अब्भक्षा वायुभक्षाश्च ये चान्ये व्रतचारिणः ।
तेषामेतैर्व्रतैर्नास्ति शिवलोकसमागमः ॥३६॥

व्याख्या— शिवलोकप्राप्तिः पञ्चाक्षरीजपेनैव नान्येन केनापि व्रतेन इत्याह – **अब्भक्षा इति । अब्भक्षाः** जलमेव आहारत्वेन स्वीक्रियमाणाः, **वायुभक्षाः च** वायुमात्रसेविनः च, **अन्ये च ये** इतरे च तादृशाः ये सन्ति ते, **व्रतकर्षिताः** व्रतैः कृशतां प्राप्ताः, **तेषां** तादृशानां **एतैः व्रतैः** एतादृशैः जलवायुभक्षणरूपैः व्रतैः **शिवलोकसमागमः** शिवलोकस्य समागमः, शिवलोकप्राप्तिः **नास्ति** न भवति ॥ चान्द्रायणादिव्रतपीडिताः शिवलोकं प्राप्तुं न शक्नुवन्ति इत्यर्थः ॥३६॥

तस्मात्तपांसि यज्ञाश्च व्रतानि नियमास्तथा ।
पञ्चाक्षरार्चनस्यैते कोट्यंशेनापि नो समाः ॥३७॥

व्याख्या— पञ्चाक्षरजपपूर्वकशिवलिङ्गार्चनस्य सर्वेऽपि व्रतादयो- लेशेनापि समत्वं भजन्ते इत्याह – **तस्मादिति । तस्मात्** उक्तकारणात् **तपांसि** पञ्चाग्न्यादितपश्चरणानि, **यज्ञाः** ज्योतिष्टोमादियज्ञाः, **व्रतानि** चान्द्रायणादिव्रतानि, **नियमा** नियताचाराः, एते एतादृशाः **पञ्चाक्षरार्चनस्य** पञ्चाक्षरजपपूर्वकपूजनस्य **कोट्यंशेनापि** कोट्यंशेषु एकांशेनापि **नो** न उ, न खलु **समाः** समानाः ॥३७॥

अशुद्धो वा विशुद्धो वा सकृत् पञ्चाक्षरेण यः ।
पूजयेत् पतितो वापि मुच्यते नात्र संशयः ॥३८॥

व्याख्या— अर्थवादमुखेन पञ्चाक्षरीमन्त्रमहत्त्वमाह – **अशुद्ध इतिं । अशुद्धो वा** अपवित्रो वा **विशुद्धो वा** पवित्रो वा **पतितो वा अपि** व्रतभ्रष्टो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वा अपि, **यः** यो मनुष्यः **सकृत्** एकवारमात्रं **पञ्चाक्षरेण** पञ्चाक्षरमन्त्रेण **पूजयेत्** शिवलिङ्गम् अर्चयेत् चेत् सः **मुच्यते** मुक्तिं प्राप्नोति; **अत्र** अस्मिन् विषये **संशयः** सन्देहः **न** भवति ॥ एतदेवान्यप्रकारेणोक्तम् – "शान्तो वा कुपितो वापि शुद्धो वाऽशुद्ध एव वा । विधिनापि विना वाऽपि शैवं पञ्चाक्षरं जपेत् ॥" इति; "अन्त्यजो वाऽधमो वापि मूर्खो वा पण्डितोऽपि वा । पञ्चाक्षरजपे निष्ठो मुच्यते पाशबन्धनात् ॥" इति च । (पार.आ., १०.८७; ११-२६) ॥३८॥

सकृदुच्चारमात्रेण पञ्चाक्षरमहामनोः ।
सर्वेषामपि जन्तूनां सर्वपापक्षयो भवेत् ॥३९॥

व्याख्या— पञ्चाक्षरस्य सकृदुच्चारमात्रेण सर्वपापक्षयमाह – **सकृ-दिति । पञ्चाक्षरमहामनोः** पञ्चाक्षरमहामन्त्रस्य **सकृदुच्चारमात्रेण** सकृद् एकवारम् **उच्चारमात्रेण** जपमात्रेण **सर्वेषामपि** सकलानाम् अपि **जन्तूनां** प्राणिनां **सर्वपापक्षयो** सर्वेषां पापानां क्षयः, सकलपापानां विनाशः **भवेत्** स्यात् ॥३९॥

अन्येऽपि बहवो मन्त्रा विद्यन्ते सकलागमे ।
भूयो भूयः समभ्यासात् पुरुषार्थप्रदायिनः ॥४०॥
एष मन्त्रो महाशक्तिरीश्वरप्रतिपादकः ।
सकृदुच्चारणादेव सर्वसिद्धिप्रदायकः ॥४१॥

व्याख्या— आगममूलेषु मन्त्रेषु बहुवारमुच्चारणे सिद्धिर्निहिता परन्तु पञ्चाक्षरमन्त्रे एव सकृदुच्चारणेनैव सिद्धिर्निश्चितेत्याह श्लोकद्वयेन – **अन्येऽपि** इत्यादि । **सकलागमे** सर्वेषु शैवागमेषु **अन्येऽपि** इतरे अपि **बहवः** भूयांसः **मन्त्राः** मनवः **विद्यन्ते** सन्ति । ते च **भूयो भूयः** पौनःपुन्येन **समभ्यासात्** पुनरावर्तनात् **पुरुषार्थप्रदायिनः** पुरुषार्थं मोक्षात्मकं सिद्धिं प्रदातुं शीलम् आसामिति, मोक्षदायकाः, भवन्तीति शेषः । **एष मन्त्रः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अयं पञ्चाक्षरात्मकमहामनुः **महाशक्तिः** महती शक्तिः यस्य सः, महाशक्तिमान् सन्, **ईश्वरप्रतिपादकः** महेश्वरं प्रतिपादयति बोधयति इति तथा; **सकृदुच्चारणादेव** एकवारम् उच्चारणमात्रेण **सर्वसिद्धिप्रदायकः** सर्वाश्च ताः सिद्धयश्च सर्वसिद्धयः, ताः प्रददाति इति तथा ॥ ओङ्कारपूर्वको पञ्चाक्षरमन्त्रः षडक्षरमन्त्र इति प्रसिद्धः । स एव प्रणवपञ्चाक्षरः । तस्य सकृदुच्चारणादेव सर्वसिद्धिः प्राप्यते । तदुक्तम् – "तस्मात् षडक्षरो मन्त्रः सर्वसिद्धिप्रदायकः । षडक्षरमयं देवं मां तु यो जपते भुवि ॥ तस्य मुक्तिः करस्था स्याद् वीरशैवरतस्य च ॥" (पार.आ., ११.२७-२८) ॥४०-४१॥

पञ्चाक्षरीं समुच्चार्य पुष्पं लिङ्गे विनिक्षिपेत् ।
यस्तस्य वाजपेयानां सहस्रफलमिष्यते ॥४२॥

व्याख्या— पञ्चाक्षरोच्चारणपूर्वकं लिङ्गस्य पुष्पार्चनेन महत्फलमाह – **पञ्चाक्षरीमिति ।** यः यो भक्तः **पञ्चाक्षरीं** पञ्चाक्षरमहामन्त्रं **समुच्चार्य** सम्यग् पठित्वा **लिङ्गे** शिवलिङ्गे **पुष्पं** कुसुमादिकं **विनिक्षिपेत्** विशेषेण समर्पयेत्, **तस्य** तादृशस्य भक्तस्य **वाजपेयानां** वाजपेयाख्ययागानां **सहस्रफलम् इष्यते** सहस्रगुणं फलम् निश्चितम् ॥ एवमेव अश्वमेधफलमुक्तं पारमेश्वरे – "पञ्चाक्षरमयीं विद्यां जपन्नेकाग्रमानसः । प्रणवं जापयामास शङ्करं सम्यगर्चयेत् । सोऽश्वमेधसहस्रस्य साधिकस्य महेश्वरि । लभते सुमहापुण्यं ज्ञानं शाङ्करमच्युतम् ॥" (पार.आ.,१२.५७-५८) इति ॥४२॥

अग्निहोत्रं त्रयो वेदाः यज्ञाश्च बहुदक्षिणाः ।
पञ्चाक्षरजपस्यैते कोट्यंशेनापि नो समाः ॥४३॥

व्याख्या— अग्निहोत्रादियज्ञाः पञ्चाक्षरस्य लेशमात्रेणापि नैव समानाः इत्याह – **अग्निहोत्रमिति । अग्निहोत्रं** सायं प्रातश्च क्रियमाणम् अग्निहोत्रं **त्रयो वेदाः** ऋग्वेदः, यजुर्वेदः, सामवेदश्चेति यज्ञाङ्गभूतास्त्रयो वेदाः, तेषाम् अध्ययनम् इति यावत्, **बहुदक्षिणाः** भूरिदक्षिणाः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बहुव्ययुक्ता इति यावत्, यज्ञाः च ज्योतिष्टोमादियज्ञाश्च, एते सर्वेऽप्येते **पञ्चाक्षरजपस्य** पञ्चाक्षरमहामन्त्रजपस्य **कोट्यंशेन अपि** कोट्यंशेषु एकतमेनापि **नो** न उ, न खलु, **समाः** समानाः ॥४३॥

पुरा सानन्दयोगीन्द्रः शिवज्ञानपरायणः ।
पञ्चाक्षरं समुच्चार्य नारकानुदतारयत् ॥४४॥

सिद्ध्या पञ्चाक्षरस्यास्य शतानन्दः पुरा मुनिः ।
नरकं स्वर्गमकरोत् सङ्गिरस्यापि पापिनः ॥४५॥

उपमन्युः पुरा योगी मन्त्रेणानेन सिद्धिमान् ।
लब्धवान् परमेशानाच्छैवशास्त्रप्रवक्तृताम् ॥४६॥

वसिष्ठवामदेवाद्या मुनयो मुक्तकिल्बिषाः ।
मन्त्रेणानेन संसिद्धा महातेजस्विनोऽभवन् ॥४७॥

व्याख्या— पञ्चाक्षरमन्त्रसिद्धिमतां दृष्टान्तान् उदाहृत्य तस्य महत्वं निरूप्यते – **पुरा इत्यादिश्लोकचतुष्टयेन । पुरा** बहोः कालात् पूर्वं **शिवज्ञानपरायणः** शिवस्य ज्ञाने तन्मयः **सानन्दयोगीन्द्रः** सानन्दो नाम तापसश्रेष्ठः **पञ्चाक्षरं** पञ्चाक्षरमन्त्रं **समुच्चार्य** पठित्वा **नारकान्** नरकवासिनः **उदतारयत्** समुदधारयत् । **पुरा** पूर्वस्मिन् काले **अस्य पञ्चाक्षरस्य** एतस्य पञ्चाक्षरमन्त्रस्य **सिद्ध्या** स्वायत्तीकरणद्वारा **शतानन्दः** शतानन्दो नाम **मुनिः पापिनः** पातकिनः **सङ्गिरस्य** सङ्गिराख्यस्य पुरुषस्य **नरकम् अपि** नरकात्मकं लोकमपि **स्वर्गम् अकरोत्** स्वर्गत्वेन पर्यवर्तयत् ॥ **पुरा** पुनः पुरातने काले **उपमन्युः** उपमन्युः नाम **योगी** मुनिः **अनेन मन्त्रेण** एतेन पञ्चाक्षरात्मकेन मनुना **सिद्धिमान्** सिद्धिं प्राप्तवान् सन् **परमेशानात्** परमेश्वरात् **शैवशास्त्रप्रवक्तृताम्** शैवं च तत् शास्त्रं च शैवशास्त्रं शिवसम्बन्धिनी धर्मसंहिता, शैवशास्त्रस्य प्रवक्ता

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रतिपादकः शैवशास्त्रप्रवक्ता, तस्य भावः शैवशास्त्रप्रवक्तृता, ताम्, **लब्धवान्** प्राप्तवान् । **मुक्तकिल्बिषाः** मुक्ताः किल्बिषाः येषां ते, तादृशाः सन्तः, **वसिष्ठवामदेवाद्याः मुनयः** वसिष्ठवामदेवादयः योगिनः, **अनेन मन्त्रेण** एतेन पञ्चाक्षरमन्त्रेण **संसिद्धाः** संसिद्धिं प्राप्तवन्तः **महतेजस्विनः अभवन्** महता प्रभावेन, शापानुग्रहसामर्थ्ययुक्तेन तेजसा प्रभावेण युक्ता बभूवुः ॥४४-४७॥

ब्रह्मादीनां च देवानां जगत्सृष्ट्यादिकर्मणि ।
मन्त्रस्यास्यैव माहात्म्यात् सामर्थ्यमुपजायते ॥४८॥

व्याख्या— मन्त्रस्यास्यैव प्रभावेण देवा अपि जगत्सृष्ट्यादिसमर्था अभवन्नित्याह — **ब्रह्मादीनामिति** । **ब्रह्मादीनां च** ब्रह्मप्रभृतीनां च **देवानाम्** अमराणां **मन्त्रस्य अस्यैव** एतस्यैव पञ्चाक्षरमन्त्रस्य **माहात्म्यात्** प्रभावात् **जगत्सृष्ट्यादिकर्मणि** जगतः सृष्ट्यादिकर्म, तस्मिन् जगत्सृष्ट्यादिकार्ये **सामर्थ्यं** पाटवम् **उपजायते** उत्पद्यते ॥४८॥

किमिह बहुभिरुक्तैर्मन्त्रमेवं महात्मा
प्रणवसहितमादौ यस्तु पञ्चाक्षराख्यम् ।
जपति परमभक्त्या पूजयन् देवदेवं
स गतदुरितबन्धो मोक्षलक्ष्मीं प्रयाति ॥४९॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ पञ्चाक्षरी-जपस्थलप्रसङ्गो नाम अष्टमः परिच्छेदः समाप्तः ॥८॥

व्याख्या— प्रणवपञ्चाक्षरीमन्त्रजपेन मोक्षरूपपरमपदप्राप्तौ किमुक्तेन बहुना तन्महिम्ना इत्याह — **किमिति** । **इह** अस्मिन् सन्दर्भे **बहुभिः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भूयोभिः **उक्तैः** वचनैः **किं प्रयोजनम्** किम्? किमपि प्रयोजनं नास्ती-त्यर्थः । **महात्मा** महान् आत्मा **यः** यो भक्तः **एवम्** अनया रीत्या आदौ आरम्भे **प्रणवसहितं** प्रणवेन ओङ्कारेण सहितं युक्तं **पञ्चाक्षराख्यं** पञ्चा-क्षरनामभाजं **मन्त्रं** मनुं **परमभक्त्या** परमया भक्त्या अत्युत्कटभक्तिभावेन **देवदेवं** देवानामपि देवं परमेश्वरं **पूजयन्** अर्चयन् **जपति** जपं करोति चेत् **सः** स भक्तः **गतदुरितबन्धः** दुरितानां बन्धः दुरितबन्धः पापानां बन्धनम्, गतः दुरितबन्धः यस्मात् सः, तादृशः सन् **मोक्षलक्ष्मीं** मोक्ष-लक्षणां लक्ष्मीं सम्पदं **प्रयाति** प्राप्नोति ॥ प्रणवपञ्चाक्षरीजपात् पूर्वं तन्महामन्त्रन्यासाः करणीयत्वेन विहिताः । आदौ श्रीपञ्चाक्षरमहामन्त्रस्य ऋष्यादयः शिरसा आरभ्य पादपर्यन्तेषु स्थानेषु न्यस्येत् । तत्र क्रमः –

"ओम् अस्य श्रीपञ्चाक्षरमहामन्त्रस्य वामदेवः ऋषिः (शिरसि), पङ्क्तिः छन्दः (मुखे), श्रीसदाशिवो देवता (हृदये), ओं बीजम् उमा शक्तिः (गुह्ये), शिवः इति कीलकम् (पादयोः) । श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः ।"

अनन्तरं करन्यासः, देहन्यासः, अङ्गन्यासश्चेति न्यासत्रयं करणीयम् । तत्र त्रयः क्रमाः उक्ताः सृष्टिन्यासक्रमः, स्थितिन्यासक्रमः, संहारन्यास-क्रमश्चेति । प्रथमः क्रमः ब्रह्मचारिणाम्, द्वितीयः गृहस्थानाम्, तृतीयश्च वानप्रस्थीनां संन्यासिनां च । **तत्र सृष्टिन्यासक्रमेण न्यासत्रयं यथा –**

करन्यासः

ओं यं ओं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः ।

ओं वां ओं नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः ।

ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः ।

ओं मं ओं स्वतन्त्रशक्तिधाम्ने अनामिकाभ्यां नमः ।

ओं नं ओं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः ।

ओं ओं ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहन्यासः

ओं यं ओं ईशानाय नमः – (शिरसि)।
ओं वां ओं तत्पुरुषाय नमः – (मुखे)।
ओं शिं ओं अघोराय नमः – (हृदये)।
ओं मं ओं वामदेवाय नमः – (गुह्ये)।
ओं नं ओं सद्योजाताय नमः – (पादद्वये)।
ओं ओं ओं प्रणवाय नमः – (सर्वाङ्गे)॥

अङ्गन्यासः

ओं यं ओं सर्वज्ञशक्तिधाम्ने हृदयाय नमः।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने शिरसे स्वाहा।
ओं शिं ओं अनादिबोधशक्तिधाम्ने शिखायै वषट्।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने कवचाय हुम्।
ओं नं ओं अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट्।
ओं ओं ओं अनन्तशक्तिधाम्ने अस्त्राय फट्॥

भूर्भुवस्सुवरोमिति दिग्बन्धः।

स्थितिन्यासक्रमे न्यासत्रयं यथा –

करन्यासः

ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने अनामिकाभ्यां नमः।
ओं यं ओं सर्वज्ञशक्तिधाम्ने कनिष्ठिकाभ्यां नमः।
ओं नं ओं अलुप्तशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने तर्जनीभ्यां नमः।
ओं ओं ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहन्यासः

ओं शिं ओं अघोराय नमः – (हृदये)।
ओं वं ओं वामदेवाय नमः – (गुह्ये)।
ओं यं ओं सद्योजाताय नमः – (पादद्वये)।
ओं नं ओं ईशानाय नमः – (शिरसि)।
ओं मं ओं तत्पुरुषाय नमः – (मुखे)।
ओं ओं ओं प्रणवाय नमः – (सर्वाङ्गे)।

अङ्गन्यासः

ओं शिं ओं अनादिबोधशक्तिधाम्ने कवचाय हुम्।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने नेत्रत्रयाय वौषट्।
ओं यं ओं सर्वज्ञशक्तिधाम्ने अस्त्राय फट्।
ओं नं ओं अलुप्तशक्तिधाम्ने हृदयाय नमः।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने शिरसे स्वाहा।
ओं ओं ओं अनन्तशक्तिधाम्ने शिखायै वषट्।

भूर्भुवस्सुवरोमिति दिग्बन्धः।

संहारन्यासक्रमेण न्यासत्रयं यथा –

करन्यासः

ओं नं ओं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने अनामिकाभ्यां नमः।
ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः।
ओं यं ओं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः।
ओं ओं ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहन्यासः

ओं नं ओं सद्योजाताय नमः – (पादद्वये)।
ओं मं ओं वामदेवाय नमः – (गुह्ये)।
ओं शिं ओं अघोराय नमः – (हृदये)।
ओं वां ओं तत्पुरुषाय नमः – (मुखे)।
ओं यं ओं ईशानाय नमः – (शिरसि)।
ओं ओं ओं प्रणवाय नमः – (सर्वाङ्गे)॥

अङ्गन्यासः

ओं नं ओं अलुप्तशक्तिधाम्ने अस्त्राय फट्।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने नेत्रत्रयाय वौषट्।
ओं शिं ओं अनादिबोधशक्तिधाम्ने कवचाय हुम्।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने शिखायै वौषट्।
ओं यं ओं सर्वज्ञशक्तिधाम्ने शिरसे स्वाहा।
ओं ओं ओं अनन्तशक्तिधाम्ने हृदयाय नमः।

भूर्भुवस्सुवरोमिति दिग्बन्धः।

अत्र श्लोके "किमिह" इत्यादौ मालिनी नाम च्छन्दः। तच्च प्रतिपादं पञ्चदशवर्णात्मकम्। प्रथपरिच्छेदान्ते तल्लक्षणमुक्तम् ॥४९॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
अष्टमः परिच्छेदः समाप्तः ॥८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नवमः परिच्छेदः

भक्तमार्गक्रियोभयत्रिविधसंपत्तिचतुर्विधसारायदानत्रयस्थलप्रसङ्गः

व्याख्या— अथेष्टलिङ्गं गुरोः सकाशात् सम्प्राप्य भस्मरुद्राक्ष-धारणसम्पन्नस्य पञ्चाक्षरमहामन्त्रजपकृतो भक्तस्य भक्तमार्गक्रिया-स्थलादीनां चतुर्णां भक्तस्थलान्तर्गतानामङ्गस्थलानां निरूपणाय ग्रन्थकृता नवमः परिच्छेद आरभ्यते । तत्र प्रथमं भक्तमार्गक्रियास्थलम् आरब्धम् –
श्रीरेणुक उवाच –

१. अथ भक्तमार्गक्रियास्थलम् – (१)

भूतिरुद्राक्षसंयुक्तो लिङ्गधारी सदाशिवः ।
पञ्चाक्षरजपोद्योगी शिवभक्त इति स्मृतः ॥१॥

व्याख्या— भक्तमार्गक्रियास्थलनिरूपणोपोद्धातत्वेन पूर्वोक्तं स्मर्यते – **भूतिरुद्राक्षसंयुक्त इति । भूतिरुद्राक्षसंयुक्तः** भूतिश्च रुद्राक्षं च भूतिरुद्राक्षे ताभ्यां संपन्नः, भूतिरुद्राक्षधारणसम्पन्नः **लिङ्गधारी** लिङ्गं धर्तुं शीलम् अस्येति, ताच्छील्ये णिनिः, लिङ्गधारणसम्पन्नः **सदाशिवः** सर्वदा पवित्रः **पञ्चाक्षरजपोद्योगी** पञ्चाक्षरजपनिरतः सन् **शिवभक्तः इति** शिवभक्तिसम्पन्न इति **स्मृतः** ज्ञायते ॥ भक्तमार्गे क्रियमाणा-न्याचरणानि अगस्त्याय प्रतिपादयितुमिच्छुः श्रीरेणुको विभूतिरुद्राक्ष-धारणेन लिङ्गधारणेन च पवित्रीकृतशरीरो भक्तः पञ्चाक्षरमन्त्रजपेन माहात्म्यं सम्पाद्य भक्तमार्गक्रियायै अर्हतां प्राप्तवान् इत्यभिप्रायमत्र व्यनक्ति ॥१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रवणं कीर्तनं शम्भोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥२॥

एवं नवविधा भक्तिः प्रोक्ता देवेन शम्भुना ।
दुर्लभा पापिनां लोके सुलभा पुण्यकर्मणाम् ॥३॥

व्याख्या— नवविधत्वेन प्रसिद्धां भक्तिमाह – **श्रवणमित्यादिना । शम्भोः** शिवस्य **श्रवणं** कथानाम् आकर्णनम्, **कीर्तनं** स्त्रोत्राणां गानम्, **स्मरणं** माहात्म्यध्यानम्, **पादसेवनं** पादसंवाहनादिसेवाकरणम्, **अर्चनं** पूजाकरणम्, **वन्दनं** नमनम्, **दास्यं** दासभावः, **सख्यं** स्नेहभावः, **आत्म-निवेदनं** स्वात्मसमर्पणम्, **एवम्** अनया रीत्या **देवेन शम्भुना** महादेवेन परमेश्वरेण **भक्तिः** देवविषयिणी रतिः **नवविधा** नवप्रकारा इति **प्रोक्ता** कथिता ॥ **लोके** जगति एषा तु **पापिनां** पापयुक्तानां **दुर्लभा** लब्धुमसुलभा **पुण्यकर्मणां** पुण्यकर्मवतां **सुलभा** अक्लेशेन लब्धुं शक्या ॥ नवविध-भक्तिषु श्रवणादिसप्तभक्तयोऽन्तिमयोर्द्वयोः सख्यात्मनिवेदनाख्ययोः भक्त्योः साधनभूता भवन्ति । आत्मनिवेदनं तूत्कृष्टतमा भक्तिः, सर्वासां भक्तीनां पर्यवसानभूता च । ताभिर्द्वैतभावो निष्कास्यते नितराम् अद्वैतभावश्च जायते ॥२-३॥

अधमे चोत्तमे वापि यत्र कुत्रचिदूर्जिता ।
वर्तते शाङ्करी भक्तिः स भक्त इति गीयते ॥४॥

भक्तिः स्थिरीकृता यस्मिन् म्लेच्छे वा द्विजसत्तमे ।
शम्भोः प्रियः स विप्रश्च न विप्रो भक्तिवर्जितः ॥५॥

व्याख्या— भक्तिशालिनः क्व जातिकल्पना इत्याह – **अधमे इति । अधमे** वर्णतः हीने **वाऽपि च** अथवा **उत्तमे** वर्णतः अधिके **यत्र कुत्रचिद् ऊर्जिता** यस्मात्कस्मादपि ऊर्जिता उत्पद्यमाना यस्मिन् **शाङ्करी भक्तिः** शिवसम्बन्धिनी भक्तिः **वर्तते** विद्यते **सः भक्तः** तादृशः पुरुषः भक्तः इति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भक्तोऽयमिति **गीयते** प्रशंस्यते ॥ **म्लेच्छे वा** सर्वाचारविहीने हीनकुलजे अथवा **द्विजसत्तमे** ब्रह्मणश्रेष्ठे **यस्मिन्** यस्मिन् कस्मिन्नपि पुरुषे **भक्तिः स्थिरीकृता** शिवे प्रीतिर्दृढतां गता **सः विप्रः** स एव विप्रः । विशेषेण प्राति पूरयति षट्कर्माणि इति विप्रः । यजनम्, याजनम्, अध्ययनम्, अध्यापनम्, दानम्, परिग्रहश्चेति षट्कर्माणि । अत्र शिवभक्तिस्थिरतया विप्रत्वम्। **शम्भोः प्रियः** शिवस्य प्रीतिभाजनः; **भक्तिवर्जितः** भक्तिरहितः **विप्रश्च** ब्राह्मणोऽपि **न प्रियः** न भवति प्रीतिभाजनः ॥ भक्त्या विप्रः, न तु जन्मना ॥४-५॥

सा भक्तिर्द्विविधा ज्ञेया बाह्याभ्यन्तरभेदतः ।
बाह्या स्थूलाऽऽन्तरा सूक्ष्मा वीरमाहेश्वरादृता ॥६॥

व्याख्या— भक्तेः द्वैविध्यमाह – **सा इति । सा भक्तिः** सा ईश्वरप्रीतिः, **बाह्याभ्यन्तरभेदतः** बाह्यभक्तिः आभ्यन्तरभक्तिश्चेति भेदवशात् **द्विविधा ज्ञेया** द्विप्रकारत्वेन अवगम्यमाना । **बाह्या** तत्र बाह्यभक्तिः **स्थूला** वहिरिन्द्रियगोचरा, **आन्तरा** आभ्यन्तरा **सूक्ष्मा** अन्तरिन्द्रियमात्रगोचरा । उभयप्रकाराऽपि भक्तिः **वीरमाहेश्वरादृता** वीरमाहेश्वरैरादृता, आदरेण स्वीकृता ॥ बाह्यभक्तिः लिङ्गार्चनरूपा बाह्यपूजात्मिका, आन्तरभक्तिश्च शिवयोगात्मिका ॥६॥

सिंहासने शुद्धदेशे सुरम्ये रत्नचित्रिते ।
शिवलिङ्गस्य पूजा या सा बाह्या भक्तिरुच्यते ॥७॥

व्याख्या— तत्र बाह्यभक्तिमाह – **सिंहासने** इति । **सुरम्ये** अत्यन्तमनोहरे, **शुद्धदेशे** परिशुद्धस्थाने **रत्नचित्रिते** रत्नैश्चित्रीकृतभासुरे **सिंहासने** नृपासनसदृशे आसने **शिवलिङ्गस्य** इष्टलिङ्गस्य **या पूजा** यादृशी अर्चा **सा** तादृशी **बाह्या भक्तिः** बाह्ये क्रियमाणा भक्तिः इति **उच्यते** कथ्यते । अत्र बहिरासने लिङ्गपूजा करणीयत्वेन उक्ता । "बाह्यपीठा-र्चनादेतत् करपीठार्चनं वरम्" इत्युक्तरीत्या वामकरपीठे इष्टलिङ्गं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विन्यस्याऽभिषेकादिभिरुपचारैः तल्लिङ्गपूजनं करणीयम् । अत्र वैभव-प्रदर्शकपूजामेव बाह्यभक्तित्वेन निर्दिश्यते । इष्टलिङ्गपूजायामपि अन्त-र्लिङ्गानुसन्धानं विद्यते, अतः तस्याः पूर्णतया बाह्यभक्तित्वेन व्यवहारो युज्यते वा न वेति विचारणीयम् ॥७॥

लिङ्गे प्राणं समाधाय प्राणे लिङ्गं तु शाम्भवम् ।
स्वस्थं मनस्तथा कृत्वा न किञ्चिञ्चिन्तयेद्यदि ॥८॥

साऽऽभ्यन्तरा भक्तिरिति प्रोच्यते शिवयोगिभिः ।
सा यस्मिन् वर्तते तस्य जीवनं भ्रष्टबीजवत् ॥९॥

व्याख्या— आभ्यन्तराख्यां भक्तिं प्रतिपादयति – **लिङ्गे इत्यादि श्लोकद्वयेन । लिङ्गे** स्वेष्टलिङ्गे **प्राणं** जीवकलां **समाधाय** विनिवेश्य **प्राणे** जीवकलायां च **शाम्भवं लिङ्गं** शिवलिङ्गं प्राणलिङ्गात्मिकां शिवकलां समाधाय विनिवेश्य **मनः** स्वचित्तं **स्वस्थं कृत्वा** स्वस्मिन् तिष्ठतीति स्व + स्था + क (अ) "आतोऽनुपसर्गे कः" (पा.३.२.३) = स्वस्थम्, प्रसन्नम् इति यावत्, मनः प्रसन्नं कृत्वा **यदि किञ्चित् न चिन्तयेत्** किञ्चिदपि न विचारयेत् चेत् **साऽऽभ्यन्तरा भक्तिः** साऽऽन्तरा शिवभक्तिरिति **शिवयोगिभिः** शिवयोगसम्पन्नैः **प्रोच्यते** प्रशंस्यते । **यस्मिन्** यस्मिन् भक्ते **सा** सा भक्तिरान्तरा **वर्तते** विद्यते **तस्य** तादृशस्य भक्तस्य **जीवनं** जीवितं **भ्रष्टबीजवत्** भ्रष्टं च तत् बीजं च भ्रष्टबीजं ध्वस्तबीजं तद्वत् तत्सदृशम् ॥ यथा भ्रष्टबीजं नाऽङ्कुराय तथाऽऽभ्यन्तरभक्तिमतः जीवितं न पुनर्भवाय कल्पते । पूर्वजन्मकृतात् पुण्यसंस्कारवशादेव बाह्या वाऽऽभ्यन्तरा वा भक्तिर्जायते । तया परमात्मनि निष्ठां समाचरेदिति पारमेश्वरे । तथा हि – "बाह्ये चाभ्यन्तरे वाऽत्र यदि स्यान्मनसो रतिः । प्राग्वासनावशादेव शिवे निष्ठां समाचरेत् ॥" (पार.आ., १२-२०) इति । बाह्यभक्त्यपेक्ष-याऽऽभ्यन्तरभक्तेः शतगुणाधिक्यमुक्तं तत्रैव । तथा हि – "बाह्यादाभ्य-न्तरं श्रेष्ठं भवेच्छतगुणाधिकम् ।" (पार.आ., १२-२१) इति । स्वेष्टलिङ्गे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दृष्टियोगद्वारा अन्तर्मुखो भूत्वा प्राणलिङ्गभावलिङ्गे निध्यायन् शिवयोगी तामाभ्यन्तरां भक्तिं साधयन् कृतकृत्यो भवति । तदुक्तम् – "पूजयन्निष्टलिङ्गं तु निध्यायन् प्राणलिङ्गकम् । भावयन् भावलिङ्गं वै मृत्युपाशांश्छिनत्ति सः ॥" (चं.आ., उ.भा., क्रि.पा., ६.४६-४७) इति । "भावप्राणेष्टलिङ्गानि पूजयेदेकभावतः । पृथग्भावं न कुर्वीत प्राणलिङ्गपरो यतः ॥" (सू.आ., उ.भा., क्रि.पा., ६.४४) इति लिङ्गसमन्वस्यैव पूजनीयत्वेन विहितत्वात् येयमाभ्यन्तरभक्तिरित्युच्यते सा प्राणलिङ्गभावलिङ्गानुसन्धानपूर्वकम् अन्तर्मुखीभूतेन योगिना अन्तर्ज्योतिस्वरूपस्य स्वेष्टलिङ्गच्छायाभूतस्य प्राणलिङ्गस्य भाववस्तुभिः पूजनमेव नान्यदित्यवगन्तव्यम् । द्वयोर्भक्त्योः केवलं दशाभेद एव, न तु प्रकारभेदः । तयोर्ग्रन्थकृता प्रकारभेदवन्निरूपणं स्वरूपवैशद्याय ॥८-९॥

बहुनात्र किमुक्तेन गुह्यात् गुह्यतरा परा ।
शिवभक्तिर्न सन्देहस्तया युक्तो विमुच्यते ॥१०॥

व्याख्या— भक्त्यैव मुक्तिर्न चान्यथा इत्याह – **बहुनात्रेति** । **अत्र** अस्मिन् विषये **बहुधा** भूयसा **उक्तेन** कथनेन **किं** किं प्रयोजनम्, न किमपि प्रयोजनमित्यर्थः । **गुह्यात्** रहस्यादपि **गुह्यतरा** रहस्यतरा सा **परा शिवभक्तिः** श्रेष्ठा शम्भुभक्तिः । **न सन्देहः** अस्मिन् विषये संशयः कोऽपि नास्ति । **तया** भक्त्या तादृश्या **युक्तः** सहितः **विमुच्यते** मुक्तिं प्राप्नोति ॥१०॥

प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः ।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः ॥११॥

व्याख्या— भक्तिशिवप्रसादयोः बीजाङ्कुरन्यायेन सम्बन्धमाह – **प्रसादादिति** । **प्रसादाद् एव** शिवप्रसादात् शिवानुग्रहाद् एव, **सा भक्तिः** तादृशी भक्तिः, भवतीति शेषः, **प्रसादः** शिवप्रसादः **भक्तिसम्भवः** भक्त्या सम्भवतीति भक्तिसम्भवः, भक्तिवशात् सम्भवतीत्यर्थः । तत्र

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दृष्टान्तः – **यथा एव** यया रीत्या एव **अङ्कुरतः** अङ्कुरात्, "अङ्कुरोऽभिनवोद्भिदि" (अमर., २.५४), **बीजं** वृक्षकारणभूतं बीजम्, **यथा वा** यया रीत्या वा **बीजतः** बीजात् **अङ्कुरः** अभिनवोद्भेदः ॥ यथा अङ्कुरात् बीजं बीजाच्च पुनरङ्कुरः सम्भवति तथा शिवप्रसादात् भक्तिः, भक्त्या च शिवप्रसादः सम्भवतीत्यर्थः । अत्र अन्योन्याश्रयदोषो नाऽऽपादनीयः, जन्मत एव शुकवत् पुण्यशेषस्य कस्यचन शिवप्रसादः सिद्ध्यति, अन्येषां बहूनां तु पुण्यकर्मवशात् भक्तिः, भक्त्या च शिवप्रसादः, इति वक्तुं शक्यत्वात् । प्रसादादेव सा भक्तिः, प्रसादः भक्तिसम्भवः इत्यस्याऽऽगामिनि श्लोकद्वये विशदीकरणं क्रियते ग्रन्थकृता । [श्लोकोऽयं "नीनोलियित्ते पुण्य नीनोल्लदुदे पाप" इत्यदिकन्नडवचने स्वीये बसवेश्वरेण उद्धृतः (पश्यत – बसवण्णनवर वचनगळु, सं॥ डा. आर्.सि. हिरेमठ, क.वि.वि., धारवाड, १९६८, पृ.१९९, व.सं., ५०५) । वचने "प्रसादादेव सा भक्ति" इत्यस्य "प्रसादाद्देवताभक्तिः" इति पाठान्तरम्] ॥११॥

प्रसादपूर्विका येयं भक्तिर्मुक्तिविधायिनी ।
नैव सा शक्यते प्राप्तुं नरैरेकेन जन्मना ॥१२॥

व्याख्या— अतो भक्तिरेकेन जन्मना न लभ्यते इत्याह – **प्रसादपूर्विकेति** । **येयं** या इयं पूर्वोक्ता **मुक्तिविधायिनी** मोक्षप्रदायिनी **भक्तिः** शिवभक्तिः **सा** तादृशी शिवसम्बन्धिनी **नरैः** प्राकृतजनैः **एकेन जन्मना** एव एकेन जीवितकालेन **प्राप्तुं** लब्धुं **नैव शक्यते** न खलु पार्यते । शिवप्रसादं विना भक्तिर्न जायते । अनेकजन्मकृतपुण्यवशात् शिवः प्रसीदति । तदा एव भक्तिसंभवः ॥१२॥

अनेकजन्मशुद्धानां श्रौतस्मार्तानुवर्तिनाम् ।
विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः ॥१३॥

व्याख्या— एकेन जन्मनैव तादृशः प्रसादो न लभ्यते इत्याह – **अनेकजन्मशुद्धानामिति** । **अनेकजन्मशुद्धानाम्** अनेकेषु जन्मसु शुद्धानाम्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अनेकजन्मसु कृतसत्कर्मवशात् परिशुद्धचित्तानाम् इत्यर्थः, **श्रौतस्मार्तानुवर्तिनां** श्रुत्युक्तं श्रौतं स्मृत्युक्तं स्मार्तं, श्रौतं च स्मार्तं च श्रौतस्मार्ते, कर्मणी इति शेषः, ते अनुवर्तितुं शीलम् आसाम् इति श्रौतस्मार्तानुवर्तिनः, तेषाम्, **विरक्तानां** वैराग्यसम्पन्नानां **प्रवुद्धानां** सुज्ञानवतां **महेश्वरः** परमेश्वरः **प्रसीदति** अनुगृह्णाति ॥ एतादृशानां जन्मतः परिशुद्धयोगिनां शिवप्रसादः अस्मिन् जन्मन्येव लभ्यते । तत्प्रसादात् तेषाम् एकेन जन्मनैव शिंवभक्तिर्भवति ॥१३॥

प्रसन्ने सति मुक्तोऽभून्मुक्तः शिवसमो भवेत् ।
अल्पभक्त्यापि यो मर्त्यस्तस्य जन्मत्रयात्परम् ॥१४॥

व्याख्या— भक्तिस्तु जायेत परं तु मुक्तिः कदा कीदृशी वा स्यादित्यत्राह – **प्रसन्ने इति** । **प्रसन्ने सति** शिवे प्रसादप्रदे सति **भक्तः मुक्तः अभूत्** मोक्षं प्राप्तवान् अभवत्, **मुक्तः** मोक्षभाजनस्तु **शिवसमो भवेत्** शिवेन सदृशः स्यात् । **यो मर्त्यः** यो मनुष्यः, **तस्य** तस्य मनुष्यस्य **अल्पभक्त्या अपि** अल्पीयस्या अपि भक्त्या **जन्मत्रयात् परं** जन्मनां त्रयं जन्मत्रयम्, तस्मात् अनन्तरं मुक्तिः भवेत् । अल्पभक्तिमतां जन्मत्रितयानन्तरं मुक्तिः, पूर्णभक्तिमतां तु एकेन जन्मनैव मुक्तिरिति भावः ॥ तदुक्तम् – "एकेन जन्मना मुक्तिर्वीराणां तु महेश्वरि । इतरेषां तु शैवानां मुक्तिर्जन्मत्रयात्परम् ॥" (वीरागमोक्तमिति उदाह्रियते मरितोण्टदार्येण; उपलभ्यमाने वीरागमग्रन्थे अयं श्लोकः नोपलभ्यते) । संसारबन्धे जीवस्य शिवांशत्वम्, मुक्तौ तु तस्य शिवसमत्वमेव । तदुक्तम् – "गुरुदीक्षापरिप्राप्तशिवलिङ्गाङ्गयोगतः । द्विरेफकीटन्यायेन शिवैक्यं प्राप्तवान्नरः ॥" (म.आ., च.पा., ७.३) इति । शिवैक्यत्वं नाम शिवस्वरूपत्वम् । भ्रमरकीटन्यायेन जीवः सर्वदा शिवं स्मरन् शिव एव भवति । तदुक्तम् – "भ्रमद्भ्रमरचिन्तायां कीटोऽपि भ्रमरायते । मम चिन्तासमाक्रान्तो मम रूपो भवेद्ध्रुवम् ॥" इति (वी.आ.; उपलब्धवीरागमग्रन्थे श्लोकोऽयं नोपलभ्यते) ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

न योनियन्त्रपीडा वै भवेन्नैवात्र संशयः ।
साङ्गाऽन्यूना च या सेवा सा भक्तिरिति कथ्यते ॥१५॥

व्याख्या— मुक्तस्य पुनर्भवो नास्तीत्याह – **नेति । योनियन्त्रपीडा वै** योनिद्वारा बहिरागमनक्लेशो वै न भवेत् न भवितुमर्हति । अत्र अस्मिन् विषये **नैव संशयः** सर्वथा संशयः नास्ति । **या सेवा साङ्गा अन्यूना** नवविधाङ्गसहिता न केनापि अङ्गेना न्यूना **सा सेवा** तादृशी सेवा **भक्तिरिति** भक्तिः इति **कथ्यते** उच्यते ॥ ''न पुनरावर्तते न पुनरावर्तते'' (बृ.जा.उ., ७.२) इत्युक्तरीत्या पुनरुत्पत्तिरहितत्वं मुक्तिः । साङ्गत्वम् अन्यूनाङ्गत्वं च पूर्णभक्तेर्लक्षणम् । किञ्चिदिव न्यूना चेत् साऽल्पभक्तिः ॥१५॥

सा पुनर्भिद्यते त्रेधा मनोवाक्कायसाधनैः ।
शिवरूपादिचिन्ता या सा सेवा मानसी स्मृता ॥
जपादि वाचिकी सेवा कर्मपूजा च कायिकी ॥१६॥

व्याख्या— सेवात्रैविध्यमाह – **सेति । सा** तादृशी नवविधाङ्गभक्तिः **पुनः मनोवाक्कायसाधनैः** मनः, वाक्, कायश्चेति त्रिविधै साधनैः पुनरन्यदृष्ट्या । **त्रिधा** त्रिविधत्वेन **भिद्यते** । साधनभेदेन मानसी, वाचिकी, कायिकी चेति त्रिविधा सेवा इत्यर्थः । तत्र **या शिवरूपादिचिन्ता** या शिवस्वरूपादिचिन्तनं **सा मानसी सेवा** सा मानसीनाम्नी सेवा इति **स्मृता** ज्ञाता । **जपादि** जपस्त्रोत्रादिरूपा **वाचिकी सेवा** वाचिकीनाम्नी सेवा । **कर्मपूजा च** अभिषेकादिभिः उपचाररूपैः कर्मभिः विधीयमाना पूजा च **कायिकी** कायिकीनाम्नी सेवा । ''तस्माद् यत् पुरुषो मनसाऽभिगच्छति, तद्वाचा वदति, तत्कर्म करोति'' (बृ.जा.उ., १.१) इत्युक्तरीत्या त्रिविधेयं सेवा इत्यर्थः ॥१६॥

बाह्यमाभ्यन्तरं चैव बाह्याभ्यन्तरमेव च ।
मनोवाक्कायभेदैश्च त्रिधा तद्भजनं विदुः ॥१७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— पुनरियं सेवा बाह्यादि भेदेन त्रिधेत्याह – **बाह्यमिति। मनोवाक्कायभेदैः** मानसी, वाचिकी, कायिकी चेति प्रकारेण त्रिविधेति पूर्वमुक्ता **सैव** सा एव सेवा **बाह्यं** बाह्यभजनम्, **आभ्यन्तरम्** आभ्यन्तरभजनम्, **बाह्याभ्यन्तरं** बाह्याभ्यन्तरभजनं चेति **तद्भजनं** सेवारूपं तद्भजनं **त्रिधा** त्रिविधम् इति **विदुः** जानन्ति । विदुः "विद" इति अदादिगणीयधातोः णलन्तलट्, प्र.पु., ब.व. – "विदो लटो वा" (पा. ३.४.८३) – वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः (भट्टोजी दीक्षितस्य वृत्तिः, सि.कौ., सू.२४६४; णलादयः लिट् लकारस्य प्रत्ययाः) ॥ सद्गुरोः सकाशात् इष्टलिङ्गं प्राप्य स्थूलशरीरे धारयन् भक्तो जलभस्मरुद्राक्षधूपदीपादिभिर्बाह्यवस्तुभिस्तल्लिङ्गस्य पूजनमेव बाह्यभजनम् (बाह्यसेवा)। योगसमाधिद्वारा कारणशरीरे प्रकाशमानं भावलिङ्गं निध्यायति । एतदेवाऽऽभ्यन्तरभजनम् (आभ्यन्तरा सेवा) । इष्टलिङ्गे दृष्टियोगद्वारा अन्तर्मुखमना भूत्वा सूक्ष्मशरीरगतस्य प्राणलिङ्गस्य भाववस्तुभिः पूजनमेव बाह्याभ्यन्तरभजनम् (बाह्याभ्यन्तरा सेवा)। आगामिनि विंशतितमे श्लोके बाह्यादीनां भजनानां लक्षणं वक्ष्यते ॥१७॥

मनो महेशध्यानाढ्यं नान्यध्यानरतं मनः ।
शिवनामरता वाणी वाङ्मता चैव नेतरा ॥१८॥

लिङ्गैः शिवस्य चोद्दिष्टैस्त्रिपुण्ड्रादिभिरङ्कितः ।
शिवोपचारनिरतः कायः कायो न चेतरः ॥१९॥

व्याख्या— मनोवाक्कायानां शिवध्याननामजपोपचारनिरतत्वे सार्थक्यमाह – **मनो इति । महेशध्यानाढ्यं** महेशस्य ध्यानम्, तेन आढ्यम्, परमेश्वरध्यानप्राचुर्ये स्थितं **मनः** चित्तम् एव **मनः** चित्तम् **नाऽन्यध्यानरतं** अन्यध्याने निरतं न । **शिवनामरता** शिवस्य नाम शिवनाम तस्मिन् रता, शिवनामजपे निरता **वाणी** वागेव **वाङ्मता** वागिति ज्ञाता, **न चैव इतरा** न खलु काप्यन्या । **उद्दिष्टैः** उक्तैः **शिवस्य लिङ्गैः** शिवस्य चिह्नैः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्रिपुण्ड्रादिभिः धृत - त्रिपुण्ड्ररुद्राक्षादिभिः अङ्कितः लक्षितः **शिवोपचार-निरतः** शिवस्य विविधोपचारैरर्चने मग्नः च **कायः** शरीरमेव **कायः** शरीरम्, **न च इतरः** न खल्वन्यः ॥१८-१९॥

अन्यात्मविदितं बाह्यं शम्भोरभ्यर्चनादिकम् ।
तदेव तु स्वसंवेद्यमाभ्यन्तरमुदाहृतम् ॥
मनो महेशप्रवणं बाह्याभ्यन्तरमुच्यते ॥२०॥

व्याख्या— बाह्यादिभजनानां लक्षणमाह – **अन्यात्मविदितमिति** । **शम्भोः अभ्यर्चनादिकं** शिवपूजादिकर्म **अन्यात्मविदितम्** अन्यात्मना विदितं अन्यपुरुषेण प्रत्यक्षतया ज्ञातं **बाह्यं** बाह्यभजनम्, **स्वसंवेद्यं** अन्यपुरुष-दृष्ट्यगोचरीभूतत्वेन स्वयमेवाऽनुभूयमानं **तदेव** तदर्चनादिकम् एव, **आभ्यन्तरम्** आभ्यन्तरंभजनमिति **उदाहृतम्** उल्लिखितम्, **महेशप्रवणं** परमेश्वरे तन्मयीभूतं **मनः** चित्तमेव **बाह्याभ्यन्तरं** बाह्याभ्यन्तरभजन-मिति **उच्यते** कथ्यते । मनसः बाह्याभ्यन्तरोभयव्याप्तत्वात् मानसभजनमेव बाह्याभ्यन्तरभजनम् ॥ काकाक्षिगोलकन्यायेन मनसः उभयत्र व्याप्तत्वं विशदीक्रियते । काकदृष्टिर्यथा उभयोरपि अक्षिगोलकयोः सञ्चरन्ती द्वयोरक्ष्णोः अवलोकनोपयुक्ता भवति तथा एक एव मन उभयत्र सम्बद्धो भवति ॥२०॥

पञ्चधा कथ्यते सद्भिस्तदेव भजनं पुनः ।
तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वकम् ॥२१॥

शिवार्थे देहसंशोषस्तपः कृच्छ्रादि नो मतम् ।
शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते ॥२२॥

जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव वा ।
रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम् ॥२३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ध्यानं शिवस्य रूपादिचिन्ता नात्मादिचिन्तनम् ।
शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम् ॥
इति पञ्चप्रकारोऽयं शिवयज्ञः प्रकीर्तितः ॥२४॥

व्याख्या— पञ्चशिवयज्ञानां निरूपणं क्रियते – "**पञ्चधा**" इत्यारभ्य "**प्रकीर्तितः**" इति पर्यन्तं श्लोकचतुष्टयेन । तदेव भजनं पुनः पूर्वं बाह्यादिप्रकारेणोक्तं पुनरपि भजनं **तपः, कर्म, जपः, ध्यानं, ज्ञानं** चेत्यनुपूर्वकम् "**तपः**" इत्यादीनां क्रमेण **सद्भिः** सुज्ञानिभिः **पञ्चधा** पञ्चविधत्वेन **कथ्यते** उच्यते ॥ **शिवार्थे** शिवस्य कृते पूजासामग्र्यादिसम्पादने **देहसंशोषः** शरीरशोषणम् एव **तपः** तपश्चरणम्, **नो (न उ) मतं** न खलु **कृच्छ्रादि** कृच्छ्रचान्दायणादिव्रतं (तपः इति ज्ञातम्) । मासे चन्द्रस्य वृद्धिक्षयावलम्बि आहारस्वीकारेऽपि वृद्धिक्षयानुसरणरूपं व्रतं चान्द्रायणम् । मासस्य शुक्लपक्षे प्रतिदिनं मयूराण्डप्रमाणम् एकैकं पिण्डम् अधिकं खादन् कृष्णपक्षे प्रतिदिनं मयूराण्डगात्रं एकैकं पिण्डं न्यूनं खादन् आचर्यमाणं व्रतं चान्द्रायणव्रतमित्युच्यते । तदुक्तम् – "तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिख्यण्डसंमितान् । एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरन् ॥" (या.स्मृ., ३.३२३) इति । तद्व्रतं नितरां क्लेशजनकम् । तत्फलस्य सन्दिग्धत्वात् नोपादेयम् । **शिवार्चा** शिवपूजा एव **कर्म** कर्मरूपं भजनं **विज्ञेयम्** अवगन्तव्यम्, **वाह्यं यागादि** भक्त्याद्याभ्यन्तरभावरहितत्वेन केवलं बहिरुपकरणसामग्रीद्वारा क्रियमाणं यागादिकार्यं (कर्म इति) **न उच्यते** नैव कथ्यते । तस्य फलस्य नश्वरत्वात् । **पञ्चाक्षराभ्यासः** पञ्चाक्षरमन्त्रस्य पौनःपुन्येन आवृत्तिः, **प्रणवाभ्यास एव वा** अथवा ओङ्कारस्य अभ्यासः, **रुद्राध्यायादिकाभ्यासः** यजुर्वेदीयरुद्राध्यायादिकस्य अभ्यासः, एव जपः, **न** न तु **वेदाध्ययनादिकम्** वेदाध्ययनादि त्रैगुण्यविषयस्य अभ्यासः । "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन" (भ.गी., २.४५) इति भगवता कृष्णेन उपदिष्टरीत्या वेदा सत्त्वादिगुणत्रयात्मकं पदार्थजातं कर्मजातं उपदिशन्ति । तेषां कार्यान्वयीकरणे यथा संसारे तथाऽत्र इच्छाप्रयत्नौ विनियोजनीयौ भवतः । त्रैगुण्यविषयं वेदाध्ययनं विहाय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निस्त्रैगुण्यविषयाणि पञ्चाक्षराभ्यासादीनि, निष्कामकर्माणि इति यावत्, जपत्वेन आदेयानीति ग्रन्थकर्तुराशयः ॥ **शिवस्य रूपादिचिन्ता** परमेश्वरस्य स्वरूपमाहात्म्यलीलावताराणां **चिन्ता** मनसा नैरन्तर्येण स्मरणं ध्यानं ध्यानरूपं भजनम्, परं तु **आत्मादिचिन्तनम्** आत्मादिविचारः **न** नैव ध्यानम् । ध्यानं नाम मनसः आराध्यस्वरूपधारणमनोवृत्तिः – "तत्र प्रत्ययैकतानता ध्यानम्" (यो.सू., ३.२) । तच्च परिमितैः शरीरेन्द्रियाद्युपाधिभिः संवलितम् अहंप्रत्ययवेद्यात्मचिन्तनं ध्यानं न भवति । केवलं शिवागमार्थज्ञानमेव ज्ञानम्, न तु सांख्याद्यन्यशास्त्रज्ञानम् ॥ एतत् पञ्चात्मकं भजनं वीरशैवानां पञ्चयज्ञत्वेन प्रतिपाद्यते । शैवागमेषु पञ्चयज्ञानां त्रयः प्रकारभेदाः दृश्यन्ते । कारणागमोत्तरभागे देवयज्ञः, पितृयज्ञः, भूतयज्ञः, मनुष्ययज्ञः, ब्रह्मयज्ञश्चेति नामभिः व्यवह्रियमाणाः पञ्चयज्ञाः प्रतिपादिताः (क्रि.पा., ३.६८) । तत्राग्नौ समिदाद्यर्पणं देवयज्ञः, पितृभ्यः तर्पणं पितृयज्ञः, सर्वजन्तुभ्य आहारस्य कश्चनांशसमर्पणं (बलिसमर्पणं) भूतयज्ञः, ब्राह्मणेभ्यः भोजनसमर्पणं मनुष्ययज्ञः (नृयज्ञः), वेदाध्ययनं (स्वाध्यायः) च ब्रह्मयज्ञः । (का.आ., उ.भा., क्रि.पा., ३.६९-७०) । एष प्रथमः प्रकारभेदः पञ्चयज्ञानाम् । तत्रैव कारणे जपयज्ञस्यापि उल्लेखः वर्तते । द्रव्ययज्ञः जपयज्ञश्चेति यज्ञद्वैविध्यं प्रदर्श्य, जपयज्ञं विहाय सर्वेऽप्यन्ये यज्ञाः द्रव्ययज्ञाः इति संभाव्योक्तम् – "सर्वेभ्यो द्रव्ययज्ञेभ्यो जपयज्ञो विशिष्यते । जपयज्ञं समाप्यैव गुर्वादीनभिवादयेत् ॥" (का.आ., उ.भा., क्रि.पा., ३.६२) इति । सूक्ष्मागमे उत्तरभागे – "कर्मयज्ञस्तपोयज्ञो जपयज्ञस्तथाऽपरः । ध्यानयज्ञो ज्ञानयज्ञः पञ्चयज्ञा इमे स्मृता ॥" (क्रि.पा., ६-२६) इति पञ्चयज्ञाः कथिताः । आगमान्तरोक्तवीरशैवपञ्चयज्ञानां नामानि समानानि । परं तु तेषां स्वरूपम् अत्र भिन्नं वर्तते । अतोऽयं द्वितीयः प्रकारभेद इति परिगण्यते । अत्रोक्तकर्मयज्ञादिस्वरूपं यथा – "कर्मयज्ञो द्विधा ज्ञेयः सकामाकामभेदतः । सकामे तु फलं भुक्त्वा जायते भुवि पूर्ववत् ॥ निष्कामेऽपि परं ज्ञानं लब्ध्वा मोक्षमवाप्नुयात् ॥ हिंसादिदोषरहितो रागादिगुणवर्जितः । तपोयज्ञो महादेवि मोक्षैकफलसाधकः ॥ अष्टैश्वर्यप्रदा पूजा योगाद्यं स्वर्ग-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

साधनम् । पापहारी जपः प्रोक्तो ज्ञातं ध्यानं च मोक्षदम् ॥" (सू.आ., उ.भा., क्रि.पा., ६.२७-२९) इति । जपयज्ञम् अन्तर्यागत्वेन परिगणय्य तत्रैव उच्यते – "बहिर्यागरतानां च देवाः पाषाणमृण्मयाः । अन्तर्यागवतां देवि हृदयस्थः सदाशिवः ॥" (६.३१) इति । तत्रैव ज्ञानयज्ञध्यानयज्ञयोः स्वरूपं पुनराह – "तस्माद्यज्ञादिकं बाह्यं त्यक्त्वा स्वर्गादिसाधनम् । गुरोर्लब्ध्वा परं ज्ञानं ध्यानयोगरतो भवेत् ॥ ..... शिवज्ञानामृतं पीत्वा भक्त्या परवशं गतः । निवेशयेच्छिवे चित्तं संयतात्मा निराकुलः ॥ पूजादौ तु शिवं ध्यात्वा जप्त्वा पञ्चाक्षरं मनुम् । ततः सम्पूजयेद् देवं वीरशैवक्रमो भवेत् ॥" (६.३३, ३५-३६) इति । ततः पञ्चयज्ञानां तृतीयः प्रकारभेदो विद्यते पारमेश्वरे – "तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वशः । पञ्चधा कथितं रुद्रे तदेव कथितं पुनः ॥ ..... समर्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते । शिवार्थे देहसंशोषस्तपः कृच्छ्रादि नो मतम् ॥ जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव वा । रुद्राध्यायादिकाभ्यासो न चान्याध्ययनादिकम् ॥ ध्यानं शिवचिन्ता स्यान्नात्मद्यर्थं समाधयः ॥ शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम् ॥" (१२.१७-१९) इति । सुप्रभेदागमेऽपि (७.६-८) अयमेव प्रकारभेदः । एवं सिद्धान्तशिखामणौ उक्ते पञ्चयज्ञनामस्वरूपे पारमेश्वर-सुप्रभेदागमोक्ताभ्यां पञ्चयज्ञनामस्वरूपाभ्यां संवदिनी ॥२२-२४॥

अनेन पञ्चयज्ञेन यः पूजयति शङ्करम् ।
भक्त्या परमया युक्तः स वै भक्त इतीरितः ॥२५॥

व्याख्या— पञ्चयज्ञरत एव भक्त इत्याह – अनेनेति । **अनेन** पूर्वोक्तेन **पञ्चयज्ञेन** जपादिपञ्चकेन **यः** यः पुरुषः **परमया भक्त्या** उत्कृष्टतमया भक्त्या **युक्तः** निरतः सन् **शङ्करं** शिवं **पूजयति** अर्चयति **स वै** स एव **भक्तः इति** शिवभक्त इत्येवम् **ईरितः** कथितः ॥२५॥

पूजनाच्छिवभक्तस्य पुण्या गतिरवाप्यते ।
अवमानान्महाघोरो नरको नात्र संशयः ॥२६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— पूजनात् स्वर्गः, मुक्तिर्वा अवमानच्च घोरनरक इत्याह – **पूजनादिति** । **पूजनात्** शिवार्चनात् **शिवभक्तस्य** शिवभक्तिमतः **पुण्या गतिः** पुण्यवशात् प्राप्यमाणा स्वर्गरूपा मुक्तिरूपा वा स्थितिः **अवाप्यते** लभ्यते । **अवमानात्** अनादरात् **महाघोरः** अत्यन्तभयङ्करः **नरकः** नरकलोकः, प्राप्यते इति शेषः । **नात्र संशयः** अस्मिन् सन्देहः नास्ति ॥२६॥

शिवभक्तो महातेजाः शिवभक्तिपराङ्मुखान् ।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत् क्वचित् ॥२७॥

व्याख्या— वीरशैवस्य किं करणीयमकरणीयमित्यत्राह – **शिवभक्त** इति । **महातेजाः** महत् तेजः यस्य सः, तादृशः **शिवभक्तः** शिवानुरागी भक्तः, वीरशैवः इत्यर्थः, **शिवभक्तिपराङ्मुखान्** शिवे भक्तिः शिवभक्तिः, शिवभक्तेः पराङ्मुखाः, तान्, शिवभक्तिरहितान् इत्यर्थः, तान् **न स्पृशेत्** न परामृशेत् **नैव वीक्षेत** नितरां नैव पश्येत्, **क्वचित्** कुत्रापि **तैः सह** शिवभक्तिविरोधिभिः सह **न वसेत्** एकत्र न तिष्ठेत् ॥ केवलं शिवभक्तिपरायणानां दर्शन-स्पर्शन-सहवासं कुर्यादिति पर्यायेण तात्पर्यः । एष चाचारनियमः वीरशैवानां पञ्चाचारेषु विद्यते । को नाम स आचार इति वक्तव्ये ज्ञातव्ये वीरशैवपञ्चाचाराणां परिचयः स्यादिति मत्त्वा विचार्यते । तथा हि – सिद्धान्तशिखामणौ यथाऽष्टावरणशब्दप्रयोगं विनाऽष्टावरणानां परिचयः कारितः, तथैव पञ्चाचारशब्दमनुपयुज्य पञ्चाचाराणां निरूपणं क्रियते । प्रप्रथमतया चन्द्रज्ञानोत्तरे अष्टावरण-शब्दवत् पञ्चाचारशब्दस्य प्रयोगः दृश्यते । कारणागमोत्तरे केवलम् अष्टावरण-पञ्चाचार शब्दयोः प्रयोगः एकत्र प्राप्यते – "अष्टावरणेषु त्वं श्रद्धां कुरु प्रयत्नतः । प्रवर्तस्व महाबुद्धे पञ्चाचारेष्वपि क्रमात् ॥" (क्रि.पा., १.१२८) इति । चन्द्रज्ञानागमोत्तरे अष्टावरणानि पञ्चाचाराश्च वैशद्येन निरूप्यन्ते । अत्र केवलं पञ्चाचाराणां नामानि स्वरूपं च विचार्येते । तथा हि – "लिङ्गाचारः सदाचारः शिवाचारस्तथैव च । भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः ॥ गुरुणा दत्तलिङ्गाद्वै नास्ति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दैवो महीतले । इति भावानुसन्धानं लिङ्गाचारः स उच्यते ॥ धर्मार्जितेन द्रव्येण यत्सन्तर्पणमन्वहम् । गुरुलिङ्गजङ्गमानां सदाचार इति स्मृतः ॥ शिव एव परं ब्रह्म पञ्चकृत्यपरायणम् । न ततोऽन्या गतिरिति शिवाचारो हि कीर्तितः ॥ शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च । न शृणोति च यन्निन्दां स गणाचार उच्यते ॥ शिवभक्तजनाः सर्वे वरिष्ठाः पृथिवीतले । तेषां भृत्योऽहमिति यद् भृत्याचार इति स्मृतः ॥" (क्रि.पा., ९.४-९) इति । तत्र लिङ्गाचारस्यान्तर्गतत्वेन त्रिविधदीक्षाणाम् एकैकस्याः दीक्षायाः सप्तविधत्वं चेत्याकलनेन लब्धाः एकविंशति दीक्षाप्रकाराः परिगण्यन्ते । (प्रपञ्चार्थं पश्यत षष्ठपरिच्छेदे १३-१४ श्लोकयोर्व्याख्याम्) । सदाचारे तावत् अधोनिर्दिष्टानि अष्टशीलानि अन्तर्भूतानि – (१) **अङ्कुरशीलम्** – गुरोः कारुण्यविशिष्टे मार्गदर्शने समाचरितषडध्वन्यासप्रभावेण दैवीस्वरूपं प्राप्तमिदं मम शरीरम् इति भावोद्गमः । (२) **उत्पन्नशीलम्** – वीरशैव-दीक्षासम्पन्नैः पत्नीपुत्रादिभिः सह वासः । (३) **द्विदलशीलम्** – सर्वदा भस्मरुद्राक्षादिशिवचिह्नानाम् अपरिहार्यत्वेन धारणम् । (४) **प्रवृद्धशीलम्** – भक्त्यादिकारणं सर्वदा शैवधर्मस्य माहात्म्यस्मरणम् । (५) **सप्रकाण्ड-शीलम्** – भक्त्याधिक्यकारणभूतम् इष्टलिङ्गार्चनम्, इष्टप्राणभावलिङ्ग-समन्वयार्चनम् इति यावत्, तद्विना आहारग्रहणाभावः । (६) **सशाख-शीलम्** – लिङ्गत्रयसमन्वयार्चनानन्तरं तत्प्रसादभूतस्य पदार्थस्यैव स्वीकारः । (७) **सपुष्पशीलम्** – लिङ्गत्रयसमन्वयाय समर्पितस्य प्रसादस्याऽपरित्यागः । (८) **सफलशीलम्** – गुरुलिङ्गजङ्गमैक्यनिष्ठा । (चं.आ., उ.भा., क्रि.पा., ९.२०-३०) ॥ शिवाचारान्तर्गतत्वेन पुनः षोडश शुद्धयो निरूपिताः । ता हि – (१) **द्रव्यशुद्धिः** – भक्तहस्तगतं भस्मना विशोधितं वा फल-मूलादिकमेव ग्राह्यमिति नियमः । (२) **क्षेत्रशुद्धिः** – नन्दिमुद्राङ्कितैः शिलादार्वादिभिः परिशोभितत्वम् । (३) **गृहशुद्धिः** – भक्तैः निर्मितं शिवलिङ्गाङ्कितं वा गृहमेव परिग्राह्यमिति नियमः । (४) **भाण्डशुद्धिः** – भक्तनिर्मितस्य लिङ्गमुद्राङ्कितस्य वा भाण्डस्य परिग्राह्यत्वम् । (५) **तृण-शुद्धिः** – भक्तजनानीतस्य भस्मसंस्कृतस्य वा तृणस्य परिग्राह्यत्वम् । (६) **काष्ठशुद्धिः** – भक्तजनसमानीतस्य भस्मसंस्कृतस्य वा काष्ठस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सङ्ग्राह्यत्वम् । (७) **वीटिकाशुद्धिः** – भक्तारामे समुत्पन्नस्य भक्तैः साधितस्य वा भस्मना संस्कृतस्य वा पूगचूर्णनागवल्लीदलसमन्वितस्य ताम्बूलस्य ग्राह्यत्वम् । (८) **पाकशुद्धिः** – शिवदीक्षान्वितैः पक्वम् अभक्तैरनालोकितं च भोज्यमेव स्वीकार्यमिति नियमः । (९) **रसशुद्धिः** – माहिषं वाऽऽविकं वा घृतं दधि क्षीरं च सर्वदाऽग्राह्यम्, गव्यं तु तन्त्रितयमेव ग्राह्यमिति नियमः । (१०) **भवशुद्धिः** – पुनर्भवकारण-त्वेनोक्तस्य काम्यकर्मणः परित्यागपूर्वकं पुनर्भवराहित्यसम्पादनम् । (११) **भूतशुद्धिः** – सर्वभूतदयालुत्वं पञ्चभूतस्याऽदूषणत्वं च । (१२) **भावशुद्धिः** – सर्वकामान् परित्यज्य शिवभावानुभावनं च सर्वदा । (१३) **मार्गशुद्धिः** – मार्गे पिपीलिकादीनां यथा हिंसा न जायेत तथा सञ्चरणम् । (१४) **कालशुद्धिः** – शास्त्रसञ्चोदिते निःशब्दे मनोहरे च काले शिवलिङ्गाराधनम् । (१५) **वाक्शुद्धिः** – अनृतं परुषं कुत्सं बीभत्सं दाम्भिकं च वचः न प्रयोक्तव्यम् इति नियमः । (१६) **जनशुद्धिः** – आसने शयने याने गोष्ठ्यां सर्वत्र सर्वदा सद्भक्तजनसङ्गतिः ॥ (चं.आ., उ.भा., क्रि.पा., ९.३३-४९) ॥ गणाचारान्तर्गतत्वेन चतुःषष्टि-शीलानि कथितानि । तानि वाक्शीलानि (सप्त), पाणिगतशीलानि (पञ्च), पादगतशीलानि (चत्वारि), त्वक्सम्बद्धशीले (द्वे), चक्षुस्सम्बद्धशीले (द्वे), जिह्वागतशीलम् (एकम्), घ्राणगतशीलम् (एकम्), श्रोत्रगतशीले (द्वे), कायगतशीलानि (पञ्च), मानसिकशीलानि (पञ्चत्रिंशत्) चेति दशविधत्वेन विभक्तानि । तत्र **१. वाक्शीलानि** – (१) भक्तिनिष्ठेन वाचा यथार्थभाषणम्; (२) अप्रियस्य सत्यस्य, प्रियस्य असत्यस्य वाऽकथनम्; प्रियस्य सत्यस्यैव कथनम्; (३) धर्मज्ञानैकसाधनत्वाद् वेदागमपुराणानां पठनम्; (४) शिवस्य गुरोः शिवभक्तानाम् अश्रान्तं प्रशंसनम्; (५) अन्य-देवानां मनुष्याणां च प्रशंसावर्जनम्; (६) कदाचित् कुत्रचिद्वापि आत्म-प्रशंसनवर्जनम्; (७) देवतानां मनुष्याणां निर्गुणानामपि सर्वदा निन्दा-वर्जनम्॥ **२. पाणिगतशीलानि**– (८) गुरुलिङ्गजङ्गमनमस्कारः; (९) अहर्निशं पूजासामग्रीणां सम्पादनम्; (१०) रुद्राक्षमालया प्रतिदिनं मूलमन्त्र-जपः; (११) गुरुलिङ्गजङ्गमानां प्रत्यहम् आराधनम्; (१२) गुरुजङ्गमेभ्यः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवधर्माय च भक्तिपूर्वकं कृतं दानम् ॥ ३. **पादगतशीलानि** – (१३) गुरुजङ्गमदर्शनायाऽभिगमनम्; (१४) गुरुजङ्गमेभ्यः सभक्ति क्रियमाणं प्रदक्षिणम्; (१५) पूजासामग्रीणां सम्पादनाय अन्वहं गमनम्; (१६) गुरोः इष्टलिङ्गस्य पूजार्थं पद्माद्यासनस्य स्थिरतया ग्रहणम् ॥ ४. **त्वक्सम्बद्धशीले** – (१७) वपुषः सार्थक्यसम्पादकत्वेनाऽवियोगतया शरीरे इष्टलिङ्गस्य धारणम्; (१८) इष्टलिङ्गस्पर्शनेन जातस्य रोमाञ्चस्याऽनुभवः ॥ ५. **चक्षुस्सम्बद्धशीले** – (१९) अश्रान्तं सानुरागं च इष्टलिङ्गस्य निरीक्षणम्; (२०) इष्टलिङ्गनिरीक्षणेनाऽऽनन्दबाष्पस्य समुद्गमः ॥ ६. **जिह्वागतशीलम्** – (२१) गुरुलिङ्गजङ्गमप्रसादस्याऽन्वहं सेवनम् ॥ ७. **घ्राणगतशीलम्** – (२२) गुरुलिङ्गजङ्गमपूजानन्तरं लभ्यमाननिर्माल्यगन्धपुष्पादीनाम् आघ्राणनम् ॥ ८. **श्रोत्रगतशीले** – (२३) गुरोः शिवस्य भक्तानां च स्तोत्रस्याऽऽकर्णनम्; (२४) गुरोः शिवस्य भक्तानां च निन्दाया अश्रवणम् ॥ ९. **कायगतशीलानि** – (२५) गुरुलिङ्गजङ्गमानां प्रसादस्वीकारेण कायपरिशोधनम्; (२६) निषिद्धविषयेभ्य इन्द्रियाणाम् अप्रवृत्तिः; (२७) अस्पृश्यवस्तुसंस्पर्शे जलस्नानं भस्मस्नानं वा; (२८) आसने शयने गोष्ठ्यां वाऽदीक्षितस्य सम्पर्करहितत्वम्; (२९) भूतिरुद्राक्षलिङ्गानां शरीरे धारणम् ॥ १०. **मानसिकशीलानि** – (३०) निषिद्धभोगे सङ्कल्परहितत्वम् (ब्रह्मचर्यम्); (३१) शिवभक्तेः कामना, अविषयेष्वनासक्तिः (निष्कामत्वम्); (३२) वैरिष्वपि क्रोधवर्जनम् (अक्रोधः); (३३) धनादिषु लोभरहितत्वं शिवाराधने लोभयुक्तत्वं च (अलोभः); (३४) कान्तायां पुत्रेषु च मोहरहितत्वं भक्तजने मोहयुक्तत्वं च (अमोहः); (३५) इन्द्रियप्रवृत्तिषु मात्सर्यं न तु जनेषु जातुचित् (अमात्सर्यम्); (३६) मायाजये मदः न तु धर्मे न सम्पदि (अमदः); (३७) गुरुजङ्गमेषु गुणावगुणविमर्शरहितत्वम्; (३८) यस्य कस्यापि प्राणिनः पीडावर्जनम् (अहिंसा); (३९) प्राणिनां दुःखं संवीक्ष्य अक्षमत्वम् (दया); (४०) क्रियायां वचने वा परस्मात् स्वतः वा सङ्कोचभावः (ह्रीः); (४१) रिपौ निजसुतादिषु वा वैषम्यरहितत्वम् (आर्जवम्); (४२) आगमे निगमे गुरूपदेशे च विश्वासः (श्रद्धा); (४३) आपदि विपदि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वा धर्मस्याऽनतिक्रमः (धृतिः); (४४) अपकारकारिषु वैरिजनेष्वपि अदूषणम् (क्षमा); (४५) भोगप्रयुक्तवाञ्छायाः वर्जनम्; (४६) क्रियायां वचने वा प्रमादरहितत्वम् (धीः); (४७) शिवादन्यवस्तुविषये प्रवृत्तिरहितत्वम् (दमः); (४८) धर्मानुष्ठाने पूर्णता परद्रव्ये अनासक्तिः (अस्तेयः); (४९) अलब्धवस्तुविषये व्यसनाभावः (सन्तुष्टिः); (५०) पार्वतीपरमेश्वरयोर्नामरूपयोरन्वहं स्मरणम्; (५१) शिवनामगुणादीनाम् अनारतं चिन्तनम्; (५२) शम्भोः पादसंवाहनादीनां भाव्यमानत्वं (पादसेवनम्); (५३) शम्भोः आवाहनादिना विधीयमानं मानसार्चनम्; (५४) शम्भुपादयोर्मनसा प्रणामार्पणम्; (५५) शम्भोः मनसा कैङ्कर्यम् (दास्यम्); (५६) शम्भोः कल्याणरूपे सखिताभावः (सख्यम्); (५७) बन्धमोचनभारस्य परमात्मनि समर्पणम् (आत्मार्पणम्); (५८) मनसा मूलमन्त्रस्य जपः; (५९) शम्भोः दिव्यरूपानुसन्धानम् (ध्यानम्); (६०) दिव्यरूपानुसन्धानस्य तैलधारावत् अविच्छिन्नत्वम् (धारणम्); (६१) ध्याने चेतसो निवातदीपवद् अवस्थितिः (समाधिः); (६२) सोऽहंभावेन विश्वेशध्यानं कुर्वन् तदिन्द्रियमुखेनैव कार्यकरणभावः; (६३) महेशस्य रूपानुसन्धाने अपरिच्छिन्नत्वम्; (६४) देवस्य शम्भोरनन्तरूपत्वं निजरूपतया भावयत आत्मानो विस्मरणम् ॥ (चं.आ., उ.भा., क्रि.पा., ९.५३-१२२) ॥ भृत्याचारे (सामान्य) भृत्याचारः वीरभृत्याचारश्चेति द्वैविध्यमुक्तम् । तत्र गुरुलिङ्गजङ्गमेषु भृत्यत्वम् (सामान्य) भृत्याचारः । भृत्यत्वे मोक्षरूपपरमपुरुषार्थप्राप्त्यर्थं क्रियमाणत्वं सेवायाः वीरभृत्याचारत्वम् ॥ सिद्धान्तशिखामणेः अत्र ९.२७ तमश्लोके उक्तं शिवाचारान्तर्गतजनशुद्धौ अन्तर्गतम् ॥२७॥

यदा दीक्षाप्रवेशः स्याल्लिङ्गधारणपूर्वकः ।
तदाप्रभृति भक्तोऽसौ पूजयेत् स्वागमस्थितान् ॥२८॥

व्याख्या— दीक्षावता किं करणीयमित्यत्राह – **यदेति** । **यदा** यस्मिन् समये **लिङ्गधारणपूर्वकः** लिङ्गस्य धारणं लिङ्गधारणं तत् पूर्वं यस्य सः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गधारणपूर्वः, स्वार्थे कप् (क), गुरुकारुण्येन प्राप्तस्य लिङ्गधारण-स्याऽनन्तरभावी **दीक्षाप्रवेशः स्यात्** दीक्षाद्वारा वीरशैवे प्रवेशः भवेत्, **तदाप्रभृति** तस्मात् समयादारभ्य **असौ भक्तः** अयं दीक्षासम्पन्नो भक्तः **स्वागमस्थितान्** स्वस्य आगमः स्वागमः, स्वसम्प्रदायसिद्धः आगमः इत्यर्थः, स्वागमे तिष्ठन्ति इति स्वागमस्थिताः, स्वागमसम्प्रदायानुसारिणः, तान्, **पूजयेत्** अर्चयेत् आदरेण सत्कुर्यात् ॥ दीक्षाद्वारा भक्तो लिङ्गाचारी भवति । अस्मिन् विशालोदारभक्तिसम्प्रदाये लिङ्गाचारिणः सर्वे समानाः । न तत्र लिङ्गभेदोऽस्ति न च वर्णभेदः । ये शिवे भक्तिं कुर्वन्ति, ये च शैवागमोत्तरभागेभ्यो विहितेषु सदाचारसद्विषयेषु श्रद्धालवो भवन्ति, ते सर्वे वीरशैवे दीक्षाद्वारा प्रवेशं प्राप्तुम् अर्हन्ति ॥२८॥

स्वमार्गाचारनिरताः सजातीया द्विजास्तु ये ।
तेषां गृहेषु भुञ्जीत नेतरेषां कदाचन ॥२९॥

स्वमार्गाचारविमुखैर्भविभिः प्राकृतात्मभिः ।
प्रेषितं सकलं द्रव्यमात्मलीनमपि त्यजेत् ॥३०॥

नार्चयेदन्यदेवांस्तु न स्मरेन्न च कीर्तयेत् ।
न तन्निवेद्यमश्नीयाच्छिवभक्तो दृढव्रतः ॥३१॥

यद्गृहेष्वन्यदेवोऽस्ति तद्गृहाणि परित्यजेत् ।
नान्यदेवार्चकान् मर्त्यान् पूजाकाले निरीक्षयेत् ॥३२॥

सदा शिवैकनिष्ठानां वीरशैवाध्ववर्तिनाम् ।
न हि स्थावरलिङ्गानां निर्माल्याद्युपयुज्यते ॥३३॥

व्याख्या— लिङ्गदीक्षासम्पन्नैः किं कुर्यात् किं न कुर्यादिति विधि-निषेधम् आह — **स्वमार्गाचारनिरताः** इत्यादि पञ्चभिः श्लोकैः । **स्वमार्गा-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चारनिरताः स्वस्य मार्ग स्वमार्गः, स्वसम्प्रदायः इत्यर्थः, स्वमार्गस्य आचाराः स्वमार्गाचाराः, स्वसम्प्रदायसिद्धसदाचाराः इत्यर्थः, तेषु निरताः; निष्ठाः इत्यर्थः, तादृशाः **सजातीयाः** समानजातीयाः, समानधर्माः इत्यर्थः, **ये द्विजाः** ये द्विजन्मानः, भवन्तीति शेषः, **तेषां गृहेषु** तेषां सदनेषु **भुञ्जीत** भोजनं कुर्यात्, **न इतरेषां कदाचन** न कदाप्यन्येषां गृहेषु । शिवदीक्षा-सम्पन्नानां स्वधर्मसम्प्रदायनिष्ठानां भक्तमाहेश्वराणां सद्मसु भुञ्जीयात् नान्यत्रेति भावः ॥ **स्वमार्गाचारविमुखैः** स्वमार्गाचारेभ्यो विमुखा विरुद्धा जनाः, स्वमार्गाचारविमुखाः, तैः, **भविभिः** अदीक्षितैः, अत एव **प्राकृता-त्मभिः** संस्काररहितैः **प्रेषितं** प्रापितं **सकलं द्रव्यं** समग्रं पदार्थजातम् **आत्मलीनम् अपि** स्वाधीनम् अपि, स्वाधीनत्वाद् उपयोक्तुं स्वातन्त्र्य-सद्भावेऽपि, **त्यजेत्** जह्यात् ॥ **दृढव्रतः** दृढं व्रतं यस्य सः, तादृशः **शिवभक्तः** वीरशैवः **अन्यदेवान्** अन्यान् ब्रह्मविष्ण्वादीन् देवान् **न अर्चयेत्** न पूजयेत्, **न स्मरेत्** तान् देवान् न स्मृतिविषयान् कुर्यात्, **न कीर्तयेत्** न स्तुतिविषयान् कुर्यात्, **न तन्निवेद्यम् अश्नीयात्** न तेभ्यो निवेदितं भुञ्जीयात् ॥ **यद्गृहेषु** येषु सदनेषु **अन्यदेवः अस्ति** ब्रह्मविष्ण्वद्यन्यदेवो भवति **तद्गृहाणि** तानि सदनानि **परित्यजेत्** जह्यात् । **अन्यदेवार्चकान्** अन्येषां देवानाम् अर्चकान् पूजकान् **पूजाकाले** पूजासमये (पूजायाः समये) **न निरीक्षयेत्** न पश्येत् ॥ **शिवैकनिष्ठानां** शिवे एकस्मिन्नेव निष्ठा येषां ते शिवैकनिष्ठाः, तेषां, **वीरशैवाध्ववर्तिनां** वीरशैवानां अध्वा, मार्गः, वीरशैवाध्वा, तस्मिन् वर्तयितुं शीलमासामिति वीरशैवाध्ववर्तिनः, तेषां विषये, **स्थावरलिङ्गानां** मन्दिरेषु स्थापितानां लिङ्गानां **निर्माल्यं** निवेदितं **न हि उपयुज्यते** न सर्वथा उपयोगाय भवति ॥ शिवोपदिष्टां जातिव्यवस्थां न कोऽपि वीरशैवः अतिक्रम्य वर्तेत । तदुक्तम् – "शिवोक्तां जातिमर्यादां योऽतीत्य भुवि वर्तते । स चण्डाल इति ज्ञेयः ... ॥" (शं.सं., वी.ध.शि.) इति । ब्राह्मणादित्रिवर्णसम्बद्धो द्विजशब्दो वीरशैवानामप्यन्वययोग्यः, तेषामपि वीरशैवदीक्षया द्विजत्वस्य सिद्धत्वात् । मातृगर्भात् जननं प्रथमं जन्म । गुरुकारुण्यवशात् शिवदीक्षाद्वारा प्राप्यमाणं च द्वितीयं जन्म । वर्णभेदलिङ्गभेदरहितत्वेन सर्वेषां शिवदीक्षासम्पन्नानां समानतया द्विजत्वं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वीरशैवस्य विशेषः । एतत् प्रस्तावे तावद् अत्र २९-३३ तमश्लोकानां विधिनिषेधात्मकार्थोऽवगन्तव्यः । नाऽत्र विधिनिषेधौ परमतानादरपरौ परं तु स्वमते शिवभक्तिदार्ढ्यपरौ । एष वीरशैवसदाचारः शिवे सर्वार्पणभावेन क्रियमाणे सति सद्गतिसाधनाय कल्पते । तदुक्तं भगवता श्रीकृष्णेन – "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवेष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥" (भ.गी., १८.६५) इति । शिवभक्तस्तु दृढभक्तिसम्पन्नः भवेत् । तस्य भक्तेर्दिशाभेदः मा भूदिति एतादृशौ विधिनिषेधौ विहितौ ॥ अत्रोक्ताचाराणां पञ्चाचारमध्ये सदाचारान्तर्गत षोडश शुद्धिषु अन्तर्भावः विवक्षितः ॥२९-३३॥

यत्र स्थावरलिङ्गानामपायः परिवर्तते ।
अथवा शिवभक्तानां शिवलाञ्छनधारिणाम् ॥३४॥

तत्र प्राणान् विहायापि परिहारं समाचरेत् ।
शिवार्थं मुक्तजीवश्चेच्छिवसायुज्यमाप्नुयात् ॥३५॥

व्याख्या— शिवलिङ्गस्य शिवभक्तस्य शिवलाञ्छनधारिणश्चाऽपाये सम्प्राप्ते किं करणीयमित्यत्राह – **यत्रेतिश्लोकद्वयेन** । **यत्र** यस्मिन् स्थाने समये वा **स्थावरलिङ्गानां** देवकुलस्थापितलिङ्गानां **अथवा** तद्विकल्पेन **शिवलाञ्छनधारिणां** भस्मरुद्राक्षादिशिवचिह्नानि धर्तुं शीलमासामिति शिवलाञ्छनधारिणः, तेषां, **शिवभक्तानां** शिवभक्तिसम्पन्नानां **अपायः परिवर्तते** प्रत्यूहः सम्भवति चेत्, **तत्र** तस्मिन् स्थाने समये वा **प्राणान् विहाय अपि** प्राणत्यागेनाऽपि **परिहारं** निवारणं **समाचरेत्** कुर्यात् । **शिवार्थं** शिवधर्मरक्षणाय **मुक्तजीवः चेत्** प्राणत्यागः क्रियते चेत् **शिवसायुज्यम् आप्नुयात्** शिवेन सायुज्यं शिवसायुज्यम्, सयुजोः भावः सायुज्यम्, "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (पा.५.१.१२४) इति ष्यञ् (य), सामीप्यादिचतसृषु मुक्तिषु एकतमं सायुज्यं भवति, आप्नुयात् प्राप्नुयात् ॥ आत्मघातः पापाय किलेति शङ्कां निवारयितुम् एतदुक्तम् ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अयं गणाचारः। गणाचारेषु अयं पार्वत्याचार इति मरितोण्टदार्यः। दाक्षायिण्याचार इति वक्तव्ये पार्वत्याचार इत्युक्तम् ॥ दक्षयज्ञे शिवस्य अनामन्त्रणमुद्दिश्य पितरं दक्षं प्रष्टुं गतवती दाक्षायिणी (सती) तत्र शिवनिन्दामाकर्ण्य आत्मार्पणेन यज्ञविधिं निवारितवती इति श्रूयते। अयमर्पणाचार इत्यपि कथ्यते ॥३४-३५॥

शिवनिन्दाकरं दृष्ट्वा घातयेदथवा शपेत्।
स्थानं च तत्परित्यज्य गच्छेद्यद्यक्षमो भवेत् ॥३६॥

व्याख्या— गणाचारमेवान्यादृशमाह – **शिवनिन्दाकरमिति**। **शिवनिन्दाकरं** शिवस्य निन्दा शिवनिन्दा, शिवनिन्दां करोति इति शिवनिन्दाकरः, तम्, शिवनिन्दाकरम्, तम् **दृष्ट्वा** – संवीक्ष्य, **घातयेत्** मारयेत् **अथवा** नो चेत् **शपेत्** शापं दद्यात्। **यदि अक्षमः भवेत्** यदि हन्तुं शप्तुं वा अशक्तः भवेत् चेत्, **तत् स्थानं** तं प्रदेशं **परित्यज्य** विहाय **गच्छेत्** चरेत् ॥ तत्राद्यः वीरभद्राचार इति द्वितीयो बसवेश्वराचारश्चेति मरितोण्टदार्यः। सूक्ष्मागमे वीरभद्रावतरणलीलावर्णने वीरभद्राचारः कथितः। तथा हि – "दक्षः प्रजापतिः पूर्वं शिवं त्यक्त्वातिमोहितः। हयमेधेन वै विष्णुं यष्टुं समुपचक्रमे ॥ वीरभद्राकृतिर्भूत्वा भद्रकालीप्रियः शिवः। तथाविधस्य यज्ञस्य वैकल्यमकरोत्तदा ॥" (उ.भा., क्रि.पा., २.३६-३७) इति। अत्र वीरभद्रेण दक्षस्य हननं नोक्तम्। वीरभद्राचारो नाम शिवनिन्दकस्य हननमेव। (म.भा., शान्तिपर्वन्, २९०)। बसवेश्वराचारो नाम शिवनिन्दा शिवभक्तनिन्दा तदाचारनिन्दा वा यत्र प्रवर्तते तत्स्थानं परित्यज्य गमनम्। श्रुतं किल यदा कल्याणपट्टने महान् कलहः समजनि तदा शिवभक्तानां हननादिकोलाहलपरिणामं दृष्ट्वा बसवेश्वरः तत्स्थानं परित्यज्य कूडलसङ्गमक्षेत्रं गतवान् इति ॥ बसवेश्वराचारः इत्यत्र नन्दिकेश्वराचारः इति पाठान्तरं लभ्यते ॥ नन्दिकेश्वराचारस्तु शिवनिन्दाकरम् उद्दिश्य शापोच्चारणम्। श्रूयते खलु व्यासस्य शिवनिन्दाकरं वाक्यं श्रुत्वा नन्दिकेश्वरस्तं शप्तवान्, तेन व्यासभुजस्तम्भनं जातम् इति ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इदमत्र शापोदाहरणम् ॥ अस्य गणाचारस्य विषयः प्रपञ्चितः सूक्ष्मागमे। तथा हि – "ममापरावताराणां लिङ्गाङ्गानां विशेषतः। निन्दां कुर्वन्ति ये मोहात् तेषां तु निरयो गतिः ॥ शक्तश्चेदसतां जिह्वां च्छिन्द्याद् यः स्वयमेव हि। न तस्य दोषलेशोऽस्ति शिवलोकं स गच्छति ॥ अशक्तश्चेत्तदान्यत्र गच्छेत्तत्र न संवसेत्। तत्संसर्गान्महादोषं प्राप्नोति हि न संशयः ॥ शिवनिन्दा भक्तनिन्दा निन्दा रुद्राक्षभस्मनोः। यत्र प्रवर्तते देवि न तत्र दिवसं वसेत् ॥" (उ.भा., क्रि.पा., ६.६७-७०) इति। अत्र विचार्यते – एष गणाचारस्तु अत्यन्तं तीव्रस्वरूपः। केवलं शिवभक्तानां स्वीयाचारविचारेषु श्रद्धाशैथिल्यं मा भूदित्यत्र उद्देशः। एतादृशविषयेषु केवलं क्षमा एवेदानीं साधु ॥ नो चेद् वीरशैवैर्म्लेच्छायते इति मम भीतिः ॥३६॥

यत्र चाचारनिन्दास्ति कदाचित्तत्र न व्रजेत्।
यद् गृहे शिवनिन्दास्ति तद्गृहं तु परित्यजेत् ॥३७॥

व्याख्या— गणाचारः एव प्रवर्तते – **यत्रेति**। **यत्र च** यस्मिन् स्थाने च **आचारनिन्दा** शिवाचारस्य निन्दाऽत्र आचारनिन्दा, सा, **अस्ति** भवति, **तत्र** तत्स्थानं **कदाचित्** कदापि **न व्रजेत्** न गच्छेत्। **यद्गृहे** यस्मिन् सदने **शिवनिन्दा** शिवस्य निन्दा **अस्ति** भवति **तद् गृहं तु** तत् सदनं तु, **परित्यजेत्** परित्यज्य गच्छेत् ॥३७॥

यः सर्वभूताधिपतिं विश्वेशानं विनिन्दति।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥३८॥

व्याख्या— शिवनिन्दकस्य प्रायश्चित्तो नास्तीत्याह – **य इति**। **यः** यः पुरुषः **सर्वभूताधिपतिं** सर्वेषां भूतानाम् अधिपतिः सर्वभूताधिपतिः सकलजीवानाम् अधिपतिः, तम्, **विश्वेशानं** विश्वेश्वरं **विनिन्दति** दूषयति **तस्य** तादृशस्य पुरुषस्य **वर्षशतैः अपि** वर्षाणां शतानि वर्षशतानि,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तैरपि **निष्कृतिः** प्रायश्चित्तविधानेन पापोपशान्तिः **कर्तुं न शक्या** सम्पादयितुं न शक्यते ॥३८॥

शिवपूजापरो भूत्वा पूर्वकर्म विसर्जयेत् ।
अथवा पूर्वकर्म स्यात् सा पूजा निष्फला भवेत् ॥३९॥

व्याख्या— वीरशैवप्रवेशपूर्वतनम् अन्यदेवतापूजादि कर्म त्यजेदित्याह – **शिवपूजापर इति । शिवपूजापरः भूत्वा** शिवाराधनयुक्तः सन् **पूर्वकर्म** पूर्वतनं कर्म, पूर्ववर्णाश्रितं कर्म **विसर्जयेत्** परित्यजेत् । **अथवा** विकल्पेन **पूर्वकर्म** पूर्ववर्णसम्बद्धं कर्म **स्यात्** अस्ति चेत् **सा पूजा** सा क्रियमाणा वीरशैवोक्ता पूजा **निष्फला** निर्गतं फलं यस्याः सा, फलरहिता, प्रयोजनहीना **भवेत्** स्यात् ॥ सन्ध्यावन्दनादिकं पूर्वकर्म इति मरितोण्टदार्येण अभिप्रेतम् ॥ अत्रेदमनुसन्धेयम् – शैवागमेषु वीरशैवेभ्योऽपि सन्ध्यावन्दनं विहितम् । तत्तु शैवसन्ध्यावन्दनं न तु त्रैवर्णिकैः क्रियमाणं सन्ध्यावन्दनम् ॥ तदुक्तम् – "ततः सन्ध्यामुपासीत प्राणायामपुरःसरम् । मदीयसान्ध्यकोपास्तिः प्रकीर्तिता । सवितुर्मण्डलस्वामी सावित्रीदेवतास्यहम् ॥" (का.आ., उ.भा., क्रि.पा., ३.५५) इति । तच्च मानसमुपासनमिति कथ्यते । तथा हि – "अन्तःप्रकाशमानस्य संवित्सूर्यस्य सन्ततम् । मनसा यदुपस्थानं तत्सन्ध्यावन्दनं विदुः ॥" (सुप्र.आ., ७.१०) इति ॥ सन्ध्यावन्दनस्य शैवं विधानमिदम्, इदं न त्यजेत्, इत्यभिप्रायः ॥ पूर्वकर्मत्यागश्चायं पञ्चाचारेषु शिवाचारेऽन्तर्भवति ॥३९॥

उत्तमां गतिमाश्रित्य नीचां वृत्तिं समाश्रितः ।
आरूढपतितो ज्ञेयः सर्वकर्मबहिष्कृतः ॥४०॥

व्याख्या— अत्र आरूढपतितत्वमाह – **उत्तमामिति । उत्तमां गतिं** उच्चतमां स्थितिम् **आश्रित्य** अवलम्ब्य (पुनः) **नीचां वृत्तिं** हीनाम् आचारपद्धतिम् **समाश्रितः** अवलम्बमानः पुरुषः **आरूढपतितः** प्रथमम् आरूढः पश्चात्पतितः आरूढपतितः, पथभ्रष्टः, इति **ज्ञेयः** ज्ञातव्यः, तादृशः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

औन्नत्यं प्राप्याऽधः पतितः पुरुषः **सर्वकर्मबहिष्कृतः** सर्वेभ्यः कर्मभ्यः धर्माचरणेभ्यः बहिर्भूतः, निषिद्धः इत्यर्थः ॥४०॥

पञ्चाक्षरोपदेशी च नरस्तुतिकरो यदि ।
सोऽलिङ्गी दुराचारी कुकविः स तु विश्रुतः ॥४१॥

व्याख्या— पञ्चाक्षरीजपशीलः सन् नरस्तुतिं न कुर्यादित्याह – **पञ्चाक्षरोपदेशीति** । **पञ्चाक्षरोपदेशी च** पञ्चाक्षरस्य उपदेशः अस्य अस्तीति, पञ्चाक्षरोपदेशी, तदस्य अस्तीति णिनिः (इन्), तादृशो भूत्वापि यदि **नरस्तुतिकरः** नरस्य स्तुतिः नरस्तुतिः तस्मिन् उद्युक्तः भवति चेत् **सः** तादृशः पुरुषः **अलिङ्गी** लिङ्गं अस्यास्तीति लिङ्गी, णिनिः (इन्); न लिङ्गी अलिङ्गी **स तु** स तावत् **कुकविः** कुत्सितः कविः कुकविः, नरस्तुतिः कुस्तुतिः, अतः कुकविः कुत्सितस्तोत्रपरः, इति **विश्रुतः** विगतं श्रुतं शास्त्रज्ञानं यस्मात् सः, शास्त्रज्ञानरहितवद् वर्तमानः भवति इति शेषः॥ गुरूपदेशेन पञ्चाक्षरमन्त्रं प्राप्तः पुरुषः स्वीयां वाचिकीं प्रतिभां शिवस्य शिवभक्तानां स्तुतिपरत्वेन योजनीया, न तु धनार्थी प्रतिष्ठार्थी वा नरस्तुतिपरत्वेन । तदुक्तम् – "शिवस्य शिवभक्तानां गुरोरपि विशेषतः। प्रशंसनं यदश्रान्तं चतुर्थं शीलमुच्यते ॥ अन्येषां चैव देवानां मानुषाणां च जातुचित् । प्रशंसावर्जनं यत्तत् पञ्चमं शीलमुच्यते ॥" (चं.आ., उ.भा., क्रि.पा., ९.५६-५७) इति । अत्र शिवादिस्तुतिपरत्वमेकं शीलमिति, शिवादन्यदेवस्तुतिं मानुषस्तुतिं वाऽकरणीयत्वं चाऽपरं शीलमिति च, पञ्चाचारेषु मध्ये गणाचारान्तर्गतत्वेन कथितेषु चतुःषष्टिशीलेषु चतुर्थं पञ्चमं चेति शीलद्वयम् ॥४१॥

चर्मपात्रे जलं तैलं न ग्राह्यं भक्तितत्परैः ।
गृह्यते यदि भक्तेन रौरवं नरकं व्रजेत् ॥४२॥

व्याख्या— भक्तस्य चर्मपात्रोपयोगः निषिद्ध इत्याह – **चर्मपात्रे** इति । **भक्तितत्परैः** शिवभक्तिपरायणैः **चर्मपात्रे** चर्मनिर्मिते, प्राणित्वचा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निर्मिते पात्रे **जलं** वारि **तैलं वा** तिलस्य इदं तैलम्, तद् वा, "तस्येदम्" (पा.४.३.१२०) इति अण्; तिलस्य तत्सदृशस्य वा विकारः, "तस्य विकारः" (पा.४.३.१३४) इत्यपि अण्; **न ग्राह्यं** न स्वीकार्यम् । **यदि भक्तेन गृह्यते** भक्तेन स्वीक्रियते चेत् तर्हि सः **रौरवं नरकं** रौरवस्वरूपं निरयं **व्रजेत्** गच्छेत् ॥ भक्तेन चर्मपात्रं कदापि नोपयोक्तव्यम् । चर्मपात्रनिर्माणे प्राणिहिंसा त्वनिवार्या भवति । अतः भक्तः अपि चर्मपात्रोपयोगेन प्राणिहिंसायाः समर्थको जायेत इति तन्निषेधः ॥४२॥

न तस्य सूतकं किञ्चित्प्राणलिङ्गाङ्गसङ्गिनः ।
जन्मनोऽत्थं मृतोत्थं च विद्यते परमार्थतः ॥४३॥

व्याख्या— वीरशैवस्य परमार्थतो न किमपि सूतकमित्याह – **नेति** । **तस्य प्राणलिङ्गाङ्गसङ्गिनः** प्राणलिङ्गे प्राणलिङ्गात्मके परमात्मनि अङ्गस्य जीवात्मनः सङ्गः अस्तीति प्राणलिङ्गाङ्गसङ्गी, तस्य, तादृशस्य, **जन्मनोत्थं** जन्मना जननेन उत्थम् उत्पन्नं **मृतोत्थं च** मृतेन उत्थं मरणेन उत्पन्नं च **किञ्चित्** किमपि **सूतकम्** आशौचं **परमार्थतः** परमश्चासौ अर्थश्च परमार्थः, तस्मात्, पञ्चम्यर्थे तसिः, तत्त्वतः, **न विद्यते** नास्ति ॥ अत्र 'परमार्थतः' इत्यस्य अन्ततः इत्यर्थः, तात्त्विकदृष्ट्या न तु लौकिकदृष्ट्या इति यावत् । तात्त्विकदृष्ट्या विचार्यमाणे नास्ति सूतकं किमपीति भावः । जननसूतकम्, मरणसूतकम्, रजस्सूतकम्, जातिसूतकम्, उच्छिष्टसूतकं चेति पञ्चसूतकानि कथितानि । वीरशैवस्य एतानि सूतकानि पारमार्थिकदशायां न सन्ति परं तु लौकिके नित्यव्यवहारे सन्त्येव । जननसूतकं दशदिनावधिकम्, मरणसूतकं द्वादशदिनावधिकम्, रजस्सूतकं दिनत्रयावधिकं चतुर्दिनावधिकं वा, अन्तिमं द्वयं निरवधिकं च, इत्युच्यते शिष्टाचाराभिज्ञैः । शैवागमेषु सूतक (आशौच) विषयः बहुधा चर्चितः । तथा हि – मकुटागमे रुद्रपरशिवयोः संवादे रुद्रेण पृच्छ्यते – "शाम्भवव्रतशुद्धेषु कथमाशौचसंगतिः । भवद्भावनया त्यक्तगात्रेषु व्रतसेविषु ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अमृतेषु कथं नु स्यात् तनोराशौचसंगमः । एवं मे संशयं च्छिन्दि सर्वज्ञानैकसागर ॥'' इति । तदा परशिव आह – ''शाम्भवव्रतशुद्धानां मत्सेवारतात्मनाम् । मुक्तिभाजां तनुत्यागहेतुकाशौचसंगमः ॥ यद्यप्य-संभाव्य एव प्राणिदोषाऽप्रकाशनात् ॥ तथापि तेषां संसारसम्बद्ध-तनुयोगिनाम् । देहोत्पत्तिविनाशोत्थमाशौचमिह विद्यते ॥ यतीनां तद्धि संसारयोगाभावन्न युज्यते ॥ तस्मात्संसारसम्पर्को हेतुराशौचसंगतेः । तद्योगादस्तिव्रतिनामाशौचमिति निश्चिनु ॥'' इति । (च.पा., १०.२-३, ५-७) । अन्यत्राप्युक्तं यत्यादीनां नास्त्याशौचमिति । तथा हि – ''नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् । न जन्ममरणोत्थमा-शौचमिह विद्यते ॥'' (म.आ., च.पा., १०.२६); ''यतीनां वनस्थानां नैष्ठिकानां च वर्णिनाम् । जानिजं मृतिजं वापि नाऽऽशौचमिह विद्यते ॥'' (चं.आ., च.पा., ६.१३) । केषुचन सन्दर्भेष्वपि सूतकाचरणं नाऽपेक्ष्यते । तथा हि – ''स्वकर्मकाले संशुद्धिः सर्वशास्त्रेषु चोदिता । अतः सन्ध्या-मर्चनमप्याशौचे न परित्यजेत् ॥'' (चं.आ., च.पा., ६.१६); ''सूतके मृतके चैव सन्ध्यां पूजां न सन्त्यजेत् । उपांशुसन्ध्यां पूजां तु कुर्यात् त्रिकरणैरपि ॥'' (म.आ., च.पा., १०.२८) । इममेव सम्प्रदायमनुसरतां वीरशैवानामपि परमार्थतः सूतकं नास्ति । केवलं लौकिकदृष्ट्या तु तदस्तीति निश्चीयते । एतदेवोक्तमत्र सिद्धान्तशिखामणौ ॥४३॥

लिङ्गार्चनरतायाश्च ऋतौ नार्या न सूतकम् ।
तथा प्रसूतिकायाश्च सूतकं नैव विद्यते ॥४४॥

व्याख्या— एतदेव प्रपञ्च्यते – **लिङ्गार्चनरतायाश्चेति** । **ऋतौ** मासिकरजोदर्शनकाले **लिङ्गार्चनरतायाः** शिवपूजानिष्ठायाः **नार्याः** स्त्रियः **न सूतकम्** सूतकं न विद्यते । **तथा** एवमेव **प्रसूतिकायाश्च** शिशुजनन-प्रयुक्तायाश्च स्त्रियः च, **सूतकं नैव विद्यते** आशौचः न खलु संभवति ॥ शैवागमादिप्रमाणमवलब्यैव अत्रेदमुक्तम् । उक्तं कारणागमोत्तरे – ''दीक्षापवित्रिताङ्गत्वाद् लिङ्गस्पर्शो न दुष्यते । रजोवत्त्वादिकालेषु कार्या

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूजा प्रयत्नतः ॥'' (क्रि.पा., २.७७) इति । श्रीकरभाष्ये श्रीपतिपण्डिताचार्य इमं विषयं विमृश्य तार्किकनिर्णयं दत्तवान् । तथा हि – ''जाताशौचमृताशौचादौ स्वकर्तृकयावज्जीवाग्निहोत्रदीक्षितस्य स्वनित्योपासनाधिकारवत् शैवदीक्षितस्य जाताशौचादावपि लिङ्गपूजामात्राधिकारवत्त्वम् । अत एव– 'सर्वलिङ्गं स्थापयति' (तै.आ., १०.१६.१) इत्यत्र पवित्रशब्देन धृतलिङ्गस्य सर्वकालधारणपूजाधिकारयोग्यत्वं सूचितम् । 'शैवं देवार्चनं यस्य यस्य चाग्निपरिग्रहः । ब्रह्मचारियतीनां च शरीरे नास्ति सूतकम् ॥ लिङ्गार्चनरता नारी सूतिका वा रजस्वला । रविरग्निर्यथा वायुस्तथा कोटिगुणः शुचिः ॥ जातके मृतके वापि न त्याज्यं शिवपूजनम् ॥' इत्यादि पाराशरस्मृति-सिद्धान्तशिखामण्यादौ लिङ्गाङ्गिदेहस्य पवित्रत्वव्यपदेशाल्लिङ्गधारणपूजादेर्न विरोधः । ... 'स्वेष्टलिङ्गैकपूजायां नैवाशौचं विधीयते । पौण्डरीके रजःस्त्रीणां स्वाग्निहोत्रे यथा तथा ॥ अकरस्पर्शयोग्यापि यथा जिह्वा महेश्वरि । मन्त्रोच्चारणमात्रस्य पूता भवति भूतले ॥ तथा सूतकिनः शैवाः पूजामात्रसुनिर्मलाः । नान्यस्पर्शानुकूला स्युरिति वेदानुशासनम् ॥' इति सिद्धान्तागमादिषु शिवपूजामात्रयोग्यताश्रवणात् ॥'' (श्रीकर.भा., भागः-१, सू.१-१.१, पृ.२२-२३) । एवं सूतककाले शिवदीक्षासम्पन्नाः वीरशैवाः लिङ्गधारणपूजामात्रनिर्मलाः, परं तु अन्यविषये अन्यस्पर्शादिषु सूतकिन एवेति श्रीपतिपण्डिताराध्यः । नन्दिकेश्वरशिवाचार्यस्तु स्वीयायां लिङ्गधारणचन्द्रिकायां वीरशैवानां सर्वत्रापि सूतकं नास्तीति मतं पुरस्करोति । नन्दिकेश्वरशिवाचार्यस्तु स्वीयायां लिङ्गधारणचन्द्रिकायां श्रीकरभाष्ये प्रयुक्तप्रमाणान्येवाऽवलम्ब्य पद्मपुराणशिवरहस्ययोरुपोद्बलकप्रमाणत्वेन स्वीकृत्य च ''लिङ्गधारणतत्पूजाव्रतस्यापि गुरुकृतदीक्षासमये यावज्जीवभावित्वेन सङ्कल्पकरणाद् आन्तरान्तिकाशौचादिप्रसक्तावपि कर्तव्यमेवेत्यङ्गीकरणीयम् । रजस्वलानां धारणाद्यंशे परिशुद्धत्वे कर्मान्तरेऽपि परिशुद्धिः स्यादिति तुल्यम्'' इति निश्चिनोति । एतन्मतानुसारेण रजःसूतकसमये जननसूतकसमये च स्त्रीणां न केवलं लिङ्गधारणपूजयोः परं तु अन्येषु व्यवहारेष्वपि सूतकं नास्ति । एवमेव वीरशैवानां मरणसूतकमपि नास्ति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गृहे कस्यचन लिङ्गैक्यं जायते चेत्, मृतदेहं भस्मरुद्राक्षैः समलङ्कृत्य, देहे धृतलिङ्गस्य पूजा विधीयते । अनन्तरं धृतलिङ्गेन सहितो देहो भूमौ निक्षिप्यते । गृहं प्रति पुनरागता बन्धुजनाः स्नानं कुर्वन्ति, गृहस्य भूमिं शुद्धीकृत्य गुरुम् आमन्त्र्य गुरुपूजां कृत्वा पादोदकप्रसादौ स्वीकुर्वन्ति । एतद्बाह्य शुद्धीकरणं केवलं स्वच्छतादृष्ट्या न तु सूतकनिवारणदृष्ट्या । तदनन्तरं सर्वेषु गृहेषु यथापूर्वं स्वेष्टलिङ्गपूजा प्रवर्तते एव । तदा सूतकस्य स्मरणमपि नास्ति । उच्छिष्टसूतकविषये इदम् अनुसन्धेयम्— गुरुजंङ्गम-पादोदकप्रसादस्वीकारे वीरशैवानाम् उच्छिष्टसूतकं नास्ति । एकस्मिन्नेव पात्रे सङ्गृहीतं पादोदकं प्रसादं च सर्वे भक्तिभावेन स्वीकुर्वन्ति । अन्यत्र उच्छिष्टस्वीकाराभावः केवलम् आरोग्यनियमदृष्ट्या न तु सूतकाचरण-दृष्ट्या । जातिसूतकं वीरशैवानां मध्ये नास्ति, तत्र शिवदीक्षा सर्वं वर्णभेदं जातिभेदं च निष्कास्य सर्वान् एकरसभावेन बध्नाति ॥४४॥

गृहे यस्मिन् प्रसूता स्त्री सूतकं नात्र विद्यते ।
शिवपादाम्बुजसंस्पर्शात् सर्वपापं प्रणश्यति ॥४५॥

व्याख्या— लौकिकदृष्ट्या शिवपादस्पर्शेन पापनाशः इत्याह – **गृहे** इति । **यस्मिन् गृहे** यत्र सदने **प्रसूता स्त्री** प्रसवित्री नारी, अस्तीति शेषः, अत्र अस्मिन् विषये **सूतकं न विद्यते** आशौचः नैव भवति । **शिवपादाम्बुजसंस्पर्शात्** अम्बौ जायते इति अम्बुजम्, कमलम्, शिवस्य पादौ एव अम्बुजे शिवपादाम्बुजे तयोः संस्पर्शः संपर्कः, तस्मात्, **सर्वपापं** सकलं दुष्कृतं **प्रणश्यति** नाशं गच्छति ॥ अत्र शिवपूजादिकमेव शिव-पादाम्बुजस्पर्श इत्यवगन्तव्यम् ॥४५॥

शिवस्थानानि तीर्थानि विशिष्टानि शिवार्चकः ।
शिवयात्रोत्सवं नित्यं सेवेत परया मुदा ॥४६॥

शिवक्षेत्रोत्सवमहायात्रादर्शनकाङ्क्षिणाम् ।
मार्गेऽन्नपानदानं च कुर्यान्माहेश्वरो जनः ॥४७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— लिङ्गपूजापरायणस्य तीर्थयात्रादिकं निषिद्धं किमित्यत्राह— **शिवस्थानानीति** । **शिवार्चकः** इष्टलिङ्गपूजातत्परः शिवभक्तः, **विशिष्टानि** सर्वोत्कृष्टानि **शिवस्थानानि** श्रीपर्वतादिशिवक्षेत्राणि, **तीर्थानि** काशीहरद्वारादि तीर्थानि तीर्थक्षेत्राणि, **शिवयात्रोत्सवं** (च) शिवदर्शनयात्रा शिवयात्रा, शिवयात्रा एव उत्सवः, शिवयात्रोत्सवः, तम् **परया मुदा** परमोत्कृष्टेन आनन्देन **सेवेत** भजेत ॥ **माहेश्वरो जनः** महेश्वरस्य अयं माहेश्वरः, शिवभक्तजनः **शिवक्षेत्रोत्सवमहायात्रादर्शनकाङ्क्षिणाम्** शिवस्य क्षेत्रं शिवक्षेत्रम्, तत्र उत्सवः शिवक्षेत्रोत्सवः, महती यात्रा महायात्रा, सुदूरपर्यन्तत्वाद् बहुजनसम्मर्दयुक्तत्वाद्वा महतीयं यात्रेति अवगन्तव्यम्, शिवक्षेत्रोत्सव एव महायात्रा, महायात्राक्षेत्रं इति यावत्, तद्दर्शनं काङ्क्षन्ति इति तद्दर्शनकाङ्क्षिणः, तेषाम्, **मार्गे** पथि, **अन्नपानदानम्** अन्नं च पानं च अन्नपाने तयोः दानम्, अन्नपानदानं अन्नोदकदानं, **कुर्यात्** दद्यात् ॥ तीर्थक्षेत्राणां दर्शनं शिवार्थं क्रियमाणेषु रथोत्सवादि महोत्सवेषु भागग्रहणं च वीरशैवानां नैव निषिध्येते, परं तु तदर्थं लिङ्गार्चनभङ्गो मा भूदित्याशयः । लिङ्गार्चनमादौ कर्तव्यम्, तदनन्तरमेव क्षेत्रदर्शनम् उत्सवे भागग्रहणं च कुर्यात् । श्रीशैलादिषु तीर्थक्षेत्रेषु लिङ्गार्चनस्य क्षेत्रमहिम्ना महत् फलम् इति अभियुक्तानां मतम् ॥४६-४७॥

नान्नतोयसमं दानं न चाहिंसापरं तपः ।
तस्मान्माहेश्वरो नित्यमन्नतोयप्रदो भवेत् ॥४८॥

व्याख्या— अन्यदानापेक्षया अन्नपानदानमुत्कृष्टतरमित्याह – **नेति** । **अन्नतोयसमं** अन्नं च तोयं च अन्नतोये, ताभ्यां समं समानं अन्नतोयसमं **दानं** दानान्तरं **न** नास्ति, **अहिंसापरं** न हिंसा अहिंसा, तस्याः परम् अधिकं श्रेष्ठतरं **तपः** तपश्चरणं **न** नास्ति । **तस्मात्** उक्तकारणवशात् **माहेश्वरः** शिवभक्तः **नित्यं** सर्वदा **अन्नतोयप्रदः** अन्नं च तोयं अन्नतोये, अन्नतोये प्रददाति इति अन्नतोयप्रदः अन्नपानदानशीलः **भवेत्** स्यात् ॥ अन्नपानापेक्षायाः प्राथम्यं सर्वेषां जन्तूनाम् । अत एवोक्तं – "नान्नतोय समं दानम्" इति ॥४८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वमार्गाचारवर्तिभ्यः स्वजातिभ्यः सदाव्रती ।
दद्यात्तेभ्यः समादद्यात् कन्यां कुलसमुद्भवाम् ॥४९॥

व्याख्या— कन्यादानं कस्मै कर्तव्यम् इत्यत्राह – **स्वमार्गाचार-वर्तिभ्य इति । सदाव्रती** सदा व्रतम् अस्य अस्तीति सदाव्रती, (णिनिप्रत्ययः), सर्वदा व्रतनिष्ठः, नित्यशिवाचारनिरतः शिवभक्तः, **स्वमार्गाचारवर्तिभ्यः** स्वस्य मार्गः स्वमार्गः, तस्य आचारः स्वमार्गाचारः, तस्मिन् वर्तन्ते इति स्वमार्गाचारवर्तिनः, तेभ्यः, वीरशैवात्मकस्वमार्गाचार निष्ठेभ्यः **स्वजातिभ्यः** स्वस्याः जातिः येषां ते स्वजातयः, तेभ्यः स्वजातीयभक्तेभ्यः **कुलसमुद्भवां** स्वीयकुले समुत्पन्नां **कन्याम्** अनूढां पुत्रीं **दद्यात्** यच्छेत्, **तेभ्यः** तादृशेभ्यः **समादद्यात्** समादेयात् ॥ वैवाहिकसम्बन्धा वीरशैवाचारसम्पन्नानां मध्ये भवेयुरिति नियमः शास्त्रेषु उक्तः । विभिन्नाचारवर्तिनां मध्ये वैवाहिकसम्बन्धो जायते चेत् संस्कार-संस्कृतिभेदवशाद् आचारविचारेषु मतभेदः कलहाय कल्पेत इत्यस्ति तादृशनियमः । इदमप्यत्राऽनुसन्धेयम् – विविधवर्णमूलाद् आगता जना दीक्षाग्रहणपूर्वकं वीरशैवे सम्मिलिताः सन्ति । अतः स्वस्वकुटुम्बकर्तव्य-वशाद् वीरशैवे माहेश्वराः, वणिजः, स्वर्णकाराः, कुलालाः, तक्षाः, इत्यादि समुदायविशेषा भवन्ति । तेषां मध्ये यो भेदो वर्तते स वैवाहिकसम्बन्धे बाधको मा भूदिति विचारणीयम् ॥४९॥

एवमाचारसंयुक्तो वीरशैवो महव्रती ।
पूजयेत्परया भक्त्या गुरुं लिङ्गं च सन्ततम् ॥५०॥

व्याख्या— शिवाचारनिष्ठो वीरशैवः श्रीगुरुं लिङ्गं च पूजयेदित्याह – **एवमिति । एवम्** उक्तरीत्या **आचारसंयुक्तः** पञ्चाचारसम्पन्नः, **महाव्रती** महद्व्रतनिरतः **वीरशैवः** वीरशैवभक्तः **परया भक्त्या** परमोत्कृष्टया भगवद्रत्या **सन्ततं** निरन्तरं **गुरुं लिङ्गं च** श्रीगुरुं लिङ्गरूपं परमात्मानं च **पूजयेद्** अर्चयेत् ॥ अत्र आचारशब्देन पञ्चाचाराः सूचिताः । लिङ्गाचारः, सदचारः, शिवाचारः, गणाचारः, भृत्याचारश्चेति पञ्चाचाराः । (९.२७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

– तम श्लोकस्य व्याख्यायां पञ्चाचाराः सम्यक् प्रपञ्चिताः)। 'महाव्रती' इति वीरशैवस्य नामान्तरम्। अन्यान्यपि पर्यायपदानि सन्ति वीरशैवस्य। तदुक्तं – "अत्याश्रमं पाशुपतं शाम्भवं तच्छिरोव्रतम्। इत्येवं नामभिः पुण्यैर्निगामान्तेषु गीयते ॥" (का.आ., क्रि.पा., १.९) इति। 'वीरव्रतम्' इत्यत्र वीरशब्दः विशिष्टार्थे प्रयुक्तः। तदुक्तं वीरशैवधर्मशिरोमणौ – "वीरत्वमस्य न धनेन न वा बलेन, नो कार्यतश्च विहितं दृढशम्भुभक्त्या। वीरस्तुरीय इति शङ्करभाषणेन, श्रीवीरशैमतगान्न परोऽस्ति कश्चित् ॥" (१.१६) इति। क्रियासारे 'विकल्परहितः शैवः वीरशैवः' इति निष्पत्तिर्दत्ता– "विशब्दो वा विकल्पार्थो रशब्दो रहितार्थकः।" (क्रि.सा., भागः - १, पृ.११) इति; "विकल्परहितं शैवं वीरशैवं प्रचक्षते।" (तत्रैव) इति च। पारमेश्वरेऽपि (८.७-१६) वीरशब्दनिर्वचनपूर्वकं वीरशैवशब्दस्य सुदीर्घं विवरणं दत्तम् – "वीरत्वं नाम देवेशि यथा वीरो रणे भटः। तथा मते च मद्भक्त्या वीरो वैराग्यतो दृढात्। ईषणत्रयनिर्मुक्ता ज्ञानविज्ञानतत्पराः। दृढवैराग्यसम्पन्ना वीरास्ते शिवयोगिनः ॥ अन्धा ये लिङ्गिनो देवि परस्त्रीरूपदर्शने। युवानश्चापि पटवस्ते वीराः शिवयोगिनः ॥ ये मूका लिङ्गिनो देवि परदोषानुवादने। सर्वज्ञा अपि वा बालास्ते वीराः शिवयोगिनः ॥ ये षण्डाः परकान्तासु पङ्गवोऽन्यपीडने। अजिह्वा ये रसास्वादे वीरास्ते शिवयोगिनः ॥ अमानिनोऽदम्भिनश्चाहिंसाक्षान्त्यार्जवान्विताः। आचार्योपासनपरा वीरास्ते शिवयोगिनः ॥ शौचात्मनिग्रहस्थैर्यैरनहङ्कारशालिनः। सर्वत्र समचिन्ता ये वीरास्ते शिवयोगिनः ॥ विशुद्धभक्ता मयि ये ये च वैकान्तसेविनः। मम ध्यानरता नित्यं वीरास्ते शिवयोगिनः ॥" इति ॥५०॥

– इति भक्तमार्गक्रियास्थलम् –

१०. अथ उभयस्थलम् – (१०)

गुरोरभ्यर्चनेनापि साक्षादभ्यर्चितः शिवः।
तयोर्नास्ति भिदा काचिदेकत्वात्तत्त्वरूपतः ॥५१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" (६.२३) इति श्वेताश्वतरोपनिषदुक्तदिशा शिवस्य श्रीगुरोश्च मध्ये भेदो नास्तीति उभयस्थलमारभते ग्रन्थकृत् – **गुरोरिति** । **गुरोः** श्रीगुरोः **अभ्यर्चनेन** पूजनेन **साक्षात् स्वयं शिवः** अपि परशिवोऽपि **अभ्यर्चितः** पूजितः । **तयोः** शिवगुर्वोर्मध्ये **तत्त्वरूपतः** परमार्थदृष्ट्या **एकात्वात्** ऐक्यात् **काचित्** ईषदपि **भिदा** भेदः **नास्ति** न सम्भवति ॥ शिवं गुरुं च ये समानया भक्त्या समुपासते ते नितरां श्रेयः प्राप्नुवन्ति । शिवगुर्वोः न कोऽपि भेदः । तथा हि – "नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं, विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् । एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं, भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥" (शु.र.उ., १-ध्यानम्) । अत्र ध्याने शिवः श्रीगुरुश्च समानविशेषणैर्वर्ण्येते । उभावपि नित्यं परमसुखमयौ, परमसुखप्रदातारौ, ज्ञानस्वरूपौ, प्रपञ्चातीतौ, गगनवद्रूपरहितौ, 'तत्त्वमसि' इत्यादि महावाक्यलक्ष्यौ, अद्वितीयौ, नित्यौ, मलरहितौ, अचलौ, सर्वधीसाक्षिभूतौ, भावनातिरिक्तौ, त्रिगुणरहितौ च । तादृशौ शिवगुरू वन्दनीयौ, आकाशवद्रूपरहितावपि अद्वितीयावपि भक्तहिताय परिच्छिन्नस्वरूपावपि । अस्ति स्कन्दपुराणवचनमपि– "पाशमोक्षं पशूनां हि प्रत्याक्रियत इत्यतः । पाशमोक्षकरः श्रीमान् स गुरुः शिव इष्यते ॥" इति ॥५१॥

यथा देवे जगन्नाथे सर्वानुग्रहकारके ।
तथा गुरुवरे कुर्यादुपचारान् दिने दिने ॥५२॥

व्याख्या— हरगुर्वोः सर्वोपचारान् कुर्यादिति कथ्यते – **यथेति** । **यथा** येन प्रकारेण **सर्वानुग्रहकारके** सर्वेभ्यः अनुग्रहं करोति इति, सर्वानुग्रह+कृ+ण्वुल् –"ण्वुल्तृचौ" (पा.३.१.१३३), सर्वानुग्रहकृ+अक – "युवोरनाकौ" (पा.७.१.१) – सर्वानुग्रहकारकः –"अचो ञ्णिति" (पा. ७.२.११५) इति कृ इत्यस्य वृद्धि (कार्); सर्वेभ्यः कृपाकरः, तस्मिन्, **जगन्नाथे** जगतां नाथः जगन्नाथः, जगतां स्वामी, तस्मिन्, **देवे** परशिवे,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तथा तेन प्रकारेणैव **गुरुवरे** आचार्यश्रेष्ठे **दिने दिने** प्रतिदिने **उपचारान्** नवविधभक्त्याद्युपचारान्, **कुर्यात्** विदधीत ॥ 'उपचार' शब्देन नवविध-भक्तयः पूजाप्रकाराश्च गृह्यन्ते । तथा हि – "गुरुं स्वगृहमायान्तं दृष्ट्वा भक्तियुतो जनः । नत्वा सदासनं दत्त्वा चासीत तदनुज्ञया ॥ स्वाचार्य-चरणद्वन्द्वप्रक्षालितजलं सदा । यः पिबेद् धारयेद्भक्त्या सर्वपापैः प्रमुच्यते ॥ चन्दनं चाक्षतं पुष्पं स्वर्णं ताम्बूलमम्बरम् । पात्रे निधाय गुरवे शिष्यो दद्यान्न पापिना ॥ संभोजयित्वा स्वगुरुं पश्चाद् भुञ्जीत बुद्धिमान् ॥ गुरोः पुरस्ताद् यो भुङ्क्ते गुरुद्रोही स उच्यते । ताम्बूलमुत्तमं तस्मै ततः पात्रेण दापयेत् ॥ पश्चादिष्टानि वस्तूनि दत्त्वा नत्त्वा क्षमापयेत् ॥" (चं.आ., क्रि.पा., २.२१-२५) ॥ योगशिखोपनिषदि शिवगुर्वोः पूजा समानभक्त्या करणीया इत्युक्तम् – "न गुरोरधिकं कश्चित् त्रिषु लोकेषु विद्यते । दिव्यज्ञानोपदेष्टारं देशिकं परमेश्वरम् ॥ पूजयेत् परया भक्त्या तस्य ज्ञानफलं भवेत् ॥ यथा गुरुस्तथैवेशो यथैवेशस्तथा गुरुः । पूजनीयो महा-भक्त्या न भेदो विद्यते तयोः ॥" (योग.शि.उ., ५.५६-५७) इति ॥५२॥

अप्रत्यक्षो महादेवः सर्वेषामात्ममायया ।
प्रत्यक्षो गुरुरूपेण वर्तते भक्तिसिद्धये ॥५३॥

व्याख्या— श्रीगुरुर्नाम प्रत्यक्षः परमेश्वर इत्याह – **अप्रत्यक्ष इति । महादेवः** परमेश्वरः **आत्ममायया** आत्मनः माया आत्ममाया, तया, स्वमायया **सर्वेषां** सकलप्राणिनाम् **अप्रत्यक्षः** अदृश्यः सन् **भक्तिसिद्धये** भक्तेः सिद्धिः भक्तिसिद्धिः, तस्यै, भक्तिसिद्ध्यर्थं **गुरुरूपेण** गुरोः रूपेण, गुरुस्वरूपेण **प्रत्यक्षः** दृश्यमानः **वर्तते** अस्ति ॥ "साक्षाद् भर्गो नराकृतिः" इति गुरोः स्वरूपमुक्तम् । स्वमाययाऽप्रत्यक्षोऽपि महेश्वरः गुरुरूपेण प्रत्यक्षो भूत्वा भक्तानां भक्त्याद्युपचारान् स्वीकरोति, अनुगृह्णाति च । तेनैव भक्तिसिद्धिर्भवति ॥ शिवस्तु मायाशक्तिविशिष्टः । –"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।" इति श्वेताश्वतरश्रुतिवाक्यं प्रसिद्धमेव । तत्रैवेदमप्युक्तम् – "अस्मान् मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः ॥" (श्वे.उ., ४.९) । शिवगुर्वोः समानत्वं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विद्यास्वरूपेणेत्युक्तं चन्द्रज्ञानोत्तरे – "यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः । गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥" (क्रि.पा., २.७) इति । अत्र द्वादशसाहस्रीवचनम् – "यथा सर्वामराणां हि महादेवो महात्मकः । तथा समस्तलोकानां गुरुरेव महात्मकः ॥" इति ॥५३॥

शिवज्ञानं महाघोरसंसारार्णवतारकम् ।
दीयते येन स गुरुः कस्य वन्द्यो न जायते ॥५४॥

व्याख्या— गुरु सर्वस्य वन्द्यो भवतीत्याह – **शिवज्ञानमिति । येन** येन महात्मना **महाघोरसंसारार्णवतारकम्** महान् घोरः महाघोरः, महाघोरश्चासौ संसारश्च महाघोरसंसारः, स एव अर्णवः महाघोर-संसारार्णवः तं तारयति इति महाघोरसंसारार्णव + तृ(प्लवनतरणयो) + ण्वुल् – "ण्वुल्तृचौ" (पा. ३.१.१३३); महाघोरसंसारार्णवतारकम्, "युवोरनाकौ" (पा.७.१.१) इति अक; "अचो ञ्णिति" (पा.७.१.११५) इति वृद्धि (तृ-तार्); अत्यन्तभयङ्करभवसमुद्राद् तारयितुं समर्थम्, **शिवज्ञानं** शिवस्वरूपावबोधः **दीयते** अनुगृह्यते, **स गुरुः** तादृशः गुरुः **कस्य** कस्य पुरुषस्य **वन्द्यः** वन्दनीयः **न जायते** न भवति । सर्वस्यापि वन्द्यः भवतीत्यर्थः ॥ गुरुरेव मोक्षमार्गप्रदर्शकः । जननमरणचक्रान्मुक्तिरेव मोक्षः । 'संसारार्णवः' इत्यत्र रूपकालङ्कारः । श्रीगुरुः शिष्यस्य सूक्ष्म-कारणशरीरयोः प्राणलिङ्गं भावलिङ्गं चेति उभे आभ्यन्तरलिङ्गे संस्थाप्य बाह्ये स्थूलशरीरे आभ्यन्तरलिङ्गद्वयानुसन्धनपूर्वकम् इष्टलिङ्गम् अनुगृह्णाति। एवं त्रिविधदीक्षाद्वारा त्रिविधलिङ्गं प्रदाय भक्तम् अष्टावरणसम्पन्नं कृत्वा षट्स्थलात्मकमार्गे प्रवर्तयति ॥ एषैव मुक्तिमार्गः । अत एवोक्तम् – "मोक्षस्य दीक्षासंप्राप्त्यै गुरुः स्यान्मूलकारणम् । न विना गुरुणा सिद्ध्यै साधनानि भवन्त्यलम् ॥" (चं.आ., क्रि.पा., २.५) । शिवज्ञानप्रवक्ता श्रीगुरुः सर्वैर्वन्दनीयः ॥५४॥

यत्कटाक्षकलामात्रात् परमानन्दलक्षणम् ।
लभ्यते शिवरूपत्वं स गुरुः केन नार्चितः ॥५५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— गुरुरेवाऽर्चनीय इत्याह – **यत्कटाक्षकलामात्रादिति**। **यत्कटाक्षकलामात्रात्** यस्य कटाक्षः यत्कटाक्षः अपाङ्गेक्षणम्, कटं गण्डस्थलम् (कपोलभागः), कटम् अक्षति व्याप्नोति इति कटाक्षः, "नन्दिग्रहपचादिभ्यो ल्युणिन्यचः" (पा. ३.१.१३४) इति अच् प्रत्ययः; यत्कटाक्षस्य कलायाः मात्रम्, तस्मात्; यस्य अपाङ्गेक्षणांशात् केवलात्, **परमानन्दलक्षणं** परमश्चासौ आनन्दश्च परमानन्दः, स एव लक्षणं स्वरूपं यस्य तत्, **शिवरूपत्वं** शिवस्य रूपं स्वरूपं शिवरूपम्, तस्य भावः, शिवरूपत्वं **लभ्यते** प्राप्यते, **सः गुरुः** तादृशः श्रीगुरुः **केन न अर्चितः** केन पुरुषेण न पूजितः? सर्वैः पूजितः इत्यर्थः॥ श्रीगुरोः प्रसादरूपेण वीक्षणेन, कृपादृष्ट्या मार्गदर्शनेन च भक्तो मोक्षं प्राप्नोति। शिवरूपत्वप्राप्तिरेव मोक्षप्राप्तिः। शिवस्यांशभूतो जीवः पुनः अंशिभूते शिवे निमज्जनं मोक्षः। श्रीगुरोर्मार्गदर्शनं 'दशमदृष्टान्तेन' विशदयितुं शक्यते। तथा हि – कस्यचन गुरोर्दश शिष्याः सरसि स्नातुं गता आसन्। स्नानानन्तरं स्वसमूहस्य संख्यां गणयितुमुद्युक्तः कश्चित् शिष्यो गणनं कृत्वा नवैव शिष्याः सन्ति इति निर्णीय "एको नष्टः" इत्युक्तवान्। अनेन सर्वे चकिता बभूवुः। प्रत्येकोऽपि शिष्यः तथैव गणयित्वा नवैव शिष्याः सन्तीति निर्णीतवान्। 'अस्मास्वेको नष्टः' इति चिन्तयन्तो दुःखिताः सर्वे शिष्याः गुरुकुलं पुनः प्राप्य श्रीगुरुं विज्ञापयामासुः "एकः शिष्यो नष्टः" इति। श्रीगुरुस्तेषां भ्रान्तिं विज्ञाय एकेन शिष्येण पुनः संख्यागणनं कारयमास। तदाऽपि सो नवैवेति निर्णीतवान्। श्रीगुरुस्तं शिष्यम् उद्दिष्योक्तवान् "दशमः त्वम् असि" (दशमस्त्वमसि) इति। गणनाप्रसङ्गे एकैकोऽपि शिष्य आत्मानं विहाय अन्यानेव गणितवान्। अयमेव भ्रान्तिः सर्वेषाम् आसीत्। एवमेव मायाशक्तिप्रचोदितभ्रान्तिवशान्मनुष्यः स्वीयम् आत्मानं शिवत्वेन न गणयति। अहंप्रत्ययवेद्य एवाऽऽत्मा। तस्मिन् विषये न कोऽपि सन्देहो न कोऽपि विरोधो वा। तथापि मायाशक्तिवशाद् यदेव सत्यं तज्ज्ञातुम् असमर्थो भवति मनुष्यः। श्रीगुरुस्तां भ्रान्तिं कारुण्यपूर्णेन मार्गदर्शनेन "दशमस्त्वमसि" इतिवत् सत्यं निरूपयन् निवारयति। "तत् त्वमसि" इति ज्ञानं साक्षात्कारमार्गं च अनुगृह्णाति।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तदुक्तम् – "भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥" (श्वे.उ., ५.१४) इति । अशरीराख्यं (अनीडाख्यं) जगतः सृष्टिसंहारयोः कर्तारं (भावाभावकरं) चतुष्षष्टिकलानां सृष्टिकरं (कलासर्गकरं) देवं शिवं ये साक्षात्कुर्वन्ति ते प्रकृतिं प्राकृतरूपां तनुं त्यजन्ति, परशिवे एव विलीय मुक्तिसुखम् अनुभवन्तीत्यर्थः । शिवं विज्ञाय शिवा एव भवन्ति । श्रीगुर्वनुग्रहं विना एतन्न शक्यते । गुरुभक्तस्य नास्ति किञ्चिदप्राप्यं नाम । तदुक्तम् – "गुरावत्यन्तभक्तस्य शिष्यस्येह परत्र च । न किञ्चिद् दुर्लभं विद्वन् समस्तं सुलभं सदा ॥" (चं.आ., क्रि.पा., २.४६) इति; "संसारदावदहनज्वाला येन विनाशिता । कटाक्षामृतवर्षेण को हि तत्सदृशो भवेत् ॥" (सू.आ., क्रि.पा., ५.१४) इति च ॥५५॥

हितमेव चरेन्नित्यं शरीरेण धनेन च ।
आचार्यस्योपशान्तस्य शिवज्ञानमहानिधेः ॥५६॥

गुरोराज्ञां न लङ्घेत सिद्धिकामी महामतिः ।
तदाज्ञालङ्घनेनापि शिवाज्ञाच्छेदको भवेत् ॥५७॥

व्याख्या— श्रीगुरोर्हितमेव कुर्यात् तदाज्ञानुसारं वर्तेत इति कथयित्वा उभयस्थलं समापयति ग्रन्थकृत् – **हितमित्यादिना युग्मेन** । **उपशान्तस्य** रागद्वेषरहितत्वेन शान्तचित्तस्य **शिवज्ञानमहानिधेः** शिवस्य ज्ञानं शिवज्ञानम्, शिवज्ञानस्य महांनिधिः, महाकोशः, तस्य **आचार्यस्य** श्रीगुरोः **शरीरेण** कायेन **धनेन च** सम्पदा च **नित्यं** सर्वदा **हितम् एव** अनुकूलमेव **चरेत्** आचरेत्, कुर्यादित्यर्थः ॥ **सिद्धिकामी** सिद्धिं कामयमानः, **महामतिः** महाप्राज्ञः **गुरोः आज्ञां** आचार्यस्याऽऽदेशं **न लङ्घेत** न अतिक्रामेत्; **तदाज्ञालङ्घनेन** तस्य गुरोः आज्ञाया अतिक्रमणेन **शिवाज्ञाच्छेदकः अपि** शिवस्य आज्ञायाः च्छेदकः, शिवाज्ञाभङ्गकृद् अपि **भवेत्** स्यात् ॥ तदुक्तम् – "गुरोर्हितं प्रियं कुर्यादादिष्टो वा नरः सदा । असमक्षं समक्षं वा तस्य कार्यं समाचरेत् ॥" (चं.आ., क्रि.पा., २.२०) इति । तत्रैव इदमुक्तम् – "गुरुप्रियकरः शिष्यः सर्वान् धर्मांस्तथार्हति ॥" (क्रि.पा., २.४७) इति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कायेन वाचा मनसा च गुरोः प्रियं कुर्याद् इति तत्रैव आदिश्यते – "तोषयेत्तं प्रयत्नेन मनसा कर्मणा गिरा ॥" (क्रि.पा., २.६८) इति । गुर्वाज्ञां किमिति नोल्लङ्घनीया इत्यत्रोक्तम् – "सर्वदेवात्मकश्चासौ सर्वमन्त्रमयो गुरुः । तस्मात् सर्वप्रयत्नेन तस्याज्ञां शिरसा वहेत् ॥ श्रेयोऽर्थी यदि गुर्वाज्ञां मनसाऽपि न लङ्घयेत् । गुर्वाज्ञापालको यस्माद् ज्ञान-सम्पत्तिमश्नुते ॥" (चं.आ., क्रि.पा., २.९-१०) इति । गुरूपदेशो नाम अग्निवत् पाशदाहकः, तत्कारुण्यामृतवर्षणेन नित्यामृतत्वं प्राप्यते । गुरुप्रबोधप्रकाशेन नितरां निष्कास्यते सर्वाज्ञानान्धकार इति गुरोर्महिमा वर्ण्यते । पश्यत – "गुरुबोधाग्निना दग्धा यस्य पाशा ह्यशेषतः । तस्य निर्दग्धबन्धस्य पुनर्बन्धः कथं भवेत् ॥ गुरुकारुण्यपीयूषरसास्वादविनो-दिनः । अमृतस्यास्य निकटं कथं मृत्युः प्रयास्यति ॥ गुरुदत्तपरज्ञानप्रकाश-विलसद्दृशः । भास्वतस्तस्य तु तमः सकाशं कथमेष्यति ॥" (का.आ., क्रि.पा., १.१३८-१४०) इति ॥५६-५७॥

– इत्युभयस्थलम् –

११. अथ त्रिविधसम्पत्तिस्थलम् – (११)

यथा गुरौ यथा लिङ्गे भक्तिमान् परिवर्तते ।
जङ्गमे च तथा नित्यं भक्तिं कुर्याद्विचक्षणः ॥५८॥

व्याख्या— गुरौ लिङ्गे यथा तथा जङ्गमे भक्तिः कार्येति त्रिविध-सम्पत्तिमाह – **यथेति । यथा** येन प्रकारेण **गुरौ** दीक्षादातरि आचार्ये **यथा** येन प्रकारेण **लिङ्गे** गुरुदत्तलिङ्गत्रयसमन्वये च **भक्तिमान्** भक्तियुक्तः **परिवर्तते** प्रवर्तते, **तथा** तेनैव प्रकारेण **विचक्षणः** विवेकशाली भक्तः, **जङ्गमे** चरेऽपि **नित्यं** सर्वदा **भक्तिं कुर्यात्** भक्तिम् आचरेत् ॥ 'त्रिविध-सम्पत्तिः' नाम गुरुलिङ्गजङ्गमात्मिका त्रिविधसम्पत्तिः, तेभ्यः समानतया भक्त्याचरणं त्रिविधसम्पत्तिस्थलम् । तथा च निर्वचनम् – "गुरौ लिङ्गे जङ्गमे च भक्तिभावनपूजनैः । समताभजनं यस्य स भवेत् त्रिविधस्थली ॥"

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति । गुरुलिङ्गजङ्गमानाम् 'एकत्रयत्वम्' उक्तम् – "एकमूर्तेस्त्रयो भागा गुरुर्लिङ्गं च जङ्गमः ।" (चं.आ., क्रि.पा., ५.१५) इति ॥५८॥

एक एव शिवः साक्षात् सर्वानुग्रहकारकः ।
गुरुजङ्गमलिङ्गात्मा वर्तते भुक्तिमुक्तिदः ॥५९॥

व्याख्या— 'एकत्रयत्वम्' विशदीक्रियते – **एकेति** । **एक एव** अद्वितीय एव **शिवः** परशिवः **साक्षात्** प्रत्यक्षतया **सर्वानुग्रहकारकः** सर्वेषाम् अनुग्रहं करोति इति, "ण्वुल् तृचौ" (पा., ३.१.१३३) इति ण्वुल् (वु = अक), सर्वान् अनुगृह्णाति इत्यर्थः । **भुक्तिमुक्तिदः** भुक्तिः भोगः मुक्तिः मोक्षः, भुक्तिश्च मुक्तिश्च भुक्तिमुक्ती, ते ददाति इति, स एवाद्वितीयः शिवः **गुरुजङ्गमलिङ्गात्मा** गुरुश्च जङ्गमश्च लिङ्गं च गुरुजङ्गमलिङ्गानि, तानि आत्मा स्वरूपं यस्य सः, गुरुलिङ्गजङ्गमस्वरूपः **वर्तते** विराजते ॥ शिव एकोऽद्वितीय इति प्रसिद्धः । "अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति भगवता प्रोक्तत्वात् ॥ "एकत्रयत्वम्" पूर्वश्लोकस्य व्याख्यायाम् उक्तम् ॥५९॥

लिङ्गं च द्विविधं प्रोक्तं जङ्गमाजङ्गमात्मना ।
अजङ्गमे यथा भक्तिर्जङ्गमे च तथा स्मृता ॥६०॥

व्याख्या— लिङ्गस्य द्वैविध्यमाह – **लिङ्गम्** इति । **लिङ्गं च** लिङ्गं पुनः **जङ्गमाजङ्गमात्मना** जङ्गमलिङ्गम् अजङ्गमलिङ्गम् इति स्वरूपेण **द्विविधं** द्विप्रकारम् इति **प्रोक्तं** कथितम् । **यथा अजङ्गमे** यादृशी अजङ्गमलिङ्गे **भक्तिः** अनुरक्तिः **तथा जङ्गमे** तादृशी एव चरलिङ्गेऽपि इति **स्मृता** ज्ञाता। अत्र अजङ्गमलिङ्गं तु देवालये प्रतिष्ठापितं लिङ्गं यत् स्थावरलिङ्गमिति कथ्यते । स्थिरलिङ्गम् इति तस्य नामान्तरम् । जङ्गमलिङ्गं पुनर्यो वीरशैव-धर्माचारस्य प्रचाराय प्रसाराय च चरन् स्वतपोबलेन भक्तोद्धारं कुर्वन् सञ्चरति स चरनामा सत्पुरुषः । माहेश्वर इति तस्य नामान्तरम् ॥ इदमेव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्पष्टमुक्तम् – "जङ्गमं स्थावरं चेति शम्भो रूपद्वयं स्मृतम् ॥" इति । (चं.आ., क्रि.पा., ४.४) इति । स्थावरलिङ्गमिति प्रसिद्धम् अजङ्गम-लिङ्गं पुनर्द्विविधं स्वयं व्यक्तं प्रतिष्ठापितं चेति । काश्यां विराजमानं विश्वनाथलिङ्गम् इत्यादीनि स्वयं व्यक्तानि । यानि चाऽऽचार्यैः कर्षादि-प्रतिष्ठान्तप्रक्रियया स्थापितानि तानि प्रतिष्ठापितानि । तदुक्तम् – "स्थावरं च स्वयं व्यक्तं प्रतिष्ठितमिति द्विधा । स्वयं व्यक्तं तत्र भवेत् काशीविश्वेश्वरादिकम् ॥ प्रतिष्ठितं कर्षणाद्यैः संस्कृतं मानुषैर्भवेत् ॥" (चं.आ., क्रि.पा., ४.४-५) इति । गुरुणा ससंस्कारं दत्तं चेष्टलिङ्ग-मपि जङ्गमलिङ्गमेव । तस्य मान्त्रिकलिङ्गमित्यपरं नाम । अन्यदपि जङ्गमलिङ्गं वर्तते । तच्च वीरशैवाचारविचाराणां प्रसाराय प्रचाराय च यः सञ्चरति चरनामा सत्पुरुषः । तस्य सहजजङ्गमलिङ्गमिति नामा-न्तरम् । तदुक्तम् – "जङ्गमं द्विविधं प्रोक्तं मान्त्रिकं सहजं त्विति । मान्त्रिकं मन्त्रसामर्थ्यादावाहितमुदीरितम् ॥ ध्रियमाणं महाशैवैश्चर-लिङ्गादिकं मुने । सहजं जङ्गमं माहेश्वर इत्यभिधीयते ॥" (चं.आ., क्रि.पा., ४.६–७) इति ॥६०॥

अजङ्गमं तु यल्लिङ्गं मृच्छिलादिविनिर्मितम् ।
तद्वरं जङ्गमं लिङ्गं शिवयोगीति विश्रुतम् ॥६१॥

व्याख्या— जङ्गमलिङ्गस्याऽऽधिक्यमाह – **अजङ्गमम् इति** । **यद् अजङ्गमं लिङ्गम्** यत् स्थावरलिङ्गं तत्, **मृच्छिलादिविनिर्मितं** मृत् च शिलादीनि च मृच्छिलादीनि, तैः विनिर्मितम् सञ्जीकृतं भवति । **तद्वरं** तस्माद् वरम्, तस्मादधिकं **जङ्गमं लिङ्गं** चरलिङ्गम्, तदेव **शिवयोगी इति** शिवयोगसम्पन्नत्वात् शिवयोगी इति **विश्रुतं** प्रसिद्धम् ॥ जङ्गमलिङ्गस्य अनेकनामानि सन्ति – माहेश्वरः, चरः, भक्तः, शैवश्चेति । (पश्यत – चं.आ., क्रि.पा., ४.७) । "जङ्गमे निजलिङ्गैक्ये" इति सूक्ष्मागमे (क्रि.पा., ५.४९, ७.३३) कथितत्वात् "निजलिङ्गैक्यम्" इत्यपि सहजजङ्गमस्य नामान्तरं ज्ञायते ॥६१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अचरे मन्त्रसंस्काराल्लिङ्गे वसति शङ्करः ।
सदाकालं वसत्येव चरलिङ्गे महेश्वरः ॥६२॥

व्याख्या— चरलिङ्गम् अधिकं किम् इत्यत्राह – **अचरे इति** । **अचरे लिङ्गे** अजङ्गमलिङ्गे, स्थावरलिङ्गे इति यावत्, **मन्त्रसंस्कारात्** मन्त्रसंस्कारप्रभावात् **शङ्करः** शम् सुखं करोतीति शङ्करः शिवः **वसति** तिष्ठति। **चरलिङ्गे** जङ्गमात्मके लिङ्गे **सदाकालं** सर्वदा **महेश्वरः** महान् ईश्वरः परशिवः **वसति** एव निरन्तरं तिष्ठत्येव ॥ स्थावरलिङ्गापेक्षया जङ्गमलिङ्गं वरम् इत्यत्रेदं कारणत्वेन निरूपितम् । शैवगमास्तु जङ्गमाधिक्यं बहुधा निरूपयन्ति । तथा हि – ''सर्वतीर्थाभिषेकाच्च सर्वयज्ञविधानतः । सर्वदेवाराधनाच्च चरपूजा गरीयसी ॥'' (चं.आ., क्रि.पा., ४.३३) इति; ''चरेऽधिका स्वेष्टलिङ्गाद् उत्तमा भक्तिरुच्यते । चरेष्टलिङ्गयोस्तुल्या मध्यमेति निगद्यते ॥ चरे न्यूना स्वेष्टलिङ्गात् कनिष्ठा भक्तिरुच्यते । तस्माद्धि कुशलो नित्यमुत्तमां भक्तिमाश्रयेत् ॥'' (चं.आ., क्रि.पा., ४.३१-३२) इति; ''जङ्गमानसमर्च्यैव मत्पूजा क्रियते यदि । स पूजा विफलैव स्यादित्येतच्छिवशासनम् ॥'' (चं.आ., क्रि.पा., ४.३६) इति च ॥६२॥

शिवयोगिनि यद्दत्तं तदक्षयफलं भवेत् ।
तस्मात् सर्वप्रयत्नेन तस्मै देयं महात्मने ॥६३॥

यत्फलं लभते जन्तुः पूजया शिवयोगिनः ।
तदक्षयमिति प्रोक्तं सकलागमपारगैः ॥६४॥

व्याख्या— उक्तमेव समर्थयति – **शिवयोगिनि** इत्यादिना युग्मेन । **यत् शिवयोगिनि दत्तं** यद्दानं जङ्गमाय समर्पितं **तत् अक्षयफलं** तदेव क्षयरहितफलवत् **भवेत्** स्यात् । **शिवयोगिनः** जङ्गमस्य **पूजया** अर्चनेन **जन्तुः** पुरुषः **यत्फलं** यादृशं फलं **लभते** प्राप्नोति **तत् अक्षयम्** इति तत्क्षयरहितम् इति **सकलागमपारगैः** सकलैः समस्तैः आगमपारगैः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आगमपारङ्गतैः **प्रोक्तं** कथितम् ॥ अस्य विषयस्य प्रमाणत्वेन मरितोण्टदार्यः "दर्शनादर्चनात्तस्य त्रिसप्तकुलसंयुताः । जना मुक्तिपदं यान्ति किं पुनस्तत्परायणाः ॥" इति योगजागमवाक्यमुदाहरति तत्त्वप्रदीपिकायाम् । उक्तं पुनः चन्द्रज्ञानागमोत्तरे – "ऐहिकामुष्मिका भोगा मोक्षस्तत्सङ्गतो भवेत् । चरसंगस्तु सर्वेषां सर्वकामफलप्रदः ॥" (क्रि.पा., ४.२९) इति । जङ्गमपूजकस्तु साक्षात् शिवपूजक एव । तदुक्तम् – "जङ्गमं पूजयेद्यस्तु साक्षान्मद्रूपमीश्वरम् । स मां पूजितवानेव सोऽहं देवि न संशयः ॥" (पार.आ., ६.११) इति ॥६३-६४॥

नावमन्येत कुत्रापि शिवयोगिनमागतम् ।
अवमानाद्भवेत्तस्य दुर्गतिश्च न संशयः ॥६५॥

व्याख्या— जङ्गमावमत्या दुर्गतिरित्याह – **नावमन्येत इति । कुत्रापि** गृहस्य बाह्ये आभ्यन्तरे वा कुत्रापि **आगतं** समागतं **शिवयोगिनं** जङ्गमं **न अवमन्येत** अनादरेण लघूकुर्यात् । **तस्य** तस्य जङ्गमस्य **अवमानात्** अनादरात् **दुर्गतिः च** नीचस्थितिः आपतति । **न संशयः** अस्मिन् विषये न कोऽपि सन्देहः, नास्ति संशयलेशोऽपि इत्यर्थः ॥ भगवतः सादरं स्मरणात् इहामुत्रशुभफलम्, अनादरेण विस्मरणात् अशुभफलम् सिद्धम् । तथैव गुरोरादरेण निःश्रेयस्सिद्धिः, अनादरेण तु अधोगतिः ॥६५॥

शिवयोगी शिवः साक्षादिति कैङ्कर्यभक्तितः ।
पूजयेदादरेणैव यथा लिङ्गं यथा गुरुः ॥६६॥

व्याख्या— त्रिविधसम्पत्तिस्थलोपक्रमं तदुपसंहारेणाऽनुसन्दधाति – **शिवयोगीति । शिवयोगी** शिवयोगसम्पन्नः जङ्गमः **साक्षात्** प्रत्यक्षतया **शिवः इति** परशिव एव इति **कैङ्कर्यभक्तितः** किङ्करभावयुक्तया भक्त्या **आदरेण एव** गौरवपूर्वकत्वेन एव **यथा लिङ्गं** येन प्रकारेण लिङ्गं **यथा गुरुः** येन प्रकारेण गुरुश्च तथा जङ्गमः इति मत्वा तं **पूजयेत्** अर्चयेत् ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कैङ्कर्यभक्तिस्तु भृत्याचाररूपा भवति ॥ (पश्यत – ९.२७ श्लोकस्य व्याख्यायां पञ्चाचारेषु भृत्याचारस्य स्वरूपं विशदीकृतम्) ॥ त्रिविध-सम्पत्तिस्थलस्य स्वरूपनिर्णयम् अवबोधयता वातुलागमेनोक्तमिदम् एन्.आर्.करिबसवशास्त्री स्वीये कन्नडव्याख्याने उदाहरति – "गुरौ देवे समा बुद्धिर्यथाऽसौ शिवयोगिनि । सैषा त्रिविधसम्पत्तिः संवित्साम्राज्य-शालिनाम् ॥" इति ॥६६॥

– इति त्रिविधसम्पत्तिस्थलम् –

१२. अथ चतुर्विधसारायस्थलम् – (१२)

पादोदकं यथा भक्त्या स्वीकरोति महेशितुः ।
तथा शिवात्मनोर्नित्यं गुरुजङ्गमयोरपि ॥६७॥

व्याख्या— चतुर्विधसारायस्थलम् आरभ्यते – **पादोदकम्** इति । **यथा** येन प्रकारेण **महेशितुः** महेश्वरस्य **पादोदकं** चरणधौतं वारि **भक्त्या** भक्तिभावेन **स्वीकरोति** पिबति **तथा** तेनैव प्रकारेण **शिवात्मनोः** शिवस्वरूपयोः **गुरुजङ्गमयोः अपि** दीक्षादाता गुरुः, मोक्षदाता तु जङ्गमः, तयोः गुरुचरयोः अपि पादोदकं भक्त्या स्वीकरोति ॥ अत्र स्थले गुरूपासनम्, लिङ्गार्चनम्, जङ्गमपूजा, गुरुलिङ्गजङ्गमानां "एकत्रयत्व"-प्रतिपत्त्या पादोदकप्रसादस्वीकारश्च इति चत्वारि आचाराण्यनितर-साधारणानि कथितानि । एकैकमपि सारभूतम् (सारायभूतम्); चतुर्णां सारभूतानां समाचरणात् स्थलमिदं चतुर्विधसारायस्थलम् ॥ अत्र 'महेशितुः' इत्यनेन इष्टलिङ्गस्वरूपी शिवः ग्राह्यः । गुरुपूजैव शिवपूजा, गुरुशिवयोः अद्वयैक्यत्वात् । तदुक्तम् – "गुरुपूजैव पूजा स्याच्छिवस्य परमात्मनः । गुरुशेषं तु तत्सर्वमात्मशुद्धिकरं भवेत् ॥" (चं.आ., क्रि.पा., २.९४) इति । महेश्वरस्य इष्टलिङ्गस्वरूपत्वमुक्तम् । तस्मात् भाव-प्राणलिङ्गानुसन्धानपूर्वकं इष्टलिङ्गपूजनम् उक्तम् – "पूजयन्निष्टलिङ्गं तु निध्यायन् प्राणलिङ्गकम् । भावयन् भावलिङ्गं वै मृत्युपाशांश्छिनत्ति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सः ॥ सर्वदेवमयं लिङ्गं तस्मिन् साक्षाच्छिवः स्वयम् । अनुग्रहाय वसति तस्माल्लिङ्गं प्रपूजयेत् ॥ पृथिव्या यानि तीर्थानि पुण्यान्यायतनानि च । लीयन्ते लिङ्गमूले तु तस्माल्लिङ्गं प्रपूजयेत् ॥" (चं.आ., क्रि.पा., ३.४८-५०) इति । लोकहितमिच्छन्तं जङ्गमं भक्तो भक्त्या प्रपूजयेत् । तदुक्तम् – "चरो लोकहितार्थी स्यादहं चरहिते रतः । इति चरान् सुयष्टव्यमित्येतच्छिवशासनम् ॥" (चं.आ., क्रि.पा., ४.३५) इति । गुरुलिङ्गजङ्गमानां पादोदकं तु भक्त्या स्वीकार्यमेव । पादोदकं त्रिधा गुरुलिङ्गजङ्गमभेदेन दीक्षाशिक्षाज्ञानात्मकम् । उक्तं च – "पादतीर्थं त्रिधा शम्भोर्गुरुजङ्गमयोरपि । दीक्षा शिक्षा ज्ञानमिति त्रिसंज्ञं तद्भवत्यहो ॥" (चं.आ., क्रि.पा., ५.५) इति । अत्र सिद्धान्तशिखामणौ अस्य पादोदक-विभागो नोक्तः । परं तु अस्य ग्रन्थस्य शरणस्थलान्तर्गतलिङ्गस्थलानां मध्ये दीक्षापादोदकस्थलम्, शिक्षापादोदकस्थलम्, ज्ञानपादोदकस्थलं चेति स्थलत्रये आध्यात्मिकदृष्ट्या तेषां स्वरूपं निरूपितम् । (पश्यत – १९.६-२८) । पादोदकस्वीकारे नियमोऽयम् अनुसर्तव्यः – "पादतीर्थं सदा पेयं भवबन्धमुमुक्षुभिः । गुरोरपीष्टलिङ्गस्य चरस्यापि विशेषतः ॥ गुरोश्चरस्य चालाभे इष्टलिङ्गपदोदकम् । लब्ध्वा गुर्वादिपादोदं भावये-न्मनसैव तत् ॥ चरवर्जं गुरोर्लाभे लब्ध्वा गुरुपादोदकम् । गुरु-जङ्गमपादोदकं लब्धानीति भावयेत् ॥ गुरुवर्जं चरप्राप्तौ लब्ध्वा चरपादोदकम् । तदेव गुरुपादोदकमिति मत्वा पिबेत्तदा ॥" (चं.आ., क्रि.पा., ५.६-९) इति ॥ प्रसादश्च गुरुलिङ्गजङ्गमानां नित्यं स्वीकार्यः, तेन पावित्र्यसिद्धिर्भवति । तदुक्तम् – "समर्पितं प्रसादैककारणत्वा-न्महेशितुः । प्रसादत्वेन विख्यातः परमानन्ददायकः ॥ .... गुरूच्छिष्टं पुरोडाशं चरस्यापि विशेषतः । चरगुर्वोः प्रसादस्तु ध्रुवं पावित्र्य-दायकः ॥" (चं.आ., क्रि.पा., ५.३३, ३५) इति । प्रसादोऽपि त्रिविधः-गुरोः प्रसादः शुद्धप्रसादः, लिङ्गस्य प्रसादः सिद्धप्रसादः, जङ्गमस्य प्रसादः प्रसिद्धप्रसादश्चेति । तेषां स्वीकारः पादतीर्थस्वीकारन्यायेन । तदुक्तम् – "गुरुलिङ्गजङ्गमानां भुक्तशेषः प्रसादकः ॥ शुद्धसिद्धप्रसिद्धाख्यः स हि मुक्त्येकसाधनः । द्वयोस्त्रयाणां वा लाभे ग्राह्योऽयं पादतीर्थवत् ॥"

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(चं.आ., क्रि.पा., ५.२०-२१) इति । शिवार्पितस्यैव प्रसादत्वम्; तादृश-प्रसाद एव स्वीकार्यः ॥ अयमेव विषयः सिद्धान्तचक्रवर्तिना चन्नबसवण्ण-नाम्ना शरणेन स्वीये 'कन्नडवचने' निरूपितः । (पश्यत – चन्नबसवण्ण-नवर वचनगळु, कर्नाटक विश्वविद्यालयः, व.सं., १६७) ॥६७॥

सर्वमङ्गलमाङ्गल्यं सर्वपावनपावनम् ।
सर्वसिद्धिकरं पुंसां शम्भोः पादाम्बुधारणम् ॥६८॥

व्याख्या— पादतीर्थस्वीकारफलमाह – **सर्वमङ्गलमाङ्गल्यमिति** । शम्भोः इष्टलिङ्गात्मकस्य शिवस्य **पादाम्बुधारणं** चरणोदकस्य शिरसि प्रोक्षणरूपं धारणम्, **पुंसां** मनुष्याणां सर्वमङ्गलमाङ्गल्यं मङ्गलस्य भावः माङ्गल्यम्, सर्वेषां मङ्गलानां शुभानां माङ्गल्यं शुभकरत्वम्, **सर्वपावनपावनं** सर्वेषां पावनानां पवित्राणां पावनं पावित्र्याधायकम्, **सर्वसिद्धिकरं** (च) सर्वाः सिद्धीः करोति इति सर्वसिद्धिकरं सकलेप्सितफलप्राप्तिकरं च ॥ उक्तं च – "अकालमृत्युमथनं सर्वव्याधिविनाशनम् । सर्वपापोपशमनं शम्भोः पादोदकं शुभम् ॥ मङ्गलं मङ्गलानां च सर्वपावनपावनम् । दुष्टग्रहोपशमनम् इष्टसिद्धिप्रदायकम् ॥ सर्वदुःखप्रशमनं सर्वोपद्रव-नाशनम् । सर्वसिद्धिप्रदं सद्यः सर्वेषां मुक्तिदायकम् ॥" (चं.आ., क्रि.पा., ५.१२-१४) इति । इष्टलिङ्गोदकस्वीकाराद् यत्फलमुक्तं सर्वं गुरुजङ्गम-पादोदस्वीकारादपि भवति, गुरुलिङ्गजङ्गमानाम् 'एकत्रयत्वात्' ॥६८॥

शिरसा धारयेद्यस्तु पत्रं पुष्पं शिवार्पितम् ।
प्रतिक्षणं भवेत्तस्य पौण्डरीकक्रियाफलम् ॥६९॥

व्याख्या— शिवार्पितधारणे पौण्डरीकफलमाह – **शिरसा इति** । **यः तु** यः तावत् **शिवार्पितं** शिवाय समर्पितं **पत्रं** बिल्वादि **पुष्पं** कमलादि च **शिरसा धारयेत्** शीर्ष्णा धारयति चेत्, **तस्य** तादृशस्य पुरुषस्य **प्रतिक्षणं** क्षणं क्षणं प्रतिक्षणं **पौण्डरीकक्रियाफलं** पुण्डरीको नाम कश्चन यागविशेषः, पुण्डरीकस्य इदम् इति पौण्डरीकम्, "तस्येदम्" (पा.

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

४.३.१२०) इति अण्प्रत्ययः; पौण्डरीकात्मिका क्रिया, तस्याः फलम्, **भवेत् स्यात्** ॥६९॥

भुञ्जीयाद् रुद्रभुक्तान्नं रुद्रपीतं जलं पिबेत् ।
रुद्राघ्रातं सदा जिघ्रेदिति जाबालिकी श्रुतिः ॥७०॥

अर्पयित्वा निजे लिङ्गे पत्रं पुष्पं फलं जलम् ।
अन्नाद्यं सर्वभोज्यं च स्वीकुर्याद् भक्तिमान्नरः ॥७१॥

व्याख्या— यद्यत् स्वीक्रियते तत्सर्वदा रुद्रार्पितं स्यादित्याह – **भुञ्जीयाद् इत्यादिना युग्मेन । रुद्रभुक्तान्नं** रुद्रेण भुक्तम् अन्नं रुद्रभुक्तान्नं रुद्रनिवेदितप्रसादरूपम् अन्नं **भुञ्जीयात्** अश्नीयात् । **रुद्रपीतं** रुद्रेण पीतं रुद्रपीतं रुद्रसमर्पितं **जलं** वारि, पादोदकमिति यावत्, **पिबेत्** आस्वादयेत् । **इति जाबालिकी श्रुतिः** इति जाबाल्युपनिषत् । (उपलब्धायां जाबाल्युपनिषदि वाक्यमिदं नोपलभ्यते) । **भक्तिमान् नरः** भक्तियुक्तः पुरुषः **निजे लिङ्गे** स्वेष्टलिङ्गे **पत्रं** बिल्वादि **पुष्पं** कमलादि, **फलम्** आम्रादि **जलं** सलिलं **अन्नाद्यं** अन्नपायसादि च **अर्पयित्वा** समर्प्य **सर्वभोज्यं** सकलाहारान् **स्वीकुर्यात्** अश्नीयात् ॥ "रुद्रेणात्तमश्नन्ति रुद्रेण पीतं पिबन्ति रुद्रेणाघ्रातं जिघ्रन्ति ॥" इति जाबालिकीश्रुतिरिति मरितोण्टदार्यः । "भुञ्जीयाद् रुद्रभुक्तान्नम्" इत्यादि श्लोकसंवादिनी चन्द्रज्ञानागमोत्तरे इयमुक्तिः – "शिवेन भुक्तं भुञ्जीयात् तत्पीतं हि जलं पिबेत् । शिवाघ्रातं सदा जिघ्रेदेष धर्मः सनातनः ॥" (क्रि.पा., ५.२२) इति ॥ गुरुलिङ्गजङ्गमनिवेदितमेव अन्नाद्यं जलादि च स्वीकार्यम् नान्यत् किमपि । एतदेवोपदिष्टं सम्यक्तया तस्मिन्नेव चन्द्रज्ञानागमोत्तरे – "पत्रं पुष्पं फलंतोयमन्नपानाद्यमौषधम् । असमर्प्य न भुञ्जीत भगवन्तं सदाशिवम् ॥" (क्रि.पा., ५.२४) इति । न केवलमेतावत्, परं यद्यदिन्द्रियभोग्यानि शब्दादिजन्यभोगानि मनोग्राह्याणि सर्वसुखानि, इष्टसंयोगादिजनितानि अनिष्टवियोगादिजनितानि च सुखानि इति यावत्, सर्वं तत् परमात्मनि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समर्प्यैव, परमात्मस्मरणपूर्वकमेव, अनुभूयात् इति नियमोऽस्ति । चन्द्रज्ञानोत्तरे एतदुक्तम् – "शब्दस्पर्शरूपरसगन्धतन्मात्रपञ्चकम् । असमर्प्य न भुञ्जीत भगवन्तमुमापतिम् ॥ यदिन्द्रियगतं किञ्चिद् यन्मुखं तच्छिवार्पितम् । तत्प्रसादं च भोक्तव्यम् तदिन्द्रियमुखेन च ॥ संयोगेषु वियोगेषु चाणुमात्रसुखानि च । इष्टलिङ्गे समर्प्यैव भुञ्जीयात्तानि सन्ततम् ॥" (क्रि.पा., ५.२५-२७) इति । तत्रैव द्विविधसमर्पणं तत्स्वरूपं च उक्तम् – "समर्पणं द्विधा प्रोक्तं स्थूलसूक्ष्मविभेदतः । यच्छब्दाद्यविभागेनैवेष्टलिङ्गे समर्प्यते । द्रव्यं तत्स्थूलमित्युक्तमर्चाङ्गं तत्परिकीर्तितम् ॥ शब्दादिविषया यत्र भावेनैव न चान्यथा । समर्प्यते रूपमेव तद्धि स्थूलं प्रकीर्तितम् ॥ अर्चाङ्गं स्थूलमित्युक्तं सूक्ष्मं स्यादौपभोगिकम् । पदार्थभोगावसरे शब्दादीनां विभागतः । समर्पणं हि तत्सूक्ष्ममिदं स्यात् सार्वकालिकम् ॥ यदा येनेन्द्रियेणैव विषयो ह्युपभुज्यते तदिन्द्रियगते लिङ्गे ह्यर्पणं सूक्ष्ममीरितम् ॥" (क्रि.पा., ५.२८-३१) इति ॥ इदं च सूक्ष्मसमर्पणं कारणागमोत्तरे क्रियापादे सप्तमपटले भक्तादिषट्स्थलेषु एकैकस्थलसम्बद्धत्वेन सम्यग् निरूप्यते – "भक्तस्थले क्रियाशक्तियुक्ते वै नासिकाङ्कके । आचारलिङ्गसंज्ञेऽस्मिन् सद्योजातमुखात्मके ॥ गन्धप्रसादं सद्भक्त्या चित्तहस्तेन चार्पयेत् ॥ माहेश्वरस्थले ज्ञानशक्तिके रसनाङ्कके । गुरुलिङ्गाभिधे वामदेववक्त्रे विशेषतः । बुद्धिहस्तेन च रुचिं निष्ठाभक्त्या समर्पयेत् ॥ स्थले प्रसादिसंज्ञेऽस्मिन् इच्छाशक्तिसमन्विते । दृगङ्गकेऽघोरमुखे शिवलिङ्गाभिधे पुनः ॥ भक्त्याऽवधानया रूपमहंकारेण चार्पयेत् ॥ प्राणलिङ्गिस्थले त्वादिशक्तियुते त्वगङ्गके । चरलिङ्गाभिधे तत्पुरुषवक्त्रे दृढव्रतः ॥ भक्त्याऽनुभवया मनोहस्तेन स्पर्शमर्पयेत् ॥ शरणस्थले तु परया शक्त्या युक्ते श्रवोऽङ्गके । प्रसादलिङ्गे त्वीशनमुखे शब्दप्रसादकम् ॥ आनन्दभक्त्या सुज्ञानहस्तेनैव समर्पयेत् ॥ ऐक्यस्थले तु चिच्छक्तियुक्ते मानसाङ्गके । महालिङ्गे परशिवमुखे सङ्कल्पमर्पयेत् ॥ सद्भावाभिख्यहस्तेन भक्त्या समरसाख्यया ॥" (६०-६५) इति । सूक्ष्मसमर्पणस्वरूपं सुलभतयाऽवबोधाय तस्य विषयं पट्टिकारूपेण दीयते, यथा –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सूक्ष्मसमर्पणम्

सं	१	२	३	४	५	६	७	८
सं	स्थलम्	शक्तिः	अङ्गम्	लिङ्गम्	मुखम्	प्रसादः	भक्तिः	हस्तः
१	भक्त	क्रिया	नासिका	आचार	सद्योजात	गन्ध	सद्	चित्त
२	माहेश्वर	ज्ञान	रसना	गुरु	वामदेव	रुचि	निष्ठा	बुद्धि
३	प्रसादि	इच्छा	दृक्	शिव	अघोर	रूप	अवधान	अहंकार
४	प्राणलिङ्गि	आदि	त्वक्	चर	तत्पुरुष	स्पर्श	अनुभव	मनस्
५	शरण	परा	श्रव	प्रसाद	ईशान	शब्द	आनन्द	सुज्ञान
६	ऐक्य	चित्	मानस	महत्	परशिव	सङ्कल्प	समरस	सद्भाव

चन्नबसवण्णस्य कन्नडवचनेषु षट्सु सूक्ष्मसमर्पणविषयः एतत्संवादी भवति । (पश्यत – चन्नबसवण्णनवर वचनगळु, कर्नाटक विश्वविद्यालयः, धारवाडः, वं.सं. २४७, ४९८, ६८१, ९४४, १२४३; १४१७) ॥ ७०-७१ ॥

गुरुत्वात्सर्वभूतानां शम्भोरमिततेजसः ।
तस्मै निवेदितं सर्वं स्वीकार्यं तत्परायणैः ॥७२॥

व्याख्या— सर्वलोकगुरुत्वात् शिवस्य प्रसादः सर्वैः स्वीकार्य इत्याह – **गुरुत्वादिति । अमिततेजसः** न मितम् अमितम्, अमितं तेजः यस्य सः अमिततेजाः, तस्य, अपरिमितप्रभावयुक्तस्य **शम्भोः** परशिवस्य **सर्वभूतानां** सर्वेषां भूतानां सर्वप्राणिनां **गुरुत्वात्** सर्वविद्याप्रदातृत्वात् **तस्मै** परशिवाय **निवेदितं** समर्पितं **सर्वं** सकलं पदार्थजातं **तत्परायणैः** शिवकृपाश्रितैः **स्वीकार्यं** स्वीकरणीयम् ॥ पञ्चब्रह्ममन्त्रेष्वेकतमे शिवस्य सर्वभूतगुरुत्वं प्रतिपादितम् । तथा हि – "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां, ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ।" (तै.आ., ७.४७) इति ॥ "ईशानो भूतभव्यस्य" इति कठश्रुतिः (४.१३), "ईश्वरः सर्वभूतानाम्" इति भगवद्गीता च (१८.६१) ॥७२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ये लिङ्गधारिणो लोके ये शिवैकपरायणाः ।
तेषां तु शिवनिर्माल्यमुचितं नान्यजन्तुषु ॥७३॥

व्याख्या— "स्वीकार्यं तत्परायणैः" इति शिवलिङ्गप्रसादस्य अधिकारी सूचितः, कोऽधिकारी इत्यत्राह – **ये इति** । **लोके** जगति **ये** ये जनाः **लिङ्गधारिणः** लिङ्गधारणसम्पन्नाः **ये शिवैकपरायणा** ये च शिवे एकस्मिन् बद्धादराः **तेषां तु** तादृशानां जनानां तु **शिवनिर्माल्यम् उचितं** शिवार्पितप्रसादः उचितः; **न अन्यजन्तुषु** नाऽन्यजनेषु ॥७३॥

अन्नजाते तु भक्तेन भुज्यमाने शिवार्पिते ।
सिक्थे सिक्थेऽश्वमेधस्य यत्फलं तदवाप्यते ॥७४॥

व्याख्या— शिवप्रसादस्वीकारफलमाह – **अन्नजाते इति** । **भक्तेन** वीरशैवभक्तेन **शिवार्पिते** शिवाय निवेदिते **अन्नजाते** अन्नविशेषे **भुज्यमाने** खाद्यमाने **सिक्थे सिक्थे** प्रतिसिक्थे प्रतिपक्वतण्डुले **अश्वमेधस्य** अश्वमेधयागस्य **यत् फलं** यादृशं फलं **तद् अवाप्यते** तादृशं फलं प्राप्यते ॥ शिवप्रसादस्वीकारो विहितोऽनया ऋचा – "त्वादत्तेभी रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः । व्यस्मद् द्वेषो वितरं व्यंहो व्यमीवांश्चा-तयस्वा विषूचीः ॥" (ऋ.वे., २.३३.२) इति । व्यास-जैमिनिसंवादेऽस्य मन्त्रस्य इदं व्याख्यानं कृतमिति श्रूयते – "ऋक्सूत्रस्यास्य गूढार्थं कथयाम्यहमादरात् । हे रुद्र त्वा त्वयाऽशीय्य भक्त्यादत्तेभिरादरात् ॥ दत्तैः प्रसादितैः शन्तमेभिः सुखतमैस्तथा ॥ व्यासंसाराख्यरोगस्य भेषजेभिस्तदौषधैः । संसारस्य विरोधित्वात्प्रोक्तैः संसारभेषजैः ॥ इत्थंभूतैस्तत्प्रसादैरतिशुद्धैः शतं हिमाः । शतं समा अनितरमनन्यं स्वीयमुन्नतम् ॥ वीरशैवं भक्तजनं चाशीय्य स्वात्मना सह । योऽयं यदश्नियादस्मद्द्वेषोऽहंकृतिवर्जितः । व्यंहो विगतपापौघोऽप्यमीवाँ भक्तिसंयुतः । अविषूचिः सुमेधावी भवेत्तद्वत्कृपानिधे ॥" (एन्.आर्. करिबसवशास्त्रिणः कन्नडव्याख्याने उदाहृतम्) । तत्रैव रुद्रप्रसादशंसिनीयं याजुषी श्रुतिरुदाहृता – "रुद्रेणात्तममृतं देवा वै भोक्तुकामा वेदाः कामयन्ते" इति ॥७५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवभक्तिविहीनानां जन्तूनां पापकर्मणाम् ।
विशुद्धे शिवनिर्माल्ये नाऽधिकारोऽस्ति कुत्रचित् ॥७६॥

व्याख्या— पूर्वोक्तमेव विशदीकरोति – **शिवभक्तिविहीनानाम्** इति । **शिवभक्तिविहीनानां** शिवे भक्तिः शिवभक्तिः, शिवभक्ति-रहितानां **पापकर्मणाम्** पापं कर्म येषां ते पापकर्माणः, तेषां, पापकर्म आचरमाणानां, **जन्तूनां** जनानां **कुत्रचित्** कुत्रापि **विशुद्धे** परमपवित्रे **शिवनिर्माल्ये** शिवार्पितप्रसादे **न अधिकारः** योग्यता नास्ति ॥ शिव-स्याऽष्टमूर्तित्वं तु प्रसिद्धम् । तेन शिवस्य सर्वव्यापकत्वं सूचितम् । एवं पृथिवी, आपः, तेजः, वायुः, आकाशः, सूर्यः, चन्द्रः, यजमानः (आत्मा) चेति शिवस्याऽष्टरूपाणि यानि सन्ति तानि शिवसम्बद्धदैवतानि । तेषां प्रसादस्य साधारणीभूतत्वात् तत्स्वीकारे सर्वप्राणिनाम् अधिकारः अस्ति । परं तु असाधारणेष्टलिङ्गप्रसादस्वीकारे शिवदीक्षासम्पन्न एवाऽधिकारी-त्यवधेयम् ॥७६॥

शिवलिङ्गप्रसादस्य स्वीकाराद् यत्फलं भवेत् ।
तथा प्रसादस्वीकाराद् गुरुजङ्गमयोरपि ॥७७॥

तस्माद् गुरुं महादेवं शिवयोगिनमेव च ।
पूजयेत् तत्प्रसादान्नं भुञ्जीयात् प्रतिवासरम् ॥७८॥

व्याख्या— प्रसादमाहात्म्यं पुनरप्युक्त्वा चतुर्विधसारायस्थलं युग्मेनो-पसंहरति – **शिवलिङ्गप्रसादस्येति** । **यत् फलं** यादृशं फलं **शिवलिङ्ग-प्रसादस्य** शिवलिङ्गस्य प्रसादः; तस्य, शिवलिङ्गार्पितस्य प्रसादस्य, **स्वीकारात्** सेवनात् **यत्फलं** यादृशं फलं **भवेत्** स्यात्, **तथा** तथा एव **गुरुजङ्गमयोः** गुरुः जङ्गमश्चेति उभयोः **प्रसादस्वीकारात्** अर्पितप्रसादस्वीकारात् तत्फलं भवति ॥ **तस्मात्** तत्कारणात् **गुरुं** दीक्षाकृदाचार्यं **महादेवं** परशिवं, इष्टलिङ्गात्मकं महेश्वरं **शिवयोगिनम् एव च** जङ्गमम् अपि, **पूजयेत्** भक्त्या समर्चयेत्, **तत्प्रसादान्नं** तेभ्यः समर्पितप्रसादरूपम् अन्नं **प्रतिवासरम्** वासरे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वासरे प्रतिवासरम्, प्रतिदिनम् इत्यर्थः, **भुञ्जीयात्** अश्नीयात् च ॥ प्रसादस्वीकारे आचारणनिबन्धनं पूर्वमेवोक्तम् । (पश्यत – ९.२१ श्लोकस्य व्याख्याम्) ।

– इति चतुर्विधसारायस्थलम् –

अथ सोपाधि-निरुपाधि-सहज-दानस्थलानि – (१३,१४,१५)

शिवलिङ्गे शिवाचार्ये शिवयोगिनि भक्तिमान् ।
दानं कुर्याद्यथाशक्ति तत्प्रसदयुतः सदा ॥७९॥

व्याख्या— गुरुलिङ्गजङ्गमेषु दानं कुर्यादिति त्रिविधदानस्थलम् आरभते – **शिवलिङ्गे इति । शिवलिङ्गे** इष्टलिङ्गे, **शिवाचार्ये** गुरौ, **शिवयोगिनि** जङ्गमे च **भक्तिमान्** भक्तियुक्तो भक्तः **तत्प्रसादयुतः** तेषां गुरुलिङ्गजङ्गमानां प्रसादसम्पन्नः सन्, **सदा** सर्वदा **यथाशक्ति** शक्तिम् अनतिकृत्य यथाशक्ति, स्वशक्त्यनुसारं निर्वञ्चनया **दानं कुर्यात्** दानं देयम् । दानकर्मणि "यथाशक्ति" इत्युक्तम् । तत्रेदमुक्तम् – "वित्तशाठ्यं न कर्तव्यं यदीच्छेत् परमां गतिम् ।" (चं.आ., क्रि.पा., २.७१) इति ॥७९॥

दानं च त्रिविधं प्रोक्तं सोपाधिनिरुपाधिकम् ।
सहजं चेति सर्वेषां सर्वतन्त्रविशारदैः ॥८०॥

व्याख्या— दानत्रैविध्यमाह – **दानम् इति । दानं च** दानं तावत् **सर्वेषां** सर्वजनानां **सोपाधिनिरुपाधिकं** सोपाधि च निरुपाधि च सोपाधिनिरुपाधिनी, द्वन्द्वान्तः कप्प्रत्ययः प्रत्येकं सम्बध्यते, एवं सोपाधिकं दानं प्रथमम्, निरुपाधिकं दानं द्वितीयम्, **सहजं च इति** सहजं दानं चेति तृतीयम्, **सर्वतन्त्रविशारदैः** सर्वेषु तन्त्रेषु विशारदाः, तैः, सर्वागमज्ञानिभिः **त्रिविधं** त्रिविधत्वेन **प्रोक्तं** कथितम् ॥ मरितोण्टदार्यस्य व्याख्यायां योगजागमवाक्यम् उदाहृतम् । तच्च – "देहदानात् सत्यसिद्धिरर्थदानाच्च निर्वृतिः । प्राणदानाज्ज्ञानसिद्धिरेवं सर्वं स्थिरं भवेत् ॥" इति । तत्र प्राणदानं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहदानम् अर्थदानं चेति त्रिविधदानमुक्तम् । एकैकमपि दानं सोपाधिक-निरुपाधिक-सहजदानत्वेन त्रिविधमिति मन्तव्यम् ॥

फलाभिसन्धिसंयुक्तं दानं यद् विहितं भवेत् ।
तत्सोपाधिकमाख्यातं मुमुक्षुभिरनादृतम् ॥८१॥

व्याख्या— तत्र सोपाधिकदानलक्षणमाह – **फलाभिसन्धिसंयुक्त-मिति । यत्** यादृशं **फलाभिसन्धिसंयुक्तं दानं** फलस्य अभिसन्धिः, तेन संयुक्तम्, फलोदयाकाङ्क्षासहितं दानं **विहितं भवेत्** कृतं स्यात् **तत्** तादृशं **सोपाधिकमाख्यातं** सोपाधिकदानमिति कथितम्, तच्च **मुमुक्षुभिः** मोक्षं प्राप्तुम् इच्छद्भिः **अनादृतं** न आदरेण अङ्गीकृतम् ॥ फलापेक्षया क्रियमाणं दानं सोपाधिकदानं, फलोद्देशस्य तत्र उपाधित्वात् । अस्य सकामदानमित्यपरं नाम । स्वर्गापेक्षया युद्धादिषु देहदानम्, कैलासा-काङ्क्षया गङ्गादिषु पवित्रनदीषु प्राणत्यागः प्राणदानम्, स्वर्गाय बहुधनेन यज्ञाचरणम् अर्थदानम् इति त्रयमपि सोपाधिकमेव । फलकाङ्क्षा यत्र वर्तते तत्र योगसमाधिः न सिद्ध्यति । तदुक्तं भगवता – "यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति-वादिनः ॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ भोगैश्वर्यप्रसक्तानां तयाऽपहतचेतसाम् । व्यव-सायात्मिका बुद्धिः समाधौ न विधीयते ॥" (भ.गी., २.४२-४४) इति ॥ मोक्षकाङ्क्षिणस्तु एतादृशे सकामदाने अप्रसक्ताः भवन्ति ॥८१॥

फलाभिसन्धिनिर्मुक्तमीश्वरार्पितकाङ्क्षितम् ।
निरुपाधिकमाख्यातं दानं दानविशारदैः ॥८२॥

व्याख्या— निरुपाधिकदानलक्षणमाह – **फलाभिसन्धिनिर्मुक्तमिति। फलाभिसन्धिनिर्मुक्तं** फलेन अभिसन्धिः फलाभिसन्धिः, तस्मात् निर्मुक्तम्, फलाभिलापरहितम् **ईश्वरार्पितकाङ्क्षितं दानम्** ईश्वरे अर्पितम् ईश्वरा-र्पितम् तेन काङ्क्षितम्, महेश्वरार्पणाभिलाषेण कृतं दानम् **दानविशारदैः** दानप्रवीणैः, दानतत्त्वाभिज्ञैः इत्यर्थः, **निरुपाधिकम् आख्यातम्** निरुपा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

धिकमिति कथितम् ॥ निरुपाधिकदानस्य निष्कामदानमिति नामान्तरम् । दानं कर्तव्यत्वेन कर्मैव । तत् स्यात् निरभिलषितं कर्म । तदुक्तं भगवद्गीतायाम् – "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफल-हेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥" (२.४७) इति । यत्किमपि कार्यं स्यात् कर्तव्यतया, ध्यानं वा पूजा वा, तस्य करणे तु फले तात्पर्यं न । मुमुक्षूणां फलेच्छारहितत्वेन परमेश्वरार्पणबुद्ध्या च दानं कर्तव्यम् ॥८२॥

आदातृदातृदेयानां शिवभावं विचिन्तयन् ।
आत्मनोऽकर्तृभावं च यद्दत्तं तत्सहजं भवेत् ॥८३॥

व्याख्या— सहजदानलक्षणमाह – **आदातृदातृदेयानामिति** । आदा-तृदातृदेयानाम् आदाता च दाता च देयं च आदातृदातृदेयानि, तेषाम्; दानग्रहीता आदाता, दानकर्ता तु दाता, यद्दत्तं तद्देयम्, तेषाम्, **शिवभावं विचिन्तयन्** शिवस्वरूपं विभावयन् **आत्मनः अकर्तृभावं च** स्वात्मनः कर्तृत्वविचाररहितः सन् **यद् दत्तं** यत् दानं कृतं **तत् सहजं भवेत्** सहजदानं स्यात् ॥ आदातृदातृदेयानां शिवभावम् आत्मनोऽदातृत्वं च विभावयन् सहजदानी "ईशावस्यमिदं सर्वम्" (ईश.उ.१) इति; "सर्वं खल्विदं ब्रह्म" (छां.उ., ३.२४.१) इति च भावनया दानं प्रददाति । "भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ।" (श्वे.उ., १.१२) इति श्रुतिरपि इदमेव समर्थयति । अत्र भोक्ता ग्रहीता, भोज्यं देयम्, प्रेरिता च दाता चेत्यवगन्तव्यम् ॥८३॥

सहजं दानमुत्कृष्टं सर्वदानोत्तमोत्तमम् ।
शिवज्ञानप्रदं पुंसां जन्मरोगनिवर्तकम् ॥८४॥

व्याख्या— सहजदानस्य सर्वश्रेष्ठत्वमाह – **सहजमिति** । **सहजं दानं** आदातृदातृदेयरूपत्रिपुटीरहितं दानम् **उत्कृष्टं** श्रेष्ठम्, **सर्वदानोत्तमोत्तमं** सर्वस्माद् दानाद् उत्तमोत्तमम्, श्रेष्ठमित्यर्थः; तच्च **पुंसां** मनुष्याणां **शिवज्ञानप्रदं** शिवस्य ज्ञानं प्रददाति इति **जन्मरोगनिवर्तकं** जन्म एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रोगः, जन्मरोगं निवर्तयति इति ॥ उक्तत्रिपुटीरहितत्वं नाम 'शिव एव स्वात्मा' इत्येवंरूपस्य प्रज्ञानस्य सूचकः ॥८४॥

शिवाय शिवभक्ताय दीयते यदि किञ्चन ।
भक्त्या तदपि विख्यातं सहजं दानमुत्तमम् ॥८५॥

व्याख्या— न केवलं गुरुलिङ्गजङ्गमेभ्यः कृतं त्रिपुटीभावरहितदान-मात्रं परं त्वन्यदपि शिवसम्बन्धिदानं सहजं भवितुमर्हतीत्याह — **शिवायेति** । **शिवाय** स्थावरलिङ्गाय, **शिवभक्ताय** विरक्तजङ्गमेतराय **भक्त्या** भक्तिपुरःसरं **यदि किञ्चन दीयते** अल्पमपि दीयते चेत्, **तदपि** तद् दानमपि **उत्तमं** श्रेष्ठं **सहजं दानं** 'सहजं दानमिति' विख्यातं प्रसिद्धम् ॥ शिवाय आत्मार्पणं नाम सर्वोत्कृष्टं सहजदानम् ॥

दानात् स्वर्णसहस्रस्य सत्पात्रे यत्फलं भवेत् ।
एकपुष्पप्रदानेन शिवे तत्फलमिष्यते ॥८६॥

व्याख्या— सत्पात्रे सुवर्णसहस्रदानवत् शिवे एकपुष्पदानम् अपि समानफलप्रदं भवतीत्युक्तम् — **दानाद्** इति । **सत्पात्रे** योग्यग्रहीतरि **दानात्** दानवशात् **यत्फलं** यादृशं फलं **भवेत्** स्यात् **शिवे** परमात्मनि **एकपुष्पप्रदानेन** एकस्य पुष्पस्य समर्पणेन **तत्फलं** तादृशं फलम् **इष्यते** प्राप्तुं शक्यते ॥८६॥

शिव एव परं पात्रं सर्वविद्यानिधिर्गुरुः ।
तस्मै दत्तं तु यत्किञ्चित्तदनन्तफलं भवेत् ॥८७॥

व्याख्या— शिवाय दत्तलेशमपि महत्फलप्रदं भवतीति तत्र कारण-माह— **शिव इति** । **सर्वविद्यानिधिः** सर्वासां विद्यानां शेवधिः (सम्पत्) **गुरुः** गुरूणां गुरुः परमगुरुः **शिवः एव** परमेश्वर एव **परं पात्रं** परमं सत्पात्रं **भवेत्** स्यात्; **तस्मै तु** शिवाय तु **यत्किञ्चित्** यदल्पमपि **दत्तं** समर्पितं तद् **अनन्तफलं** तद् अपरिमितफलं **भवेत्** स्यात् ॥ शिवस्य सर्व-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विद्यानिधित्वं च प्रतिपादितं याजुष्या श्रुत्या – "ईशानः सर्वविद्यानाम्" (तै.आ., ७.४७) इति ॥८७॥

शिवयोगी शिवः साक्षाच्छिवज्ञानमहोदधिः ।
यत्किञ्चिद्दीयते तस्मै तद्दानं पारमार्थिकम् ॥८८॥

व्याख्या— शिवयोगिने दत्तं परमार्थिकमित्याह – **शिवयोगीति** । **शिवज्ञानमहोदधिः** महान् उदधिः महोदधिः, शिवस्य ज्ञानं शिवज्ञानम्, शिवज्ञानस्य महोदधिः, शिवस्वरूपज्ञानस्य महासमुद्रः, **शिवयोगी** शिवयोगसम्पन्नः जङ्गमः,. **साक्षात्** प्रत्यक्षतया **शिवः** परशिवः; **तस्मै** तस्मै शिवयोगिने **यत्किञ्चिद्दीयते** यदल्पमपि समर्प्यते तद् **दानं** तत्समर्पितं **पारमार्थिकम्** परमार्थः प्रयोजनमस्य इति 'ठञ्' - प्रत्ययः – "प्रयोजनम्" (पा., ५.१.१०९), "ठस्येकः" (पा., ७.३.५०) इति ठस्य इकादेशः; पारमार्थिकम् परमार्थप्रयोजनम् ॥ शिवः सर्वविद्याधिपतिः, शिवयोगी च शिवज्ञानमहासमुद्रः । एवं शिवयोगी तु साक्षात् शिवः ॥ तस्मै दत्तं किञ्चिदपि परमोत्कृष्टफलप्रदम् ॥८८॥

शिवयोगी महापात्रं सर्वेषां दानकर्मणि ।
तस्मान्नास्ति परं किञ्चित्पात्रं शास्त्रविचारतः ॥८९॥

व्याख्या— शिवयोगिनः परमपात्रत्वमुक्तम् – **शिवयोगीति** । **दानकर्मणि** दानरूपकर्मविषये **सर्वेषां** सकलसत्पात्राणां मध्ये **शिवयोगी** शिवयोगसम्पन्नजङ्गमः **महापात्रं** महत्पात्रं महान् दानस्वीकारयोग्यत्वशाली; **तस्मात् परं** तस्मात् शिवयोगिनः श्रेष्ठं **शास्त्रविचारतः** शास्त्रोक्ताभिप्रायवशात् **किञ्चित्पात्रं** किञ्चिदपि पात्रं परिग्रहयोग्यताशाली **नास्ति** न विद्यते ॥ शिवयोगी तावत् सत्पात्राणां मध्ये सत्पात्रतमः । तस्मात् सत्पात्रेषु श्रेष्ठपात्रम् ॥८९॥

भिक्षामात्रप्रदानेन शान्ताय शिवयोगिने ।
यत्फलं लभ्यते नैतद् यज्ञकोटिशतैरपि ॥९०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— शिवयोगिने दत्तस्य दानस्य फलमाह – **भिक्षामात्रप्रदानेनेति**। **शान्ताय** रागद्वेषरहिताय **शिवयोगिने** शिवयोगसम्पन्नजङ्गमाय **भिक्षामात्रप्रदानेन** ग्रासमात्रप्रदानेन **यत्फलं** यादृशं फलं **लभ्यते** प्राप्यते एतत् एतत् फलं **यज्ञकोटिशतैः** अपि यज्ञानां कोटिः, यज्ञाकोटीनां शतैः **न** न लभ्यते ॥९०॥

शिवयोगिनि संतृप्ते तृप्तो भवति शङ्करः ।
तत्तृप्त्या तन्मयं विश्वं तृप्तिमेति चराचरम् ॥९१॥

व्याख्या— जङ्गमतृप्त्या सर्वतृप्तिरित्याह – **शिवयोगिनीति**। **शिवयोगिनि** तपोसम्पन्नजङ्गमे **संतृप्ते** सन्तुष्टे सति **शङ्करः** शिवः **तृप्तो भवति** सन्तुष्टिं भजते, **तत्तृप्त्या** तस्य शिवस्य सन्तुष्ट्या **तन्मयं** शिवमयं **चराचरविश्वं** स्थावरजङ्गमात्मकं जगत् **तृप्तिमेति** सन्तुष्टिं प्राप्नोति ॥ शिवज्ञानसम्पन्नः शिवयोगी साक्षात् शिव एव। "ब्रह्म वेद ब्रह्मैव भवति" इति मुण्डकश्रुतिः (३.२.९)। "सर्वं खल्विदं ब्रह्म" (छां.उ., ३.१४.१) इति, "सर्वो वै रुद्रः" (म.ना.उ., १३.२) इति च श्रुतिद्वयं जगतः परशिवमयत्वं निरूपयति ॥९१॥

तस्मात् सर्वप्रयत्नेन येन केनापि कर्मणा ।
तृप्तिं कुर्यात् सदाकालमन्नाद्यैः शिवयोगिनः ॥९२॥

व्याख्या— सर्वदा शिवयोगिनः संतृप्तिं कुर्यादित्याह – **तस्मादिति**। **तस्मात्** पूर्वोक्तकारणात् **सर्वप्रयत्नेन** सकलप्रयत्नेन **येन केनापि कर्मणा** यस्याः कस्याः अपि क्रियया, यया कयापि सेवया इत्यर्थः, **सदाकालं** सर्वदा **अन्नाद्यैः** अन्नपानादिभिः **शिवयोगिनः** ज्ञाननिधेः जङ्गमस्य **तृप्तिं कुर्यात्** संतृप्तिमाचरेत् ॥९२॥

निरुपाधिकचिद्रूप – परानन्दात्मवस्तुनि ।
समाप्तं सकलं यस्य स दानी शङ्करः स्वयम् ॥९३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— सहजदानशीलः साक्षात् शिव एवेति प्राह – **निरुपाधिकेत्यादि । यस्य** यस्य दानिनः **सकलं** शरीरप्राणधनरूपं सर्वं, **निरुपाधिकचिद्रूपपरानन्दात्मवस्तुनि** निर्गतः उपाधिः यस्मात् तत् निरुपाधिकं निर्विशेषं बाह्यनिमित्तरहितं वा; चिदेव रूपं यस्य तत् चिद्रूपं ज्ञानरूपं, परः आनन्दः यस्य तत् परानन्दं परमानन्दं, आत्मरूपं वस्तु आत्मवस्तु, आत्मतत्त्वम्, निरुपाधिकं चिद्रूपं परानन्दं च आत्मवस्तु, तस्मिन्, निर्विशेषे चिद्रूपे परमानन्दे आत्मवस्तुनि, **समाप्तं** समर्पितं, **सः** तादृशः **दानी** दानशीलः भक्तः **स्वयं शङ्करः** स्वयमेव शिवः ॥ सहजदानी स्वयमेव शङ्करः इत्यभिप्रायः ॥९३॥

उक्ताखिलाचारपरायणोऽसौ
सदा वितन्वन् सहजं तु दानम् ।
ब्रह्मादिसम्पत्सु विरक्तचित्तो
भक्तो हि माहेश्वरतामुपैति ॥९४॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ भक्तमार्ग-क्रियास्थलादिप्रसङ्गो नाम नवमः परिच्छेदः समाप्तः ॥९॥

व्याख्या— सहजदानी महाभक्त एव माहेश्वरस्थलयोग्यतां भजते इत्युक्त्वा भक्तस्थलमुपसंहरति – **उक्तेत्यादिना । उक्ताखिलाचारपरायणः** उक्ताः अखिलाः आचाराः उक्ताखिलाचाराः, निरूपितसर्वाचाराः, तेषु परायणः अतिशयितश्रद्धावान्, **ब्रह्मादिसम्पत्सु** ब्रह्मविष्ण्वादीनां विभवेषु, **विरक्तचित्तः** विरक्तं चित्तं यस्य सः, निरासक्तमनाः, **असौ भक्तः** एष शिवभक्तः, **सदा** सर्वदा **सहजं तु दानं** सहजाख्यं दानं तु, **वितन्वन्** कुर्वन्, **माहेश्वरतां** माहेश्वरस्य भावः, माहेश्वरता, तां, माहेश्वरस्थलभाजनतां, **उपैति** प्राप्नोति **हि** इति प्रसिद्धम् ॥ श्रीगुरुणा दीक्षाद्वाराऽऽभ्यन्तरलिङ्गद्वयस्याऽनुसन्धानपूर्वकं प्राप्तेष्टलिङ्गोऽष्टावरणसम्पन्नो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

धृतभस्मरुद्राक्षो गुरुलिङ्गजङ्गमानां पादोदकप्रसादयोः स्वीकरणशीलः, तेन पवित्रशरीरवान् भक्तमार्गस्थलाचारसम्पन्नः त्रिविधदानेषु विशेषतया सहजदाने निष्णातश्च भक्त एव भक्तस्थलोक्तानां सदाचाराणां समाचरणमहिम्ना पक्वानुभवेन च माहेश्वरस्थलसोपानम् आरूढवान् इति भावः॥ अत्र उपजातिः छन्दः। उक्तं च तल्लक्षणम्। (पश्यत २.३३ तम श्लोकस्य व्याख्याम्)।

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
नवमः परिच्छेदः समाप्तः ॥९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दशमः परिच्छेदः

माहेश्वरस्य नवविधस्थलप्रसङ्गः

व्याख्या — भक्तस्थलीयपञ्चदशावान्तराङ्गस्थलानां निरूपणादनन्तरं माहेश्वरस्थलान्तर्गतनवावान्तराङ्गस्थलविवक्षुर्ग्रन्थकृद् रेणुकागस्त्यसंवाद प्रवर्तयति । आदावगस्त्यप्रश्नः —

अगस्त्य उवाच —

भक्तस्थलं समाख्यातं भवता गणनायक ।
केन वा धर्मभेदेन भक्तो माहेश्वरो भवेत् ॥१॥

व्याख्या — केन आचारेण भक्तो माहेश्वरो भवति इत्यत्राह — **भक्तस्थलम्** इति । **गणनायक** हे गणाध्यक्ष रेणुकाचार्य, **भवता** अनुग्रहशीलेन भवता **भक्तस्थलं** भक्तसम्बन्धि स्थलं पञ्चदशस्थलात्मकं **समाख्यातं** सम्यगुपदिष्टम् । **केन वा धर्मभेदेन** कीदृशेन वा धर्माचरणेन **भक्तः** भक्तस्थलस्य साधकः **माहेश्वरो भवेत्** माहेश्वरस्थलधर्मवान् भवितुमर्हति ॥१॥

रेणुक उवाच —

केवले सहजे दाने निष्णातः शिवतत्परः ।
ब्रह्मादिस्थानविमुखो भक्तो माहेश्वरः स्मृतः ॥२॥

व्याख्या — माहेश्वरः क इत्यत्राह — **केवले** इति । **केवले सहजे दाने** सहजाख्यदानमात्रे **निष्णातः** कुशलः, **शिवतत्परः** शिवैकनिष्ठः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ब्रह्मादिस्थानविमुखः ब्रह्मविष्ण्वादिपदे निरुत्सुकश्च **भक्तः** भक्तस्थलाचारेण परिणतमनस्कः **माहेश्वरः** माहेश्वरस्थलाचारोद्युक्त इति **स्मृतः** ज्ञातः ॥ सहजदानं तु परमवैराग्यद्योतकः । स्वबाह्याभ्यन्तरे शिवमेव सर्वत्र परिपश्यति । शिवपूजायां सुतरां निष्ठः सन् न कदापि तद्व्रतं त्यजति । शिवतत्परत्वं नाम कायेन वाचा मनसा शिवैकनिष्ठत्वम् । तदेव वैशिष्ट्यं माहेश्वरस्य ॥२॥

भक्तेर्यदा समुत्कर्षो भवेद्वैराग्यगौरवात् ।
तदा माहेश्वरः प्रोक्तो भक्तः स्थिरविवेकवान् ॥३॥

व्याख्या— तदेव विशदयति – **भक्तेरिति । यदा** यस्मिन् काले **वैराग्यगौरवात्** विरागस्य भावः वैराग्यम्, वैराग्यस्य गौरवं वैराग्यगौरवम्, वैराग्याधिक्यं तस्मात्, **भक्तेः समुत्कर्षः** भक्तेरतिशयत्वम्, **तदा** तस्मिन् काले **स्थिरविवेकवान्** दृढतापन्ननित्यानित्यवस्तुविवेकशाली **भक्तः** शिवभक्तः **माहेश्वरः प्रोक्तः** माहेश्वर इति कथितः ॥ सूक्ष्मागमोत्तरे माहेश्वरलक्षणम् एवमुक्तम् – "तच्चित्तममलं यस्य स वै माहेश्वरः स्मृतः" (क्रि. पा., ८.३४) इति । भक्तस्थलीया भक्तिपूर्वकशुद्धाचारा लिङ्गपूजासार्थक्ये विश्वासदार्ढ्यं विधाय निवृत्तसर्वविकल्पभावे मनसि निर्मलतां पोषयन्ति । मनोनैर्मल्यमिदं माहेश्वरस्थलस्य वैशिष्ट्यम् । अत्र माहेश्वरस्थले प्रवर्तमानस्य त्रीणि लक्षणानि भवन्ति भक्तिसमुत्कर्षः वैराग्यगौरवम्, स्थिरविवेकश्चेति । अस्यावान्तरस्थलनवके विकासः परिपाकदशापर्यन्तनयनं च दृश्येते ॥३॥

माहेश्वरस्थलं वक्ष्ये यथोक्तं शम्भुना पुरा ।
माहेश्वरप्रशंसादौ लिङ्गनिष्ठा ततः परम् ॥४॥

पूर्वाश्रयनिरासश्च तथाद्वैतनिराकृतिः ।
आह्वानवर्जनं पश्चाद् अष्टमूर्तिनिराकृतिः ॥५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वगत्वनिरासश्च शिवत्वं शिवभक्तयोः ।
एवं नवविधं प्रोक्तं माहेश्वरमहास्थलम् ॥६॥

व्याख्या— माहेश्वरस्थलान्तर्गतावान्तराङ्गस्थलनवकमाह – **माहेश्वरे-त्यादिश्लोकत्रयेण** । पुरा अज्ञातपूर्वकाले **शम्भुना** परशिवेन **यथा उक्तं** येन प्रकारेण उक्तं तथा **माहेश्वरस्थलं** माहेश्वरसम्बन्धि स्थलं, सविभागम् इति यावत्, **वक्ष्ये** कथयामि; नवस्थलानां नामानि – १. माहेश्वर-प्रशंसास्थलम्, २. लिङ्गनिष्ठास्थलम्, ३. पूर्वाश्रयनिरसनस्थलम्, ४. अद्वैत-निरसनस्थलम्, ५. आह्वाननिरसनस्थलम्, ६. अष्टमूर्तिनिरसनस्थलम्, ७. सर्वगत्वनिरसनस्थलम्, ८. शिवजगन्मयस्थलम्, ९. भक्तदेहिकलिङ्ग-स्थलम्, **एवं** एवरीत्या **माहेश्वरमहास्थलम्** माहेश्वराख्यं महत्त्वयुक्तं स्थलम्, **नवविधं** नवप्रकारवद् इति **प्रोक्तम्** कथितम् ॥ अत्र 'शिवत्वं शिवभक्तयोः' इत्यनेन स्थलद्वयं स्वीकृतम् । शिवजगन्मयस्थलमित्येकम्, भक्तदेहिकलिङ्गस्थलमित्यपरम् । उक्तस्य श्लोकपादस्य स्पष्टं भासमानः अर्थस्तु 'शिवस्य भक्तस्य शिवत्वम्' इति । 'भक्तस्य शिवत्वम्' इत्यनेन भक्तदेहिकलिङ्गमिति अर्थः ग्रहीतुं शक्यते । परं तु 'शिवस्य शिवत्वं' नाम किम् ? अत्र विचार्यते – श्री. एम्. एल्. नागण्णः मरितोण्टदार्यस्य व्याख्यासहितं कन्नडलिप्यां सिद्धान्तशिखामणिं सम्पादितवान् । तत्र अस्य पादस्य पाठः 'शिवत्वं शिवभक्तयोः' इत्येवास्ति । परं तु अस्य पादस्य 'विश्वरूपत्वमीशितुः' इति पाठान्तरं दत्तम्; उत्तरार्धस्य श्लोकस्य "भक्तदेहिकलिङ्गं च प्रोक्तं नवविधं मुने" इति पाठान्तरमपि दत्तम् अस्ति । उज्जनीशस्य कन्नडव्याख्यानसहितं श्री जि.जि. मञ्जुनाथन् महोदयेन सम्पादिते, कन्नडसाहित्यपरिषदा प्रकाशिते सिद्धान्तशिखमणा-वस्य पादस्य पाठः "शिवत्वं भक्तविश्वयोः" इत्यस्ति । पुनः श्री काशीनाथ-शास्त्रिणा स्वरचितकन्नडव्याख्यानसहितं सम्पादिते सिद्धान्तशिखमणा-वपि अयमेव पाठः "शिवत्वं विश्वभक्तयोः" इत्येवं किञ्चित्शब्दविपर्ययेण आदृतः । "शिवस्य विश्वभक्तयोः" इति पाठे स्वीकृते सति 'शिवजग-न्मयस्थलम्', 'भक्तदेहिकलिङ्गस्थलम्' इति स्थलद्वयमपि शक्यते ग्रहीतुम् इति संभावयामि ॥४-६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आदितः क्रमशो वक्ष्ये स्थलभेदस्य लक्षणम् ।
समाहितेन मनसा श्रूयतां भवता मुने ॥७॥

व्याख्या— माहेश्वरसम्बन्धि नवविधस्थलं निरूपयामीत्याह— **आदितः** इति । **आदितः** प्रथमस्थलाद् आरभ्य **क्रमशः** क्रमेण **स्थलभेदस्य** नवस्थलविशेषस्य **लक्षणं** स्वरूपं **वक्ष्ये** कथयामि । **मुने** हे अगस्त्यमुने **भवता समाहितेन मनसा** भवदीयेन सावधानेन चित्तेन **श्रूयतां** श्रवणविषयीक्रियताम् ॥७॥

१. अथ माहेश्वरप्रशंसास्थलम् – (१६)

विश्वस्मादधिको रुद्रो विश्वानुग्रहकारकः ।
इति यस्य स्थिरा बुद्धिः स वै माहेश्वरः स्मृतः ॥८॥

व्याख्या— माहेश्वरस्य स्वरूपम् आह – **विश्वस्मादिति । विश्वानुग्रहकारकः** विश्वस्य अनुग्रहं करोति इति, ण्वुल् प्रत्ययः (वु) "ण्वुल्तृचौ" (पा.अ. ३.१.१३३), "युवोरनाकौ" (पा.अ. ७.१.१) वु = अक; विश्वानुग्रहकारकः, समस्तचराचरात्मकजगतोऽनुग्रहीता, **रुद्रः** परशिवः **विश्वस्मादधिकः** समस्तदेवदानवयक्षगन्धर्वादिभ्यः अधिकः श्रेष्ठः **इति** एवं रीत्या **यस्य** यस्य पुरुषस्य **बुद्धिः** मतिः **स्थिरा** दृढा, दृढविश्वासवती मतिः **सः वै** तादृशः पुरुषः खलु **माहेश्वरः** माहेश्वरस्थलधर्मवान् इति **स्मृतः** ज्ञातः ॥ परमात्मनः शिवस्य, रुद्र इति पर्यायनामवतः, विश्वस्माद् अधिकत्वं तु उद्घोष्यते श्वेताश्वतरश्रुत्या – "यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः ।" (३.४) इति, "एक एव रुद्रो न द्वितीयाय तस्थुः" (३.२) इति च । स एकैवासीत्, अस्ति भविष्यति च । तथा चाह श्रुतिः – "अहमेकः प्रथममासं वर्तामि भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति" (अथ. शिर. उ. १-२) इति ॥८॥

ब्रह्माद्यैर्मलिनप्रायैर्निर्मले परमेश्वरे ।
साम्योक्तिं यो न सहते स वै माहेश्वराभिधः ॥९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— माहेश्वरः कदापि परमेश्वरेण अन्यदेवतासाम्यत्वकथनं न सहते इत्याह — **ब्रह्माद्यैः इति । यः** यः पुरुषः **मलिनप्रायैः** मलत्रय-परिणामपीडाबहुलैः **ब्रह्माद्यैः** ब्रह्मोपेन्द्रादिभिः सह **निर्मले** मलरहिते, **परमेश्वरे** परमात्मनि शिवे **साम्योक्तिं** समानताकथनं **न सहते** न क्षाम्यति, **स वै** सः पुरुषः एव **माहेश्वराभिधः** माहेश्वर इति अभिधा यस्य सः, माहेश्वरनामभाग् भवति ॥ तदुक्तम्— "ब्रह्मविष्णुरुद्रेन्द्राः सम्प्रसूयन्ते... शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य ।" (अथ. शिखा.उ., ४) इति । अत्र रुद्रशब्दः जगत्संहारकपरः न तु परशिवब्रह्मपरः । ब्रह्माद्या जननमरणपीडायुक्तत्वेन समला इति ज्ञायन्ते । परमेश्वरस्तु निर्मलः । तत्र कारणमुक्तम् — "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्य-धिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥" (श्वे. उ., ६.८-९) इति । परमात्मनः शम्भोः कार्यरूपं शरीरं बाह्यान्तःकरणजातं नास्ति, तस्य अद्वितीयसन्मात्रत्वात् । तेन समः अभ्यधिको वा न ज्ञायते । तस्य सर्वोत्कृष्टा शक्तिः स्वाभाविकी, स्वाभेदत्वेन स्थितत्वात् । सा च ज्ञानादिशक्तिरूपेण बहुविधा, अनेककार्यकरणत्वात् । पुनस्तस्य स्वाति-रिक्तत्वेन कश्चित् स्वामी नास्ति । एवमेव न स्वातिरिक्तत्वेन कश्चि-न्नियन्ता । तस्य जगद्रूपकार्यवशाद् अनुमीयमानत्वेऽपि कारणरूपः स न शक्यते द्रष्टुं, अमूर्तत्वात् । करणाधिपतेस्तस्य अधिपत्यन्तरं न विद्यते । न तस्य कश्चिदुत्पादको वा स्वामी वा न विद्यते । तादृशसर्वाधिकस्य सर्वाधिपतेश्च पुरतः कोऽन्यो देवस्तस्य समानो भवितुमर्हति । न कोऽपि इत्यर्थः । तादृशं समानतावादं यो न सहते स एव माहेश्वरः ॥९॥

ईश्वरः सर्वभूतानां ब्रह्मादीनां महानिति ।
बुद्धियोगात्तदासक्तो भक्तो माहेश्वरः स्मृतः ॥१०॥

व्याख्या— शम्भोर्महत्त्वे निष्ठा भक्तानां माहेश्वरस्य वैशिष्ट्य-मित्याह— **ईश्वर इति । सर्वभूतानां** सर्वेषां भूतानां सकलप्राणिनां **ईश्वरः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वामी, नियन्ता, प्रेरकः, स एव **ब्रह्मादीनां** ब्रह्मवष्ण्वादीनां **महान्** श्रेष्ठः इति एवंरूपात् **बुद्धियोगात्** ज्ञानसम्बन्धात् **तदासक्तः** परमेश्वरासक्तः **भक्तः** भक्तः एव **माहेश्वरः** माहेश्वरसोपानारूढः इति **स्मृतः** ज्ञातः ॥ शम्भोः सर्वभूतेश्वरत्वं बह्वीभिः श्रुतिभिः कीर्त्यते । तथा हि – "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥" (म. ना. उ., १०.८) इति पञ्चब्रह्ममन्त्रेष्वेकतम इशानब्रह्ममन्त्रः । "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥" (श्वे. उ., ६.११) इति । "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्वभावेन भारत ॥" (भ. गी., १८.६१) इति स्मृतिरप्याह । महेश्वरः सर्वभूतानां सर्वविद्यानां च अधिपतिरिति माहेश्वरस्य दृढा बुद्धिः ॥१०॥

ब्रह्मादिदेवताजालं मोहितं मायया सदा ।
अशक्तं मुक्तिदाने तु क्षयातिशयसंयुतम् ॥११॥

अनादिमुक्तो भगवानेक एव महेश्वरः ।
मुक्तिदश्चेति यो वेद स वै माहेश्वरः स्मृतः ॥१२॥

व्याख्या— शिव एव मुक्तिप्रद इति माहेश्वरस्य दृढनिश्चय इत्याह – **ब्रह्मादीत्यादियुग्मेन** । **क्षयातिशयसंयुतं** क्षयश्च अतिशयश्च क्षयातिशयौ, ताभ्यां संयुतं, अपचयोपचयसंयुक्तं, **ब्रह्मादिदेवताजालं** ब्रह्माद्यं देवता-जालं (देवतानां जालं), ब्रह्मविष्ण्वादिदेवताजातं **सदा** सर्वदा **मायया** परमेश्वरीयमायाशक्त्या **मोहितं** मोहपरवशीकृतं **मुक्तिदाने** मोक्षप्रदाने **अशक्तम्** अक्षमम्, असमर्थम् इत्यर्थः ॥ **एक एव** एक एवाद्वितीयः **महेश्वरः** परमेश्वरः **अनादिमुक्तः** अनादितः मुक्तः नित्यमुक्तः इति यावत्, **भगवान्** भगः ऐश्वर्यादिषट्कं अस्य अस्ति इति, मतुप् (भग+मतुप्) – "तदस्यास्त्यस्मिन्निति मतुप्" (पा. ५.२.९४); मकारस्य वकारः – "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" (पा. ८.२.९); ऐश्वर्यम्, वीर्यम्,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यशः, श्रीः, ज्ञानम्, वैराग्यं चेति षट् भगशब्देन ज्ञायन्ते । तदुक्तम् – "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतीरणा ॥" इति । "भगश्श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" (अमर., ३.१८३) – ऐश्वर्यम्, कामः, माहात्म्यम्, वीर्यम्, यत्नः, अर्कः, कीर्तिः इति । षड्गुणैश्वर्यं भगः ; भगवत् इति शब्दः, तस्य पुल्लिङ्गे प्रथमैकवचने रूपम् । एक एव महेश्वरः भगवान्, **मुक्तिदः च** मुक्तिं ददाति इति मुक्तिदः मोक्षदायकः अपि इति **यो** यः भक्तः **वेद** जानाति, **स वै** स एव **माहेश्वरः स्मृतः** माहेश्वरः इति ज्ञातः ॥ "तत्परं ब्रह्म स एकः स एको रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेवः ।" (अथ. शिर. उ., ४४) इति । एतद्वाक्यानुसारं प्रसिद्धः परमेश्वर एव मुक्ति-प्रदायक इति यस्य दृढप्रत्ययः स माहेश्वरः ॥ परमेश्वरस्य स्वरूपं ज्ञात्वैव मुक्तिं प्राप्नोति मनुष्य इति कथितम् अन्येन श्रुतिवाक्येन । तथा हि– "स एव सर्वं यद्भूतो यच्च भव्यं सनातनम् । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥" (कै. उ., ९) इति ॥११-१२॥

क्षयातिशययुक्ता ब्रह्मविष्ण्वादिसम्पदः ।
तृणवन्मन्यते युक्त्या वीरमाहेश्वरः सदा ॥१३॥

शब्दस्पर्शादिसम्पन्ने सुखलेशे तु निःस्पृहः ।
शिवानन्दे समुत्कण्ठो वीरमाहेश्वरो भवेत् ॥१४॥

व्याख्या — शिवानन्दासक्तः सर्ववैराग्यवान् माहेश्वर इत्याह युग्मेन — **क्षयातिशयेत्यादिना** । **सदा** सर्वदा **वीरमाहेश्वरः** वीरमाहेश्वराभि-धानवान् **क्षयातिशययुक्ताः** क्षयश्च अतिशयश्च क्षयातिशयौ ताभ्यां युक्ताः, क्षयवृद्धिसंयुक्ताः **ब्रह्मविष्ण्वादिसम्पदः** ब्रह्मा विष्णुः इत्यादीनां सम्पदः, **युक्त्या** हेतुविचारेण **तृणवत्** तृणसमानं हेयमिति **मन्यते** जानाति ॥ **शब्दस्पर्शादिसम्पन्ने** शब्दस्पर्शादिबाह्यविषयावलम्बिनि **सुख-लेशे तु** अल्पसुखे तावत् **निःस्पृहः** अनासक्तः, इच्छारहितः इत्यर्थः, **शिवानन्दे** शिवानन्दात्मके नित्यसुखे **समुत्कण्ठः** समुत्सुकः **वीरमाहेश्वरः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवेत् वीरमाहेश्वराभिधः स्यात् ॥ ब्रह्मविष्ण्वादीनां सम्पदः पुण्यसञ्चयम् अवलम्बन्ते । क्षीणे पुण्ये ताः सम्पदः न भवन्ति । अतः अनित्यासु तादृशसम्पत्सु माहेश्वरस्य न कापि स्पृहा ॥ शिवानन्दात्मकनित्यसुखे एव तस्याऽऽसक्तिः ॥१३-१४॥

परस्त्रीसङ्गनिर्मुक्तः परद्रव्यपराङ्मुखः
शिवार्थकार्यसम्पन्नः शिवागमपरायणः ॥१५॥

शिवस्तुतिरसास्वादमोदमानमनाः शुचिः ।
शिवोत्कर्षप्रमाणानां सम्पादनसमुद्यतः ॥१६॥

निर्ममो निरहङ्कारो निरस्तक्लेशपञ्जरः ।
अस्पृष्टमदसम्बन्धो मात्सर्यविशवर्जितः ॥१७॥

निरस्तमदनोन्मेषो निर्धूतक्रोधविप्लवः ।
सदा सन्तुष्टहृदयः सर्वप्राणिहिते रतः ॥१८॥

निवारणसमुद्योगी शिवकार्यविरोधिनाम् ।
सहचारी सदाकालं शिवोत्कर्षाभिधायिभिः ॥१९॥

शिवापकर्षसम्प्राप्तौ प्राणत्यागेऽप्यशङ्कितः ।
शिवैकनिष्ठः सर्वात्मा वीरमाहेश्वरो भवेत् ॥२०॥

व्याख्या— माहेश्वरस्य गुणसम्पदं श्लोकषट्केन प्रशंसति – **परस्त्री-त्यादिना** । **परस्त्रीसङ्गनिर्मुक्तः** परस्य स्त्री परस्त्री, तस्याः सङ्गः परस्त्रीसङ्गः, तेन निर्मुक्तः, अन्यस्त्रीसम्बन्धवर्जितः, **परद्रव्यपराङ्मुखः** परस्य द्रव्यं परद्रव्यम्, तस्मात् पराङ्मुखः, अन्यस्य द्रव्ये निरासक्तः, **शिवार्थकार्यसम्पन्नः** शिवार्थे कार्यं शिवार्थकार्यम्, तेन सम्पन्नः, शिवकार्योन्मुखः, **शिवागमपरायणः** शिवागमेषु अत्यन्तनिष्ठः, **शिवस्तुति-रसास्वादमोदमानमनाः** शिवस्य स्तुतिः शिवस्तुतिः, तस्याः रसास्वादेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मोदमानं मनः यस्य सः, शिवप्रशंसास्वारस्यस्य आस्वादेन आनन्दमय-चित्तः, **शुचिः** पवित्रः, **शिवोत्कर्षप्रमाणानां सम्पादनसमुद्यतः** शिवस्य उत्कर्षः शिवोत्कर्षः, तस्य प्रमाणानाम्, शिवसर्वोत्तमत्वसाधकप्रमाणानां, सम्पादने समुद्यतः अन्वेषणे निरतः, **निर्ममः** ममकाररहितः, **निरहङ्कारः** निर्गतः अहङ्कारः यस्मात् सः, अहङ्काररहितः, **निरस्ताक्लेशपञ्जरः** क्लेशानां पञ्जरः क्लेशपञ्जरः निरस्तः क्लेशपञ्जरः क्लेशसमूहः यस्मात् सः, अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्चेति (यो. सू., २.३) पञ्चक्लेशविमुक्तः, 'निरस्तक्लेशपञ्चकः' इति पाठान्तरम् अस्ति, **अस्पृष्टमदसम्बन्धः** मदेन सम्बन्धः मदसम्बन्धः, अस्पृष्टः मदसम्बन्धः येन सः, उन्मादपूर्वस्थितिः मदः, तादृशमदसम्पर्करहितः, **मात्सर्यविशवर्जितः** मात्सर्यस्य आवेशः मात्सर्याविशः, तस्माद् वर्जितः, असूयायाः प्रभावेण निर्मुक्तः, **निरस्तमदनोन्मेषः** मदनस्य उन्मेपः मदनोन्मेषः निरस्तः मदनोन्मेषः यस्मात् सः, कामविकाररहितः, **निर्धूतक्रोधविप्लवः** निर्धूतः क्रोधस्य विप्लवः यस्मात् सः, कोपविकारविरहितः, **सदा सन्तुष्टहृदयः** सर्वदा सन्तुष्टं हृदयं यस्य सः सन्तुष्टहृदयः, संतृप्तहृदयः, **सर्वप्राणिहिते रतः** सर्वेषां प्राणिनां हिते रतः, सर्वभूतहिते निरतः, **शिवकार्यविरोधिनां** शिवस्य कार्यं शिवकार्यं, शिवार्थं क्रियमाणं कार्यं, शिवकार्यस्य विरोधः आसाम् अस्ति इति शिवकार्यविरोधिनः, तेषां शिवकार्यविरोधिनाम्, "अत इनिठनौ" (पा. ५.२.११५) इति 'इनिः' (इन्) – (विरोधिन्, ष. वि. ब. व. रूपम्), **निवारणसमुद्योगी** निवारणे समुद्योगी, परिवर्जने समुद्युक्तः, **शिवोत्कर्षाभिधायिभिः** शिवस्य उत्कर्षः शिवोत्कर्षः तम् अभिदधते इति शिवोत्कर्षाभिधायिनः, तैः, "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (पा. ३.१.१३४) इति णिनिः (इन् – शिवोत्कर्षाभिधायिन्, तृ. वि., ब. व. रूपम्), शिवस्य सर्वोत्तमत्वप्रतिपादकैः, **सदाकालं** सर्वदा **सहचारी** सह चरति इति सहचारी, सहवर्ती, **शिवापकर्षसम्प्राप्तौ** शिवस्य अपकर्षः, तस्य सम्प्राप्तिः, तस्मिन्, शिवस्य निन्दाप्रसङ्गे जाते, **प्राणत्यागे अपि** प्राणार्पणेऽपि **अशङ्कितः** भयरहितः, **शिवैकनिष्ठः** शिवे एकनिष्ठा (एकस्मिन्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निष्ठा) यस्य सः, शिवमात्रे निष्ठावान्, **सर्वात्मा** पूर्णाहंभावयुक्तः, पूर्णाहंभावो नाम परिच्छिन्नशरीरादिषु अहंप्रतीतिरहितः, पराहंतास्थितिं प्राप्तवान् इत्यर्थः, एवमादिविशेषणविशिष्टः एव **वीरमाहेश्वरः भवेत्** वीरमाहेश्वरनामभाक् स्यात् ॥१५-२०॥

— इति माहेश्वरप्रशंसास्थलम् —

२. अथ लिङ्गनिष्ठास्थलम् – (१७)

अस्य माहेश्वरस्योक्तं लिङ्गनिष्ठामहास्थलम् ।
प्राणात्ययेऽपि सम्पन्ने यदत्याज्यं विधीयते ॥२१॥

व्याख्या— माहेश्वरप्रशंसानन्तरं माहेश्वरलिङ्गनिष्ठविषयकं स्थलमाह – **अस्येति । अस्य** पूर्वोक्तविशेषविशिष्टस्य **माहेश्वरस्य** वीरमाहेश्वरस्य, **लिङ्गनिष्ठामहास्थलं** लिङ्गे निष्ठा लिङ्गनिष्ठा, महत् च तत् स्थलं महास्थलम्, लिङ्गनिष्ठात्मकं महास्थलम्, लिङ्गैकनिष्ठाबोधकं श्रेष्ठस्थलम्, **उक्तम्** कथितम् । **यत्** यत् लिङ्गनिष्ठास्थलमित्युक्तं तत् **प्राणात्यये अपि सम्पन्ने** प्राणत्यागप्रसङ्गेऽपि सम्प्राप्ते, **अत्याज्यं** न त्याज्यम् अत्याज्यं त्यक्तुम् न योग्यम्, इति **विधीयते** अवश्यं करणीयत्वेन नियम्यते । लिङ्गनिष्ठा नाम लिङ्गपूजायां निष्ठा ॥२१॥

अपगच्छतु सर्वस्वं शिरश्छेदनमस्तु वा ।
माहेश्वरो न मुञ्चेत लिङ्गपूजामहाव्रतम् ॥२२॥

व्याख्या — पूर्वोक्तमेव विशदयति – **अपगच्छत्विति । सर्वस्वं** सर्वं स्वं सर्वस्वं सकलसम्पत्, **अपगच्छतु** नष्टं भवतु, **शिरश्छेदनम् अस्तु वा** शिरसः छेदनं कर्तनं भवतु वा, यः कोऽपि वा कण्टको भवतु, **माहेश्वरः** वीरमाहेश्वरः **लिङ्गपूजामहाव्रतं** लिङ्गपूजा एव महाव्रतम्, नित्यलिङ्गार्चनात्मकं महाव्रतं (महत् च तत् व्रतं च) **न मुञ्चेत** न त्यजेत् ॥ सङ्कल्पपूर्वकं गृहीतं शास्त्रोक्ताचरणं व्रतम् । तादृशं नियमाचरणं न त्यजेत्, एवमेव नित्यव्रतभूतां लिङ्गपूजां न कदापि त्यजेत् ॥२२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गपूजामकृत्वा तु ये न भुञ्जन्ति मानवाः ।
तेषां महात्मनां हस्ते मोक्षलक्ष्मीरुपस्थिता ॥२३॥

व्याख्या — शिवपूजां कृत्वैव कृते भोजने मुक्तिः सुलभा इत्याह – **लिङ्गपूजाम् इति ।** **लिङ्गपूजाम्** इष्टलिङ्गपूजाम् **अकृत्वा तु** न कृत्वा अकृत्वा, परित्यज्य, **ये मानवाः** ये मनुष्याः **न भुञ्जन्ति** न भुञ्जते, भोजनं न कुर्वन्ति, **तेषां** तादृशानां **महात्मनां** महापुरुषाणां माहेश्वराचारनिरतानां **मोक्षलक्ष्मीः** मोक्षसम्पत्, **हस्ते उपस्थिता** करे स्थिता इव सुलभतया प्रापणीया ॥२३॥

किमन्यैर्धर्मकलिलैः कीकशार्थप्रदायिभिः ।
साक्षान्मोक्षप्रदः शम्भोर्धर्मो लिङ्गार्चनात्मकः ॥२४॥

व्याख्या— पूर्वोक्तमेव समर्थयति – **किमन्यैरिति ।** **शम्भोः** शिवस्य **लिङ्गार्चनात्मकः** लिङ्गपूजास्वरूपः **धर्मः** धार्मिकाचारः **साक्षात्** स्वस्वरूपेण **मोक्षप्रद मोक्षं** प्रददाति इति मोक्षप्रदः मुक्तिदायकः । एवं स्थिते **अन्यैः** इतरैः **कीकशार्थप्रदायिभिः** कीकशः अर्थः, तं प्रददति इति, तैः, कुत्सितार्थ प्रदायकैः **धर्मकलिलैः** कुत्सिताचरणैः **किम्** किं प्रयोजनम् । न किमपि प्रयोजनमित्यर्थः ॥ लिङ्गपूजा परमपुरुषार्थरूपमोक्षप्रदायकः । तदतिरिक्ताः सर्वाः क्रियाः क्षुद्राः, क्षुद्रफलदायकाः । साक्षान्मोक्षप्रदायिनि साधने शिवार्चनात्मके सिद्धे किमन्यैः क्षुद्रसाधनैः ? लिङ्गार्चनमहत्त्वं बहुधा प्रशंसन्ति शैवागमाः । तथा हि – "शुद्धस्फटिकसंकाशः शुद्ध-चामीकरद्युतिः । शुद्धदेहो भवेद्देवि नरो लिङ्गार्चने रतः" (उल्लेखः – एन्. आर्. करिबसवशास्त्रिणः कन्नडव्याख्यायाम्) इति, "ज्ञाननिष्ठा हि यस्य स्याच्छाम्भवव्रतपूर्वका । कोऽपि भवताल्लोके स हि बन्धाद् विमुच्यते ॥" (का. आ. क्रि. पा., २.४२) इति, "तस्मादिदं व्रतं प्रोक्तं परमं मोक्ष-साधकम् ॥" (तत्रैव, २.४२) इति च ॥२४॥

अर्पितेनान्नपानेन लिङ्गे नियमपूजिते ।
ये देहवृत्तिं कुर्वन्ति महामाहेश्वरा हि ते ॥२५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — लिङ्गार्पितप्रसादजीविनो माहेश्वरा इत्याह – **अर्पितेनेति** । **ये ये** शिवाराधकाः **नियमपूजिते** नियमेन पूजिते शास्त्रोक्तप्रकारेणार्चिते **लिङ्गे** इष्टलिङ्गे **अर्पितान्नपानेन** अर्पितेन अन्नेन पानेन च, निवेदितप्रसादरूपेण अन्नपानेन, **देहवृत्तिं** शरीरभृतिं **कुर्वन्ति** कुर्वते **ते** तादृशाः **महामाहेश्वरा** वीरमाहेश्वराः **हि प्रसिद्धाः** ॥ लिङ्गस्य नियमपूजनं नाम गुरुणादिष्टमार्गेण सोपचारं पूजनम् । तदेव इष्टलिङ्गपूजनं भक्तस्थले आचारलिङ्गपूजनमिति गृह्यते । एवमेव माहेश्वरस्थले तदेव गुरुलिङ्गत्वेव पूज्यते । एवं गुरूपदिष्टमार्गेण पूजनाद् इदं गुरुलिङ्गम् । तेनायं माहेश्वरः गुरुवीरः इति कथ्यते । तदुक्तम् – "गुरूपदिष्टमेवाथ समाचरणमाचरन् । यश्च त्यक्तेतराचारो गुरुवीरः स उच्यते ॥" (सू. आ., क्रि. पा., ८.४८) इति ॥२५॥

चिन्मये शाङ्करे लिङ्गे स्थिरं येषां मनः सदा ।
विमुक्तेतरसर्वार्थं ते शिवा नात्र संशयः ॥२६॥

व्याख्या — चिन्मयेष्टलिङ्गनिविष्टचेतसः शिव एव इत्याह – **चिन्मये** इति । **येषां** यादृशानां माहेश्वराणां **मनः** चित्तं **सदा** सर्वदा **चिन्मये** चित्कलायुक्ते **शाङ्करे लिङ्गे** शिवलिङ्गे इष्टलिङ्गात्मके **विमुक्तेतरसर्वार्थम्** इतरे सर्वे अर्थाः इतरसर्वार्थाः, विमुक्ताः इतरसर्वार्था यथा भवन्ति तथा, त्यक्तान्यफलानुभवेच्छम् (क्रियाविशेषणम्), **स्थिरं** दृढतया तन्मयीभूतं, **ते** तादृशा माहेश्वराः **शिवाः** शिवाः एव । **नात्र संशयः** अस्मिन् विषये न कोऽपि सन्देहः ॥ गुरुलिङ्गस्य चिन्मयत्वं नाम चित्कलायुक्तत्वम् । चित्कला इत्यस्याः शाम्भवी कला शिवकला चेति नामान्तरे । सा च इष्टलिङ्गधारिणः शरीरमाद्यन्तं व्याप्नोति । एवमेव सा प्राणतत्त्वं जीवात्मानं च व्याप्नोति । एवं व्याप्य जलकुम्भोपरिस्थिततैलबिन्दुवत् सर्वोपरि तिष्ठति । तदाह – "जलकुम्भाग्रसद्व्याप्ततैलबिन्दुर्यथा तथा । देहप्राणात्मसुव्याप्ता संस्थिता शाम्भवी कला ॥ ..... या कला परमा सूक्ष्मा तत्त्वानां बोधिनी परा । तामाकृष्य यथान्यायं लिङ्गे समुपवेशयेत् ॥"(सू.आ., क्रि.पा., १.१२२,१२४)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति । अत्रोक्तदिशा शाम्भवीकलया युक्तम् इष्टलिङ्गमेव चिन्मय-शाङ्करलिङ्गम् । तादृशे लिङ्गे तन्मयत्वेन स्थिरमना यस्य स वीरमाहेश्वरः। एवं लिङ्गे मनसः स्थिरीकरणं शक्यते दृष्टियोगेन । इदं पुनः शक्यते चित्तवृत्तिनियन्त्रणात्मकेन योगेन । उक्तं च "योगश्चित्तवृत्तिनिरोधः" (यो. सू., १.२) इति । प्रमाणम्, विपर्ययः, विकल्पः, निद्रा, स्मृतिश्चेति सन्ति चित्तवृत्तयः पञ्च । (यो. सू., १.६) । प्रत्यक्षादयः **प्रमाणानि** । यद्यद् अस्मदिन्द्रियैर्गृह्यते तद् भ्रमवर्जं सर्वं प्रत्यक्षात्मकं सम्यज्ज्ञानम् । प्रत्यक्षीभूतेन केनचन हेतुना यदन्यत् साहचर्यनियमेन सम्बद्धं गृह्यते तत्सर्वम् अनुमानात्मकं सम्यज्ज्ञानम् । ऋषीणां पुनरन्येषां सिद्धानां च सत्त्वोद्रेकदशायां प्राप्तम् इन्द्रियातीतं वेदादिस्वरूपं सम्यज्ज्ञानं शब्दज्ञानं आगमज्ञानम् वा इति ज्ञायते । एवमन्यान्यपि भवन्ति प्रमाणानि । एषा प्रथमा प्रमाणनाम्नी चित्तवृत्तिः । द्वितीया तावद् **विपर्ययः** । विपर्ययो मिथ्याज्ञानमिति कथ्यते, रज्जुसर्पवत् । तृतीया चित्तवृत्तिः **विकल्प** इति कीर्त्यते । यदा यदुच्यते तस्य सत्यविसंवादित्वं तदा तस्य विकल्पत्वम् । अकाण्डे निर्णयं प्रति धावनं विकल्पस्य सामान्यस्वरूपम् । **निद्रा** नाम अभावात्मिका चित्तवृत्तिः । एषा चतुर्थी चित्तवृत्तिः । पञ्चमी तु **स्मृतिः** । पूर्वदृष्टस्य पुनः स्मरणं स्मृतिः । (यो. सू., १.७-११) । बह्वीनाम् एतासां चित्तवृत्तीनां निरोधः सुतरां कष्टसाध्यम् । कष्टसाध्यत्वेऽपि श्रद्धालुभिः शक्यते साधयितुम् । तत्र पतञ्जलिमहर्षिणा सूचितं मार्गमनुसर्तव्यम् । स च मार्गश्चित्तवृत्तीनां क्लिष्टाक्लिष्टस्वरूपेण विभाजनद्वारा सूचितः । क्लिष्टमनोवृत्तय आदौ दुःखकरत्वेनैव भासन्ते । परन्तु क्रमेणाऽज्ञानं वर्धयित्वाऽत्यासक्तिद्वारा बन्धे पर्यवस्यन्ति । अक्लिष्टचित्तवृत्तयस्त्वादौ दुःखकरत्वेन भासन्ते । परंतु क्रमेण मनसः प्रसन्नतावर्धनद्वारा ज्ञाने पर्यवस्यन्ति । तत्र वैशद्याय क्लिष्टाक्लिष्टचित्तवृत्त्योरुदाहरणे – कामुकत्वं तावत् क्लिष्टचित्तवृत्तिः । आदौ तन्न दुःखकरम्, परन्तु सुखाभासरूपम् । न हि काम उपभोगेन शाम्यति, घृतेन तर्पिताग्निरिव भूय एवाभिवर्धते। अतस्तद् अत्यासक्तिम्, अतृप्तिम् ईर्ष्यादिकं जनयित्वा बन्धे पर्यवस्यति । दया त्वक्लिष्टचित्तवृत्तिः । सा चादौ क्लेशकरः, परन्तु क्रमेण निःस्वार्थ-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावत्वाद् अस्मान् अहंकारात्मकबन्धनिवृत्तान् करोति । एवं बन्धकारक-क्लिष्टचित्तवृत्तीर्नियन्त्रयितुम् अक्लिष्टचित्तवृत्तीः प्रोत्साह्य पोषयेत् । तत्र उदाहरणम् – क्रोधेच्छामोहभावात्मकचित्तवृत्तीर्नियन्त्रयितुं प्रेमौ-दार्यसत्यभावात्मकचित्तवृत्तीः प्रोत्साहयेत् । यदानया युक्त्या क्लिष्ट-मनोवृत्तीर्यदा नियन्त्रिता भवन्ति तदारभ्य पुनरक्लिष्टचित्तवृत्तीरपि नियन्त्रणीयाः, यतो हि एता अपि बाह्यजगत्ससम्बद्धाः सत्यो नश्वरा भवन्ति । ता अपि परमसत्यसम्बद्धा न भवन्ति । एवं नियन्त्रितचित्त-वृत्तिर्भूत्वा पुरुषो दृष्टियोगेनेष्टलिङ्गे विलीनमना भवति । तेनाऽऽभ्यन्तर-लिङ्गद्वयं प्राणलिङ्गभावलिङ्गस्वरूपम् अन्तरङ्गे साक्षात्कृत्य भाववस्तुभि-रर्चयितुं शक्यते । एषाऽऽभ्यन्तरप्रक्रिया प्राणलिङ्गार्चनस्थले अत्यन्तम् प्रयोजनाय भवति ॥ पौनपुन्येन प्रयत्नः, निरासक्तियोगश्च तां प्रक्रियां पोषयतः । तदुक्तम् – "अभ्यासवैराग्याभ्यां तन्निरोधः" (तन्निरोधः चित्तवृत्तिनिरोधः, यो. सू., १.१२) इति ॥२६॥

लिङ्गे यस्य मनो लीनं लिङ्गस्तुतिपरा च वाक् ।
लिङ्गार्चनपरौ हस्तौ स रुद्रो नात्र संशयः ॥२७॥

व्याख्या — करणैः सर्वैर्लिङ्गार्चनं विदध्यादित्याह – **लिङ्गे इति । यस्य** यस्य माहेश्वरस्य **मनः** चित्तं **लिङ्गे** इष्टलिङ्गे **लीनं** दृष्टियोगेन विलीनतां गतम्, **वाक्** यस्य वाणी **लिङ्गस्तुतिपरा** लिङ्गस्य स्तुतिः लिङ्ग-स्तुतिः, लिङ्गस्तुतिपरा, लिङ्गस्तुतितत्परा, **हस्तौ** यस्य करौ **लिङ्गार्चनपरौ** लिङ्गस्य अर्चनं लिङ्गार्चनम् लिङ्गार्चम् तत्परौ, लिङ्गार्चने निरतौ, **सः** तादृशः माहेश्वरः **रुद्रः** परशिवः एव, **अत्र न संशयः** अस्मिन् विषये नास्ति सन्देहलेशोऽपि ॥ मनः, वाक्, शरीरं चेति त्रयाणां करणानाम् इष्टलिङ्गसेवार्पितत्वम् उक्तम् । मन इष्टलिङ्गे लीनम्। तत्र पूर्वश्लोकस्य व्याख्यायां मनोविलयस्य प्रकारमुक्तम्, पश्यत । वाक् पुनर्लिङ्गस्तुतौ निरता । सा च न कदापि निन्दाशापादिषु प्रयोक्तव्या । ज्ञानकर्मेन्द्रिय-समुच्चयभूतस्य शरीरस्य लिङ्गसेवार्थं समर्पणं कुर्यात् । इदं च लिङ्गनिष्ठायाः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सुन्दरं वाग्रूपं चित्रम् । तदुक्तम् – "लिङ्गभक्तिर्लिङ्गपूजा लिङ्गसेवा तथा शिवे । लिङ्गध्यानं लिङ्गमनो लिङ्गार्चनपरौ करौ ॥ लिङ्गश्रुतिपरे श्रोत्रे लिङ्गार्पितरसादयः । लिङ्गनिर्माल्यसुरभिलाभो घ्राणस्य पार्वति ॥ लिङ्गालङ्कारसन्दर्शनासक्ते लोचनेऽपि च । लिङ्गप्रदक्षिणपरौ पादौ च गिरिसंभवे ॥ लिङ्गस्य पुरतो नित्यं तदर्थं चाङ्गचेष्टनम् । लिङ्गार्थं दत्तसर्वस्वं लिङ्गनिष्ठेति गीयते ॥" (सू. आ., क्रि. पा., ७. ४८-५२) इति । अन्यप्रकारेणापीदमुक्तम् – "द्रष्टुं रूपान्तरं तस्य वीक्षणे न विचक्षणे । रसयेत्तस्य रसना हरनामाक्षरामृतम् ॥ शिवाङ्घ्रिकमलामोदान्नान्यत्तद्घ्राणमिच्छति । करौ तत्कौतुककरौ मनुते नाऽपरं मनः ॥" (लिङ्ग. पु.) इति । अन्यत्रापि माहेश्वरोत्तमस्य लक्षणम् अष्टधा निरूपितम् – "य एवं वर्तते योगी सर्वैर्माहेश्वरोत्तमः । अष्टधा लक्षणं देवि शिवधर्माधिकारिणः ॥ शिवभक्तेषु वात्सल्यं पूजायां चानुमोदनम् । स्वयमभ्यर्चनं चैव तदर्थं चाङ्गचेष्टनम् ॥ तत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रियाः । शिवानुस्मरणं नित्यं सर्वदा तदकैतवम् ॥" (पार. आ., १७.८३-८५) इति । एष माहेश्वरः रुद्र एव, न कोऽपि सन्देहः ॥२७॥

लिङ्गनिष्ठस्य किं तस्य कर्मणा स्वर्गहेतुना ।
नित्यानन्दशिवप्राप्तिर्यस्य शास्त्रेषु निश्चिता ॥२८॥

व्याख्या — लिङ्गनिष्ठावतो माहेश्वरस्य यज्ञादिकर्मणा किमपि प्रयोजनं नास्तीत्याह – **लिङ्गनिष्ठस्य इति** । **यस्य** यादृशस्य माहेश्वरस्य **नित्यानन्दशिवप्राप्तिः** नित्यम् आनन्दः नित्यानन्दः, नित्यानन्दस्वरूपः शिवः, तस्य प्राप्तिः, नित्यानन्दस्य शिवस्य प्राप्तिः, स्वात्मनि नित्यानन्दस्वरूपस्य शिवस्य साक्षात्कारः इति यावत्, **शास्त्रेषु** वेदागमादिषु **निश्चिता** निश्चयेन विहिता, तस्य **लिङ्गनिष्ठस्य** लिङ्गे निष्ठा यस्य सः लिङ्गनिष्ठः, तस्य, लिङ्गे दृढभक्तियुक्तस्य माहेश्वरस्य **स्वर्गहेतुना** स्वर्गः हेतुः यस्य तत् स्वर्गहेतु, तेन, **कर्मणा** अग्निष्टोमादिकर्मणा **किम्** किं प्रयोजनम् । न किमपि प्रयोजनम् इत्यर्थः ॥ नित्यानन्दशिवसाक्षात्काररूपमोक्षापेक्षया यावत्पुण्यभाविनी स्वर्गप्राप्तिः सर्वथा हेया इति भावः ॥२८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गनिष्ठापरं शान्तं भूतिरुद्राक्षसंयुतम् ।
प्रशंसन्ति सदाकालं ब्रह्माद्या देवता मुदा ॥२९॥

व्याख्या — माहेश्वरस्य महत्त्वं प्रशंस्य लिङ्गनिष्ठास्थलं समापयति – **लिङ्गनिष्ठापरम्** इति । **लिङ्गनिष्ठापरं** लिङ्गे निष्ठा लिङ्गनिष्ठा, लिङ्गनिष्ठा परा यस्य सः लिङ्गनिष्ठापरः तम्, लिङ्गे परमभक्तियुक्तम्, **शान्तं** रागद्वेषरहितं **भूतिरुद्राक्षसंयुतं** भूतिश्च रुद्राक्षश्च भूतिरुद्राक्षौ, ताभ्यां संयुतं माहेश्वरं **ब्रह्माद्याः देवताः** ब्रह्मोपेन्देन्द्राद्याः देवताः **सदाकालं** सर्वदा **मुदा** आनन्देन **प्रशंसन्ति** स्तुवन्ति ॥२९॥

– इति लिङ्गनिष्ठास्थलम् –

३. अथ पूर्वाश्रयनिरसनस्थलम् – (१८)

लिङ्गैकनिष्ठहृदयः सदा माहेश्वरो जनः ।
पूर्वाश्रयगतान् धर्मांस्त्यजेत्स्वाचाररोधकान् ॥३०॥

व्याख्या — लिङ्गनिष्ठाप्रतिकूलानां पूर्वाश्रयसम्बद्धानां धर्माणां परित्याग एव पूर्वाश्रयनिरसनमित्याह – **लिङ्गैकनिष्ठहृदय** इति । **लिङ्गैकनिष्ठहृदयः** लिङ्गे एकनिष्ठा, लिङ्गैकनिष्ठा यस्य तत्, लिङ्गैकनिष्ठं हृदयं यस्य सः, लिङ्गमात्रे निष्ठमनाः, **माहेश्वरो जनः** माहेश्वराख्यः पुरुषः, **पूर्वाश्रयगतान्** पूर्वः आश्रयः, ब्राह्मणादिजातिः, तत्र गतान् वीरशैव-दीक्षापूर्वं ब्राह्मणादिजातिसम्बद्धान् **स्वाचाररोधकान्** स्वस्य आचारः, वीरशैवाचारः, तं रुन्धन्ति प्रतिबध्नन्ति इति स्वाचाररोधकाः, तान्, वीरशैवाचारप्रतिकूलान् इत्यर्थः, तान् **त्यजेत्** जह्यात् ॥ पूर्वाश्रयभूत-ब्राह्मणादिजातिसम्बद्धान् सापिण्ड्यश्राद्धादिधर्मान् वीरशैवाचारबहि-ष्कृतान् यो निरस्यति स माहेश्वरः पूर्वाश्रयनिरासकः, तत्सम्बद्धं स्थलं पूर्वाश्रयनिरसनस्थलम् ॥ मरितोण्टदार्यप्रणीतायां तत्त्वप्रदीपिकायाम् अस्य श्लोकस्य पीठिकायां योगजागमोक्तिरुदाहृता, मूलग्रन्थस्तु नोपलभ्यते । अयं स श्लोकः – "गुरुसंस्कृतभावः सन् गुरुनिर्मितदेहवान् । विस्मृत्य पूर्वदुर्भावं तदधीनः समाचरेत् ॥" इति । अस्मिन् श्लोके वीरशैवदीक्षा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिणामतो जातं समग्रपरिवर्तनं सम्यङ् निरूप्यते । प्रथमं परिवर्तनं तावद् 'गुरुसंस्कृतभावत्वम्'। गुर्वनुग्रहप्राप्तेन शिवज्ञानेन "शिवोऽहं"-भावेन दीक्षितस्य समग्रचिन्तनं परिवर्तितं भवति । द्वितीयं परिवर्तनं च 'गुरु-निर्मितदेहवत्त्वम्' । दीक्षितस्य शरीरं संस्कारेण पुनर्निर्मितमिव जायते। वेधामान्त्रीक्रियात्मकत्रिविधदीक्षाद्वारा क्रमेण कारणसूक्ष्मस्थूलशरीरेषु आणवमायीयकार्मिकाख्यं त्रिविधं मलं निष्कास्य भावप्राणेष्टलिङ्गानि स्थापयित्वा श्रीगुरुः प्राकृतशरीरं सुसंस्कृतशरीरत्वेन पुनर्निर्मिमीते । तृतीयं तु परिवर्तनं प्राकृताचारनिरासपूर्वकं समयाचारपरिग्रहणम् । समग्रमिदं परिवर्तनमेव पूर्वाश्रयनिरसनम् । पूर्वं ब्राह्मणादिवर्णसम्बद्धान् धर्मान् परित्यज्य वीरशैवाचारानुवर्ती पूर्वाश्रयनिरासको भवितुम् अर्हति। अथवा पूर्वाश्रितशैवमताचारान् विहाय वीरशैवाचारस्वीकारेण पूर्वाश्रय-निरासको भवितुं शक्यते। शैवागमेषु सप्त वा अष्टौ वा शैवप्रभेदा उक्ताः। तथा हि – अनादिशैवम्, आदिशैवम्, पूर्वशैवम्, मिश्रशैवम्, शुद्धशैवम्, मार्गशैवम्, सामान्यशैवम्, वीरशैवं चेति अष्ट शैवानि सलक्षणं निरूपितानि। (चं.आ., क्रि.पा., १०.४-५)। एकस्मात् शैवात् शैवान्तर-परिवर्तनम् अनादिकालात् प्रचलति स्म । पारमेश्वरागमे सप्तशैवानां नामकथनानन्तरं "एवं क्रमेण सोपानं मतभेदं समाश्रयेत्" इति यत्सोपानक्रममुक्तं तेनेदं सूच्यते। (पार. आ., ७.२८)। अनेन पूर्वाश्रय-निरासेन न किमपि पापं प्रसज्यते । पूर्वेभ्यः श्रेष्ठस्य वीरशैवस्य स्वल्पमात्राचरणेन महत्फलं सञ्जायते, किमुत समग्राचरणेन । इयं च भगवदुक्तिः – "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते। स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥" (भ. गी. २.४०) इति। अत्रैवम् आक्षेप्तुं शक्यते – भक्तस्थलीयानां पञ्चदशस्थलानां निरूपणानन्तरं पूर्वाश्रय-निरासनात्मकमिदं स्थलं माहेश्वरस्थले किमेवं विलम्बेनोक्तम् इति । अत्रेदं समाधानम् – भक्तस्थले भक्तमार्गक्रियास्थलोक्तधर्माणाम् अनु-वर्तनत्वेन अस्य विशेषोल्लेखः कृतः इति ॥३०॥

स्वजातिकुलजान् धर्मान् लिङ्गनिष्ठाविरोधिनः।
त्यजन् माहेश्वरो ज्ञेयः पूर्वाश्रयनिरासकः ॥३१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— पूर्वाश्रयनिरासकस्य लक्षणमाह— **स्वजातिकुलजान्** इति। **लिङ्गनिष्ठाविरोधिनः** लिङ्गे निष्ठा लिङ्गनिष्ठा, तां विरोद्धुं शीलमासाम् इति, लिङ्गनिष्ठाप्रतिकूलान् **स्वजातिकुलजान्** स्वीया जातिः स्वजातिः, तस्याः कुलं, तस्मिन् जातान्, ब्राहणादिजातिकुलक्रमागतान्, **धर्मान्** धर्माचारान् श्राद्धसापिण्ड्यादिमताचारान् **त्यजन्** परित्यजन् **माहेश्वरः** माहेश्वरस्थलाश्रितः एव **पूर्वाश्रयनिरासकः** पूर्वाश्रयनिरसनशीलः इति **ज्ञेयः** अवधेयः ॥ बसवेश्वरस्य पूर्वाश्रयनिरसनं तु सर्वविदितमेव । स च कूडलसंगमे जातवेदमुनेः सकाशाद् वीरशैवदीक्षां सम्प्राप्य पूर्वेषां ब्राह्मणमताचारान् परित्यज्य पूर्वाश्रयनिरासको बभूवेति ज्ञायते ॥३१॥

शिवसंस्कारयोगेन विशुद्धानां महात्मनाम् ।
किं पूर्वकालिकैर्धर्मैः प्राकृतानां हि ते मताः ॥३२॥

व्याख्या — वीरशैवदीक्षासंस्कारविशुद्धानां पूर्वाश्रितधर्माचारैर्न किमपि प्रयोजनमित्याह — **शिवसंस्कारयोगेनेति** । शिवसंस्कारः शिवदीक्षासंस्कारः, तस्य योगेन सम्बन्धेन **विशुद्धानां** परिशुद्धानां **महात्मनां** महापुरुषाणां माहेश्वराणां **पूर्वकालिकैः धर्मैः** पूर्वकालसम्बद्धैः ब्राह्मणादिवर्णाश्रितैः धर्मैः धर्माचारैः **किं** किं प्रयोजनम्, न किमपि प्रयोजनम् इत्यर्थः । **ते** पूर्वकालिकधर्माः **प्राकृतानां** संस्काररहितानां **मताः** मन्तव्याः, **हि** इति प्रसिद्धम् ॥ शिवदीक्षासंस्कारश्च पूर्वम् उक्त एव । (पश्यत – ६. ११-१४; १०.३०, व्याख्याम्) वीरशैवस्य अत्याश्रमित्वाद् अभिक्रमनाशो वा प्रत्यवायो वा नास्ति इति पूर्वमेवोक्तम् ॥३२॥

शिवसंस्कारयोगेन शिवधर्मानुषङ्गिणाम् ।
प्राकृतानां न धर्मेषु प्रवृत्तिरुपपद्यते ॥३३॥

व्याख्या — उक्तमेव विशदयति – **शिवसंस्कारयोगेन** इति । **शिवसंस्कारयोगेन** शिवदीक्षासंस्कारस्य सम्बन्धेन **शिवधर्मानुषङ्गिणां** शिवधर्मे वीरशैवधर्मे अनुषङ्गः एषाम् अस्ति इति, शिवधर्मानुषङ्गिणः, तेषाम्,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्राकृतानां धर्मेषु शिवसंस्काररहितानां धर्माचारेषु **प्रवृत्तिः** प्रवर्तनं **न उपपद्यते** न उपपत्तिं भजते, न सामञ्जस्यं गाहते ॥३३॥

विशुद्धाः प्राकृताश्चेति द्विविधा मानुषाः स्मृताः ।
शिवसंस्कारिणः शुद्धाः प्राकृता इतरे मताः ॥३४॥

व्याख्या— मानुषाणां शुद्धप्राकृतभेदमाह— **विशुद्धा इति । विशुद्धाः प्राकृताश्च इति** शुद्धाः प्राकृताश्चेति भेदेन **मानुषाः** मनुष्याः **द्विविधाः** द्विप्रकाराः **स्मृताः** ज्ञाताः । तत्र **शिवसंस्कारिणः** शिवसंस्कारः शिवदीक्षा-संस्कारः एतेषाम् अस्तीति, शिवसंस्कारिणः, **शुद्धाः** विशुद्धाः, **इतरे** शिव-दीक्षासंस्काररहिताः अन्ये **प्राकृताः** अप्राप्तसंस्काराः इति **मताः** ज्ञाताः॥३४॥

वर्णाश्रमधर्माणां व्यवस्था हि द्विधा मता ।
एका शिवेन निर्दिष्टा ब्रह्मणा कथिताऽपरा ॥३५॥

व्याख्या — वीरशैवानां वर्णाश्रमधर्मो भवति वा न वा इत्यत्राह – **वर्णाश्रमधर्माणाम् इति । वर्णाश्रमधर्माणां** वर्णश्च आश्रमश्च वर्णाश्रमौ, तयोः धर्माः, धर्माचाराः, तेषाम्, ब्राह्मणादिवर्णाः ब्रह्मचर्याद्यश्रमाश्च, तेषां कर्तव्यानि, इत्यर्थः । तेषां **व्यवस्था** समाजिकस्थितिः **द्विधा** द्विप्रकारा इति **मता** ज्ञाता । **एका** एका व्यवस्था **शिवेन निर्दिष्टा** शिवेन आदिष्टा, **अपरा** अन्या व्यवस्था **ब्रह्मणा कथिता** सृष्टिकर्त्रा ब्रह्मणा उक्ता ॥ शिवेन आदिष्टानां वर्णाश्रमधर्माणां व्यवस्था अन्यदृशी वर्तते । सर्वसमानतारूपेण आधारेण वर्णाश्रमधर्मः शिवेन समुपस्थापितः । कुलक्रमागतसमुद्योगेन वर्णत्वं बाल्याद्यवस्थाद्योतकत्वेन आश्रमत्वं च समाजे अनिवार्यम् । तादृशवर्णाश्रमव्यवस्थायां समानता वीरशैवे अस्तीति तस्य अतिवर्णा-श्रमित्वम् । तत्र वीरशैवदीक्षा तु सर्वोच्चनीचभावं निर्धूय समानतां समाजे सर्वस्य निर्मिमीते । ब्रह्मणा निर्मिते वर्णाश्रमधर्मव्यवस्थायां नीचोच्च-भावात्मकतारतम्यं प्रवर्तते ॥३५॥

शिवोक्तधर्मनिष्ठा तु शिवाश्रमनिषेविणाम् ।
शिवसंस्कारहीनानां धर्मः पैतमहः स्मृतः ॥३६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — तत्र धर्मभेदः कीदृशः इत्यत्राह – **शिवोक्तधर्मनिष्ठेति । शिवाश्रमनिषेविणां तु** शिवोक्तः आश्रमः, तं निषेवन्ते इति शिवाश्रमनिषेविणः, तेषाम्, शिवादिष्टव्यवस्थाम् अङ्गीकृतवतां तु, **शिवोक्तधर्मनिष्ठा** शिवेन उक्तः धर्मः, तस्मिन् निष्ठा, शिवप्रोक्तधर्माचारे आसक्तिः भवेद् इति शेषः । **शिवसंस्कारहीनानां** शिवसंस्काररहितानां **धर्मः** धर्माचारः **पैतामहः** पितामहसम्बन्धी सृष्टिकर्तृब्रह्मसम्बन्धी इति **स्मृतः** ज्ञातः ॥३६॥

शिवसंस्कारयुक्तेषु जातिभेदो न विद्यते ।
काष्ठेषु वह्निदग्धेषु यथा रूपं न विद्यते ॥३७॥

तस्मात्सर्वप्रयत्नेन शिवसंस्कारसंयुतः ।
जातिभेदं न कुर्वीत शिवभक्ते कदाचन ॥३८॥

व्याख्या — वीरशैवदीक्षासम्पन्नानां मध्ये जातिभेदो नास्तीति युग्मेनाह – **शिवसंस्कारयुक्तेष्विति । यथा** यया रीत्या **वह्निदग्धेषु** अग्निप्लुष्टेषु **काष्ठेषु** इन्धनविशेषेषु **रूपं** रूपभेदः **न विद्यते** न भवति, तया रीत्या **शिवसंस्कारयुक्तेषु** शिवदीक्षासंस्कारयुक्तेषु **जातिभेदः** ब्राह्मणादिजातिभेदः **न विद्यते** न भवति ॥ **तस्मात्** उक्तकारणात् **शिवसंस्कारसंयुतः** शिवदीक्षासंस्कारयुक्तः **कदाचन** कदापि **शिवभक्ते** शिवसंस्कारसम्पन्ने भक्ते **जातिभेदं** नीचोच्चभावयुक्तं ब्रह्मणादिवर्णभेदं **न कुर्वीत** न कुर्यात् ॥ इदं श्लोकयुग्मं मरितोण्टदार्यव्याख्यायुक्ते वाराणस्यां जङ्गमवाडीमठेन प्रकटिते (१९९३) सिद्धान्तशिखामणौ नोपलभ्यते । एवमेव काशीनाथशास्त्रिणा संपादिते पञ्चाचार्यमुद्रणालयद्वारा प्रकटिते ग्रन्थे, पि.आर्. करिबसवशास्त्रिणा सम्पादिते वाणीविलासमुद्रणालयद्वारा तेलुगुलिप्यां प्रकाशिते ग्रन्थे च नोपलभ्यते । उज्ञनीशकृतकन्नडव्याख्यानसहितं बेंगलूरु – कन्नडसाहित्यपरिषद्द्वारा प्रकटिते (१९९८) ग्रन्थे, एन्.आर्. करिबसवशास्त्रिणा सम्पदिते मैसूरुनगरात् प्रकटिते (१९२१) ग्रन्थे, एम्. एल्. नागण्णेन सम्पादिते आत्मविचारग्रन्थमालाद्वारा प्रकटिते (१९५९) ग्रन्थे,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रीसिद्धेश्वरस्वामिना सम्पादिते श्रीशिवरात्रीश्वरग्रन्थमालाद्वारा प्रकटिते (१९९९) ग्रन्थे च श्लोकयुग्ममिदम् उपलभ्यते । अत्र ३७-तमश्लोकस्यार्थः ११.५५-तमश्लोकस्याऽर्थसंवादी भवति ॥३७-३८॥

— इति पूर्वाश्रयनिरसनस्थलम् —

४. अथ सर्वाद्वैतनिरसनस्थलम् – (१९)

पूज्यपूजकयोर्लिङ्गजीवयोर्भेदवर्जने ।
पूजाकर्माद्यसम्पत्तेर्लिङ्गनिष्ठाविरोधतः ॥३९॥

सर्वाद्वैतविचारस्य ज्ञानाभावे व्यवस्थितेः ।
भवेन्माहेश्वरः कर्मी सर्वाद्वैतनिरासकः ॥४०॥

व्याख्या — लिङ्गनिष्ठाविरोधकारणात् पूर्वाश्रयनिरासकस्तस्मादेव कारणात् सर्वाद्वैतनिरासकोऽपि स्यादित्याह — **पूज्यपूजकयोरित्यादिना युग्मेन । पूज्यपूजकयोः** उपास्यस्य उपासकस्य च, **लिङ्गजीवयो** इष्टलिङ्गस्य जीवस्य च **भेदवर्जने** भेदनिराकरणे **लिङ्गनिष्ठाविरोधतः** लिङ्गे निष्ठा लिङ्गनिष्ठा, इष्टलिङ्गनिष्ठा, तस्याः विरोधतः विरोधात्, इष्टलिङ्गे दृढ-भक्तिविरोधप्रसङ्गात् **पूजाकर्माद्यसम्पत्तेः** पूजायाः पूजारूपं वा कर्म, तस्य असम्पत्तेः अनुपपत्तेः, **सर्वाद्वैतविचारस्य** सर्वेषाम् अद्वैतं सर्वाद्वैतं, तस्य विचारस्य सर्वाद्वैतपर्यालोचनस्य **ज्ञानाभावे** ज्ञानस्य अभावः, तस्मिन्, तत्साधकतत्त्वज्ञानाभावत्वे **व्यवस्थितेः** पर्यवसानकारणाच्च **कर्मी माहेश्वरः** इष्टलिङ्गपूजारूपकर्मनिष्ठः माहेश्वरः **सर्वाद्वैतनिरासकः** सर्वाद्वितनिरास-शीलः **स्यात्** भवेत् ॥ अत्र माहेश्वरस्य सर्वाद्वैकनिरासविषये कारण-द्वयमुक्तम् । उपास्योपसकयोर्भेदाभावे लिङ्गनिष्ठाविरोधो भवतीति इष्ट-लिङ्गपूजाद्यनुपपत्तिः संभवतीत्येकं कारणम् । इष्टलिङ्गजीवयोः सुतराम् अद्वैतत्वे स्वीकृते इष्टलिङ्गं पूज्यं जीवस्तत्पूजक इति ज्ञानस्य अभावो जायेतेति द्वितीयं कारणम् । सर्वाद्वितत्वम् ऐक्यस्थले सम्भवति, न तु माहेश्वरस्थले । माहेश्वरस्थलस्थः साधक इष्टलिङ्गपूजानिष्ठः, पूजादिकर्मणि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निरूढः सर्वाद्वैतविचारविमूढश्च । सर्वाद्वैतविचारे प्रस्तुते तस्य बुद्धिभेदो भवति । पूजाकर्मनिष्ठस्य बुद्धिभेदं न कार्यमिति भगवदुक्तिः – "न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान् मुक्तः समाचरेत् ॥" (भ. गी., ३.२६) इति । एवं सम्यज्ज्ञानसम्पन्नोऽपि योगी अन्येषां मार्गदर्शनाय (लोकसंग्रहाय) अज्ञवत् स्वयं सर्वकर्माणि समाचरेत् । तदुक्तं पुनर्भगवता – "सक्ताः कर्माण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥" (भ. गी., ३.२५) इति । अतो माहेश्वरस्थले साधको लिङ्गनिष्ठासमुज्झृम्भितधीरिष्टलिङ्गपूजादिकमेव सेवेत । प्रसादिस्थलादारभ्य क्रमेण द्वैताद्वैतरहस्यानि परिशोधयन् ऐक्यस्थले अद्वैतपर्यवसानं विन्देत् । मुक्तिमार्गे सङ्क्षिप्तता नास्ति । वीरशैवीयषट्स्थलात्मकमार्गः प्रथमस्थलद्वये द्वैतम् मध्यमस्थलद्वये द्वैताद्वैतम्, अन्तिमे स्थलद्वये च अद्वैतम् इत्यनुसन्धेयम् । कर्मनिष्ठेन "क्रियाद्वैतं न कर्तव्यम्" । इदमेव निजगुणशिवयोगिना कन्नडभाषायां "बळसदिरद्वैतवनु बाह्यदलि" (बाह्ये अद्वैतं न प्रयोक्तव्यम्) इति ॥३९-४०॥

प्रेरकं शङ्करं बुद्ध्वा प्रेर्यमात्मानमेव च ।
भेदात्स पूजयेन्नित्यं न चाद्वैतपरो भवेत् ॥४१॥

व्याख्या — माहेश्वरः अद्वैतपक्षपाती मा भूदित्याह – **प्रेरकम्** इति । **शङ्करं** परशिवं **प्रेरकं** प्रेरणादातारं, चोदकम् इति यावत्, **आत्मानं** स्वात्मानं **प्रेर्यम् एव** प्रेर्यमाण एव इति **बुद्ध्वा** मत्वा **सः** तादृशः माहेश्वरः **भेदात्** प्रेर्यप्रेरकभेदज्ञानात्, **नित्यं** निरन्तरं **पूजयेत्** अर्चयेत्, इष्टलिङ्गम् इति शेषः। **न च अद्वैतपरः भवेत्** मा खलु अद्वैतपक्षपाती भूत् । "भोक्ता भोज्यं प्रेरितारं च मत्वा...." (श्वे. उ., १.१२) इत्युक्तदिशा परमात्मा प्रेरको जीवात्मा च प्रेर्यो भोक्ता चेत्यस्ति भेदः । तद्भेदमेवादृत्य लिङ्गपूजां कुर्यादिति भावः ॥ "धियो यो नः प्रचोदयेत्" इति गायत्र्या कृता सवितृमण्डलस्वामिनं परशिवं प्रति अभ्यर्थना श्रूयते ॥४१॥

पतिः साक्षान्महादेवः पशुरेष तदाश्रयः ।
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते ॥४२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — शिवजीवयोः स्वामिभृत्यभावायत्तं भेदं प्रदर्शयति – **पतिरिति । महादेवः** महेश्वरः **साक्षात्** स्वस्वरूपेण **पतिः** जगतां स्वामी, जगत्पतिः, **तदाश्रयः** सः आश्रयः यस्य सः, शिवे शरणं प्राप्तः, **एषः** माहेश्वराख्यसाधकः **पशुः** मलादिपाशबद्धत्वात् पशुः, **अनयोः** शिव-जीवयोः पतिपशुभेदवतोः मध्ये **अभेदे** अद्वैते सति **स्वामिभृत्यत्वं** सेव्यसेवकभावः **कथम् इष्यते** कथं वक्तुं शक्यते, कथम् उपपद्यते इति यावत् । न कदापि उपपद्यते इत्यर्थः ॥ इष्टलिङ्गात्मकशिवस्योपास्यस्य उपासकभूतस्य जीवात्मनश्च स्वामिभृत्यभावे सिद्धे सत्येव लिङ्गनिष्ठात्वं लिङ्गपूजाद्युपपन्नत्वं च संभाव्येते । अयमेव द्वैतभावः श्वेताश्वतरोप-निषदुक्तिषु प्रतिपाद्यते । तथा हि – (१) "ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोगार्थयुक्ता । अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥" (१.९); (२) द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥" (४.६); (३) तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् । पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥" (६.७) इति ॥४२॥

साक्षात्कृतं परं तत्त्वं यदा भवति बोधतः ।
तदाद्वैतसमापत्तिर्ज्ञानहीनस्य न क्वचित् ॥४३॥

व्याख्या — भेदभावस्य कदा निवृत्तिरित्यत्राह – **साक्षात्कृतम्** इति। **बोधतः** ज्ञानोदयात् **यदा** यस्मिन् काले **परं तत्त्वं** परशिवब्रह्मात्मकं परमं तत्त्वं **साक्षात्कृतं** भवति स्वस्वरूपत्वेन ज्ञातं भवति **तदा** तस्मिन् काले **अद्वैतसमापत्तिः** न द्वैतम् अद्वैतम्, तस्य समापत्तिः, अद्वैतभावस्य समागमः भवतीति शेषः । **ज्ञानहीनस्य** ज्ञानेन हीनः, तस्य, स्वस्वरूपज्ञानरहितस्य **न क्वचित्** न कुत्रापि अद्वैतसमापत्तिः इत्यर्थः ॥ परशिवब्रह्मणः स्वस्वरूपत्वेन बोधस्त्रिधा जायते, श्रुत्या, गुरुणा, स्वानुभवेन च । बोधस्तु "तत् त्वम् असि" इत्याकारकः। (पश्यत– ९.५५ तमश्लोकस्य व्याख्यायां "दशमस्त्वमसि" इत्यनेन सम्बद्धं दृष्टान्तम्) ॥४३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भेदस्य कर्महेतुत्वाद् व्यवहारः प्रवर्तते ।
लिङ्गपूजादिकर्मस्थो न चाद्वैतं समाचरेत् ॥४४॥

व्याख्या — कर्मनिरतस्य नाद्वैतं सङ्गच्छते इत्याह – **भेदस्य इति । कर्महेतुत्वात्** कर्म हेतुः यस्य सः कर्महेतुः, तस्य भावः कर्महेतुत्वम्, तस्मात्, पूजादिकर्मोपपत्तिकारणात् **भेदस्य व्यवहारः** भेदभावस्य पूज्य-पूजकरूपस्य शास्त्रसिद्धप्रचारः **प्रवर्तते** प्रचलन्नस्ति । **लिङ्गपूजादिकर्मस्थः** लिङ्गस्य पूजा लिङ्गपूजा, लिङ्गपूजादिकर्मणि तिष्ठतीति लिङ्गपूजादिक-र्मस्थः, लिङ्गपूजादिकर्मनिरतः माहेश्वरः **न च अद्वैतं समाचरेत्** नैव अद्वैतभावम् आचरणे आनयेत् ॥४४॥

पूजादिव्यवहारः स्याद्भेदाश्रयतया सदा ।
लिङ्गपूजापरस्तस्मान्नाद्वैते निरतो भवेत् ॥४५॥

व्याख्या — उक्तार्थमेव विशदीकृत्य सर्वाद्वैतनिरसनस्थलं समापयति – **पूजादिव्यवहार इति । पूजादिव्यवहारः** पूजादिसम्प्रदायप्रचारः **सदा** सर्वदा **भेदाश्रयतया स्यात्** भेदम् आश्रयते इति भेदाश्रयः, तस्य भावः भेदाश्रयता, तया, भेदावलम्बनतया भवेत् । **तस्मात्** पूर्वोक्तकारणात् **लिङ्गपूजापरः** लिङ्गपूजानिरतः **अद्वैते** अद्वैतभावे **न निरतः भवेत्** न निमग्नः स्यात् ॥ इष्टलिङ्गपूजादिबाह्यक्रिया चाऽऽभ्यन्तरशुद्धिसाधनं भवति । अस्य संस्कारः मनोनैर्मल्ये पर्यवस्यति । तादृशं मनः प्राणलिङ्ग-भावलिङ्गात्मकम् आभ्यन्तरशिवभावं निध्यायति । अनेन मृत्युपाशा-च्छिन्नाः भवन्ति । तदुक्तम् – "पूजयन्निष्टलिङ्गं तु निध्यायन् प्राणलिङ्गम् । भावयन् भावलिङ्गं वै मृत्युपाशांश्छिनत्ति सः ॥" (चं.आ., क्रि.पा., ३.४८) इति । अयं च षट्स्थलमार्गस्य चरमोद्देशः । माहेश्वरस्थले तु साधक इष्टलिङ्गार्चनद्वारा मनोनैर्मल्यं संसाध्य आगामिसोपानारोहणाय सज्जो भवेत् ॥४५॥

– इति सर्वाद्वैतनिरसनस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

५. अथ आह्वाननिरसनस्थलम् – (२०)

लिङ्गार्चनपरः शुद्धः सर्वाद्वैतनिरासकः ।
स्वेष्टलिङ्गे शिवाकारे न तमाह्वयेच्छिवम् ॥४६॥

व्याख्या — इष्टलिङ्गपूजोपपत्तये सर्वाद्वैतं निरस्येदानीं माहेश्वरः गुरुदत्तेष्टलिङ्गे शिवस्य सर्वदा विद्यमानत्वाद् आह्वाननिरासकोऽपि भूयदित्याह – **लिङ्गार्चनपरः इति । लिङ्गार्चनपरः** लिङ्गपूजानिष्ठः, इष्टलिङ्गपूजायां निरतः, **शुद्धः** प्रयतात्मा **सर्वाद्वैतनिरासकः** सर्वाद्वैतनिषेधपरः माहेश्वरः इति यावत्, **शिवाकारे** शिव एव आकारः स्वरूपं यस्य तत्, शिवस्वरूपे, शिवात्मके **स्वेष्टलिङ्गे** स्वीये इष्टलिङ्गे, स्वेष्टसाधकभूते इष्टलिङ्गे, **तं शिवं** तं परशिवं **न आह्वयेत्** न आमन्त्रयेत् पुनराह्वानं तस्य न कर्तव्यम्, तस्य सिद्धसाधनत्वेन अनपेक्षितत्वात् ॥ अन्यदेवतामूर्तीनां पूजासन्दर्भे पूजास्वीकारार्थं प्रतिमासु देवता अह्वयन्ते पूजानन्तरं पुनस्ता विसृज्यन्ते। परंतु इष्टलिङ्गे गुरुदत्तसंस्कारेण चित्कलास्थापनद्वारा शिवस्य सर्वदा विद्यमानत्वात्तत्र आवाहनविसर्जने नैव अपेक्ष्येते ॥४६॥

यदा शिवकलायुक्तं लिङ्गं दद्यान्महागुरुः ।
तदारभ्य शिवस्तत्र तिष्ठत्याह्वानमत्र किम् ॥४७॥

व्याख्या — तत्र हेतुमाह – **यदा इति । यदा** यस्मिन् काले **महागुरुः** महामहिम्ना युक्तः श्रीगुरुः **शिवकलायुक्तं** शिवकलया युक्तं शाम्भवीकला इति नामान्तरयुक्तया शिष्यमस्तकस्थितचित्कलया समायोजितं **लिङ्गम्** इष्टलिङ्गं **दद्यात्** अनुगृह्यात् **तदारभ्य** तत्कालादारभ्य, **तत्र** इष्टलिङ्गे **शिवः** परशिवः **तिष्ठति** निवसति, **अत्र** अस्यां स्थितौ **आह्वानं** आवाहनं **किं** किमर्थम् ? तेन न किमपि साधितमस्ति इत्यर्थः ॥ शिवकला नाम का? कथं सा इष्टलिङ्गे समावेशिता भवति ? केन च समाविश्यते ? इत्यदिप्रश्नानामुत्तरं कारणागमोत्तरे द्रष्टव्यम् । तथा हि – "जलकुम्भाग्रसद् व्याप्ततैलबिन्दुर्यथा तथा । देहप्राणात्मसु व्याप्ता संस्थिता शाम्भवी कला ॥ ..... या कला परमा सूक्ष्मा तत्त्वानां बोधिनी परा । तामाकृष्य यथान्यायं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गे समुपवेशयेत् ॥'' (क्रि.पा., १.१२२,१२४) इति । श्रीगुरुणा हस्त-मस्तकसंयोगेन तां कलामाकृष्य लिङ्गे समावेश्यते इति त्वनुक्तमपि स्पष्टमेव ॥४७॥

ससंस्कारेषु लिङ्गेषु सदा सन्निहितः शिवः ।
तत्राह्वानं न कर्तव्यं प्रतिपत्तिविरोधकम् ॥४८॥

व्याख्या — उक्तकारणेन इष्टलिङ्गे शिवस्य आवाहनं न कर्तव्य-मित्याह **ससंस्कारेष्विति । ससंस्कारेषु लिङ्गेषु** संस्कारैः सह ससंस्काराणि लिङ्गानि, तेषु ससंस्कारेषु लिङ्गेषु, अभिषेकप्राणप्रतिष्ठाशिवकलाविनि-वेशनादि संस्कारैः युक्तेषु इष्टलिङ्गेषु, **शिवः** परशिवः **सदा** सर्वदा **सन्निहितः** सम्यङ्निहितः, सम्यग्विनिवेशितः । सदाकालं गुरुणा दत्तमिष्ट-लिङ्गं शिवस्याऽऽवासस्थानम् इत्यर्थः । **तत्र** तस्मिन्निष्टलिङ्गे **प्रतिपत्तिविरो-धकम्** उपपत्तिविरोधकम् अनौचित्यविजृम्भितम् **आह्वानम्** आवाहनं **न कर्तव्यम्** न कर्तुं योग्यम् ॥४८॥

नाह्वानं न विसर्गं च स्वेष्टलिङ्गे तु कारयेत् ।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रस्य निश्चयः ॥४९॥

व्याख्या — आह्वानस्याभावे विसर्जनस्य का कथा इत्यत्राह — **नाह्वानम् इति । लिङ्गनिष्ठापरः** लिङ्गनिष्ठायां निमग्नः माहेश्वरः **स्वेष्टलिङ्गे** स्वीये इष्टलिङ्गे **नित्यं** सर्वदा **आह्वानम्** आवाहनं **न कारयेत्** न कर्तव्यम्, एवमेव **विसर्गं च** विसर्जनं च न कर्तव्यम्, विसर्जनं तु कर्तव्यत्वेन नैव आपतति इत्यर्थः । **इति** एवं **शास्त्रस्य निश्चयः** वीरशैवशास्त्रस्य निर्णयः । अयं च विधिरूपेणाऽऽचरणीयः ॥ क्रमेण ''यदा शिवकलायुक्तम्'' इत्यारभ्य ''इति शास्त्रस्य निश्चयः'' इति श्लोकभागपर्यन्तं श्लोकत्रयं (४७,४८,४९) चन्नबसवण्णस्य एकस्मिन् वचनारम्भे वक्ष्यमाणसमर्थनाय उदाहृतम् । (चन्नबसवण्णनवर वचनगळु, कर्नाटक विश्वविद्यालयः, १९७१. व.सं. ३३, पृ. ७७४; चन्नबसवण्णनवर वचनसंपुटम्, कन्नड पुस्तकप्राधिकारः, २००१, व. सं. १४९४) तत्र पाठान्तराणि कानिचन वर्तन्ते । तदेव वचनम् अत्रोदाहृतं पश्यत —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"यदा शिवकलायुक्तं लिङ्गं दद्यान्महागुरुः ।
तदाराध्यः शिवस्तत्र तिष्ठत्याह्वानमत्र किम् ॥
सुसंस्कृतेषु लिङ्गेषु सदा सन्निहितः शिवः ।
अथाह्वानं न कर्तव्यं प्रति(पति)पत्तिविरोधतः ॥
आह्वानं च विसर्जं च स्वेष्टलिङ्गे न कारयेत् ।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रविनिश्चयः ॥

आह्वानक्कोस्गरवागि एल्लिर्दनु ?

ईरेळु भुवन हदिनाल्कुलोकवनोडलुगोण्डिप्प दिव्यवस्तु
मत्ते विसर्जिसि बिडुवाग एल्लिर्दनु ?

मुळ्ळूरे तेरे इल्लदन्तिर्प अखण्डवस्तु ....

अदु कारण कूडलचेन्नसंगय्यन शरणरु
आह्वानविसर्जनवेंब उभयजडतेय बिट्टु
तम्म तम्म करस्थलदल्लि निश्चयिसिदरागि
स्वयलिङ्गवादरु काणिरो ।"

– इति आह्वाननिरसनस्थलम् –

६. अथ अष्टमूर्तिनिरसनस्थलम् – (२१)

यथात्मशिवयोरैक्यं न मतं कर्मसङ्गिनः ।
तथा शिवात्पृथिव्यादेरद्वैतमपि नेष्यते ॥५०॥

व्याख्या — इष्टलिङ्गे शिवस्याऽऽह्वाननिरासको माहेश्वरः शिवस्य पृथिव्याद्यष्टमूर्तिनश्चाऽभेदमपि निरस्यति – **यथा इति** । **यथा** यया रीत्या **कर्मसङ्गिनः** शिवपूजादिकर्मसङ्गयुक्तस्य माहेश्वरस्य **आत्मशिवयोरैक्यम्** शिवस्य उपास्यस्य जीवात्मनश्च उपासकस्य अभेदज्ञानं **न मतं** न संमतम्, **तथा** तया रीत्या **शिवात्** परशिवात् **पृथिव्यादेः** पृथिव्यादिमूर्तिभ्यश्च

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अद्वैतम् **अपि** अभेदज्ञानं पुनः **न इष्यते** न इच्छाविषयीक्रियते ॥ शिवस्य पृथिव्याद्यष्टमूर्तित्वं प्रसिद्धमेव । पृथिवी, आपः, तेजः, वायुः, आकाशश्चेति पञ्चभूतानि, सूर्यः, चन्द्रः, यजमानः (आत्मा) चेति त्रयं च, आहत्याष्टौ रूपाणि शिवस्य । शिवस्य अष्टमूर्तित्वे अङ्गीकृते माहेश्वरस्य 'लिङ्गमात्रे शिवः' इत्याकारिका लिङ्गनिष्ठा भ्रमाधीना भवेदिति माहेश्वराय अष्टमूर्तित्वनिरसनं विहितम् ॥५०॥

पृथिव्याद्यष्टमूर्तित्वमीश्वरस्य प्रकीर्तितम् ।
तदधिष्ठातृभावेन न साक्षादेकभावतः ॥५१॥

व्याख्या — शिवस्याऽष्टमूर्तित्वं पृथिव्याद्यष्टानाम् अधिदेवतारूपेण न तु तदैकभावत्वेनेत्याह – **पृथिव्याद्यष्टमूर्तित्वम्** **इति** । **ईश्वरस्य** परमेश्वरस्य शिवस्य **पृथिव्याद्यष्टमूर्तित्वम्** पृथिव्याद्याः अष्टमूर्तयः पृथिव्याद्यष्टमूर्तयः, तासां भावः पृथिव्याद्यष्टमूर्तित्वम्, प्रथिव्याद्यष्टस्वरूपत्वम्, यदुक्तं **तत्** **अधिष्ठातृभावेन** तासामष्टमूर्तीनाम् अधिदेवतास्वरूपेण **न** न तु **साक्षाद्** **एकभावतः** स्वरूपैक्यभावेन ॥ इदं च स्पष्टतया निरूपितं बृहदारण्यकश्रुतौ – "यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति, एष ते आत्माऽन्तर्यामी अमृतः" – इति । एवमेव पृथिवीमुद्दिश्य यदुक्तं तदेव अबग्न्यन्तरिक्षवायुस्वर्गसूर्यदिक्चन्द्रनक्षत्राकाशादिकमुद्दिश्यापि कथितम् । (पश्यत – बृ.उ., ३.७.३-२३) । अनेन पृथिव्यादीनां परमेश्वराधिष्ठानत्वं परमेश्वरस्य च पृथिव्याद्यधिष्ठातृत्वं च द्योतितम् । पृथिव्यादेः परमेश्वरस्य च शिरीरशरीरिभावेन भेद एव ज्ञायते न त्वभेदः ॥५१॥

पृथ्व्यादिकमिदं सर्वं कार्यं कर्ता महेश्वरः ।
नैतत्साक्षान्महेशोऽयं कुलालो मृत्तिका यथा ॥५२॥

व्याख्या — कार्यकारणभावेनापि पृथिव्यादेः परमेश्वरस्य च भेदः प्रदर्श्यते – **पृथ्व्यादिकम्** **इति** । पृथ्व्यादिकं पृथ्वी अदिर्यस्य तत् पृथ्व्यादि,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वार्थे कप्, पृथ्व्यादिकम्, **इदं सर्वम्** एतत् सर्वं **कार्यं** कार्यभूतम्, **कर्ता**, सृष्टिकर्ता, कारणभूतः तु **महेश्वरः** परमेश्वरः। एतद् इदं सर्वं पृथिव्यादिकम् **अयं महेश्वरः** एष परमेश्वर **न** न भवति, **यथा** येन प्रकारेण **मृत्तिका** मृत्तिकोपलक्षित-घटशरावादिकार्यभूतं **कुलालः** कर्तृभूतः कुम्भकारः न भवति। यथा कर्तृभूतस्य कुम्भकारस्य कार्यभूतस्य मृन्निर्मितघटादेश्च भेदः तथा कारणभूतस्य परमेश्वरस्य कार्यभूतस्य पृथिव्यादेश्च भेदः दृश्यते। कार्यकारणभावोऽयमुक्तः श्रुतौ– "ब्रह्मविष्णुरुद्रेन्द्रास्ते सम्प्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणम्। कारणं तु ध्येयः शम्भुराकाशमध्ये।" (अथ. शिखा. उ., ३.४) इति ॥५२॥

पृथिव्याद्यात्मपर्यन्तप्रपञ्चो ह्यष्टधा स्थितः।
तनुरीशस्य चात्मायं सर्वतत्त्वनियामकः ॥५३॥

व्याख्या — पृथिव्याद्याः शरीरम् आत्मा च परमेश्वर इति पृथिव्यादेः परमेश्वरस्य च शरीरशरीरिभावमाह – **पृथिव्यादीत्यादिना**। **पृथिव्याद्यात्मपर्यन्तप्रपञ्चः** पृथिव्याः आरभ्य आत्मनः पर्यन्तं प्रपञ्चः जगत् **अष्टधा** अष्टविधत्वेन **स्थितः** तिष्ठति। तादृशः प्रपञ्चः **ईशस्य** महेशस्य **तनुः** शरीरम्। **अयम् आत्मा च** एष शरीरी आत्मा पुनः **सर्वतत्त्वनियामकः** सर्वेषां तत्त्वानां जगतः जगदंशभूतस्य शरीरस्य घटकभूतानां षट्त्रिंशत्तत्त्वानां नियन्ता भवति। एवं शरीरशरीरिभाव-सम्बन्धेन भेदभाजौ पृथिव्याद्यष्टमूर्तिप्रपञ्चः परमात्मा चेति मन्तव्यम्॥ पूर्वोक्तघटकुलालदृष्टान्ते भेदः पृथक्स्थितिश्च शक्यते वक्तुम्। शरीर-शरीरिभावे तु भेदो विवक्षितर्न तु पृथक्स्थितिः ॥५३॥

शरीरभूतादेतस्मात् प्रपञ्चात्परमेष्ठिनः।
आत्मभूतस्य देवस्य नाऽभेदो न पृथक्स्थितिः ॥५४॥

व्याख्या — शरीरशरीरिभावयुक्तयोः प्रपञ्चपरमात्मनोः सत्यपि भेदे नास्ति पृथग्भाव इत्याह – **शरीरभूताद्** इति। **शरीरभूताद्** देह-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वरूपवतः **एतस्मात् प्रपञ्चात्** पृथिव्याद्यष्टमूर्तिस्वरूपात् जगतः, **आत्मभूतस्य** शरीरिभूतस्य **देवस्य** प्रकाशमानस्य **परमेष्ठिनः** परशिवब्रह्मणश्च **न अभेदः** अभेदः नास्ति, तथापि तयोः **न पृथक्स्थिति** पृथग्भावः अपि नास्ति ॥ परमात्मनश्चराचरप्रपञ्चस्य च सर्वथा भेदो वाऽभेदो वा नास्ति। अतो वीरशैवसिद्धान्ते तयोर्भेदाभेदवादोऽङ्गीकृतः ॥ अस्य विवरणाय २.१३ तमश्लोकस्य ५.३३-३५ तमश्लोकानां च व्याख्या द्रष्टव्या ॥५४॥

अचेतनत्वात् पृथ्व्यादेरज्ञत्वाद् आत्मनस्तथा।
सर्वज्ञस्य महेशस्य नैकरूपत्वमिष्यते ॥५५॥

व्याख्या — द्वैताद्वैते स्वीकृते कथं तर्हि द्वैतम् (भेदः) इत्यत्राह — **अचेतनत्वादिति। पृथ्व्यादेः** अचरप्रपञ्चभूतस्य पृथिव्यादेः **अचेतनत्वात्** जडत्वात् **तथा** तथा एव **आत्मनः** चरप्रपञ्चभूतस्य जीवात्मनः **अज्ञत्वात्** अज्ञानवत्त्वात्, नञः अल्पार्थकत्वात् किञ्चिज्ज्ञत्वम् अत्र विवक्षितम्, अस्य चराचरात्मकप्रपञ्चस्य **सर्वज्ञस्य महेशस्य** सर्वज्ञत्वविशिष्टस्य महेश्वरस्य च **एकरूपत्वम्** अभेदत्वं **न इष्यते** न इच्छाविषयत्वेन गृह्यते ॥ एवं शरीरशरीरिणोरभेदः प्रतिपद्यते ॥ तयोः पुनः पृथग्भावाभावात् सर्वथा भेदोऽपि नाऽङ्गीक्रियते ॥५५॥

इति यश्चिन्तयेन्नित्यं पृथिव्याद्यष्टमूर्तितः।
विलक्षणं महादेवं सोऽष्टमूर्तिनिरासकः ॥५६॥

व्याख्या — एतद्भेदज्ञानवानेवाऽष्टमूर्तिनिरासक इत्युक्त्वा अष्टमूर्तिनिरसनस्थलम् उपसंहरति — **इतीति। इति** एवं **यः** यो माहेश्वरः **पृथिव्याद्यष्टमूर्तितः** पृथिव्याद्यष्टमूर्तेः **विलक्षणं** भिन्नं **महादेवं** महेश्वरं **नित्यं** सर्वदा **चिन्तयेत्** विचारयेत् **सः** सो माहेश्वरः **अष्टमूर्तिनिरासकः** अष्टमूर्तिनिरासकाख्यो भवतीत्यर्थः ॥ शिवस्वरूपिणीष्टलिङ्गे अष्टमूर्तित्वारोपं निरस्यतीति माहेश्वरोऽयं अष्टमूर्तिनिरासक इत्युच्यते ॥५६॥

— इति अष्टमूर्तिनिरसनस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

७. अथ सर्वगत्वनिरसनस्थलम् – (२२)

सर्वगत्वे महेशस्य सर्वत्राराधनं भवेत् ।
न लिङ्गमात्रे तन्निष्ठो न शिवं सर्वगं स्मरेत् ॥५७॥

व्याख्या — माहेश्वरो लिङ्गनिष्ठाविरोधित्वात् परमात्मनः सर्वगत्वमपि निरस्येदित्याह – **सर्वगत्वे इति** । **महेशस्य** महेश्वरस्य **सर्वगत्वे** सर्वान्तर्यामित्वे, **न लिङ्गमात्रे** न केवलं लिङ्गे इति स्वीकृते सति, **सर्वत्र** सर्वस्थानेषु तस्य महेशस्य **आराधनम्** उपासनं **भवेत्** स्यात्, अतः **तन्निष्ठः** तन्निष्ठा लिङ्गनिष्ठा यस्मिन् सः तन्निष्ठः, लिङ्गपूजानिष्ठः इत्यर्थः, **शिवं** परमात्मानं परशिवं **सर्वगं** सर्वव्यापिनं **न स्मरेत्** न चिन्तयेत् ॥ शिवस्य सर्वगत्वे स्वीकृते इष्टलिङ्गमात्रे पूजादिकम् अनुपपन्नं भवतीति माहेश्वरः सर्वगत्वनिरासको भवति ॥५७॥

सर्वगोऽपि स्थितः शम्भुः स्वाधारे हि विशेषतः ।
तस्मादन्यत्र विमुखः स्वेष्टलिङ्गे यजेच्छिवम् ॥५८॥

व्याख्या — सर्वगत्वेऽपि शिवस्य स्वेष्टलिङ्गे स्थितत्वेन मत्वेष्टलिङ्गे एव शिवं पूजयेदित्याह – **सर्वगोऽपीति** । **सर्वगः अपि** सर्वगतत्वेऽपि **शम्भुः** शिवः **विशेषतः** विशेषरूपेण **स्वाधारे** स्वस्य आधारे, स्वाश्रयभूते इष्टलिङ्गे एव **स्थितः** तिष्ठति । **तस्मात्** तस्मात् कारणात् **अन्यत्र** अन्यस्थाने नास्तीति **विमुखः** प्रवृत्तिरहितः सन् **स्वेष्टलिङ्गे** स्वीये इष्टलिङ्गे एव **शिवं यजेत्** शिवं पूजयेत् ॥ शिवस्य सर्वव्याप्तत्वं तु श्रुतिप्रसिद्धम् । तदाह श्वेताश्वतरश्रुतिः – "ततः परं ब्रह्म परं बृहन्तं यथा निकायं सर्वभूतेषु गूढम् । विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वा अमृता भवन्ति ॥ .... सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवान् तस्मात्सर्वगतः शिवः ॥" (श्वे.उ., ३.७,११) इति । एवं हि परिभाव्यन्ते ज्ञानयोगिनः । कर्मसङ्गी माहेश्वरस्तु लिङ्गनिष्ठादार्ढ्याय स्वेष्टलिङ्गे एव शिवं भावयति ॥५८॥

शिवः सर्वगश्चापि स्वाधारे व्यज्यते भृशम् ।
शमीगर्भे यथा वह्निर्विशेषेण विभाव्यते ॥५९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — उक्तमेव सदृष्टान्तमाह – **शिव इति । सर्वगः च अपि** सर्वत्र व्याप्तः अपि, **शिवः** परमेश्वरः **स्वाधारे** स्वाश्रयभूते इष्टलिङ्गे **भृशं** विशेषेण **व्यज्यते** अभिव्यक्तिं प्राप्यते । तत्र दृष्टान्तः – **वह्निः** अग्निः **शमीगर्भे** शमीवृक्षाभ्यन्तरे **यथा** येन प्रकारेण **विशेषेण** अतिशयेन **विभाव्यते** परिभाव्यते तथा । शमीवृक्षस्याऽग्निगर्भत्वं प्रसिद्धमेव । शमीवृक्षस्य कन्नडभाषायां 'बन्निमर' इति नाम । यथा शमीशाखा-खण्डयोर्मथनेनाऽग्निरभिव्यज्यते तथा माहेश्वरस्येष्टलिङ्गे दृष्टियोगेन शिवो अभिव्यज्यते ॥५९॥

सर्वगत्वं महेशस्य सर्वशास्त्रविनिश्चितम् ।
तथाप्याश्रयलिङ्गादौ पूजार्थमधिका स्थितिः ॥६०॥

व्याख्या — सर्वगत्वे शिवस्य पूजार्थम् इष्टलिङ्गे स्थितिरधिकेत्याह – **सर्वगत्वम् इति । महेशस्य** परमेश्वरस्य **सर्वगत्वं** सर्वव्यापकत्वं **सर्व-शास्त्रविनिश्चितं** सर्वेषु शास्त्रेषु विनिश्चितम्, सर्वशास्त्रेषु निश्चयेन स्थापितं यद्यपि, **तथापि** तथा सत्यपि माहेश्वरस्य **पूजार्थम्** पूजास्वीकाराय **आश्रयलिङ्गादौ** आश्रयभूते इष्टलिङ्गादौ **अधिका स्थितिः** आधिक्येन उपस्थितिः, प्रधानतया, विशेषतया स्थितिरित्यर्थः । अत्र 'लिङ्गादौ' इत्यत्र आदिशब्देन गुरुजङ्गमौ सूचितौ ॥ (पश्यत – ६.३६) । "यत्तदद्रेश्य-मग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥" (मुं. उ., १.६) इति श्रुत्युक्तदिशा परशिवस्य सर्वगतत्वादिविशेषसंपद्युक्तत्वेऽपीष्टलिङ्गे गुरुजङ्गयोश्च विशेषतया स्थितिः पूजार्थमित्यवगम्य माहेश्वरो लिङ्गपूजा-निष्ठो भूयात् ॥ "आश्रयलिङ्गादौ" इत्यत्र "आश्रयलिङ्गेन" इति पाठान्तरं विद्यते । अस्मिन् ग्रन्थे आदृतः पाठः साधुतर इति मे मतिः ॥६०॥

नित्यं भासि तदीयस्त्वं या ते रुद्र शिवा तनूः ।
अघोराऽपापकाशीति श्रुतिराह सनातनी ॥६१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — एतमर्थं श्रुतिवाक्येन समर्थयति – **नित्यम् इति**। **रुद्र** हे रुद्र, रुद्रस्वरूप शिव, **या ते** या तव **शिवा** मङ्गला **अघोरा** अभयङ्करा **अपापकाशी** पापसम्पर्करहिता **तनूः** इष्टलिङ्गमूर्तिः, **इति** एवं **सनातनी** नित्या **श्रुतिः आह** श्रुतिः कथयति, एतदनुसारेण **त्वं** हे शिव त्वं **तदीयः** तत्सम्बन्धी, इष्टलिङ्गमूर्तिसम्बन्धी भूत्वा **नित्यं** सर्वदा **भासि** प्रकाशसे ॥ "या ते रुद्र शिवा तनूः, इत्यादि" (तै. सं. ४.५.१.१; श्वे. उ., ३.५; पश्यत – ६.६२ तमस्य श्लोकस्य व्याख्याम्) ॥६१॥

तस्मात्सर्वप्रयत्नेन सर्वस्थानपराङ्मुखः ।
स्वेष्टलिङ्गे महादेवं पूजयेत्पूजकोत्तमः ॥६२॥

व्याख्या — तस्माद् इष्टलिङ्गमेव पूजनीयमित्याह – **तस्माद् इति**। **तस्माद्** उक्तकारणात्, श्रुतिवाक्योक्तकारणात्, **पूजकोत्तमः** सदुपासकः माहेश्वरः **सर्वस्थानपराङ्मुखः** सर्वान्यस्थानेभ्यः प्रतिनिवृत्तप्रवृत्तिः सन्, **सर्वप्रयत्नेन** सर्वव्यवसायेन दृढासक्तिपूर्वकं **स्वेष्टलिङ्गे** स्वीये इष्टलिङ्गे एव **महादेवं** महेश्वरं **पूजयेद्** अर्चयेत् ॥ इयमेव माहेश्वरस्य लिङ्गनिष्ठा ॥६२॥

शिवस्य सर्वगत्वेऽपि सर्वत्र रतिवर्जितः ।
स्वेष्टलिङ्गे यजन् देवं सर्वगत्वनिरासकः ॥६३॥

व्याख्या — सर्वं पूर्वोक्तं ज्ञात्वा स्वेष्टलिङ्गे शिवं पूजयन् सर्वगत्वनिरासको भवतीति सर्वगत्वनिरसनस्थलमुपसंहरति – **शिवस्य इति**। **शिवस्य** परशिवस्य **सर्वगत्वे अपि** सर्वव्यापकत्वे अपि, **सर्वत्र** अन्यत्र सर्वत्र **रतिवर्जितः** आसक्तिरहितः सन् **स्वेष्टलिङ्गे** स्वीये इष्टलिङ्गे **देवं** दिव्यप्रकाशं शिवं **यजन्** पूजयन् **सर्वगत्वनिरासकः** सर्वगत्वनिरासकाख्यमाहेश्वरः भवति ॥ शास्त्रोक्तदिशा शिवः सर्वगः सर्वव्यापी च । परंतु माहेश्वरनिष्ठायां शिवः स्वेष्टलिङ्गे एव स्थितः । अयं दृढभावस्तस्य मनोचाञ्चल्यं निष्कास्याऽन्याश्रयमार्गणात् तं निवारयति । तेनेष्टलिङ्गपूजानिष्ठा बलवती

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवति । केवलं पूजार्थं निराकृतसर्वगत्वं शिवस्य, परंतु तस्य सर्वगतत्वं पारमार्थिकतयाऽङ्गीकरणीयमेवेत्यागामिनि स्थले निर्दिश्यते ॥६३॥

— इति सर्वगत्वनिरसनस्थलम् —

८. अथ शिवजगन्मयस्थलम् – (२३)

पूजाविधौ नियम्यत्वाल्लिङ्गमात्रे स्थितं शिवम् ।
पूजयन्नपि देवस्य सर्वगत्वं विभावयेत् ॥६४॥

व्याख्या — पूजार्थं शिवस्येष्टलिङ्गे स्थितिमङ्गीकृत्यापि तस्य सर्वगत्वं न विस्मरणीयमितीदमाह — **पूजाविधौ** इति । **पूजाविधौ** तदेकचित्तेन क्रियमाणे पूजाविधाने **नियम्यत्वात्** नियन्त्रणीयत्वात् लिङ्गमात्रे इष्टलिङ्ग-मात्रे **स्थितं** तिष्ठन्तं **शिवं** परशिवं **पूजयन्नपि** सर्वगत्वनिरासपूर्वकम् अर्चयन् अपि, **देवस्य** परशिवस्य **सर्वगत्वं** सर्वगतत्वं **विभावयेत्** विशेषेण भावयेत् ॥ अन्यथा कुम्भकारवन्निमित्तकारणत्वमात्रप्रसङ्गात् शिवस्याऽ-भिन्ननिमित्तोपादानकारणत्वं हीयेत ॥६४॥

यस्मादेतत्समुत्पन्नं महादेवाच्चराचरम् ।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः ॥६५॥

शिवतत्त्वात्समुत्पन्नं जगदस्मान्न भिद्यते ।
फेनोर्मिबुद्बुदाकारं यथा सिन्धोर्न भिद्यते ॥६६॥

यथा तन्तुभिरुत्पन्नः पटस्तन्तुमयः स्मृतः ।
तथा शिवात्समुत्पन्नं शिव एव चराचरम् ॥६७॥

व्याख्या — अत्र त्रिभिः श्लोकैः शिवस्य जगन्मयत्वमुक्तम् — **यस्मादित्यादिना** । **यस्मात् महादेवात्** यस्मात् महेश्वरात् **चराचरं** स्थावरजङ्गमात्मकं **एतत्** इदं विश्वं **समुत्पन्नं** समुद्भूतं **तस्मात्** तस्मात् महेश्वरात् **एतत्** चराचरात्मकमिदं **न भिद्येत** विलक्षणं न भवेत्, **यथा** येन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रकारेण **कुम्भादिकं** मृदा निर्मितं कुम्भशरावादिकं **मृदः** मृदात्मककारणात् न भिद्यते तथा ॥ **शिवतत्त्वात्** परमेश्वरतत्त्वात् **समुत्पन्नं** समुद्भूतं **जगत्** प्रपञ्चः **अस्मात्** शिवतत्त्वात् न भिद्यते, **यथा** येन प्रकारेण **फेनोर्मिबुद्बुदाकारं** फेनः अब्धिकफः, ऊर्मयः तरङ्गाः, बुद्बुदाः जलबिन्दवश्च, तेषाम् आकारः स्वरूपं **सिन्धोः** समुद्रात् **न भिद्यते** भिन्नत्वेन न दृश्यते तथा ॥ **यथा** येन प्रकारेण **तन्तुभिः** सूत्रैः **उत्पन्नः** समुत्पन्नः **पटः** पटस्वरूपः **तन्तुमयः** सूत्रमयः इति **स्मृतः** ज्ञातः, तथा तेन प्रकारेणैव **शिवात् समुत्पन्नं** शिवाद् उद्भूतं **चराचरं** स्थावरजङ्गमात्मकं जगत् **शिवः एव** परशिवः एव ॥ यथा घटशरावादिकं मृदः, यथा फेनोर्मिबुद्बुदाः सिन्धोः, यथा तन्तुभिरुत्पन्नः पटस्तन्तुभ्यश्च न भिद्यन्ते तथा महादेवात् समुत्पन्नं जगत् महादेवान्न भिद्यते ॥ शिवश्चराचरात्मकजगतोऽभिन्ननिमित्तोपादानकारणमिति प्रतिपादयितुमेते दृष्टान्ताः समुपस्थापिताः । प्रथमे दृष्टान्ते घटो मृत्परिणामत्वेन निरूपितः द्वितीयेऽपि दृष्टान्ते फेनादयः सिन्धोः परिणामत्वेन निरूपिताः । द्वावेतौ परिणामवाददृष्ट्या दृष्टान्तौ । तृतीये दृष्टान्ते पटस्तन्तूनां चरमरूपत्वेन निरूपितः । तत्र आरम्भवादः मूलम् । त्रिष्वपि दृष्टान्तेषु तावत् कार्यकारणयोरभिन्नत्वं प्रतिपादितम् । मुण्डकश्रुतौ ऊर्णनाभिदृष्टान्तेन परिणामवादः एव प्रतिपादितः ("यथोर्णनाभिः सृजते गृह्णते च" – मुं. उ., १.१.७) । कार्यकारणयोरभिन्नत्वं ब्रह्मसूत्रेऽपि "तदनन्यत्वम् आरम्भणशब्दादिभ्यः" (ब्र. सू., २.१.१४) इति सूत्रेण प्रतिपादितम् ॥ यथा घटः मृण्मयः, यथा फेनादयः सिन्धुजलमयाः यथा च पटः तन्तुमयः तथा चराचरं जगदिदं शिवमयमित्यभिप्रायः ॥६५-६७॥

आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः ।
कुटीभावाद् यथा भाति पटः स्वस्य प्रसारणात् ॥६८॥

व्याख्या — शिवस्य निर्विकारित्वमुक्तम् – **आत्मशक्तिविकासेनेति । यथा** येन प्रकारेण **पटः** पटस्वरूपः **स्वस्य प्रसारणात्** तादात्म्येन स्वनिहितया विस्तरणशक्त्या **कुटीभावात्** कुटीररूपधारणात् **भाति** प्रकाशते, तथा **शिवः** परमात्मा **आत्मशक्तिविकासेन** आत्मनः शक्तिः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आत्मशक्तिः, अविनाभावसम्बन्धेन स्वात्मनि स्थिता शक्तिः, तस्याः विकासेन **विश्वात्मना** जगद्रूपेण **स्थितः** तिष्ठति ॥ कुटीभावे वाऽकुटी-भावे वा पटोऽविकारी भवति, एवमेव यद्यपि शिवस्य शक्तिविकासे सृष्टिः, शक्तिसङ्कोचे च प्रलयस्तथापि शिवस्त्वविकारी ह्येव ॥६८॥

तस्माच्छिवमयं सर्वं जगदेतच्चराचरम् ।
तदभिन्नतया भाति सर्पत्वमिव रज्जुतः ॥६९॥

व्याख्या — पुनः शिवजगन्मयत्वं दृष्टान्तान्तरेण समर्थयति — **तस्माद् इति । तस्माद्** उक्तकारणात् **शिवमयं** शिवस्वरूपं **एतत्** इदं **चराचरं** स्थावरजङ्गमात्मकं **जगत् सर्वं** समग्रं विश्वं **तदभिन्नतया** शिवाभिन्नतया **भाति** प्रकाशते **सर्पत्वम् इव रज्जुतः** यथा रज्जुस्वरूपात् सर्पभावः (अभिन्नतया भाति) तथा ॥ अत्र रज्जुसर्पदृष्टान्तेनाऽध्यासो न मन्तव्यः, रज्जुः स्वनिहितदीर्घत्ववृत्तत्वगोधूमवर्णत्वशक्तिवशात् विकार-रहितत्वेन सर्पवद् भातीति औपम्यमात्रं विवक्षितम् ॥६९॥

रज्ज्वौ सर्पवद् भाति शुक्तौ तु रजतत्ववत् ।
चोरत्ववदपि स्थाणौ मरीच्यां जलत्ववत् ॥७०॥

गन्धर्वपुरवद्व्योम्नि सच्चिदानन्दलक्षणे ।
निरस्तभेदसद्भावे शिवे विश्वं विराजते ॥७१॥

व्याख्या — उक्तदृष्टान्तेन सह अन्यदृष्टान्तान् उदाहृत्य तदेव समर्थयति युग्मेन — **रज्ज्वौ इत्यादिना । रज्ज्वौ** रज्जुस्वरूपे गोधूमवर्णशक्त्या **सर्पवद् भाति** सर्पसादृश्येन प्रकाशते; एवमेव **शुक्तौ** शुक्तिकायां श्वेतत्व-शक्त्या **रजतत्ववत्** रजतसादृश्येन भाति, **स्थाणौ** दारुस्तम्भे दीर्घताशक्त्या **चोरत्ववत्** चोरपुरुषसादृश्येन भाति, **मरीच्यां** मरीचिकायां (मृगतृष्णिकायां) स्वच्छतोद्रेकशक्त्या **जलत्ववत्** जलत्वसादृश्येन भाति, **व्योम्नि** आकाशे वर्षाकालरूपशक्त्या **गन्धर्वपुरवत्** गन्धर्वपुरसाधर्म्येण भाति, एवमेव **निरस्तभेदसद्भावे** भेदस्य सद्भावः भेदसद्भावः भिन्नतया अवभासः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निरस्तः भेदसद्भावः यस्मिन् सः, तस्मिन् भिन्नतावभासरहिते **सच्चिदानन्दलक्षणे** सच्चिदानन्दस्वरूपे शिवे स्वसमवेतशक्तिस्फुरणेन **विश्वं** चराचरं जगद् शिवाभिन्नतया **विराजते** विजृम्भते ॥ यथा रज्ज्वादौ गोधूमवर्णादिशक्त्या सर्पत्वादयोऽभिन्नता प्रकाशन्ते तथा शिवे स्वसमवेतशक्तिस्पन्देन जगदिदम् अभिन्नतया भाति । यथा रज्ज्वादयः अविकारिणः, एवमेव शिवः अविकारी इत्यत्र सूच्यते ॥७०-७१॥

पत्रशाखादिरूपेण यथा तिष्ठति पादपः ।
तथा भूम्यादिरूपेण शिव एको विराजते ॥७२॥

व्याख्या — पादपस्य पत्रशाखादिदृष्टान्तद्वारा शिवस्य षट्त्रिंशत्तत्त्वस्वरूपत्वं प्रदर्श्य शिवजगन्मयस्थलम् उपसंहरति — **पत्रशाखादिरूपेणेति।** **यथा** यया रीत्या **पादपः** वृक्षः **पत्रशाखादिरूपेण** पत्रपुष्पादिस्वरूपेण स्वान्तर्लीनत्वे सति स्वविजातीयावभासतया **तिष्ठति** स्थितः, **तथा** तया रीत्या **शिवः एकः** परशिवः एव **भूम्यादिरूपेण** स्वपरिणामत्वेन स्वविजातीयपृथिव्यादिषट्त्रिंशत्तत्त्वस्वरूपेण, तत्समुदायभूतचराचरात्मकवैविध्यमयप्रपञ्चरूपेण **विराजते** विजृम्भते ॥ यद्यत्राऽऽक्षिप्यते — दृष्टान्तभूतस्य वृक्षस्य सावयवत्वात् सावयवरूपेण दृश्यमानत्वम् उपपन्नम्, परन्तु दार्ष्टान्तिकभूतस्य निरवयवत्वात् तत्समवेतशक्तेरपि तदभिन्नतया निरवयवत्वात् कथं सावयवप्रपञ्चरूपेण परिणामः इति, तर्हि इदं तत्र समाधानम् — शक्तेः शिवाद् अभिन्नत्वेऽपि दुर्घटकार्यकारित्वेन स्वस्वातन्त्र्यपरिकल्पितमायाशक्तेः सावयवत्वे तत्सम्भवतीति ॥७२॥

— इति शिवजगन्मयस्थलम् —

९. अथ भक्तदेहिकलिङ्गस्थलम् – (२४)

समस्तजगदात्मापि शङ्करः परमेश्वरः ।
भक्तानां हृदयाम्भोजे विशेषेण विराजते ॥७३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— जगन्मयोऽपि परमात्मा शम्भुः भक्तहृदयावासेनाऽऽनन्दी भवतीति भक्तदेहिकलिङ्गस्थलम् आरभते — **समस्तजगदात्मापीति** । **समस्तजगदात्मापि** समस्तस्य जगतः आत्मा अपि, समस्तविश्वात्मापि, शङ्करः सुखकरः **परमेश्वरः** परशिवः **भक्तानां** स्वभक्तानां **हृदयाम्भोजे** हृत्कमले **विशेषेण** अनितरसाधारण्येन **विराजते** प्रकाशते ॥ शिवः सर्वात्मतया समग्रे जगति निवसन् जगन्मयो माहेश्वरहृदयकमले विशेषात्मतया निवसन् भक्तदेहिकलिङ्गस्थली भवति ॥७३॥

कैलासे मन्दरे चैव हिमाद्रौ कनकाचले ।
हृदयेषु च भक्तानां विशेषेण व्यवस्थितः ॥७४॥

व्याख्या — कुत्र कुत्र स विशेषेण विराजते इत्यत्राह — **कैलासे इति**। **कैलासे** कैलासस्थाने **मन्दरे** मन्दरपर्वते **हिमाद्रौ** हिमवत्पर्वते **कनकाचले** मेरुपर्वते **चैव** च एवेति पादपूरणे, **भक्तानां हृदयेषु च** भक्तिमतां हृत्कमलेषु च, **विशेषेण** अनन्यसाधारणतया **व्यवस्थितः** निश्चयेन तिष्ठति। शिवः इति शेषः ॥ यथा शिवः कैलासादिषु विशेषेण निवसति तथैव भक्तानां हृदयेषु विशेषेण भासते ॥ एष भक्तदेहिकलिङ्गस्थलिनो विशेषः। अल्लमप्रभोः कन्नडवचने कस्मिंश्चन भक्तदेहिकलिङ्गिनः स्वरूपम् एवमेवाह — "शास्त्रपुरुषरिर, निम्म शास्त्रद महापथ होनलल्लि होदल्लि, भक्तदेहिकदेवनेन्दरियदे केट्टिरल्ल । 'यत्र शिवस्तत्र माहेश्वर'नेन्दु हेळित्तु मुन्न, अन्तु भक्त, नित्य सत्य सन्निहित गुहेश्वर निम्म शरण" (अल्लमप्रभुदेवर वचनसंपुटम्, कन्नडपुस्तकप्राधिकारः, २००१, व. सं. ११३ — 'आगमपुरुषरिर निम्म आगम' इति तस्य आरम्भः) इति । "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति" इति कठश्रुतिः (कठ. उ., ४.१२) ॥७४॥

सर्वात्मापि परिच्छिन्नो यथा देहेषु वर्तते ।
तथा स्वकीयभक्तेषु शङ्करो भासते सदा ॥७५॥

व्याख्या — सर्वात्मत्वे परिच्छिन्नत्वमाह शङ्करस्य — **सर्वात्मापीति**। **यथा** येन प्रकारेण **शङ्करः** सुखदाता शिवः **सर्वात्मा अपि** सर्वजगदात्मा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अपि **परिच्छिन्नः** विभागयुक्तः सन् देहेषु देवतिर्यङ्मनुष्यस्वरूपेषु सर्वदेहेषु **वर्तते** स्थितः भवति, **तथा** तेनैव प्रकारेण **स्वकीयभक्तेषु** स्वीयेषु भक्तेषु **सदा** सर्वदा **भासते** प्रकाशते ॥७५॥

नित्यं भाति त्वदीयेषु या ते रुद्रशिवातनूः ।
अघोराऽपापकाशीति श्रुतिराह सनातनी ॥७६॥

व्याख्या — अस्मिन् विषये प्रमाणमाह — **नित्यम् इति** । भो रुद्र भो रुद्रशिव, **या शिवा** या मङ्गलकारिणी **अघोरा** सौम्यस्वरूपा **अपापकाशी** दोषनिर्मुक्ता **ते तनू** तव सा लिङ्गमूर्तिः **त्वदीयेषु** त्वत्सम्बन्धिषु भक्तेषु **नित्यं भाति** सर्वदा प्रकाशते ॥ एवं **सनातनी** नित्या **श्रुतिः** श्रुतिः **आह** कथितवती ॥ "या ते रुद्र शिवतनूः" (तै.सं. ४.५.१.१; श्वे.उ., ३.५) – (पश्यत – १०.६१ इत्यस्य व्याख्याम्) ॥७६॥

विशुद्धेषु विरक्तेषु विवेकिषु महात्मसु ।
शिवस्तिष्ठति सर्वात्मा शिवलाञ्छन धारिषु ॥७७॥

व्याख्या — सर्वात्मनः शिवस्य महात्मसु स्थितिमाह — **विशुद्धेष्विति** । **सर्वात्मा शिवः** आत्मत्वेन सर्वगतः परशिवः **विशुद्धेषु** निर्मलचित्तेषु **विरक्तेषु** विरागवत्सु **विवेकिषु** आत्मनात्मविवेकयुक्तेषु **महात्मसु** माहात्म्यशालिषु **शिवलाञ्छनधारिषु** विभूतिरुद्राक्षादिशिवलक्षणयुक्तेषु च **तिष्ठति** निवसति ॥ निर्मलचित्तादिसद्गुणयुक्तेषु सर्वात्मनः शिवस्य निर्मलदर्पणे प्रतिविम्बवत् स्पष्टतया स्थितिर्ज्ञायते । अन्येषु मेघच्छन्नचन्द्रवद् अस्पष्टतया स्थितिरवगम्यते ॥७७॥

अन्यत्र शम्भोरतिमात्रशून्यो
निजेष्टलिङ्गे नियतान्तरात्मा ।
शिवात्मकं विश्वमिदं विबुध्यन्
माहेश्वरोऽसौ भवति प्रसादी ॥७८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ माहेश्वरस्य नवविधस्थलप्रसङ्गो नाम दशमः परिच्छेदः समाप्तः ॥१०॥

व्याख्या — शिवेतरदेवेषु प्रीतिरहित इष्टलिङ्गे निहितान्तःकरणो माहेश्वरो विश्वं शिवमयम् इति बोधेन प्रसादी भवतीति प्राह — **अन्यत्रेति।** **शम्भोः** शिवाद् **अन्यत्र** अन्यदेवे **रतिमात्रशून्यः** रतिमात्रं प्रीतिलेशः, रतिमात्रेण शून्यः रहितः, **निजेष्टलिङ्गे** स्वेष्टलिङ्गे **नियतान्तरात्मा** निहितान्तःकरणवान् सन् **विश्वम् इदं** एतत्प्रपञ्चं **शिवात्मकं** शिवमयम् इति **विबुध्यन्** विबोधं प्राप्य **असौ माहेश्वरः** एष माहेश्वरस्थलसम्बन्धवान् **प्रसादी** प्रसादिस्थलविशेषयोग्यताशाली **भवति** अस्ति ॥ सर्वत्र जगति शिवभावम् अनुभूयमानो प्रसादी ''शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य'' इति अथर्वशिखोपनिषदुक्तदिशा अवधानभक्तिमान् प्रसादी भवतीत्यर्थः ॥ अत्र उपजातिवृत्तम् । इन्द्रवज्रोपेन्द्रवज्रयोः प्रतिपादम् एकादशवर्णघटितयोः मेलनेन उपजातिर्नाम वृत्तं भवति । पद्येऽस्मिन् प्रथमचतुर्थपादयोः वृत्तम् इन्द्रवज्रा, द्वितीयतृतीयपादयोः वृत्तं उपेन्द्रवज्रा (२.३३ तमश्लोकस्य व्याख्यां पश्यत) ॥७८॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
दशमः परिच्छेदः समाप्तः ॥१०॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एकादशः परिच्छेदः

प्रसादिनः सप्तविधस्थलप्रसङ्गः

अगस्त्य उवाच –

उक्तो माहेश्वरः साक्षाल्लिङ्गनिष्ठादिभाववान् ।
कथमेष प्रसादीति कथ्यते गणनायक ॥१॥

व्याख्या — माहेश्वरस्थलस्य नवविधस्थलनिरूपणानन्तरं प्रसादिस्थलनिरूपणाय ग्रन्थकृद् अगस्त्यप्रश्नमाह – **उक्त इति । गणनायक** हे रेणुकगणाधीश, **साक्षात्** स्वस्वरूपतया **लिङ्गनिष्ठादिभाववान्** लिङ्गे निष्ठा लिङ्गनिष्ठा लिङ्गे निहितदृढभक्तिः, इत्यादि भावयुक्तः, अदिशब्देन वैराग्यस्थिरविवेकादयः गृह्यन्ते, तादृशः **माहेश्वरः** माहेश्वरस्थलसम्पन्नः **उक्तः** कथितः, नवविधस्थलान्तर्गतधर्माचारयुक्तत्वेन निरूपित इत्यर्थः । **कथं** केन प्रकारेण **एषः** अयं माहेश्वरः **प्रसादीति** प्रसादी इति नाम्ना **कथ्यते** आख्यायते ? अत्र अगस्त्यमुनेः प्रश्नद्वारा कथं माहेश्वरः प्रसादिस्थलस्तरम् आरोहति इति सिद्धान्तज्ञानेच्छुकानां जिज्ञासा प्रदर्शिता । प्रसादिनः किं वैशिष्ट्यं कति च तत्सम्बन्धीनि स्थलानि इत्यादिविषयं ग्रन्थकृन्निरूपयति ॥१॥

रेणुक उवाच –

लिङ्गनिष्ठादिभावेन ध्वस्तपापनिबन्धनः ।
मनःप्रसादयोगेन प्रसादीत्येष कथ्यते ॥२॥

व्याख्या — केन प्रसादीति कथ्यते माहेश्वर इत्यत्राह – **लिङ्गनिष्ठादिभावेनेति । लिङ्गनिष्ठादिभावेन** लिङ्गनिष्ठास्थिरविवेकवैराग्यगौर-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वादिभावयुक्तत्वेन **ध्वस्तपापनिवन्धनः** पापस्य निबन्धनं नियन्त्रणं पापनिबन्धनं, ध्वस्तं नष्टं पापनिवन्धनं यस्य सः, एषः तादृशः अयं माहेश्वरः एव, **मनःप्रसादयोगेन** मनसः प्रसादः मनःप्रसादः, मनसः प्रसन्नभावः, मनोनैर्मल्यम्, तस्य योगेन सम्बन्धेन **प्रसादी इति** प्रसादी इति नाम्ना **कथ्यते** आख्यायते ॥ मनःप्रसादेन प्रसादी इत्यर्थः ॥ माहेश्वरस्थलोक्ताचरणेन नष्टपापसम्बन्धो भूत्वा स्वायतीकृतमनोनैर्मल्यो माहेश्वर एव प्रसादी भवति । प्रसाद इत्यनेन अनुग्रहार्थोऽपि गृह्यते । सर्वथा तस्य चित्ते शिवभावस्य जागृतत्वात् शिवानुग्रहोऽपि तेन प्राप्त इत्यपि स प्रसादी ॥२॥

प्रसादिस्थलमित्येतद् अस्य माहात्म्यबोधकम् ।
अन्तरस्थलभेदेन सप्तधा परिकीर्तितम् ॥३॥

व्याख्या— प्रसादिन स्थलानि कति इत्यत्राह – **प्रसादिस्थलम् इति** । अस्य प्रसादिनः **माहाम्यवोधकं** महात्मनः भावः माहात्म्यम्, तस्य बोधकं प्रत्यायकं **प्रसादिस्थलम् इति** प्रसादिस्थलाख्यम् एतत् इदं **अन्तरस्थलभेदेन** अवान्तरस्थलभेदेन **सप्तधा** सप्तविधमिति **परिकीर्तितं** समाख्यातम् ॥३॥

प्रसादिस्थलमादौ तु गुरुमाहात्म्यकं ततः ।
ततो लिङ्गप्रशंसा च ततो जङ्गमगौरवम् ॥४॥

ततो भक्तस्य माहात्म्यं ततः शरणकीर्तनम् ।
शिवप्रसादमाहात्म्यमिति सप्तप्रकारकम् ।
क्रमाल्लक्षणमेतेषां कथयामि महामुने ॥५॥

व्याख्या — अवान्तरस्थलानां सप्तानां नामान्याह – **प्रसादिस्थलम् इति** । **आदौ** प्रथमं तावत् प्रसादिस्थलम् (१), **ततः** तदनन्तरं **गुरुमाहात्म्यकं** गुरुमाहात्म्यस्थलम् (२), **ततः** तदनन्तरं **लिङ्गप्रशंसा च** लिङ्गमाहात्म्यस्थलम् (३), **ततः** तत्पश्चात् **जङ्गमगौरवं च** जङ्गममाहात्म्य-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्थलम् (४), **ततः** तस्माद् अनन्तरं **भक्तस्य माहात्म्यं** भक्तमाहात्म्यस्थलम् (५), **ततः** तत्पश्चात् **शरणकीर्तनं** शरणमहत्त्वस्थलम् (६), **शिवप्रसादमाहात्म्यं** शिवप्रसादमाहात्म्यस्थलम् (७), चेति प्रसादिस्थलं **सप्तप्रकारकं** सप्तविधम् ॥ **महामुने** अगस्त्यमुने, **एतेषां** सप्तानां स्थलानामेतेषां **लक्षणं** स्वरूपं **कथयामि** निरूपयामि ॥४-५॥

१. अथ प्रसादिस्थलम् – (२५)

नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते ।
शिवस्य लिङ्गरूपस्य प्रसादादेव सिद्ध्यति ॥६॥

व्याख्या — शिवानुग्रहेण मनोनैर्मल्यं प्रसादिनः वैशिष्ट्यमित्याह – **नैर्मल्यम् इति । मनसः** चित्तस्य **नैर्मल्यं** निर्मलभावः, स एव लिङ्गं चिह्नं विशेषद्योतकं **प्रसाद इति** प्रसादः इति **कथ्यते** उच्यते ॥ एषः प्रसादः **लिङ्गरूपस्य** लिङ्गं रूपं यस्य सः लिङ्गरूपः, तस्य, **शिवस्य** परमात्मनः **प्रसादाद् एव** अनुग्रहादेव सिद्ध्यति ॥ तदुक्तम् – "चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् । प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमक्षयमश्नुते ॥" (मै.उ.,१.६) इति । मन एव संसारः । तत्संस्कारेण संसारभावनिर्मुक्तिः । तदा तत् शिवमयं भवति । यथा विषयेषु मनसः समासक्तिस्तथा यदि ब्रह्मणि तस्य समासक्तिः साध्यते, तदा तस्य नैर्मल्यं जायते । मनोनैर्मल्येन प्रसादीति उक्तमेव । एतदुक्तं भवति – "चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् । यच्चित्तस्तन्मयो भवति गुह्यमेतत्सनातनम् ॥ ..... समासक्तं यदा चित्तं जन्तोविषयगोचरम् । यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बन्धनात् ॥" (मै. उ., १.५, ७) इति । "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" (ब्रह्म. बिं. उ., २) इति तु प्रसिद्धमेव । अतः सर्वाणीन्द्रियाणि संयम्य तन्मयीभावेनेष्टलिङ्गात्मकशिवपूजनेन शिवानुग्रहप्राप्त्या मनोनैर्मल्यं साध्यते । सर्वेन्द्रियसंयमनं च कठश्रुतौ सम्यगुक्तम्– "यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥" (कठ. उ., ३.६) इति । तादृशः प्रसादिस्थलस्थः पुरुषः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परमं पदं प्राप्तुं योग्यो भवति । तथैवोक्तं कठे – "विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥" (कठ. उ., ३.९) इति ॥६॥

शिवप्रसादं यद्द्रव्यं शिवाय विनिवेदितम् ।
निर्माल्यं तत्तु विज्ञेयं मनोनैर्मल्यकारणम् ॥७॥

व्याख्या — शिवप्रसाद एव मनोनैर्मल्यहेतुरित्याह – **शिवप्रसादम्** इति । **शिवाय** परमात्मने परशिवाय **विनिवेदितं** समर्पितं **यत् द्रव्यं** यः पदार्थः **तत्** स पदार्थः शिवप्रसादः, **तत् तु** तदेव द्रव्यं तावत् **मनोनैर्मल्यकारणं** मनसः प्रसन्नताहेतुभूतं **निर्माल्यम्** इति सानुग्रहप्राप्तार्पितशेषभूतम् इति **विज्ञेयम्** बोध्यम् । अत्र द्रव्यशब्देन सुखप्रदायकाः पोषकाश्च सर्वे पदार्था गृह्यन्ते । फलं पुष्पं खाद्यं पेयं च यद्यद् द्रव्यमस्ति तत्तद् इष्टलिङ्गे समर्प्य प्रसादरूपेण स्वीक्रियते चेत् तत् मनोनैर्मल्यकारणं भवति । मनोनैर्मल्यं नाम काचन प्रसन्नतामयी मानसी स्थितिः ॥७॥

मनःप्रसादसिद्ध्यर्थः निर्मलज्ञानकारणम् ।
शिवप्रसादं स्वीकुर्वन् प्रसादीत्येष कथ्यते ॥८॥

व्याख्या — शिवप्रसादस्वीकारशीलः प्रसादीत्याह – **मनःप्रसादेति** । **निर्मलज्ञानकारणं** निर्मलं ज्ञानं परिशुद्धं ज्ञानं, तस्य कारणम्, **शिवप्रसादं** शिवस्यानुग्रहप्राप्तार्पितशेषं **मनःप्रसादसिद्ध्यर्थं** मनसः प्रसादः मनःप्रसादः तस्य सिद्ध्यर्थं तस्य प्राप्तये, **स्वीकुर्वन्** अङ्गीकुर्वन् **एषः** अयं महोदयः **प्रसादी इति** प्रसाद्याख्य इति **कथ्यते** उच्यते ॥ अनेन गुरुलिङ्गजङ्गमानां प्रसादस्य पावित्र्यं प्रभावश्च प्रदर्श्यते ॥८॥

अन्नशुद्ध्या हि सर्वेषां तत्त्वशुद्धिरुदाहृता ।
विशुद्धमन्नजातं हि यच्छिवाय समर्पितम् ॥९॥

तदेव सर्वकालं तु भुञ्जानो लिङ्गतत्परः ।
मनःप्रसादमतुलं लभते ज्ञानकारणम् ॥१०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— पूर्वोक्तमेव विशदयति – **अन्नशुद्ध्या इत्यादिना युग्मेन।** **अन्नशुद्ध्या हि** आहारशुद्ध्या खलु **सर्वेषां** सकलानां कृते **तत्त्वशुद्धिः** शरीरम्, इन्द्रियाणि, विविधप्रदेशात्मकप्रपञ्चश्चेति तत्त्वानां शुद्धिः **उदाहृता** कथिता, शास्त्रज्ञैरिति शेषः । **यत् शिवाय समर्पितं** यत् इष्टलिङ्गात्मकाय शिवाय निवेदितं **विशुद्धं** विशेषेण शुद्धिमत् **अन्नजातं हि** आहारराशिभूतम् अस्ति **तद् एव** तदाहारजातमेव **लिङ्गतत्परः** इष्टलिङ्गनिष्ठः **सर्वकालं** सर्वदा **भुञ्जानः** स्वीकुर्वन् **ज्ञानकारणं** ज्ञानस्य हेतुभूतं **अतुलं** न विद्यते तुला यस्य सः अतुलः, तम्, अनुपमम्, **मनःप्रसादं** मनोनैर्मल्यम् **लभते** प्राप्नोति ॥ छान्दोग्यश्रुतिराह – "आहार-शुद्धौ तत्त्वशुद्धिः तत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः।" (छां.उ., ७.२६.२) इति । तत्त्वशब्देनात्र षट्त्रिंशत्तत्वानि तैर्घटितं जगत् संक्षिप्तजगद्रूपास्मदादि शरीरेन्द्रियाणि च गृह्यन्ते ॥ गुरुलिङ्गजङ्गमानुग्रह-रूपप्रसादान्नस्य सर्वदा भोजनेन शिवज्ञानहेतुभूतमनःप्रसादसिद्धिः प्रसादिनः, इत्युक्तं भवति । सर्वदा शिवभावजागृतचित्तत्वं हि मनोनैर्मल्येन जायते । तदेव प्रसादिनोऽवधानभक्तिरिति कथ्यते। अनेनाऽवधानेन प्रसादी भ्रमर-कीटन्यायेन शिवस्वरूपमेव प्राप्नोति ॥९-१०॥

आत्मभोगाय नियतं यद्यद्द्रव्यं समाहितम् ।
तत्तत् समर्प्य देवाय भुञ्जीयादात्मशुद्धये ॥११॥

व्याख्या — यद्यद् द्रव्यं स्वभोगाय समुपस्थितं तत्तत् शिवलिङ्गाय निवेद्य भुज्यते चेत् आत्मनैर्मल्यं जायते इत्याह – **आत्मभोगायेति ।** **आत्मभोगाय** आत्मभोगार्थं **नियतं** निश्चितं **यद्यद् द्रव्यं** यद्यद् वस्तु **समाहितं** समुपस्थितं **तत्तत्** तत्तत् सर्वं **आत्मशुद्धये** आत्मनैर्मल्यार्थं **देवाय** शिवलिङ्गात्मकाय देवाय शङ्कराय **समर्प्य** निवेद्य **भुञ्जीयात्** स्वीकुर्यात् ॥ अत्र शिवलिङ्गाय निवेद्य इत्युक्तम् । प्रसादिस्थले उपासनीयम् इष्टलिङ्गं शिवलिङ्गात्मकम्, यथा भक्तस्थले उपास्यमानम् आचारलिङ्गं माहेश्वर-स्थले च उपास्यमानं गुरुलिङ्गं चेति वीरशैव सम्प्रदाये प्रसिद्धमेव ॥११॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नित्यसिद्धेन देवेन भिषजा जन्मरोगिणाम् ।
यद्यत् प्रसादितं भुक्त्वा तत्तज्जन्मरसायनम् ॥१२॥

व्याख्या— संसाररोगवतां शिव एव वैद्यः इत्याह – **नित्यसिद्धेनेति** । **जन्मरोगिणां** जन्म एव रोगः येषां ते जन्मरोगिणः, तेषाम्, जननमरणात्मकसंसाररोगवतां **भिषजा** वैद्यभूतेन **नित्यसिद्धेन** नित्यं सिद्धेन, इष्टलिङ्गे सर्वदा स्थितेन, **देवेन** शङ्करेण **यद्यत्** यद्यद् द्रव्यं **भुक्त्वा** स्वीकृत्य **प्रसादितं** प्रसादरूपेण अनुगृहीतं **तत्तत्** तत्तत् सर्वं **जन्मरसायनं** जन्मरूपव्याधिनाशकृदौषधम्, रसरक्तादयः ईयन्ते अनेन इति, रस ईङ् गतौ+न्युट्, "करणाधिकरणयोश्च" (पा. अ., ३.३.११७) इति ल्युट्, यु = अन – "युवोरनाकौ" (पा. अ., ७.१.१); रसायनम्, "रसायनो विहङ्गमे, पक्षीन्द्रे (गरुडे), रसायनं तु जराव्याधिजिदौषधे" इति हैमः ॥ शिव एव संसाररोगिणां वैद्यः, भवरोगवैद्यः, वैद्यानां वैद्यः । तदुक्तम् ऋग्वेदीये रुद्रसूक्ते एकस्मिन् – "भिषक्तमं त्वा भिषजां श्रृणोमि" (ऋ. २.३३.४) इति । तेनानुगृहीतः प्रसाद एव जरामृत्युरोगस्य निवारकम् औषधम् ॥१२॥

आरोग्यकारणं पुंसामन्तःकरणशुद्धिदम् ।
तापत्रयमहारोग – समुद्धरणभेषजम् ॥१३॥

विद्यावैशद्यकारणं विनिपातविघातनम् ।
द्वारं ज्ञानावतारस्य मोहच्छेदस्य कारणम् ॥१४॥

वैराग्यसम्पदो मूलं महानन्दप्रवर्धनम् ।
दुर्लभं पापचित्तानां सुलभं शुद्धकर्मणाम् ॥१५॥

आदृतं ब्रह्मविष्ण्वाद्यैर्वसिष्ठाद्यैश्च तापसैः ।
शिवस्वीकृतमन्नाद्यं स्वीकार्यं सिद्धिकाङ्क्षिभिः ॥१६॥

व्याख्या — शिवप्रसादस्य बहुविधफलत्वमाह – **आरोग्यकारण**-**मित्यादिना कालापकेन** (**श्लोकचतुष्टयेन**) । **शिवस्वीकृतम् अन्नाद्यं** (१६)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवेन स्वीकृतं शिवभुक्तशेषम् अन्नतोयादिकं, शिवप्रसादभूतमन्नाद्यं **पुंसां** भक्तानाम् **आरोग्यकारणम्** आरोग्यस्य हेतुभूतम्, **अन्तःकरणशुद्धिदम्** अन्तरिन्द्रियाणां शुद्धिप्रदम्, **तापत्रयमहारोगसमुद्धरणभेषजम्** आध्यात्मिकादितापत्रयस्वरूपात् महारोगात् घोरव्याधितः समुद्धरणार्थम् उद्धर्तुं समर्थम् औषधम्, **विद्यावैषद्यकारणं** ज्ञानविशदीकरणहेतुभूतम्, **विनिपातनिघातनं** विनिपातस्य विपत्तेः निघातनं मारणसमर्थम्, **ज्ञानावतारस्य** ज्ञानोद्भवस्य **द्वारं** निर्गमविवरम्, **मोहच्छेदस्य** मोहकर्तनस्य **कारणं** हेतुभूतम्, **वैराग्यसम्पदः** वैराग्यम् एव सम्पत्, तस्याः, **मूलं** मूलकारणम्, **महानन्दप्रवर्धनं** महानन्दं परमानन्दं प्रवर्धयति विस्तारयति पोषयति चेति महानन्दप्रवर्धनम्, **पापचित्तानां** पापोपचितमनसां **दुर्लभं** लब्धुं कष्टम्, **शुद्धकर्मणां** पुण्यकर्माविष्टचेतसां च **सुलभं** लब्धुं सरलम्, **ब्रह्मविष्ण्वाद्यैः** ब्रह्मविष्णुवरुणेन्द्रमरुदादिभिः देवैः, **वसिष्ठाद्यैः तापसैश्च** वसिष्ठादिभिः तपोनिष्ठैश्च **आदृतम्** आदरेण स्वीकृतम् च । **तत्** तत्प्रसादभूतमन्नाद्यं **सिद्धिकाङ्क्षिभिः** सिद्धिप्रेप्सुभिः **सर्वैः स्वीकार्यम्** स्वीकर्तुं योग्यम् ॥ आरोग्यपूर्णं शरीरम् आरोग्यवन्मनश्च अध्यात्मज्ञानसिद्ध्यै पूर्वापेक्षिते स्तः । उभयमपि शिवलिङ्गप्रसादस्वीकारेण सिद्ध्यते । सुविद्यावैशद्यं पुनः तृतीयं कारणम् । शिवप्रसादस्वीकारेणैव तदपि प्राप्यते । महतापि तपसा चान्द्रायणादिक्लेशमयव्रतेन वा न शक्यते भ्रान्तिर्निवारयितुम् । वैराग्यसम्पदपि सर्वमहती, भयजनकत्वाभावाद् अनपहरणीयत्वाच्च । तदपि शिवलिङ्गप्रसादेनैव लभ्यते । शिवप्रसादस्तावद् अनितरसाधारणमूल्यवान्, साधकानां सर्वाभीष्टप्रदत्वात् । चन्द्रज्ञानोत्तरे शिवप्रसादमाहात्म्यमुक्तम् – "समर्पितः प्रसादैककारणत्वान्महेशितुः । प्रसादत्वेन विख्यातः परमानन्ददायकः ॥ ऋतं सत्यं परं ब्रह्मामृतमित्यपि गीयते । प्रसादस्तस्य महिमा केन वा वर्ण्यते कथम् ॥" (क्रि. पा., ५.३३-३४) इति ॥१३-१६॥

पत्रं पुष्पं फलं तोयं यच्छिवाय निवेदितम् ।
तत्तत्स्वीकारयोगेन सर्वपापक्षयो भवेत् ॥१७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — शिवप्रसादस्य सर्वपापक्षयत्वमाह – **पत्रम् इति । यत्** यद्यत् द्रव्यं **शिवाय निवेदितं** शिवाय समर्पितं **पत्रं** बिल्वादिपत्रम्, **पुष्पं** कमलादि कुसुमम्, **फलम्** आम्रादिफलम्, **तोयं** जलं वा **तत्तत्स्वीकार-योगेन** तस्य तस्य निवेदितस्य पत्राद्यस्य स्वीकारसम्बन्धेन **सर्वपापक्षयः** सर्वेषां पापानां क्षयः, सर्वपातकविध्वंसः **भवेत्** स्यात् ॥ न किमपि द्रव्यं शिवाय अनिवेद्य स्वीकार्यमिति भावः । तदुक्तम् – "पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम् । असमर्प्य न भुञ्जीत भगवन्तं सदाशिवम् ॥" (चं. आ., क्रि. पा., ५.२४) इति ॥१७॥

यथा शिवप्रसादान्नं स्वीकार्यं लिङ्गतत्परैः ।
तथा गुरोः प्रसादान्नं तथैव शिवयोगिनाम् ॥१८॥

व्याख्या — यथा शिवस्य तथा गुरुजङ्गमयोश्च प्रसादः स्वीकार्यः इत्युक्त्वा प्रसादिस्थलं समापयति – **यथा इति । यथा** येन प्रकारेण **लिङ्गतत्परैः** लिङ्गपूजापरायणैः **शिवप्रसादान्नं** इष्टलिङ्गप्रसादभूतम् अन्नं खाद्यं **तथा एव** तेन प्रकारेणैव **गुरोः** आचार्यस्य दीक्षानुग्रहीतुः, **शिवयोगिनां** जङ्गमानां च **प्रसादान्नं** भुक्तशेषभूतम् अन्नाद्यं स्वीकार्यम् ॥ अत्र चन्द्रज्ञानागमोत्तरवचनं द्रष्टव्यम् – "गुरूच्छिष्टं पुरोडाशं चरस्यापि विशेषतः । चरगुर्वोः प्रसादस्तु ध्रुवं पावित्र्यादायकः ॥" (क्रि. पा., ५.३५) इति ॥१८॥

– इति प्रसादिस्थलम् –

२. अथ गुरुमाहात्म्यस्थलम् – (२६)

गुरुरेवात्र सर्वेषां कारणं सिद्धिकर्मणाम् ।
गुरुरूपो महादेवो यतः साक्षादुपस्थितः ॥१९॥

व्याख्या— प्रसादिना ज्ञेयं गुरुमाहात्म्यस्थलम् उक्तम् – **गुरुरेवेति। गुरुरेव** आचार्यः एव **सर्वेषां सिद्धिकर्मणां** सकलानां सिद्ध्यर्थं क्रिय-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

माणानां कर्मणां **कारणम्** हेतुभूतम् । **यतः** यस्मात् कारणात् **महादेवः** महेश्वरः **गुरुरूपः** गुरुस्वरूपः **साक्षादुपस्थितः** प्रत्यक्षरूपेण समुपागतः, तस्मात् (गुरुः केवलं सिद्धीनां हेतुभूतः) ॥ तदुक्तम् – "मोक्षस्य दीक्षासंप्राप्त्यै गुरुः स्यान्मूलकारणम् । न विना गुरुणा सिद्ध्यै साधनानि भवन्त्यलम् ॥" (चं. आ., क्रि. पा., २.५) इति ॥ सिद्धिद्वयमपेक्षितम् – इहलोके समर्पितभुक्तिः पश्चाद् अध्यात्मानुग्रहरूपा मुक्तिश्च । उभयमपि गुरुणाऽनुगृह्यते इति गुरुः साक्षादेव सदाशिवः ॥१९॥

निष्कलो हि महादेवो नित्यज्ञानमहोदधिः ।
सकलो गुरुरूपेण सर्वानुग्राहको भवेत् ॥२०॥

व्याख्या — निष्कलो शिवः सकलो गुरुर्भूत्वा सर्वान् अनुगृह्णातीत्याह – **निष्कल इति । नित्यज्ञानमहोदधिः** नित्यज्ञानस्य महासमुद्रो **महादेवः** महेश्वरः शिवः **निष्कलः** निरवयवः **हि** इति प्रसिद्धम् । स एव **गुरुरूपेण** गुरुस्वरूपेण **सकलो** सावयवो भूत्वा **सर्वानुग्राहकः** सर्वान् अनुगृह्णाति इति, "ण्वुल्तृचौ" (पा. ३.१.१३३) इति ण्वुल् (वु) – "युवोरनाकौ" (पा. ७.१.१) इति अकः, सर्वानुग्रहकारकः इत्यर्थः, **भवेत्** स्यात् ॥ निराकारः शिवः गुरुरूपेण साकारो भूत्वा सर्वान् अनुगृह्णातीत्यर्थः ॥२०॥

यः शिवः स गुरुर्ज्ञेयः यो गुरुः स शिवः स्मृतः ।
न तयोरन्तरं कुर्याद् ज्ञानावाप्त्यै महामतिः ॥२१॥

व्याख्या — शिवगुर्वोर्भेदं न कुर्यादित्याह – **य इति । यः शिवः** यः परमात्मा शिवः, **स गुरुः** स एव गुरुः इति **ज्ञेयः** ज्ञातव्यः, **यो गुरुः** यो दीक्षाप्रदो गुरुः **स शिवः** स एव परमात्मा शिवः इति **स्मृतः** ज्ञातः । **महामतिः** महती मतिः यस्य सः, महाज्ञानसम्पन्नः प्रसादी **ज्ञानावाप्त्यै** ज्ञानावाप्त्यर्थं **तयोरन्तरं** तयोः शिवगुर्वोः अन्तरं भेदं **न कुर्यात्** न कुर्वीत ॥ 'ज्ञानावाप्त्यै' इत्यस्य 'ज्ञानावाप्तौ' 'ज्ञानावाप्तो' इति पाठान्तरद्वयं दृश्यते । 'ज्ञानावाप्तौ' इति पाठे ज्ञानावाप्तिविषये इति विषयसप्तमी ज्ञेया । 'ज्ञानावाप्तो' इति पाठे 'महामतिः' इत्यस्य विशेषणत्वेन ज्ञेयः । अस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्लोकस्य विषयः – "यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः। गुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥ यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः। शिवविद्यागुरूणां च पूजया सदृशं फलम् ॥" (चं. आ., क्रि.पा.,२.७-८) – इत्यस्य संवादी भवति। एवमेव शिवगुर्वोर्भेदम् अकृत्वा उभयोरप्याज्ञां पालयेदिति कारणागमोत्तरे उक्तम् – "गुरुर्यतोऽहं देवेशि नावयोर्विद्यते भिदा । अभेदभावनां ज्ञात्वा तदाज्ञां परिपालयेत् ॥" (क्रि. पा., ५.१५) इति । सूक्ष्मागमोत्तरेऽपीममेवाभेदमाह – "गुरुरेव महादेवः साक्षात् सर्वजगत्प्रभुः । अन्यथा तं न जानीयात् परतत्त्वाव-बोधकम् ॥ अहमेव गुरुर्भूत्वा दीक्षाशिक्षाविधानतः । भक्तान् मदेक-शरणांस्तारयामि भवाम्बुधेः ॥ गुरुरूपं समाश्रित्य सोऽहमेव महेश्वरि । गृह्णामि तत्कृतां पूजां यतस्ते मामुपाश्रिताः ॥" (क्रि. पा., ५.१०-१२) इति। "गुरुदैवतयोरेकरूपं प्रत्ययवान् भवेत् ।" इति पारमेश्वरेऽप्युक्तम् (१४.६६) ॥२१॥

हस्तपादादिसाम्येन नेतरैः सदृशं वदेत् ।
आचार्यं ज्ञानदं शुद्धं शिवरूपतया स्थितम् ॥२२॥

व्याख्या — आकारसादृश्येऽपि गुरुरनितरसाधारण इत्याह – **हस्त-पादादिसाम्येन इति । ज्ञानदं** ज्ञानं ददाति इति ज्ञानदः, ज्ञानप्रदः, तम्, **शुद्धं** निर्मलान्तःकरणं **शिवरूपतया स्थितं** शिवस्वरूपेण तिष्ठन्तम् **आचार्यं** श्रीगुरुं **हस्तपादादिसाम्येन** करचरणादिसादृश्येन **इतरैः** अन्यजनैः सह **सदृशं** समानम् इति **न वदेत्** न कथयेत् ॥ शिवसदृशं गुरुं प्राकृतजनैः सदृशमिति न कदापि वदेत् ॥२२॥

आचार्यस्यावमानेन श्रेयःप्राप्तिर्विहन्यते ।
तस्मान्निःश्रेयसप्राप्त्यै पूजयेत्तं समाहितः ॥२३॥

व्याख्या — आचार्यावमानेन श्रेयोहानिरित्याह – **आचार्यस्येति । आचार्यस्य** श्रीगुरोः **अवमानेन** अवमत्या अवज्ञया इत्यर्थः, **श्रेयःप्राप्तिः** श्रेयसः प्राप्तिः, मुक्तिफलं **विहन्यते** विनष्टो भवति । **तस्मात्** तस्मात्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कारणात् **निःश्रेयसप्राप्त्यै** पुण्यफललाभाय **तम्** आचार्यं तं **समाहितः** तन्मयीभावयुक्तः सन् **पूजयेद्** अर्चयेत् ॥ अत्र श्रेयस्-शब्देन मुक्तिरूपं परमहितं ग्राह्यम् । प्रियकरं यत्तत् प्रेयशब्देन कथ्यते । श्रेयश्च प्रेयश्च मनुष्यस्य पुरतः तिष्ठतः । विवेकी धीमान् श्रेयः आददाति, केवलसुखार्थी मूढः प्रेय आददाति । तदुक्तम् – "श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽपि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ।" (कठ. उ., २.२) इति ॥२३॥

गुरुभक्तिविहीनस्य शिवभक्तिर्न जायते ।
ततः शिवे यथा भक्तिस्तथा भक्तिर्गुरावपि ॥२४॥

व्याख्या — शिवगुर्वोर्भक्तिसाम्यं संसूच्य गुरुमाहात्म्यस्थलमुपसंहरति – **गुरुभक्तिविहीनस्येति । गुरुभक्तिविहीनस्य** गुरुभक्तिरहितस्य **शिवभक्तिः** शैवी भक्तिः **न जायते** न संभवति । **ततः** तस्मात् **यथा** यया रीत्या **शिवे भक्तिः** शङ्करे भक्तिः **तथा** तयैव रीत्या **गुरौ** अपि आचार्येऽपि भक्तिः, स्यात् ॥ अत्र श्वेताश्वतरश्रुत्युक्तम् अर्थं समुपस्थापितम् । तथा हि – "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।" (श्वे. उ., ६.२३) इति । पारमेश्वरेऽप्युक्तम् – "गुरुभक्तिविहीनस्य समस्ता निष्फलाः क्रियाः । अनुष्ठिता अपि तथा स्वैरिणीव्रतवच्छिवे ॥" (१४.८३) इति ॥ गुरोः माहात्म्यं बहुधा वर्ण्यते । तथा हि –

(१) "सूर्योदये तमो यद्वद् विनाशमुपयाति हि । गुरुदर्शनतस्तद्वत् पापजालं प्रणश्यति ॥ संसारदावदहनज्वाला येन विनाशिता । कटाक्षामृतवर्षेण को हि तत्सदृशो भवेत् ॥ तस्मान्मुमुक्षुः सेवेत गुरुमेवातिभक्तितः । स एव वन्दनीयश्च सर्वदा न हि संशयः ॥ अन्धो यथाऽर्थजातं च द्रष्टुं समभिकाङ्क्षति । गुरुं विना तथा मुक्तिं प्राप्तुमिच्छति मूढधीः ॥" (सू. आ., उ. भा., क्रि. पा., ५.२३-२६) इति ।

(२) "देशिकस्य प्रसादेन येन लब्धमिदं व्रतम् । न तं मायाऽनुबध्नाति न स भूयोऽभिजायते । गुरुबोधाग्निना दग्धा यस्य पाशा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ह्यशेषतः । तस्य निर्दग्धबन्धस्य पुनर्बन्धः कथं भवेत् । गुरुकारुण्य-पीयूषरसास्वादविनोदिनः । अमृतस्यास्य निकटं कथं मृत्युः प्रयास्यति ॥'' (का.आ., उ.भा., क्रि.पा., १.१३७-१३९) इति च ॥२४॥

– इति गुरुमाहात्म्यस्थलम् –

३. अथ लिङ्गमाहात्म्यस्थलम् – (२७)

गुरुमाहात्म्ययोगेन निजज्ञानातिरेकतः ।
लिङ्गस्यापि च माहात्म्यं सर्वोत्कृष्टं विभाव्यते ॥२५॥

व्याख्या — गुरुमाहात्म्येन लिङ्गमाहात्म्यमपि सिद्धमित्याह – **गुरु-माहात्म्ययोगेनेति । गुरुमाहात्म्ययोगेन** गुरुमाहात्म्यज्ञानसम्बन्धेन **निज-ज्ञानातिरेकतः** स्वीयज्ञानाधिक्यात्, पञ्चम्यास्तसिल्, **लिङ्गस्यापि च** इष्टलिङ्गस्यापि च माहात्म्यं महिमाशालित्वं **सर्वोत्कृष्टं** सर्वस्माद् उत्कृष्टं यथा भवति तथेति क्रियाविशेषणम्, सर्वाधिक्यतया इत्यर्थः, **विभाव्यते** विशेषेण भाव्यते, विशेषेण ज्ञायते ॥ पूर्वस्मिंस्थले गुरुमाहात्म्यं निरू-पितम् । श्रीगुरुं विहाय न केनाप्यनाद्यविद्याविध्वंसः शक्यते कर्तुम्। विश्वासेनानेन प्रसादिस्थलस्थो भक्तः गुरुसेवां करोति । गुरुस्तस्मै लिङ्गमाहात्म्यज्ञानं ददाति । दीक्षासंस्काराद् आरभ्य प्रसादिस्थलपर्यन्तं क्रमेण लिङ्गसंस्कृतिर्वर्धते । तेन लिङ्गमाहात्म्यबुद्धिर्दृढा भवति । तच्च मोक्षाय कल्पते । तदुक्तम् – ''दीक्षासंस्कृतिसंशुद्धे चित्ते जन्तोः सम-र्पितम् । लिङ्गाङ्गसामरस्याख्यं मन्निष्ठागोपितं परम् । भक्तिसिक्तं मम ज्ञानं मोक्षाय भवति ध्रुवम् ॥'' (का.आ., क्रि.पा., २.९) इति ॥२५॥

शिवस्य बोधलिङ्गं यद् गुरुबोधितचेतसा ।
तदेव लिङ्गं विज्ञेयं शाङ्करं सर्वकारणम् ॥२६॥

व्याख्या — लिङ्गस्वरूपं किमित्यत्राह – **शिवस्येति । शिवस्य** शम्भोः **यद् बोधलिङ्गं** चित्कलायुक्तेष्टलिङ्गं यदस्ति **तदेव लिङ्गं** तदेवेशलिङ्गं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वकारणं सर्वेषां कारणानां कारणं **शाङ्करं लिङ्गं** शैवं लिङ्गम् इति **गुरुबोधितचेतसा** गुरुणा बोधितेन चेतसा, गुरुदत्तज्ञानयुक्तेन चित्तेन **विज्ञेयं** विशेषेण ज्ञातुं योग्यम् ॥ गुरुणैव ज्ञापितं तल्लिङ्गमिति भावः। गुरुकारुण्यवशादेव परमं शिवज्ञानं प्राप्यते। इदं च ज्ञानं भक्तस्य हृदयालये लिङ्गस्वरूपं धत्ते। इदमेव चिल्लिङ्गम् अध्यात्मप्रज्ञास्वरूपभूतम् ॥२६॥

परं पवित्रममलं लिङ्गं ब्रह्म सनातनम्।
शिवाभिधानं चिन्मात्रं सदानन्दं निरङ्कुशम् ॥२७॥

कारणं सर्वलोकानां वेदानामपि कारणम्।
पूरणं सर्वतत्त्वस्य तारणं जन्मवारिधेः ॥२८॥

ज्योतिर्मयमनिर्देश्यं योगिनामात्मनि स्थितम्
कथं विज्ञायते लोके महागुरुदयां विना ॥२९॥

व्याख्या— पुनस्तल्लिङ्गं कीदृशमित्यत्राह — **परमित्यादिना विशेषकेन (श्लोकत्रयेण)**। **परं** परमं सर्वोत्कृष्टं **पवित्रं** पावनम् **अमलं** निर्मलं मलसंपर्करहितमित्यर्थः, **शिवाभिधानं** शिव इत्यभिधानवान्, शिवनामानम्, **चिन्मात्रं** शुद्धचिद्रूपं **सदानन्दं** सर्वदा आनन्दस्वरूपं **निरङ्कुशं** नियन्त्रणरहितं **सर्वलोकानां कारणं** सकललोकानां सृष्टिस्थितिलयकारणं **वेदानामपि कारणं** वेदानाम् अपि मूलं **सर्वतत्त्वस्य पूरणं** सर्वतत्त्वमयस्य विश्वस्य चराचरात्मकस्य प्रेरकत्वेन पूरयतीति पूरणम् **जन्मवारिधेः तारणं** संसारसमुद्रस्य तारणं तारयतीति **ज्योतिर्मयं** प्रकाशमयम् **अनिर्देश्यं** निर्देष्टुमशक्यं **योगिनामात्मनि स्थितं** योगिनाम् आत्मनि निवसन्तं **सनातनं ब्रह्म लिङ्गं** पुरातनं परशिवाख्यं ब्रह्मलिङ्गं **लोके** प्रपञ्चे **महागुरुदयां विना** महागुरोः कृपां विना कथं विज्ञायते? केनापि प्रकारेणान्येन ज्ञातुं न शक्यते ॥ अत्र लिङ्गस्य महत्त्वं साभिप्रायैर्विशेषणैः प्रकटीकृतम्। तथा हि — (१) **परम्**— परमं तत्त्वम्, "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥"

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(कठ. उ., ३.१०-११) इत्युक्तरीत्या इन्द्रियादारभ्य प्रकृतिपर्यन्तं यानि तत्त्वानि भवन्ति तेषु पूर्वस्मात् पूर्वस्मात् परं परमधिकम् ; महालिङ्गात्मकं परशिवाख्यं काष्ठाधिरूढं तत्त्वम्। (२) **पवित्रम्**— "पवित्रं ते विततं ब्रह्मणस्पते" (ऋ.९.८३.१) इत्युक्तरीत्या परमपावनम्। (३) **अमलम्** आणवमलम्, मायीयमलम्, कार्मिकमलं चेति मलत्रयदूरम्। (४) **शिवाभिधानं** मङ्गलकरत्वात् शिवनामानम्। (५) **चिन्मात्रं** चिदेकस्वरूपम्, "चिद्रूपं हि परं तत्त्वम्" (सि. शि., ६.३२)। (६) **सदानन्दम्** अपरिमितानन्दस्वरूपम्, "आनन्दं ब्रह्मेति व्यजानात्" (तै. उ., ३.६)। (७) **निरङ्कुशं** कालकर्ममायादिनियन्त्रणरहितम्। (८) **सर्वलोकानां कारणं** सर्वलोकानां सृष्ट्यादिकारणम् ; "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व। तद्ब्रह्म।" (तै. उ., ३.१)। (९) **वेदानां कारणं** वेदानां कारणभूतम्, "अस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वेदो सामवेदोऽथर्वाङ्गिरसः।" (बृ.उ., २.४.१०)। (१०) **सर्वतत्त्वस्य पूरणं** षट्त्रिंशत्-तत्वानि सृष्ट्वा, प्रपञ्चभूतानि तानि प्रविशति स्म। तदुक्तम् – "तत्सृष्ट्वा तदेवानुप्राविशत्।" (तै.उ.,२.६) इति। (११) **जन्मवारिधेः तारणं** संसारवारिनिधेः तारणम्, मोक्षदायकमित्यर्थः, तदुक्तम् – "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते॥" (कठ. उ., ३.१५) इति। "तमेव विदित्वाऽतिमृत्युमेति" (श्वे. उ., ३.८) इति च। (१२) **ज्योतिर्मयं** प्रकाशमयम्, उक्तं च – "तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।" (कठ. उ., ६.९) इति। (१३) **अनिर्देश्यं** तद् इदं चेति निर्देष्टुमशक्यम्, "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।" "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।" (कठ.उ.,६.९;६.१२) इत्युक्तम्। (१४) **योगिनाम् आत्मनि स्थितं** योगिनस्तं मनसा परिपश्यन्ति योगेन ॥२७-२९॥

ब्रह्मणा विष्णुना पूर्वं यल्लिङ्गं ज्योतिरात्मकम्।
अपरिच्छेद्यमभवत् केन वा परिचोद्यते ॥३०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— ब्रह्मविष्ण्वादीनां सर्वज्ञत्वेऽपि लिङ्गस्वरूपपरिज्ञानं नास्तीत्याह – **ब्रह्मणा इत्यादिना** । पूर्वं पुरा **यत् ज्योतिरात्मकं** यत् ज्योतिस्वरूपं **लिङ्गं** शैवं लिङ्गं **ब्रह्मणा** सृष्टिकर्त्रा प्रजापतिना **विष्णुना** स्थितिकर्त्रा उपेन्द्रेण **अपरिच्छेद्यं** ज्ञातुमशक्यम् **अभवत्** आसीत् । **केन वा परिचोद्यते** केन वान्येन किञ्चिज्ज्ञेन ज्ञातुं शक्यते ॥ न केनापि ज्ञातुं शक्यते इत्यर्थः ॥ ब्रह्मविष्णुभ्यामपि परशिवलिङ्गस्य आद्यन्तपरिच्छेदः नाऽभवत् । लिङ्गपुराणोक्तकथानुसारं (अध्याय १७) विष्णुः वराहस्वरूपं धृत्वा परशिवलिङ्गस्य अधस्तात् मूलम् अन्वेष्टुं पाताललोकं जगाम । ब्रह्मा तु तल्लिङ्गस्य ऊर्ध्वशिरो द्रष्टुं गृध्रस्वरूपं धारयन् अन्तरिक्षलोकं उदगच्छत् । उभयेऽपि स्वस्वप्रयत्नयोर्वैफल्यमेव अन्वभूताम् ॥ अनेन परशिवलिङ्गस्य आद्यन्तपरिच्छेदो न केनापि शक्यते ज्ञातुम् इति ज्ञायते । परन्तु गुर्वनुग्रहेणेष्टलिङ्गे दृष्टियोगेन अन्तर्भूते चित्ते ज्ञातुं शक्यते इति भावः । बसवेश्वरस्य कन्नडवचने एकस्मिन् इदमेव सूचितम् । तथाहि – "जगदगल मुगिलगल मिगेयगल निम्मगल; पातालदिन्दत्तत्त निम्म श्रीचरण, ब्रह्माण्डदिन्दत्तत्त निम्म श्रीमुकुट; अप्रमाण अगम्य अगोचर, अप्रतिम लिङ्गवे कूडलसङ्गमदेवा! नीवेन्न करस्थलक्के बन्दु चुळकादिरय्या ।" (बसवण्णनवर वचनसम्पुट, कन्नड पुस्तक प्राधिकार, बेंगलूरु, व. सं. ७४४) – "जगद्विशाला नभोविस्तारा नभोविस्तारादप्यतीता च भवद्विशालता; पातालादधस्ताद् भवतः श्रीचरणौ; ब्रह्माण्डादप्यतीतं भवतः श्रीशिरः; प्रमातुमशक्यः अगम्यः अगोचरश्च भवान्; हे अप्रतिमलिङ्गरूप कूडलसङ्गमदेव ! मम करस्थलं प्राप्य कारावासतां गतः ।" (चुळुकः = चुलुकः = कारावासः) ॥ अपरिमितमहालिङ्गं शिवदीक्षासम्पन्नस्य करस्थले इष्टलिङ्गरूपेण परिच्छिन्नो बभूव इति बसवेश्वरस्याभिप्रायः ॥३०॥

बहुनात्र किमुक्तेन लिङ्गं ब्रह्म सनातनम् ।
योगिनो यत्र लीयन्ते मुक्तपाशनिबन्धनाः ॥३१॥

व्याख्या— ब्रह्मविष्णुभ्यामप्यगम्यस्य लिङ्गस्य स्वरूपमाह– **बहुनेति**। **अत्र** अस्मिन् सन्दर्भे (विषये) **बहुना उक्तेन** विस्तरेण कथनेन किं किं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रयोजनम् ? **लिङ्गम्** इदं लिङ्गं **सनातनं ब्रह्म** अनाद्यनन्तं ब्रह्म, **यत्र** यस्मिन् **योगिनः** समाधिनिष्ठाः महायोगिनः **मुक्तपाशनिबन्धनाः** पाशानां निबन्धनं बन्धनं पाशनिबन्धनम्, मुक्तं पाशनिबन्धनं येषां ते, तादृशाः सन्तः, **लीयन्ते** तादात्म्यभावं भजन्ते ॥ ''तस्माल्लिङ्गं परं ब्रह्म'' (सू.आ., क्रि.पा., ६.११), ''ऋतं सत्यं परं ब्रह्म'' (चं. आ., क्रि. पा., ३.२१), ''तद् ब्रह्म लिङ्गसंज्ञकम्'' (तत्रैव, क्रि.पा.,३.८), इत्यादि शिवागमप्रमाणम् ॥३१॥

पीठिका परमा शक्तिर्लिङ्गं साक्षात्परः शिवः ।
शिवशक्तिसमायोगं विश्वं लिङ्गं तदुच्यते ॥३२॥

व्याख्या — शिवशक्तिसमावेशभूतं लिङ्गमेव विश्वमित्याह — **पीठिकेति । परमा शक्तिः** पराशक्तिः **पीठिका** पीठं **साक्षात् परः शिवः** स्वयं चिद्रूपः परशिवः **लिङ्गम्** लिङ्गस्वरूपः । एवं **शिवशक्तिसमायोगं** शिवश्च शक्तिश्च शिवशक्ती, शिवशक्त्यो समायोगः मेलनम्, शिव-शक्तिसमावेशभूतं **लिङ्गं** लिङ्गस्वरूपमेव **तत् विश्वम् उच्यते** तदेव जगदि-त्युच्यते ॥ अत्र ''नादरूपः शिवः साक्षाल्लिङ्गमित्यभिधीयते । तत्पीठिका महाशक्तिः सा च वै बिन्दुरूपिणी ॥ तयोः सम्मेलनाद्देवि कला तत्र प्रतिष्ठिता ॥'' (सू.आ., क्रि.पा., ६.३) इति, ''बिन्दुनादात्मकं सर्वं जगत्स्थावरजङ्गमम् । बिन्दुः शक्तिः शिवो नादः शिवशक्त्यात्मकं जगत् ॥'' (चं.आ., क्रि.पा., ३.१२) इति च शिवागमप्रमाणद्वयम् ॥३२॥

ब्रह्मादयः सुराः सर्वे मुनयः शौनकादयः ।
शिवलिङ्गार्चनादेव स्वं स्वं पदमवाप्नुयुः ॥३३॥

व्याख्या — ब्रह्मादीनां स्वस्वपदप्राप्तिः शिवलिङ्गार्चनादेवेत्याह — **ब्रह्मादय इति । ब्रह्मादयः सुराः** ब्रह्मविष्ण्वादयो देवाः **शौनकादयः मुनयः** शौनकादयः महर्षयः **शिवलिङ्गार्चनादेव** लिङ्गरूपिणः परशिवस्य पूजनादेव **स्वं स्वं पदं** स्वीयं स्वीयं स्थानं **अवाप्नुयुः** प्राप्नुयुः ॥ अस्य विषयस्य समर्थनाय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मरितोण्टदार्यः ऋचमेकाम् उदाहरति – "तव श्रियै मरुतोऽमर्जयन्त रुद्र यत्ते जनिमं चारुचित्रम्। पदं यद्विष्णोरुपमं निधायि॥" (ऋ.५.३.३) इति। अस्यार्थः – हे रुद्र, मरुतः देवाः श्रियै विष्णोः स्थानम् उपमं दृष्टान्तं निधायि मनसि निधाय चारु मनोहरं चित्रं च विचित्रं च जनिमं जगदाविर्भावस्थान-भूतं लिङ्गम् अमर्जयन्त अर्चितवन्तः, इति। विष्णो पदं शिवलिङ्गार्चन-प्रभावेणैव प्राप्तमिति दृष्टान्तं मनसि निधाय सर्वे देवाः शिवलिङ्गं श्रियै पूजितवन्त इति भावः। इमामेव ऋचं 'इत्येषा शाश्वती श्रुतिः' इत्याख्याय तस्या भावमेव संगृह्यते पाराशरपुराणे – "रौद्रं लिङ्गं महाविष्णुर्भक्त्या शुद्धं शिलामयम्। चारुचित्रं समभ्यर्च्य लब्धवान् परमं पदम्॥ ब्रह्मा सर्वजगत्कर्ता यस्य लिङ्गार्चनेन तु। भारतीं प्राप्तवानाशु स पूज्यस्सर्वचेतनैः॥ यस्य लिङ्गं समभ्यर्च्य मरुतस्सकला अपि। लब्धवन्तः श्रियं पूर्णमित्येषा शाश्वती श्रुतिः॥" इति। एवमेव स्कान्दपुराणे – "ब्रह्मविष्ण्वादयो देवास्सर्वे ब्रह्मर्षयस्तथा। शिवलिङ्गेज्यया सम्यक् स्वस्वरूपमवाप्नुयुः॥" इत्युक्तम्। पद्मपुराणे अपि तथैवोक्तम् – "ब्रह्मणः सृष्टिकर्तृत्वं विष्णोर्दानवमर्दनम्। स्वर्गाधिपत्यमिन्द्रस्य शिवपूजाविधेः फलम्॥" इति ॥३३॥

विश्वाधिपत्वमीशस्य लिङ्गमूर्तेः स्वभावजम्।
अनन्यदेवसादृश्यं श्रुतिराह सनातनी ॥३४॥

व्याख्या — परशिवब्रह्मणः विश्वाधिपतित्वं सहजमित्याह – **विश्वाधिपत्वमिति**। **लिङ्गमूर्तेः** लिङ्गस्वरूपिणः **ईशस्य** परमेश्वरस्य **विश्वाधिपत्वम्** विश्वस्य जगतः अधिपतित्वं नियामकत्वं **स्वभावजं** स्वतःसिद्धम्, नान्यप्रभावसिद्धम् इत्यर्थः। तस्य **अनन्यदेवसादृश्यं** अन्यदेवेन सादृश्यं अन्यदेवसादृश्यम्, न अन्यदेवसादृश्यम्, **सनातनी श्रुतिः** अज्ञात-कालादागतवती श्रुतिः **आह** कथयति। सेयं सनातनी श्रुतिः – "विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्वम्।" इति, "न तत्समश्चाभ्यधिकश्च दृश्यते" इति च (श्वे. उ., ३.४; ६.८) ॥३४॥

– इति लिङ्गमाहात्म्यस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

४. अथ जङ्गममाहात्म्यस्थलम् – (२८)

गुरुशिष्यसमारूढलिङ्गमाहात्म्यसम्पदः ।
सर्वं चिद्रूपविज्ञानाज्जङ्गमाधिक्यमुच्यते ॥३५॥

व्याख्या — गुरुलिङ्गयोर्माहात्म्यमुक्त्वा ततः संवेद्यं जङ्गममाहात्म्यमपि निरूपयति – **गुरुशिष्येत्यादिना** । **गुरुशिष्यसमारूढलिङ्गमाहात्म्यसम्पदः** गुरुश्च शिष्यश्च गुरुशिष्यौ, तयोर्मध्ये समारूढं लिङ्गस्य माहात्म्यम्, तस्य सम्पत्, तस्याः, गुरुशिष्ययोर्मध्ये दीक्षात्रयमहिम्ना निरूढमाहात्म्यसम्पदः समुद्भूतात् **सर्वं चिद्रूपविज्ञानात्** सर्वं विश्वं चिदात्मकशिवशक्तिस्वरूपमिति विज्ञानवशात् **जङ्गमाधिक्यम् उच्यते** जङ्गमस्य आधिक्यम्, जङ्गमस्य महत्त्वम् उच्यते कथ्यते ॥ गुरुशिष्ययोः समारूढया तादात्म्यभावनया लिङ्गमाहात्म्यपरिज्ञानात् समुद्भूतं सर्वं विश्वं चिदात्मकमिति विशेषज्ञानं, तद्वशात् जङ्गममाहात्म्यं कथ्यते, ततः ज्ञायते इत्युच्यते ॥ गुरुशिष्ययोस्तावत् तादात्म्यं श्रुत्याऽनया सम्यङ् निरूप्यते – "आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्या सन्धिः" (तै. उ., १.२-३) इति । गुरुः पूर्वरूपम्, पूर्वमेव ब्रह्मसाक्षात्कारद्वारा शिवस्वरूपे स्थितत्वात् । शिष्यः पररूपम्, श्रीगुरुमभिगम्य ततः सम्प्राप्तदीक्षः सन् बाह्याभ्यन्तरलिङ्गाराधनानुसन्धानवशाद् शिवभावम् अधिगमिष्यतीति भाव्यमानत्वात् । अनयोः पूर्वोत्तररूपयोर्गुरुशिष्ययोस्तादात्म्यं 'विद्या सन्धिः' इत्यनेनोक्तम् । विद्या ज्ञानं तयोः सन्धिः सम्बन्ध इत्यर्थः । अत्र ज्ञानं नामेष्टप्राणभावात्मकलिङ्गत्रयस्वरूपज्ञानम् । यत्ते कारणशरीरे वेधादीक्षाद्वारा स्थापितं भावलिङ्गम्, यच्च ते सूक्ष्मशरीरे मन्त्रदीक्षाद्वारा स्थापितं प्राणलिङ्गं, तदुभयसंकेतरूपमिदं ते स्थूलशरीरे क्रियादीक्षाद्वारा स्थापितम् इष्टलिङ्गमिति सम्यग् भावय, पूजय, अनुसन्धत्स्व, तेन जीवभावम् अतिक्रम्य शिवभावं प्राप्नोतु इति शिष्यम् आदिशति श्रीगुरुः । अनेन लिङ्गमाहात्म्यसम्पदं शिष्यः प्राप्नोति । अनया सम्पदा 'लिङ्गं ब्रह्म सनातनम्' इत्यादिपरिज्ञानेन च जगतः शिवमयत्वं प्रतिभासते । अयमेव महाबोधः । अस्य महाबोधस्य साकारस्वरूपः जङ्गमः, इत्यस्य जङ्गममाहात्म्यस्थलस्य सारभूतः विचारः ॥३५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जानन्त्यतिशयाद्ये तु शिवं विश्वप्रकाशकम् ।
स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः ॥३६॥

व्याख्या — के ते जङ्गमाः इत्यत्राह – **जानन्तीति** । **ये तु** ये वीरशैवास्तु **अतिशयाद्** अतिशयेन **विश्वप्रकाशकं** विश्वं प्रकाशयति इति विश्वप्रकाशकः, "तस्य भासा सर्वमिदं विभाति" (कठ. उ., ५.१५; मु. उ., २.२.१०; श्वे. उ., ६.१४) इति श्रुत्यनुसारं विश्वविभासकः, तादृशम्, **शिवं** परशिवं **स्वस्वरूपतया** स्वात्मस्वरूपतया **जानन्ति** अवगच्छन्ति, **ते तु** ते वीरशैवास्तु **जङ्गमाः इति** जङ्गमाभिधानयुक्ताः इति **कीर्तिताः** इति वर्णिताः ॥ परशिवः स्वनिष्ठचिच्छक्तिक्रियाशक्तिभ्यां विश्वं प्रकाशयति । जगति सर्वाणि ज्योतींषि परशिवब्रह्मणः प्रकाशेनैव प्रकाशन्ते। जगदिदं सर्वं परशिवस्यांशभूतं तस्य प्रकाशांशेनैव प्रकाशते च। ये तं शैवं प्रकाशं स्वस्वरूपत्वेन जानन्ति ते जङ्गमाः । जङ्गम्यन्ते अतिशयेन गच्छन्ति जानन्ति वेति जङ्गमाः; ये अतिशयेन जानन्ति ते जङ्गमा इत्यन्वर्थकं नाम । (सर्वे गमनार्थका धातवो ज्ञानार्थका अपि) ॥३६॥

ये पश्यन्ति जगज्जालं चिद्रूपं शिवयोगतः ।
निर्धूतमलसंस्पर्शास्ते स्मृताः शिवयोगिनः ॥३७॥

घोरसंसारतिमिरपरिध्वंसनकारणम् ।
येषामस्ति शिवज्ञानं ते मताः शिवयोगिनः ॥३८॥

व्याख्या — जङ्गमा एव शिवयोगिन इत्याह – **ये** इत्यादिना युग्मेन। **ये** ये जङ्गमाः **निर्धूतमलसंस्पर्शाः** निर्धूतः मलानां संस्पर्शः येषां ते, आणवमायीयकार्मिकमलानां सम्पर्करहिताः, **शिवयोगतः** शिवयोगद्वारा **जगज्जालं** जगद्रूपं जालम् आनायः, "आनायः पुंसि जालं स्यात्" (अमर., १.२७२), इदं जगद्रूपं जालं **चिद्रूपं** चिदाकारत्वेन **पश्यन्ति** वीक्षन्ते, भावयन्ति इति यावत्, **ते** ते जङ्गमाः एव **शिवयोगिनः** शिवयोगिनः इति **स्मृताः** मताः ॥ **घोरसंसारतिमिरपरिध्वंसनकारणं** घोरश्चासौ संसारश्च

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

घोरसंसारः, भयङ्करजननमरणचक्रात्मकः, स एव तिमिरम् अन्धकारः, तस्य परिध्वंसनं नितरां छेदनं, तस्य कारणं हेतुभूतं **शिवज्ञानं** शिवस्वरूपज्ञानं **येषाम् अस्ति** येषां जङ्गमानां भवति, **ते** ते एव **शिवयोगिनः** शिवयोगिनः इति **मताः** ज्ञाताः ॥ शिवयोगिनामभाजो जङ्गमाः परमात्मनः परशिवस्य महत्प्रकाशे निमग्नाः सन्तः स्थूलसूक्ष्मकारणात्मकत्रिविधशरीरम् अध्यात्मयोगेन अत्यतिष्ठन् । अत एव त्रिविधशरीरस्थकार्मिकमायीयाणवमलसम्पर्कविदूरा भवन्ति ॥३७-३८॥

जितकामा जितक्रोधा मोहग्रन्थिविभेदिनः ।
समलोष्टाश्मकनकाः साधवः शिवयोगिनः ॥३९॥

समाः शत्रौ च मित्रे च साक्षात्कृतशिवात्मकाः ।
निस्पृहा निरहङ्कारा वर्तन्ते शिवयोगिनः ॥४०॥

व्याख्या — कीदृशास्ते कीदृशस्तेषां व्यवहारश्चेत्यत्राह – **जितकामा इत्यादिना युग्मेन । शिवयोगिनः** शिवयोगिनामभाजः महात्मानः **जितकामाः** जितः कामः यैः ते, कामविकारस्य जेतारः, **जितक्रोधाः** जितः क्रोधः यैः ते, क्रोधविकारस्य जेतारः, **मोहग्रन्थिविभेदिनः** मोहस्य ग्रन्थिः मोहग्रन्थिः मोहबन्धः, मोहग्रन्थिं भिन्दन्ति इति, तादृशाः मोहग्रन्थिच्छेदसमर्थाः, **समलोष्टाश्मकनकाः** लोष्टं च अश्म च कनकं च लोष्टाश्मकनकानि, समानि लोष्टश्मकनकानि येषां ते, कनकादिसारवस्तुन्यधिकादरो वा लोष्टादिक्षुद्रवस्तुनि तिरस्कारो वा तेषां न भवति, सर्वत्र समवुद्धयस्ते इत्यर्थः, **साधवः** सत्पुरुषाश्च भवन्ति ॥ पुनः **शिवयोगिनः** शिवयोगिनो महात्मानः **शत्रौ च मित्रे च** वैरिजने च सुहृदि च **समाः** समभावाः, **साक्षात्कृतशिवात्मकाः** साक्षात्कृतः शिवः एव आत्मा येषां ते, शिवात्मानः एव शिवात्मकाः तादृशाः, **निस्पृहाः** निर्गता स्पृहा वस्त्वभिलाषः येभ्यः ते, वस्त्वभिलाषरहिताः, **निरहङ्काराः** निर्गतः अहङ्कारः येभ्यः ते, अहङ्काररहिताः च **वर्तन्ते** भवन्ति । अत्रोक्ताः शिवयोगिनां लक्षणविशेषाः भगवद्गीतायां भगवदुक्तस्थितप्रज्ञलक्षणविशेषाणां संवदिनः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवन्ति । तथा हि – "प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः. स्थितधीर्मुनिरुच्यते ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् । नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥" (भ. गी., २. ५५-५७) इति ॥३९-४०॥

दुर्लभं हि शिवज्ञानं दुर्लभं शिवचिन्तनम् ।
येषामेतद्द्वयं चास्ति ते हि साक्षाच्छिवात्मकाः ॥४१॥

व्याख्या — पूर्वोक्तविशेषसम्पन्नाः शिवयोगिनः शिवात्मका इत्युच्यते – **दुर्लभम् इति । शिवज्ञानं** शिवस्वरूपज्ञानं **दुर्लभं** लब्धुं कष्टम्, हि इति प्रसिद्धम्, **शिवचिन्तनं** 'सोऽहमस्मि' इति शिवविचारणं च दुर्लभं लब्धुं कष्टम्; **येषां** येषां शिवयोगिनाम् **एतद्द्वयं** शिवस्वरूपज्ञानं शिवात्मकत्वचिन्तनं चेत्येतद्द्वयं **च अस्ति** च भवति, **ते** ते शिवयोगिनः **साक्षात्** स्वस्वरूपतया **शिवात्मकाः** शिवस्वरूपाः **हि** इति प्रसिद्धम् ॥ यद्यपि शिवज्ञानं शिवचिन्तनं चेति द्वयमपि दुर्लभं तथापि शिवयोगिनः स्वीयेन शिवयोगसाधनेन तद्द्वयमपि प्राप्नुवन्ति, तस्मादेव ते शिवात्मकाः ॥४१॥

पादाग्ररेणवो यत्र पतन्ति शिवयोगिनाम् ।
तदेव सदनं पुण्यं पावनं गृहमेधिनाम् ॥४२॥

सर्वसिद्धिकरं पुंसां दर्शनं शिवयोगिनाम् ।
स्पर्शनं पापशमनं पूजनं मुक्तिसाधनम् ॥४३॥

व्याख्या — पुनस्तेषां शिवयोगिनां महिमा वर्ण्यते युग्मेन – **पादाग्ररेणव इत्यादिना । यत्र** यस्मिन् **शिवयोगिनां** शिवयोगसम्पन्नजङ्गमानां **पादाग्ररेणवः** पादस्य अग्रं पादाग्रं पादस्य अग्रभागः, ततः रेणवः पांसवः **पतन्ति** विकीर्णाः भवन्ति, **तदेव गृहमेधिनां सदनं** तदेव गृहस्थानां गृहं **पुण्यं** पुण्यस्थानं तीर्थस्थानं, **पावनं** पवित्रम्, इति ज्ञातव्यम् ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवयोगिनां शिवयोगसम्पन्नानां जङ्गमानां **दर्शनं** सन्दर्शनं **पुंसां** नराणां **सर्वसिद्धिकरं** सर्वाः सिद्धयः, ताः करोति इति, सर्वकामानां प्राप्तिकरम् इत्यर्थः; **स्पर्शनं** तेषाम् अनुग्रहद्योतकः स्पर्शः **पापशमनं** पापं शमयति इति पापशमनम् पापनिवारणम्; **पूजनं** तेषाम् अर्चनं **मुक्तिसाधनं** मुक्तिप्राप्त्यर्थं साधनभूतम् ॥ उक्तं च – "ऐहिकाभुष्मिका भोगा मोक्षस्तत्सङ्गतो भवेत् । चरसङ्गस्तु सर्वेषां सर्वकामफलप्रदः ॥ तत्पादपांशुभिः पूतं भवनं चेतरद् वनम् । तद्यथाशक्ति संपूज्या जङ्गमा हि हितेप्सुना ॥ यदमी मानुषाकाराः प्रत्यक्षपरमेश्वराः ॥" (चं.आ., क्रि.पा., ४.२९-३०) इति ॥ अत्र जङ्गममहिमा सम्यक् प्रतिपादितः ॥४२-४३॥

महतां शिवतात्पर्यवेदिनामनुमोदिनाम् ।
किं वा फलं सिद्ध्येत सम्पर्काच्छिवयोगिनाम् ॥४४॥

व्याख्या — शिवयोगिनां सर्वफलप्रदातृत्वम् उक्त्वा जङ्गममाहात्म्यस्थलं समापयति – **महताम्** इति । **शिवतात्पर्यवेदिनां** शिवस्य तात्पर्यं रहस्यं तत् विदन्ति इति शिवतात्पर्यवेदिनः, तेषाम्, शिवरहस्यज्ञातृणाम्, **अनुमोदिनाम्** अनु मोदन्ते इति अनुमोदिनः, तेषाम् शिवानन्दम् अनुमोदिनाम् शिवानन्दात् स्वीकृतानन्दवतां **महतां** महत्त्ववतां **शिवयोगिनां** शिवयोगसम्पन्नानां जङ्गमानां **सम्पर्कात्** संसर्गात् **किं वा फलं** किं पुनः प्रयोजनं **न सिद्ध्येत** सिद्धं न भवेत्? सर्वं सिद्धं भवतीत्यर्थः ॥ शिवरहस्यवेदिनां शिवानन्दम् अनु आनन्दवतां च शिवयोगिनां सान्निध्यम् आश्रित्य सेवावृत्तिपराः प्रसादिनः, तेषाम् अनुग्रहेण 'स्वात्मन्येव शिवः स्थितः' इत्याकारकं रहस्यं ज्ञात्वा साक्षात्कृत्वा शिवानन्दं प्राप्नुवन्तीत्यवगन्तव्यम् ॥४४॥

– इति जङ्गममाहात्म्यस्थलम् –

५. अथ भक्तमाहात्म्यस्थलम् – (२९)

गुरोर्लिङ्गस्य माहात्म्यकथनाच्छिवयोगिनाम् ।
सिद्धं भक्तस्य माहात्म्यं तथाप्येष प्रशस्यते ॥४५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — गुरुलिङ्गजङ्गमानां माहात्म्यज्ञानवतो भक्तस्य माहात्म्यं स्वतः सिद्धमेव तथाप्यत्र तस्य विशेषः स्तूयते इत्याह – **गुरोरिति**। **गुरोः** दीक्षाकृत आचार्यस्य, **लिङ्गस्य** गुर्वनुग्रहप्राप्तस्य भावप्राणेष्टलिङ्गसमन्वयस्य, **शिवयोगिनां** ज्ञानप्रदानेन मोक्षमार्गे प्रवर्तयतां जङ्गमानां च **माहात्म्यकथनात्** माहात्म्योपदेशात्, तज्ज्ञानवशादिति यावत्, **भक्तस्य माहात्म्यं** पूर्वोक्तोपदेशानुगुण्येन भक्तेः क्रियमाणत्वात् भक्तस्य महत्त्वं स्वतः सिद्धमेव । **तथापि** तथा माहात्म्यसिद्धावपि **एषः** अयं भक्तः **प्रशस्यते** प्रकर्षेण शस्यते, स्तूयते ॥ सूक्ष्मागमोत्तरे भक्तशब्दस्थितयोरक्षरयोर्निष्पत्तिं प्रदर्श्य भक्तमाहात्म्यं विवृणोति– यथा– "भकाराद्भव इत्युक्तः ककारात् कलुषं भवेत् । ततः सन्त्रायते तस्माद्भक्त इत्युच्यते बुधैः ॥" (क्रि.पा.,९.४०) इति। (जननमरणचक्रं भवः, अविद्या तत्र कालुष्यम्)॥४५॥

ये भजन्ति महादेवं परमात्मानमव्ययम् ।
कर्मणा मनसा वाचा ते भक्ता इति कीर्तिताः ॥४६॥

व्याख्या — भक्तलक्षणमाह – **ये इति** । **ये** ये साधुजनाः **कर्मणा** स्वहस्ताभ्यां पूजारूपक्रियाद्वारा, **मनसा** शिवस्वरूपध्यानात्मकाभ्यन्तरपूजानिष्ठमनोद्वारा, स्तोत्रादिरूपवाचिकक्रियाद्वारा च, **परमात्मानं** सर्वात्मानम् **अव्ययं** व्ययरहितं चयापचयरहितम् इत्यर्थः, **भजन्ति** सेवन्ते **ते भक्ताः** ते भक्ताभिधानयोग्याः **इति कीर्तिताः** इति वर्णिताः । तदुक्तम्– "यद्धि मनसा ध्यायति तद्वाचा वदति तकर्मणा करोति ।" (बृ.जा.उ., १.१) इति ॥४६॥

दुर्लभा हि शिवे भक्तिः संसारभयतारिणी ।
सा यत्र वर्तते साक्षात् स भक्तः परिगीयते ॥४७॥

व्याख्या — पुनरपि भक्तलक्षणं प्रकारान्तरेणाह – **दुर्लभेति** ॥ **संसारभयतारिणी** संसारस्य भयं संसारभयम्, तस्मात् तारयति इति संसारभयतारिणी, जननमरणसरणिरूपसंसारभीतेः निवारयित्री **शिवे**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भक्तिः शिवभक्तिः **दुर्लभा हि** विरला हि । ''यमेवैष वृणुते तेन लभ्यः'' (कठ.उ., २.२३) इति श्रुतेर्भक्तिभावस्तु शिवानुग्रहादेव लभ्यः । शिवानुग्रहस्त्वनेकजन्मशुद्धानां महात्मनामेव भवति । दुर्लभा सा शिवभक्तिर्लभ्यते चेद्भवति संसाराद् अभयदायिनी । **यत्र** यस्मिन् मनुष्ये **सा वर्तते** सा भक्तिर्भवति **स भक्तः परिगीयते** स भक्तः इति प्रशंस्यते ॥ भक्तेषु नास्ति तारतम्यं जन्मकृतं वा कर्मकृतं वा । तत्र भक्तिरेव सर्वेषां समतारेखा ॥४७॥

किं वेदैः किं ततः शास्त्रैः किं यज्ञैः किं तपोव्रतैः ।
नास्ति चेच्छाङ्करी भक्तिर्देहिनां जन्मरोगिणाम् ॥४८॥

व्याख्या— संसाररोगग्रस्तानां भक्त्यभावे वेदादिभिः किमपि प्रयोजनं नास्तीत्यह – **किमिति** । **जन्मरोगिणां** जन्म एव रोगः जन्मरोगः, जन्मरोगः एषाम् अस्तीति जन्मरोगिणः, तेषाम्, जननमरणात्मकरोगग्रस्तानाम्, **शाङ्करी भक्तिः** शङ्करसम्बन्धिनी भक्तिः, शिवभक्तिः **नास्ति चेत्** न भवति चेत्, **किं वेदैः**, वेदाध्ययनादिभिः किं प्रयोजनम्? **ततः शास्त्रैः किं** अनन्तरं शास्त्राध्ययनेन किं प्रयोजनम् ? **यज्ञैः किं** यज्ञयागाचरणेन किं प्रयोजनम् ? **तपोव्रतैः किं** तपःसम्बद्धव्रताचरणैः किं प्रयोजनम् ? यद्यप्येतानि सर्वाणि सत्कर्माणि तथापि भक्तौ सत्यामेव तानि स्वस्वफलप्रदानि भवन्ति ॥४८॥

शिवभक्तिविहीनस्य सुकृतं चापि निष्फलम् ।
विपरीतफलं च स्याद् दक्षस्यापि महाध्वरे ॥४९॥

व्याख्या — शिवभक्त्यभावे पुण्यस्यापि विफलत्वमाह – **शिवभक्तीति** । **शिवभक्तिविहीनस्य** शिवभक्तिरहितस्य **सुकृतं चापि** पुण्यमपि **निष्फलं** विफलं भवति । **दक्षस्यापि** प्रजापतित्वे स्थितस्य दक्षस्यापि **महाध्वरे** महायज्ञे **विपरीतफलं च** विरुद्धफलं पुनः **स्यात्** आसीत् इत्यर्थः ॥ त्रयस्तत्र दक्षा ज्ञायन्ते । एकतमस्तावद् दक्षः सावर्णी इति नवमो मनुः । स्वायंभुवमन्वन्तरे प्रथममन्वन्तरे अन्यो दक्षः आसीत् । चाक्षुषमन्वन्तरे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(षष्ठे) कश्चन दक्षः आसीत् । एतेषां त्रयाणां मध्ये अत्र स्वायम्भुवमन्वन्तरीयो दक्षोऽभिप्रेतः । स दक्षः स्वायंभुवमनोः दुहितरं विवाह्य तस्यां चतुःचत्वारिंशत्पुत्रीः लब्धवान् । तासु एकतमा सतीनाम्नी शिवस्य पत्नी बभूव । (भा. पु., ४.१; विष्णु. पु., १.६) । एकदाऽयं दक्षः देवसदसि 'शिवेनाऽवमानितोऽस्मि' इति मन्यमानः प्रतीकारचिकीर्षुः शिवमनामन्त्र्य अन्यदेवतानामुपस्थितौ महायज्ञमेकम् आरब्धवान् । (भा. पु., ४.३०) । शिवः वीरभद्राकृतिर्भूत्वा तथाविधस्य यज्ञस्य वैकल्यमकरोद् इति पुराणागमेषु वर्ण्यते । (पश्यत– म.भा., शान्तिपर्वन्, २९०; वायु. पु., ३०) ॥४९॥

अत्यन्तपापकर्मापि शिवभक्त्या विशुद्ध्यति ।
चण्डो यथा पुरा भक्त्या पितृहाऽपि शिवोऽभवत् ॥५०॥

व्याख्या — पापकर्मदूषितोऽपि शिवभक्त्या शुद्धिं प्राप्नोतीति सदृष्टान्तमाह – **अत्यन्तेति । अत्यन्तपापकर्मापि** अत्यन्तं पापं कर्म यस्य सः अत्यन्तपापकर्मा, अतिशयेन दृष्कृतसञ्चयवान् अपि, **शिवभक्त्या** शिवभक्तिप्रभवेण **विशुद्ध्यति** शुद्धिं प्राप्नोति । **यथा** यया रीत्या पुरा पुरातनकाले **पितृहाऽपि** पितृहन्ताऽपि **चण्डः** चण्डो नाम भक्तः **भक्त्या** शिवभक्तिप्रभावेण **शिवोऽभवत्** शिव एव बभूव, शिवस्वरूपं प्राप्तवान् ॥ चण्डेश इति नामान्तरेण प्रसिद्धः चण्डों नामाऽत्यन्तं मुग्धभक्त आसीत्। भक्तिपारम्येनोपलशकलमेकं शिवत्वेन संभाव्य पूजयमास । एकदा तस्य पिता तेन विधीयमानां पूजां ददर्श । कुपितश्च भूत्वा स पुत्रेण पूज्यमानम् उपलशकलं पादेनाऽताडयत् । तेन कोपाविष्टश्चण्डस्तं स्वपितरमेव जघान। भक्तिपारवश्येन कृतत्वात् तत्पापं कर्म सत्कर्मत्वेन पर्यवस्यति स्म। तेन संतृप्तो शिवः चण्डस्य पुरतः प्रत्यक्षो भूत्वा तस्मै गणाधीशत्वम् अनुगृहीतवान् ॥ "शिवोऽभवत्" इत्यनेन "शिवगणाधीशो बभूव" इत्यर्थो ग्राह्यः ॥५०॥

सुकृतं दुष्कृतं वापि शिवभक्तस्य नास्ति हि ।
शिवभक्तिविहीनानां कर्मपाशनिबन्धनम् ॥५१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — शिवभक्तस्य पापपुण्ययोः संस्पर्श एव नास्तीत्याह — **सुकृतम्** इति । **शिवभक्तस्य** शिवभक्तिसम्पन्नस्य **सुकृतं** पुण्यं **वापि दुष्कृतं** अथवा पापम्, पुण्यपापात्मककर्मपाशः **नास्ति हि** न भवत्येव । **शिवभक्तिविहीनानां** शिवभक्तिरहितानां तु **कर्मपाशनिबन्धनं** कर्मणः पुण्यपापात्मककर्मणो बन्धनम् अस्ति । पारमेश्वरागमे शिवभक्तेः सर्वाभीष्टप्रदत्वं शिवभक्तिविहीनस्य कर्मपाशबन्धनं च निरूप्येते । तथा हि — "भक्तिर्माता पिता देवि कामधेनुः सुरद्रुमः । करस्थममृतग्रासं विद्धि भक्तिं महेश्वरि ॥ यो भक्तिरहितो मर्त्यः समस्ता निष्फलाः क्रियाः । न तस्य परलोकोऽस्ति मृतः श्वानो भविष्यति ॥ भक्तिहीनस्य कर्माणि वृथा पूजाजपादिकम् । धृतमङ्गलसूत्रापि विधवा न सुवासिनी ॥ तथा भक्तिर्वृथा यस्य तद्वशाद् गतजन्मसु । प्राप्तानि बन्धकर्माणि तेषां स्यात् संक्षयो लघु ॥" (पार. आ., ६.४४-४७) इति ॥५१॥

शिवाश्रितानां जन्तूनां कर्मणा नास्ति सङ्गमः ।
वाजिनां दिननाथस्य कथं तिमिरजं भयम् ॥५२॥

निरोद्धुं न क्षमं कर्म शिवभक्तान् विशृङ्खलान् ।
कथं मत्तगजान् रुन्धेच्छृङ्खला बिसतन्तुजा ॥५३॥

व्याख्या — कर्मपाशनिबन्धनं कथं न स्यदिति सदृष्टान्तमाह — **शिवाश्रितानाम्** इत्यदिना युग्मेन । **शिवाश्रितानां** शिवम् अश्रितवतां शिवप्रपन्नानां **जन्तूनां** प्राणिनां **कर्मणा** कर्मफलानां **सङ्गमः** सम्पर्कः **नास्ति** न भवति । **दिननाथस्य** सूर्यस्य **वाजिनाम्** अश्वानां **तिमिरजम्** अन्धकारप्रयुक्ता भीतिर्नास्ति तथा शिवभक्तानां पापपुण्यात्मकेन कर्मणा सम्पर्को नास्ति । दृष्टान्तालङ्कारः, वाक्ययोरुभयोर्बिम्बप्रतिबिम्बभावसम्बन्धस्य विद्यमानत्वात् — "चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः ।" (कु.आ.,५०) इति हि तल्लक्षणम् ॥ **विशृङ्खलान्** अविद्यमाननियन्त्रणान् **शिवभक्तान्** शिवभक्तिसम्पन्नान् भक्तान् **कर्म** पापपुण्यफलस्वरूपं कर्म **निरोद्धुं** नियन्त्रयितुं **न क्षमं** न समर्थम् । **मत्तगजान्** मदोन्मत्तगजान्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बिसतन्तुजा शृङ्खला कमलतन्तुनिर्मितं निगडं **कथं रुन्धेत्** कथं रोद्धुं शक्नोति? यथा बिसतन्तुनिर्मितं निगडं मदोन्मत्तगजान् नियन्त्रयितुं न शक्नोति, तथा विशृङ्खलान् शिवभक्तान् कर्म रोद्धुं न शक्नोति। दृष्टान्तालंकारः ॥५२-५३॥

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः ॥५४॥

व्याख्या— अगणितवर्णभेदत्वेन भक्तस्य शिववन्मान्यत्वमाह – **ब्राह्मण इति। ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा** चतुर्वर्णेषु ब्राह्मणादिषु एकतमो वा **अन्त्यजो वा** तदतिरिक्तः अन्त्यजन्मा वा भवतु, **शिवे भक्तः सः** शिवभक्तः सः **शिववन् मान्य एव** यथा शिवः तथा स गौरवार्हः। भवतीति शेषः। तदुक्तम् – "ब्राह्मणा क्षत्रिया वैश्याः शूद्रा ये चान्य-जातयः। लिङ्गधारणमात्रेण शिवा एव न संशयः॥" (पार. आ., १.५८) इति ॥५४॥

शिवभक्तिसमावेशे क्व जातिपरिकल्पना।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते ॥५५॥

व्याख्या — पूर्वोक्तमेव सदृष्टान्तं विशदयति – **शिवभक्तीति। शिवभक्तिसमावेशे** शिवभक्तेः प्रवेशे **जातिपरिकल्पना** जातिविचार-चिन्तनं **क्व** कुत्र भवितुम् अर्हति ? न कुत्रापि भवितुम् अर्हतीत्यर्थः। तत्र दृष्टान्तः – **अग्निदग्धेषु इन्धनेषु** अग्नौ भस्मीभूतेषु विविधप्रकारेषु दहनसामग्रीषु **को वा भेदः** कीदृशो भेदः **प्रकीर्त्यते** प्रोच्यते ? न कोऽपि भेदः प्रवक्तुं शक्यते इत्यर्थः॥ अयं श्लोकः चन्नबसवण्णस्य कन्नडवचने एकस्मिन् प्रमाणत्वेन उदाहृतः। (पश्यत – चन्नबसवण्णनवर वचनगळु, कर्नाटक विश्वविद्यालयः, वचन सं. २३४)। लिङ्गधारिणाम् अतिवर्णा-श्रमिनां वर्णजातिगतो वा लिङ्गगतो वा नास्ति भेदः ॥५५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शुद्धा नियमसंयुक्ताः शिवार्पितफलागमाः ।
अर्चयन्ति शिवं लोके विज्ञेयास्ते गणेश्वराः ॥५६॥

व्याख्या — के गणेश्वरा इत्तत्राह— **शुद्धेति** । ये **लोके** प्रपञ्चे **शुद्धाः** दीक्षया बाह्याभ्यन्तरशुचित्वसम्पन्नाः, **नियमसंपन्नाः** विधिनिषेधात्मक-नियमयुक्ताः **शिवार्पितफलागमाः** शिवे अर्पिताः फलानाम् आगमाः यैः ते, शिवसमर्पितफलसमृद्धियुक्ताः **शिवम् अर्चयन्ति** शिवं पूजयन्ति, **ते गणेश्वराः विज्ञेयाः** ते शिवगणाध्यक्षा इति ज्ञातुं योग्याः ॥ शुद्धत्वं नियमपालकत्वं शिवार्पितफलागमत्वेन च फलागमनिःस्पृहत्वं च शिव-गणेशस्य लक्षणम् । तदेव माहात्म्यं भक्तस्य । विरलाः खलु भक्तमाहा-त्म्यवेत्तारः । ये जानन्ति ते शिववत् पूजयन्ति, आदरेण सत्कुर्वन्ति च । वर्णजातिभेदविचारराहित्येन तम् आराधयन्ति सर्वे वीरशैवाः ॥५६॥

— इति भक्तमाहात्म्यस्थलम् —

६. अथ शरणमाहात्म्यस्थलम् – (३०)

गुरुलिङ्गादिमाहात्म्यबोधान्वेषणसङ्गतः ।
सर्वात्मना शिवापत्तिः शरणस्थानमुच्यते ॥५७॥

व्याख्या— शरणमाहात्म्यविवक्षुः शरणस्थानं लक्षयति – **गुरुलिङ्गा-दीति** । **गुरुलिङ्गादिमाहात्म्यबोधान्वेषणसङ्गतः** गुरुश्च लिङ्गं च गुरुलिङ्गे, ते आदिनी येषां ते गुरुलिङ्गादयः गुरुलिङ्गजङ्गमभक्ताः, तेषां माहात्म्यं महत्त्वम्, गुरुलिङ्गजङ्गमभक्तमाहात्म्यं, तस्य बोधः ज्ञानम् अन्वेषणं च गुरुलिङ्गजङ्गमभक्तमाहात्म्यबोधान्वेषणे ताभ्यां सङ्गतः सम्बन्धात्, पञ्चम्यास्तसिल्, तस्मात्, **सर्वात्मना शिवापत्तिः** सर्वरूपेणापि शिवार्पणं **शरणस्थानं** शरणपदम् इति **उच्यते** कथ्यते ॥ शिव एक एव शिवंकरः नान्यः कश्चिदिति सर्वार्पणत्वं शरणस्थानम् इत्यर्थः ॥५७॥

ब्रह्मादिविबुधान् सर्वान् मुक्त्वा प्राकृतवैभवान् ।
प्रपद्यते शिवं यत्तु शरणं तद् उदाहृतम् ॥५८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — शरणस्यैव लक्षणमाह — **ब्रह्मादीति**। **प्राकृतवैभवान्** प्राकृतिकनश्वरसम्पदः **ब्रह्मादिविबुधान् सर्वान्** ब्रह्मविष्ण्वादिसर्वदेवान् **मुक्त्वा** विहाय **यत् तु शिवं प्रपद्यते** यत्तावत् परशिवं सर्वार्पणभावेन आश्रयते **तत् शरणम् उदाहृतं** तत् शरणम् इति कथितम् ॥ "शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य" (अथ. शिखा., ३) इति श्रुत्युक्त-दिशा सर्वान् देवान् ब्रह्मादिकान् विहाय शिवमेकमेव प्रपन्नः शरणनामवान् भवति ॥५८॥

शरण्यः सर्वभूतानां शङ्करः शशिशेखरः ।
सर्वात्मना प्रपन्नस्तं शरणागत उच्यते ॥५९॥

व्याख्या — पुनः शरणागतलक्षणमाह — **शरण्य इति**। **शशिशेखरः** चन्द्रशेखरः (शशी शेखरः शिरोभूषणं यस्य सः), **शङ्करः** शं करोतीति शङ्करः शिव एव **सर्वभूतानां** सर्वप्राणिनां **शरण्यः** आश्रयस्थानम्, इति, यः **सर्वात्मना तं प्रपन्नः** सर्वरूपेण शिवम् आश्रितः, स **शरणागतः** शरणागतः इति **उच्यते** कथ्यते ॥५९॥

विमुक्तभोगलालस्यो देवतान्तरनिस्पृहः ।
शिवमभ्यर्थयन् मोक्षं शरणार्थीति गीयते ॥६०॥

व्याख्या — अथ शरणार्थी क इत्यत्राह — **विमुक्तेति**। **विमुक्तभोग-लालस्यः** भोगस्य लालस्यं भोगलालस्यं, विमुक्तं भोगलालस्यं यस्मात् सः विमुक्तभोगलालस्यः, भोगलम्पटतारहितः, **देवतान्तरनिस्पृहः** अन्या देवता देवतान्तरम्, निर्गता स्पृहा यस्मात् सः निस्पृहः, देवतान्तरे निस्पृहः, ब्रह्माद्यन्यदेवतासु निर्गतस्पृहश्च सन् **शिवं** शिवम् उद्दिश्य **मोक्षम् अभ्यर्थयन्** मुक्तिम् अभिलषन् **शरणार्थी** शरणार्थी इति **गीयते** प्रशंस्यते ॥ शरणम् अर्थयते इति शरणार्थी, "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (पा., ३.१.१३४) इति 'णिनिः' (इन्) ॥६०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ये प्रपन्ना महादेवं मनोवाक्कायकर्मभिः ।
तेषां तु कर्मजातेन किं वा देवादितर्पणैः ॥६१॥

व्याख्या — शरणस्य देवादितर्पणविधिर्नास्तीत्याह — **ये इति । ये** ये शरणनामानः शिवभक्ताः **मनोवाक्कायकर्मभिः** मनसा वाचा कायेन कर्मणा च **महादेवं** महेश्वरं शिवं **प्रपन्नाः** सर्वात्मना शरणं प्राप्ताः भवन्ति, **तेषां तु** तेषां खलु **कर्मजातेन** यज्ञादिक्रियासंकुलेन **देवादितर्पणैः वा** देवपित्रादितर्पणविशेषैर्वा **किं** किं प्रयोजनम्? न किमपि प्रयोजनम् इत्यर्थः ॥ यज्ञादिकर्माचरणं देवादितर्पणप्रदानं चेत्यादिधर्माः केवलं प्रकृतानां भवन्ति । ये तु सर्वप्राकृतधर्माचरणं विहाय परमात्मानं प्रपन्नाः तेषां मुमुक्षूणां कृते न किमपि धर्माचरणं विहितमस्ति । उक्तं किल भगवता – "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः" (भ. गी., १८.६६) इति, "अनन्यांश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥" (भ. गी., ९.२२) इति च ॥६१॥

सर्वेषामपि यज्ञानां क्षयः स्वर्गः फलायते ।
अक्षयं फलमाप्नोति प्रपन्नः परमेश्वरम् ॥६२॥

व्याख्या — यज्ञानां फलं नश्वरं शिवप्रपत्तेः फलमक्षयमित्याह – **सर्वेषामिति । सर्वेषाम् अपि** सकलानाम् अपि **यज्ञानां** यज्ञकर्मणां **क्षयः स्वर्गः** क्षयोन्मुखः स्वर्गः **फलायते** फलं भवति । **परमेश्वरं प्रपन्नः** परमेश्वरे शिवे प्रपत्तिं प्राप्तः शरणनामा भक्तः **अक्षयं फलं** क्षयरहितं फलम् **आप्नोति** प्राप्नोति । अत्राऽक्षयं फलं नाम मोक्षः ॥ स्वर्गप्राप्तिः सर्वयज्ञानां फलम् । यावदस्ति पुण्यसञ्चयः तावत्पर्यन्तं स्वर्गसुखं भवति । क्षीणे पुण्ये पुनः पुण्यसम्पादनाय मर्त्यलोकागमनमनिवार्यमेव । तदुक्तं भगवता – "त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति । एवं त्रयीधर्ममनुप्रपन्ना

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गतागतं कामकामा लभन्ते ॥" (भ. गी., ९.२०-२१) इति । स्वर्गफलमप्यनिच्छन्तो ये महेश्वरं प्रपन्ना भवन्ति ते तु मोक्षरूपमक्षयफलं प्राप्नुवन्ति । तदेवोक्तं भगवता, यथा – "क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति । कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥" (भ. गी., ९.३०) इति ॥ अयमेव परमात्मनोऽभयहस्तो भक्तान् सर्वदा रक्षति ॥६२॥

प्रपन्नपारिजातस्य भवस्य परमात्मनः ।
प्रपत्त्या किं न जायेन पापिनामपि देहिनाम् ॥६३॥

व्याख्या — पापिनामपि प्रपत्त्या सर्वं सत्फलं जयते इत्यर्थवादक्रमेण प्रपत्तिं प्रशंसति – **प्रपन्नेति । प्रपन्नपारिजातस्य** प्रपन्नानां पारिजातस्य, आश्रितानां सर्वेच्छाप्रदायकस्य देववृक्षस्य पारिजातस्य, सादृश्यमत्र परमात्मना भाव्यते । प्रपन्नानां सर्वेच्छाप्रदायकस्य **भवस्य परमात्मनः** शिवस्य परमात्मनः **प्रपत्त्या** सर्वार्पणरूपप्रपत्त्या **पापिनामपि देहिनां** पापवतामपि शरीरिणां **किं न जायेत** किं न भवेत्, सर्वं भवेदित्यर्थः ॥ पापिनामपि शिवे प्रपत्तिः सत्फलाय भवति, किमुत पुण्यकृताम् इति भावः । स्वलीलान्तर्गतत्वेन स्वमायया सर्वान् भ्रामयन् परमात्मा शिवः शरणागतान् भक्तान् अक्षयफलेन शान्तिं प्रददाति । तदेवोक्तं भगवता – "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥" (भ.गी., १८.६१-६२) इति । शाश्वतं स्थानं नाम 'तद्विष्णोः परमं पदम्' (कठ. उ., ३.९) – सर्वव्यापकस्य परमात्मनः तदेव परमं पदं यत्र 'नरो देवयवो मदन्ति' (ऋ. वे., १.१५४.५) (देवमिच्छन्तो नरा आनन्दमनुभवन्ति) इति । तत् किम् इत्यत्रोच्यते– "विष्णोःपदे परमे मध्व उत्सः" (ऋ.वे., १.१५४.५) – सर्वव्यापकस्य परमात्मनः स्थाने परमे मधोः प्रस्रवणम् अस्ति – 'उत्सः प्रस्रवणम्' (अमर. २.४७) – 'बुग्गे' कन्नडभाषायाम् । मोक्षानन्दं प्रददाति इति भावः ॥६३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रपन्नानां महादेवं परिपक्वान्तरात्मनाम् ।
जन्मैव जन्म नान्येषां वृथा जननसङ्गिनाम् ॥६४॥

व्याख्या — शिवे प्रपन्नानामेव जन्म सार्थकं नाऽन्येषामित्याह — **प्रपन्नानाम्** इति । **महादेवं** महेश्वरं **प्रपन्नानां** शरणागतानां **परिपक्वान्तरात्मनां** परिशुद्धहृदयानां (परिपक्वः अन्तरात्मा येषां ते, तेषाम्), **जन्मैव** जन्म एव, जीवनमेव **जन्म** सार्थकं जीवनम्, **जननसङ्गिनां** जननं प्राप्तवताम् **अन्येषां** अन्यजनानां **जन्म न** सार्थकं जन्म न भवति, स च **वृथा** निष्फलम् ॥ परमात्मन्यप्रपन्नानां जन्म व्यर्थमित्यर्थः ॥६४॥

दुर्लभं मानुषं प्राप्य जननं ज्ञानसाधनम् ।
ये न जानन्ति देवेशं तेषामात्मा निरर्थकः ॥६५॥

व्याख्या — मानुषं जन्म प्राप्यापि यो शिवस्वरूपज्ञानं न प्राप्योति तस्य जन्म निरर्थकमित्याह — **दुर्लभमिति । दुर्लभं** दुःखेन लभ्यते इति, दुर्लभः, तादृशं दुर्लभं दुष्प्राप्यं **ज्ञानसाधनं** ज्ञानस्य साधनम् आत्मज्ञानसाधनभूतं **मानुषं** मनुष्यरूपं **जननं** जन्म **प्राप्य** लब्ध्वा अपि **ये** ये जनाः **देवेशं** देवानाम् ईशं देवदेवं महेश्वरं **न जानन्ति** न साक्षात्कुर्वन्ति, **तेषां** तादृशानाम् **आत्मा** जीवः **निरर्थकः** प्रयोजनरहितः ॥ मानुषं जन्म सर्वकर्मक्षयपूर्वकं मोक्षप्रापणाय दत्तावकाश इति ज्ञेयः । मानुषशरीरधारणं विना न शक्यते शिवज्ञानं प्राप्तुम्, शिवज्ञानं विना मोक्षप्राप्तिरपि न शक्यते । आत्मसाक्षात्कारपर्यन्तं शरीरं त्वनिवार्यमेव । "शरीरमाद्यं खलु धर्मसाधनम्" किल ! (कु. सं., ५.३३) । शरीरपातात् पूर्वमेवाऽऽत्मसाक्षात्कारः साधनीयः । श्रुतिराह — "इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः । ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥" (कठ. उ., ६.४) इति । "यथादर्शे तथात्मनि" इति तत्रैवोक्तत्वात् (६.५) शरीरपातात् प्रागेवात्मसाक्षात्कारः सुलभसाध्यः । अत एव "उत्तिष्ठत, जाग्रत, प्राप्य वरान्निबोधत !" (कठ. उ., ३.१४) इति श्रुतेः सर्वमानवानां प्रति चोदनम् ॥६५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तत्कुलं हि सदा शुद्धं सफलं तस्य जीवितम् ।
यस्य चित्तं शिवे साक्षाद्विलीनमबहिर्मुखम् ॥६६॥

व्याख्या — जन्मसाफल्यं तस्यैव यस्य मनः शिवे लीनं भवतीत्याह – **तत्कुलमिति । यस्य चित्तं** यस्य मनः **साक्षात्** स्वस्वरूपतया **अबहिर्मुखं** न बहिर्मुखम् अबहिर्मुखं बाह्यप्रवृत्तिरहितम्, बहिर्मुखं यथा न भवति तथा इति क्रियाविशेषणम्, तथा **शिवे विलीनं** परमात्मनि विशेषेण लयं गतम्, **तत्कुलं** तस्य कुलमेव वंश एव **सदा** सर्वदा **शुद्धं** पवित्रम्, **तस्य जीवितं** तस्य जीवनमेव **सफलं** सार्थकम् ॥ इदं शरणस्य माहात्म्यम् ॥६६॥

– इति शरणमाहात्म्यस्थलम् –

७. अथ प्रसादमाहात्म्यस्थलम् – (३१)

गुरुलिङ्गादिमाहात्म्यविशेषानुभवस्थितिः ।
यस्माच्छिवप्रसादात् स्यात्तदस्य महिमोच्यते ॥६७॥

व्याख्या — गुरुलिङ्गजङ्गमादिमाहात्म्यस्य विशेषज्ञानं यस्माल्लभ्यते तस्य शिवप्रसादस्य माहात्म्यं कथ्यते इति प्रसादमाहात्म्यस्थलमाह – **गुरुलिङ्गादीत्यादिना । गुरुलिङ्गादिमाहात्म्यविशेषानुभवस्थितिः** गुरुः, लिङ्गम्, जङ्गमः, शिवभक्तः, शिवशरणः इत्येषां **माहात्म्यविशेषः** महताविशेषः तस्य अनुभवस्य साक्षात्कारस्य **स्थितिः** स्थिरताप्राप्तिः **यस्मात् शिवप्रसादात्** यस्मात् शिवानुग्रहरूपप्रसादात् **स्यात्** भवेत् **तदस्य** तदेवास्य **महिमा** माहात्म्यम् **उच्यते** कथ्यते ॥ गुरुलिङ्गजङ्गमादीनां प्रसादस्तावत् शिवभक्तानां हृदयं परिशोधयति । शुद्धे हृदये शिवस्वरूपं करतलामलकायते । तस्मात् गुरुलिङ्गजङ्गमादिमाहात्म्यं सागरवदगाधं गभीरं च ॥६७॥

सदा लिङ्गैकनिष्ठानां गुरुपूजानुषङ्गिणाम् ।
प्रपन्नानां विशुद्धानां प्रसीदति महेश्वरः ॥६८॥

व्याख्या — सर्वार्पणभावेन प्रपत्तिं प्राप्तानामेव महेश्वरप्रसादसिद्धेः गुर्वादिमहत्तानुभवस्थितिरित्याह – **सदेति । लिङ्गैकनिष्ठानां** लिङ्गे शिवलिङ्गे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एकनिष्ठा येषां ते लिङ्गैकनिष्ठाः, तेषाम्, **गुरुपूजानुषङ्गिणां** गुरोः पूजा गुरुपूजा, तस्याम् अनुषङ्गः आसक्तिः एषाम् अस्तीति गुरुपूजानुषङ्गिणः, गुरुपूजासक्तमनसः, तेषाम्, **प्रपन्नानां** सर्वार्पणभावेन आश्रितानां **विशुद्धानां** निर्मलान्तःकरणानां **महेश्वरः** परमेश्वरः शिवः **सदा** सर्वदा **प्रसीदति** प्रसन्नो भवति ॥ लिङ्गनिष्ठायाः वैशद्याय १०.२७ – तम-श्लोकस्य व्याख्या द्रष्टव्या । गुरुसेवानुरक्तिर्नाम गुरुमाहात्म्यज्ञानपूर्वकं गुरोः परतत्त्वावबोधकत्वं मत्वा पूजादिक्रियानिरतत्वम् ॥ "गुरुरेव महादेवः साक्षात्सर्वजगत्प्रभुः । अन्यथा तं न जानीयात् परतत्त्वावबोधकम् ॥" (सू. आ., क्रि. पा., ५.१०) इति गुरुमाहात्म्यम् उक्तम् ॥६८॥

प्रसादोऽपि महेशस्य दुर्लभः परिकीर्त्यते ।
घोरसंसारसन्तापनिवृत्तिर्येन जायते ॥६९॥

व्याख्या — शिवप्रसादस्य किं फलमित्यत्राह – **प्रसाद इति । येन घोरसंसारसन्तापनिवृत्तिः** येन घोरस्य संसारस्य सन्तापः, तस्य निवृत्तिः, भयङ्करसंसारदुःखस्य निवारणं **जायते** सम्भवति सः **महेशस्य प्रसादः अपि** परमेश्वरस्य प्रसादः अपि **दुर्लभः** दुष्प्राप्यः इति **परिकीर्त्यते** कथ्यते ॥ महेशस्य प्रसादोऽन्येषाम् अलिङ्गधारिणां दुर्लभः इति ज्ञेयम् ॥ संसारस्य घोरत्वं तापत्रयवशादिति मन्तव्यम् । (दुःखत्रयस्वरूपं ५.६७-७० श्लोकानां व्याख्यायां विशदीकृतम् । तत्र पश्यत) ॥६९॥

यज्ञास्तपांसि मन्त्राणां जपश्चिन्ता प्रबोधनम् ।
प्रसादार्थं महेशस्य कीर्तितानि न संशयः ॥७०॥

व्याख्या — यज्ञादीनि सर्वाणि परमेश्वरप्रसादायैवोक्तानीत्याह – **यज्ञा इति । यज्ञाः** हिंसारहितानि यज्ञकर्माणि, **तपांसि** तपसामाचरणानि, **मन्त्राणां जपः** मन्त्राणां जपाचरणम्, **चिन्ता** परशिवध्यानम्, **प्रबोधनं** शिवसर्वोत्तमत्वज्ञानम्, एतानि **महेशस्य** परमेश्वरस्य **प्रसादार्थं** प्रसादप्राप्त्यै **कीर्तितानि** कथितानि, अत्र **न संशयः** सन्देहः नास्ति ॥ तदुक्तम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"तदेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" (बृ. उ., ४.४.२२) इति । न एतानि प्राप्तव्यध्येयभूतानि परन्तु ध्येय-साधनानि भवन्ति । तत्र ध्येयं शिवप्रसादप्राप्तिः । तथा च शिवज्ञानमात्रं न पर्याप्तं परं शिवप्रसादोऽप्यपेक्षित इत्यर्थः ॥७०॥

प्रसादमूला सर्वेषां भक्तिरव्यभिचारिणी ।
शिवप्रसादहीनस्य भक्तिश्चापि न सिद्ध्यति ॥७१॥

व्याख्या — शिवप्रसादं विना भक्तिरपि न सिद्धिं प्राप्नोतीत्याह – **प्रसादमूलेति** । **सर्वेषां** सर्वजनानां कृते **अव्यभिचारिणी** व्यभिचरितुं शीलम् अस्याः इति व्यभिचारिणी, "सुप्यजातौ णिनिस्ताच्छील्ये" (पा. ३.२.७८) इति ताच्छील्ये "णिनिः" न व्यभिचारिणी अव्यभिचारिणी, अनतिक्रमशीला, अनन्यगामिनी, नित्या इत्यर्थः । **शिवप्रसादहीनस्य** शिवप्रसादरहितस्य **भक्तिश्चापि** भक्तिरपि **न सिद्ध्यति** सिद्धिं न प्राप्नोति ॥ (९.११-१२ श्लोकयोरयं विषय सदृष्टान्तमुक्तः) ॥७१॥

गर्भस्थो जायमानो वा जातो वा ब्रह्मणोऽथवा ।
अन्त्यजो वाऽपि मुच्येत प्रसादे सति शाङ्करे ॥७२॥

व्याख्या — वर्णजातिभेदं विना शिवप्रसादेन मुक्तिरित्याह – **गर्भस्थ इति** । **गर्भस्थो वा** गर्भस्थितो वा **जायमानो वा** जन्म प्राप्यमाणो वा, **ब्राह्मणो वा** विप्रो वा, **अन्त्यजो वाऽपि** अन्त्यजातिभवो वा, "रजक-श्चर्मकारश्च नटो वरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृतः ॥" (अत्रि. सं. – उल्लेखः – शब्द. कौ. संपुट-१, पृ.१०८) । यः कोऽपि वा भवतु, **शाङ्करे प्रसादे सति** शिवप्रसादे सिद्धे **मुच्येत** मोक्षं प्राप्येत ॥ शिवप्रसादतो, महत्प्रभावयुक्तः वयःकुलजातिभेदराहित्येन सर्वमपि मुक्तिभाजनं करोति । शुकवामदेवादयो महात्मानः गर्भस्था एव शिवज्ञानामृतं पीत्वा शिवानन्दम् अन्वभवन् । कपिलध्रुवादयः पुनर्बाल्ये एव प्राप्तशिवप्रसादाः सन्तः मुक्तिम् अलभन्त ॥७२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ब्रह्माद्या विबुधाः सर्वे स्वस्वस्थाननिवासिनः ।
नित्यसिद्धा भवन्त्येव प्रसादात् पारमेश्वरात् ॥७३॥

व्याख्या — शिवप्रसादप्रभावेणैव सर्वे देवा नित्यसिद्धिं प्राप्तवन्त इत्याह — **ब्रह्माद्या इति । स्वस्वस्थाननिवासिनः** स्वस्वस्थाने निवसन्ति इति स्वस्वस्थाननिवासिनः स्वस्वाधिकारस्थानेषु स्थिताः **सर्वे** सकलाः **ब्रह्माद्याः** ब्रह्मप्रभृतयः **विबुधाः** देवाः **पारमेश्वरात्** परमेश्वरस्य अयं पारमेश्वरः, तस्मात्, परमेश्वरकृपाप्राप्तात् **प्रसादात्** अनुग्रहसंकेतभूतात् प्रसादात् **नित्यसिद्धाः** नित्यं सिद्धिमन्तः **भवन्त्येव** सन्त्येव ॥७३॥

प्रसादे शाम्भवे सिद्धे परमानन्दकारणे ।
सर्वं शिवमयं विश्वं दृश्यते नात्र संशयः ॥७४॥

व्याख्या — शिवप्रसादं प्राप्तस्य सर्वं शिवमयत्वेन भासते इत्याह — **प्रसादे** इति । **परमानन्दकारणे** परमानन्दस्य हेतुभूते **शाम्भवे** शम्भोरयं शाम्भवः, तस्मिन्, शिवप्रसादे **सिद्धे** प्राप्ते **सर्वं विश्वं** सर्वं वैविध्यपूर्णं जगत् **शिवमयं दृश्यते** शिवमयत्वेन भासते । **अत्र** अस्मिन् विषये **न संशयः** सन्देहो नास्ति ॥ भोक्तृरूपं भोज्यरूपं चेत्युभाभ्यां सह स्वयमीश्वररूपेण प्रेरयितृरूपं चेति त्रिविधात्मकमिदं ब्रह्म — "भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" (श्वे. उ., १.१२) — इत्युक्तत्वात् सर्वं शिवमयमेव । प्राप्तशिवप्रसादस्यैव तादृशः साक्षात्कारो जायते ॥७४॥

संसारचक्रनिर्वाहनिमित्तं कर्म केवलम् ।
प्रसादेन विना शम्भोर्न कस्यापि निवर्तते ॥७५॥

बहुनात्र किमुक्तेन नास्ति नास्ति जगत्त्रये ।
समानमधिकं चापि प्रसादस्य महेशितुः ॥७६॥

व्याख्या — प्रसादमाहात्म्यमेव पुनराह — **संसारेति । कर्म केवलं** सञ्चितादिकर्मफलं केवलं **संसारचक्रनिर्वाहनिमित्तं** संसारः जननमरण-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिवर्तनरूपः, स एव चक्रं भ्रमणशीलं चक्रं, तस्य निर्वाहः निर्वहणम्, तस्य निमित्तं हेतुभूतम् । **शम्भोः प्रसादेन विना** शिवप्रसादेन विना **कस्यापि** कस्यापि नरस्य **न निवर्तते** तत्संसारचक्रं न निवार्यते ॥ **अत्र** अस्मिन् विषये **बहुना** अधिकेन **उक्तेन** कथितेन **किं** किं प्रयोजनम् । **जगत्त्रये** जगतां त्रये स्वर्गमर्त्यपातालात्मकलोकत्रये **महेशितुः** महेश्वरस्य **प्रसादस्य** समर्पितप्रसादस्य **समानम् अधिकं चापि** समो व अतिशयितं वा **नास्ति नास्ति** नितरां नास्ति ॥ संसारो नाम जननमरणचक्रं महत् । तच्च निरन्तरं परिवर्तते । मानवस्तस्मिन् बद्धः सन् परिवर्तते । तत्र कारणं कर्मैव अनुभूयमानपापपुण्यफलात्मकम् । यज्ञादयः कर्माणि पुनर्बन्धनाय कल्पन्ते । शिवप्रसाद एव संसारबन्धनात् मनुष्यं प्रमोचयति । अत एव शिवप्रसादस्य समानं वा अधिकं वा सर्वथा नास्ति ॥७५-७६॥

शिवप्रसादे सति योगभाजि
सर्वं शिवैकात्मतया विभाति ।
स्वकर्ममुक्तः शिवभावितात्मा
स प्राणलिङ्गीति निगद्यतेऽसौ ॥७७॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते
वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ प्रसादिनः
सप्तविधस्थलप्रसङ्गो नामैकादशः परिच्छेदः समाप्तः ॥११॥

व्याख्या — शिवप्रसादसिद्धिमान् प्रसाद्येव प्राणलिङ्गीत्याह – **शिवप्रसादे इति । योगभाजि** योगं भजते इति योगभाक्, तस्मिन् योगभाजि, समरसशिवयोगवति, **शिवप्रसादे** शिवार्पितप्रसादे सति **सर्वं** सर्वमिदं जगत् **शिवैकात्मतया** शिवेन एकरूपतया **विभाति** विशेषेण प्रकाशते । **स्वकर्ममुक्तः** स्वस्व कर्म, तस्मात् मुक्तः, स्वीयपापपुण्यात्मक-कर्मफलनिर्मुक्तः **शिवभावितात्मा** शिवाभेदेन भावितस्वरूपवान् **सः** स प्रसादी एव, **असौ प्राणलिङ्गीति** अयं प्राणलिङ्गी इति **निगद्यते** निश्चयेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कथ्यते । 'शिवप्रसादे' इत्यस्य विशेषणभूतः 'योगभाजि' इति शब्दः जीवशिवयोः समरसात्मकम् ऐक्यं परामृशति । यथा समुद्रः नदीप्रवाह-प्रवेशेण वृद्धिं वा बाष्परूपेण जलस्य ऊर्ध्वगमने क्षयं वा न प्राप्नोति तथा जीवानां समावेशेन मूले परवस्तुनि परशिवब्रह्मणि वृद्धिर्वा चराचरात्मक-जगत उत्पन्नेन संक्षयो वा न भवति । यदा यं प्रसादी कर्मबन्धनात् विमुच्यते तदा प्राणलिङ्गी भवति । वस्तुतः प्रसादिनः कर्मबन्धनमेव नास्ति, सर्वस्य शिवमयत्वात् ॥ अत्र उपजातिवृत्तम् । इन्द्रवज्रोपेन्द्रवज्र-पादानां संमिश्रणेन उपजातिवृत्तं भवति । अस्य पद्यस्य प्रथमतृतीय-पादयोर्वृत्तं उपेन्द्रवज्रा, द्वितीयचतुर्थपादयोर्वृत्तं इन्द्रवज्रा ॥७७॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोड्डग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
एकादशः परिच्छेदः समाप्तः ॥११॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्वादशः परिच्छेदः

प्राणलिङ्गिनः पञ्चविधस्थलप्रसङ्गः

अगस्त्य उवाच –

भक्तो माहेश्वरश्चेति प्रसादीति निबोधितः ।
एक एव कथं चैव प्राणलिङ्गीति कथ्यते ॥१॥

व्याख्या — भक्तादिशब्दव्यवहार्य एक एव कथं प्राणलीङ्गीति व्यवह्रियते इति अगस्त्यप्रश्नः – **भक्त इति । भक्तः माहेश्वरः च प्रसादी** इति भक्त-माहेश्वर-प्रसीदीति **निबोधितः** बोधविषयीकृतः, व्यवहृतः **एक एव** एक एव शिवानुग्रहप्राप्तः **कथं चैव** केन निमित्तेन **प्राणलिङ्गीति** प्राणलिङ्गस्थलीति **कथ्यते** व्यवह्रियते? साधनमार्गे साधकस्य भक्ति-स्तरानुगुण्येन भक्तादिव्यवहारः समञ्जसतां गाहते । तथा हि– श्रद्धा-रूपभक्त्या भक्तः, निष्ठारूपभक्त्या माहेश्वरः, अवधानभक्त्या च प्रसादीति व्यवहारः समुचितः । अत्रोक्तस्थलत्रये गुरुलिङ्गजङ्गमपूजारूपः तेषां च पादोदकप्रसादस्वीकारस्वरूपश्च कर्मयोगः तत्तन्माहात्म्यज्ञानपूर्वकं प्राचलत् । इतः पश्चात् प्राणलिङ्गिस्थलतः शिवजीवैक्यप्राप्तिसाधनभूतः ज्ञानयोगः प्रवर्तते ॥१॥

श्रीरेणुक उवाच –

भक्तो माहेश्वरश्चैव प्रसादीति च कीर्तितः ।
कर्मप्राधान्ययोगेन ज्ञानयोगोऽस्य कथ्यते ॥२॥

व्याख्या — अगस्त्यप्रश्नं परिभाव्य श्रीरेणुकः समाधत्ते – **भक्त इति । भक्तो माहेश्वरः चैव प्रसादीति च** भक्तमाहेश्वरप्रसादीति एक एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नामत्रयेण **कर्मप्राधान्ययोगेन** कर्म पूजादि, तस्य प्राधान्ययुक्तेन योगेन, कर्मयोगसम्बन्धेन तत्प्रेरकेण गुरुलिङ्गजङ्गममाहात्म्यज्ञानेन च **कीर्तितः** व्यवहृतः। **अस्य** एतस्यैव कृते **ज्ञानयोगः** शिवजीवैक्यप्रक्रियाभूतः ज्ञानयोगः **कथ्यते** प्राणलिङ्गिस्थलादारभ्य निरूप्यते ॥ पूर्वश्लोकस्य व्याख्यां पश्यत ॥२॥

लिङ्गं चिदात्मकं ब्रह्म तच्छक्तिः प्राणरूपिणी ।
तद्रूपलिङ्गविज्ञानी प्राणलिङ्गीति कथ्यते ॥३॥

व्याख्या — प्राणलिङ्गिनः लक्षणमाह – **लिङ्गम् इति । चिदात्मकं** चित् स्वरूपं **ब्रह्मैव** परशिव एव लिङ्गम्, **तच्छक्ति** तस्य परशिवब्रह्मणः शक्तिः शिवलिङ्गपीठात्मिका **प्राणरूपिणी** प्राणस्वरूपिणी इति, **तद्रूप-लिङ्गविज्ञानी** तद्रूपं चिद्रूपपरशिवब्रह्मप्राणरूपशक्त्यात्मकं लिङ्गमिति विज्ञानं विशेषज्ञानम् अस्यास्तीति तद्रूपलिङ्गविज्ञानी, "णिनि" – प्रत्ययः, तादृशलिङ्गविज्ञानवान् एव **प्राणलिङ्गी इति** प्राणलिङ्गी इति नाम्ना प्रसिद्धः इति **कथ्यते** उच्यते । अयमेव ज्ञानयोगः । तदुक्तम् – "तत् कर्म कृत्वा विनिवृत्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगम् । एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः ॥ आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान् विनियोजयेद्यः । तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः ॥" (श्वे.उ., ६.३-४) इति । [तत्त्वस्य तत्त्वेन समेत्य योगम् = त्वंपदवाच्यजीवात्मतत्त्वस्य तत्पदवाच्यपरमात्मतत्त्वेन समरसैक्यरूपं योगं सम्पाद्य; एकेन द्वाभ्यां त्रिभिरष्टभिर्वा = लिङ्गेनैकेन, गुरुलिङ्गाभ्यां द्वाभ्याम्, गुरुलिङ्गजङ्गमैः त्रिभिः, दयाक्षान्ति-शौच-मङ्गलाऽस्पृहाऽकार्पण्याऽ-नायासाऽनसूयाभिरष्टाभिः (सूक्ष्मगुणै); तत्त्वतोऽन्यः = तत्त्वतः शिवः] ॥३॥

प्राणलिङ्गिस्थलं चैतत् पञ्चस्थलसमन्वितम् ।
प्राणलिङ्गिस्थलं चादौ प्राणलिङ्गार्चनं ततः ॥४॥

शिवयोगसमाधिश्च ततो लिङ्गनिजस्थलम् ।
अङ्गलिङ्गिस्थलं चाथ क्रमादेषां भिदोच्यते ॥५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— प्राणलिङ्गिस्थलस्याऽवान्तरस्थलानि निर्दिष्टानि – **प्राणलिङ्गिस्थलमित्यादिना युग्मेन** । **एतत्** इदं **प्राणलिङ्गिस्थलं च** प्राणलिङ्गिस्थलं नाम चतुर्थं मुख्यस्थलं पुनः **पञ्चस्थलसमन्वितं** पञ्चभिः अवान्तरस्थलैः युक्तम् । **आदौ च** आरम्भे तावत् (१) **प्राणलिङ्गिस्थलम्, ततः** अनन्तरं **प्राणलिङ्गार्चनं** (२) प्राणलिङ्गार्चनस्थलम्, **शिवयोगसमाधिः च** (३) शिवयोगिसमाधिस्थलम्, **ततः** तदनन्तरम् (४) **लिङ्गनिजस्थलम्, अथ च** पश्चाच्च (५) **अङ्गलिङ्गिस्थलम्** । **क्रमात्** उक्तक्रमेण **एषाम्** एतेषां **भिदा** प्रकारविशेषता **उच्यते** निरूप्यते ॥४-५॥

१. अथ प्राणलिङ्गिस्थलम् – (३२)

प्राणापानसमाघातात् कन्दमध्याद्यदुत्थितम् ।
प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः ॥६॥

व्याख्या— प्राणलिङ्गस्वरूपम् आह – **प्राणापानेति** । **प्राणापानसमाघातात्** प्राणापानयोः वाय्वोः सङ्घट्टनात् **कन्दमध्यात्** नाभिकन्दमध्यात् **यद् उत्थितं** यत् ज्योतिस्वरूपं लिङ्गम् **उत्थितम्** उत्पन्नं **तत् प्राणलिङ्गम्** तदेव प्राणलिङ्गमिति **प्राणापाननिरोधिभिः** प्राणापानौ निरुन्धन्ति इति प्राणापाननिरोधिनः, तैः, प्राणापानवायुनिरोधशालिभिः **आख्यातम्** उक्तम् ॥ प्राणापानौ पञ्चप्राणवायुषु अन्यतमौ; समानः, उदानः व्यानश्चेति शिष्टास्त्रयः प्राणवायवः । आसां वायूनां स्थानानि – "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥" (उल्लेखः– शब्द.कौ. संपुट-४, पृ.१६७४) इत्युक्तानि । हृदिस्थः प्राणः नासिकाद्वारा श्वासो-च्छ्वासरूपेण सञ्चरति; गुदे स्थितः अपानः मूत्रपुरीषविसर्जनरूपं कार्यं निर्वहति; नाभौ स्थितः समानः जठराग्निं प्रज्ज्वाल्य आहारपचने अन्नजातस्य रुधिरस्य सर्वाङ्गेषु समानतया विभाजने च साहाय्यमाचरति; कण्ठस्थानस्थित उदानो वमनादिचोदनेनाऽनपेक्षितांशान् देहतः निष्कासने साहाय्यं करोति; सर्वशरीरगो व्यानः शरीरस्य सर्वनाडीषु सञ्चरन् रुधिरस्य निरन्तरसञ्चलनं नियन्त्रयति । तेषु प्राणवायुषु प्राणापानौ

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रमुखौ भवतः योगसाधने । योगद्वारा हृदः प्राणवायुम् अपानं प्रति नीत्वा ऊर्ध्वमुखीभूतस्य तस्य प्रज्ज्वालनं क्रियते यथा कर्पूरगुटिकाम् अग्निकाष्ठेन प्रज्ज्वालयन्ति तथा । इदं च साध्यते प्राणायामेन । तथा प्रज्ज्वालिता ज्योतिः नाभिस्थानादुद्गता सती प्राणलिङ्गत्वेन संभाव्यते । तदेव प्राणलिङ्गं श्रुतिषु वहुधा वर्ण्यते – "प्राणेष्वन्तर्मनसो लिङ्गमाहुः" (अथ.शिर.उ. ६६) इति, "ऊर्ध्वं प्राणमुन्नमयत्यपानं प्रत्यगस्यति । मध्ये वामनमासीनं विश्वे देवा उपासते ॥" (कठ.उ.,५.३) इति, "अंगुष्ठमात्रः पुरुषो ज्योतिरिवा-धूमकः" (कठ.उ.,४.१३) इति च ॥६॥

प्राणो यत्र लयं याति भास्करे तुहिनं यथा ।
तत्प्राणलिङ्गमुद्दिष्टं तद्धारी स्यात् तदाकृतिः ॥७॥

व्याख्या — प्राणलिङ्गधारी प्राणलिङ्गस्वरूपो भवतीत्याह – **प्राण** इति । **यत्र** यस्मिन् लिङ्गे **प्राणः** प्राणवायुः **यथा** येन प्रकारेण **भास्करे** सूर्यप्रकाशे **तुहिनं** तुषारः **तथा** तेनैव प्रकारेण **लयं याति** लीनं भवति, तत् तत् लिङ्गमेव **प्राणलिङ्गम् उद्दिष्टं** प्राणलिङ्गम् इति आख्यातम् । **तद्धारी** तत् प्राणलिङ्गं धारयति इति तद्धारी प्राणलिङ्गधारी इत्यर्थः, **तदाकृतिः स्यात्** तस्य आकृतिः यस्य सः, प्राणलिङ्गस्य स्वरूपं यस्य सः प्राणलिङ्गस्वरूपः स्यात् ॥ 'भास्करे तुहिनं यथा' इत्यस्य 'भास्करेन्दुविघट्टनात्' इति पाठान्तरमन्यत्र दृश्यते । (पश्यत – काशीनाथशास्त्रिसम्पादिते कन्नड-लिप्यां मुद्रिते सिद्धान्तशिखामणौ तथा उज्जनीशस्य कन्नडव्याख्यानसहिते च तस्मिन्) । भास्करेन्दुविघट्टनात् – अत्र भास्करः इडानाडीत्यपर-नामवती सूर्यनाडी, इन्दुश्च पिङ्गलानाडीत्यपरनामवती चन्द्रनाडी; ईडापिङ्गलानड्यो विघट्टनेन यत्र लिङ्गे विलयं याति तत्प्राणलिङ्गमि-त्यर्थो विवक्षितः । अत्र ग्रन्थे आदृतं 'भास्करे तुहिनं यथा' इति पाठान्तरम् अर्थगर्भितमस्ति । सूर्यप्रकाशे विलीय तुहिनं सूर्यप्रकाश एव भवति । एवमेव प्राणो लिङ्गे विलीय लिङ्गमेव भवति । बुद्ध्यादयः सर्वे प्राणा-वलम्बिनः सन्तः प्राणेन सह लिङ्गे एव विलीय लिङ्गमेव भवन्ति । तदेव लिङ्गं प्राणलिङ्गमिति कथ्यते । 'भास्करेन्दुविघट्टनात्' इति पाठान्तरं योग-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

साधनस्य कांश्चन प्रक्रियां परामृशति । तथा हि – योगिनां मते ईडा पिङ्गला चेति नाडीद्वयं तयोर्मध्ये मृणालतन्तुसदृशी सुषुम्नाख्या नाडी च विद्येते । सुषुम्ना तु पृष्ठवंशं यावत् तावद्भवति । पृष्ठवंशाधस्तात् त्रिकस्थाने सर्पवत् कुण्डलावस्था कुण्डलिनीशक्तिरस्ति । यदा सा योगपटुना जागरिता तदा सुषुम्नानालद्वारा उपर्युपरि गच्छन्ती मनोविकासं जनयति। तेनाऽसाधारणसुखानुभूतिः सिद्धयश्च जायन्ते । इडा पिङ्गला च पृष्ठ-वंशे विद्यमानज्ञानशक्तिक्रियाशक्त्योः सूक्ष्मतन्तुस्वरूपिण्यौ । प्राणायामा-भ्यासद्वारा श्वासोच्छ्वासनियन्त्रणसिध्द्या तयोर्विद्युत्सदृशसञ्चलनम् अनुभूयते । तादृशयोः विघट्टनेन ज्योतिस्वरूपं लिङ्गं उद्भवति । तदेव शिवयोगिभिः प्राणलिङ्गमित्याख्यायते ॥७॥

ज्ञानिनां योगयुक्तानामन्तः स्फुरति दीपवत् ।
चिदाकारं परब्रह्मलिङ्गमज्ञैर्न भाव्यते ॥८॥

व्याख्या — तादृशस्य प्राणलिङ्गस्य दर्शनं योगिनामेवेत्याह – **ज्ञानि-नाम् इति । योगयुक्तानां** योगे निष्णातानां **ज्ञानिनां** शिवज्ञानवतां **अन्तः** आभ्यन्तरे हृत्कमले **चिदाकारं** चिद्रूपं ज्ञानस्वरूपं **परब्रह्मलिङ्गं** परब्रह्म एव लिङ्गं प्राणलिङ्गात्मकं परब्रह्म **दीपवत्** दीपसदृशं **स्फुरति** प्रकाशते । तच्च प्राणलिङ्गम् **अज्ञैः** अज्ञानिभिः प्राकृतैः **न भाव्यते** भावयितुं न शक्यते ॥ अत्रोक्तो योगः शिवयोगः । "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः" इति कठश्रुतिस्तु पूर्वमुदाहृतम् । "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति भगवदुक्तिः (भ.गी.,१८.६१) । "अन्तः स्फुरति दीपवत्" इत्यत्राऽऽभ्यन्तरे हृदयकमले ज्योतिर्लिङ्गस्वरूपं प्राणलिङ्गं प्रकाशते इत्यर्थः समीचीनः इति तु स्पष्टम् ॥८॥

अन्तःस्थितं परं लिङ्गं ज्योतीरूपं शिवात्मकम् ।
विहाय बाह्यलिङ्गस्था विमूढा इति कीर्तिताः ॥९॥

व्याख्या — अन्तर्लिङ्गमुपेक्ष्य बाह्यलिङ्गासक्तो नितरां मूर्ख इत्याह – **अन्तःस्थितम् इति । अन्तस्थितं** आभ्यन्तरे हृदयपद्मे भाव्यमानं **ज्यातीरूपं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

[ज्योतिस्+रूपम्, "ससजुषो रुः" (पा.अ., ८.२.६६) इति रुत्वम्– ज्योतिर् रूपम्, रेफे परे रेफस्य लोपः – "रो रि" (पा.अ. ८.३.१४), रेफलोपे पूर्वस्य अण् अक्षरस्य (अ इ उ) दीर्घः – "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (पा.अ., ६.३.१११), एवं ज्योतीरूपम् इति सन्धिः] ज्योतिःस्वरूपम्, इत्यर्थः, **शिवात्मकं** शिवस्वरूपं **परं लिङ्गं** प्राणलिङ्गात्मकं महालिङ्गं **विहाय** त्यक्त्वा **बाह्यलिङ्गस्थाः** बाह्ये प्राकृतलिङ्गे स्थिताः आसक्ताः **विमूढाः** अत्यन्तं मूर्खाः **इति कीर्तिताः** इति कथिताः । अत्र बाह्यलिङ्गं तु देवालयादिषु स्थापितं स्थावरलिङ्गादिकं न तु इष्टलिङ्गम् इति ज्ञेयम्; चिच्छक्तिविनिवेशपूर्वकम् तस्य अन्तर्लिङ्गाभ्यां प्राणलिङ्गभावलिङ्गाभ्यां गुरुणा कृतानुसन्धानत्वात्, इष्टलिङ्गे दृष्टियोगं विना अन्तर्लिङ्गानुसन्धानस्य अशक्यत्वाच्च । तस्यैवं चिद्रूपत्वादान्तरत्वम् ॥ एतत्सर्वमुक्तं चन्द्रज्ञानागमोत्तरे– "ज्योतिर्लिङ्गमिदं विद्वन् ध्यानस्थानं महेशितुः । ज्योतिर्लिङ्गं विभाव्यैव तत्र ध्येयः परः शिवः ॥ प्राणेष्वन्तर्मनःस्थानं हृदयाब्जगतं शिवम्। लिङ्गं यत् तदिह ग्राह्यं प्राणलिङ्गसमाह्वयम् ॥ ज्योतीरूपं तदेव स्यात् स्थानं मुख्यं महेशितुः । तत्र निध्यायमानं तु शम्भुर्मोचयतेऽचिरात् ॥" (क्रि.पा., ३.३४-३६) इति ॥९॥

संविल्लिङ्गपरामर्शी बाह्यवस्तुपराङ्मुखः ।
यः सदा वर्तते योगी प्राणलिङ्गी स उच्यते ॥१०॥

व्याख्या — विगलितवेद्यान्तरत्वेन संविद्रूपलिङ्गपरामर्शवान् प्राणलिङ्गीति कथ्यते इत्याह – **संविल्लिङ्गेति । यः** यः योगी **संविल्लिङ्गपरामर्शी** संविदेव लिङ्गं संविल्लिङ्गं चिद्रूपलिङ्गं परामृशतीति संविल्लिङ्ग परामर्शी, "णिनि"- प्रत्ययः, **बाह्यवस्तुपराङ्मुखः** बाह्यं वस्तु बाह्यवस्तु, स्थावरलिङ्गादि तत्पूजासाधनभूतपदार्थाश्च, ततः पराङ्मुखः विमुखः, **सदा वर्तते** सर्वदा भवति **स योगी** स शिवयोगी **प्राणलिङ्गी उच्यते** प्राणलिङ्गीति कथ्यते, प्राणलिङ्गवानिति स्तूयते इत्यर्थः ॥१०॥

मायाविकल्पजं विश्वं हेयं संचिन्त्य नित्यशः ।
चिदानन्दमये लिङ्गे विलीनः प्राणलिङ्गवान् ॥११॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — मायाजात-विश्वस्य हेयतां विचार्य लिङ्गे मनसा विलीनः प्राणलिङ्गीत्याह — **मायेति । मायाविकल्पजं** मायायाः विकल्पः, सत्त्वादि-गुणात्मकविकारः, तस्मात् जातं **विश्वं** प्रपञ्चजातं **हेयं** त्यक्तुं योग्यमिति **सञ्चिन्त्य** समीचीनतया विचार्य **नित्यशः** सर्वदा **चिदानन्दमये** चिदा-नन्दघने **लिङ्गे** लिङ्गरूपपरमात्मनि हृत्कमलस्थिते **विलीनः** मनसा लयं गतः **प्राणलिङ्गवान्** प्राणलिङ्गी इत्यर्थः ॥ जगदिदं परशिवस्य मायाशक्त्या-ख्यायाः परिग्रहशक्तेः उत्पन्नम् । "मयत्यस्माज्जगद्विश्वं माया तेन समीरिता" (पौ.आ., मायापटलम् १) इत्युक्तरीत्या 'मयति ददाति विश्वम्' इति मायालक्षणम् । षट्त्रिंशत्तत्त्वविकासक्रमे शिव-शक्ति-सदाशिवेश्वर-शुद्धविद्यातत्त्वानां पञ्चानामनन्तरं मायातत्त्वं षष्ठम् । शिष्टानां कलातत्त्वादारभ्य पृथिवीतत्त्वपर्यन्तं त्रिंशत्तत्त्वानां मायातत्त्व-मेवोपादानकारणम् । अतः साधु कथितं जगदिदं मायाशक्तिजातमिति । मायावशादेव अनात्मनि ममत्वबुद्धिः जायते । बाह्यवस्तुषु अभिमानः तत्परिणामः । सर्वमिदं ज्ञात्वा विहाय हस्तपीठस्थिते इष्टलिङ्गे दृष्टियोगं संसाध्य शिवयोगी अन्तर्मुखो भूत्वा हृदयकमलस्थस्य ज्योतिःस्वरूपस्य प्राणलिङ्गस्य दर्शनमवाप्नोति भाववस्तुभिः पूजयति च । आगामिनि स्थलेऽस्य विधानं वर्ण्यते ॥११॥

सत्ता प्राणमयी शक्तिः सद्रूपं प्राणलिङ्गकम् ।
तत्सामरस्यविज्ञानात् प्राणलिङ्गीति कथ्यते ॥१२॥

व्याख्या — सद्रूपप्राणलिङ्गसामरस्यज्ञानेन प्राणलिङ्गित्वमित्याह — **सत्ता इति । सत्ता** सतः भावः सत्ता, 'अहमस्मीति' अस्मत्प्रत्ययवेद्यत्वरूपा **प्राणमयी शक्तिः** जीवभूता शक्तिः, **सद्रूपं** तादृशसत्तारूपं **प्राणलिङ्गकं** प्राणलिङ्गम्, **तत्सामरस्यविज्ञानात्** तादृशचिल्लिङ्गे स्वात्मसामरस्यप्रज्ञा-नात् **प्राणलिङ्गी इति** प्राणलिङ्गी अयमिति **कथ्यते** उच्यते ॥ "आनीदवातं स्वधया तदेकम्" इति श्रुतेः (ऋ.वे.,१०.१२९.२), सृष्टेः पूर्वं परशिव-ब्रह्मपदवाच्यं परवस्तु शक्त्या (स्वधया) युक्तमपि निर्गुणत्वात् नादबिन्दु-कलातीतम् आसीत् । "कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यदासीत्" (ऋ.वे., १०.१२९.४) इत्युक्तरीत्या तन्मनसः प्रथमबीजत्वेन सिसृक्षारूपः कामः जागृतो बभूव । तदा तस्याऽविनाभूता शक्तिः स्पन्दितुम् आरब्धा । तदा तथा स्पन्दमानायां शक्तौ परशिवब्रह्म एव नादो भूत्वा स्पन्दमानां स्वीयां शक्तिमेव उपादानकारणत्वेन उपयुज्य जगदिदं ससर्ज । तत्र शक्तिरेव बिन्दुः । सृष्ट्यर्थं नादबिन्दुरूपशिवशक्त्योः सम्मेलनात् कला तत्र प्रतिष्ठिता । तदुक्तम् – "नादरूपः शिवः साक्षाल्लिङ्गमित्यभिधीयते । तत्पीठिका महाशक्तिः सा च वै बिन्दुरूपिणी । तयोः सम्मेलनाद् देवि कला तत्र प्रतिष्ठिता ॥" (सू.आ., क्रि.पा.६.३) इति । सृष्टेः पूर्वं नादबिन्दुकलातीतः शिवः सृष्टेः पश्चात् नादबिन्दुकलात्मकः भवति । वस्तुतः प्राणः (शक्तिः) एव नादबिन्दुकलात्मकः, तस्य 'अहमस्मि' इति प्रतीतिपरायाः सत्तायाः प्राणतत्त्वभूतत्वात् । तस्य प्राणतत्त्वस्य समावेशाल्लिङ्गं प्राणलिङ्गं भवति । इष्टलिङ्गे दृष्टियोगद्वारा आभ्यन्तरे हृदयकमलस्थितं ज्योतिःस्वरूपं प्राणलिङ्गं भाववस्तुभिः पूजयेत्। तत्प्रकारश्च आगामिनि प्राणलिङ्गार्चनस्थले विशदीक्रियते ॥१२॥

– इति प्राणलिङ्गिस्थलम् –

२. अथ प्राणलिङ्गार्चनस्थलम् – (३३)

अन्तर्गतं चिदाकारं लिङ्गं शिवमयं परम् ।
पूज्यते भावपुष्पैर्यत् प्राणलिङ्गार्चनं हि तत् ॥१३॥

व्याख्या— किमिदं प्राणलिङ्गार्चनं नाम इत्यत्राह – **अन्तर्गतमिति**। **अन्तर्गतं** हृदयकमलगतं **चिदाकारं** चिद्रूपं **शिवमयं** शिवात्मकं **यत् परं लिङ्गं** यत् महालिङ्गं प्राणलिङ्गाख्यं **भावपुष्पैः** भावाः शुद्धमनोवृत्तयः तेऽएव पुष्पाणि कुसुमानि आभ्यन्तरपूजासामग्रीभूतानि इति यावत्, तैः **पूज्यते** अर्च्यते **तत् प्राणलिङ्गार्चनं हि** तत् प्राणलिङ्गपूजेति प्रसिद्धम् ॥ प्राणलिङ्गपूजा नाम ज्ञानलिङ्गपूजा । प्राणलिङ्गमेव ज्ञानलिङ्गम्, तस्याभ्यन्तरदिव्यप्रज्ञास्वरूपत्वात्, "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०) इति श्रुत्युक्तदिशा तस्य "अहं लिङ्गमस्मि" इत्येवंभूतप्रज्ञाप्रकाशस्वरूपत्वाच्च ॥१३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अन्तःपवनसंस्पृष्टे सुसूक्ष्माम्बरशोभिते ।
मूर्धन्यचन्द्रविगलत्सुधासेकातिशीतले ॥१४॥

बद्धेन्द्रियनवद्वारे बोधदीपे हृदालये ।
पद्मपीठे समासीनं चिल्लिङ्गं शिवविग्रहम् ॥
भावयित्वा सदाकालं पूजयेद् भाववस्तुभिः ॥१५॥

व्याख्या — पूर्वोक्तप्राणलिङ्गार्चनं कुत्र करणीयमित्यत्राह – **अन्तरिति । अन्तःपवनसंस्पृष्टे** अन्तःपवनेन प्राणवायुना संस्पृष्टे सुष्ठुव्याप्ते **सुसूक्ष्माम्बरशोभिते** अत्यन्तं सूक्ष्मेण अम्बरेण अतिसूक्ष्मेण आकाशेन शोभिते विराजमाने **मूर्धन्यचन्द्रविगलत्सुधासेकातिशीतले** मूर्धन्ये चन्द्रः शिरोमध्यगतब्रह्मरन्ध्रस्थचन्द्रः, तस्मात् चन्द्रमण्डलाद् विगलन्ती स्रवन्ती या सुधा अमृतम्, तस्या सेकेन क्षरणेन अतिशीतले अत्यन्तं शीतले शिशिरे **बद्धेन्द्रियनवद्वारे** बद्धानि स्थगितानि इन्द्रियनवद्वाराणि यस्मिन् तत्, तस्मिन्, **बोधदीपे** बोधः शिवज्ञानम्, शिवज्ञानमेव दीपः यस्मिन् तत्, तस्मिन्, **हृदालये** हृदयमन्दिरे **पद्मपीठे** द्वादशदलकमलासने **समासीनं** समुपविष्टं **शिवविग्रहं** मङ्गलमूर्तिं **चिल्लिङ्गं** चिद्रूपलिङ्गं प्राणलिङ्गम् इति यावत्, **भावयित्वा** ध्यात्वा **सदाकालं** सर्वदा **भाववस्तुभिः** मनोवृत्तिभूतैः पूजासाधनैः **पूजयेत्** अर्चयेत् ॥ श्लोकयुग्मेऽस्मिन् योगिनः हृदयस्थानं सम्यग्वर्ण्यते । तदेव प्राणलिङ्गस्वरूपिणः मङ्गलमूर्तेः शिवस्य मन्दिरम् । उक्तं च – "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन् अन्तराकाशः, तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ।" (छां.उ., ८.१.१) इति । शिवयोगिनः शरीरमेव ब्रह्मपुरम्, तस्यैव ब्रह्मसाक्षात्कारनिलयत्वात् । ब्रह्मपुरे तस्मिन् हृदयस्थानमेव ब्रह्मणः गर्भगृहम् । तच्च प्राणवायुना व्याप्तम् । अयं प्राणापानयोर्निग्रहस्य परिणामः । ब्रह्मरन्ध्रगतचन्द्रमण्डलात् क्षरतोऽमृतस्य सेकेन तद् ब्रह्ममन्दिरम् अतीवशीतलं भवति । शिवज्ञानप्रकाशेन तत् प्रदीप्यते च । चिद्रूपं प्राणलिङ्गं तत्र पद्मपीठे विराजते । तत्पद्मपीठं तु हृदयमन्दिरस्थद्वादश-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दलकमलमेव । तत्र तत्प्राणलिङ्गं संभाव्य मनोऽहंकारबुद्धिरूपान्तःकरण-प्रवृत्तिविशेषात्मकैः शुद्धभावस्वरूपैः पूजाद्रव्यैः समभ्यर्चयेत् । आदीक्षायाः साधकस्य प्रवर्तमानधार्मिकविनयेन भावास्ते निष्कासितसर्वदोषाः सन्तः परिशुद्धाः भवन्तीति ज्ञेयम् । इदमत्रागमोक्तं प्राणलिङ्गार्चनस्य वर्णनम् — "अथ वक्ष्ये महादेवि लिङ्गार्चनविधिं परम् । आदौ ध्यात्वा महादेवं त्रियम्बकमुमापतिम् ॥ प्रसन्नवदनं शान्तं दिव्यलिङ्गोपरि स्थितम् ॥ सर्वव्यापकमीशानं पवित्रं पुष्टिवर्धनम् । अर्चयेदान्तरैः पुष्पैर्मानसैरुप-चारकैः ॥" (का.आ., क्रि.पा., ६.२३-२४) इति ॥१४-१५॥

क्षमाऽभिषेकसलिलं विवेको वस्त्रमुच्यते ।
सत्यमाभरणं प्रोक्तं वैराग्यं पुष्पमालिका ॥१६॥

गन्धः समाधिसंपत्तिरक्षता निरहङ्कृतिः ।
श्रद्धा धूपो महाज्ञानं जगद्भासि प्रदीपिका ॥१७॥

भ्रान्तिमूलप्रपञ्चस्य निवेद्यं तन्निवेदनम् ।
मौनं घण्टापरिस्पन्दस्ताम्बूलं विषयार्पणम् ॥१८॥

विषयभ्रान्तिराहित्यं तत्प्रदक्षिणकल्पना ।
बुद्धेस्तदात्मिका शक्तिर्नमस्कारक्रिया मता ॥१९॥

एवंविधैर्भावशुद्धैरुपचारैरदूषितैः ।
प्रत्युन्मुखमना भूत्वा पूजयेल्लिङ्गमान्तरम् ॥२०॥

व्याख्या — कैर्भावैः पूज्यते प्राणलिङ्गम् इत्यत्राह — **क्षमा** इत्यादिना कुलकेन (पञ्चादिश्लोकसमुदायेन) । **क्षमा** तितिक्षाभावः, स एव **अभि-षेकसलिलम्** अभिषेकजलम्, **विवेकः** नित्यानित्यवस्तुविवेचकत्वं **वस्त्रम् उच्यते** शाटिका कथ्यते, **सत्यं** सत्यवचनसङ्कल्पः **आभरणं** भूषणम्, **वैराग्यं** विरक्तभावः **पुष्पमालिका** कुसुमहारः, **समाधिसंपत्तिः** एकाग्रता-सम्पन्नत्वं **गन्धः** चन्दनलेपः, **निरहङ्कृति** अहंकाररहितत्वं **अक्षताः** हरिद्र-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिप्ततण्डुलाः, **श्रद्धा** आस्तिक्यबुद्धिः **धूपः** दशाङ्गान्यतमसुगन्धधूमः, **जगद्भासि महाज्ञानं** विश्वप्रकाशकं सर्वप्रकाशनशीलं महाबोधः **प्रदीपिका** दीपः, **भ्रान्तिमूलप्रपञ्चस्य** भ्रमाजातजगतः **निवेद्यं** समर्पणं यत् तन्निवेदनं तदेव नैवेद्यम्, **मौनं** तूष्णीभावः **घण्टापरिस्पन्दः** घण्टासञ्चलनं घण्टानादः इति यावत्, मौनमिदम् अनाहतनादानन्दैक्यसाधनभूतम्, तदुक्तम् – "सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः। नादमेवानुसन्दध्यान्नादे चित्तं विलीयते ॥" (नाद.बिं.उ.,४१) इति, **विषयार्पणं** रूपरसगन्धादीन्द्रियविषयाणां समर्पणं **ताम्बूलं** नागवल्लीदलक्रमुकसुधामिश्रणम्, **विषयभ्रान्तिराहित्यम्** इन्द्रियविषयेषु भ्रमाधीनबुद्धिरहितत्वं यत् तत् **प्रदक्षिणकल्पना** तदेव आसमन्तात् क्रमणम्, परिक्रमः, परिक्रमरचना, परिक्रमकरणम् इत्यर्थः, **बुद्धेः तदात्मिका शक्तिः** बुद्धिवृत्तेः तदाकारधारणशक्तिः, लिङ्गाकारधारणसामर्थ्यम् इति यावत्, **नमस्कारक्रिया मता** नमस्कृतिकरणं मतम्, **एवंविधैः** एतादृशैः **भावशुद्धैः** आशयशुद्धैः अदूषितैः अनिन्दितैः **उपचारैः** पूजाङ्गभूतसेवाप्रकारैः **प्रत्युन्मुखमनाः भूत्वा** प्रत्युन्मुखं मनः यस्य सः, अबहिःप्रवृत्तमनाः भूत्वा, **आन्तरं लिङ्गम्** आभ्यन्तरलिङ्गं चिद्रूपं प्राणलिङ्गम् इति यावत्, **पूजयेत्** अर्चयेत् ॥१६-२०॥

– इति प्राणलिङ्गार्चनस्थलम् –

३. अथ शिवयोगसमाधिस्थलम् – (३४)

अन्तःक्रियारतस्यास्य प्राणलिङ्गार्चनक्रमैः।
शिवात्मध्यानसम्पत्तिः समाधिरिति कथ्यते ॥२१॥

व्याख्या — शिवयोगसमाधिस्थलं प्रतिपिपादयिषुः समाधिलक्षणमाह – **अन्तःक्रियेति । अस्य अन्तःक्रियारतस्य** अस्य आभ्यन्तरपूजाकर्मनिरतस्य प्राणलिङ्गिनः, **प्राणलिङ्गार्चनक्रमैः** प्राणलिङ्गस्य अर्चनक्रमैः प्राणलिङ्गपूजाविधानैः **शिवात्मध्यानसंपत्तिः** शिवात्मा शिवस्वरूपं तस्य ध्यानं, तदेव सम्पत्तिः, शिवस्वरूपचिन्तनसम्पद् एव **समाधिरिति** समाधिः इति **कथ्यते** उच्यते ॥ "योगश्चित्तवृत्तिनिरोधः" इति योगलक्षणम्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(यो.सू., १.२)। नात्र 'चित्तवृत्तिनिरोधः' इत्यस्य मनोवृत्तीनां नितराम् अभावे पर्यवसानम् इत्यर्थः, परन्तु मनोवृत्तीनां लौकिकवस्तुभिः सह स्वार्थपरमिथ्याभूततादात्म्यसम्बन्धेभ्यः परिमोचनं संसाध्याऽऽत्मनि परमात्म-शिवतादात्म्यध्यानपरत्वेन तासां नियोजनमित्यर्थः । इदमेव संयोजनं समाधिरिति पतञ्जलिः। तदुक्तम् – "क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ-ग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" (यो. सू., १.४१) इति । परिशुद्धो मणिर्यथा समीपस्थपदार्थस्य रूपवर्णादिकं प्रतिफलनगत्या प्राप्य तत्स्वरूपतां भजते तथैव क्षीणमिथ्यासम्बन्धवृत्तिमनः ध्येयवस्तुनि निरस्तग्रहीतृग्रहणग्राह्यरूपत्रिपुटीज्ञानं साम्यं तादात्म्यं वा प्राप्नोति । इयमेव प्राप्तिः समाधित्वेन व्यवह्रियते । अत्र 'शिवात्मध्यानसम्पत्तिः' इत्यनेन तादृशसमाधिरेव परामृश्यते ॥ इयं समाधिः 'शिविचार-समाधि'रिति पतञ्जलिना कथ्यते। (यो.सू.,१.४४)। यावत्पर्यन्तं हृदय-मन्दिरे पद्मपीठे आसीनं ज्योतिःस्वरूपं प्राणलिङ्गं क्षमाविवेकादिशुद्धभावैः क्रियमाणां पूजां स्वीकरोति तावत्पर्यन्तम् इयमेव स्थितिः। अत्र शिवजीव-सामरस्यपूर्ववर्ती अनुसन्धानस्तरोऽस्तीति सामरस्यं साध्यावस्थायामस्ति, न तु सिद्धावस्थाम् इत्यवगन्तव्यम् ॥२१॥

सर्वतत्त्वोपरि गतं सच्चिदानन्दभासुरम् ।
स्वप्रकाशमनिर्देश्यमवाङ्मानसगोचरम् ॥२२॥
उमाख्यया महाशक्त्या दीपितं चित्स्वरूपया ।
हंसरूपं परात्मानं सोऽहंभावेन भावयेत् ॥
तदेकतानतासिद्धिः समाधिः परमो मतः ॥२३॥

व्याख्या — समाधिः पुनर्विशदीक्रियते – **सर्वतत्त्वोपरीति** । **सर्व-तत्त्वोपरि गतं** सर्वेषां तत्त्वानां पृथिव्यादिपरशिवान्तषट्त्रिंशत्तत्त्वानाम् उपरि अतिक्रान्तत्वेन स्थितम्, **सच्चिदानन्दभासुरं** सच्च चिच्च आनन्दश्चेति त्रयाणां समाहारः सच्चिदानन्दम्, तद्रूपेण भासुरं प्रकाशमानम्, **स्वप्रकाशं** स्वतः प्रकाशमानम्, **अनिर्देश्यं** न निर्देश्यम् अनिर्देश्यम्, इदं तदिति निर्देष्टुम् अशक्यम्, **अवाङ्मानसगोचरं** वाक् मानसं च वाङ्मानसे ताभ्यां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गोचरं वाङ्मानसगोचरम्, न वाङ्मानसगोचरम् अवाङ्मानसगोचरम्, वाङ्मनोमार्गातिक्रान्तम् इत्यर्थः, अत्र श्रुतिः – "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तै.उ., २.४) इति; **चित्स्वरूपया** चिद्रूपया **उमाख्याया** उमानाम्न्या **महाशक्त्या** पराशक्त्या **दीपितं** प्रकाशितम्, **हंसरूपं** 'अहं सः' इत्येवरूपं **परात्मानं** परमात्मानं परशिवं **सोऽहंभावेन** 'सोऽहम्' इत्याकारकेण भावेन **भावयेत्** ध्यायेत् । **तदेकतानतासिद्धिः** तयोर्जीवात्मपरमात्मनोरेकत्वभावनावाप्तिः **परमः समाधिः** सर्वोत्कृष्ट-समाधिरिति **मतः** स्मृतः ॥ **हंसरूपं परात्मानं सोऽहंरूपेण भावयेत्** – उदाहृतपूर्वं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इतीदं श्रुतिवाक्यं 'वाचाऽशुद्धया मनसा चाऽशुद्धेन परशिवब्रह्म न शक्यते प्राप्तुम्' इति चोदयति । वाचा पुनः परिशुद्धया तद्ब्रह्म सम्यग्वर्ण्यते, मनसा च शुद्धेन तद्ध्यातुं शक्यते । नो चेत् वृथा भवन्ति सर्वाणि तत्प्राप्तिप्रयत्नानि । सामान्येन प्रत्यक्षेण वाऽन्यवाह्यप्रमाणैश्च सर्वथा तन्न शक्यते प्राप्तुम् । शुक्लत्व-पटत्वयोरभेदबोधकेन शुक्लपटन्यायेन परशिवब्रह्मण उमाख्य-पराशक्तेश्च अपृथग्भावः ज्ञेयः । शिवतत्त्व-शक्तितत्त्वयोरविनाभाव-योगभूतं महालिङ्गतत्त्वमेव योगशास्त्रे 'हंस' शब्देन व्यवह्रियते । अयं हंसः भक्तानां मनोमानसे वसति । साक्षात्कृतहंसास्ते योगिनः परम-हंसशब्देन ज्ञायन्ते । हंसमिमं सोहंरूपेण भावयेदित्युपदिष्टम् । ये हि जनाः 'अहमहम्' इति व्यवहरन्ति ते संसारजाले बद्धा भवन्ति । योगिनस्तु 'हंसं' 'सोऽहम्' इति समरसभावेन ध्यायन्तः सर्वस्माद् अस्मात् संसारजालान् निर्मुक्ता भवन्ति । शिवांशभूतो जीवात्माऽकाराद् हकार-पर्यन्ते वर्णाध्वजाले मीनवद् बद्धः । एष अहंशब्दः परमात्मनि जीवात्मनि चेत्युभयोरपि रूढः । परमार्थे शब्दोऽयं परमात्मनि रूढः । यथा – "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" (भ.गी.,१०.८) इति; "अहमस्मि प्रथमजा ऋतस्य" (तै.उ., ३.१०.६) इति; "अहमादिर्हि देवानाम्" (भ.गी., १०.२) इति च । लौकिकस्तरे स एवाहं शब्दः जीवात्मनि रूढः । यथा – "अहंशब्दस्य रूढत्वाल्लोके जीवात्मवस्तुनि" (सू.सं.) इति; "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०) इति; "अयमात्मा ब्रह्म" (ऐ.उ., पृ.३)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति च। परमात्मजीवात्मनोरुभयोरपि 'अस्मद्रूपत्वम्'। एतादृशबोधपूर्वकं तयोस्तादात्म्यध्यानं शिवयोगसमाधिर्भवति ॥२२-२३॥

परब्रह्म महालिङ्गं प्राणो जीवः प्रकीर्तितः।
तदेकभावमननात् समाधिस्थः प्रकीर्तितः ॥२४॥

व्याख्या — लिङ्गरूपः शङ्करः प्राणरूपस्तु जीव इति तयोस्तादात्म्यचिन्तनं समाधिः, तद्वान् समाधिस्थ इत्याह — **परब्रह्मेति** । **महालिङ्गं** महालिङ्गमेव **परब्रह्म** परशिवः, **जीवः** जीवात्मा एव **प्राणः** तत्प्राणतत्त्वम्, इति **प्रकीर्तितः** कथितः, **तदेकभावमननात्** तयोः जीवात्मपरमात्मनोः एकभावः तादात्म्यम्, तस्य मननात् स्थिरतया चिन्तनात् साधकः **समाधिस्थः** शिवयोगनिष्ठ इति **प्रकीर्तितः** कथितः ॥ 'सोऽहम्' इति समष्टिस्थितिः, 'अहम्' इति तु व्यष्टिस्थितिः। 'अहम्' इत्यस्य 'सोऽहम्' इति यो ध्यायते स प्राणलिङ्गी। व्यष्टिरूपम् अहमत्र न जागर्ति सोऽहंप्रत्यये तस्य लीनत्वात् ॥ एवं यो निरन्तरं मनुते स एव शिवयोगसमाधिस्थः ॥२४॥

अन्तः षट्चक्ररूढानि पङ्कजानि विभावयेत्।
ब्रह्मादिस्थानभूतानि भ्रूमध्यान्तानि मूलतः ॥२५॥

भ्रूमध्यादूर्ध्वभागे तु सहस्रदलमम्बुजम्।
भावयेत् तत्र विमलं चन्द्रबिम्बं तदन्तरे ॥२६॥

सूक्ष्मरन्ध्रं विजानीयात् तत्कैलासपदं विदुः।
तत्रस्थं भावयेच्छम्भुं सर्वकारणकारणम् ॥२७॥

व्याख्या — शिवयोगसमाधिमाह — **अन्तः** इत्यादिना श्लोकत्रयेण (विशेषके)। **अन्तः** आभ्यन्तरसूक्ष्मशरीरे **मूलतः** मूलाधारात् **भ्रूमध्यान्तानि** भ्रूमध्यपर्यन्तानि **ब्रह्मादिस्थानभूतानि** ब्रह्मादिनिवासभूतानि **षट्चक्र-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रूढानि आधारादिषट्चक्रसमुद्भूतानि **पङ्कजानि** कमलानि **विभावयेत्** विशेषेण भावयेत् । **भ्रूमध्याद्** भ्रूमध्यस्थानाद् **ऊर्ध्वभागे** उपरिभागे ब्रह्मरन्ध्रे **सहस्रदलम् अम्बुजं** सहस्रदलकमलम्, सहस्रारचक्रोद्भूतम् इति यावत्, **भावयेत्** चिन्तयेत् । तत्र सहस्रदलकमले **विमलं** निर्मलं **चन्द्रविम्बं** पूर्णचन्द्रं भावयेद् इत्यर्थः । **तदन्तरे** तन्मध्ये, चन्द्रबिम्बमध्ये **सूक्ष्मरन्ध्रं** केशाग्रवत् सूक्ष्मं रन्ध्रं **विजानीयात्** विशेषेण जानीयात्, विद्यात् । **तत्** तदेव **कैलासपदं** कैलासस्थानम् इति **विदुः** जानीयुः । **तत्रस्थं** तत्र स्थितत्वेन, कैलासपदाख्यसूक्ष्मरन्ध्रे स्थितत्वेन, **सर्वकारणकारणं** सर्वेषां कारणानां ब्रह्मादिकारणेशानां कारणभूतं **शम्भुं** शिवं **भावयेत्** ध्यायेत् ॥ मूलाधारतः भ्रूमध्यपर्यन्तं षट्चक्राणां तदुद्भूतानां कमलानां क्रमेण नामानि यथा – मूलाधारे (गुदस्थाने) आधारचक्रं तदुद्भूतं च चतुर्दल-कमलं ब्रह्मस्थानम्; नाभिस्थाने मणिपूरकचक्रं तदुद्भूतं च दशदलकमलं रुद्रस्थानम्; हृदयस्थाने अनाहतचक्रं तदुद्भूतं च द्वादशदलकमलम् ईश्वरस्थानम्; कण्ठस्थाने विशुद्धचक्रं तदुद्भूतं च षोडशदलकमलं सदा-शिवस्थानम्, भ्रूमध्ये च आज्ञाचक्रं तदुद्भूतं च द्विदलकमलं महेश्वर-स्थानम् ॥ भ्रूमध्यादूर्ध्वभागे सहस्रारचक्रं तदुद्भूतं च सहस्रदलकमलम्, तन्मध्ये निर्मलं चन्द्रबिम्बम्, पुनस्तन्मध्ये सूक्ष्मरन्ध्रम्, तत्र स्थितं शम्-भावयितारं शिवं प्राणलिङ्गी ध्यायति । अस्यैव परिच्छेदस्य गतसप्तम-श्लोकस्य व्याख्यायाम् उक्तरीत्या शुशुम्नानालद्वारा उपर्युपरि चलन्ती कुण्डलिनीशक्तिर्यदा षट्चक्रातीतं सप्तमचक्रभूतं सहस्रारचक्रं प्राप्नोति तदा प्राणलिङ्गी स्वात्माविशेषेण शम्भुं ध्यायन् समाधिस्थो भवति । एष एव शिवयोगसमाधिः, अयं सकलसमाधिः । उक्तं च तस्य अन्यद्विधानम् – "गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकं गत्वा अनाहतमतिक्रम्य विशुद्धौ प्राणलिङ्गं निरुध्य आज्ञामनुयाद् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहमिति सर्वदा ध्यायेत्" (हंस.उ.,१) इति । गुदद्वारम् अवरुध्य मूलाधारस्थिताद् आधारचक्राद् अपानवायुम् ऊर्ध्वमुखीकृत्य लिङ्गस्थानस्थितं स्वाधिष्ठानचक्रं त्रिवारं प्रदक्षिणीकृत्य नाभिस्थानस्थितं मणिपूरकचक्रं प्राप्य हृदयस्थानगतम् अनाहतचक्रम् अतीत्य कण्ठस्थानगते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विशुद्धचक्रे प्राणलिङ्गं निरुध्य भ्रूमध्यस्थनगतम् आज्ञाचक्रम् अनुगच्छेद्, ब्रह्मरन्ध्रं ध्यायन् 'अ-उ-म' इति त्रिमात्रप्रणवोऽहम्, प्रणववाच्यपरमात्माऽहमिति निरन्तरं ध्यानपरो भवेदिति सकलसमाधिः ॥२६-२७॥

बहिर्वासनया विश्वं विकल्पार्थं प्रकाशते ।
अन्तर्वासितचित्तानामात्मानन्दः प्रकाशते ॥२८॥

व्याख्या — बहिर्वासनया विश्वम्, अर्थात् संसारः, अन्तर्वासनया आत्मानन्द इत्याह – **बहिर्वासनयेति । बहिर्वासनया** बहिर्मुखी वासना बहिर्वासना, तया, बहिर्मुखसंस्कारेण इत्यर्थः, **विश्वं** प्रपञ्चः **विकल्पार्थं** चित्तचाञ्चल्यप्रवर्तकाय विकल्पाय **प्रकाशते** प्रवर्तते । **अन्तर्वासितचित्तानाम्** अन्तर्मुखीभूतया वासनया प्रभावितचित्तानाम्, 'अहं ब्रह्मास्मि' (बृ.उ.,१.४.१०) इत्येवंरूपस्याभ्यन्तरसंस्कारेण परिमलितमनसाम्, **आत्मानन्दः** अनितरसाधारणः शिवानन्दः **प्रकाशते** अनुभूयते ॥ वासना नाम मनसि दृढतया निरूढः संस्कारः । रूपरसादिबहिरिन्द्रियगोचरीभूतानां विषयाणां तादृशः संस्कारो बहिर्वासना । एतादृशया बहिर्वासनया बाह्यं जगत् प्रियाऽप्रियानुभयतया भासते । तदा विविधानुभवतरङ्गोदयेन व्यस्तं मनः सम्यज्ज्ञानं न शक्यते प्राप्तुम् । 'सोऽहभाव'स्य दृढसंस्कारस्त्वन्तर्वासना । एतादृश्या वासनया योगी स्वात्माभिन्नः शिव इत्यस्य सत्यस्य साक्षात्कारपरो जायते । इदं च साक्षात्कारपरत्वं शिवयोगेन साध्यते । अष्टसु योगाङ्गेषु ध्यानं समाधिश्च साध्यभूतौ, यम-नियमासन-प्राणायाम-प्रत्याहार-धारणानि षट्साधनानि। तथा हि – सर्वासाम् अनृतवचनादिहीनप्रवृत्तीनां त्यागपूर्वकम् इष्टलिङ्गपूजाचरणं **यमो नामाङ्गम्**। भस्मादिशिवचिह्नैर्भूषितो मानसजपनिष्णातश्च भूत्वेष्टलिङ्गे दृष्टियोगद्वारा प्राणलिङ्गभावलिङ्गयोरनुसन्धानपूर्वकम् इष्टलिङ्गपूजैव **नियमः** । स्वसामर्थ्यानुसारं सिद्धासनादिष्वेकतमग्रहणं **आसनम्** । पूरक-रेचक-कुम्भकैः प्राणवायोर्नियन्त्रणं **प्राणायामो नामाङ्गम्** । एवं नियन्त्रितप्राणवायुरिडापिङ्गलयोः प्रचलन् हृदयं प्रविश्य स्थिरगत्या प्रणवनादो भूत्वा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्राणलिङ्गात्मकम् आभ्यन्तरलिङ्गभावमनुरणति । **प्रत्याहारो** नाम प्राणलिङ्गार्चनानुगुण्येन इन्द्रियाणाम् अन्तर्मुखीकरणं तन्मयीकरणं च । **धारणं** तु हृदयस्थितस्य प्राणलिङ्गस्य प्रतिरूपत्वेन विविधाङ्गेषु भावयित्वा तेषामनुसन्धानम् । **ध्यानं** नामाऽऽभ्यन्तरलिङ्गस्य प्राणलिङ्गस्य सोऽहं भावेन निदिध्यासनम् । अस्यैव क्रमेण स्थिरीकरणं **समाधिः** । एष चात्र सविचारसमाधिः । इदं लिङ्गाङ्गसामरस्यत्वेन ऐक्यस्थले भाव्यते ॥२८॥

आत्मारणिसमुत्थेन प्रमोदमथनात्सुधीः ।
ज्ञानाग्निना दहेत्सर्वं पाशजालं जगन्मयम् ॥२९॥

व्याख्या — बहिर्वासनादहनप्रकारमाह — **आत्मारणीत्यादिना** । **सुधीः** सुमतिः प्राणलिङ्गी **प्रमोदमथनात्** प्रमोदः शिवानान्दः, उत्तरारणिभूतः, तेन मथनात्, **आत्मारणिसमुत्थेन** आत्मारणेः अधरारणिभूतात् समुत्थम् आत्मारणिसमुत्थम्, आत्मारणिसमुद्भूतम्, तेन **ज्ञानाग्निना** ज्ञानमेव अग्निः ज्ञानाग्निः, तेन, 'सोऽहम्'-रूपेण बोधेन **जगन्मयं** जगद्रूपं **पाशजालं** मलमायादिपाशसमुदायं दहेत् प्लुष्यात् ॥ पाशजालप्लोषणेन शुद्धचित्तः प्राणलिङ्गी शिवयोगसमाधिना परमार्थं साधयति । उपनिषत्सु निर्मथनवैविध्यं तत्फलवैविध्यं च श्रूयते । तथा हि — (१) श्वेताश्वतरे — "स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ तिलेषु तैलं दधिनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः । एवमात्मात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति ॥" (१.१४-१५) अत्र स्वदेहः अधरारणिः प्रणवश्च उत्तरारणिः । तयोः निर्मथनं ध्यानमेव। तेन स्वात्मनि निगूढस्य परमात्मनः साक्षात्कारो जायते । तिलेषु तैलम्, इत्यादिदृष्टान्तैः प्राणलिङ्गी तपसा सत्यरूपेण स्वात्मनि परमात्मानं साक्षात्करोतीति निरूप्यते । अयं च साक्षात्कारः पितृभ्यां निक्षिप्तस्य पूर्वम् अज्ञानेनाऽज्ञातस्य रहस्यनिधेर्दर्शनमिव साश्चर्यम् आनन्दं जनयति। (२) ब्रह्मबिन्दूपनिषद्यपि एतदुक्तम्, यथा — "घृतमिव पयसि निगूढं भूते भूते वसति विज्ञानम् । सततं मन्थयितव्यं मनसा मन्थानभूतेन ॥" (२०)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति । क्षीरे घृतमिव प्रतिभूते निहितमस्ति विज्ञानम्, निर्दिष्टं ज्ञानं विज्ञानम् । तच्च सर्वथा मन्थानभूतेन मनसा मन्थनीयम् । किं तन्निर्दिष्टं ज्ञानम् इति चेत् तत्रैव उच्यते – "निष्कलं निर्मलं शान्तं तद्ब्रह्मास्मीति स्मृतम् ।" (२१) इति । (३) कैवल्योपनिषदि अन्यादृशं मन्थनमुक्तम्, यथा – "आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ज्ञाननिर्मथनाभ्यासात्पापं दहति पण्डितः ॥" (१.११) इति । सर्वपापानां सर्वपाशानां च भस्मीकरणेन आत्मसाक्षात्कारः भवतीति तात्पर्यम् । इदमेव तात्पर्यम् अस्य श्लोकस्य ॥२९॥

संसारविषवृक्षस्य पञ्चक्लेशपलाशिनः ।
छेदने कर्ममूलस्य परशुः शिवभावना ॥३०॥
अज्ञानराक्षसोन्मेषकारिणः संहृतात्मनः ।
शिवध्यानं तु संसारतमसश्चण्डभास्करः ॥३१॥

व्याख्या — शिवभावनाशिवध्यौनयोः कर्मनाशकत्वेन संसारमोचकत्वेन च वर्णयन् ग्रन्थकृत् शिवयोगसमाधिस्थलं समापयति युग्मेन – **संसारेत्यादिना । कर्ममूलस्य** कर्म मूलं यस्य सः, तस्य, पापपुण्यरूपकर्ममूलस्य,**पञ्चक्लेशपलाशिनः** पञ्च क्लेशाः अविद्यादयः,ते एव पलाशाः पर्णाः अस्य सन्तीति, पञ्चक्लेशपलाशी, तस्य, **संसारविषवृक्षस्य** संसारः जननमरणचक्रम्, संसार एव विषवृक्षः, तस्य **छेदने** कर्तने **शिवभावना** शिवत्वभावनैव **परशुः** परश्वथः, परान् शृणाति हन्ति इति – पर+शृ+कु (उ) (उ.१.३३), छेदनसाधनविशेषः, 'कोडलि' इति कन्नडभाषायाम् ॥ **अज्ञानराक्षसोन्मेषकारिणः** अज्ञानम् अविद्या तदेव राक्षसः, तस्य उन्मेषः चक्षुषोरुन्मीलनं, तत् करोति इति, अज्ञानराक्षसोन्मेषकारि, 'णिनिः', तस्य, **संहृतात्मनः** संहृतः आच्छादितः आत्मा येन तत्, संहृतात्म, तस्य, **संसारतमसः** संसारः एव तमः, तस्य, **शिवध्यानं** स्वात्माभिन्नतया शिवस्य ध्यानं चिन्तनम्, **चण्डभास्करः** प्रखरसूर्यः, तादृशतमसो विनाशाय प्रचण्डसूर्य इत्यर्थः ॥ **पञ्चक्लेशाः**— अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्च ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(यो.सू.,१.३)। क्लेशेषु प्रथमः **अविद्या** नाम चतुर्विधः। तदुक्तम्– "अविद्या चतुष्पदा" (यो.सू.भा.)– "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" (यो.सू., २.५) इति । अनित्ये नित्यत्वम्, अशुचौ शुचित्वम्, असुखे सुखत्वम्, अनात्मनि आत्मत्वं चेति भ्रमाधीनप्रतीतिरविद्या । **अस्मिता** नाम दृक्दर्शनयोरात्मबुद्ध्योरैक्यभावेनोत्पन्नोऽहङ्कारः । तदुक्तम् – "दृक्दर्शनशक्त्योरेकात्मतैवास्मिता" (यो.सू., २.६) इति । 'अहं सुखी', 'अहं दुःखी', 'अहं कर्ता', 'अहं भोक्ता' इत्यादिभावनास्त्वस्मिताजन्याः । **रागो** नाम मनसि संस्कारभूतेन सुखाभिलाषरूपेण प्रवर्तमानं सुखानुभूतिस्मरणम् । तदुक्तम् – "सुखानुशायी रागः" (यो.सू., २.७) इति । तत्र पूर्वानुभूतसुखस्मरणं तदुपायश्च हेतुः । स्मरणं तत् तत्तत्पदार्थेभ्यस्तत्तदनुभवं पुनः प्राप्तुमिच्छां जनयति । दुःखमेव तस्य परिणामः । **द्वेषो** नाम दुःखहेतूनां प्रत्यसहना । तदुक्तम् – "दुःखानुशायी द्वेषः" (यो.सू. २.८) इति । केनापि विघ्नेन रागस्य प्रतिबन्धे द्वेष उत्पद्यते । अस्यापि परिणामो दुःखमेव । जन्मस्वनेकेषु मरणहेतुकभीतेः संस्कारः अनुवर्तते । बहुश्रुतानामपि मनसि एष संस्कारो निरन्तरं जागर्ति । तस्मात् सर्वेषु जीवितुम् अत्यासक्तिर्जागर्ति । सा एवाऽत्यासक्ति**रभिनिवेशशब्देन** व्यवह्रियते । तदुक्तम् – "स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः" (यो.सू.,२.९) इति । [स्वरसवाही = मरणभीतेरनुवर्तनम्] । एते पञ्चक्लेशाः संसारविषवृक्षस्य पत्राणि । "शिवोऽहंभावना" एव अस्य विषवृक्षस्य छेदने परशुः ॥ [पश्यत-१०.२६, १२.२१ श्लोकयोः व्याख्याम्] ॥३०-३१॥

– इति शिवयोगसमाधिस्थलम् –

४. अथ लिङ्गनिजस्थलम् – (३५)

स्वान्तस्थशिवलिङ्गस्य प्रत्यक्षानुभवस्थितिः ।
तस्यैव परलिङ्गस्य निजमित्युच्यते बुधैः ॥३२॥

व्याख्या— लिङ्गनिजस्थलं प्रतिपादयितुम् उद्युक्तो ग्रन्थकृत् 'निजम्' इति किं वस्तु इत्यत्राह – **स्वान्तस्थेत्यादिना** । **स्वान्तस्थशिवलिङ्गस्य** स्वान्ते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तिष्ठतीति स्वान्तस्थम्, स्वात्मनि स्थितं **शिवलिङ्गं** प्राणलिङ्गम्, तस्य, **प्रत्यक्षानुभवस्थितिः** प्रत्यक्षम् अनुभवः, तस्य स्थितिः, 'तदेवाहम्' इति स्वात्मनः प्राणलिङ्गेन तादात्म्यभावः। तस्यैव स्वात्मतादात्म्येन गृहीतस्य परलिङ्गस्य महालिङ्गस्य **'निजम् इति'** निजस्वरूपमिति **बुधैः** आत्मतत्त्वज्ञैः **उच्यते** कथ्यते॥ प्राणलिङ्गमेव स्वात्माभिन्नतया निजम् इति लिङ्गनिजस्थलं निरूप्यते॥ शिवलिङ्गं नामाऽत्र देशकालाकारसंकोचरहितत्वेन गृह्यमाणा 'पराहन्ता' एव। इयं साक्षात्कारस्थितिर्लौकिक-योगजप्रत्यक्षाभ्यां भिन्नम् आध्यात्मिकप्रत्यक्षम्। [पश्यत— १२.२५-२६ श्लोकयोर्व्याख्याम्] ॥३२॥

ब्रह्मविष्ण्वादयो देवाः सर्वे वेदादयस्तथा।
लीयन्ते यत्र गम्यन्ते तल्लिङ्गं ब्रह्म शाश्वतम् ॥३३॥

व्याख्या — तच्छिवलिङ्गस्य स्वरूपमाह — **ब्रह्मविष्ण्वादय इति। ब्रह्मविष्ण्वादयः** ब्रह्मविष्णुप्रभृतयः **देवाः** प्रकाशमानाः विबुधाः, **तथा** एवमेव **सर्वे वेदादयः** सकलाः वेदागमपुराणशास्त्रादिशब्दप्रमाणभूताः, च, **यत्र लीयन्ते** यस्मिन् लयं गच्छन्ति, **गम्यन्ते** च व्यक्ततां प्राप्नुवन्ति च, **तत् लिङ्गं** तच्छिवलिङ्गं **शाश्वतं ब्रह्म** आद्यन्तरहितं परशिवब्रह्मैव॥ तदुक्तम् — "पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे। मध्ये समुत्थितं लिङ्गमैश्वरं तैजसं परम्॥ ज्वालामालावृतं दिव्यमप्रमेयमनामयम्। कल्पान्ते तत्र लीयन्ते वर्तन्ते सर्वदेवताः॥ हृदये चैव गायत्री सर्वदेवोत्तमोत्तमा। लीयन्ते मूर्ध्नि वै वेदाः सषडङ्गपदक्रमाः॥ जठरे लीयते सर्वं जगत्स्थावरजङ्गमम्। पुनरुत्पद्यते यस्मात्तद्ब्रह्म लिङ्गसंज्ञकम्॥" (चं.आ., क्रि.पा., ३.५-८) इति। अन्यत्राप्युक्तम् — "देवदानवगन्धर्वा वेदाः साङ्गा सनातनाः। उत्पद्यन्तेऽत्र कल्पादौ कल्पान्ते च लयं गताः॥ दक्षिणाङ्गात्ततो ब्रह्मा विष्णुर्वामाङ्गतस्तथा। समस्तवेदजननी गायत्री हृदयादभूत्॥ वेदाः शिरःसमुद्भूताः साङ्गोपाङ्गाः सहस्रशः। उत्पद्यते लीयते च लिङ्गेऽस्मिन् सचराचरम्॥" (सू.आ., क्रि.पा., ६.१३-१५) इति, "अस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वङ्गिरसः पुराणं विद्या उपनिषदः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निःश्वसितानि ॥" (बृ.उ., २.४.१०; ४.५.११) इति, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥" (श्वे.उ., ६.८) इति च ॥३३॥

चिदानन्दमयः साक्षाच्छिव एव निरञ्जनः ।
लिङ्गमित्युच्यते नान्यद् यतः स्याद्विश्वसम्भवः ॥३४॥

व्याख्या — तदेव पुनराह – **चिदानन्दमय इति । चिदानन्दमयः** चिच्च आनन्दश्च चिदानन्दौ, तयोः स्वरूपवान् **निरञ्जनः** निर्गतः अञ्जनः यस्मात् सः निरञ्जनः, मालिन्यरहितः, **शिव एव** परशिव एव **साक्षात्** स्वस्वरूपतया **लिङ्गम् इति उच्यते** लिङ्गमिति कथ्यते । **यतः** यस्माद् **विश्वसम्भवः** जगदुत्पत्तिः तद् एव तत्, **नान्यत्** किमप्यन्यत् तन्न भवति ॥ "आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ति" (तै.उ., ३.६) इति श्रुत्युक्तदिशा लिङ्गमेव जगदुत्पत्तिस्थितिलयकारणम् इति वक्तव्यम् । **चिदानन्दमयः** सच्चिदानन्दस्वरूपः, सद्रूपः, चिद्रूपः, आनन्दरूपश्च ॥ उक्तं च – "ऋतं सत्यं परं ब्रह्म सच्चिदानन्दलक्षणम् । अनन्यपरमं ब्रह्म तदतो ध्येयमास्तिकैः ॥" (चं.आ., क्रि.पा., ३.२१) इति । अन्यत्राप्युक्तम् – "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तन्महालिङ्गमुच्यते ॥" (चं.आ., क्रि.पा., ३.२०) इति ॥३४॥

बहुनात्र किमुक्तेन लिङ्गमित्युच्यते बुधैः ।
शिवाभिधं परं ब्रह्म चिद्रूपं जगदास्पदम् ॥३५॥

व्याख्या — लिङ्गं ब्रह्मेत्युक्त्वा तस्य जगदाश्रयत्वमाह – **बहुनेति । अत्र** अस्मिन् विषये **बहुना** अधिकतया **उक्तेन** कथितेन किं किं प्रयोजनम्? **बुधैः** शास्त्रवेदिभिः **चिद्रूपं** चित्स्वरूपं **जगदास्पदं** जगदा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रयभूतं **शिवाभिधं** शिवः इति अभिधा अभिधानं यस्य तत्, तादृशं **परं ब्रह्म** परमं ब्रह्म एव **लिङ्गम्** इति निजलिङ्गम् इति **उच्यते** अभिधीयते॥ शुद्धचित्स्वरूपं जगदाधारभूतं च परशिवब्रह्मैव निजलिङ्गमित्यागमपारगाः। "आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका। आलयः सर्वभूतानां लयनाल्लिङ्गमुच्यते ॥" (चं.आ., क्रि.पा., ३.५१) इत्युक्तरीत्या विश्वमेव लिङ्गम्। लिङ्गे एव वयं जाताः, लिङ्गे एव वयं जीवामः, लिङ्गे एव वयं लयं गच्छामः। अस्माकं बाह्याभ्यन्तरमित्युभयमपि लिङ्गमेव। अस्याऽज्ञानमेव संसारकारणम्। इति गुरुरूपो महात्मा कोऽपि ब्रूयाद् ॥३५॥

वेदान्तवाक्यजां विद्यां लिङ्गमाहुस्तथापरे।
तदसज्ज्ञेयरूपत्वाल्लिङ्गस्य ब्रह्मरूपिणः ॥३६॥

व्याख्या — वेदान्तजन्यं ज्ञानमेव लिङ्गम्, इत्यस्याऽसत्प्रतीतित्वेन निरूप्यते – **वेदान्तवाक्यजाम्** इति। **अपरे** अन्ये केचन **तथा** एव **वेदान्तवाक्यजां** वेदान्तवाक्यजन्यां **विद्यां** ज्ञानं **लिङ्गम् आहुः** शिवलिङ्गम् इति कथयन्ति। **तद् असत्** तद् असमीचीनम्, **ब्रह्मरूपिणः** ब्रह्मस्वरूपवतः **लिङ्गस्य** शिवलिङ्गस्य **ज्ञेयरूपत्वात्** ज्ञेयं ज्ञातुं विषयीभूतं, ज्ञेयं रूपं, तत्त्वात् ज्ञेयस्वरूपत्वात्॥ "प्रज्ञानं ब्रह्म" (ऐ.उ., ५.३), "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०), "तत्त्वमसि" (छां.उ., ६.८.७), "अयमात्मा ब्रह्म" (बृ.उ., २.५.९), एतानि वेदान्तवाक्यानि तादृशज्ञानमेव ब्रह्म इति बोधयन्ति। एवं श्लोके 'अपरे' इत्यनेन केचन वेदान्तिनः ज्ञातव्याः। अत्र ग्रन्थकृतो मते ज्ञानं साधनमेव, न तु साध्यम्। अतः वेदान्तवाक्यजन्यं ज्ञानमेव लिङ्गम् इत्यसत् तस्य केवलं साधनत्वात्। साध्यं तावदत्र ब्रह्मलिङ्गस्य स्वस्वरूपतया साक्षात्कारः। अत्रेदम् अनुसन्धेयम् – विद्या द्विविधा शब्दब्रह्मविद्या परब्रह्मविद्या चेति। तत्र शब्दब्रह्मविद्या नाम शास्त्रविद्या यस्याः शब्दप्रमाणमिति नामान्तरम्, परब्रह्मविद्या च स्वरूपविद्या। शब्दब्रह्मणि ज्ञाते परब्रह्म ज्ञायते। शब्दब्रह्म साधनं परब्रह्म च साध्यम्। धान्यार्थी यथा तोलनसाधनं विहाय धान्यमेव गृह्णाति तथा परब्रह्मसाक्षात्कारार्थी विहाय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शास्त्रप्राप्तज्ञानं परब्रह्ममात्रं साध्यत्वेन गृह्णाति । तदुक्तम् – "द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्त्वतः । पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥" (अमृत-ब्रह्म. विं. उ., १७-१८) इति ॥३६॥

अव्यक्तं लिङ्गमित्याहुर्जगतां मूलकारणम् ।
लिङ्गी महेश्वरश्चेति मतमेतदसङ्गतम् ॥३७॥

व्याख्या— मतान्तरमुद्भाव्य तन्निराकरोति – **अव्यक्तम् इति । जगतां** प्रपञ्चानां **मूलकारणं** मूलभूतम् उपादानकारणम् **अव्यक्तं** प्रकृतिः एव **लिङ्गम् इति** परब्रह्मलिङ्गम् इति आहुः वदन्ति, **लिङ्गी च** लिङ्गम् अस्यास्ति इति लिङ्गी, लिङ्गवान्, **महेश्वरः इति** परमेश्वरः परशिवः इति **एतन्मतम्** अयं वादः **असङ्गतम्** असमञ्जसम् ॥ "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्वेताश्वरोपनिषदि (४.१०) व्यक्तं मतम् । एतन्मतम् अनुपपन्नम्, प्रकृतेर्जडत्वात् हेयत्वाच्च । अनेन साङ्ख्यानां प्रकृतिकारणवादो निराकृतः ॥३७॥

न सूर्यो भाति तत्रेन्दुर्न विद्युन्न च पावकः ।
न तारका महालिङ्गे द्योतमाने परात्मनि ॥३८॥

व्याख्या — निजलिङ्गे द्योतमाने सूर्यादयः न भान्ति, केवलं अनुभान्तीत्याह – नेति । **परात्मनि** परमात्मनि **महालिङ्गे** निजलिङ्गे **द्योतमाने** प्रकाशमाने सति, **तत्र** तस्मिन् महति प्रकाशे **सूर्यः** आदित्यः **न भाति** न प्रकाशते, **इन्दुः न** चन्द्रः न प्रकाशते, **विद्युत् न** सौदामिनी न प्रकाशते, **पावकः न** अग्निः न प्रकाशते, **तारकाः न** नक्षत्राणि न प्रकाशन्ते ॥ उक्तं च "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ।" (कठ.उ., ५.१५; मुं.उ; २.२.१०; श्वे.उ., ६.१४) इति ॥ सूक्ष्मागमोत्तरेऽपि उक्तम्·– "तस्यैव तेजसा देवि चन्द्रादिग्रहतारकाः । प्रकाशन्ते नियमिताः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कालक्लृप्त्या दिवानिशम् ॥" (सू.आ., क्रि.पा., ६.९ – तस्यैव = महालिङ्गस्य) ॥३८॥

ज्योतिर्मयं परं लिङ्गं श्रुतिराह शिवात्मकम् ।
तस्य भासा सर्वमिदं प्रतिभाति न संशयः ॥३९॥

व्याख्या — सूर्यादयो न भान्ति इत्युक्तम्, तथापि ते प्रकाशन्ते, तर्हीदं कथम् इत्यत्राह – **ज्योतिर्मयम् इति । ज्योतिर्मयं** ज्योतिस्स्वरूपं **परं शिवात्मकं लिङ्गं** परमं तच्छिवस्वरूपं प्राणलिङ्गम्, इति **श्रुतिराह** श्रुतिः कथयति । **तस्य** ज्योतिस्स्वरूपस्य शिवलिङ्गस्य **भासा** प्रकाशेन **इदं सर्वं** विश्वमिदं सर्वं सूर्यादिकं **प्रतिभाति** प्रकर्षेण प्रकाशते । अत्र **न संशयः** सन्देहलेशोऽपि नास्ति ॥ "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" (कठ.उ., ५.१५; श्वे.उ.६.१४; मुं.उ., २.२.१०) इति श्रुतिस्तु पूर्वमेवोदाहृतम् । सूर्यस्य प्रकाशश्चन्द्रविद्युदग्नितारकादीनां प्रकाशम् अतिशेते । यथा चन्द्रादयः सूर्यतेजसः पुरतः स्वप्रकाशं जहाति तथा सूर्योऽपि महालिङ्गप्रकाशस्य पुरतः स्वीयं प्रकाशं जहाति । सूर्यादीनां भौतिकविश्वाङ्गत्वेन मातृमानमेयरूपत्रिपुटीयुक्तत्वात् तेषां प्रकाशः महालिङ्गप्रकाशमवलम्बते । महालिङ्गं त्वग्राह्यं स्वयंप्रकाशं च । तदुक्तम् – "अत्रायं पुरुषः स्वयंज्योतिर्भवति" (बृ.उ., ४.३.९) इति ॥३९॥

लिङ्गान्नास्ति परं तत्त्वं यदस्माज्जायते जगत् ।
यदेतद्रूपतां धत्ते यदत्र लयमश्नुते ॥४०॥

तस्माल्लिङ्गं परं ब्रह्म सच्चिदानन्दलक्षणम् ।
निजरूपमिति ध्यानात् तदवस्था प्रजायते ॥४१॥

व्याख्या — जगज्जन्मस्थितिध्वंसकारणत्वात् परब्रह्मरूपलिङ्गं स्वात्मनो निजस्वरूपत्वेन प्राणलिङ्गध्याने कृते निजलिङ्गमेव भवतीति युग्मेनोच्यते – **लिङ्गाद् इत्यादिना । यत्** यस्मात् कारणात् **जगत्** इदं विश्वं **अस्मात् लिङ्गात् जायते** उत्पत्तिं भजते, **यत्** यस्मात् कारणात् **एतद्रूपतां**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एतल्लिङ्गरूपतां **धत्ते** प्राप्नोति, **यद् अत्र** यस्मात् कारणात् अस्मिन् महालिङ्गे एव **लयम् अश्नुते** विलयं प्राप्नोति **तस्मात्** तत्कारणात् **सच्चिदानन्दलक्षणं** सच्चिदानन्दस्वरूपं **परं ब्रह्म** परब्रह्मरूपं **लिङ्गं** महालिङ्गं **निजरूपमिति** निजात्मस्वरूपमिति **ध्यानात्** निदिध्यासात् **तदवस्था प्रजायते** तन्महालिङ्गस्वरूपता सम्भवति । इदमेव निजलिङ्गस्थलम् । इदं च श्लोकद्वयं "यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्म ।" (तै.उ., ३.१) इति, "सर्वं खल्विदं ब्रह्म तज्जलान् इति शान्त उपासीत" (छां.उ., ३.१४.१) इति च श्रुत्योर्ध्वनिमेवाऽनुरणति । [तज्जम् – तस्माज्जातम्, तल्लम् – तस्मिन् लीनम्, तदन् – तस्मिन् अनिति इति तज्जलान्, इदं सर्वं जगद् ब्रह्म, इति शान्त ध्यायेत्] । तदेव पुरुषशब्दवाच्यं परशिवब्रह्म । तस्मात् परं न किञ्चिदिति जानीयात् । तदुक्तम् – "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ।" (कठ.उ., ३.७) इति ॥४०-४१॥

– इति निजलिङ्गस्थलम् –

५. अथ अङ्गलिङ्गिस्थलम् – (३६)

ज्ञानमङ्गमिति प्राहुर्ज्ञेयं लिङ्गं सनातनम् ।
विद्यते तद्द्वयं यस्य सोऽङ्गलिङ्गीति कीर्तितः ॥४२॥

व्याख्या — लिङ्गनिजस्थलानुभवसम्पन्नस्याऽङ्गलिङ्गिस्थलं विवक्षुः ग्रन्थकृद् अङ्गलिङ्गिनो लक्षणमाह – **ज्ञानमिति** । **ज्ञानं** शिवज्ञानमेव **अङ्गम्** इति अङ्गपदवाच्यः जीवः इति, **ज्ञेयं** तेन जीवेन ज्ञातुं योग्यं **सनातनं** आद्यन्तरहितं नित्यं **लिङ्गं** लिङ्गपदवाच्यं परशिवब्रह्म, इति **प्राहुः** वदन्ति । **तद्द्वयं** अङ्गं लिङ्गम् चेत्युभयं **यस्य** प्राणलिङ्गिनः **विद्यते** वर्तते, **सः** स एव **अङ्गलिङ्गीति** अङ्गलिङ्गी इति **कीर्तितः** उक्तः ॥ प्राणलिङ्गं ज्ञानलिङ्गमित्युक्तम् । तज्ज्ञानलिङ्गध्यानेन जीवस्य ज्ञानस्वरूपता जायते । अत एवोक्तं ज्ञानम् अङ्गम् इतिं । 'अं शिवं गच्छति इति अङ्गः' इति निष्पत्त्यनुसारं लिङ्गाभिमुखी जीव एव अङ्गशब्दवाच्यः । गमनं च तत् शिवयोगमुखेन ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

'लीयते गम्यते यत्र जगदेतच्चराचरम्' इति लिङ्गशब्दनिष्पत्तिस्तु पूर्वमेव दत्ता। उभयोः सामरस्यात्मकैक्यपूर्वभावितयाऽङ्गलिङ्गयोः स्वरूपसंबन्ध-ज्ञानम् अवश्यंभावि। एतज्ज्ञानवान् एवाऽङ्गलिङ्गी, नास्त्यत्र भेदज्ञानं, प्रत्युत सम्बन्धज्ञानम् इति मन्तव्यम् ॥४२॥

अङ्गे लिङ्गं समारूढं लिङ्गे चाङ्गमुपस्थितम्।
एतदस्ति द्वयं यस्य स भवेदङ्गलिङ्गवान् ॥४३॥

व्याख्या — नेदं भेदज्ञानं, सम्बन्धज्ञानं चेदम् इति विशदीक्रियते — अङ्गे इति। **अङ्गे** जीवात्मनि **लिङ्गं** परमात्मा **समारूढं** समावेशं प्राप्तवान्, **लिङ्गे च** परमात्मनि च **अङ्गं** जीवात्मा **उपस्थितम्** समुपस्थितः, इति **यस्य** प्राणलिङ्गिनः **एतद्द्वयम्** अङ्गे लिङ्गसमावेशः लिङ्गे अङ्गसमुपस्थितिश्चेति द्वयमेतत् **अस्ति** भवति **सः** तादृशः **अङ्गलिङ्गवान्** अङ्गलिङ्गी **भवेत्** स्यात् ॥ वीजाङ्कुरन्यायेन इदं समर्थयितुं शक्यते — लिङ्गं बीजम् अङ्गं चाऽङ्कुरः। अभिव्यक्तेः प्राग् अङ्कुरो बीजे निहितः, स एव बीजात् उद्भिनत्ति। एवमस्ति तयोः परस्परं समन्वयः। यो हि समन्वयमिमं जानाति सैवाङ्ग-लिङ्गी। अस्य समन्वयस्य दाढर्याय स्थैर्याय च तज्ज्ञानस्य निरन्तरानुसन्धानं करणीयत्वेनाऽपेक्ष्यते ॥४३॥

ज्ञात्वा यः सततं लिङ्गं स्वान्तस्थं ज्योतिरात्मकम्।
पूजयेद्भावयन्नित्यं तं विद्यादङ्गलिङ्गिनम् ॥४४॥

व्याख्या — न प्राणलिङ्गस्य ज्ञानमात्रं पर्याप्तम्, भाववस्तुभिस्तत्पू-जनमप्यपेक्षितम् इत्याह — **ज्ञात्वा** इति। **यः** यः प्राणलिङ्गी **स्वान्तस्थं** स्वहृत्पद्मे स्थितं **ज्योतिरात्मकं** ज्योतिः आत्मा स्वरूपं यस्य सः, ज्योतिःस्वरूपं **सततं** शाश्वतं **लिङ्गं** प्राणलिङ्गं **ज्ञात्वा** अवधार्य, **तत् नित्यं** निरन्तरं **भावयन्** ध्यायन् **पूजयेत्** पूजां कुर्यात्, **तं** तं प्राणलिङ्गिनम् अङ्गलिङ्गिनं अङ्गलिङ्गीति **विद्यात्** जानीयात् ॥ काशी-जङ्गमवाडीमठद्वारा १९९३ तमे वर्षे प्रकटिते सिद्धान्तशिखामणौ, एन्. आर्. करिबसव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शास्त्रिणा सम्पादिते १९२१ तमे वर्षे प्रकटिते सिद्धान्तशिखामणौ च 'विद्यात्' इत्यस्य स्थाने 'विन्द्यात्' इति पाठान्तरं, 'भावयन्' इत्यस्य स्थाने 'भावयेत्' इति पाठान्तरं च उपलभ्येते। आभ्यन्तरलिङ्गं प्राणलिङ्गम् अशरीरं (निराकारं) सद् अङ्गुष्ठमात्रपुरुषत्वेन श्रुतिषु वर्ण्यते। निर्देहो देहेषु स्थितः सन् अस्थिरेषु स्थिरतां भजते। "अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति" इति, "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः" इति, "अङ्गुष्ठ-मात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः" इति च, कठश्रुतिः (कठ.उ., ४.१२, ४.१३, ६.१७) ॥४४॥

ज्ञायते लिङ्गमेवैकं सर्वैः शास्त्रैः सनातनैः।
ब्रह्मेति विश्वधामेति विमुक्तेः पदमित्यपि ॥४५॥

मुक्तिरूपमिदं लिङ्गमिति यस्य मनःस्थितिः।
स मुक्तो देहयोगेऽपि स ज्ञानी स महागुरुः ॥४६॥

व्याख्या — लिङ्गमेकं बहुधा गृह्यते, तज्ज्ञाने दृढमनस्को जीवन्मुक्त इति कथ्यते – **ज्ञायते इत्यादिना युग्मेन**। एकम् एव निजलिङ्गम् एकम् एव **सनातनैः** शाश्वतैः **सर्वैः शास्त्रैः** सकलैः वेदागमादिशास्त्रैः **ब्रह्मेति** परं ब्रह्म इति, **विश्वधामेति** विश्वस्य धाम, सर्वस्य जगतः आश्रयः इति, अपि पुनः **विमुक्तेः पदम्** इति मोक्षस्य स्थानम् इति च **ज्ञायते** अवगम्यते। **इदं लिङ्गं** निजलिङ्गम् इदं **मुक्तिरूपं** इति मोक्षस्वरूपम् इति **यस्य** यस्य प्राणलिङ्गिनः **मनःस्थितिः** मनसः स्थितिः, दृढचित्तं, **सः** तादृशः **देहयोगेऽपि** शरीरसम्बन्धवान् अपि **मुक्तः** मोक्षभाक्, **सः** स एव **ज्ञानी** शिवज्ञानी, **सः** स च पुनः **महागुरुः** महान् गुरुः॥ लिङ्गं बिन्दुनादात्मकम्। तदुक्तम् – "बिन्दुनादात्मकं लिङ्गं जगत्कारणमुच्यते। .... माता देवी (= शक्तिः) बिन्दुरूपा नादरूपः शिवः पिता ॥" (चं.आ., क्रि.पा., ३.१६-१७) इति। तदेव बहुधा उच्यते। तदेव पुनः शम्भोर्मुख्यं स्थानम्, तस्य ध्यानेन जीवन्मुक्तिः। तदुक्तम् – "ज्योतीरूपं तदेव स्यात् स्थानं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मुख्यं महेशितुः । तत्र निध्यायमानं तु शम्भुर्मोचयतेऽचिरात् ॥'' (चं.आ., क्रि.पा., ३.३६) इति ॥४५-४६॥

अनादिनिधनं लिङ्गं कारणं जगतामिह ।
ये न जानन्ति ते मूढा मोक्षमार्गबहिष्कृताः ॥४७॥

व्याख्या — निजलिङ्गज्ञानरहितानां नास्ति मुक्तिरित्याह — **अनादिनिधनम् इति । अनादिनिधनं** आदि च निधनं च आदिनिधने, न विद्येते आदिनिधने यस्य तत् अनादिनिधनम्, आद्यन्तरहितं, जनन-मरणादिदोषरहितमित्यर्थः, तादृशं **लिङ्गं** निजलिङ्गम् **इह** अत्र **जगतां** लोकानां **कारणं** सृष्टिस्थितिलयकारणम् इति, **ये** ये जनाः **न जानन्ति** न अवगच्छन्ति **ते** ते जनाः **मूढाः** मूर्खाः, अज्ञानिनः, ते च **मोक्षमार्ग-वहिष्कृताः** बहिः कृताः बहिष्कृताः, दूरीकृताः, मोक्षमार्गात् बहिष्कृताः मोक्षमार्गबहिष्कृताः, मोक्षपथवञ्चिताः इत्यर्थः ॥ मोक्ष एव परम-पुरुषार्थः । प्राणलिङ्गापरनाम्नो निजलिङ्गस्य ज्ञानेन ध्यानेन चैव शक्यते तं प्राप्तुम् । इदं परब्रह्मलिङ्गं साक्षात्कर्तुं शक्यते ''यथाऽऽदर्शे तथात्मनि'' (कठ.उ., ६.४) स्वात्मनि परमात्मानं दर्शनीयम् । इदं तत्र कठश्रुतेः सर्वेभ्यो मानवेभ्यः चोदना— ''उत्तिष्ठत! जाग्रत! प्राप्य वरान् निबोधतः!'' (३.१४) इति । न कमपि कालः प्रतीक्षते ॥४७॥

यः प्राणलिङ्गार्चनभावपूर्वैर्
धर्मैरुपेतः शिवभावितात्मा ।
स एव तुर्यः परिकीर्तितोऽसौ
संविद्विपाकाच्छरणाभिधानः ॥४८॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ प्राणलिङ्गिनः पञ्चस्थलप्रसङ्गो नाम द्वादशः परिच्छेदः समाप्तः ॥१२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या — प्राणलिङ्गी एव ज्ञानपरिपाकेन शरणनामभाग् भवतीत्युक्त्वा प्राणलिङ्गिस्थलमुपसंहरति — **य इत्यादिना । यः** यः प्राणलिङ्गी **शिवभावितात्मा** शिवः इति भावितः आत्मा येन सः, शिवरूपेण भावितस्वात्मा, **प्राणलिङ्गार्चनभावपूर्वैः** प्राणलिङ्गस्य अर्चनं प्राणलिङ्गार्चनम्, तस्य भावेन पूर्वैः प्रमुखैः, भाववस्तुभिः प्राणलिङ्गार्चनस्य भावेन मुख्यतया युक्तैः **धर्मैः** चित्तद्वारा आचरणैः **उपेतः** समेतः **स एव तुर्यः** स एव चतुर्थः, भक्तादारभ्य गणनायां प्राणलिङ्गी एवः चतुर्थः, तथा **परिकीर्तितः** इति कथितः **असौ** अयं प्राणलिङ्गी **संविद्विपाकात्** ज्ञानपरिपाकवशात् **शरणाभिधानः** शरणः इति अभिधानं यस्य सः, शरणः इति नामभाजनः, भवतीति शेषः ॥ अत्र संविद्विपाको नाम भक्तिपरिपाकः, प्राणलिङ्गार्चनस्य ज्ञानांशभूतभाववस्तुभिः पूजनेन या भक्तिः परिपाकं प्राप्नोति तया शरणो भवतीत्यर्थः । सा एवाऽऽनन्दभक्तिर्या शरणस्थलसंगता । इदम् उपजातिवृत्तम् । केवलं तृतीय उपेन्द्रवज्रापादः । अन्ये त्रय इन्द्रवज्रापादाः । लक्षणमुक्तं प्राक् (२.३३) ॥४८॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
द्वादशः परिच्छेदः समाप्तः ॥१२॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्रयोदशः परिच्छेदः

शरणस्य चतुर्विधस्थलप्रसङ्गः

अथागस्त्यप्रश्नः । अगस्त्य उवाच –

माहेश्वरः प्रसादीति प्राणलिङ्गीति बोधितः ।
कथमेष समादिष्टः पुनः शरणसंज्ञकः ॥१॥

व्याख्या – माहेश्वरादिशब्दैर्बोधितः कथं शरण इत्युक्त इत्यगस्त्यः प्रपच्छ – **माहेश्वर** इति । **माहेश्वरः प्रसादी** इति माहेश्वरः प्रसादी चेति, **प्राणलिङ्गी** इति प्राणलिङ्गी इति च **बोधितः** उपदिष्टः । **एषः** प्राणलिङ्गिनामवान् **पुनः** पुनरपीदानीं **कथं** केन प्रकारेण **शरणसंज्ञकः** शरणनामभाग् इति **समादिष्टः** समादिश्यते? ॥१॥

श्रीरेणुक उवाच –

अङ्गलिङ्गी ज्ञानरूपः सती ज्ञेयः शिवः पतिः ।
यत्सौख्यं तत्समावेशे तद्वान् शरणनामवान् ॥२॥

व्याख्या – अगस्त्यप्रश्नस्य समाधानं श्रीरेणुकः प्रोवाच – **अङ्गलिङ्गी** इति । **ज्ञानरूपः** ज्ञानमेव रूपं यस्य सः ज्ञानरूपः, शिवज्ञानस्वरूपः, **अङ्गलिङ्गी** अङ्गमेव लिङ्गम् अस्यास्तीति अङ्गलिङ्गी, स्वात्मानमेव परमात्मानं मन्यमानः प्राणलिङ्गी, **सती ज्ञेयः** स्वात्मानं सतीति ज्ञातव्यः, **शिवः पतिः** परमात्मा शिवः पतिरिति ज्ञेयः । **तत्समावेशे** तयोः समावेशे तत्समावेशे अङ्गलिङ्गसामरस्यरूपयोगे **यत् सौख्यं** यादृशम् सौख्यम्, यादृशः आनन्दः, **तद्वान्** तद्युक्तः **शरणनामवान्** शरणनामयुक्तः ॥ तत्सौख्यस्य स्वरूपं वृहदारण्यके उक्तमनन्यसदृशतया– "तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न वाह्यं किञ्चन वेद नान्तरम्, एवमेवायं पुरुषः प्राज्ञेनात्मना सम्परि-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" (बृ. उ., १४.३.२१) इति । सूक्ष्मागमोत्तरे शरणेनाऽस्य समन्वयो दृश्यते – "लिङ्गं पतिः सती चाहं भावोऽयं वीरशैविनाम् ।" (क्रि. पा., ७.५२) इति । अयमेव शरणसती-लिङ्गपतिभावो यश्च शरणस्थलस्य वैशिष्ट्यम् । सर्वार्पणभावेन परमात्म-न्याश्रयं प्राप्तस्य 'शरणः' इत्यन्वर्थं नाम । 'तत्सौख्यम्' इत्यनेन शरणस्य भक्तिरानन्दभक्तिरिति द्योत्यते । "अन्योऽऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः" (तै. उ., २.५) इत्युक्तरीत्या आनन्दभक्तिमानयं शरण आनन्दमयकोशे संस्थितः ॥ समावेश-सामरस्यादिपदैरत्र क्वचित्साध्यता-स्थितिः, क्वचित्सिद्धस्थितिश्चोक्ते ॥२॥

स्थलमेतत्समाख्यातं चतुर्धा धर्मभेदतः ।
आदौ शरणमाख्यातं ततस्तामसवर्जनम् ॥३॥

ततो निर्देशमुद्दिष्टं शीलसम्पादनं ततः ।
क्रमाल्लक्षणमेतेषां कथयामि निशाम्यताम् ॥४॥

व्याख्या – शरणस्थलस्याऽवान्तरस्थलान्यस्मिन् युग्मे निर्दिष्टानि – **स्थलमेतदित्यादिना** । **एतत् स्थलम्** एतत् शरणस्थलम् **धर्मभेदतः** आचारभेदवशात् **चतुर्धा समाख्यातं** चतुर्विधत्वेन समुद्दिश्यते । **आदौ शरणम् आख्यातम्** आरम्भे शरणस्थलम् – (१) इत्युक्तम्, **ततः** तदनन्तरं **तामसवर्जनम्** तामसनिरसनस्थलम् – (२) **ततः** तत्पश्चात् **निर्देशम् उद्दिष्टं** निर्देशस्थलम् – (३) उक्तम्, **ततः** पुनस्तदनन्तरं **शीलसम्पादनं** शीलसम्पादनस्थलम् – (४) ॥ **क्रमात्** निर्देशक्रमतः **एतेषां** एतेषाम् अवान्तरस्थलानां **लक्षणं** वैशिष्ट्यद्योतकं लक्षणं **कथयामि** वदामि, **निशाम्यताम्** श्रूयताम् ॥३-४॥

१. अथ शरणस्थलम् – (३७)

सतीव रमणे यस्तु शिवे शक्तिं विभावयन् ।
तदन्यविमुखः सोऽयं ज्ञातः शरणनामवान् ॥५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शरणस्य लक्षणमाह – **सतीवेति । रमणे** प्रियतमे **सती** इव सती प्रियतमा यथा तथा **शिवे** परमात्मनि **शक्तिं** स्वात्मानमेव अविनाभावशक्तिं **विभावयन्** विशेषेण भावयन्; **यः तु** यस्तावत् **तदन्यविमुखः** शिवलिङ्गादन्यस्मात् देवतान्तरात् पराङ्मुखः सन् **सोऽयं** स एव अयं **शरणनामवान्** 'शरण'नामयुक्त इति **ज्ञातः** अवगतः ॥ (पश्यत – १३.२ श्लोकस्य व्याख्याम् ॥५॥

परिज्ञाते शिवे साक्षात् को वाऽन्यमभिकाङ्क्षति ।
निधाने महति प्राप्ते कः काचं याचतेऽन्यतः ॥६॥

शिवानन्दं समासाद्य को वाऽन्यमुपतिष्ठते ।
गङ्गामृतं परित्यज्य कः काङ्क्षेन्मृगतृष्णिकाम् ॥७॥

संसारतिमिरच्छेदे विना शङ्करभास्करम् ।
प्रभवन्ति कथं देवाः खद्योता इव देहिनाम् ॥८॥

संसारार्तः शिवं यायात् ब्रह्माद्यैः किं फलं सुरैः ।
चकोरस्तृषितः पश्येच्चन्द्रं किं तारका अपि ॥९॥

शिव एव समस्तानां शरण्यः शरणार्थिनाम् ।
संसारोरगदष्टानां सर्वज्ञः सर्वदोषहा ॥१०॥

शिवज्ञाने समुत्पन्ने परानन्दः प्रकाशते ।
तदासक्तमना योगी नान्यत्र रमते सुधीः ॥११॥

व्याख्या – शिवासक्त एव शरण इति सदृष्टान्तं निरूप्यते – **परिज्ञाते** इत्यादिना श्लोकषट्केन । **शिवे साक्षात् परिज्ञाते** (सति) परमात्मनि शिवे साक्षत्तया अवगते सति, **को वा** कः वा पुरुषः **अन्यम्** अन्यं देवम् **अभिकाङ्क्षति** अभिलषति ? न कोऽपि इत्यर्थः । तत्र दृष्टान्तः – **महति निधाने प्राप्ते** (सति) महति निक्षेपे लब्धे सति, **कः** कः पुरुषः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अन्यतः अन्यस्मात् **काचं याचते** काचमणिं प्रार्थयते ? न कोऽपि इत्यर्थः ॥ **शिवानन्दं** शिवयोगानन्दं सम्प्राप्य **को वा** कः पुरुषो वा **अन्यम् उपतिष्ठते** देवतान्तरं सेवते ? न कोऽपि इत्यर्थः । तत्र दृष्टान्तः – **गङ्गामृतं** गङ्गाया अमृतोपमं जलं **परित्यज्य** विहाय **कः** कः पुरुषः **मृगतृष्णिकां** मरीचिकां **काङ्क्षेत्** अभिलषेत् ? न कोऽपि इत्यर्थः ॥ **देहिनां** शरीरिणां **संसारतिमिरच्छेदे** संसारः एव तिमिरं संसारतिमिरम्, तस्य छेदे परिहारे विषये, **शङ्करभास्करं विना** शङ्करः एव भास्करः सूर्यः, तं विना, तं विहाय **खद्योताः इव** ज्योतिरिङ्गणाः इव, 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः (२.२४९), 'मिञ्चिन हुळ' इति कन्नडभाषायाम्, **देवा** अन्ये देवाः **कथं प्रभवन्ति** केन प्रकारेण समर्था भवन्ति ? न कथमपि प्रभवन्ति इत्यर्थः ॥ **संसारार्तः** संसारेण आर्तः, संसारदुःखितः **शिवं यायात्** परमात्मानं शिवं गच्छेत्, तन्निवारणाय शिवम् आश्रयेत्; **ब्रह्माद्यैः सुरैः** ब्रह्मविष्णवादि-प्रभृतिभिः देवैः **किं फलं** किं प्रयोजनम् ? न किमपि प्रयोजनम् इत्यर्थः । तत्र दृष्टान्तः – **तृषितः** पिपासापीडितः **चकोरः** चकोरपक्षी **चन्द्रं पश्येत्** इन्दुं वीक्षेत; **तारका अपि** नक्षत्राण्यपि किं पश्येत् ? तृषितः चकोरः चन्द्रकिरणान् पिबतीति कविसमयः । तृषितस्य चकोरस्य चन्द्रः अपेक्षितः, न तु तारकाः । एवमेव संसारार्तस्य शिवः अपेक्षितः, नान्यः देवः ॥ **समग्राणां** समस्तानां **संसारोरगदष्टानां** संसारः एव उरगः अहिः, तेन द्रष्टाः दंशिताः, संसारोरगदष्टाः, तेषाम्, संसाररूपेण अहिना दंशितनाम्, **शरणार्थिनां** शरणम् आश्रयम् अर्थ्यन्ते इति शरणार्थिनः, तेषाम्, **सर्वज्ञः** सर्वं जानातीति सर्वज्ञः, सर्ववित्, **सर्वदोषहा** सर्वान् दोषान् हन्तीति सर्वदोषहा, संसाराहिविषादिसमस्तदोषविनाशकः, **शिव एव** परशिवः एव **शरण्यः** शरणे साधुः, आश्रयणीयः ॥ **शिवज्ञाने** 'शिवोऽहम्' इति स्वात्मन शिवाभिन्नत्वज्ञाने **समुत्पन्ने** सञ्जाते सति **परानन्दः** परमानन्दः **प्रकाशते** विजृम्भते । अतः **तदासक्तमनाः** तस्मिन् आसक्तं मनः यस्य सः, तादृशः शिवासक्तचित्तः, **सुधीः** धीमान् **योगी** शिवयोगी **नान्यत्र रमते** न अन्यत्र कुत्रापि आनन्दं प्राप्नोति ॥ **शरणस्तावत्** परशिवस्य महत्त्वे कारुण्ये च स्थिरमतिः सन् सर्वान् इतरान् देवान् परित्यज्य शिवमेव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शरणं व्रजति इति तु सर्वेषां श्लोकानां सामान्यतात्पर्यत्वेन ध्वन्यते । तादृशः शरण एव स्वात्मज्ञाने स्थिरबुद्धिः परमात्मसाक्षात्कारं प्राप्य मोक्षं विन्दति, परमात्मसाक्षात्कारं विना नास्त्यन्यो मार्गो मोक्षस्य । तदुक्तम् – "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥" (तै.आ., प्रश्न-३, पुरुषसूक्तम्, ८; शिव. उ., ३८) इति । प्राप्ते शिवज्ञाने नान्यत्किमपि प्राप्तव्यम् । तेन शिवानन्दः प्राप्यते अनुभूयते च । स एव परमतृप्तेः परमशान्तेश्च हेतुः । तस्मिन् परमशान्तिधामे का कथा संसारान्धकारस्य संसारार्तेर्वा ? नास्ति तयो-र्लेशोऽप्यवकाशः ॥६-११॥

तस्मात्सर्वप्रयत्नेन शङ्करं शरणं गतः ।
तदनन्तसुखं प्राप्य मोदते नान्यचिन्तया ॥१२॥

व्याख्या – शरणस्थलमुपसंहरन्नाह – **तस्मादिति** । **तस्मात्** उक्त-कारणात् **सर्वप्रयत्नेन** सर्वविधप्रयत्नेन चित्तेन वाण्या कर्मणा च **शङ्करं** परशिवं **शरणं गतः** आश्रितः सन् **तदनन्तसुखं** तस्माद् अनन्तसुखं सीमातीतम् आनन्दं **प्राप्य** समुपलभ्य **नान्यचिन्तया** अन्यचिन्तारहितत्वेन, विगलितवेद्यान्तरेण इति यावत्, **मोदते** रमते ॥ शरणेन प्राप्तस्या-ऽस्यानन्दस्य स्वरूपम् अनन्यसदृशत्वेन माण्डूक्यश्रुत्युक्तरीत्यैव वर्णनीयम्। तथा हि – "यत्र सुप्तो न कश्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥" (१.५) इति । अयं सुषुप्त्यवस्थानन्दः । सुप्तेन यदा कामो वा स्वप्नं वा नानुभूयते तदा तत्सुप्तिः सुषुप्तिरिति कथ्यते। तस्यां सुषुप्तौ मग्नस्य प्रज्ञानमयस्याऽऽनन्दानुभूतिरेव नान्या काचन । इयं तृतीयाऽवस्थाऽऽत्मनः, यस्यां स प्राज्ञ इत्युच्यते । आनन्द एवास्य तृप्तिः । तदुक्तम् – "स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसम् । आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥" (माण्डूक्य., १.४) इति । (जाग्रदवस्थायां विश्वात्मा, यः स्थूलेन तृप्तः, स्वप्नावस्थायां तैजसात्मा, यो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वासनारूपया प्रज्ञया (प्रविविक्तेन) तृप्तः, सुषुप्त्यवस्थायां च प्राज्ञात्मा यश्चाऽऽनन्देन तृप्तः, इति त्रिधा तृप्तिः)। शिवेन सहान्योन्यभावेन शरणः "एषोऽस्य आनन्दः" (बृ. उ., ४-३.३२) इति। आनन्देन तृप्तिं लभते। अयमेव तामसनिरासको भवति ॥१२॥

— इति शरणस्थलम् —

२. अथ तामसनिरसनस्थलम् – (३८)

शिवासक्तपरानन्दमोदिना गुरुणा यतः।
निरस्यन्ते तमोभावाः स तामसनिरासकः ॥१३॥

व्याख्या — शिवानन्दस्याऽनुभूतिसम्पन्नः शरणः स्वयमेव निरस्त-तमोभावः सञ्जायते इत्याह — **शिवासक्तेति। शिवासक्तपरानन्दमोदिना** शिवे आसक्तः शिवासक्तः, तस्मादेव परानन्दे परमानन्दे मोदते इति शिवासक्तपरानन्दमोदी, तेन **गुरुणा** गुरुस्वरूपेण श्रेष्ठेन शरणेन **यतः** यस्मात् कारणात् तेन **तमोभावाः** तमोविकाराः **निरस्यन्ते** निवार्यन्ते **सः तामसनिरासकः** स एव तामसनिरासकः, इति कथ्यते इति शेषः ॥ तमोविषयः सम्यगुपपादितो भगवता — "तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥" (भ. गी., १४.८०) इति। मोहनम्, प्रमादः, आलस्यम्, निद्रा च अत्रोक्ताः तमो-विकाराः (तमोभावाः)। एते एतादृशाश्चाऽन्ये तमोभावाः पुनस्तत्रैवोक्ताः — "अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोद एव च। तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥" (भ.गी., १४.१३) इति। सर्वे चैते शरणे नितरां निरस्ताः। शिवानन्दमग्नस्य शरणस्य कथं तमोविकाराः बाधितुमर्हन्ति ? अयं शरणः गुरुरित्युक्तः, तस्य कटाक्षमात्रेण सर्वेषु मायामोहादिपरिणामानां परा-स्तत्वात्। अत एव स तामसनिरासकः ॥१३॥

यस्य ज्ञानं तमोमिश्रं न तस्य गतिरिष्यते।
सत्त्वं हि ज्ञानयोगस्य नैर्मल्यं विदुरुत्तमाः ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शरणस्य तमोनिरासकत्वं किमर्थमित्यत्राह – **यस्येति** । यस्य यस्य साधकस्य **ज्ञानं** बुद्धिः **तमोमिश्रं** तमसा तमोभावैः इति यावत्, मिश्रं लोलीभूतं **तस्य** तादृशस्य **गतिः न इष्यते** सद्गतिः मोक्षस्वरूपिणी न प्राप्यते । **सत्त्वं हि** सत्त्वगुणः खलु **ज्ञानयोगस्य** ज्ञानसंप्राप्तिरूपस्य योगस्य **नैर्मल्यं** निर्मलसाधनम् इति **उत्तमाः** धीमन्तः **विदुः** जानन्ति ॥ तदुक्तं भगवता – "तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥" (भ. गी., १४. ६) इति । 'बध्नाति' इत्यत्र श्रीशङ्कराचार्य आह – "ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव विषयस्य अन्तःकरणस्य धर्मो, नात्मनः, आत्मधर्मत्वे सङ्गानुपपत्तेर्बन्धानुपपत्तेश्च ॥" (भ. गी. भा., १४. ६) इति । सत्त्वगुण एव ज्ञानयोगस्य साधनत्वेन मनोविकारभूतानां तमोभावानां निरासकः । शरणस्थले अनुभवभक्तेः परिणामभूताऽऽनन्दभक्तिः भवति ॥१४॥

शमो दमो विवेकश्च वैराग्यं पूर्णभावना ।
क्षान्तिः कारुण्यसम्पत्तिः श्रद्धा सत्यसमुद्भवा ॥१५॥

शिवभक्तिः परो धर्मः शिवज्ञानस्य बान्धवाः ।
एतैर्युक्तो महायोगी सात्त्विकः परिकीर्तितः ॥१६॥

व्याख्या – महायोगिनस्तामसनिरासकस्य शरणस्य गुणसम्पदुक्ता – **शम इत्यादिना युग्मेन । शमः** अन्तरिन्द्रियनिग्रहः, **दमः** बहिरिन्द्रिय-निग्रहः, **विवेकः** नित्यानित्यवस्तुविवेक आत्मानात्मभेदविचारो वा, **वैराग्यं** विरक्तिः, **पूर्णभावना** निरन्तरध्यानं धारावाहिकध्यानं वा, **क्षान्तिः** क्षमाभावः, **कारुण्यसम्पत्तिः** दयासम्पन्नता, **सत्यसमुद्भवा** सत्यात् समुद्भवा, यथार्थज्ञानसमुत्पन्ना **श्रद्धा** दृढा सक्तिः, **शिवभक्तिः** शिवे भक्तिः, **परो धर्मः** श्रेष्ठः शिवाचारः, एते **शिवज्ञानस्य** स्वाभिन्नत्वेन शिवस्य ज्ञानम्, तस्य, **बान्धवाः** सम्बन्धिनः । **एतैः** एतैः शमदमादिभिः **युक्तः** संयुक्तः **महायोगी** महान् योगी शरणः **सात्त्विकः** सत्त्वगुण-विशिष्टः, इति **परिकीर्तितः** कथितः ॥ एषा दशगुणसम्पत् प्राप्तशिवज्ञानस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवयोगिनश्च शरणस्य वैशिष्ट्यभूता । तादृशसाधकः, शरणः इति यावत्, अनया गुणसम्पदा सात्त्विक इति कथ्यते । सात्त्विकत्वे शिवयोगित्वम्, न तु राजसत्वे तामसत्वे वा । अत्र गुणानां विषयः किञ्चिद् विचार्यते । तत्र **शमदमयोर्मध्ये** दमः शमम् अवलम्बते । कुत इति चेदुच्यते – मनसा सन्निकर्षे एव बाह्येन्द्रियाणि स्वस्वविषयेषु प्रवृत्तानि भवन्ति । नो चेत् तानि न प्रवर्तन्ते स्वस्वविषयज्ञानं च न गृह्णन्ति । मनोनिवृत्तिं विना बाह्येन्द्रियप्रवृत्तिर्नैव शक्यते निवर्तयितुम् । मनोनिग्रह एव बहिरिन्द्रिय-निग्रहस्य साधनम् । अत एव **शमः** प्रथमं निर्दिष्टः । विवेकस्तावद् द्विविधः नित्यानित्यवस्तुविवेकः आत्मानात्मवस्तुविवेकश्चेति । एताभ्यां विवेकाभ्यां मनसो दृढता स्थिरता च सम्पाद्येते । पूर्वोक्तौ शमदमौ विवेकमवलम्बेते । एवम् उभयात्मकविवेकेन **वैराग्यं** समुत्पद्यते । **वैराग्यं** नाम लौकिकवस्तुषु तदुत्पन्नमिश्रसुखेषु चानासक्तिः । 'महायोगिनः शरणस्य मर्त्यलोकवत् स्वर्गोऽपि हेयः । इयं तस्य वैराग्यपरता । ततः पञ्चमो गुणः **पूर्णभावना** नाम । सा चाऽखण्डध्यानम् । धारावाहिक-ध्यानमिति तस्य नामान्तरम् । **क्षान्तिर्नाम** क्षमागुणः । सा चाऽपराधकृतः पुनः स्वात्मपरिष्काराय सदवकाशप्रदानात्मिकया सत्प्रेरणया कृता स्यात् । **कारुण्यसम्पत्तिः** सप्तमो गुणः । सर्वभूतदया, परेषां दुःखशमनाय सत्यभूतं साहाय्याचरणं तस्याः सत्परिणामः । **श्रद्धानामा** गुणः गुरुलिङ्ग-जङ्गमपूजायां तत्पादोदकप्रसादस्वीकारे चाऽनन्यसाधारणो विश्वासः । श्रद्धया ज्ञानम्, ज्ञानेन परा शान्तिः, शान्तिरेव परमगतिरूपमोक्षः । तदुक्तम् – "श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥" (भ. गी., ४. ३९) इति । **शिवभक्तिर्नाम** नवमो गुणः, येन शिवात्मीयता जायते; तत्सौख्येन शिवानन्दसौख्यम् अनुभूयते । **परो धर्म** इत्यनेन शिवभक्तानां सदाचारः ज्ञेयः । पञ्चाचारा-श्चात्रान्तर्भूताः । एते दशगुणास्तावद् भगवदुक्तदैवीसम्पदन्तभूतैर्गुणैः संवादिनः भवन्ति । तथा हि – "अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलत्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥" (भ. गी., १६. १-३) इति । शरणस्त्वन्तिमस्यैक्यस्थलस्य सन्निहितः । दशगुणस्य प्रस्तुतिद्वारा शरणेन लेशोऽपि तमो न सम्भाव्यते इति द्योत्यते ॥१५-१६॥

कामक्रोधमहामोहमदमात्सर्यवारणाः ।
शिवज्ञानमृगेन्द्रस्य कथं तिष्ठन्ति सन्निधौ ॥१७॥

व्याख्या – शरणस्य महाज्ञानम् अरिषड्वर्गसंहारकम् इत्याह – **कामक्रोधेत्यादि । शिवज्ञानमृगेन्द्रस्य** शिवज्ञानमेव मृगेन्द्रः सिंहः, तस्य, **सन्निधौ** समीपे (पुरतः) **कामक्रोधमहामोहमदमात्सर्यवारणाः** कामश्च क्रोधश्च महामोहश्च मदश्च मात्सर्यं च कामक्रोधमहामोहमदमात्सर्याणि, तानि एव वारणाः मत्तगजाः, **कथं तिष्ठन्ति** केन प्रकारेण वर्तन्ते ? कथमपि न तिष्ठन्तीत्यर्थः ॥ रूपकालङ्कारः । श्लोकेऽस्मिन्नरिपञ्चवर्ग उक्तः । लोभस्य समावेशे षड्वर्गः सम्पद्यते । अत्र **कामक्रोधलोभात्मकं** गुणत्रयं भगवता नरकद्वारमिति कथ्यते । तथा हि – "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥" (भ.गी., १६.२१) इति। तत्र कामस्तु जन्तूनाम् अत्यन्तं प्राकृतं दौर्बल्यम्। अस्योपशमनं नैव सुलभसाध्यम् । तदुक्तम् – "न जातु कामः कामाना-मुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥" (म. भा) इति । विषयसङ्गात् कामः सञ्जायते । कामस्यानुपशमने क्रोधः उत्पद्यते । लोभस्तु कामस्य प्रेरणया जायते । क्रोधवशादेव कार्याकार्यविचार-राहित्येन मोहः उत्पद्यते । मोहस्तु सर्वविनाशस्य हेतुः । तदुक्तम् – "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते । सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥ क्रोधाद् भवति संमोहः संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥" (भ. गी., २.६२-६३) इति । मदो नामाऽहंकारः । तेन प्रभावितो मनुष्यः स्वीयं जीवनोद्देशं विस्मरन् जननमरणचक्रे बद्धः परिवर्तते । कुलच्छलधनरूपयौवनराज्य-तपोविद्यारूपेण अष्टमदेन (च. ब. व., संपुट-२, व. सं. ९७७) व्याप्तो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवत्यात्मोद्धारमार्गाद् बहिष्कृतः । **मात्सर्यं** त्वन्येषां श्रेयोविषये असहिष्णुतां जनयति । **स्वश्रेयसो** मार्गमपि बाधते । एते षडात्मरिपवः शरणस्या-किञ्चनकराः, अध्यात्मसुखसम्पन्नत्वात् तस्य तेषां स्पर्शरहितत्वात् ॥१७॥

यत्र कुत्रापि वा द्वेष्टि प्रपञ्चे शिवरूपिणि ।
शिवद्वेषी स विज्ञेयो रजसाविष्टमानसः ॥१८॥

व्याख्या – राजसं विशेषयति – **यत्रेत्यादिना । रजसाविष्टमानसः** रजसा आविष्टम् मानसं यस्य सः, रजोगुणेन व्याप्तचित्तः सन् **यः** यो जीवः **शिवरूपिणि** शिवस्य रूपम् अस्यास्तीति शिवरूपी, तस्मिन् शिवरूपिणि **प्रपञ्चे** विश्वे **यत्र कुत्रापि** यस्मिन् कस्मिन्नपि, सर्वत्र इत्यर्थः **द्वेष्टि** द्वेषं करोति **सः** तादृशः जीवः **शिवद्वेषी** शिवं द्वेष्टि इति शिवद्वेषी, इति **विज्ञेयः** ज्ञातव्यः ॥ जगदिदं परमात्मनः शिवस्याभिव्यक्तस्वरूपम् । तदुक्तम् – "इदं सर्वं यदयमात्मा" (बृ. उ., २.४.६) इति, "सर्वं खल्विदं ब्रह्म" (छां. उ., ३.१४.१), "ब्रह्मैवेदं सर्वम्" (मुं. उ., २.२.११) इति, "मया ततमिदं सर्वं जगदव्यक्तमूर्तिना" (भ. गी., ९.४) इति च । सर्वजगतः द्वेषकारणं च रजोगुणः । यो हि विश्वं परमात्मानं शिवं च द्वेष्टि स राजसः । तदुक्तम् – "रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥" (भ. गी., १८.२७) इति । तादृशस्य सर्वत्र द्वेष एव परमं लक्षणम् । शरणास्तु तद्विपरीतगुणाः । तदुक्तम् – "ये पश्यन्ति जगज्जालं चिद्रूपं शिवयोगतः । निर्धूतमल-संस्पर्शास्ते स्मृताः शिवयोगिनः ॥" (सि. शि., ११.३७) इति । शरणः समस्तं विश्वं शिवस्वरूपेण पश्यति । 'ईशावास्यमिदं सर्वम्' (ईश. उ., १) इति श्रुत्युक्तदिशा शिवस्येदं जगदिति निध्यायन् शिवजगन्मयत्वमेव वीक्षते ॥१८॥

यो द्वेष्टि सकलान् लोकान् यो वाऽहङ्कुरुते सदा ।
योऽसत्यभावनायुक्तः स तामस इति स्मृतः ॥१९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – राजसलक्षणमुक्त्वा पुनस्तामसलक्षणमाह – **य इति । यः** यो जीवः **सकलान् लोकान्** सर्वान् लोकान् **द्वेष्टि** द्वेषेण पश्यति, **यो वा** यश्च पुनः **सदा** सर्वदा **अहङ्कुरुते** अहङ्कारं दधाति **यः** यश्च पुनः **असत्यभावनायुक्तः** असत्यभूताः भावनाः, ताभिः युक्तः, असद्भूतैः भावैः संयुक्तः, **सः** तादृशो जीवः **तामसः इति** तामसजीवः इति **स्मृतः** ज्ञातः ॥ सर्वप्राणिनां द्वेषः, मिथ्याभूतैर्भावैः समाविष्टत्वम्, अहङ्कारश्च तामसस्य लक्षणानि । मिथ्यागर्वः, अहङ्कारः, मिथ्याविचारपरता चेति त्रयस्याप्यविद्या एव निदानम् । "अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥" इति हि भगवदुक्त तामसलक्षणम् । (भ. गी., १८-२८) । राजसः तामसश्चेति उभयमपि भगवताऽऽसुरीसम्पदभिभूतत्वेन भाव्यते । तदुक्तम् – "प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥" (भ. गी., १६.७) इति । तादृशान् सर्वान् आसुरजन्मना भगवान् दण्डयति । तत्रैषा भगवदुक्तिः – "अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु ॥" (भ.गी., १६.१८-१९) इति । कामक्रोधलोभान् नरकद्वारत्वेन भगवता एव उक्तमिति पूर्वमेव कथितम् । त्रिभ्यस्तेभ्य मुक्तचित्तः सन् स्वात्मश्रेयसे यः प्रयतते स निश्चयेन परमं पदमवाप्नोति। तथा चोक्तम्– "एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः । आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥" (भ. गी., १६.२२) इति । निर्गततामसप्रवृत्तिः शरणः समरसैक्यरूपमुक्तेः सन्निहितो भवति ॥१९॥

तमोमूलाः हि सञ्जाता रागद्वेषादिपादपाः ।
शिवज्ञानकुठारेण च्छेद्यन्ते हि निरन्तरम् ॥२०॥

व्याख्या – शरणेन तमोमूलाः सर्वे भावा ज्ञानेन नितरां निरस्यन्ते इति रूपकेनाह – **तमोमूला इति । तमोमूलाः** तमः एव मूलं येषां ते तादृशाः तमोगुणरूपमूलवन्तः सन्तः, **सञ्जाताः** समुत्पन्नाः **रागद्वेषादि-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पादपाः अत्यासक्तिः रागः, परं प्रत्यसहनाबुद्धिः देषः, रागश्च द्वेषश्च रागद्वेषौ, तौ आदी येषां ते रागद्वेषादयः, ते एव पादपा, रागद्वेषादि-पादपाः, रागद्वेषादिवृक्षाः **शिवज्ञानकुठारेण** शिवज्ञानमेव कुठारः शिवज्ञानकुठारः, तेन, शिवज्ञानपरशुना **निरन्तरं** सदा **च्छेद्यन्ते हि** कृत्यन्ते इति प्रसिद्धम् ॥ तमोरूपमूलकारणे च्छिन्ने रागद्वेषादिवृक्षाः कथं तिष्ठन्ति? शरणे सर्वं तमो निरस्तम् । तस्मात् स सर्वदा रागद्वेषादिविदूरः सन् परशिवब्रह्मण्यैक्यं प्राप्तुं सन्निहितावकाशो भवति । भगवता प्रोक्तम् – "अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥" (भ. गी., १८.५३) इति । "ब्रह्मभूतः प्रसन्नात्मा" (भ. गी., १८.५४) इति ॥२०॥

शिवज्ञाने समुत्पन्ने सहस्रादित्यसन्निभे ।
कुतस्तमोविकाराः स्युर्महतां शिवयोगिनाम् ॥२१॥

व्याख्या – शिवयोगिनः तमोविकारा न सन्तीत्याह – **शिवज्ञाने** इति । **सहस्रादित्यसन्निभे** सहस्रम् आदित्याः, तेषां सन्निभे, सहस्रसूर्य-सदृशे **शिवज्ञाने** शिवस्य ज्ञानं शिवज्ञानम्, तस्मिन्, स्वाभिन्नत्वेन शिवस्वरूप-ज्ञाने **समुत्पन्ने** सति, सञ्जाते सति, **महतां शिवयोगिनां** महानुभावानां शिवयोगसम्पन्नानां **तमोविकाराः** तमसः विकाराः, तमोगुणविकृतयः रागद्वेषादयः, **कुतः स्युः** कस्माद्धेतोः भवेयुः ? कारणत्वेन सिद्धस्य तमसः शिवज्ञानेन विनाशात् शिवयोगिनः न केऽपि तमोविकारा भवन्तीति तात्पर्यम् ॥ शरणस्य तमोविकाराः न कदापि भवितुम् अर्हन्ति, तस्य शिवज्ञानसाकाररूपत्वाद् इत्यर्थः ॥२१॥

– इति तामसनिरसनस्थलम् –

३. अथ निर्देशस्थलम् – (३९)

निराकृत्य तमोभागं संसारस्य प्रवर्तकम् ।
निर्दिश्यते तु यज्ज्ञानं स निर्देश इति स्मृतः ॥२२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – निर्देशो नाम क इत्यत्राह – **निराकृत्येति** । **संसारस्य** जननमरणचक्ररूपस्य संसारस्य **प्रवर्तकं** प्रवृत्तिकारणं **तमोभागं** तमसः अंशम्, तमोभावं इत्यर्थः, **निराकृत्य** निरस्य **यज्ज्ञानं तु** यादृशं ज्ञानं तु **निर्दिश्यते** बोध्यते **सः** तादृशः उपदेशः **निर्देशः इति** निर्देशशब्दवाच्य इति **स्मृतः** ज्ञातः ॥ 'यज्ज्ञानम्' इत्यनेन शिवज्ञानम् उक्तम् । शिवज्ञानं नाम स्वाभिन्नस्वरूपत्वेन शिवस्य ज्ञानम्, तदेव ज्ञानं साक्षात्कारे पर्यवसन्नं मुक्तिरित्युच्यते । तस्य ज्ञानस्य प्रथमपरिणामस्त्वविद्यानाशः । अविद्या-निवृत्तिर्मायानिवृत्तिरिति ज्ञायते । उपायस्तु तस्य स्वात्माभिन्नत्वेन शिवस्य ध्यानम् । तदुक्तम् – "क्षरं प्रधानममृताक्षरं हरः क्षरात्मा-नावीशते देव एकः । तस्याभिध्यानाद्योजनात् तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः ॥ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशै-र्जन्ममृत्युप्रहाणिः । तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवलम् आप्तकामः ॥" (श्वे. उ., १.१०-११) इति (तृतीयं = पितृयान – देवयानातिरिक्ता तृतीयाऽवस्था) । इयं प्राप्तिः श्रीगुरोः शिक्षणमार्ग-दर्शनाभ्यामेव शक्यते । श्रीगुरोर्मार्गदर्शनमेव निर्देशः । तत्सम्बद्धं स्थलं निर्देशस्थलम् ॥२२॥

गुरुरेव परं तत्त्वं प्रकाशयति देहिनाम् ।
को वा सूर्यं विना लोके तमसो विनिवर्तकः ॥२३॥

व्याख्या – गुरुरेव निर्देशक इत्याह – **गुरुरेवेति** । **गुरुः एव** श्रीगुरुः एव निश्चयेन **देहिनां** शरीरिणां **परं तत्त्वं** परमं तत्त्वं **प्रकाशयति** विशदीकरोति । **लोके** विश्वे **सूर्यं विना** रविं विहाय **कः वा** कोऽन्यः **तमसः विनिवर्तकः** तमोभावस्य निवारकः ? न कोऽप्यन्यः इत्यर्थः । यथा सूर्यं विना लोके तमसो निवारकः कोप्यन्यो नास्ति, तथा श्रीगुरुं विना परतत्त्वप्रकाशकः कोऽप्यन्यो नास्ति । अज्ञानान्धकारनिवार-कत्वादेव श्रीगुरोर्गुरुत्वम् । तदुक्तम् – "गुकारोऽन्धतमः प्रोक्तमुकारो भास्करोदयः । मोहान्धकारहरणाद् गुरुरित्यभिधीयते ॥" (पार. आ.,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१४.९३) इति श्रीगुरुदत्तसम्यज्ज्ञानादेवाऽविद्यान्धकारो निवर्तते । उक्तं च – "गुरुदत्तपरज्ञानप्रकाशविलसद्दृशः । भास्वतस्तस्य तु तमः सकाशं कथमेष्यति ॥" (का. आ., क्रि. पा., १.१४०) इति । अत्र दृष्टान्तः – "सूर्योदये तमो यद्वद्विनाशमुपयाति हि । गुरुदर्शनतस्तद्वत् पापजालं प्रणश्यति ॥" (सू. आ., क्रि. पा., ५.२३) इति ॥२३॥

अन्तरेण गुरुं सिद्धं कथं संसारनिष्कृतिः ।
निदानज्ञं विना वैद्यं किं वा रोगो निवर्तते ॥२४॥

व्याख्या – तत्र पुनरन्यदृष्टान्तम् आह – **अन्तरेणेति** । **गुरुम् अन्तरेण** गुरुं विना **संसारनिष्कृतिः** संसारनिवृत्तिः **कथं सिद्धं** कथं साध्यते ? **निदानज्ञं** निदानं जानातीति निदानज्ञः तम्, औषधशास्त्रवेत्तारं **वैद्यं** भिषजं **विना** विहाय, **रोगः** आमयः **किं वा निवर्तते** किं वा निवृत्तो भवति ? न निवर्तते इत्यर्थः ॥ गुरुस्तु भवरोगवैद्यः । स च स्वभक्तं मोक्षमार्गे प्रवर्तयति । अवसरः सोऽय संसारनिवृत्तेः । तादृशस्य निवृत्त-संसारस्य नास्ति पुनर्बन्धः । तदेवोच्यते – "देशिकस्य प्रसादेन येन लब्धमिदं व्रतम् । न तं मायाऽनुबध्नाति न भूयोऽभिजायते ॥ गुरु-बोधाग्निना दग्धाः पाशा ह्यशेषतः । तस्य निर्दग्धबन्धस्य पुनर्बन्धः कथं भवेत् ॥" (का. आ., क्रि. पा., १.१३७-१३८) इति ॥२४॥

अज्ञानमलिनं चित्तदर्पणं यो विशोधयेत् ।
प्रज्ञाविभूतियोगेन तमाहुर्गुरुसत्तमम् ॥२५॥

व्याख्या – गुरुसत्तमः क इत्यत्राह – **अज्ञानमलिनमिति** । **यः** यो महानुभावः **अज्ञानमलिनं** अज्ञानेन मलिनम्, अज्ञान धूलिदूषितं **चित्तदर्पणं** चित्तमेव दर्पणं चित्तदर्पणम्, मनोरूपादर्शः, तम् **प्रज्ञविभूतियोगेन** प्रज्ञा एव विभूतिः प्रज्ञाविभूतिः, तस्याः योगेन प्रज्ञाविभूतियोगेन, शिवज्ञान-महिमासम्बन्धेन **विशोधयेत्** शुद्धीकुर्यात्, तं तादृशं महानुभावं **गुरुसत्तमं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गुरुश्रेष्ठम् अहुः वदन्ति ॥ "प्रज्ञानं ब्रह्म" (ऐ. उ., ५.३) इत्युक्तरीत्या प्रज्ञानरूपं ब्रह्म सम्प्राप्य प्रज्ञानघनो गुरुरित्यवगन्तव्यः ॥२५॥

अपरोक्षिततत्त्वस्य जीवन्मुक्तस्वभाविनः ।
गुरोः कटाक्षे संसिद्धे को वा लोकेषु दुर्लभः ॥२६॥

व्याख्या – तादृशगुरोरनुग्रहे सति सर्वसिद्धिर्भवतीत्याह– **अपरोक्षितेत्यादिना । अपरोक्षिततत्त्वस्य** अपरोक्षितं तत्त्वं येन सः अपरोक्षिततत्त्वः, तेन, सोऽहंभावेन प्रत्यक्षीकृतशिवतत्त्वस्य, **जीवन्मुक्तस्वभाविनः** जीवन्नेव मुक्तः जीवन्मुक्तः, तादृशः स्वभावः अस्य अस्तीति जीवन्मुक्तस्वभावी (णिनि प्रत्ययः), तस्य, जीवन्मुक्तस्वभाविनः, जीवन्मुक्तस्वरूपिणः, **गुरोः कटाक्षे** गुरोः कृपाकटाक्षे, गुरुकृपापाङ्गे, **संसिद्धे** सम्प्राप्ते सति **कः वा** सदपेक्षाभूतः को वा अभिलाषः **लोकेषु** त्रिषु लोकेषु **दुर्लभः** लब्धुम् अशक्यः ? न कोप्यलभ्य इत्यर्थः ॥ अपरोक्षिततत्त्वत्वं जीवन्मुक्तस्वभावित्वं च श्रीगुरोः लक्षणद्वयम् । तत्र "तत् त्वम् असि" (छां.उ., ६.८.७), "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०), "अयमात्मा ब्रह्म" (बृ.उ., २.५.१९) इत्यादि श्रुत्युक्तदिशा शिवजीवैक्यतत्त्वं प्रत्यक्षतया स्वात्मनि साक्षात्कृतत्वात् तस्य अपरोक्षिततत्त्वत्वम् । "यथादर्शे तथात्मनि" इति कठश्रुत्युक्तदिशा प्राक् शरीरपातात् साक्षात्कृतपरतत्त्वत्वात् तस्य जीवन्मुक्तस्वभावित्वम् । तस्य गुरोः कृपाकटाक्षे प्राप्ते भोगमोक्षात्मकं सर्वमपि प्राप्यते ॥२६॥

कैवल्यकल्पतरवो गुरवः करुणालयाः ।
दुर्लभा हि जगत्यस्मिन् शिवाद्वैतपरायणाः ॥२७॥

व्याख्या– पूर्वोक्तस्वरूपिणो गुरवो दुर्लभा इत्याह – **कैवल्येत्यादिना । कैवल्यकल्पतरवः** केवलस्य भावः कैवल्यम्, संसारबन्धविमोचनम्, तस्य कल्पतरवः, मोक्षकाङ्क्षिणां कल्पवृक्षाः (इष्टार्थप्रदाः वृक्षाः), **करुणालयाः** करुणायाः आलयाः, करुणायाः आश्रयाः, **शिवाद्वैतपरायणाः** शिवयोः अद्वैतं शिवाद्वैतम्, तस्मिन् परायणाः, शिवाद्वैते शिवाद्वैतज्ञाने मग्नाः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गुरवः तादृशाः गुरवः **अस्मिन् जगति** अस्मिन् प्रपञ्चे **दुर्लभाः हि** अलभ्याः इति प्रसिद्धम् ॥ श्रीगुरोस्त्रीणि लक्षणानि उक्तानि – कैवल्य-कल्पतरुत्वम्, करुणालयत्वम्, शिवाद्वैतपरायणत्वं चेति । मोक्षकाङ्क्षिणां गुरुरभिलषितप्रदः कल्पपादपः । तदुक्तम् – ''मोक्षस्य दीक्षासम्प्रत्यै गुरु स्यान्मूलकारणम् ॥'' (चं. आ., क्रि. पा., २.५) इति । दीक्षासम्पन्नो भूत्वा षट्स्थलात्मकसाधनमार्गम् अनुसरन्नेव साधको मोक्षलक्ष्मीभाजनः भवति । मोक्षरूपाभिलाषप्रदत्वात् तस्य कैवल्यकल्पतरुत्वम् । मोक्ष-दत्त्वादेव श्रीगुरोः करुणालयत्वं सिद्धं भवति । सकलेभ्यः साधकेभ्यः श्रीगुरुः करुणामयः । अत एवोक्तम् – ''मोक्षदः करुणोपेतो वीतरागो विमत्सरः ।'' (चं. आ., क्रि. पा., २.४९) इति । शिवाद्वैततत्त्वज्ञाने निमग्नत्वात् तस्य शिवाद्वैतपरायणत्वम् । तादृशगुरोः शिवानन्दमयत्वं सिद्धम् । स एव साधकानाम् आनन्ददर्शकः । तदुक्तम् – ''संवित्तिजननं सत्यं परानन्दसमुद्भवम् । तत्तत्त्वं विदितं येन स एवानन्ददर्शकः ॥'' (चं. आ., क्रि. पा., २.५५) इति । दृष्टान्तालङ्कारः ॥२७॥

क्षीराब्धिरिव सिन्धूनां सुमेरुरिव भूभृताम् ।
ग्रहाणामिव तिग्मांशुर्मणीनामिव कौस्तुभः ॥२८॥
द्रुमाणामिव भद्रश्रीर्देवानामिव शङ्करः ।
गुरुः शिवः परः श्लाघ्यो गुरूणां प्राकृतात्मनाम् ॥२९॥

व्याख्या– शिवाद्वैतपरायणो गुरुः प्राकृतेभ्यो गुरुभ्यः श्रेष्ठ इत्याह – **क्षीराब्धिरिवेत्यादिना युग्मेन । सिन्धूनां** समुद्राणां मध्ये **क्षीराब्धिः इव** क्षीरसमुद्रः इव, **भूभृतां** पर्वतानां मध्ये **सुमेरुः इव** सुमेरुनामा काञ्चनपर्वतः इव, **ग्रहाणां** ग्रहाणां मध्ये **तिग्मांशुः इव** सूर्यः इव, **मणीनां** मणीनां मध्ये **कौस्तुभः इव** कौस्तुभमणिः इव, **द्रुमाणां** वृक्षाणां मध्ये **भद्रश्रीः इव** चन्दनवृक्षः इव, **देवानां** सुराणां मध्ये **शङ्करः इव** शिवः इव, **प्राकृतात्मनां** प्राकृतगुणयुक्तस्वरूपिणां **गुरूणां** गुरूणाम् अपेक्षया **शिवः गुरुः** शिवज्ञानस्वरूपी गुरुः **परः श्लाघ्यः** श्लाघ्यतमः, अत्यन्तं प्रशंसनीयः ॥ अत्र मालोपमालङ्कारः । सामान्यगुरूणामपेक्षया निर्देशस्थल-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सम्पन्नशरणस्वरूपो गुरुः श्लाघ्यतमः । स च मोक्षकाङ्क्षिणां मार्गदर्शने समर्थः । तदुक्तम् – "सामान्यगुरुम् आश्रित्य ज्ञानमिच्छति मूढधीः । भिन्ननावाश्रितः सोऽपि महाब्धिं सन्तरिष्यति ॥ अतो हि सद्गुरुं प्राज्ञो ज्ञानार्थी संश्रयेन्नरः । एतादृशं गुरुं ज्ञात्वा शुश्रूषां वै समाचरेत् ॥" (सू.आ., क्रि.पा., ५.२७-२८) इति । गुरुस्वरूपम् अत्र सम्यगुक्तम् – "गुरुस्तु गुणवान् प्राज्ञः परमानन्दभासकः । तत्त्वविच्छिवसंसक्तो मुक्तिदो न तु चापरः ॥" (चं. आ., क्रि. पा., २.४८) इति ॥२८-२९॥

– इति निर्देशस्थलम् –

४. अथ शीलसम्पादनस्थलम् – (४०)

विज्ञानं शिवतत्त्वस्य शीलमित्युच्यते बुधैः ।
निर्देशयोग्यताऽऽर्याणां तद्वान् शीलीति कथ्यते ॥३०॥

व्याख्या – शीलसम्पादनस्थलप्रतिपिपादयिषुर्ग्रन्थकृत् शीलशब्दस्य शीलीशब्दस्य च लक्षणे आह – **विज्ञानम् इत्यादिना । शिवतत्त्वस्य विज्ञानं** स्वात्माभिन्नशिवस्वरूपात्मकस्य शिवतत्त्वस्य विशेषज्ञानमेव **शीलम् इति** शीलशब्दवाच्यम् इति **बुधैः** विद्वद्भिः **उच्यते** कथ्यते । तच्छीलमेव **आर्याणां** सज्जनानां भक्तानां **निर्देशयोग्यता** निर्देष्टुम् निर्दिश्य बोधयितुं समर्थता । **तद्वान्** तादृशशीलवान् **शीली इति** शीलिशब्दवाच्यः इति **कथ्यते** भण्यते ॥ शीलं नाम सामान्यार्थे नैतिकाचरणं नैतिकवर्तनं वेति । परमत्र शीलशब्देन शिवतत्त्वस्य विशेषज्ञानम् इत्यर्थ गृह्यते । "अहं ब्रह्मास्मि" (बृ.उ., १.४.२०) इत्येवम् अङ्गं लिङ्गम् इति भेदज्ञानम् अभिभूय यद्विज्ञानं शरणे जातं तदेव शीलम् इत्यत्र निरूपितम् । तद्वान् शीली इत्युच्यते ॥

(आंग्लभाषान्तरेण सह मया सम्पाद्य काशीपीठतः पूर्वं प्रकटिते सिद्धान्तशिखामणिग्रन्थे अस्य श्लोकस्य प्रथमपादः 'जिज्ञासा शिव-तत्त्वस्य' इति पठितः । इदानीं विज्ञातशिवतत्त्वस्य शरणस्य कृते पाठोऽय-मनुपपन्नमिति विचार्य, उज्ञनीशकृतकन्नडव्याख्यानसहिते, कन्नड साहित्य-परिषद्द्वारा कन्नडलिप्यां मुद्राप्य प्रकटिते सिद्धान्तशिखामणिग्रन्थे निर्देश-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्थलस्यान्तिमश्लोकार्धे विद्यमानः 'विज्ञानं शिवतत्त्वस्य' इति पाठः स्वीकृतः। शिवतत्त्वविज्ञानं शरणस्य वैशिष्ट्यम्, न तु शिवतत्त्वजिज्ञासामात्रम्।) ॥३०॥

प्रपन्नार्तिहरे देवे परमात्मनि शङ्करे ।
भावस्य स्थिरतायोगः शीलमित्युच्यते बुधैः ॥३१॥

व्याख्या – पुनः शीलस्य लक्षणमाह – **प्रपन्नार्तिहरे** इति। **प्रपन्नार्तिहरे** प्रपन्नानाम् आर्तिः, तां हरतीति प्रपन्नार्तिहरः, तस्मिन्, आश्रितानां दुःखनिवारके **देवे** प्रकाशयुक्ते **परमात्मनि** परमात्मभूते **शङ्करे** शिवे **भावस्य** भावस्य, भक्तिभावस्य विश्वासभावस्य वा **स्थिरतायोगः** स्थिरतायाः योगः, दृढतासम्बन्धः **शीलम् इति** शीलशब्दवाच्यः इति **बुधैः** विद्वद्भिः **उच्यते** कथ्यते ॥ शिवस्तु परमकारुण्यनिधिर्यो भवरोगवैद्य इति हि ज्ञायते। ऋग्वेदे रुद्रशिवस्य भिषक्तमत्वं बहुधा वर्णितम्। पश्यत – "त्वदत्तेभी रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः" (२.३३.२) – "त्वया दत्तैः सुखकरैः औषधैः शतं संवत्सराणि प्राप्नुयामः" इति, "उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि" (२.३३.४) – "अस्माकं वीरपुत्रान् भेषजैः उद्धरतु, भिषजां मध्ये त्वं भिषक्तमः इति श्रूयते" इति, "ऋदूदरः सुहवः" (२.३३.१२) – "मृदूदरः आमन्त्रयितुं सुलभः" इति, "भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रस्यस्मे" (२.३३.१२) – "बहुविधवस्तुप्रदातारं सतां रक्षकं स्तौमि, स्तुतस्त्वं बहुविधभेषजान्यस्मभ्यं दाताऽसि" इति च। तादृशमहादेवस्य दृढया भक्त्या ध्यानमेव शीलम्। दृढभक्त्या समर्पितसर्वस्वः शरणः शीलवान् ॥३१॥

शीलं शिवैकविज्ञानं शिवध्यानैकतानता ।
शिवप्राप्तिसमुत्कण्ठा तद्योगी शीलवान् स्मृतः ॥३२॥

व्याख्या – प्रकारान्तरेण शीललक्षणमाह – **शीलम्** इति। **शिवैकविज्ञानं** शिवे स्वात्मैक्यप्रज्ञानम्, **शिवध्यानैकतानता** शिवस्य ध्याने एकतानता तन्मयता, **शिवप्राप्तिसमुत्कण्ठा** शिवस्य प्राप्तिः शिवप्राप्तिः तस्याम् समुत्कण्ठा शिवप्राप्तिसमुत्कण्ठा, शिवप्राप्त्यर्थम् औत्सुक्यम् च **शीलं** शीलमिति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञायते । **तद्योगी** तत् शीलम्, तत् स्वस्मिन् युनक्तीति तद्योगी, **शीलवान्** शीलयुक्तः इति **स्मृतः** ज्ञातः ॥ शिवैकविषयं विज्ञानं शरणस्य व्रतम् । शिवध्यानमात्रतत्परता तद्व्रतस्य सत्फलम् । शिवध्याननैरन्तर्येण तत्प्राप्ति-समुत्कण्ठा जायते । इदं च शरणस्य शीलम्, तेन स शीलवान् ॥३२॥

शिवादन्यत्र विज्ञाने वैमुख्यं यस्य सुस्थिरम् ।
तदासक्तमनोवृत्तिस्तमाहुः शीलभाजनम् ॥३३॥

व्याख्या – तस्य शीलवत्त्वम् अन्यथा विशदीक्रियते – **शिवादिति** । **यस्य** यस्य शरणस्य **शिवाद् अन्यत्र** शिवं विहाय अन्यस्मिन् देवे **विज्ञाने** विशेषज्ञाने **वैमुख्यं** विमुखत्वम्, पराङ्मुखत्वं **सुस्थिरं** सुदृढम् यस्य च पुनः **तदासक्तमनोवृत्तिः** तस्मिन् आसक्ता मनोवृत्तिः, शिवे एव आसक्त-मनोवृत्तिः यस्य सः, **तम्** तं शरणं **शीलभाजनम्** शीलवान् इति **आहुः** ब्रुवते ॥ अत्र यदुपदिष्टं तच्छिवध्यानैकाग्रचित्तत्वम् । शिव एव प्रभू रक्षकश्च । ततोऽन्यच्छरणं नास्ति । एतदेव शिवाचार इति व्यवह्रियते । तदुक्तम् – "शिव एव परं ब्रह्म पञ्चकृत्यपरायणम् । न ततोऽन्या गति-रिति शिवाचारो हि कीर्तितः ॥" (चं.आ., क्रि.पा., ९.७) इति ॥३३॥

पतिव्रताया यच्छीलं पतिरागात् प्रशस्यते ।
तथा शिवानुरागेण सुशीलोऽभक्त उच्यते ॥३४॥

व्याख्या – तत्र दृष्टान्तमाह – **पतिव्रताया इति** । **यत्** यादृशं पति-व्रतायाः पतिपरायणायाः **शीलं** तादृशं शीलं **पतिरागात्** पतिप्रीतिवशात् **प्रशस्यते** स्तूयते । **तथा** तथा एव **शिवानुरागेण** शिवोपरि प्रेम्णा **अभक्तः** अविभक्तः **सुशीलः** सुष्ठु शीलवान् इति **उच्यते** कथ्यते ॥ शरणशङ्करयोः सतीपतिभावस्य कथितत्वात् पतिव्रतादृष्टान्तः समीचीनः ॥३४॥

पतिं विना यथा स्त्रीणां सेवान्यस्य तु गर्हणा ।
शिवं विना तथान्येषां सेवा निन्द्या कृतात्मनाम् ॥३५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – उक्तं स्फुटीक्रियते – **पतिमिति । यथा** येन प्रकारेण **पतिं विना** पतिं विहाय **अन्यस्य सेवा तु** परपुरुषस्य सेवा खलु **स्त्रीणां** स्त्रीणां कृते **गर्हणा** निन्दा, **तथा** तेनैव प्रकारेण **शिवं विना** शिवं विहाय **अन्येषां** इतरेषां देवानां **सेवा** शुश्रूषा **कृतात्मनां** कृतः शुद्धः संस्कृतः आत्मा हृदयं येषां ते कृतात्मानः, तेषाम्, परिशुद्धहृदयानां शरणानां कृते **निन्दा** निन्दारूपा । सत्याः कृते स्वीयं पतिं विहाय अन्यपुरुषाणां दाम्पत्यं पापाय, तथैव शरणस्य कृते शिवं विहाय अन्यदेवेष्वात्मीयभावः पापाय । नात्र शरणोऽन्यदेवान् द्विष्याद् अथवा निन्द्याद् इत्याशयः । यथा सती अन्यपुरुषाणां विशेषतया ज्येष्ठानां दाम्पत्येतरसेवां कर्तुमर्हति, तथैव शरणोऽन्यदेवानां प्रति गौरवभावं धारयन् सख्येतरसेवां कर्तुमर्हति ॥३५॥

बहुनात्र किमुक्तेन शिवज्ञानैकनिष्ठता ।
शीलमित्युच्यते सद्भिः शीलवांस्तत्परो मतः ॥३६॥

व्याख्या – उक्तार्थं सङ्गृह्णाति – **बहुनेति । अत्र** अस्मिन् विषये **बहुना उक्तेन किं** बहुभाषणेन किं प्रयोजनम् ? **शिवज्ञानैकनिष्ठता** श्रीगुरूपदिष्टे स्वानुभवसिद्धे च शिवज्ञाने स्वात्मानतिरिक्तशिवस्वरूपबोधे निष्ठा दृढासक्तिः शिवज्ञानैकनिष्ठा, तस्याः भावः, शिवज्ञानैकनिष्ठता एव **शीलम् इति** शीललक्षणम् इति **सद्भिः** सत्पुरुषैः **उच्यते** कथ्यते । **तत्परः** तच्छीलपरायणः **शीलवान्** शीलभाजनः इति **मतः** सम्मतः ॥३६॥

शिवात्मबोधैकरतः स्थिराशयः
शिवं प्रपन्नो जगतामधीशम् ।
शिवैकनिष्ठाहितशीलभूषणः
शिवैक्यवानेष हि कथ्यते बुधैः ॥३७॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ शरणस्य चतुर्विधस्थलप्रसङ्गो नाम त्रयोदशः परिच्छेदः समाप्तः ॥१३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – एतादृशः शीलवान् शरण एव शिवैक्यवान् इति उच्यते इत्याह – **शिवात्मेत्यादिना** । **शिवात्मबोधैकरतः** शिव एव आत्मा इति बोधे ज्ञाने एकस्मिन्नेव मग्नः **स्थिराशयः** स्थिरः दृढः आशयः भावः यस्य सः, **जगताम् अधीशं** लोकानाम् अधीश्वरम्, तादृशं **शिवं** परमेश्वरं **प्रपन्नः** सर्वार्पणभावेन शरणं गतः, **शिवैकनिष्ठाहितशीलभूषणः** शिवे एव एकस्मिन् निष्ठा दृढभावभक्तिः, तस्याम् आहितं निहितं शीलम् एव भूषणं अलङ्कारः यस्य सः, तादृशः **एषः** एष शरणः **शिवैक्यवान्** शिवे ऐक्यं प्राप्तवान्, ऐक्यस्थलधर्मवान्, इति **बुधैः** विद्वद्भिः **कथ्यते** भण्यते । अस्मिन् पद्ये शरणस्थलस्य विशेषांशाः सङ्गृहीताः । शरणस्तु सर्वदा स्वात्माभिन्नत्वेन शिवस्वरूपज्ञाने निमज्जति । न कदापि तस्य विषयान् प्रति प्रवृत्तिः । स च सर्वार्पणभावेन शिवं प्रपन्नः । अतः स सर्वेभ्यो भयेभ्यः सर्वविषादयोगेभ्यः सर्वमनोविकारेभ्यश्च नितरां मुक्तो भवति । तस्येच्छाशक्तिः स्थिरा दृढा च । न कदापि विवेकराहित्याद् दोलायते तस्य मनः । शिवे दृढभक्तिः, सतीपतियोगसौख्ये निमग्नत्वं च तस्य शीलम् । शरणस्थलानुभवः सामरस्यरूपयोगे पर्यवस्यति । अतः स ऐक्य इति कथ्यते । अत्र वंशस्थं नाम वृतम् । प्रतिपादं द्वादशाक्षरमिदं वृत्तं प्रतिपादे ज-त-ज-र-गणात्मकम् । [U–U (जगणः), ––U (तगणः), U–U (जगणः), –U– (रगणः)] । "वदन्ति वंशस्थविलं जतौ जरौ" इति हि तल्लक्षणम् (आप्टे, पृ.६५२) ॥३७॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
त्रयोदशः परिच्छेदः समाप्तः ॥१३॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चतुर्दशः परिच्छेदः

ऐक्यस्य चतुर्विधस्थलप्रसङ्गः

अथागस्त्यप्रश्नः । अगस्त्य उवाच –

तामसत्यागसम्बन्धान्निर्देशाच्छीलतस्तथा ।
शरणाख्यस्य भूयोऽस्य कथमैक्यनिरूपणम् ॥१॥

व्याख्या – कथं शरण ऐक्यस्वरूपो भवतीत्यगस्त्यस्य प्रश्नमाह – **तामसत्यागेत्यादिना** । **तामसत्यागसम्बन्धात्** तामसस्य त्यागः तस्य सम्बन्धात्, तमोभावनिराकरणवशात्, **निर्देशात्** ज्ञाननिर्देशवशात्, **शीलतः** शिवज्ञानैकनिष्ठतावशाच्च **शरणाख्यस्य** शरणनामभाजः **अस्य** अस्य महानुभावस्य **कथं** केन प्रकारेण **ऐक्यनिरूपणम्** स्वात्मशिवसामरस्यात्मकैक्य निरूपणम्, स्यादिति (शेषः) ? इति अगस्त्यस्य प्रश्नः ॥ अत्र शरण एव कथम् ऐक्यो भवतीति प्रश्न ऐक्यस्थलान्तर्गताङ्गस्थलानां निरूपणाय विज्ञप्तिरूपेण विवक्षितः । शरणस्थितौ तामसत्यागादिभिः स्वानुभवैः शरणसतीशङ्करपतिभावस्य विगलितवेद्यान्तरानन्दस्य पर्यवसानरूपम् समरसैक्यस्थलमिति निरूपयिष्यते ग्रन्थकृता श्रीरेणुकवचनद्वारा ॥१॥

श्रीरेणुक उवाच –

प्राणलिङ्गादियोगेन सुखातिशयमेयिवान् ।
शरणाख्यः शिवेनैक्यभावनादैक्यवान् भवेत् ॥२॥

व्याख्या – ऐक्यभावनाद् ऐक्य इत्याह – **प्राणलिङ्गादीत्यादिना** । **प्राणलिङ्गादियोगेन** प्राणलिङ्गम् इत्यादिना सह योगेन, इष्टलिङ्गे दृष्टियोगद्वारा अन्तर्मुखीभूत्वा ज्योतिःस्वरूपिणः प्राणलिङ्गस्य पूजाध्यानयोगेन,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सुखातिशयं सुखस्य अतिशयम्, सुखपारम्यम् **एयिवान्** अधिगतवान् **शरणाख्यः** शरणनामभाक्, शरणः इत्यर्थः, **शिवेन** शङ्करेण **ऐक्यभावनात्** एकत्वभावधारणात् **ऐक्यवान्** ऐक्यस्थलसम्पन्नः, भवतीति शेषः ॥ शिवेनात्र ऐक्यभावना तु भ्रमरकीटन्यायेन । कीटः निरन्तरभ्रमरध्यानेन भ्रमररूपमेव प्राप्नोति । तथैव निरन्तर शिवध्यानेन जीवः शिवो भवति । तदुक्तम् – "गुरुदीक्षापरिप्राप्तशिवलिङ्गाङ्गयोगतः । द्विरेफकीटन्यायेन शिवैक्यं प्राप्तवान् द्विजः ॥" (म. आ., च. पा., १२.९) इति । अस्याम् ऐक्यस्थितौ भेदलेशोऽपि न लक्ष्यते । अज्ञानयवनिकाया निष्कासनात् लिङ्गाङ्गयोर्मध्ये न किञ्चिदपि तिरोधानम् । इयमेवाऽद्वैतानुभूतिः । सा एव वीरशैव–(शिवाद्वैत)–सिद्धान्ते ऐक्यम् इत्युच्यते । इदम् औपनिषदं सत्यम् । तथा हि – "ब्रह्म वेद ब्रह्मैव भवति" (मुण्ड. उ., ३.२.९) इति, "ब्रह्मविदाप्नोति परम्" (तै. उ., २.१) इति, "ब्रह्मैव सन् ब्रह्माप्येति" (बृ. उ., ४.४.६) इति च ॥२॥

ऐक्यस्थलमिदं प्रोक्तं चतुर्धा मुनिपुङ्गव ।
ऐक्यमाचारसम्पत्तिरेकभाजनमेव च ।
सहभोजनमित्येषां क्रमाल्लक्षणमुच्यते ॥३॥

व्याख्या – ऐक्यस्थलस्य अवान्तराङ्गस्थलानि नाम्ना निर्दिश्यन्ते – **ऐक्यस्थलमित्यादिना** । **मुनिपुङ्गव** हे मुनिश्रेष्ठ **इदम् ऐक्यस्थलं** एतद् ऐक्यस्थलं **चतुर्धा प्रोक्तं** चतुर्विधम् इति कथितम् । तेषां नामानि – **१. ऐक्यस्थलम्, २. आचारसम्पत्तिस्थलम्, ३. एकभाजनस्थलम्, ४. सहभोजनस्थलं** चेति । इति **एषां** इति एतेषां **क्रमेण** उक्तक्रमेण **लक्षणम् उच्यते** लक्षणं कथ्यते ॥३॥

१. अथ ऐक्यस्थलम् – (४१)

विषयानन्दकणिकानिस्पृहो निर्मलाशयः ।
शिवानन्दमहासिन्धुमज्जनादैक्यमुच्यते ॥४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – ऐक्यस्वरूपनिरूपणाय प्रयुक्तेषु पञ्चश्लोकेषु प्रथमः – **विषयेत्यादिः** । **विषयानन्दकणिकानिस्पृहः** विषयाणाम् इन्द्रियार्थानाम् आनन्दः सुखानुभवः, तस्य कणिकाः शीकाराः, तेषु निरासक्तः, **निर्मलाशयः** निर्मलः परिशुद्धः आशयः अभिप्रायः (मनोभावः) यस्य सः, तादृशः, **शिवानन्दमहासिन्धुमज्जनात्** शिवस्य शिवसाक्षात्कारस्य आनन्दः शिवानन्दः, स एव सिन्धुः समुद्रः, तस्मिन् मज्जानात् तादात्म्यस्वरूप-समरसभावात् **ऐक्यम् उच्यते** ऐक्यः इति कथ्यते ॥ शिवानन्दसमुद्रे मज्जनमेव ऐक्यम् । शिवतत्त्वमेव परतत्त्वम्; तत्र न कश्चन भेदलेशोऽपि; यो ह्यत्र भेदं भावयति स संसारचक्रे बद्धो जननमरणसरणिम् अवाप्नोति । तदुक्तम् – "एकमेव तद्भवत्यविकल्पो नाविकल्पोऽपि नात्र काचन भिदाऽस्ति नैवात्र काचन भिदाऽस्त्यत्र भिदामिव मन्यमानः शतधा सहस्रधाभिन्नो मृत्योर्मृत्युमवाप्नोति, तदेतदद्वयं स्वप्रकाशम् ॥" (नृ. उ. ता. उ., ८) इति । शिवानन्दे लोलीभाव ऐक्यम् । शिव एव आनन्दः आनन्द एव शिवः । तदुक्तम् – "आनन्दं ब्रह्मेति व्यजनात्" (तै. उ., ३.६) । आनन्दे मज्जनमेव चरमोद्देशः । उक्तं च – "आनन्दं प्रयन्त्यभि-संविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्म ।" (तै. उ., ३.६) इति ॥४॥

निर्धूतमलसम्बन्धो निष्कलङ्कमनोगतः ।
शिवोऽहमिति भावेन निरूढो हि शिवैक्यताम् ॥५॥

व्याख्या – ऐक्यलक्षणे द्वितीयः श्लोकः – **निर्धूतेत्यादिः** । **निर्धूत-मलसम्बन्धः** निर्धूतः निर्मूलितः मलानां आणवमायीयकार्मिकमलानां सम्बन्धः सम्पर्कः यस्मात् सः, तादृशः, **निष्कलङ्कमनोगतः** निष्कलङ्कं कलङ्करहितम्, मनसि गतं मनोगतम्, निष्कलङ्कं मनोगतं यस्य सः, परिशुद्धमनोभाववान्, तादृशः **'शिवोऽहम्' इति भावेन** 'शिवोऽहम्' इति मनोगतेन **शिवैक्यतां** शिवे ऐक्यं शिवैक्यम्, तस्य भावः शिवैक्यता, ताम्, **निरूढः** निश्चयेन अधिगतः । मलत्रयनिरूपणाय पश्यत ५.५२ – तमश्लोकस्य व्याख्याम् । ऐक्यस्य मनोगतं निष्कलङ्कम् इत्युक्तम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कलङ्कास्तु अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्चेति पञ्चक्लेशाः कामः, क्रोधः, लोभः, मदः, मोहः, मत्सरश्चेति षड् अरयश्च । निर्मूलितपञ्चक्लेशः निरस्तषड्रिपुश्च ऐक्य इत्यर्थः । 'शिवोऽहम्' भावेन शिवैक्यतां प्राप्तत्वाद् आनन्दमयः प्रत्यक्षीकृताभ्यन्तरप्रकाशः ब्रह्म भूत्वा ब्रह्मणि विलयं गच्छति । तदुक्तं भगवता – "योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः । स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥" (भ. गी., ५.२४) इति । स च जीवन्मुक्तः । तस्य लक्षणमुक्तम् – "यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥" (भ. गी., ५.२८) इति ॥५॥

शिवेनैक्यं समापन्नश्चिदानन्दस्वरूपिणा ।
न पश्यति जगज्जालं मायाकल्पितवैभवम् ॥६॥

व्याख्या – ऐक्यो निरस्तबाह्यप्रज्ञ इत्याह – **शिवेनेति** । **चिदानन्दस्वरूपिणा** चिच्च आनन्दश्च चिदानन्दौ तौ एव स्वरूपं अस्य अस्तीति चिदानन्दस्वरूपी (णिनि = इन् प्रत्ययः), तेन, **शिवेन** परशिवेन **ऐक्यं** समरसैक्यं **समापन्नः** समासादितः ऐक्यवान् **मायाकल्पितवैभवं** मायया मायाशक्त्या कल्पितं निर्मितं वैभवम् ऐश्वर्यं यस्य सः, तम्, **जगज्जालं** जगद् एव जालः जगज्जालः, तम्, **न पश्यति** नाऽवलोकयति ॥ वैविध्यमयं वैकारिकं च विश्वमिदं मायाशक्त्या निर्मितम् । इयं मायाशक्तिरशुद्धमायेति ज्ञायते । शुद्धमाया तु ईश्वरे विद्यमाना सती तमपि वैश्विकलीलायाम् अनेकरूपाणि धारयितुं प्रेरयति । (पश्यत – सि.शि., ५.४४, ४६)। पूर्वोक्तरीत्या प्राणलिङ्गी मायाकल्पितं विश्वं हेयत्वेन विहाय, आभ्यन्तरे चिदानन्दात्मके ज्योतिःस्वरूपे प्राणलिङ्गे प्राप्तसमन्वयो भूत्वा परमसुखम् अनुभवति (१२.११) । ऐक्यस्थले च परमयोगी ऐक्यनामकः सिद्धसामरस्यसुखे निमग्नः स्वयमेव निरस्तमायिकविश्वजालो भवति ॥६॥

ब्रह्माण्डबुद्बुदोद्भेदविजृम्भी तत्त्ववीचिमान् ।
मायासिन्धुर्लयं याति शिवैक्यवडवानले ॥७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – मायासमुद्रः शिवैक्यवडवाग्नौ लयं गच्छतीत्याह – **ब्रह्माण्डेत्यादिना । ब्रह्माण्डबुद्बुदोद्भेदविजृम्भी** ब्रह्माण्डानि एव बुद्बुदाः ब्रह्माण्डबुद्बुदाः, तेषाम् उद्भेदः आविर्भावः, तेन विजृम्भते इति ब्रह्माण्डबुद्बुदोद्भेदविजृम्भी, (णिनिः – इन्), **तत्त्ववीचिमान्** तत्त्वानि षड्त्रिंशत्तत्त्वानि एव वीचयः तरङ्गाः, ते अस्य सन्तीति, तत्त्ववीचिमान्, **मायासिन्धुः** माया मायाशक्तिः एव सिन्धुः समुद्रः, **शिवैक्यवडवानले** शिवे ऐक्यं शिवैक्यम्, तदेव वडवानलः वडवाग्निः, तस्मिन्, **लयं याति** लयम् अदृश्यतां याति गच्छति ॥ मायाशक्तिरत्र जगत उपादानकारणत्वेनोक्ता। शिवो जगतोऽभिन्ननिमित्तोपादानकारणमित्यपि कथ्यते। तथापि नास्त्यत्र विरोधः । कथमिति चेदुच्यते – शक्तिस्तु शिवे अविनाभावसम्बन्धेन वर्तते । एवं शक्तिसमवेतः शिव एव जगदुपादानकारणं निमित्तकारणं च । विश्वं मायासमुद्रो ब्रह्माण्डानि तस्य बुद्बुदाः; तत्त्वानि च तस्य तरङ्गाः; शिवैक्यं वडवाग्निः, शिवैक्यवडवाग्निना मायासमुद्र आपोश्यते । अत्र साङ्गरूपकम् नामालङ्कारः ॥७॥

मायाशक्तितिरोधानाच्छिवे भेदविकल्पना ।
आत्मनस्तद्विनाशेतु नाद्वैतात् किञ्चिदिष्यते ॥८॥

व्याख्या – मायाशक्तेरदृश्यत्वे भेदविकल्पस्याप्यदृश्यत्वम् इत्याह – **मायाशक्तीत्यादिना । मायाशक्तितिरोधानात्** मायाशक्तेः तिरोधानम् आच्छादनम्, तस्मात् मायाशक्तितिरोधानात्, मायाशक्तिरूपतिरस्करिणीवशाद् आत्मनः **शिवे भेदविकल्पना** शिवे स्वात्मभिन्नत्वभावना; भवतीति शेषः । **तद्विनाशे तु** तत्तिरोधाननिरसने तु **आत्मनः** स्वात्मनः **अद्वैतात्** अद्वैतं विहाय **न किञ्चिद् इष्यते** न किञ्चिदन्यद् अपेक्ष्यते, शिष्यते ॥ सर्वे जीवाः शिवांशभूताः । मूलस्वरूपे सर्वे ते समानस्वरूपाः । तत्र मायाशक्तिरेव तिरस्करिणी भूत्वा भेदं विनिवेशयति स्वीयगुणद्वारा । माया प्रथमं जीवात्मपरमात्मनोर्भेदम् उत्पादयति । पश्चात् स्वीयानां सत्त्वरजस्तमोस्वरूपाणां गुणानां प्रभावेण जीवानां मध्ये भेदं जनयति । केचन जीवाः सत्त्वगुणप्राधान्यात् सात्त्विकाः । ते शान्ताः दान्ताश्च ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

केचन रजोगुणप्राधान्याद् राजसाः । ते लोभिनः क्रोधिनश्च । अन्ये केचन तमोगुणप्राधान्यात् तामसाः । ते अज्ञा मूर्खाश्च । परमात्मा तु शुद्धः, निराकारः, निर्गुणः, निरवयवः, द्वैतरहितश्च । कथं तस्यांशभूताः जीवाः भेदभाजः ? प्रकृतेः (मायायाः) गुणास्त्वचेतनाः परिमिताश्च । तादृशाः कथं ते अपरिमितभेदजनने समर्थाः भवन्ति ? इत्यादयः प्रश्ना भवन्ति । प्रश्ना अनेके, उत्तरं त्वेकमेव । सर्वमिदं मायाया लीलापरिणामतो जातम्, इत्येव तदुत्तरम् । मायीयगुणानां संसृष्टिसङ्कराभ्यामेवाऽपरिमितभेदजातं संभवति । व्यपगते मायाप्रभावे ऐक्यं नैसर्गिको परिणामः । एवमद्वैतमेव परमार्थतया शिष्यते । एषा स्थितिः ऐक्यस्थलीयसाधकस्य ॥८॥

पशुत्वं च पतित्वं च मायामोहविकल्पितम् ।
तस्मिन् प्रलयसम्पन्ने कः पशुः को वा पतिः ॥९॥

व्याख्या – शिवैक्ये प्राप्ते पति-पशु-पाशात्मकभेदोऽप्रासङ्गिक इत्याह – **पशुत्वम् इति । पशुत्वं च** सुखदुःखभोक्तृत्वविशिष्टाल्पज्ञत्वम्, तथा, **पतित्वं च** सर्वज्ञत्वविशिष्टं पशुपतित्वं च, उभयमपि, **माया-मोहविकल्पितं** मायाप्रभाववशात् जातेन मोहेन भ्रमेण विकल्पविषयीकृतम् (विकल्पोऽस्य सञ्जातम् इति विकल्पितम्, "इतच्" प्रत्ययः (पा. ५.२.३६)) । **तस्मिन् प्रलयसम्पन्ने** तस्मिन् मायामोहे अदृश्यतां गते सति, **कः पशुः** को नाम पशुः, **को वा पतिः** को नाम पतिः, एष सर्वो भेदघटितः । भेदे गते ऐक्यमेव । तदेवोक्तम् परमात्मना – "अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् । न तं पश्यामि यस्याहं न तं पश्यामि यो मम ॥" (देवी. आ., ४९) इति । इदमप्यत्रोक्तम् – "एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् । समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥" (कै. उ., २४) इति ॥ इदमेव वीरशैवीयं लिङ्गाङ्गसामरस्यम् ॥९॥

घोरसंसारसर्पस्य भेदवल्मीकशायिनः ।
बाधकं परमाद्वैतभावना परमौषधम् ॥१०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – पुनरन्यप्रकारेण ऐक्यस्वरूपमाह – **घोरसंसारेत्यादिना**। **भेदवल्मीकशायिनः** भेदः एव वल्मीकः (वल्मीकं); वलन्ते (सञ्चलन्ति) प्राणिनोऽत्र इति वल्मीकः (वल्मीकं), ''कीकन्'' (उणादिः – ४.२५); भेदवल्मीके शेते इति भेदवल्मीकशायी, तस्य, **घोरसंसारसर्पस्य** घोरश्चासौ संसारश्च घोरसंसारः, स एव सर्पः, तस्य, **परमाद्वैतभावना** परमार्थाद्वैत-भावना एव **बाधकं** निवारकं **परमौषधं** परं श्रेष्ठम् औषधं भेषजम् ॥ रूपकालङ्कारः । भेदवल्मीकमत्र पञ्चभेदरूपं वल्मीकम् । पञ्चभेदास्तु – १. जीवेशभेदः, २. जीवजीवभेदः, ३. जडेशयोर्भेदः, ४. जडजडभेदः, ५. जडजीवभेदश्चेति । श्रीमध्वाचार्यः – म. भा. ता. नि., १.६९-७० – ''जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः । जीवेशयोर्भिदा चैव जीवभेदः परस्परम् ॥ जडेशयोर्जडानां च जडजीवभिदा तथा ॥'' भयङ्करसंसारसर्प-स्तत्र शेते । शिवाद्वैतभावना तु परमौषधम् । तेन संसारसर्पस्य 'अहं-ममेति' विषं शिवाद्वैतात्मकभेषजेन निवार्यते ॥१०॥

भेदबुद्धिसमुत्पन्नमहासंसारसागरम् ।
अद्वैतबुद्धिपोतेन समुत्तरति देशिकः ॥११॥

व्याख्या – भेदात्मकसंसारसमुद्रतरणे शिवाद्वैतज्ञानमेव नौका इत्याह – **भेदबुद्धीत्यादिना । देशिकः** शिवलिङ्गैक्यरूपः श्रीगुरुः **अद्वैतबुद्धिपोतेन** अद्वैतस्य शिवाद्वैतस्य बुद्धिः ज्ञानम्, तदेव पोतः नौका, तेन अद्वैत-बुद्धिपोतेन **भेदबुद्धिसमुत्पन्नमहासंसारसागरं** भेदस्य बुद्धिः भेदबुद्धिः भेदज्ञानम्, तदेव महासंसारः विशालसंसारः, स एव सागरः समुद्रः, तम्, **समुत्तरति** अतिक्राम्यति ॥ नौकां विना समुद्रतरणं नैव शक्यते । अत्र संसार एव महासमुद्रः, शिवाद्वैतज्ञानमेव पोतः । तेन संसारमहासमुद्रं देशिकः अतिक्राम्यति । रूपकालङ्कारः । ''ब्रह्म सत्यं जगन्मिथ्या'' इत्यद्वैतिनो वदन्ति । इदम् असमीचीनम् । संसारसमुद्रः सत्यम्, दुःखाद्यनुभवोऽपि सत्यम्, सर्वं सत्यम् । एवं जगतः सत्यत्वेऽपि मायावशात् तदेव तिरस्करिणी भूत्वाऽऽत्मनो निजस्वरूपम् आच्छादयति । निष्कासने कृते तस्मिन्नात्मनः शिवाभिन्नत्वरूपं सत्यं साक्षात्क्रियते ॥११॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अज्ञानतिमिरोद्रिक्ता कामरक्षःक्रियाकरी ।
संसारकालरात्रिस्तु नश्येदद्वैतभानुना ॥१२॥

तस्मादद्वैतभावस्य सदृशो नास्ति योगिनाम् ।
उपायो घोरसंसार-महातापनिवृत्तये ॥१३॥

व्याख्या – रूपकान्तरेण शिवाद्वैतज्ञानस्य महत्त्वं विशदयति – **अज्ञानेत्यादिना युग्मेन** । **अज्ञानतिमिरोद्रिक्ता** अज्ञानमेव तिमिरम् अन्धकारः, तेन उद्रिक्ता वर्धिता, **कामरक्षःक्रियाकरी** कामः एव रक्षः कामरक्षः कामरूपराक्षसः, तस्य क्रियां करोतीति कामरक्षःक्रियाकरी, कामराक्षसकार्यायाऽवकाशं दत्तवती इत्यर्थः, तादृशी **संसारकालरात्रिः** संसारः एव कालरात्रिः संसारकालरात्रिः, संसारात्मकघोरान्धकारयुक्ता रात्रिः, **अद्वैतभानुना** शिवाद्वैतसूर्येण **नश्येत्** नाशं गच्छेत् ॥ **तस्मात्** उक्तकारणात् **योगिनां** शिवयोगिनां **घोरसंसारमहातापनिवृत्तये** घोरश्च असौ महातापश्च (महांश्च असौ तापश्च महातापः) संसारमहातापः, संसारात्मकमहाक्लेशः, तस्य निवृत्तिः निर्मूलनम्, संसारमहातापनिवृत्तिः, तस्यै, संसारमहातापनिवृत्यर्थम् **अद्वैतभावस्य** शिवाद्वैतभावस्य **सदृशः** समानः **उपायः नास्ति** साधनं नास्ति ॥ अत्र संसारः कालरात्रित्वेन शिवाद्वैतं सूर्यत्वेन च रूपणं दृश्यते । संसारकालरात्रेश्च विशेषणद्वयं रूपकद्वयेन युक्तम् । सा संसारकालरात्रिरज्ञानरूपान्धकारेणोद्रिक्ततां गता, कामरूपराक्षसव्यवहारस्य प्रवर्तयित्री च । रूपकालङ्कारः । स्वतः कालरात्रिरतिगाढान्धकारवती, का कथा अन्यस्य अज्ञानान्धकारस्य मिश्रणेन ! प्रलयरात्रिरपि कालरात्रिशब्देन व्यवह्रियते । सृष्ट्यादिव्यापारान्ते सर्वप्रलयवशात् निरस्तसर्वव्यवहारा कालरात्रिरिति प्रसिद्धा । इयं कालरात्रिस्तु कामराक्षसव्यापरवती । कामराक्षसस्य तावद् उग्रकामप्रवृत्तिः । तादृशी संसारकालरात्रिः शिवाद्वैतसूर्येण निरस्यते इति महदिदं साधनं शिवाद्वैतं नाम ॥१२-१३॥

अद्वैतभावनाजातं क्षणमात्रेऽपि यत्सुखम् ।
तत्सुखं कोटिवर्षेण प्राप्यते नैव भोगिभिः ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चित्तवृत्तिसमालीनजगतः शिवयोगिनः ।
शिवानन्दपरिस्फूर्तिर्मुक्तिरित्यभिधीयते ॥१५॥

व्याख्या – शिवाद्वैतस्य महत्त्वम् उक्त्वा ऐक्य स्थलं मुक्तिलक्षणेन समापयति – **अद्वैतेत्यादिना युग्मेन । क्षणमात्रे अपि** क्षणमात्रावधिकम् अपि **अद्वैतभावनाजातम्** अद्वैतस्य भावना अद्वैतभावना, तस्याः जातम् अद्वैतभावनाजातम्, शिवाद्वैतस्य अनुभूतेः उत्पन्नम् **यत्** यादृशं **सुखम्** आनन्दः **तत्** तादृशं **सुखम्** आनन्दः **भोगिभिः** इन्द्रियसुखार्थिभिः **कोटिवर्षेण** कोटिवर्षावधिनाऽपि **नैव प्राप्यते** न खलु शक्यते प्राप्तुम् ॥ **चित्तवृत्तिसमालीनजगतः** चित्तस्य वृत्तौ समालीनं जगत् यस्य सः, तस्य **शिवयोगिनः** ऐक्यस्य **शिवानन्दपरिस्फूर्तिः** शिवानन्दस्य परिस्फूर्तिः परिस्पन्दः **मुक्तिः इति** मोक्षः इति **अभिधीयते** निगद्यते ॥ अद्वैतभावना नाम शिवैक्यभावना । "ब्रह्म वेद ब्रह्मैव भवति" इति मुण्डकश्रुत्युक्तः 'ब्रह्मभावः' एवाऽद्वैतभावना । शिवे शिवयोगिनो विलयेन य आनन्दः प्राप्यते तस्य अनुभूतिरेव मुक्तिरित्युक्तम् । जगन्नाम वस्तुवैविध्यम् अनुभववैविध्यं च । यावत्पर्यन्तं मनोद्वारा प्राप्तविषयासक्त्या स्वात्मा बद्धः तावत्पर्यन्तं संसारः । विषयासक्त्या निवारणेन मनसो निर्विषयत्वे पर्यवसानम् । तदुक्तम् – "मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥" (ब्र. बिं. उ., २) इति । इदं निर्विषयत्वमेव चित्तवृत्तिसमालीनजगत्त्वम् । तेन शिवयोगिनो या शिवानन्दपरिस्फूर्तिः सा मुक्तिरिति कथ्यते ॥१४-१५॥

– इति ऐक्यस्थलम् –

२. अथ आचारसम्पत्तिस्थलम् – (४२)

शिवैकभावनापन्नशिवत्वे देहवानपि ।
देशिको हि न लिप्येत स्वाचारैः सूतकादिभिः ॥१६॥

व्याख्या – ऐक्यस्य आचारसम्पत्तिमाह – **शिवैकेत्यादिना । शिवैकभावनापन्नशिंवत्वे** शिवे एकभावना शिवे एकात्मताचिन्तनम्, तादृश-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावनया आपन्नं शिवत्वं प्राप्तं शिवत्वम्, तस्मिन् सति **देशिकः** ऐक्यस्थलीयः गुरुः, **देहवान्** शरीरसहितोऽपि **सूतकादिभिः** सूतकप्रभृतिभिः **स्वाचारैः** स्वीयैः आचरणैः **न हि लिप्येत** न रज्येत ॥ "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०) इत्यस्य निदिध्यासनेन या शिवैकभावना जाता तस्यां स्थितस्य शिवयोगिनः न किमपि कर्तुं प्रेरणा वा इच्छा वा विद्यते । तथापि देहधारणेन अनिवार्यतया क्रियमाणानि कर्माणि सन्ति । तत्र शिवयोगिनः न किमपि तैः प्राप्तव्यमस्ति । फलाकाङ्क्षारहितत्वेन तानि कर्माणि करोति । यदुक्तं भगवता – "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥" (भ. गी., २.४७) इति । तथा शिवयोगी निश्चयेन निष्कामकर्मी भवति । निष्कामकर्मिणः फलरूपकर्माभावात् स सुखदुःखैर्न लिप्यते । तदुक्तम् – "न लिप्यते लोकदुःखेन बाह्यः" (कठ. उ., २.२.११) इति । देहवानपि देहसम्बद्धैः सूतकादिभिः न लिप्यते च । (पश्यत – सि.शि., ९.४३ – व्याख्यायाम् – वीरशैवानां सूतकविषये चर्चाम्) ॥१६॥

शिवाद्वैतपरिज्ञाने स्थिरे सति मनस्विनाम् ।
कर्मणा किं नु भाव्यं स्यादकृतेन कृतेन वा ॥१७॥

व्याख्या – 'कर्मणा न लिप्यते' इत्युक्तस्य कारणमाह – **शिवाद्वैते**त्यादिना । **शिवाद्वैतपरिज्ञाने** शिवाद्वैतस्य परिज्ञाने, शिवेन अद्वैतस्य सम्यग्ज्ञाने **स्थिरे सति** दृढतां गते सति **मनस्विनां** स्थिरचित्तवतां **अकृतेन कृतेन वा** अनाचरितेन आचरितेन वा **कर्मणा** कर्तव्यभूतेन कर्मणा **किं नु भाव्यं स्यात्** किमन्यद् भाव्यं निरीक्षणीयं स्यात् । न किञ्चिदपि स्यादित्यर्थः ॥ शिवाद्वैतानुभवस्य नैरन्तर्ये शिवयोगिनः कर्मफलानि न लिप्यन्ते । उक्तं च भगवता सविस्तरम् – "योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वर्तन्ते इति धारयन् ॥'' (भ. गी., ५.७-९) इति । इन्द्रियाणीन्द्रियोर्थेषु वर्तन्ते इत्येतावदेव न । परन्तु ''कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥'' इति भगवदुक्तरीत्या (भ. गी., ५.११) निष्कामकर्मत्वमत्रानुसन्धेयम् । 'केवलैः' इत्यनेनाऽहंत्व-ममत्वयोगरहितत्वेन शरीरमनोबुद्धीन्द्रियैः केवलैः शिवयोगिनः लोकसंग्रहार्थमेव कर्म कुर्वन्ति इत्यर्थः ग्राह्यः । उक्तं शङ्कराचार्येण – ''ईश्वरायैव कर्म करोमि न मम फलाय'' (भ. गी., शं. भा., ५.११) इति । अयं च भावः अतीव कष्टसाध्यम्, साधितेऽपि कष्टम् अनुवर्तनं तस्य । शिवस्वरूपो योगी आत्मार्थं न किमपि करोति, परार्थं वा न किमपि निर्माति, कर्मफलेन वा न केनापि युक्तो भवति, केवलं प्रकृतिरेव वरीवर्तते । तथा चोक्तम् – ''न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥'' (भ. गी., ५.१४) इति । सर्वमिदं मायामयमाच्छादनम् । बहुजन्मकृतपुण्यवशात् परिपक्वतां गते बुद्धौ शिवानुग्रहेण निष्कासिते च मायातिरोधाने भक्तिरूपः शक्तिपातः जायते । तं शक्तिपातं सम्यक् परिभाव्य श्रीगुरुस्तादृशं भक्तं दीक्षया योजयित्वा मुक्तिमार्गे स्थापयति । स तु मुक्तिमार्गः षट्स्थलात्मको भक्तिविकासमार्ग एव। तस्मिन् ज्ञान-कर्मसमुच्चयसाधनेन श्रद्धा-निष्ठाऽवधानाऽनुभावाऽऽनन्दात्मकभक्तिपञ्चकस्य पर्यवसानात्मिकया समरसभक्त्या निरूढः शिवयोगी शिवेनैक्यं प्राप्नोति जीवन्मुक्तश्च तिष्ठति । तदानीं स यद्यत्कर्म करोति तत्सर्वं कमलदलन्यायेन निःसङ्गं दग्धबीजन्यायेन च निष्फलम् ॥१७॥

शम्भोरेकत्वभावेन सर्वत्र समदर्शनः ।
कुर्वन्नपि महाकर्म न तत्फलमवाप्नुयात् ॥१८॥

व्याख्या – ऐक्यस्य नास्ति कर्मफलयोग इत्याह – **शम्भोरिति** । **सर्वत्र समदर्शनः** लोष्टाश्मकाञ्चनादिषु सर्वत्र समानदृष्टिमान् शिवयोगी **शम्भोः** शिवस्य **एकत्वभावेन** ऐक्यभावेन **महाकर्म** पापपुण्यफलयुक्तत्वेन भाव्यमानं कर्म **कुर्वन् अपि** आचरन्नपि **तत्फलम्** पापपुण्यत्वेन भाव्यामानं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

फलं न अवाप्नुयात् न प्राप्नुयात् ॥ ऐक्यस्य सर्वत्र शिवमयत्वेन कर्मलेपो नास्त्येव । इदमत्र तात्पर्यम् – शिवयोगी तु शिवाद्वैतभावे स्थितः सन् सर्वं शिवमयत्वेन पश्यति । स च समलोष्टाश्मकाञ्चनदर्शनो महात्मा । न तस्मिन् कदापि भेदबुद्धिर्जायते, यतो हि महति वा अल्पे वा वस्तुनि नास्ति तस्य स्वकीयताबुद्धिः । अयमनासक्तियोगः शिवयोगिनः । तादृश-समदर्शत्वमुक्तं भगवता – "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥" (भ. गी., ५.१८) इति । सर्वत्र समदर्शनत्वं तु कश्चन मनसः संस्कारो यश्च युक्तायुक्तविवेकेन प्रयोक्तव्यः । उक्तं सर्पभूषणशिवयोगिना कन्नडभाषायाम् – "बळसदिर-द्वैतवनु बाह्यदलि, मनदोळगेकोभावदिन्दिरु" (मास्तु बाह्ये अद्वैतस्य प्रयोगः, अस्तु तद्येको मनसि) इति । समदर्शनः शिवयोगी सपदि मुक्तिसुखे निमग्नः सन् प्रमुक्तः संसारपाशात् । तदुक्तम् – "इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।" (भ. गी., ५.१९) इति ॥१८॥

सुकृती दुष्कृती वापि ब्राह्मणो वान्त्यजोऽपि वा ।
शिवैकभावयुक्तानां सदृशो भवति ध्रुवम् ॥१९॥

व्याख्या – शिवैक्यभावे मग्नस्य सर्वे सदृशा इत्याह – **सुकृती इति** । **सुकृती** पुण्यात्मा वा अथवा **दुष्कृती** पापात्मा **वाऽपि** इति पादपूरणम् । **ब्राह्मणः वा अन्त्यजः अपि वा** ब्राह्मणः अथवा श्वपचः वा, यः कोऽपि वा भवतु सः, **शिवैकभावयुक्तानां** शिवैक्यभावनामग्नानां कृते **ध्रुवं** निश्चयेन **सदृशः भवति** समानो भवति ॥ शिवैक्यभावे स्थितस्य जीवन्मुक्तस्य पुण्यकृद् ब्राह्मण इति च न विशेषं प्रेम, न च विशेषतया द्वेषः पापकृत् श्वपचश्चेति वा । तदेवाह भगवान् – "न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् । स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥" (भ. गी., ५.२०) इति ॥१९॥

वर्णाश्रमसदाचारैर्ज्ञानिनां किं प्रयोजनम् ।
लौकिकस्तु सदाचारः फलाभावेऽपि भाव्यते ॥२०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शिवयोगिनां वर्णाश्रमधर्मो नास्ति वा इत्यत्राह – **वर्णाश्रमेत्यादिना । ज्ञानिनां** शिवज्ञानिनां **वर्णाश्रमसदाचारैः** ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च सदाचारैः **किं प्रयोजनं** किं फलम्, न किमपि फलम् इत्यर्थः । कुत इति चेदुक्तम् – **लौकिकः तु** लोकसम्बन्धि तु **सदाचारः** सद्भूत आचारो वर्णाश्रमधर्मभूतो नित्यनैमित्तिकाचारः **फलाभावे अपि** प्रयोजनाभावे अपि **भाव्यते** क्रियते ॥ अनुपयुक्तत्वेऽपि वर्णाश्रमधर्माचाराः आप्तकामेन शिवयोगिना नैव त्यक्तव्याः । असक्ततया कर्म करणीयस्तेन । तथा कर्म कुर्वाणा अनेके महानुभावाः कर्मणैव संसिद्धिं प्राप्नुवन्ति । लोकसंग्रहमेव मनसि निधाय कर्म करणीयम् । जनाः श्रेष्ठानाम् अनुवर्तनं कुर्वन्ति । तदुक्तं भगवता – "तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥" (भ.गी., ३.१९-२१) इति । अत्रेदमनुसन्धेयम् – "वर्णाश्रमधर्माणां व्यवस्था हि द्विधा मता ।" इत्यारभ्य "जातिभेदं न कुर्वीत शिवभक्ते कदाचन ॥" इति पर्यन्तं (१०.३५-३८) चतुर्षुश्लोकेषु पूर्वं यदुक्तं तद्रीत्या वीरशैवानां वर्णाश्रमधर्मपालनं तु विना जातिभेदं विना च उच्चनीचभावम् इति । यावत्पर्यन्तं "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" इति भगवदुक्तरीत्या सामाजिकव्यवस्था उच्चनीचभावरहितत्वेन वरीवर्ती तावत्पर्यन्तं सर्वा लौकिकव्यवस्था सम्यक् प्रचलति स्म । परं तु यदा वर्णव्यवस्था जातिव्यवस्था बभूव तदा समाज उच्चनीचभावयुक्तो दुर्विविचकत्वजाड्ययुक्तश्च अजायत । वीरशैवसमाजे नास्ति तादृशी व्यवस्था । (पश्यत – ११.५५) । शिवदीक्षा एव सर्वेषां समानतासाधिका भक्तिरेव दुर्विविचकत्वनिरासिका च ॥२०॥

निर्दग्धकर्मबीजस्य निर्मलज्ञानवह्निना ।
देहिवद्भासमानस्य देहयात्रा तु लौकिकी ॥२१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – सति शरीरसम्बन्धे कथं वर्णादिव्यवस्था उल्लङ्घनीया इत्यत्राह – **निर्दग्धेत्यादिना । निर्मलज्ञानवह्निना** निर्मलं तत् ज्ञानं च निर्मलज्ञानम्, तदेव वह्निः, तेन परिशुद्धशिवज्ञानात्मकेनाऽग्निना, **निर्दग्धकर्मबीजस्य** कर्मणः बीजं कर्मबीजम्, निर्दग्धं कर्मबीजं यस्य सः निर्दग्धकर्मबीजः, तस्य, नितरां संप्लुष्टपुण्यपापात्मककर्मबीजवतः **देहिवद्भासमानस्य** देहिवत् शरीरवानिव भासमानस्य दृश्यमानस्य शिवज्ञानिनः **देहयात्रा तु** देहव्यवहारस्तु **लौकिकी** लोकवदस्थिरा ॥ पुण्यपापात्मकं खलु कर्म । सत्कर्म-दुष्कर्मणः फलस्वरूपं तत् । तादृशस्य कर्मणः बीजम् आत्मनो जननमरणचक्रस्य कारणभूतम् । तद्बीजं तु योगिनां शिवज्ञानात्मकवह्निना दह्यते । एवं दग्धबीजन्यायेनाऽऽत्मनः जननमरणचक्रम् निर्मूलतां गच्छति । तदुक्तम् – "यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ।" (भ. गी., ४.१९) इति । शिवयोगी च तादृशः पण्डित इति हि सत्यम् । कामसङ्कल्पवर्जितास्तादृशाः देहमात्रव्यवहाराः श्रीशङ्करोक्तदिशा "मुधैव चेष्टामात्राः" (भ.गी., शं.भा., ४.१९) । चेष्टास्तु ते लोकसंग्रहार्थाः केवलम् ॥२१॥

शिवज्ञानसमापन्नस्थिरवैराग्यलक्षणः ।
स्वकर्मणा न लिप्येत पद्मपत्रमिवाम्भसा ॥२२॥

व्याख्या– शिवयोगिनो नास्ति कर्मलेप इत्याह– **शिवज्ञानेत्यादिना। शिवज्ञानसमापन्नस्थिरवैराग्यलक्षणः** शिवस्य ज्ञानं आत्माभिन्नत्वेन शिवस्वरूपज्ञानम्, तेन समापन्नं लब्धं स्थिरं च तद् वैराग्यं च स्थिरवैराग्यं निरूढं विरागभावत्वम्, तदेव लक्षणं चिह्नं यस्य सः, तादृशः लिङ्गैक्यः **अम्भसा** वारिणा **पद्मपत्रम् इव** कमलपत्रम् इव **स्वकर्मणा** स्वकीयेन पुण्यपापात्मककर्मणा **न लिप्येत** नैव संस्पर्शं गच्छेत् ॥ "सोम्य,...... अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विद्धि पापं कर्म न श्लिष्यत इति ।" (छां.उ.,४.१४.३) इति श्रुत्युक्तदिशा शिवज्ञानलब्धवैराग्यवान् ऐक्यः कर्मणा पद्मपत्रन्यायेन न श्लिष्यते । ऐक्यस्य 'सोऽहं'-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावः 'हंस'-भावे पर्यवस्यति । इदमेव 'प्राजापत्यज्ञानम्', यत् प्रजापतिना इन्द्राय दत्तम् (पश्यत – छां. उ., ८.७.३-४, ८.८.१-५, ८.९.१, ८.१०.१-४; ८.११.१-३, ८.१२.१-२) । प्राजापत्यसम्पन्नस्य पुरुषस्य नास्ति कर्मफललेशोऽपि ॥२२॥

गच्छंस्तिष्ठन्स्वपन्वापि जाग्रन्वापि महामतिः ।
शिवज्ञानमहायोगाच्छिवपूजापरः सदा ॥२३॥

व्याख्या – सर्वा शिवैक्यापन्नस्य क्रियाः शिवलिङ्गपूजापरा एवेत्याह – **गच्छन्नित्यादिना** । **महामतिः** महता ज्ञानेन युक्तः शिवैक्यः **गच्छन्** गमनं कुर्वन् **तिष्ठन्** स्थितः सन्, **स्वपन्** निद्रां कुर्वन्, **जाग्रन्** जागृतः सन्, **वापि** वैकल्पिकक्रियासु निरतः सन् **शिवज्ञानयोगात्** शिवज्ञानैकयुक्तत्वात् **सदा** निरन्तरं **शिवपूजापरः** शिवपूजायां निरतो भवति ॥ शिवज्ञान-समायोगस्तु शिवोऽहंभावसाक्षात्कारात्मकाभ्यन्तरप्रज्ञारूपं सामरस्यम् । तस्याऽऽभ्यन्तरत्वादुक्ता पूजा चाप्रयत्नसिद्धा स्वयंस्फूर्ता निरन्तरं प्रवर्त-माना च प्रक्रिया यस्यां उपास्योपासकभावभेदरहितत्वेनोभयमपि शिव एव । शिवलिङ्गैक्यस्य बाह्यव्यापारस्तु वस्तुतः तस्य आभ्यन्तरशिवपूजा एवेति गच्छंस्तिष्ठन्नित्यादिना सूचिता । श्रीशङ्करः शिवमानसपूजास्तोत्रे तामेवाभ्यन्तरपूजां वर्णयति – "आत्मा त्वं गिरिजा मतिः परिचराः प्राणाः शरीरं गृहं, पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो, यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥" (शिव. मा. पू. स्तो., ४) इति ॥२३॥

यद्यत्पश्यति सामोदं वस्तु लोकेषु देशिकः ।
शिवदर्शनसम्पत्तिस्तत्र तत्र महात्मनः ॥२४॥

यद्यच्चिन्तयते योगी मनसा शुद्धभावनः ।
तत्तच्छिवमयत्वेन शिवध्यानमुदाहृतम् ॥२५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यत्किञ्चिद्भासितं लोके स्वेच्छया शिवयोगिना ।
शिवस्तोत्रमिदं सर्वं यस्मात् सर्वात्मकः शिवः ॥२६॥
या या चेष्टा समुत्पन्ना जायते शिवयोगिनाम् ।
सा सा पूजा महेशस्य सर्वदा तद्गतात्मनाम् ॥२७॥

व्याख्या – कीदृशी सा शिवपूजा इत्यत्राह – **यद्यदित्यादिना कालापकेन । देशिकः** शिवैक्यरूपः गुरुः **यद्यद् वस्तु** यं यं पदार्थं **सामोदं मोदेन सह** सामोदम्, आनन्देन **लोकेषु** जगत्सु **पश्यति** निरीक्षते **तत्र तत्र** तस्मिन् तस्मिन् वस्तुनि **महात्मनः** शिवैक्यस्य **शिवदर्शनसम्पत्तिः** शिवस्वरूपप्रत्यक्षीकरणविभवः **स्यात्** । सर्वस्य शिवमयत्वात् योगी सर्वत्र शिवमेव पश्यति ॥ **शुद्धभावनः योगी** निर्मलचिन्तकः शिवैक्यः **मनसा** चित्तेन **यद्यच्चिन्तयते** यं यं विषयं विचारयति **तत्तत्** स स विषयः, **तस्य शिवमयत्वेन** तस्य शिवस्वरूपकत्वेन तत्तत् **शिवध्यानम्** शिवचिन्तनम् इति **उदाहृतं** स्मृतम् ॥ **लोके** जगति **शिवयोगिना** शिवैक्येन **स्वेच्छया** स्वयंस्फूर्त्या **यत्किञ्चिद्** यद्यद् किञ्चित् **भाषितम्** उक्तम्, **इदं सर्वं** तत्तत् सर्वं **शिवस्तोत्रं** शिवस्तुतिपरं वाक्यम्, **यस्मात्** कारणात् **शिवः सर्वात्मकः** शिवः सर्वात्मस्वरूपः तस्मात् तथा ॥ **शिवयोगिनां** शिवैक्यसम्पन्नानां **या या चेष्टाः** या च या च क्रियाः **समुत्पन्ना** सञ्जाता **जायते** उत्पद्यते च **सा सा** सा सा क्रिया **महेशस्य** महेश्वरस्य **सर्वदा** निरन्तरं **तद्गतात्मनां** शिवगतस्वात्मनां शिवयोगिनां **पूजा** आराधना ॥ यद्यत्पश्यति तत् शिवदर्शनम्, यद्यत् विचार्यते तत्तत् शिवध्यानम्, यद्यद् भाषते तत्सर्व शिवस्तोत्रम्, यद्यत् क्रियते तत्तत् पूजा शिवस्य, इत्यादिरीत्या शिवैक्यस्य मानसपूजा वर्ण्यते ग्रन्थकृता ॥२४-२७॥

– इति आचारसम्पत्तिस्थलम् –

३. अथ एकभाजनस्थलम् – (४३)

विश्वं शिवमयं चेति सदा भावयतो धिया ।
शिवैकभाजनात्मत्वाद् एकभाजनमुच्यते ॥२८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – सर्वाचारसम्पत्तिमतः शिवयोगिनः एकभाजनत्वं निरूपयति – **विश्वम् इति । विश्वं** जगदिदं सर्वं **शिवमयं चेति** शिवस्वरूपम् इति **सदा** सर्वदा **धिया** बुद्ध्या **भावयतः** ध्यायतः तस्य शिवयोगिनः **शिवैकभाजनात्मत्वात्** केवलं शिवमेव आश्रितत्वात् तत्सम्बन्धिस्थलस्य **एकभाजनम्** एकभाजनस्थलम् इति **उच्यते** कथ्यते ॥ सर्वं परमात्मनि शिवे एकभाजनतां व्रजति । तदुक्तम् – "गताः कलाः पञ्चदश प्रतिष्ठां, देवाश्च सर्वे प्रति देवतासु । कर्माणि विज्ञानमयश्च आत्मा, परेऽव्यते सर्व एकीभवन्ति ॥" (मुं. उ., ३.२.७) इति । प्राणाद्याः देहारम्भिकाः पञ्चदशकलाः स्वां स्वां प्रतिष्ठां स्वं स्वं कारणं गताः भवन्ति । (प्रतिष्ठाः इति द्वितीयाबहुवचनम्) । सर्वे देवाः, चक्षुरादिकरणस्थिताः सर्वे देवाः, आदित्यादिषु प्रतिदेवतासु विलीनाः भवन्ति । अनासक्ततया कृतानि, अत एव अप्रवृत्तफलानि कर्माणि विज्ञानघनश्च आत्मा परेऽव्यये अनन्ते अक्षये आकाशसदृशे परब्रह्मणि अद्वये शिवे शान्ते सर्वे एकत्वम् आपद्यन्ते। एषा मोक्षावस्था। (पश्यत– मुं.उ., ३.२.७, शं.भा) । यथा वारिखड्गादि-प्रतिफलनपदार्थात्मकेषु उपाधिषु निष्कासितेषु सत्सु सूर्यः, यथा वा उपाधिभूतेषु घटमठादिषु निष्कसितेषु सत्सु महाकाशः, तथा सर्वोपाधिनिरस्तः आत्मा शिव एव केवलः । तथा स्थितो यः शिवयोगी स्वाभिन्नं शिवमेव न केवलम् आत्मनः परं तु अनन्तानां पिण्डाण्डानां ब्रह्माण्डानां च भाजनमिति मननात् स एवैकभाजन इत्युच्यते ॥२८॥

स्वस्य सर्वस्य लोकस्य शिवस्याद्वैतदर्शनात् ।
एकभाजनयोगेन प्रसादैक्यमतिर्भवेत् ॥२९॥

व्याख्या – एकभाजनेन किं भवतीत्यत्राह – **स्वस्येति । स्वस्य** स्वात्मनः **सर्वस्य लोकस्य** सकलस्य जगतः चराचरात्मकस्य, **शिवस्य** परशिवस्य च **अद्वैतदर्शनात्** पराहन्तारूपचिदैक्यस्य साक्षात्कारात् **एकभाजनयोगेन** एकाश्रयसम्बन्धेन **प्रसादैक्यमतिः** शिवप्रसाद एव स्वप्रसादः, स्वप्रसाद एव सर्वस्य प्रसाद, स एव गुरुलिङ्गजङ्गमानां प्रसाद, स एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवभक्तस्य प्रसाद इति प्रसादैक्यबुद्धिः **भवेत्** जायेत ॥ इदमेव एकभाजनस्य प्रसादसामरस्यम् । पूर्वोक्तेषु भक्तादिस्थलेषु "एकमूर्तेस्त्रयो भागा गुरुर्लिङ्गं च जङ्गमः" (चं.आ., क्रि.पा., ५.१५) इत्येकत्रयभावना-धारितं प्रसादैक्यं वैचारिकं गुरुलिङ्गजङ्गमानां प्रसादैकत्वरूपम्, अत्र तु स्वात्मनः, सर्वस्य लोकस्य, गुरुलिङ्गजङ्गमानां, शिवभक्तानां सर्वेषां प्रसादैक्यं साक्षात्कृतप्रसादैकत्वरूपम् इति मन्तव्यम् । अयं प्रसादैक्य-भावश्च एकभाजनस्थलस्य नैसर्गिकी विशेषता ॥२९॥

शिवे विश्वमिदं सर्वं शिवः सर्वत्र भासते ।
आधाराधेयभावेन शिवस्य जगतः स्थितिः ॥३०॥

व्याख्या – शिवस्य जगतश्च स्थितिमाह – **शिवे** इति । **शिवे** परशिवे **इदं सर्वं विश्वम्** एतत्समग्रं जगत् **शिवः** परशिवः **सर्वत्र** सर्वस्मिन् जगति च **भासते** प्रकाशते । **शिवस्य** परशिवस्य **जगतः** विश्वस्य च **आधाराधेय-भावेन स्थितिः** आश्रयाश्रितभावसम्बन्धेन अवस्थानम् ॥ शिवे विश्वं विश्वस्मिन् शिव इत्यन्योन्यसम्बन्धो बीजाङ्कुरन्यायेन सङ्गच्छते । शिव-विश्वयोर्भिदा नास्तीति तात्पर्यम् । एवमेव तयोराधाराधेयभावसम्ब-न्धेन स्थितिरपि सामरस्येन स्थितिरित्येव तात्पर्यम् । इदमेव पूर्णत्वं नाम । तदुक्तम् – "पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥" (ई. उ., शान्तिमन्त्रः) इति । अदः अयं परमात्मा परशिवः पूर्णम्, इदम् एतत् विश्वं पूर्णम्, पूर्णात् परशिवब्रह्मणः पूर्णम् इदं जगत् उदच्यते उत्पद्यते । पूर्णम् आदाय पूर्णमिदं विश्वम् आदाय नदीसमुद्रन्यायेन स्वायत्तीकृत्य पूर्णस्य न्यूनाधिकभावरहितत्वेन पूर्णत्वेन स्थितस्य परमात्मनः शिवस्य पूर्णम् एव पूर्णत्वमेव अवशिष्यते स्थीयते । इदमेव एकभाजनस्य स्थितिः । आधारः शिवः, आधेयश्च जगदिति तु भेद औपचारिक एव ॥३०॥

चित्तैकभाजनं यस्य चित्तवृत्तेः शिवात्मकम् ।
नान्यत्तस्य किमेतेन मायामूलेन वस्तुना ॥३१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – चिद्रूपाम् एकभाजनतां प्राप्तस्य भेदघटितमायामूलजगता न किमपि प्रयोजनमित्याह – **चित्तैकभाजनमिति । यस्य** यस्य एकभाजन-स्थलस्थस्य **चित्तवृत्तेः** मनोव्यापारस्य **शिवात्मकः** शिवस्वरूपम् **चित्तैक-भाजनं** चित्तैकाश्रयत्वम्, **तस्य न अन्यत्** तस्य नास्ति अन्याश्रयत्वम् । अन्याश्रयत्वं तस्य नैव अपेक्षितम् इत्यर्थः । तस्य **एतेन** एतादृशेन **मायामूलेन** मायिकभेदघटितेन **वस्तुना** जगद्रूपेण वस्तुना **किं** किं प्रयोजनम् ? न किमपि प्रयोजनम् इत्यर्थः ॥ शिवैक्यस्य मनोव्यापार अद्वयसच्चिदानन्दस्वरूपिणि परमात्मनि शिवे दृढतया निरूढः । तस्य सत्ता शिवस्य सत्ता, तस्य चित् शिवस्य चित्, तस्यानन्दः शिवस्यानन्दः । एवं तस्य न कस्मिन्नपि पृथग्भावः । अतस्तस्य भेदघटितजगता नास्ति किञ्चिदपि प्रयोजनम् ॥३१॥

चित् प्रकाशयते विश्वं तद्विना नास्ति वस्तु हि ।
चिदेकनिष्ठचित्तानां किं मायापरिकल्पितैः ॥३२॥

व्याख्या – उक्तमेव विशदयति – **चिदिति । चित्** परमचिद्रूपः शिवः **विश्वं** चराचरात्मकमिदं जगत् **प्रकाशयते** प्रकाश्यतां नीयते, **तद्विना** तेन चित्प्रकाशेन विना **वस्तु** विश्वपदार्थजातं **नास्ति हि** न भवतीति प्रसिद्धमेव । **चिदेकनिष्ठचित्तानां** चित् परमचिद्रूपः शिवः, एकस्मिन्नेव निष्ठा एतनिष्ठा, चिदि चिद्रूपे शिवे एकनिष्ठा यस्मिन् तत् चिदेकनिष्ठं चित्तं येषां ते चिदेकनिष्ठचित्ताः, तेषाम्, **मायापरिकल्पितैः** मायया परिकल्पितैः पदार्थैः **किं** किं प्रयोजनम् ? न किमपि प्रयोजनम् इत्यर्थः ॥ सर्वमिदं मायाशक्तिपरिकल्पितं भेदघटितं विश्वं परमचिद्रूपेण परशिवेन प्रकाशितम् । विना चित्प्रकाशं नास्त्येव प्रापञ्चिकं वस्तुजातम् । यथा तरङ्गफेनबुद्बुदादयो जलोत्पन्ना जलमेव सर्वे, यथा घटशरावादयो मृदुत्पन्ना मृदेव सर्वे, यथा च कङ्कणकुण्डलहारादयः सुवर्णोत्पन्नाः सुवर्ण एव सर्वे, तथा वस्तुजातरूपं सर्वं जगत् शिवोत्पन्नं शिव एव नान्यत् । एवं जगदिदं सर्वं शिवस्वरूपम्, शिवादभिन्नं च । अत एकभाजनस्य मायाकल्पितजगतो नास्ति किमपि प्रयोजनम् ॥३२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वृत्तिशून्ये स्वहृदये शिवलीने निराकुले ।
यः सदा वर्तते योगी स मुक्तो नात्र संशयः ॥३३॥

व्याख्या – पूर्वोक्तस्थितिसम्पन्नो योगी मुक्त एवेत्युक्त्वा एकभाजनस्थलं समापयति – **वृत्तिशून्ये** इति । **यः योगी** यः शिवयोगी **वृत्तिशून्ये** व्यापाररहिते, **शिवलीने** शिवे एकीभूते **निराकुले** क्षोभशून्ये **स्वहृदये** स्वीये हृदि **सदा वर्तते** निरन्तरं निवसति, **सः** तादृशः योगी **मुक्तः** जीवन्मुक्तः, **अत्र** अस्मिन् विषये **न संशयः** नास्ति सन्देहः ॥ "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" (छां. उ., ३.१४.१) इत्युक्तरीत्या शान्तोऽयं शिवलीनो महात्मा जीवन्मुक्त एव ॥३३॥

– इति एकभाजनस्थलम् –

४. अथ सहभोजनस्थलम् – (४४)

गुरोः शिवस्य शिष्यस्य स्वस्वरूपतया स्थितिः ।
सहभोजनमाख्यातं सर्वग्रासात्मभावतः ॥३४॥

व्याख्या – एकभाजनस्थलानुभवसम्पन्नस्य सहभोजनस्थलमाह – **गुरो**रिति । **गुरोः** दीक्षाशिक्षाज्ञानप्रदातुः श्रीगुरोः **शिवस्य** लिङ्गत्रयसमन्वयात्मकस्य शिवस्य **शिष्यस्य** भक्तस्वरूपस्य शिष्यस्य च **स्वस्वरूपतया** स्वात्माभिन्नत्वेन **स्मृतिः** स्मरणम्, **सर्वग्रासात्मभावतः** सर्वस्य विश्वभेदस्य ग्रासः कवलनं एव आत्मा स्वरूपम्, तस्य भावः स्थितिः, तस्मात्, विश्वभेदग्रसनस्वरूपत्वात्, **सहभोजनम् आख्यातं** सहभोजनम् इति कथितम् ॥ सामान्यार्थे सहभोजनं नाम एकस्यां पङ्क्तौ अनेकेषां भोजनम् । आध्यात्मिकस्तरे तस्य "सर्वेषां मध्ये अनुभवैक्यता" इत्यर्थः । अयमेव प्रज्ञानौन्नत्यशिखरे प्राप्तः सर्वात्मैक्यसाक्षात्कारः । स्वात्माभिन्नत्वेन नास्ति गुरुः, नास्ति शिवः, न चास्ति शिष्यः । न तत्रास्ति भेदस्य गन्धोऽपि । सर्वे शिवयोगिनः आत्मानन्दं सहैवास्वादयन्ति । एषा स्थितिः सहभोजनस्थले स्थितस्य शिवैक्यस्य । स एव सर्वग्रासकः ॥३४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवं विश्वं गुरुं साक्षाद्योजयेन्नित्यमात्मनि ।
एकत्वेन चिदाकारे तदिदं सहभोजनम् ॥३५॥

व्याख्या – सहभोजनस्य लक्षणमाह – **शिवम् इति । शिवं** परशिवं **विश्वं** सर्वं जगत् **गुरुं** श्रीगुरुं **साक्षात्** यथार्थतया **एकत्वेन** एकस्वरूपत्वेन **नित्यं** सदा **चिदाकारे** चिद्रूपे **आत्मनि** स्वात्मनि **योजयेत्** संयोजयेत् चेत्, **तदिदं** तर्हि इदं **सहभोजनं** सहभोजनम् इत्युच्यते ॥ शिवस्य विश्वस्य गुरोः स्वात्मनश्च सुदृढं सन्देहरहितं च सच्चिदानन्दात्मकैक्यस्थितिः सहभोजनम् इत्युच्यते । अत्रेदं विचारणीयम् – ननु शिवगुरुस्वात्मनां चेतनत्वाद् "अहंप्रत्ययवेद्यत्वम्", विश्वस्य त्वचेतनत्वाद् "इदंप्रत्ययवेद्यत्वम्", एवं स्थिते चेतनानाम् ऐकात्म्यं संभाव्यम्, कथम् अचेतनस्य विश्वस्य तैः सहैकात्म्यं शक्यम् इति । अत्रोच्यते – नायमाक्षेपः समीचीनः, पूर्वानुभूतस्य नामरूपात्मकस्य विश्ववैविध्यस्याऽऽत्मन्येव विश्रान्तिरिति पूर्वमेवोक्तत्वात् । नामरूपात्मकवैविध्यस्याऽऽत्मनि निमज्जनाद् विलयाच्च आधारभूतं सच्चिदानन्दस्वरूपमेव अवशिष्यते ॥३५॥

अयं शिवो गुरुश्चैव जगदेतच्चराचरम् ।
अहं चेति मतिर्यस्य नास्त्यसौ विश्वभोजकः ॥३६॥

व्याख्या – विश्वभोजकस्वरूपमाह – **अयम् इति । अयं शिवः** एष परशिवः, **गुरुश्चैव** एष गुरुश्च **एतत् चराचरं जगत्** इदं च जङ्गमस्थावरात्मकं विश्वम् **अहं च** तद्भिन्नः अहं च, **इति यस्य मतिः नास्ति** इति यस्य बुद्धिः नास्ति, **असौ** तादृशोऽयं **विश्वभोजकः** विश्वभोजकः विश्वभोक्ता इत्युक्तः ॥ सहभोजनसम्पन्नस्य विश्वभोजक इति नामान्तरम् । तस्याऽऽत्मनि सर्वभेदस्य विलयात् तथोक्तः सः । एषा स्थितिरेव समरसैक्यानन्दस्थितिः । इयमेव गौडपादोक्तदिशा "अमनीभावः" । तदुक्तम् – "मनोदृश्यमिदं द्वैतं यत्किञ्चित्सचराचरम् । मनसो ह्यमनीभावे द्वैतं नैवोपपद्यते ॥" (माण्डूक्य., ३.३१) इति ॥३६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अहं भृत्यः शिवः स्वामी शिष्योऽहं गुरुरेव सः ।
इति यस्य मतिर्नास्ति स चाद्वैतपदे स्थितः ॥३७॥

व्याख्या – भेदबुद्धिराहित्येन सोऽद्वैतपदे तिष्ठतीत्याह – **अहम्** इति । **अहं भृत्यः** अहं सेवकः, **शिवः स्वामी** परमात्मा शिवः भर्ता; **अहं शिष्यः** अहम् अन्तेवासी **सः गुरुः एव** शिवः एव आचार्यः; **इति** एवं **यस्य मतिः नास्ति** यस्य बुद्धिः नास्ति **स च** स च शिवैक्यः **अद्वैतपदे** शिवाद्वैतस्तरे **स्थितः** तिष्ठति ॥ इदमेव शिवैक्यस्य लक्षणम् । तदद्वैतपदे भेदबुद्धेर्नास्त्यवकाशलेशोऽपि ॥३७॥

पराहन्तामये स्वात्मपावके विश्वभास्वति ।
इदन्ताहव्यहोमेन विश्वहोमीति कथ्यते ॥३८॥

व्याख्या – सहभोजनस्थलसम्पन्नो विश्वहोमीति नाम्ना ज्ञायते इत्याह – **पराहन्तेतीत्यादिना** । **विश्वभास्वति** भासः प्रभाः सन्त्यस्य इति भास्वान्, मतुप्, (पा.अ., ५.२.९४), भासकः, प्रकाशकः, विश्वस्य सर्वस्य भास्वान् विश्वभास्वान्, तस्मिन् विश्वभास्वति, विश्वप्रकाशके **पराहन्तामये** पराहन्ता मूलाहङ्कारः, तन्मये, पराहन्तापूर्णे **स्वात्मपावके** स्वात्मा एव पावकः अग्निः, तस्मिन् स्वात्मपावके, **इदन्ताहव्यहोमेन** इदन्ता इदमिति जगद्रूपः भेदभावः, इदन्ता एव हव्यं हविः, इदन्ताहव्यम्, तस्य होमेन अर्पणेन स शिवैक्यः **विश्वहोमी इति** विश्वहोमीति नाम्ना **कथ्यते** कीर्त्यते ॥ पराहन्ता एव पूर्णाहन्ता । आगामिनि श्लोके पूर्णाहन्तास्वरूपं वक्ष्यते ॥३८॥

अहं शिवो गुरुश्चाहमहं विश्वं चराचरम् ।
यया विज्ञायते सम्यक् पूर्णाहन्तेति सा स्मृता ॥३९॥

व्याख्या – पूर्णाहन्तालक्षणमाह – **अहम् इति** । **अहं शिवः** अहं परशिवः, **अहं गुरुश्च** अहं श्रीगुरुरपि, **अहं** अहमेव **चराचरं विश्वं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्थावरजङ्गमात्मकं जगत्, इति **यया सम्यग् विज्ञायते** यया समीचीनतया साक्षात्क्रियते **सा पूर्णाहन्ता इति** सा पूर्णाहन्तानाम्ना **स्मृता** ज्ञाता ॥ "प्रत्यवमर्शात्मासौ चितिः स्वरसवाहिनी परा वाग् या । आद्यन्त-प्रत्याहृतवर्णगणा सत्यहन्ता ॥" (विरू. प., ९) इत्युक्तदिशा 'इदमहम्, अहमिदम्' इत्यवमर्शात्मिका या परा वाक् सा अक्षरसमाम्नायस्य 'अ' इति 'ह' इति च आद्यन्ताक्षराभ्यां मकारान्तत्वेन भावार्थकतला च घटिता "अहन्ता" एव । तत्र मकारः शिवसमवेताया बिन्दुरूपायाः शक्तेः सङ्केतः । सृष्टेः प्राक् जगदिदम् अण्डरसन्यायेन अहन्तायां निहिता आसीत् । शिवसमवेतशक्तेः स्पन्देन तस्या बाह्यमिदं सकलं जगद् आविरभूत् । अनन्तरम् अन्यपदार्थव्यामिश्रितत्वेन सा हीनस्वातन्त्र्यं तान् पदार्थान् प्रविश्य प्रतिबिम्बतां गता । समानचैतन्यवशात् प्रतिबिम्बः बिम्बेनैक्यं जगाम । तादृशम् ऐक्यं सम्पाद्य विश्वमयत्वेन निर्गतसर्वसङ्गा विराजते । एषा एव शिवैक्यसम्पन्नस्य सर्वभोजिनः पूर्णाहन्ता ॥३९॥

आधारवह्नौ चिद्रूपे भेदजातं जगद्धविः ।
जुहोति ज्ञानयज्वा यः स ज्ञेयो विश्वहव्यभुक् ॥४०॥

व्याख्या – शिवैक्य एव विश्वहोमीत्याह – **आधारवह्नौ इति** । **यः ज्ञानयज्वा** यः ज्ञानम् एव यजते इति ज्ञानयज्वा, ज्ञान यज (देवपूजायाम्) ङ्वनिप् – "सुयजोर्ङ्वनिप्" (ङ्वनिप् – वन् – "पा.अ., ३.२.१०३"), अत्र ज्ञानयज्वा तु शिवैक्यः, **चिद्रूपे** ज्ञानस्वरूपे **आधारवह्नौ** स्वात्मा-भिन्नपरमात्मरूपे आधाराग्नौ **भेदजातं** भेदसमूहभूतं **जगद्धविः** जगदेव हविः, तत् विश्वात्मकं हविः **जुहोति** समर्पयति **सः** तादृशः **विश्वहव्यभुक्** विश्वमेव हव्यम्, तद् भुनक्ति इति विश्वहव्यभुक्, इति **ज्ञेयः** मन्तव्यः ॥ 'आधारवह्नौ' इत्यस्य 'आज्ञाचक्रगतवह्नौ' इति यद् व्याख्यानं श्रीमरि-तोण्टदार्येण कृतं तच्चिन्त्यम् । "आधारशब्देन" जगदाधारत्वं संभाव्य तच्च शिवैक्यस्य स्वात्माभिन्नशिवत्वमिति ग्रहीतुं शक्यते । शिवैक्योऽत्र जगद्रूप-भेदजालभूतं हविर्भुङ्क्ते इति कारणात् स विश्वहव्यभुग् भवति ॥४०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चिदाकारे पराकाशे परमानन्दभास्वति ।
विलीनचित्तवृत्तीनां का वा विश्वक्रमस्थितिः ॥४१॥

व्याख्या – चिदाकाशे विलीनमनोव्यापाराणां शिवैक्यसम्पन्नानां विश्वक्रमपरिज्ञानं विस्मृतम्, अत एव नास्तीत्याह – **चिदाकारे इति । चिदाकारे** चिद्रूपे (ज्ञानस्वरूपे) **पराकाशे** महाकाशे च **परमानन्दभास्वति** परमः आनन्दः परमानन्दः स एव भास्वान् सूर्यः, तस्मिन्, परमानन्दसूर्ये **विलीनचित्तवृत्तीनां** विलीना चित्तवृत्तिः येषां ते, तेषाम्, विलीनमनोव्यापाराणां, **विश्वक्रमस्थितिः** विश्वक्रमव्यवस्था **का वा** का वा भवितुम् अर्हति । न कापि भवितुम् अर्हतीत्यर्थः ॥ विश्वक्रमस्तु विश्वपरिणामक्रमः । स च एकस्मात् सद्वस्तुनः । सद्वस्तु नाम शक्तिविशिष्टः शिवः । वारशैवपरिभाषायां तस्य परमस्थलम् इति नाम । तदुक्तम् – "एकमेव परं ब्रह्म सच्चिदानन्दलक्षणम् । शिवतत्त्वं शिवाचार्याः स्थलमित्याहुरादरात् । सर्वेषां स्थानभूतत्वाल्लयभूतत्वतस्तथा । तत्त्वानां महदादीनां स्थलमित्यभिधीयते ॥" (अनु. सू., २.२-३) इति । कथमारभत सृष्टिरूपपरिणामक्रमः ? इति चेदुक्तम् – "स्वशक्तिक्षोभमात्रेण स्थलं तद्द्विविधं भवेत् । एकं लिङ्गस्थलं प्रोक्तमन्यदङ्गस्थलं स्मृतम् ॥" (अनु. सू., २.१०) इति । तत्र शिवरूपं लिङ्गस्थलं त्रिधा जातं भावलिङ्गं प्राणलिङ्गम् इष्टलिङ्गं चेति । जीवरूपम् अङ्गस्थलमपि त्रिधा जातं योगाङ्गं भोगाङ्गं त्यागाङ्गं चेति । तदुक्तम् – "लिङ्गस्थलं त्रिधा ज्ञेयं तद्भेदो वर्ण्यते क्रमात् । प्रथमं भावलिङ्गं स्याद् द्वितीयं प्राणलिङ्गकम् । तृतीयमिष्टलिङ्गं स्यादित्येतत् त्रिविधं स्मृतम् ॥" (अनु. सू., ३.५-६) इति, "अङ्गस्थलं त्रिधा ज्ञेयमाचार्यैः सूक्ष्मदर्शिभिः । योगाङ्गं प्रथमं प्रोक्तं भोगाङ्गं तु द्वितीयकम् । त्यागाङ्गं तु तृतीयं स्यादेवमेव त्रिधा भवेत् ॥" (अनु. सू. ४.५) इति च । लिङ्गस्थलेषु त्रिषु एकैकमपि द्विधा अभवत्; भावलिङ्गं महालिङ्गं प्रसालिङ्गं चेति द्विधा, प्राणलिङ्गं पुनश्चरलिङ्गं शिवलिङ्गं चेति द्विधा, इष्टलिङ्गं च गुरुलिङ्गम् आचारलिङ्गं चेति द्विधा । एवमेव अङ्गस्थलेषु योगाङ्गम् ऐक्यस्थलं शरणस्थलम् इति द्विधा अभवत्, भोगाङ्गं प्राणलिङ्गिस्थलं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रसादिस्थलम् इति द्विधा जातम्, त्यागाङ्गं च माहेश्वरस्थलं भक्तस्थलमिति द्विधा बभूव । एवम् आहत्य द्वादशस्थलानि अभवन् । (पश्यत – अनु. सू., ३.१९-२१; ४.११-१४) । एतेषां तत्त्वभूतानां द्वादशस्थलानां द्वारा चराचरात्मकं विश्वं समष्टिव्यष्टिरूपयोराविरभूत् । अयं विश्वस्य प्रवृत्तिक्रमः अथवा विकासक्रमः । निवृत्तिक्रमे अथवा संहृतिक्रमे (उपसंहारक्रमे) व्यष्टिरूपं जगत् षट्सु अङ्गस्थलेषु (भक्तादिषु) विलीयते । समष्टिरूपं जगत् षट्सु लिङ्गस्थलेषु (आचारादिषु) लीयते । अनन्तरं षडङ्गस्थलानि त्यागाङ्गादिषु त्रिषु अङ्गस्थलेषु विलीयन्ते । षट्लिङ्गस्थलानि च त्रिषु इष्टादिषु त्रिषु लिङ्गस्थलेषु लीयन्ते । अनेनैव क्रमेण त्रीणि अङ्गस्थलानि अङ्गस्थले त्रिणि च लिङ्गस्थलानि लिङ्गस्थले विलयं गच्छन्ति । अन्ते च अङ्गस्थल-लिङ्गस्थले एकस्मिन् परमस्थलभूते परमात्मनि विलीयेते । प्रवृत्तिक्रमः निवृत्तिक्रमश्चेत्युभयमपि विश्वक्रम इत्युच्यते । ऐक्यस्थले स्थितः शिवयोगी विश्वक्रममिमं विस्मृत्य समरसभक्तियुक्ते शिवाद्वयस्थले निवसति । तस्मिन् परमाद्वयानन्दे विलीनसर्वचित्तवृत्तेः शिवयोगिनः का कथा विश्वक्रमस्य? तस्य विश्वक्रमस्थितिर्न काप्यस्ति ॥४१॥

निरस्तविश्वसम्बाधे निष्कलङ्के चिदम्बरे ।
भावयेल्लीनमात्मानं सामरस्यस्वभावतः ॥४२॥

सैषा विद्या परा ज्ञेया सत्तानन्दप्रकाशिनी ।
मुक्तिरित्युच्यते सद्भिर्जगन्मोहनिवर्तिनी ॥४३॥

व्याख्या – लिङ्गैक्यस्य मुक्तिस्वरूपमाह – **निरस्तेत्यादिना युग्मेन** । **निरस्तविश्वसम्वाधे** विश्वस्य सम्बाधः क्लेशः जननमरणात्मकः, विश्वसम्बाधः, निरस्तः विश्वसम्वाधः यस्मात्तत्, तस्मिन्, **निष्कलङ्के** निर्गतं कलङ्कं यस्मात्तत्, तस्मिन्, **चिदम्बरे** चिदेव अम्बरं [अम्बं शब्दं राति ददाति इति – अम्ब रा क (अ)], तस्मिन्, शिवैक्यः **आत्मानं** स्वात्मानं **सामरस्यस्वभावतः** समरसस्य भाव सामरस्यम्, सामरस्यमेव स्वभावः सामरस्य-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वभावः तस्मात्, सामरस्यस्वभावतः, **लीनं भावयेत्** नितरां निमग्नः इति ध्यायेत् । **सा एषा** एतादृशी सा **सत्तानन्दप्रकाशिनी** सत्ता च आनन्दश्च सत्तानन्दौ, तौ प्रकाशयतीति, सत्तानन्दप्रकाशिनी, सच्चिदानन्दप्रकाशिनी **विद्या** ज्ञानं **परा ज्ञेया** परम् इति ज्ञेयम्; **जगन्मोहनिवर्तिनी** जगतः मोहः जगन्मोहः, विश्वभेदभ्रान्तिः, जगन्मोहं निवर्तयतीति, तादृशी परा विद्या, **मुक्तिः इति** मोक्षः इति **सद्भिः** सज्जनैः प्राज्ञैः **उच्यते** कथ्यते ॥ सहभोजनस्थः शिवैक्यो महालिङ्गे विलीनस्वात्मा स्वात्मानं पृथक्तया नैव अभिजानाति । तादृश्यां स्थितौ विश्वक्लेशास्तं न स्पृशन्ति । नास्ति तत्र दोषलेशोऽपि । अपरिमितसच्चिदानन्दस्वरूपं केवलं तस्य । इदं सामरस्येन मज्जनं स्वरूपहानिवृद्धिव्यतिरिक्तम् इत्युच्यते । एषा एव स्थितिः मोक्षस्य ॥४२-४३॥

भक्तादिधामार्पितधर्मयोगात्
प्राप्तैकभावः परमाद्भुतेन ।
शिवेन चिद्व्योममयेन साक्षान्-
मोक्षश्रियो भाजनतामुपैति ॥४४॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते
वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ शिवलिङ्गैक्यस्य
चतुर्विधस्थलप्रसङ्गो नाम चतुर्दशः परिच्छेदः समाप्तः ॥१४॥

व्याख्या – शिवैक्यः एव मोक्षलक्ष्मीनिवासस्थानम् इत्याह – **भक्तादीत्यादिना । चिद्व्योममयेन** चिदेव व्योम चिद्व्योम चिदाकाशः तन्मयेन, चिदाकाशस्वरूपेण इत्यर्थः, **परमाद्भुतेन** परमाश्चर्यभूतेन **शिवेन** परशिवेन **भक्तादिधामार्पितधर्मयोगात्** भक्तः (भक्तस्थलम्) अदिः येषा तानि, भक्तादीनि धामानि, भक्तादिधामसु अर्पिताः धर्माः आचाराः तेषां योगात् सम्बन्धात्, **प्राप्तैकभाव** एकस्य भावः एकभावः, प्राप्तः एकभावः येन सः, प्राप्तैकभावः शिवैक्यः, **साक्षात्** प्रत्यक्षम्, **मोक्षश्रियः** मोक्षः एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

श्रीः मोक्षश्रीः मोक्षलक्ष्मीः, तस्याः, **भाजनताम् उपैति** आश्रयतां प्राप्नोति ॥ अत्रापि उपजातिवृत्तम् । पद्येऽस्मिन् प्रथमः, द्वितीयः, चतुर्थश्चेति त्रय इन्द्रवज्रापादाः । केवलं तृतीयः उपेन्द्रवज्रापादः । इन्द्रवज्रा-उपेन्द्रवज्रयोर्मेलनादुपजातिः । लक्षणमुक्तं प्राक् ॥४४॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
चतुर्दशः परिच्छेदः समाप्तः ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चदशः परिच्छेदः

भक्तस्थलान्तर्गत नवविधलिङ्गस्थलप्रसङ्गः

व्याख्या – भक्तस्थलादिषडङ्गस्थलानां पिण्डादिसहभोजनान्तचतुश्चत्वारिंशदवान्तरस्थलेषु विहितकर्मानुष्ठानेन सम्पादितज्ञानानुभवेन च लब्धश्रद्धादिभक्तिविकासः साधकः पर्यवसानभूतसमरसभक्तिनिर्भरः सन् शिवैक्यतां प्राप्य स्वयमेव लिङ्गस्वरूपो भवति । तेन आचरणीयानि लिङ्गस्थलानि ग्रन्थकृन्निरूपयति श्रीरेणुकोक्तिरूपेण -

षट्स्थलोक्तसदाचारसम्पन्नस्य यथाक्रमम् ।
लिङ्गस्थलानि कथ्यन्ते जीवन्मुक्तिपराणि च ॥१॥

व्याख्या – लिङ्गरूपलिङ्गैक्यस्य लिङ्गस्थलानि जीवन्मुक्तिपराणीत्याह – **षट्स्थलोक्तेत्यादिना । षट्स्थलोक्तसदाचारसम्पन्नस्य** षट्स्थलानि भक्तादिषट्स्थलानि, अङ्गस्थलानां चतुश्चत्वारिंशत्संख्याकानि अवान्तरस्थलानि इति यावत्, तेषु उक्ताः कथिताः सदाचाराः, तैः सम्पन्नः युक्तः, तस्य, शिवलिङ्गैक्यस्य इत्यर्थः, **जीवन्मुक्तिपराणि** जीवतः मुक्तिः जीवन्मुक्तिः तत्पराणि तत्सम्बद्धानि **लिङ्गस्थलानि** लिङ्गषट्स्थलान्तर्गतानि सप्ताधिकपञ्चाशत्संख्याकानि अवान्तरस्थलानि, **यथाक्रमं** क्रमानुसारं दीक्षागुरुस्थलादारभ्य ज्ञानशून्यस्थलपर्यन्तं क्रमेण **कथ्यन्ते** उच्यन्ते ॥ श्रीसिद्धान्तशिखामणेः कन्नडसंस्कृतव्याख्यातृभिर्लिङ्गस्थलानि शिवैक्येन क्रमेणाऽऽचरणीयानीति, तानि तस्य जीवन्मुक्तिपराणीति च व्याख्यायन्ते । लिङ्गैक्यस्तु लिङ्गमेव । लिङ्गस्थलानि तस्याऽऽचरणायैवोद्दिष्टानीति स्पष्टम् । अत्र श्लोके तदेवोक्तं ग्रन्थकृता । व्याख्यातृभिर्योऽयं मार्गोऽनुसृतः स

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

क्रम-समुच्चयमार्ग इति कथ्यते । अस्मिन् मार्गेऽङ्गस्थलानां निरूपणानन्तरं प्राप्तशिवैक्याय लिङ्गस्वरूपिणे लिङ्गस्थलानि क्रमेण निरूप्यन्ते । प्राप्तशिवैक्यस्य किमर्थमिदं सर्वमिति चेदुच्यते – नारिकेलफलदृष्टान्त-द्वाराऽस्य विशदीकरणं शक्यते कर्तुम् । तथा हि – नारिकेलफलं कोमलकोशदशातः पक्वकोशदशापर्यन्तं क्रमेण वर्धते । एवं भक्तस्थला-दारभ्यैक्यस्थलपर्यन्तं पिण्डस्थलतः सहभोजनस्थलपर्यन्तेष्ववान्तराङ्ग-स्थलेषु साधकः क्रमेण वर्धते । कोशवर्धनेन नारिकेलफलं तु पक्वं भवति। एवमेव शिवयोगी शिवैक्यतां प्राप्य पक्वतां गच्छति । नारिकेलकोशस्य पक्वत्वेऽपि तदन्तः स्वादुजलम् अवशिष्यते । एवमेव प्राप्तशिवैक्य-भावस्य शिवयोगिनः देहधारणवशाद् अनिवार्यतया अनुवर्तमाना केचन संस्कारा अवशिष्यन्ते । तेषां संमार्जनार्थं सप्तपञ्चाशत्संख्याकानि लिङ्ग-स्थलानि कथितानि । यथा नारिकेलस्य स्वादुजलयुक्तः आभ्यन्तरकोशो बहिरावरणभूतेन कठिनकोशेन श्लिष्टसम्बन्धी सन् स्वादुजलं क्रमेण किञ्चित्किञ्चिदिवाऽऽत्मनि विलीय बहिर्गतकठिनकोशतः क्रमेणाऽऽत्मानं मोचयति, तथा शिवैक्यः बाह्यदेहनिमित्तसंस्कारान् स्वात्मनि विलीय बाह्यजगद्रूपकठिनकोशतः स्वात्मानं क्रमेण मोचयति । निर्गतजलांशतो नारिकेलकोशतस्तैलं निष्पद्यते । तच्च तैलं दीपप्रज्ज्वालनक्रमेणाऽदृश्यतां गच्छति । एवमेव लिङ्गस्थलेषु शिवयोग्यध्यात्मानुभवेन सूक्ष्मातिसूक्ष्मतां गतो विस्मृतत्रिपुटीभावत्वेन परशिवब्रह्मणि विलीय सर्वशून्यस्थितौ तिष्ठति ॥ [बल्लारीमण्डले नन्दीपुरक्षेत्रस्य लिङ्गैक्यश्रीमता दोड्डबसवार्येणेदं सदृष्टान्तं विशदीकृतमिति बेंगलूरु विश्वविद्यालयस्य भूतपूर्व-प्राध्यापकेन संयुक्त-राष्ट्र-संघस्य (U.N.O.) भूतपूर्वजनसंख्याशास्त्र-प्रवीणेन (Demographic Expert) मम बन्धुना डा. शिवमूर्तिमहोदयेन कथितम् ।]

इदानीं भक्तादिस्थलान्तर्गतत्वेन निरूपितानां क्रमेण संबन्धः मयात्र विशदीक्रियते । तथा हि – भक्तस्थलसम्बन्धिषु नवलिङ्गस्थलेषु एक-भोजनसम्पन्नः शिवैक्यः स्वकीयेन साधनेन गुरुः, लिङ्गम्, जङ्गमश्चेति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वरूपत्रयं विन्दते । दीक्षागुरुस्थलम्, शिक्षागुरुस्थलम्, ज्ञानगुरुस्थलं चेति त्रिषु गुरुस्थलेषु शिवैक्यः कथं परमं ज्ञानं साधकेभ्यो दत्त्वा पाशबन्धनं च क्षयीकृत्य (दीयते क्षीयते इति) दीक्षागुरुत्वम्, प्रश्नोत्तरक्रमेण शिष्यस्य बोधकत्वेन शिक्षागुरुत्वम्, संशयच्छेदपूर्वकं शिष्याय सम्यज्ज्ञानप्रदातृत्वेन ज्ञानगुरुत्वं च प्राप्यते इत्युक्तम् । क्रियालिङ्गस्थलम्, भावलिङ्गस्थलम्, ज्ञानलिङ्गस्थलं चेति त्रिषु लिङ्गस्थलेषु स शिवैक्यो ज्ञानगुरुत्वं समवलम्ब्याऽऽत्मनः पूजादिक्रियां क्रियालिङ्गमिति नामान्तरभाजि इष्टलिङ्गे, क्रियावद् भावमपि प्राणलिङ्गमिति नामान्तरयुक्ते भावलिङ्गे, भावज्ञापकं ज्ञानं च भावलिङ्गमिति नामान्तरशालिनि ज्ञानलिङ्गे विनिवेश्य स्वयमेव इष्टलिङ्गम्, प्राणलिङ्गम्, भावलिङ्गम् भवतीति प्रदर्श्यते । स्वयस्थलम्, चरस्थलम्, परस्थलं चेति त्रिषु जङ्गमस्थलेषु स शिवैक्यो ज्ञानलिङ्गज्ञापकं ज्ञानं स्वात्मनि विलीय स्वयजङ्गमत्वम्, स्वयजङ्गमज्ञापकं ज्ञानं स्वात्मनि विलीय चरजङ्गमत्वम्, स्वस्वरूपतः परं नास्तीति ज्ञानेन परजङ्गमत्वं च प्राप्नोति इत्युक्तम् ॥

माहेश्वरस्थलीयेषु नवलिङ्गस्थलेषु क्रियागमस्थलम्, भावागमस्थलम्, ज्ञानागमस्थलं चेति त्रिषु आगमस्थलेषु (आगमः = शास्त्रम्), कथं परजङ्गमयोगिनः पूजादिक्रियाः सर्वेषां साधकानां क्रियागमः, तस्य यानि भावचिह्नानि तानि भावागमः, तस्य यानि ज्ञानचिह्नानि तानि ज्ञानागमश्चेति निरूप्यते । सकायस्थलम्, अकायस्थलम्, परंकायस्थलं चेति त्रिषु कायस्थलेषु कथं ज्ञानागमदर्शको योगी कुर्वन्नपि कायसम्बन्धिक्रियास्तेषु सङ्गराहित्येन सकायः, तस्य काययुक्तत्वम् आभासमात्रमिति सकायोऽपि अकायः, सच्चिदानन्दस्वरूपिणि परवस्तुनि निवसन् परकायश्च भवतीति प्रदर्शितम् । धर्माचारस्थलम्, भावाचारस्थलम्, ज्ञानाचारस्थलं चेति त्रिष्वाचारस्थलेषु परकायाख्यस्य शिवलिङ्गैक्यस्य धर्माचारा विश्वहितार्था इति, तस्य शिवाभिन्नभावाः (मनोगताः) सर्वेषां श्रद्धापोषका भावाचारा इति, तस्य ज्ञानाभिव्यञ्जकाः सदाचाराः सर्वेषां ज्ञानाचारा इति च द्योत्यते ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रसादिस्थलसम्बन्धिषु नवलिङ्गस्थलेषु कायानुग्रहस्थलम्, इन्द्रियानुग्रहस्थलम्, प्राणानुग्रहस्थलं चेति त्रिष्वनुग्रहस्थलेषु ज्ञानाचारयोगिनः देहदर्शनमेव सर्वेषां कायानाम् अनुग्रहायेति कायानुग्रहः, इन्द्रियैस्तस्य सन्निकर्षः सर्वेषाम् इन्द्रियाणाम् अनुग्रहायेति इन्द्रियानुग्रहः, आभ्यन्तरलिङ्गे ये प्राणा विनिवेशितास्तेऽपि सर्वेषां प्राणानाम् अनुग्रहायेति प्राणानुग्रहश्च प्रदर्शितः। कायार्पणस्थलम्, करणार्पणस्थलम्, भावार्पणस्थलं चेति त्रिष्वर्पणस्थलेषु कथं प्राणानुग्रहसम्पन्नस्य शिवयोगिनः देहाभिमानत्यागेन कायार्पणम् इति, शिवे इन्द्रियानुसन्धानेन करणार्पणम् इति, मनोगतानां शिवे समर्पणेन भावार्पणम् इति च निर्दिश्यते। शिष्यस्थलम्, शुश्रूषुस्थलम्, सेव्यस्थलं चेति त्रिषु स्थलेषु भावार्पणशालिना योगिना बोधनद्वारा शिष्यस्य प्रज्ञाजागरणम्, अध्यात्मज्ञानप्रदानद्वारा शुश्रूषोः प्रेरणादानम्, तादृशस्य साधकस्य सर्वेषां सेव्यत्वात् समुद्धरणं च कथं क्रियते इति निरूप्यते॥

प्राणलिङ्गिस्थलान्तर्गतेषु नवलिङ्गस्थलेषु आत्मस्थलम्, अन्तरात्मस्थलम्, परमात्मस्थलं चेति त्रिष्वात्मस्थलेषु निरस्तसर्वजीवभावत्वेन स्वात्मताम्, अन्तरात्मताम्, परमात्मतां च कथं प्राप्यते इति वर्ण्यते। निर्देहागमस्थलम्, निर्भावागमस्थलम्, नष्टागमस्थलं चेति त्रिष्वन्यादृशागमस्थलेषु परमात्मस्थलसम्पन्नस्य निरस्तदेहधर्मसङ्गत्वम्, निवारितात्मस्वरूपाननुगुणभावत्वम्, सर्वभेदभावरहितप्रज्ञानत्वं च कथं स प्राप्यते इति प्रदर्श्यते। आदिप्रसादिस्थलम्, अन्त्यप्रसादिस्थलम्, सेव्यप्रसादिस्थलं चेति त्रिषु प्रसादिस्थलेषु नष्टागमसम्पन्नस्य शिवयोगिनः शिवानुग्रहप्राप्तत्वाद् आदिप्रसादित्वम्, स्वात्मनः शिवत्वप्रत्ययदार्ढ्येन अन्त्यप्रसादित्वम्, गुरुरूपशिवेन सह सामरस्येन सेव्यप्रसादित्वं च कथं प्राप्तमिति कथितम्॥

शरणस्थलान्तर्गतेषु द्वादशलिङ्गस्थलेषु दीक्षापादोदकस्थलम्, शिक्षापादोदकस्थलम्, ज्ञानपादोदकस्थलं चेति त्रिषु पादोदकस्थलेषु सेव्यप्रसादिनो दीक्षयाऽपगतगुरुशिष्यभेदज्ञानेन तयोः आनन्दैक्यत्वं दीक्षा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पादोदकत्वम्, गुरुशिष्ययोः शिक्षायोगेन सामरस्यं शिक्षापादोदकत्वम्, शिवैक्यानन्दवशात् ज्ञानगुरुत्वे तत्सामरस्येन ज्ञानपादोदकत्वं चेति वर्ण्यते। क्रियानिष्पत्तिस्थलम्, भावनिष्पत्तिस्थलम्, ज्ञाननिष्पत्तिस्थलं चेति त्रिषु निष्पत्तिस्थलेषु ज्ञानपादोदकनिष्ठस्य योगिनः परमात्मकायत्वात् कर्मफलनिवृत्तिद्वारा क्रियनिष्पत्तिमत्त्वम्, प्रतीयमानानां भावानां परकाये कल्पितत्वात् भावनिवृत्तिद्वारा भावनिष्पत्तिमत्त्वम्, व्यवहारज्ञानस्य ज्ञेयाभावेन ज्ञाननिवृत्तिद्वारा ज्ञाननिष्पत्तिमत्वं चेति कथ्यते । पिण्डाकाशस्थलम्, बिन्द्वाकाशस्थलम्, महाकाशस्थलं चेति त्रिष्वाकाशस्थलेषु ज्ञाननिष्पत्तिमतः शिवयोगिनः पिण्डस्थाकाशवद् आत्मा पूर्ण इत्येतद्विवेकेन पिण्डाकाशत्वम्, आकाशस्य विभुत्ववद् आत्मनो विभुत्वम् इति बिन्द्वाकाशत्वम्, पिण्डाकाशाण्डाकाशयोर्महाकाशस्य चाऽभिन्नत्ववद् आत्मपरमात्मनोरभिन्नत्वमिति महाकाशत्वं चोच्यते । क्रियाप्रकाशस्थलम्, भावप्रकाशस्थलम्, ज्ञानप्रकाशस्थलं चेति त्रिषु प्रकाशस्थलेषु चिदाकाशस्वरूपिणः शिवस्य स्वत्मत्वेन निरन्तरानुसन्धानात् रूपक्रियाद्वारा क्रियाप्रकाशत्वम्, समुद्रतरङ्गन्यायेन बुद्ध्यादिभावानां स्वात्मत्वेन ग्रहणाद् भावप्रकाशत्वम्, शिवजीवैक्यज्ञानस्य लक्षणावृत्तियोगेन समर्थनं ज्ञानप्रकाशकत्वं च कथ्यते ॥

ऐक्यस्थलान्तर्गतेषु नवलिङ्गस्थलेषु स्वीकृतप्रसादिस्थलम्, शिष्टोदनस्थलम्, चराचरलयस्थलं चेति त्रिषु स्थलेषु ज्ञानप्रकाशवान् शिवैक्यः पूर्णज्ञानप्रसादं स्वीकृत्य स्वीकृतप्रसादी, मायारूपशिष्टोदनस्य चिल्लिङ्गरूपे स्वात्मनि लयेन शिष्टोदनस्थली, चराचरजगतः स्वात्मनि समापत्तिद्वारा चराचरलयस्थली च भवतीति निरूपितम् । भाण्डस्थलम्, भाजनस्थलम्, अङ्गालेपस्थलं चेति त्रिषु स्थलेषु चराचरलयस्थलिनो यो विमर्शः ब्रह्माण्डशतकोटीनां सृष्टिस्थितिलयान् प्रति अधिष्ठानभूतः स एव भाण्डस्थलम् इति, यस्मिन् विश्ववैचित्र्यकारिणी विमर्शाख्या पराशक्तिः प्रतिष्ठिता स परशिवब्रह्मभूतः शिवयोग्येव विश्वभाजनम् इति, भाजनसम्पन्नः शिवयोग्येव अङ्गकर्मलेपरहितत्वेन अङ्गालेपवान् इति विशदीक्रियते। स्वपराज्ञस्थलम्, भावाभावलयस्थलम्, ज्ञानशून्यस्थलं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चेति त्रिषु स्थलेषु चिदाकारे शिवाद्वैतभावे विलीनत्वाद् अङ्गालेपसम्पन्नस्य स्वात्मा परात्मा चेति विचाररहितत्वेन स्वपराज्ञत्वम्, चिदाकाशे एकीभूतस्य भावाभावकथा नास्तीति भावाभावलयत्वम्, ज्ञातृज्ञेयज्ञानात्मकत्रिपुटीशून्यत्वात् तस्य ज्ञानशून्यत्वं च निरूपितम् ॥ इयमेव शिवैक्यस्य जीवन्मुक्तस्थितिः । सा च आदेहपातात् वरीवर्तते ॥

समसमुच्चयवादिनस्तु भक्तादिषट्स्थलान्तर्गतानां चतुश्चत्वारिंशदङ्गस्थलानि तथा सप्ताधिकपञ्चाशल्लिङ्गस्थलानि च सममेवाऽऽचरणीयानीति वदन्ति । तेषां मते जीवात्मपराण्यङ्गस्थलानि क्रियाभक्तिसमुच्चयात्मकानि परमात्मपराणि च लिङ्गस्थलानि तेभ्यो ज्ञानाधिष्ठानं प्रददति । एष समुच्चयरीतिः संमन्वयदृष्ट्याऽतीव कठिना प्रतिभाति । अतोऽत्र व्याख्याने क्रमसमुच्चय एव साधुत्वेनाऽवलम्ब्यते ॥१॥

व्याख्या – अथागस्त्यप्रश्नः । अगस्त्य उवाच –

भक्ताद्यैक्यावसानानि षडुक्तानि स्थलानि च ।
लिङ्गस्थलानि कानीह कथ्यन्ते कति वा पुनः ॥२॥

व्याख्या – भक्ताद्यङ्गस्थलसम्पन्नस्यैक्यस्योच्यमानानि लिङ्गस्थलानि कानि कति वेत्यगस्त्यप्रश्नः – **भक्तादीत्यादिना । भक्ताद्यैक्यावसानानि** भक्तस्थलादारभ्य ऐक्यस्थलपर्यन्तानि **षट्स्थलानि** षडङ्गस्थलानि **उक्तानि च** कथितानि च । **इह** अत्र अङ्गषट्स्थलसम्पन्नस्य शिवैक्यस्य कृते **कानि** कीदृशानि किं नामानि **कति वा** कतिसंख्याकानि वा **लिङ्गस्थलानि** परमात्मस्वरूपसम्बन्धीनि लिङ्गस्थलानि **कथ्यन्ते** उच्यन्ते ? इत्यगस्त्यस्य प्रश्नः ॥२॥

व्याख्या – श्रीरेणुक उवाच –

गुर्वादिज्ञानशून्यान्ता भक्तादिस्थलसंश्रिताः ।
स्थलभेदाः प्रकीर्त्यन्ते पञ्चाशत् सप्त चाधुना ॥३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – श्रीरेणुकोऽगस्त्यप्रश्नस्योत्तरमाह – **गुर्वादीत्यादिना** । अधुना इदानीं **भक्तादिस्थलसंश्रिताः** भक्तस्थलादारभ्य ऐक्यस्थलपर्यन्तं यानि षट्स्थलानि भवन्ति तानि संश्रयन्ते इति भक्तादिस्थलसंश्रिताः **गुर्वादिज्ञानशून्यान्ताः** दीक्षागुरुस्थलादारभ्य ज्ञानशून्यस्थलपर्यन्तं विद्यमानाः **पञ्चाशत् सप्त च** सप्ताधिकपञ्चाशत्संख्याकाः **स्थलभेदाः** लिङ्गस्थलप्रकाराः **प्रकीर्त्यन्ते** प्रस्तूयन्ते ॥३॥

आदौ नवस्थलानीह भक्तस्थलसमाश्रयात् ।
कथ्यन्ते गुणसारेण नामान्येषां पृथक् शृणु ॥४॥

व्याख्या – भक्तस्थलसंश्रितानां नवलिङ्गस्थलानां नामनिर्देशप्रतिज्ञा क्रियते – **आदाविति** । **आदौ** आरम्भे **भक्तस्थलसमाश्रयात्** भक्तस्थलसम्वद्धत्वात् **गुणसारेण** गुणाधिक्यकारणेन इह अत्र **नवस्थलानि** नवलिङ्गस्थलानि **कथ्यन्ते** उच्यन्ते । **तेषां नामानि** नवस्थलानां तेषामभिधानानि **पृथक्** प्रत्येकतया **शृणु** आकर्णय ॥ अत्र दीक्षादिगुरुत्वेन क्रियादिलिङ्गत्वेन स्वयादिजङ्गमत्वेन च शिवैक्यस्य सम्बन्धो भक्तस्थलस्थानां साधकानां कृते भवतीत्यभिप्रायेण नवस्थलान्येतानि भक्तस्थलसमाश्रयाणीत्युक्तम् ॥४॥

दीक्षागुरुस्थलं पूर्वं ततः शिक्षागुरुस्थलम् ।
प्रज्ञागुरुस्थलं चाथ क्रियालिङ्गस्थलं ततः ॥५॥

भावलिङ्गस्थलं चाथ ज्ञानलिङ्गस्थलं ततः ।
स्वयं चरं परं चेति तेषां लक्षणमुच्यते ॥६॥

व्याख्या – तानि नवलिङ्गस्थलानि वदति – **दीक्षेत्यादिना युग्मेन** । १. दीक्षागुरुस्थलम्, २. शिक्षागुरुस्थलम्, ३. ज्ञानगुरुस्थलम् (प्रज्ञागुरुस्थलम्), ४. क्रियालिङ्गस्थलम्, ५. भावलिङ्गस्थलम्, ६. ज्ञानलिङ्गस्थलम्, ७. स्वयस्थलम्, ८. चरस्थलम्, ९. परस्थलं चेति, **तेषां** एतेषां क्रमेण **लक्षणम् उच्यते** स्वरूपं कथ्यते ॥५-६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१. अथ दीक्षागुरुस्थलम् – (४५)

दीयते परमं ज्ञानं क्षीयते पाशबन्धनम् ।
यया दीक्षेति सा तस्यां गुरुर्दीक्षागुरुः स्मृतः ॥७॥

व्याख्या – दीक्षागुरुलक्षणमाह – **दीयते इति । यया परमं ज्ञानं** यया परतत्त्वभूतस्य परशिवस्य ज्ञानं **दीयते** प्रदीयते, **पाशबन्धनं** मलमायादि-पाशानां बन्धनं **क्षीयते** क्षीणतां नीयते, **सा** तादृशी **दीक्षा इति** दीयते क्षीयते इति दीक्षा भवति । **तस्यां** तस्यां दीक्षायां **गुरुः** उपदेशकः शिवैक्यः, **दीक्षगुरुः** दीक्षागुरुनाम्ना **स्मृतः** ज्ञातः ॥ गुरुशब्दः 'गृ निगरणे शब्दे च' इति धातोः निष्पन्नः । स गुरुः शिष्यस्य अज्ञानं निगिरति, ज्ञानप्रकाशेन प्रकाशयति, मोक्षमार्गं दर्शयति च । एवं लिङ्गैक्यवानेव दीक्षगुरुः । (पश्यत – सि. शि., ६.१२-१४) ॥७॥

गुणातीतं गुकारं च रूपातीतं रुकारकम् ।
गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः ॥८॥

व्याख्या – गुरुशब्दस्याऽक्षरनिष्पत्तिमाह – **गुणातीतम् इति । गुकारं** गुकाररूपमक्षरं **गुणातीतं** प्राकृतगुणातीतम् **रुकारकं** रुकाररूपमक्षरं **रूपातीतं** रूपातिक्रान्तम्, **यः** यो महात्मा **गुणातीतं** प्राकृतगुणातीतम् **अरूपं च** रूपरहितं च परवस्तुभूतं लिङ्गं **दद्यात्** यच्छेदनुग्रहेण **सः** सः महात्मा **गुरुः** गुरुः इति **स्मृतः** ज्ञातः ॥ सत्त्वं रजः तमश्चेति त्रयः प्रकृतेर्गुणाः; तस्या घटकभूतास्ते । गुणानां समावस्था प्रकृतिः । तस्याः समावस्थाया विघटने षट्त्रिंशत्तत्त्वस्वरूपं चराचरं जगद् उत्पद्यते तस्याः सत्यपरिणामरूपेण । सर्वा सृष्टिर्गुणमयी, तस्याः प्रकृतिपरिणामरूपत्वात् । अतः तत्सृष्ट्यन्तर्गताः सर्वे जीविनस्त्रिगुणात्मका भवन्ति । तत्तद्-गुणाधिक्येन जीविनः सात्त्विकाः, राजसाः तामसाश्चेति त्रिविधाः । सात्त्विकास्तावत् शान्ताः, शूरः, भक्तियुक्ताश्च । राजसा उद्दीप्तस्वभावाः, कोपाविष्टाः, लौकिकव्यवहारेष्वत्यासक्ताश्च । तामसा अलसाः, जडाः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कलहप्रियाश्च । एवं जीवजगत्सर्वं त्रिगुणात्मकम्, शिवतत्त्वं तु त्रिगुणातीतम् । शिवतत्त्वं नाम लिङ्गतत्त्वम् । "अशब्दमस्पर्शमरूपमव्ययम्" (कठ. उ., ३.१५) इत्युक्तदिशा गुरुणा दत्तं तावल्लिङ्गं निर्गुणं निराकारं च भवति । गुरुणा स्वानुभाविकशक्त्या कृतानुसन्धानेषु त्रिषु लिङ्गेषु निष्कलं भावलिङ्गं कारणशरीरे, सकलनिष्कलं प्राणलिङ्गं सूक्ष्मशरीरे, सकलम् इष्टलिङ्गं स्थूलशरीरे चेति त्रिषु शरीरेषु त्रीणि लिङ्गानि स्थापितानि । वेधा, मान्त्री, क्रिया चेति दीक्षात्रयेण भावप्राणेष्टलिङ्गसमन्वयात्मकं निर्गुणं निराकारं लिङ्गतत्त्वं अनुगृह्णातीति लिङ्गैक्यः दीक्षागुरुरित्युच्यते ॥८॥

आचिनोति च शास्त्रार्थानाचारे स्थापयत्यलम् ।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥९॥

व्याख्या – दीक्षागुरुत्वेन शिवैक्यस्याऽऽचार्यत्वमपि कथ्यते – **आचिनोति** इति । **यस्मात्** येन कारणेन **शास्त्रार्थान् च** वीरशैवशास्त्राणां रहस्यार्थान् **आचिनोति** प्रचारयति, **आचारे** पञ्चाचारे **अलं स्थापयति** दृढतया नियमयति, **स्वयम् आचरते** स्वयमेव आचारे तिष्ठति, **तेन** कारणेन **आचार्यः च** आचार्यः इति च **उच्यते** कथ्यते ॥ 'आचिनोति' इत्यनेन 'समाहरणार्थः' ग्राह्यः । अत्र वीरशैवशास्त्रस्य अध्ययनं मनसि लयनं च समाहरणं भवति । अयं प्रथमः स्तरः । गुरुश्च तच्छास्त्रं बोधयति आचारे पञ्चाचारात्मके स्थापयति । अयं च द्वितीयः स्तरः । स्वयमाचरते इत्ययं तृतीयः स्तरः । यद्यदुपदिशति श्रीगुरुः तत्तत्स्वयमेव आचरते । अनेन शिष्याणां मनसि तदाचारे तत्प्रामाण्ये च विश्वासः सञ्जायते । यास्केनापीदम् उक्तम् – "आचार्यः । आचारं ग्राहयति । आचिनोति अर्थान् । आचिनोति बुद्धिम् इति वा" (नि. १.२) इति । आचार्यशब्दः आङ् (आ) उपसर्गपूर्वकचर्धातोः आचरते इति कर्त्रर्थे ण्यत्प्रत्यययोजनेन ("ऋहलोर्ण्यत्" – पा. ३.१.१२४) निष्पन्नः । 'आचारे स्थापयति' इति तु आचार्यस्य महती उपपत्तिः । स च ज्ञानाचारयोः सामरस्यपथं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निर्दिशति। अत एव स आचार्यः। "आश्चर्यो वक्ता कुशलोऽस्य लब्धा" (कठ. उ., २.७) इत्युक्तरीत्या एतादृशो वक्ताऽतीव विरलः, एवमेव एतादृशबोध्योऽपि विरलः। (पश्यत – सि.शि., ९.२७ – व्याख्यां पञ्चाचाराणां स्वरूपं ज्ञातुम्) ॥९॥

षडध्वातीतयोगेन यतते यस्तु देशिकः।
मायाब्धितारणोपायहेतुर्विश्वगुरुः शिवः ॥१०॥

व्याख्या – आचार्यशब्दनिर्वचनानन्तरं देशिकशब्दनिर्वचनम् आह – **षडध्वेत्यादिना। यः** तु यो महात्मा **देशिकः** गुरुः **षडध्वातीतयोगेन** वर्णपदादिषडध्वानः तेभ्यः अतीतः, षडध्वातीतः योगः, तेन **यतते** उद्युक्तो भवति, सः **मायाब्धितारणोपायहेतुः** माया एव अब्धिः समुद्रः, तस्य तारणोपायः तारणसाधनभूतः, तस्य हेतुः, **विश्वगुरुः शिवः** जगद्गुरुः परशिवः भवति ॥ ज्ञानप्रसादद्वारा देशिको वर्णाध्वा, पदाध्वा, मन्त्राध्वा, भुवनाध्वा, तत्त्वाध्वा, कलाध्वा चेति षडध्वभ्य अतीते शिवयोगे निरतो भवति। **वर्णाध्वा** नाम वैखर्याख्यया वाचा उत्पद्यमाना अकारादारभ्य क्षकारपर्यन्तं द्विपञ्चाशद्वर्णाः। 'ओम्', 'नमः', 'शिवाय', इत्यादयः वर्णसमुदायाः **पदाध्वा** भवन्ति। "अहं ब्रह्मास्मि", "तत्त्वमसि", इत्यादिपदव्यवस्था तु **मन्त्राध्वा**। भूम्यादिचतुर्दशलोका **भुवनाध्वा**। शिवादिभूम्यन्तषट्त्रिंशत्तत्वानि **तत्त्वाध्वा**। निवृत्तिः, प्रतिष्ठा, विद्या, शान्ति, शान्त्यतीता, शान्त्यतीतोत्तरा चेति षट्कलाश्च **कलाध्वा**। षडध्वाश्रयीभूतः शक्तिविशिष्टशिव एव षडध्वातीतः। षडध्वातीतश्च योगो नाम परमात्मनि शिवे सामरस्येन लोलीभावः। तथा यः शिवे निमज्जति सः षडध्वातीतयोगीति कथ्यते। स शिव एव, शिष्यान् दीक्षया योजने मुक्तिमार्गस्य दिग्दर्शने च समर्थः इति दीक्षागुरुः ॥१०॥

अखण्डं येन चैतन्यं व्यज्यते सर्ववस्तुषु।
आत्मयोगप्रभावेण स गुरुर्विश्वभासकः ॥११॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – दीक्षागुरुभूतस्य लिङ्गैक्यस्य विश्वभासकत्वमुक्त्वा दीक्षा-गुरुस्थलं समापयति – **अखण्डमिति** । **सर्ववस्तुषु** सर्वपदार्थेषु आत्मयोग-प्रभावेण 'शिवोऽहं'भावसाक्षात्कारयुक्तेन प्रभावेण सामर्थ्येन **अखण्डं** सच्चिदानन्दात्मकम् अखण्डं **चैतन्यं** ज्ञानस्वरूपं चैतन्यं **येन व्यज्यते** येन द्योत्यते **स गुरुः** तादृशः गुरुः **विश्वभासकः** विश्वप्रकाशकः ॥ परशिव-चैतन्यं निरवयवम् अखण्डं निर्बाधं च । तच्च सार्वकालिकं निरवधिकं च । न किञ्चिदस्ति वस्तु यत्तच्चैतन्यरहितम् । स्थूलं सूक्ष्मं वा यदस्ति तस्मिन् सर्वस्मिन् तदस्ति । "अणोरणीयान्महतो महीयान्" इति श्रुतिः (कठ. उ., २.२०) । सर्वस्मिन् समवेतमिदमेव कलाशब्देन गीयते । सा कला बाह्यचक्षुषाऽनवलोकनीया, अन्तःचक्षुषैव दर्शनीया । चैतन्यस्य तस्य निरन्तरपोषणेन निशितत्वसम्पादनेन च सर्वत्र सर्वदा तद्दर्शनं प्राप्तुं शक्यते । श्रीगुरुरेव शिष्येभ्यस्तद्दर्शनं प्रापयितुं शक्तः । स एव एवं विश्वभासकः । "तस्य भासा सर्वमिदं विभाति" (क.उ., ५.१५) इति श्रुतिः । शिष्याणाम् अज्ञाननिवारकत्वाद् गुरुः, आचारान् आचिनोति तान् स्थापयति स्वय-माचरते चेति आचार्यः, मुक्तिदिशादेशनाद् देशिकश्च स एव ॥११॥

– इति दीक्षागुरुस्थलम् –

२. अथ शिक्षागुरुस्थलम् – (४६)

दीक्षागुरुरसौ शिक्षाहेतुः शिष्यस्य बोधकः ।
प्रश्नोत्तरप्रवक्ता च शिक्षागुरुरितीर्यते ॥१२॥

व्याख्या – दीक्षागुरुरसौ कथं शिक्षागुरुरिति कथ्यते इत्यत्राह – **दीक्षागुरुरिति** । **असौ दीक्षागुरुः** अयमेव दीक्षागुरुरिति कथितः लिङ्गैक्य-वान् **शिक्षाहेतुः** शिक्षणकारणभूतः **शिष्यस्य बोधकः** शिक्षाप्रेप्सोः स्वशिष्यस्य विद्याप्रदाता सन् **प्रश्नोत्तरप्रवक्ता च** शिष्यकृतप्रश्नस्य उत्तरप्रदाता च **शिक्षागुरुः इति ईर्यते** शिक्षागुरुरिति कथ्यते ॥ दीक्षां प्रदाय शिष्यं वीरशैव-साधनमार्गे स्थापयन् दीक्षागुरुर्भवति । स एव शिष्यस्य शिक्षणहेतुर्भूत्वा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिक्षागुरुरपि भवति । शिष्यस्य मनसि ये ये सन्देहा जाग्रति तान् तान् निवारयितुं समर्थोऽयं शिक्षागुरुः । प्रश्नोत्तरक्रमेण गुरु-शिष्ययोः संवादे जाते गुरुः शिष्यप्रश्नस्योत्तरं दत्त्वा शिष्यसन्देहं परिहरतीति प्रश्नोत्तर-प्रवक्ता इति कथ्यते । अयमेव गुरुशिष्ययोः "आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः" (तै. उ., १.३.२-३) इत्युक्तरीत्या "ज्ञानैकत्वसम्बन्धः" । मुक्तिपर्यन्तं शिष्यं नयतीति विद्यासम्बन्धोऽसौ परमोत्कृष्टो भवति । अन्ये सर्वेऽपि सम्बन्धाः संसारं प्रति नयन्ति । गुरु-शिष्यसम्बन्धे अनुरक्त एव कृतकृत्यतां भजते, नान्यः कश्चन । स एव परशिवस्याऽनुग्रहशक्त्याऽनुगृहीतः । लौकिकसुखम् अन्विष्यमाणाः सर्वेऽप्यन्ये संसारे अधिकाधिकतया बद्धा भवन्ति । तदुक्तं सावस्थाभेदं कठश्रुतौ – "पराचः कामान् अनुयान्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् । अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥" (कठ. उ., ४.२) इति । केवलं दीक्षाप्रदानेन गुरोः कर्तव्यं नैव समाप्तम् । तच्च केवलम् आरम्भः । तस्य यशःसिद्धिरनुवर्तनात्मकं शिष्यसन्देहच्छेदहेतुभूतं शिक्षण-प्रदानम् अवलम्बते । अनेन कर्तव्यभारेण दीक्षागुरुः शिक्षागुरुर्भवति ॥१२॥

बोधकोऽयं समाख्यातो बोध्यमेतदिति स्फुटम् ।
शिष्यो नियुज्यते येन स शिक्षागुरुरुच्यते ॥१३॥

व्याख्या – पूर्वोक्तमेव विशदयति – **बोधकोऽयमिति** । अयं पर-तत्त्वप्रकाशकः लिङ्गैक्यः, यः पूर्वं दीक्षागुरुः इति कथितः, सः **बोधकः** उपदेशकः, इति **समाख्यातः** उक्तः **एतद् बोध्यम्** इति एतत् शिव-योगरहस्यं बोधनीयम् इति **स्फुटं** स्पष्टम् । **येन** येन गुरुणा **शिष्यः नियुज्यते** उपदेशेन नियम्यते **स शिक्षागुरुः** स एव शिक्षागुरुः इति **उच्यते** कथ्यते ॥ परशिवब्रह्मैव स्वात्मेति तु शैवसिद्धान्तसारः । इदं बोध्यम् इति यो ज्ञात्वा तदेवाध्यात्मज्ञानं शिष्याय प्रददाति स शिक्षागुरुः । ज्ञानमिदं शिष्यस्यान्तश्चक्षुरुन्मीलनायाऽञ्जनायते । शिष्य उन्मीलितस्वान्तश्चक्षुः सन् परमात्मतत्त्वं साक्षात्करोति ॥१३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संसारतिमिरोन्माथिशरच्चन्द्रमरीचयः ।
वाचो यस्य प्रवर्तन्ते तमाचार्यं प्रचक्षते ॥१४॥

ददाति यः पतिज्ञानं जगन्मायानिवर्तकम् ।
अद्वैतवासनोपायं तमाचार्यवरं विदुः ॥१५॥

व्याख्या – स एव शिक्षागुरुराचार्यवर इत्याह – **संसारेत्यादिना युग्मेन । यस्य वाचः** यस्य उपदेशपराणि वचांसि **संसारतिमिरोन्माथिशरच्चन्द्रमरीचयः** संसारः एव तिमिरं संसारतिमिरम्, तत् उन्मथितुं शीलम् आसम् इति संसारतिमिरोन्माथिनः, शरदः चन्द्रः शरच्चन्द्रः, तस्य मरीचयः किरणाः, शरच्चन्द्रमरीचयः, संसारतिमिरोन्माथिनः शरच्चन्द्रमरीचयः इव, **प्रवर्तन्ते** प्रवृत्तानि भवन्ति, **तम् आचार्यं** तादृशं गुरुम् आचार्यम् इति **प्रचक्षते** वदन्ति ॥ **यः** यो गुरुः **जगन्मायानिवर्तकं** प्रापञ्चिकभेदभ्रान्तिनिवारकम् **अद्वैतवासनोपायं** स्वाभिन्नशिवत्वरूपायाः वासनायाः निरूढसंस्कारस्य उपायः साधनोपायः, तम्, **पतिज्ञानं** जीवाः सर्वे पशवः शिव एव पतिः इत्येवंरूपं पतिज्ञानं **ददाति** प्रयच्छति तं तं गुरुं, **आचार्यवरं** आचार्यश्रेष्ठम् इति **विदुः** जानन्ति ॥ गुरूपदेशेन शिष्यस्य सन्देहा निरस्ता भवन्ति आनन्दात्मकशिवानुभवश्च जायते । यथा शरच्चन्द्रमरीचयः सर्वदिशासु शीतलप्रकाशं प्रसार्य सर्वजनान् शान्तान् आह्लादितान् करोति तिमिरराशिं निष्कास्य विश्वं प्रकाशयति च, तथाऽऽचार्योपदेशः सर्वेषु शिष्येषु स्वीयं प्रभावं प्रसार्य, तापत्रयनिवारणेन तान् शान्तमनस्कान् निर्मुक्ताज्ञानान्धकारांश्च करोति स्वाभिन्नशिवात्मत्वज्ञानं प्रददाति च । स एवोपदेशकः शिक्षागुरुरिति ज्ञायते ॥ (पश्यत– पति – पशु – पाशात्मकतत्त्वत्रयस्य प्रपञ्चं सि. शि., ५.४२ – श्लोकस्य व्याख्यायाम्) ॥१४-१५॥

पूर्वपक्षं समादाय जगद्भेदविकल्पनम् ।
अद्वैतकृतसिद्धान्तो गुरुरेष गुणाधिकः ॥१६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सन्देहवनसन्दोहसमुच्छेदकुठारिका ।
यत्सूक्तिधारा विमला स गुरूणां शिखामणिः ॥१७॥

व्याख्या – शिवाद्वैतज्ञानसम्पन्न एव गुरुश्रेष्ठ इत्याह – **पूर्वपक्षम् इत्यादिना युग्मेन । जगद्भेदविकल्पनं** प्रापञ्चिकवैविध्यं विकल्पते इति, "नन्दिग्रहपचादिभ्यो ल्युणिन्यचः" (पा.अ., ३.१.१३४) इति ल्यु (यु) प्रत्ययः, "युवोरनाकौ" (पा.अ., ७.१.१) इति योः अनादेश; प्रापञ्चिक-वैविध्यप्रकल्पकम्, **पूर्वपक्षम्** आक्षेपोत्थपकं पक्षं **समादाय** विचारार्थं स्वीकृत्य **अद्वैतकृतसिद्धान्तः** शिवाद्वैतत्वेन सिद्धान्तीकृतवान् **एष गुरुः** अयं शिक्षागुरुः **गुणाधिकः** गुणैः अधिकः, श्रेष्ठः इत्यर्थः ॥ **विमला** निर्मला **यत्सूक्तिधारा** यस्य गुरोः सूक्तीनां धारा वचसां निशितधारा **सन्देहवनसन्दोहसमुच्छेदकुठारिका** संदेहः एव वनसन्दोहः सन्देहवन-सन्दोहः संशयरूपारण्यम्, तं समुच्छेत्तुं समुत्पाटयितुं कुठारिका परशुः भवति, **सः गुरूणां शिखामणिः** सः गुरूणां शिखारत्नम् भवति, श्रेष्ठः इत्यर्थः ॥ पूर्वपक्षः सिद्धान्तश्चेति शास्त्रक्षेत्रे अपरिहार्यो वादक्रमः । पूर्वपक्षो नाम सिद्धान्तपक्षविरोधी आक्षेपः । सिद्धान्तस्तु स्वशास्त्रे अङ्गीकृतः पक्षः । "जगद्भेदविकल्पनम्" पूर्वः पक्षः । "शिवाद्वैतम्" च सिद्धान्तः । "शिवश्च शिवश्च शिवौ, शिवयोः अद्वैतं शिवाद्वैतम्" इति तन्निष्पत्तिः । तत्र प्रथमः शिवः परमात्मा, द्वितीयः शिवश्च जीवात्मा, शिवजीवयोरद्वैतम्, शिवयोरद्वैतम् । तदेव शिवजीवैक्यम्, लिङ्गाङ्ग-सामरस्यम् इत्यपि वीरशैवशास्त्रे व्यवह्रियते । जीवात्मा तु परमात्मनो अंशः । तदुक्तम् – "ममैवांशो जीवलोके जीवभूतः सनातनः" (भ. गी., १५.७) इति, "अंशो नानाव्यपदेशात्" (ब्र. सू., २.३.४०) इति, "जीवो मदंशो ज्ञानात्मा साक्ष्यज्ञानीव दृश्यते" (पार. आ., २१.८०) इति, "अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः" (सि. शि., ५.३४) इति च । एवम् अंशांशिभूतयोर्जीवशिवयोरद्वैतमेव शिवाद्वैतम् । एवं भेदविक-ल्पनभूतं पूर्वपक्षं समादाय, तन्निराकृत्य सयुक्तिकं शिवाद्वैतरूपं सिद्धान्तं शिक्षागुरुः शिष्यस्य सन्देहनिवृत्तिपूर्वकं स्थापयति । एषा सन्देह-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निवृत्तिरिदं च सिद्धान्तस्थापनं "नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥" (भ.गी., १८.७३) इत्यर्जुनवत् सर्वार्पणभावेन प्रपन्नस्यैव शिष्यस्य हृदये शक्येते कर्तुम् ॥१६-१७॥

यत्सूक्तिदर्पणाभोगे निर्मले दृश्यते सदा ।
मोक्षश्रीर्बिम्बरूपेण स गुरुर्भवतारकः ॥१८॥

व्याख्या– शिक्षागुरोः भवतारकत्वमाह – **यत्सूक्तीत्यादिना**। **निर्मले** विमले **यत्सूक्तिदर्पणाभोगे** यस्य गुरोः सूक्तिः एव दर्पणः, तस्य आभोगे विस्तारे **मोक्षलक्ष्मीः** मुक्तिश्रीः, मुक्तिवैभवम् इत्यर्थः, **बिम्बरूपेण** प्रतिबिम्बाकारेण **सदा** सर्वदा **दृश्यते** प्रकाशते, **स गुरुः** स शिक्षागुरुः **भवतारकः** संसारसमुद्रस्य तारकः ॥ शिक्षागुरोः उपदेश एव निर्मलदर्पणः, तस्मिन् मोक्षवैभवं प्रतिबिम्बरूपेण स्पष्टं दृश्यते। तस्य दर्शनं प्राप्य शिष्यस्तत्स्वायत्तीकरणाय यतते । गुरूपदेशस्य सारमुक्तं कठश्रुतौ – "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन । मृत्युं स मृत्युं गच्छति य इह नानेव पश्यति ॥ यथोदकं शुद्धं शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥" (कठ. उ., ४.११, १५) इति । "गुरुप्रसादपात्रं यः स हि मोक्षाय कल्पते । न मुक्तिमूलमन्यद्धि विहाय गुरुसत्कृपाम् ॥" (चं. आ., उ. भा., क्रि. पा., २.९६) इत्यागमोक्तिः श्रीशिक्षागुरोः भवतारकत्वं समर्थयति ॥१८॥

शिष्याणां हृदयालेख्यं प्रद्योतयति यः स्वयम् ।
ज्ञानदीपिकयाऽनेन गुरुणा कः समो भवेत् ॥१९॥

व्याख्या – न कोऽपि श्रीगुरोः समः इति प्रतिपादयति – **शिष्याणाम्** इति। **यः** श्रीगुरुः **स्वयं** स्वयमेव, अन्यसाहाय्यं विना इत्यर्थः, **शिष्याणाम्** आश्रितानां शिष्याणां **हृदयालेख्यं** हृदब्जस्थितं निजस्वरूपचित्रं **ज्ञानदीपिकया** ज्ञानम् एव दीपिका प्रदीपः, ज्ञानदीपिका, तया, **प्रद्योतयति**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रकाशयति, **अनेन** तादृशेन **गुरुणा** शिक्षागुरुणा **कः समो भवेत्** कः समानः स्यात् ? न कोऽपि इत्यर्थः ॥ शिष्यहृदालेख्यं तु "अहं ब्रह्मास्मि" (बृ. उ., १.४.१) इत्येवंरूपं शिवाद्वैतम् । "तत्त्वम् असि" (छां. उ., ६.८.७) इति, "तद्ब्रह्म तदमृतं स आत्मा" (छां. उ., ८.४) इति, "तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते" (कठ. उ., ६.१) इति, "तपसा ब्रह्म विजिज्ञासस्व" (तै. उ., ३.२) इत्येवमादिर्गुरूपदेशस्तत्र प्रदीपायते । अतः शिक्षागुरुणा न कोऽपि सम इत्युक्तम् ॥१९॥

परमाद्वैतविज्ञानपरमौषधदानतः ।
संसाररोगनिर्माथी देशिकः केन लभ्यते ॥२०॥

व्याख्या – तादृशोर्गुरोर्दुर्लभत्वमुक्त्वा शिक्षागुरुस्थलं समापयति – **परमाद्वैतेत्यादिना । परमाद्वैतविज्ञानपरमौषधदानतः** परमं च तदद्वैतं च परमाद्वैतम्, यस्मिन् नास्ति भेदलेशोऽपि तत्, तस्य विज्ञानमेव परमं श्रेष्ठम् औषधम्, तस्य दानतः दानात् **संसाररोगनिर्माथी** संसारः एव रोगः संसाररोगः, संसाररूपामयः, तं निर्मथ्नाति इति, णिनि (इन्) प्रत्ययः, जननमरणपौनःपुन्यरूपरोगविनाशकः **देशिकः** श्रीगुरुः **केन लभ्यते** केन प्राप्यते, शिवानुग्रहरहितेन केनापि न प्राप्यते इत्यर्थः ॥ सच्चिदानन्दस्वरूपे परशिवब्रह्मणि सामरस्येन निमग्नः शिष्याणां संसाररोगविनाशको श्रीगुरुः दुर्लभः, एवमेव नित्यानित्यविवेकवान् गुरूपदेशं ज्ञात्वा तत् साक्षात्कारपरः शिष्योऽपि दुर्लभः । शिवकारुण्यानुग्रहाभ्यामेव शिष्यस्तादृशं गुरुं लभते । स च गुरुः शिवजीवैक्यविज्ञानरूपम् औषधं शिष्याय प्रददाति तमपि सच्चिदानन्दं स्वीयं स्वरूपं साक्षात्कर्तुं प्रेरयति च । तादृशो गुरुर्ब्रह्मवादिनां मध्ये श्रेष्ठः । तदुक्तम् – "आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः" (मु. उ., ३.१.४) इति । यो हि पुनः प्रेयो विहाय श्रेयो वृणीते स हि शिष्याणां वरिष्ठः । उक्तं च – "श्रेयो हि धीरोऽभिप्रेयसो वृणीते, प्रेयो मन्दो योगक्षेमाद् वृणीते" (कठ. उ., २.२) इति । तादृशो गुरुः, तादृशः शिष्यश्च दुर्लभौ । तदुक्तम् – "आश्चर्यो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः'' (कठ.उ., २.७) इति ॥२०॥

— इति शिक्षागुरुस्थलम् —

३. अथ ज्ञानगुरुस्थलम् – (४७)

उपदेष्टोपदेशानां संशयच्छेदकारकः ।
सम्यज्ज्ञानप्रदः साक्षादेष ज्ञानगुरुः स्मृतः ॥२१॥

व्याख्या – शिक्षागुरोः ज्ञानगुरुत्वमाह – **उपदेष्टेति** । **उपदेशानां** निगूढार्थप्रकाशकानाम् उपदेशानाम् **उपदेष्टा** उपदेशकः **संशयच्छेदकारकः** शिष्याणां सन्देहोन्मूलनकरः **एषः** अयं शिक्षागुरुरेव **साक्षात्** स्वाभिन्नशिव-स्वरूपतया **सम्यक् ज्ञानप्रदः** सुज्ञानप्रदायकः सन् **ज्ञानगुरुः स्मृतः** ज्ञानगुरुः इति ज्ञातः ॥ उपदेष्टा – ऋकारान्तपुल्लिङ्गस्य उपदेष्टृशब्दस्य प्रथमैकवचनम् । उपदेशकः, गुरुः इत्यर्थः । 'उपदेशानाम्' इत्यत्र 'उपदेश्यानाम्' इति पाठान्तरम् । उपदेश्यः उपदेशयोग्यः शिष्यः, उपदेशविषयः वा इत्यर्थः । उपदिश्यते इति उपदेश इति निष्पत्या स एवार्थः । उपदेशानाम् इति षष्ठी-बहुवचनेन रहस्यभूतानामौपनिषदां विचाराणाम् (उपदेशकः) इत्यर्थो गृह्यते । 'सम्यज्ज्ञानं' नाम शिवजीवैक्य-स्वरूपज्ञानम् । दीक्षागुरुः शिष्येभ्यः साधनमार्गे प्रायोगिकमार्गदर्शनेन शिक्षागुरुः, स च शिक्षागुरुः पुनः शिवजीवैक्यज्ञानं शिष्येभ्यः सर्वसन्देह-निवारणपूर्वकं दत्त्वा ज्ञानगुरुरपि भवति । ज्ञानगुरोस्तावत् कृत्यत्रय-मुक्तम् – (१) वेदान्तरहस्यानाम् उद्घाटनम्, (२) सन्देहनिवारणम्, (३) सम्यज्ज्ञानदानं चेति । वेदान्तरहस्यानि च ''केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः । चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः । न विद्म न विजानीम यथैतदनुशिष्यात् ॥ ..... यद्वाचाऽनभ्युदितं येन वाग्भ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥'' (केन.उ., १.१-३,४) इति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिष्यसन्देहाश्च "येयं प्रेते विचिकित्सा मनुष्येऽस्तीति चैके नायमस्तीति चैके । एतद् विद्याम् अनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ॥" (कठ.उ., १.२०), "किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्र-तिष्ठाः । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥" (श्वे. उ., १.१) इत्यादयः । सम्यज्ज्ञानं च "अहं ब्रह्मास्मि" (बृ. उ., १.४.१०), "तत्त्वमसि" (छां. उ., ६.८.७), "नेह नानास्ति किञ्चन" (कठ. उ., ४.११) इत्यदिशिवाद्वैतज्ञानम् ॥२१॥

निरस्तविश्वसम्भेदं निर्विकारं चिदम्बरम् ।
साक्षात्करोति यो युक्त्या स ज्ञानगुरुरुच्यते ॥२२॥

व्याख्या – ज्ञानगुरुः कः इति पुनराह – **निरस्तेत्यादिना** । यः यो गुरुः **निरस्तविश्वसम्भेदं** विश्वस्य सम्भेदः विश्वसम्भेदः विश्ववैविध्यम्, निरस्तः निराकृतः विश्वसम्भेदः यस्मात् तत् निरस्तविश्वसम्भेदम्, तत्, चिदम्बरम् इत्यस्य विशेषणम्, तादृशं **निर्विकारं** निर्गतः विकारः यस्मात् तत् निर्विकारम्, विकाररहितम्। तत् **चिदम्बरं** चिदाकाशं **युक्त्या** शिवयोगादारभ्य स्वानुभवपर्यन्तया युक्त्या **साक्षात्करोति** प्रत्यक्षीकरोति, **सः ज्ञानगुरुः** स ज्ञानगुरुः इति **उच्यते** कथ्यते ॥ "आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा" (छां. उ., ८.१४.१) इत्युक्तदिशा परशिवब्रह्मैव चिदम्बरम् । कथं तत् ज्ञायते ? उच्यते – आत्माऽयं सर्वस्य ज़ीवजातस्य चैतन्यं यत् स्वप्रकाशं शरीररहितं सर्वव्यापकं च । तदेव परशिवब्रह्म, तदेव चिदम्बरम् । उक्तं च मैत्रे-य्युपनिषदि – "देशकालविमुक्तोऽस्मि दिगम्बरसुखोऽस्म्यहम् । नास्ति विमुक्तोऽस्मि नकारहितोऽस्म्यहम् ॥ अखण्डाकाशरूपोऽस्मि ह्यखण्डा-कारमस्म्यहम् । प्रपञ्चयुक्तचित्तोऽस्मि प्रपञ्चरहितोऽस्म्यहम् ॥ सर्वप्रकाश-रूपोऽस्मि चिन्मात्रज्योतिरस्म्यहम् । कालत्रयविमुक्तोऽस्मि कामादिर-हितोऽस्म्यहम् ॥" (मै. उ., ३.१९-२१) इति । अयमेव "निरस्तसर्व-संभेदः" ॥ तत्साक्षात्कारसम्पन्नो ज्ञानगुरुः ॥२२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कलङ्कवानसौ चन्द्रः क्षयवृद्धिपरिप्लुतः ।
निष्कलङ्कस्थितो ज्ञानचन्द्रमा निर्विकारवान् ॥२३॥

पार्श्वस्थतिमिरं हन्ति प्रदीपो मणिनिर्मितः ।
सर्वगामितमो हन्ति बोधदीपो निरङ्कुशः ॥२४॥

व्याख्या – शिवज्ञानस्य सर्वोत्कृष्टत्वमाह– **कलङ्कवानित्यादिना युग्मेन । असौ चन्द्रः** अयमाकाशे दृश्यमानः चन्द्रः **कलङ्कवान्** कृष्णच्छायावान् **क्षयवृद्धिपरिप्लुतः** क्षयश्च वृद्धिश्च क्षयवृद्धी, ताभ्यां परिप्लुतः पीडितश्च । **ज्ञानचन्द्रमाः** शिवज्ञानरूपः चन्द्रः तु **निष्कलङ्कस्थितः** निर्गतः कलङ्कः यस्मात् सः निष्कलङ्कः, निष्कलङ्के स्थितः निष्कलङ्कस्थितः, कलङ्करहितः इत्यर्थः, **निर्विकारवान्** निर्विकारः क्षयवृद्ध्यादिविकारः, स अस्य नास्ति इति निर्विकारः, तद्वान्, निर्विकारवांश्च ॥ **मणिनिर्मितः** रत्ननिर्मितः **प्रदीपः** तैलप्रदीपप्रदीपः **पार्श्वस्थतिमिरं** पार्श्वे तिष्ठति इति पार्श्वस्थः, पार्श्वस्थं तिमिरं पार्श्वस्थतिमिरं, तत्, पार्श्वस्थान्धकारं **हन्ति** निवारयति, **बोधदीपः** ज्ञानप्रदीपः तु **निरङ्कुशः** निर्गतः अङ्कुशः यस्मात् सः, निरर्गलः सन् **सर्वगामितमः** सर्वं गच्छतीति सर्वगामि, णिनि (इन्) प्रत्ययः, सर्वगामि च तत् तमश्च सर्वगामितमः, तत्, **हन्ति** विनाशयति ॥ उभय श्लोकयोर्व्यतिरेको नामाऽलङ्कारः । प्रथम श्लोके ज्ञानचन्द्रमा उपमेयभूतः, प्रसिद्धचन्द्र उपमानम्; उपमानाद् उपमेयस्याऽऽधिक्यमुक्तमिति व्यतिरेकः । द्वितीय श्लोके बोधदीप उपमेयम्, प्रदीप उपमानम्; अत्रापि उपमानाद् उपमेयस्याऽऽधिक्यं प्रतिपादितमिति व्यतिरेकः । "उपमानाद् यदन्यस्य व्यतिरेकः स एव सः" (मम्मटः) इति व्यतिरेकलक्षणम् । शिवज्ञानं सर्वदा परिशुद्धम् । यद्यत्तेन सम्पर्कं साधयति तत्सर्वं तत्परिशुद्धिं प्राप्नोति । यदा जीवात्मा परमात्मनि शिवे निमज्जति तदा तत्परिशुद्धौ एव निमज्जति । परिशुद्धिर्यथा परिशुद्धौ प्रवहति नदीसमुद्रन्यायेन तथा । इदं सामरस्यमेव शिवज्ञानस्य निजं स्वरूपम् । यः शिवैक्यः शिवज्ञानमीदृशं बोधयति स एव ज्ञानगुरुः ॥२३-२४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वार्थसाधकज्ञानविशेषादेशतत्परः ।
ज्ञानाचार्यः समस्तानामनुग्रहकरः शिवः ॥२५॥

कटाक्षचन्द्रमा यस्य ज्ञानसागरवर्धनः ।
संसारतिमिरच्छेदी स गुरुर्ज्ञानपारगः ॥२६॥

व्याख्या – ज्ञानगुरुरेव साक्षाच्छिव इति प्रशंसति – **सर्वार्थेत्यादि-युग्मेन । सर्वार्थसाधकज्ञानविशेषादेशतत्परः** सर्वार्थाः सर्वेषां भोगमोक्ष-स्वरूपप्रयोजनानि, तानि साधयतीति सर्वार्थसाधकः, ज्ञानस्य विशेषः ज्ञानविशेषः, सर्वार्थसाधकः ज्ञानविशेषः, तस्य आदेशे उपदेशे तत्परः परमासक्तः, तादृशः **ज्ञानाचार्यः** ज्ञानगुरुः **समस्तानां** सर्वेषाम् मोक्ष-काङ्क्षिणाम् **अनुग्रहकरः** अनुग्रहं करोतीति अनुग्रहकरः, तादृशः एव **शिवः** साक्षात् शिवः । **यस्य** यस्य ज्ञानगुरोः **कटाक्षचन्द्रमाः** कटाक्षः एव चन्द्रमाः, कटाक्षचन्द्रः, **ज्ञानसागरवर्धनः** ज्ञानस्य सागरः ज्ञानसागरः, बोधसमुद्रः, तं वर्धयति इति ज्ञानसागरवर्धनः, चन्द्रोदयारम्भे समुद्रवर्धनं कविसमयः; यश्च **संसारतिमिरच्छेदी** संसारः एव तिमिरं, संसारान्धकारः, संसारतिमिरं छिनत्तीति संसारतिमिरच्छेदी (णिनि-प्रत्यय), संसारान्ध-कारविनाशकश्च **सः गुरुः** तादृशः आचार्यः **ज्ञानपारगः** ज्ञानस्य पारं गच्छति इति, ज्ञानपारङ्गतः ॥ ज्ञानगुरुः साक्षाच्छिव एव । भोगमोक्ष-साधकज्ञानप्रदाता सन् सर्वान् मोक्षकाङ्क्षिणोऽनुगृह्णाति । स्वात्मनः शिवैक्यभावं साक्षात्कृत्य तस्मिन् सुखात्मकशिवज्ञाने तिष्ठति । तेन दत्तं विशेषज्ञानं सर्वेषां शिष्याणां पारमार्थिकाभीप्सां पूरयति । चन्द्रज्ञाना-गमोत्तरे श्रीगुरोर्दीक्षाद्वारा भोग-मोक्षप्रदत्त्वं साक्षात् परशिवस्वरूपत्वं च प्रस्तौति – "मोक्षस्य दीक्षासम्प्राप्त्यै गुरुः स्यान्मूलकारणम् । न विना गुरुणा सिद्ध्यै साधनानि भवन्त्यलम् ॥........ यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः । गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥" (चं. आ., उ. भा., क्रि. पा., २.५,७) इति । सूक्ष्मागमोत्तरे च श्रीगुरोः संसारतिमिरोच्छेदभास्करत्वं वर्णयति – "सूर्योदये तमो यद्वत् विनाश-मुपयाति हि । गुरुदर्शनतस्तद्वत् पापजालं प्रणश्यति ॥ संसारदाव-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दहनज्वाला येन विनाशिता । कटाक्षामृतवर्षेण को हि तत्सदृशो भवेत् ॥''
(सू.आ., उ.भा., क्रि.पा., ५.२३-२४) इति ॥२५-२६॥

बहिस्तिमिरविच्छेत्ता भानुरेष प्रकीर्तितः ।
बहिरन्तस्तमश्छेदी विभुर्देशिकभास्करः ॥२७॥

व्याख्या– श्रीगुरोर्भानोरप्यधिकप्रभाववत्त्वं वर्ण्यते– **बहिरिति । एष भानुः** एष आकाशे दृश्यमानः सूर्यः **बहिस्तिमिरविच्छेत्ता** बहिस्तिमिरं बाह्यान्धकारः, तद्, बहिस्तिमिरं विच्छिनत्ति इति बहिस्तिमिरविच्छेत्ता (तृजन्तरूपम्), बाह्यान्धकारविच्छेदकः, इति, **प्रकीर्तितः** प्रस्तूयते । **विभुः** स्वचित्प्रकाशेन सर्वव्यापकः **देशिकभास्करः** देशिकः एव भास्करः देशिकभास्करः (रूपकसमासः), श्रीगुरुरूपसूर्यः, **बहिरन्तस्तमश्छेदी** बहिश्च अन्तश्च तमः छिनत्ति इति बहिरन्तस्तमश्छेदी, बाह्याभ्यन्तरान्धकारविच्छेदकः, बाह्याभ्यन्तराज्ञानभेदकः इत्यर्थः ॥ नेदं शिव इति बाह्यजगद्गतमज्ञानं बहिस्तिमिरम्, नाहं शिव इत्याभ्यन्तरगतमज्ञानम् अन्तःस्तिमिरम् । सूर्यः केवलं बहिरन्धकारं निवारयति, परन्तु देशिकभास्करः पुनर्बहिरन्तस्तमो निवारयति । अत्र उपमानभूतात् सूर्याद् उपमेयभूतस्य श्रीगुरुभास्करस्याऽऽधिक्यमुक्तमिति व्यतिरेकालङ्कारः । लक्षणमुक्तं प्राक् । अपि चात्र केवलं बाह्यान्धकारनिवारक उपमानभूतः सूर्यो बाह्याभ्यन्तरोभयतमश्छेदरूपक्रियार्थं गुरुसूर्यरूपोपमेयरूपेण परिणमति इति परिणामालङ्कारः । ''परिणामः क्रियार्थश्चेद्विषयी विषयात्मना'' (कु.आ., २१ – विषयी = उपमानम्, विषयः = उपमेयम्) इति हि तल्लक्षणम्। व्यतिरेक-परिणामयोरेकव्यञ्जकानुप्रवेशसङ्कर इति वक्तुं शक्यते ॥२७॥

कटाक्षलेशमात्रेण विना ध्यानादिकल्पनम् ।
शिवत्वं भावयेद्यत्र स वेदः शाम्भवो भवेत् ॥२८॥

शिववेदकरे ज्ञाने दत्ते येन सुनिर्मले ।
जीवन्मुक्तो भवेच्छिष्यः स गुरुर्ज्ञानसागरः ॥२९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – ज्ञानगुरोः कटाक्षमात्रेण शिवत्वप्राप्तिः, तज्ज्ञानेन जीवन्मुक्तिप्राप्तिश्चेति कथ्यते, ज्ञानगुरुस्थलं च समाप्यते – **कटाक्षेत्यादिना युग्मेन । ध्यानादिकल्पनं विना** ध्यानधारणसमाध्यादियोगाङ्गाभ्यासं विना **यत्र** यस्मिन् **कटाक्षलेशमात्रेण** श्रीगुरोः कृपापूर्वकेन अपाङ्गदृष्टिमात्रेण **शिवत्वं भावयेत्** शिवत्वं स्पष्टं स्यात् **सः शम्भवो वेदः भवेत्** सः शम्भुवेदः स्यात् ॥ **येन** येन महात्मना **शिववेदकरे** शिवस्वरूपज्ञानबोधके **सुनिर्मले** सुविमले **ज्ञाने दत्ते** ज्ञाने दीयमाने सति **शिष्यः** अन्तेवासी **जीवन्मुक्तो भवेत्** जीवन्नपि मुक्तः स्यात्, **सः गुरुः** तादृशः गुरुः **ज्ञानसागरः** ज्ञानसमुद्रः ॥ "मत्प्रसादमना देवि गुरुमेव समाश्रयेत्" (सू. आ., उ. भा., क्रि. पा., ५.१३ – शिवप्रसादकाङ्क्षी गुरुमेव शरणं व्रजेत्), "समाश्रयेद् गुरुवरं ततो मोक्षमवाप्नुयात्" (सू. आ., उ. भा., क्रि. पा., ५.२१ – पूर्वं गुर्वाश्रयः पश्चाच्च मोक्षप्राप्तिः), "प्रसादपात्रं यः स हि मोक्षाय कल्पते । न मुक्तिमूलमन्यद्धि विहाय गुरुसत्कृपाम् ॥" (चं.आ., उ.भा., क्रि.पा., २.९६) इत्यादिवचनानुसारं गुरुकृपाकटाक्षद्वारा एव मोक्षः, न चन्यथा। श्रीगुरुकृपालब्धेन शिवज्ञानेन शिष्यो जीवन्मुक्तः भवति । शिवज्ञानं नाम "तत् त्वमसि"(छां.उ.,६.८.७),"अहं ब्रह्मास्मि"(बृ.उ.,१.४.१०), इत्यादिश्रुत्युक्तस्य स्वात्मनः शिवत्वस्वरूपसाक्षात्कारः । स च साक्षात्कारः "अनन्यप्रोक्ते गतिरत्र नास्ति, अणीयान् ह्यतर्क्यमणुप्रमाणात्" (कठ.उ.,२.८) इत्युक्तरीत्या अतिसूक्ष्मत्वाद् गुरुप्रसादं विना न शक्यते प्राप्तुम् ॥२८-२९॥

– इति ज्ञानगुरुस्थलम् –

४. अथ क्रियालिङ्गस्थलम् – (४८)

गुरोर्विज्ञानयोगेन क्रिया यत्र विलीयते ।
तत् क्रियालिङ्गमाख्यातं सर्वैरागमपारगैः ॥३०॥

व्याख्या – क्रियालिङ्गं नाम किम् इत्यत्राह – **गुरोः** इति । **गुरोः** ज्ञानगुरोः **विज्ञानयोगेन** विशेषबोधयुक्तत्वेन **यत्र** यस्मिन् लिङ्गे **क्रिया** पूजादिक्रिया **विलीयते** विलयं गच्छति **तत्** तद् इष्टलिङ्गं **क्रियालिङ्गम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

क्रियालिङ्गम् इति **सर्वैः आगमपारगैः** समस्तैः शैवागमपारङ्गतैः **आख्यातं** कथितम् ॥ इष्टलिङ्गं क्रियालिङ्गमित्युक्तम् । बाह्येन्द्रियगृह्यमाणत्वात् तल्लिङ्गं सकलम् । तच्च सावयवत्वाद् यथा सकलम्, तथा शिष्यचित्कला-युक्तत्वादपि सकलम् । सकलपूजादिक्रिया तत्र समर्प्यते इति तत् क्रियालिङ्गम् । न तावदेव । अत्र श्रीगुरुकृपादत्तविशेषज्ञानयोगेन तस्य चिद्रूपत्वमपि सिद्धम् । भावलिङ्ग-प्राणलिङ्गयोराभ्यन्तरलिङ्गयोः श्रीगुरु-प्रणीतानुसन्धानेन तस्य चेतनत्वमपि सिद्धम् ॥३०॥

परानन्दचिदाकारं परब्रह्मैव केवलम् ।
लिङ्गं सद्रूपतापन्नं लक्ष्यते विश्वसिद्धये ॥३१॥

व्याख्या – परब्रह्मैव सर्वकार्यसिद्धये इष्टलिङ्गरूपं भजते इत्याह – **परानन्देत्यादिना । परानन्दचिदाकारं** परः आनन्दः परानन्दः, चित् चेतनं, परमानन्दः, परानन्दश्च चिच्च परानन्दचिदौ, तयोः आकारं स्वरूपम्, परानन्दचिदाकारं **सद्रूपतापन्नं** सत् अस्तित्वम्, सतः रूपं सद्रूपम्, तस्य भाव सद्रूपता, "तस्य भावस्त्वतलौ" (पा.अ. ५.१.११९) इति तल् (तलन्तं स्त्रियाम्), अस्तित्वरूपम् आपन्नं गतम् इत्यर्थः, तादृशं **परब्रह्मैव** परशिवब्रह्म एव **केवलं** साक्षात् **विश्वसिद्धये** सर्वसत्कर्मसिद्ध्यर्थं **लिङ्गम्** इष्टलिङ्गमेव क्रियालिङ्गम् इति **लक्ष्यते** परिगण्यते ॥ परशिवब्रह्मैवाऽ-स्तित्वस्वरूपं धृत्वा 'इष्टलिङ्गम्' इति, पूजादिसत्कर्मविलयात् 'क्रिया-लिङ्गम्' इति विभाव्यते । "तद् ब्रह्म लिङ्गसंज्ञकम्" इत्यागमवचनम् (चं. आ., उ. भा., क्रि. पा., ३.८) । यत् "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ अस्तीत्येवोप-लब्धव्यस्तत्त्वभावेन चोभयोः । अस्तीत्येवोलब्धस्य तत्त्वभावः प्रसीदति ॥" (कठ. उ., ६.१२-१३) इत्युक्तम्, तदनुसारेण क्रियालिङ्गरूपेण अस्ती-त्युपलब्दस्य परशिवब्रह्मणस्तत्त्वरूपं तस्मिन्नेव परिभाव्यते । एतत्पुनः श्रीगुरोः कृपाकटाक्षया शक्यते ज्ञातुम् । श्रीगुरुदत्तोपदेशः शिष्यस्य मनसि श्रद्धारूपेण प्रविश्य क्रमेण परिपाकं प्राप्याऽऽनुभाविकसाक्षात्काररूपेण

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पर्यवसानं विन्दति । एवं तत्त्वानुसन्धानेन क्रियालिङ्गमेव सर्वव्यापक-परशिवब्रह्मणः साक्षात् स्वरूपमिति बुद्धिर्जायते ॥३१॥

लिङ्गमेव परं ज्योतिर्भवति ब्रह्म केवलम् ।
तस्मात् तत्पूजनादेव सर्वकर्मफलोदयः ॥३२॥

व्याख्या – 'विश्वसिद्धये' इत्युक्तं प्राक् । तत्कथमित्यत्राह – **लिङ्गम्** इति । **परं ज्योतिः** परमप्रकाशस्वरूपं **केवलं ब्रह्म एव** केवलं परशिवब्रह्म एव **लिङ्गं** क्रियालिङ्गं क्रियार्थत्वात्, **तस्मात्** तत्कारणाद् **तत्पूजनाद् एव** तस्य पूजाक्रियाद्वारा एव **सर्वकर्मफलोदयः** सर्वेषां कर्मणां फलस्य उदयः, सर्वकर्मसिद्धिः ॥ क्रियालिङ्गाख्यस्येष्टलिङ्गस्य पूजादिना सर्वसत्कर्मसिद्धिर्भवति । पूजादिक्रियाया बाह्यत्वेऽपि मनसि तु लिङ्गतत्त्वमिदं दृढं स्यात् – "आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका । आलयः सर्वभूतानां लयनाल्लिङ्गमुच्यते ॥ यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरम् । स सर्वमोक्षराज्यस्य क्षिप्रं भवति भाजनम् ॥ सर्वे लिङ्गमया लोका सर्वं लिङ्गे प्रतिष्ठितम् । तस्मात् सम्पूजयेल्लिङ्गं यदीच्छेत् सिद्धिमात्मनः ॥" (चं. आ., उ. भा., क्रि. पा., ३.५१-५३) इति । सिद्धिषु परमसिद्धिस्त्वात्मसाक्षात्कारेण मोक्षसिद्धिः ॥३२॥

परित्यज्य क्रियाः सर्वा लिङ्गपूजैकतत्पराः ।
वर्तन्ते योगिनः सर्वे तस्माल्लिङ्गं विशिष्यते ॥३३॥

व्याख्या – लिङ्गपूजा एव श्रेष्ठा इत्याह – **परित्यज्य** इति । **सर्वे योगिनः** समस्तयोगिनः **सर्वाः क्रियाः** योगादिन्यः सर्वाः क्रियाः **परित्यज्य** विहाय **लिङ्गपूजैकतत्पराः** लिङ्गपूजा भावप्राणलिङ्गानुसन्धानपूर्वकम् इष्टलिङ्गपूजा, तस्याम् एकतत्पराः एकाग्रतया तन्मयाः **वर्तन्ते** भवन्ति, **तस्मात्** तस्मदेव कारणात् **लिङ्गम्** इष्टलिङ्गं **विशिष्यते** विशेसतां भजते ॥ केवलम् इष्टलिङ्गपूजा मोक्षाय कल्पते । अन्याः सर्वाः क्रियास्तत्कालीनपरिमित-प्रयोजनाय कल्पन्ते ॥३३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यज्ञादयः क्रियाः सर्वा लिङ्गपूजांशसंमिताः ।
इति यत्पूज्यते सिद्धैस्तत्क्रियालिङ्गमुच्यते ॥३४॥

व्याख्या – यज्ञादिक्रियाः किं त्यजनीया इत्यत्राह – **यज्ञादय इति । यज्ञादयः सर्वाः क्रियाः** दर्शपूर्णमासादयः यज्ञक्रियाः समस्ताः, **लिङ्गपूजांशसंमिताः** लिङ्गपूजायाः इष्टलिङ्गपूजायाः अंशसंमिताः लेशमात्रसमानाः **इति** एवं विचिन्त्य **यत्पूज्यते** यत् लिङ्गम् अर्च्यते, **तत्** तल्लिङ्गं **सिद्धैः** योगिभिः **क्रियालिङ्गं** क्रियालिङ्गम् इति **उच्यते** ब्रूयते ॥ यज्ञादिक्रियाः सर्वा इष्टलिङ्गपूजाया एकांशमात्रेण समानाः । तान् विहायेष्टलिङ्गपूजा करणीया तस्याः शाश्वतफलत्वात् । यज्ञादिक्रियाणां फलानि नश्वराणि । तदुक्तम् – "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो योऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ॥" (मुं. उ., १.२.७) इति । यज्ञादयः क्रिया ज्ञानसम्पर्कहीनाः । अत एव ताः क्रिया अधमाः । सत्यमेतं जानन्तो योगिनो यज्ञादिक्रियाः परित्यज्येष्टलिङ्गपूजामेवाऽऽद्रियन्ते ॥३४॥

किं यज्ञैरग्निहोत्राद्यैः किं तपोभिश्च दुश्चरैः ।
लिङ्गार्चनरतिर्यस्य स सिद्धः सर्वकर्मसु ॥३५॥

व्याख्या – लिङ्गार्चनरतस्य मास्तु यज्ञादिकर्म इत्याह – **किम् इति । अग्निहोत्राद्यैः** अग्निहोत्रादिभिः **यज्ञैः** यज्ञविशेषैः **किं** किं प्रयोजनम्? न किमपि प्रयोजमित्यर्थः । **दुश्चरैः** दुःखेन चरैः, क्लेशेन आचरणीयैः, **तपोभिः** तपोविशेषैः **किं** किं प्रयोजनम्? न किमपि प्रयोजनम् इत्यर्थः । **यस्य** यस्य महात्मनः **लिङ्गार्चनरतिः** लिङ्गार्चने रतिः इष्टलिङ्गार्चने प्रीतिः, **सः** तादृशः महात्मा **सर्वकर्मसु** सर्वेषु कर्मसु **सिद्धः** सिद्धिमान् ॥ यदीष्टलिङ्गार्चनेन सर्वसिद्धिः, तर्हि अन्यत्सर्वकर्माऽनपेक्षितम् इत्यर्थः ॥३५॥

ब्रह्मविष्ण्वादयः सर्वे विबुधा लिङ्गमाश्रिताः ।
सिद्धाः स्वस्वपदे भान्ति जगत्तन्त्राधिकारिणः ॥३६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – ब्रह्मादयो देवा अपि लिङ्गार्चनप्रभावेणैव स्वस्वस्थाने विराजन्ते इत्युक्त्वा क्रियालिङ्गस्थलं समापयति – **ब्रह्मेत्यादिना** । **ब्रह्म-विष्ण्वादयः** ब्रह्मा विष्णुः इत्यादयः **सर्वे विबुधाः** समस्ताः देवाः **लिङ्गम् आश्रिताः** इष्टलिङ्गम् आश्रिताः सन्तः **जगत्तन्त्राधिकारिणः** जगतः तन्त्रं जगत्तन्त्रम्, जगत्सृष्टिस्थित्यादितन्त्राधिकारिणः निर्वहणे नियन्त्रणे चाधिकृताः **स्वस्वपदे** स्वस्वाधिकारस्थाने **सिद्धाः भान्ति** प्रतिष्ठिताः विराजन्ते ॥ (पश्यत – सि. शि., ६.४६-४७, ५६-५७; चं.आ., उ.भा., क्रि.पा., १.२६-४६) । एवं क्रियालिङ्गस्थले लिङ्गपूजाया महत्त्वं बहुधा प्रपञ्चितम् । वीरशैवानां परमोद्देशो न तथा कस्यापि पदस्य कस्या अपि तान्त्रिकसिद्धेर्वा प्राप्तिर्यथा शिवजीवैक्यसामरस्यात्मकस्य मुक्तेर्लाभः । तत्र भुक्तिः केवलम् आनुषङ्गिकं फलम्, मुक्तिरेव परमं फलम् ॥३६॥

– इति क्रियालिङ्गस्थलम् –

५. अथ भावलिङ्गस्थलम् – (४९)

क्रिया यथा लयं प्राप्ता तथा भावोऽपि लीयते ।
यत्र तद्देशिकैरुक्तं भावलिङ्गमिति स्फुटम् ॥३७॥

व्याख्या – यथा क्रियालयेन क्रियालिङ्गम्, तथा भावलयेन भाव-लिङ्गम् इत्याह – **क्रिया इति** । **यथा** येन प्रकारेण इष्टलिङ्गे **क्रिया लयं प्राप्ता** पूजादिक्रिया लीनतां गच्छति, **तथा** तेन प्रकारेण **यत्र** यस्मिन् प्राणलिङ्गे **भावः अपि** भाववस्तुपूजोपचारः अपि **लीयते** लयं गच्छति **तत्** तल्लिङ्गं **देशिकैः** गुरुभिः **भावलिङ्गम् इति** भावलिङ्गाख्यम् इति **स्फुटं** स्पष्टतया **उक्तम्** कथितम् ॥ [पश्यत– सि.शि., १२.१६-२० (प्राणलिङ्गार्चनम्)]। पूजाक्रियाविलयाद् इष्टलिङ्गं क्रियालिङ्गमित्युक्तम् । भावलिङ्गं प्राणलिङ्गं चेत्युभयमपि आभ्यन्तरम् । अस्मिन् स्थले यद्भावलिङ्गमिति वर्ण्यते तत्सर्वं प्राणलिङ्गसम्बद्धम् । "पूजयेद् भावपुष्पैर्यो भावलिङ्गीति कथ्यते" (सि.शि., १५.४१) इति वक्ष्यते । भाववस्तुभिः पूजा तु प्राणलिङ्गस्य विधीयते । अत्र भाववस्तुपूजायाः विलयनाद् इदं भावलिङ्गमेव प्राणलिङ्गम् ॥३७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावेन गृह्यते देवो भगवान् परमः शिवः ।
किं तेन क्रियते तस्य नित्यपूर्णो हि स स्मृतः ॥३८॥

अखण्डपरमानन्दबोधरूपः परः शिवः ।
भक्तानामुपचारेण भावयोगात् प्रसीदति ॥३९॥

व्याख्या – भावलिङ्गस्य प्राशस्त्यमाह – **भावेन इत्यादिना युग्मेन** । देवः दिव्यप्रकाशवान् **भगवान्** अणिमाद्यष्टैश्वर्यम्, वीर्यम्, यशः, सम्पत्, ज्ञानम्, वैराग्यं चेति षडैश्वर्यवान् भगवान्, तादृशः **परमः शिवः** परशिवः **भावेन** भक्तिभावेन **गृह्यते** अभिमुखीक्रियते । **तस्य** भगवतः **तेन** तेन बाह्यकर्मणा **किं क्रियते** किं साध्यते ? न किमपि साध्यते इत्यर्थः । कुतः इति पृष्टे उच्यते – स भगवान् **नित्यपूर्णः** नित्यं न्यूनाधिकभावराहित्येन परिपूर्णः ॥ **अखण्डपरमानन्दबोधरूपः** अखण्डः अपरिच्छिन्नः परमश्च परमोत्कृष्टश्च आनन्दबोधः आनन्दानुभवः, तद्रूपः तत्स्वरूपः **परः शिवः** परशिवः **भक्तानाम् उपचारेण** शिवभक्तिमतां भक्तिपूर्वकं मानसोपचारेण **भावयोगात्** भक्तियुक्तत्वात् **प्रसीदति** प्रसन्नो भवति, अनुग्रहमुखो भवति । 'हि' इति प्रसिद्धौ ॥ भावलिङ्गमत्र परशिवस्वरूपम् । भावो नाम परिशुद्ध भावः । न कोपि भावो भक्तिभावम् अतिक्राम्यति । अतः परिशुद्धभावः भक्तिभाव एव । आभ्यन्तरे अनुभावभक्त्या परिशुद्ध-भावोपचारैः तृप्तिं भजते इति प्राणलिङ्गमेव भावलिङ्गम् । इदमेव भावलिङ्गस्य प्राशस्त्यम् ॥३८-३९॥

मृच्छिलाविहिताल्लिङ्गाद्भावलिङ्गं विशिष्यते ।
निरस्तसर्वदोषत्वाद् ज्ञानमार्गप्रवेशनात् ॥४०॥

व्याख्या – पुनस्तदेव भावलिङ्गस्य प्राशस्त्यमाह – **मृच्छिलेत्यादिना** । **मृच्छिलाविहिताल्लिङ्गात्** मृदा शिलया वा विहितात् निर्मितात् लिङ्गात् बाह्यस्थावरलिङ्गात् **भावलिङ्गं** भावलिङ्गाख्यं लिङ्गं **विशिष्यते** वैशिष्ट्यं भजते । कुतः इति चेदुच्यते – **निरस्तसर्वदोषत्वात्** छेदनादिक्रियाजातैः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समस्तैः दोषैः विमुक्तत्वात् **ज्ञानमार्गप्रवेशनात्** ज्ञानमार्गाङ्गभूतत्वात् च॥ मृच्छिलादिलिङ्गं नाम स्थावरलिङ्गम् । शिल्पिकार्यान्तर्गतत्वेन तत् छेदन-भेदनादिदोषयुक्तं भवति । तद्दोषापनोदनाय तल्लिङ्गस्य जलाधिवासः, धान्याधिवासः, अभिषेकः, इत्यादि संस्कारोऽपेक्षितः । परन्तु भावलिङ्गं (प्राणलिङ्गं) आभ्यन्तरे स्थापितः सत् न कमपि संस्कारम् अपेक्षते । इष्टलिङ्गं सर्वदा प्राणलिङ्ग-भावलिङ्गानुसन्धानयुक्तत्वात्, चिद्रूपत्वाच्च न स्थावरलिङ्गम् इति धीमद्भिर्भाव्यम् ॥४०॥

विहाय बाह्यलिङ्गानि चिल्लिङ्गं मनसि स्मरन् ।
पूजयेद् भावपुष्पैर्यो भावलिङ्गीति कथ्यते ॥४१॥

व्याख्या – भावलिङ्गिनं वर्णयति – **विहायेति । यः** यः शिवैक्यः **बाह्यलिङ्गानि** मृच्छिलादिनिर्मितस्थावरलिङ्गानि बाह्यानि **विहाय** परित्यज्य **मनसि** चित्ते **चिल्लिङ्गं** चिद्रूपलिङ्गं **स्मरन्** स्मरणविषयीकुर्वन्, ध्यायन् इत्यर्थः, **भावपुष्पैः** परिशुद्धभावाः एव पुष्पाणि, तैः, **पूजयेत्** पूजां कुर्यात् सः **भावलिङ्गी इति** भावलिङ्गीति नाम्ना **कथ्यते** वर्ण्यते ॥ अत्रापि भावलिङ्गशब्देन भावपुष्पैपूज्यमानं प्राणलिङ्गमिति भाव्यम् । भावपुष्पै-रित्यनेन सूक्ष्मागमोत्तरभागे उक्तानि अहिंसा, इन्द्रियजयः, सर्वभूतदया, क्षमा, ध्यानम्, तपः, ज्ञानम्, सत्यं चेत्यष्टपुष्पाणि ग्राह्याणि । (पश्यत – सू.आ., उ.भा., क्रि.पा., ६.२५) । अहिंसाद्यैर्भावपुष्पैः पूजयन्नेव स भावलिङ्गीति कथ्यते ॥४१॥

मूलाधारेऽथवा चित्ते भ्रूमध्ये वा सुनिर्मलम् ।
दीपाकारं यजन् लिङ्गं भावद्रव्यैः स योगवान् ॥४२॥

व्याख्या – तद्भावलिङ्गी एव शिवयोगीत्याह – **मूलाधारे** इति । **मूलाधारे** गुदस्थानस्थिते चतुर्दलकमलाश्रयीभूते मूलाधारचक्रे, **अथवा** आहोस्वित् **चित्ते** हृदयस्थानस्थिते द्वादशदलकमलाश्रयीभूते अनाहतचक्रे **भ्रूमध्ये वा** भ्रूमध्यस्थानस्थिते द्विदलकमलाश्रयीभूते आज्ञाचक्रे वा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दीपाकारं ज्योतिस्वरूपं **सुनिर्मलम्** अत्यन्तविमलं **लिङ्गं** प्राणलिङ्गं **भावद्रव्यैः** प्राण-लिङ्गार्चनस्थलोक्तै क्षमादिभाववस्तुभिः **यजन्** पूजयन् **सः** सः भावलिङ्गी **योगवान्** योगी भवति ॥ योगवानेव आभ्यन्तरलिङ्गम् आभ्यन्तर-भाववस्तुभिः पूजयितुं समर्थः ॥ (पश्यत – सि. शि., ६.३९, १२.६, १२.१६-२०) ॥४२॥

स्वानुभूतिप्रमाणेन ज्योतिर्लिङ्गेन संयुतः ।
शिलामृद्दारुसंभूतं न लिङ्गं पूजयत्यसौ ॥४३॥

व्याख्या – बाह्यस्थावरलिङ्गे शिवयोगिनः निष्ठा नास्तीत्याह – **स्वानुभूतीत्यादिना** । **असौ** अयं शिवयोगी **स्वानुभूतिप्रमाणेन** स्वस्य अनुभूतिः स्वानुभूतिः स्वानुभवः, स्वानुभूतिः एव प्रमाणं, तेन, स्वानुभवप्राप्तसम्यज्ज्ञानरूपेण **ज्योतिर्लिङ्गेन** ज्योतिर्मयेन प्राणलिङ्गेन **संयुतः** संयुक्तः **शिलामृद्दारुसंभूतं** शिला च मृत् च दारु च शिलामृद्दारूणि, तेभ्यः संभूतं तैः निर्मितं **लिङ्गं** स्थावरलिङ्गं **न पूजयति** न अर्चयति ॥४३॥

क्रियारूपा तु या पूजा सा ज्ञेया स्वल्पसंविदाम् ।
आन्तरा भावपूजा तु शिवस्य ज्ञानिनां मतम् ॥४४॥

व्याख्या – भाववस्तुभिः प्राणलिङ्गपूजा विशिष्यते इत्युक्त्वा भाव-लिङ्गस्थलं समापयति – **क्रियापूजा इति** । **क्रियारूपा तु** यज्ञादिक्रियारूपा तु **या पूजा** या अर्चना अस्ति **सा** सा अर्चना **स्वल्पसंविदाम्** अल्पज्ञानिनाम् इति **ज्ञेया** अवधेया । **शिवस्य** शिवलिङ्गस्य, प्राणलिङ्गस्य इति यावत्, **आन्तरा** आभ्यन्तरा **भावपूजा तु** भाववस्तुभिः पूजा तु **ज्ञानिनां** सम्यज्ज्ञानवतां **मतं** संमतम् ॥ 'क्रियारूपा पूजा' इत्यत्र क्रियालिङ्गाभिधान-स्येष्टलिङ्गस्य पूजेति व्याख्यानं तु भ्रमाधीनम् । कुत इति चेदुत्तरं वहुवारमुक्तम् । पुनरप्युच्यते – यद्यपि बाह्यैः भस्मधारणादिभिरुपचारैः करस्थलस्थस्येष्टलिङ्गस्य पूजा क्रियते तथापि भावलिङ्ग-प्राणलिङ्गयो-राभ्यन्तरयोर्भावनात्मकमनुसन्धानं पूजाकर्मणि वर्तते इतीयं पूजा न

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

केवलं क्रियारूपा परन्तु गुरूक्तज्ञानेन स्वयंस्पूर्तभक्तिभावेन च संयुक्ता। सर्वत्र सर्वदा वीरशैवानां लिङ्गपूजा तु लिङ्गत्रयसमन्वयस्य पूजा इत्यवगन्तव्या ॥४४॥

– इति भावलिङ्गस्थलम् –

६. अथ ज्ञानलिङ्गस्थलम् – (५०)

तद्भावज्ञापकज्ञानं लयं यत्र समश्नुते ।
तज्ज्ञानलिङ्गमाख्यातं शिवतत्त्वार्थकोविदैः ॥४५॥

व्याख्या – शिवैक्यस्य भावलिङ्गत्वम् उक्त्वा तद्भावाभिव्यञ्जकज्ञानस्य लयस्थानभूतं तृप्तिलिङ्ग-परात्परलिङ्गेत्युभयपर्यायं ज्ञानलिङ्गमाह – **तद्भावेत्यादिना** । **यत्र** यस्मिन् लिङ्गे **तद्भावज्ञापकज्ञानं** तद्भावस्य तद्भावलिङ्गस्य ज्ञापकं द्योतकं ज्ञानं **लयं समश्नुते** लीनतां गच्छति तत् तल्लिङ्गं **शिवतत्त्वार्थकोविदैः** शिवतत्त्वार्थः शिवतत्त्वस्य गूढार्थः, तस्य कोविदैः ज्ञानिभिः, विशिष्टैः वीरशैवैः इत्यर्थः, तैः, **ज्ञानलिङ्गं** तृप्तिलिङ्ग-परात्परलिङ्गेत्युभयपर्यायं ज्ञानलिङ्गम् इति **आख्यातम्** उक्तम् ॥ ज्ञानलिङ्गस्य स्वरूपं श्रुत्यागमेषु बहुधा वर्णितः । "अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तं परं च यत् । सूक्ष्मासूक्ष्मतरं ज्ञानं तन्मे मनः सङ्कल्पमस्तु ॥" (शिव. सं. उ., १२) इति श्रुतिः । "परात्परं तु यत्प्रोक्तं तृप्तिलिङ्गं तदुच्यते। भावनातीतमव्यक्तं परं ब्रह्म शिवाभिधम् ॥" (वा.आ., उ.भा., मरितोण्टदार्येण तत्त्वप्रदीपिकायामुदाहृतः– सि.शि., १५.४५) इत्यागमः; "परात्परं तु यत्प्रोक्तं तृप्तिलिङ्गं तदुच्यते" इति सिद्धान्तशिखामणौ (६.५०) । लिङ्गत्रयसमन्वये भावलिङ्गं तु तृतीयम् । तदेवात्र ज्ञानलिङ्गमिति, तृप्तिलिङ्गम् इति, परात्परलिङ्गम् इति च वर्ण्यते । को नाम भावः ? उच्यते – "सच्चित्सुखमयं शान्तमादिमध्यान्तवर्जितम् । निष्कलं शाम्भवं यत्तद् अरूपं रूपमुच्यते ॥ तद्भावनास्पदं लिङ्गं भावलिङ्गं प्रकीर्तितम् ॥" (चं. आ., उ. भा., क्रि. पा., ३.३७) इत्यागमोक्तदिशा सच्चिदानन्दस्वरूपं शान्तमखण्डं निष्कलं रूपरहितत्वादरूपम् इत्यादिभावनाविषयीभूतं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गमेव भावलिङ्गम् । ज्ञानविशुद्धात्मनैव ध्यानगम्यं तत् । तदुक्तम् – ''न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥'' (मुं. उ., ३.१.८) इति ॥४५॥

त्रिमूर्तिभेदनिर्मुक्तं त्रिगुणातीतवैभवम् ।
ब्रह्म यद्बोध्यते तत्तु ज्ञानलिङ्गमुदाहृतम् ॥४६॥

व्याख्या – 'लिङ्गं ब्रह्म सनातनम्' (सि. शि., ६.२६) इति यदुक्तं पूर्वं तदेव ज्ञानलिङ्गमित्याह – **त्रिमूर्तीत्यादिना । त्रिमूर्तिभेदनिर्मुक्तं** तिस्रः मूर्तयः यस्य तत् त्रिमूर्ति, ब्रह्मविष्णुमहेश्वरस्वरूपम्, तस्य भेदः त्रिमूर्तिभेदः, तेन निर्मुक्तं रहितम्, **त्रिगुणातीतवैभवं** त्रयाणां गुणानां समाहारः त्रिगुणं सत्त्वरजस्तमोरूपम्, तद् अतीतं वैभवं यस्य तत्, त्रिगुणातीतवैभवम्, तुर्यतुर्यातीतसम्पत्तियुक्तं **यद् ब्रह्म** यत् परशिवब्रह्म **बोध्यये** श्रुतिगुरुस्वानुभवैः ज्ञायते, **तत् तु** तदेव **ज्ञानलिङ्गम्** इति **उदाहृतम्** उक्तम् ॥ तदेव ज्ञानाश्रयीभूतं परात्परं तृप्तिलिङ्गम् । यद् वेदान्तिभिः ब्रह्म इत्युक्तं तदेव ज्ञानलिङ्गम् । ब्रह्मविष्णुमहेश्वरात्मकं त्रिमूर्तित्वं ब्रह्मणा जगतः सृष्टिस्थितिसंहारार्थम्, मूलस्वरूपे ब्रह्मणि तद्भेदो नास्ति । सत्त्वरजस्तमोरूपं त्रिगुणातीतं च तस्य ब्रह्मणो वैभवम् । बह्मैव ज्ञानमयं ज्ञानलिङ्गम् इत्युक्तम् । तदतीतं न किमप्यस्ति । अत एव तस्य परात्परत्वम् । सर्वजीवितसाफल्यं तस्मिन्नेव निहितमिति तस्य तृप्तिलिङ्गत्वं च । तुर्यं त्वानन्दमयम् । ज्ञानलिङ्गं तुर्यातीतम् इत्युक्तम् ॥४६॥

स्थूले क्रियासमापत्तिः सूक्ष्मे भावस्य संभवः ।
स्थूलसूक्ष्मपदातीते ज्ञानमेव परात्मनि ॥४७॥

व्याख्या – पुनस्तज्ज्ञानलिङ्गस्य स्थूलसूक्ष्मपदातीतत्वं निरूपयति – **स्थूले इति । स्थूले** स्थूलम् इन्द्रियगोचरयोग्यम् आकारयुक्तम्, तादृशम् इन्द्रियगोचरीभूतम् इष्टलिङ्गम्, तस्मिन्निष्टलिङ्गे **क्रियासमापत्तिः** क्रियारूपपूजादिसमावेशः, **सूक्ष्मे** इन्द्रियागोचरे प्राणलिङ्गे **भावस्य संभवः** परिशुद्ध-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

क्षमादिभावोदयः, परिशुद्धभावसमर्पणम् इत्यर्थः । **स्थूलसूक्ष्मपदातीते** स्थूलं च सूक्ष्मं च स्थूलसूक्ष्मे, तयोः स्थूलसूक्ष्मयोः पदं स्थूलसूक्ष्मपदम्, तस्माद् अतीते, **परात्मनि** परात्परे तृप्तिलिङ्गापरपर्याये भावलिङ्गे **ज्ञानमेव** केवलं ज्ञानमेव, न क्रिया नापि भावः इति ॥ इष्टलिङ्गं स्थूलं पूजादि-बाह्यक्रियाश्रयीभूतम् च, प्राणलिङ्गं सूक्ष्मं परिशुद्धभावरूपाभ्यन्तरवस्तु-भिर्या पूजा तस्या आश्रयीभूतं चेति तु प्रसिद्धम् । स्थूलसूक्ष्मातीतं च भावलिङ्गं परात्परं तृप्तिलिङ्गम् इत्यपि प्रसिद्धम् । भस्मगन्धाक्षतपत्रपुष्प-धूपदीपादिभिर्बाह्योपचारैरिष्टलिङ्गपूजा प्रवर्तते । क्षमाविवेकसत्यवैराग्य-समाधिसम्पत्तिनिरहङ्कारादिभिः परिशुद्धैराभ्यन्तोपचारैः प्राणलिङ्गपूजा प्रवर्तते । ज्ञानमेव परात्परस्य तृप्तिलिङ्गापरपर्यायस्य ज्ञानलिङ्गस्य विषय उपचारश्च । त्रयाणामपि लिङ्गानां सोपचारपूजा एकभावतः करणीया। तदुक्तम् – "भावप्राणेष्टलिङ्गानि पूजयेदेकभावतः । पृथग्भावं न कुर्वीत प्राणलिङ्गपरो यतः ॥ स्नापनं प्रथमं कृत्वा ततो गन्धानुलेपनम् । अक्षतांश्च समर्प्याथ पुष्पैः सम्पूजयेत्ततः ॥ निवेदयित्वा नैवेद्यं ततस्ताम्बूलमर्पयेत् । एवं समर्चना कुर्यादिष्टलिङ्गस्य पार्वति । तद्ध्यानं मनसा यत्र प्राणलिङ्गा-र्चनं मतम् । मनोवृत्तिलयस्तत्र भावलिङ्गस्य पूजनम् ॥" (सू. आ., उ. भा., क्रि. पा., ६.४४-४७) इति । अत्र यश्चोक्तलिङ्गत्रयपूजासमन्वयस्तस्या-ऽतिशयस्तु वर्णनातीतः ॥४७॥

कल्पितानि हि रूपाणि स्थूलानि परमात्मनः ।
सूक्ष्माण्यपि च तैः किं वा परबोधं समाचरेत् ॥४८॥

व्याख्या – परबोधे एव स्थूलसूक्ष्मरूपाणि परमात्मनोऽर्थवत्तां भजन्ते इत्याह – **कल्पितानि इति । परमात्मनः** परशिवस्य **स्थूलानि** इष्टलिङ्गादीनि इन्द्रियग्राह्याणि, **सूक्ष्माण्यपि च** इन्द्रियागोचराणि सूक्ष्माणि अपि च रूपाणि **कल्पितानि** कल्पनाविषयीकृतानि । **तैः किं वा** तैः स्थूल-सूक्ष्मरूपैः किं वा प्रयोजनम्? **परबोधं** परशिवब्रह्मणः ज्ञानम्, तृप्ति-लिङ्गाख्यस्य परात्परज्ञानलिङ्गस्य ज्ञानम् इत्यर्थः, **समाचरेत्** आचरणे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नयेत् ॥ तत्परात्परज्ञानलिङ्गस्य ज्ञानं विना स्थूलसूक्ष्मरूपैर्न किमपि प्रयोजनम् । तस्मात् तृप्तिलिङ्गज्ञानयुक्तत्वेन स्थूलसूक्ष्मलिङ्गयोः पूजा सार्थक्यं भजते इति भावः ॥४८॥

परात्परं तु यद्ब्रह्म परमानन्दलक्षणम् ।
शिवाख्यं ज्ञायते येन ज्ञानलिङ्गीति कथ्यते ॥४९॥

व्याख्या – येन परशिवब्रह्म ज्ञायते स एव ज्ञानलिङ्गीति कथ्यते – **परात्परम् इति । परात्परं तु** परमोत्कृष्टं तु **परमानन्दलक्षणम्** उत्कृष्टानन्दस्वरूपं **शिवाख्यं** परशिवनामवद् **यद्ब्रह्म** यत्परब्रह्म **येन** येन महात्मना **ज्ञायते** अवगम्यते, सः **ज्ञानलिङ्गी इति** ज्ञानलिङ्गवान् इति **कथ्यते** उच्यते ॥ परात्परलिङ्गस्य ज्ञानलिङ्गत्वं तस्य स्वयं परमार्थज्ञानमयत्वात् परमानन्दस्तस्य लक्षणम् । तदुक्तम् – "विज्ञानमानन्दं ब्रह्म" (बृ. उ., ३.९.२८), "आनन्दो ब्रह्मेति व्यजानात्" (तै. उ., ३.६), "आनन्दं ब्रह्मणो विद्वान्" (तै. उ., २.९), "एष परम आनन्दः" (बृ. उ., ४.३.३२), "यो वै भूम तत्सुखम्" (छां. उ., ७.२.३), इत्यादि श्रुतिषु । यो वै जानाति ज्ञानलिङ्गं स भवति ज्ञानलिङ्गी ॥४९॥

बाह्यक्रियां परित्यज्य चिन्तामपि च मानसीम् ।
अखण्डज्ञानरूपत्वं यो भजेन्मुक्त एव सः ॥५०॥

व्याख्या – ज्ञानलिङ्गी एव मुक्तः इत्याह – **बाह्यक्रियाम् इति । यः** यो महात्मा **बाह्यक्रियां** भावलिङ्गप्राणलिङ्गयोः अनुसन्धानं विना केवलाम् इष्टलिङ्गसम्बन्धिनीं बाह्योपचारक्रियां **मानसीं चिन्ताम् अपि** भावलिङ्गानुसन्धानं विना केवलां मनःसम्बन्धिनीं प्राणलिङ्गभावनाम् अपि **परित्यज्य** विहाय **अखण्डज्ञानरूपत्वं** भावप्राणेष्टलिङ्गात्मकम् अखण्डलिङ्गत्रयसमन्वयज्ञानरूपत्वं **भजेत्** प्राप्नुयात् **सः एव** तादृशज्ञानलिङ्गवान् एव **मुक्तः** मोक्षभाजनः ॥ "अखण्डज्ञानरूपत्वम्" नाम लिङ्गत्रयसमन्वयात्मकेनाऽखण्डत्वज्ञानेन परमानन्दरूपत्वम् । तदेव साधकस्य परमं स्थानं यदखण्ड-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वातन्त्र्यनित्यतृप्तिलक्षणम् । तत्र चरमविश्रान्तिर्भवति । तदुक्तम् – "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" (छां. उ., ३.१४.१) इति । ज्ञानलिङ्गस्वरूपं सम्यगुक्तं मुण्डकश्रुतौ – "बृहच्च तद्दिव्यमचिन्त्य-रूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति । दूरात्सुदूरे च पश्यंस्त्विहैव निहितं गुहायाम्" (३.१.७) इति । ज्ञानलिङ्ग्येव जीवन्मुक्तः ॥५०॥

– इति ज्ञानलिङ्गस्थलम् –

७. अथ स्वयस्थलम् – (५१)

तद्भावज्ञापकं ज्ञानं यत्र ज्ञाने लयं व्रजेत् ।
तद्वानेष समाख्यातः स्वाभिधानो मनीषिभिः ॥५१॥

व्याख्या – ज्ञानलिङ्ग्येव स्वयलिङ्गाभिधानो जङ्गम इत्याह – **तद्भावेत्यादिना । यत्र ज्ञाने** यत्र स्वात्मज्ञाने **तद्भावज्ञापकं ज्ञानं** तद्भावः ज्ञानलिङ्गभावः, तं ज्ञापयति इति तद्भावज्ञापकं ज्ञानलिङ्गप्रकाशकं ज्ञानं **लयं व्रजेत्** लीनतां गच्छेत्, **तद्वान्** तादृशात्मज्ञानवान् **एषः** अयं ज्ञानलिङ्गी एव **मनीषिभिः** विशेषज्ञानवद्भिः **स्वाभिधानः** स्वयलिङ्गनामा जङ्गमः इति **समाख्यातः** सम्यगुक्तः ॥ अत्र ज्ञानशब्दो द्विवारं प्रयुक्तः । प्रथमवारं प्रथमैकवचने 'ज्ञानम्' इति । द्वितीयवारं सप्तम्येकवचने 'ज्ञाने' इति । 'ज्ञानम्' इत्यनेन ज्ञानलिङ्गज्ञापकज्ञानम् इत्यर्थो ग्राह्यः । 'ज्ञाने' इत्यनेन स्वात्मज्ञानम् इत्यर्थः ग्राह्यः । स्वात्मज्ञाने ज्ञानलिङ्गप्रकाशकज्ञानस्य लये सति स्वयलिङ्गजङ्गमो भवति । इदं च ज्ञानम् अहङ्कारममकाररहितम् । अत्रेदम् अनुसन्धेयम् – स्वयजङ्गमः, चरजङ्गमः, परजङ्गमश्चेति जङ्गमः त्रिविधः । तदुक्तम् – "चरलिङ्गस्थलस्यास्य स्वरूपं कथयामि ते । स्वयं चरं परं चेति त्रैविध्यं समुपागतम् ॥" (सू.आ., उ.भा., क्रि.पा., ८.१८) इति । अत्र प्रथमं स्वयलिङ्गजङ्गमस्थलं प्रोक्तम् ॥५१॥

स्वच्छन्दाचारसंतुष्टो ज्योतिर्लिङ्गपरायणः ।
आत्मस्थसकलाकारः स्वाभिधो मुनिसत्तमः ॥५२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निर्ममो निरहङ्कारो निरस्तक्लेशपञ्चकः ।
भिक्षाशी समबुद्धिश्च मुक्तप्रायो मुनिर्भवेत् ॥५३॥
यदृच्छालाभसन्तुष्टो भस्मनिष्ठो जितेन्द्रियः ।
समवृत्तिर्भवेद्योगी भिक्षुके वा नृपेऽथवा ॥५४॥
पश्यन् सर्वाणि भूतानि संसारस्थानि सर्वशः ।
स्मयमानः परानन्दे लीनात्मा वर्तते सुधीः ॥५५॥

व्याख्या – स्वयजङ्गमस्य सदाचारं वर्णयति – **स्वच्छेत्यादिना श्लोकचतुष्टयेन । स्वच्छन्दाचारसंतुष्टो** स्वच्छन्दः आचारः स्वयंस्फूर्तः सदाचारः, तेन सन्तुष्टः तृप्तः, **ज्योतिर्लिङ्गपरायणः** ज्योतिर्लिङ्गम् आभ्यन्तरं चिद्रूपलिङ्गं तस्मिन् परायणः नितरां निष्ठः **आत्मस्थसकलाकारः** स्वाभिन्नशिवात्मनि स्थिताः सकलाः आकाराः यस्मिन् सः, तादृशः **मुनिसत्तमः** मुनिश्रेष्ठः एव **स्वाभिधः** स्वयलिङ्गाभिधानः जङ्गमः भवति ॥ **निर्ममः** ममकाररहितः, **निरहङ्कारः** अहङ्काररहितः, **निरस्तक्लेशपञ्चकः** क्लेशानां पञ्चकम्, अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्चेति पञ्चक्लेशाः, तेषां समुदायः, निरस्तं क्लेशपञ्चकं यस्मात् सः, पञ्चक्लेशरहितः इत्यर्थः, **भिक्षाशी** भिक्षाम् अश्नातीति भिक्षाशी भिक्षान्नभोक्ता, **समबुद्धिः च** समाना बुद्धिः यस्य सः समबुद्धिः, समलोष्टाश्मकाञ्चनः, तादृशः **मुनिः** स्वयलिङ्गाभिधानवान् मुनिः **मुक्तप्रायः** जीवन्मुक्तसमः ॥ **यदृच्छालाभसन्तुष्टः** यदृच्छया अनिरीक्षिततया प्राप्तः लाभः, तेन सन्तुष्टः तृप्तः, **भस्मनिष्ठः** भस्मनि निष्ठः, विभूतिधारणे तत्परः, **जितेन्द्रियः** जितानि नियन्त्रितानि इन्द्रियाणि यस्य सः, इन्द्रियजयसम्पन्नः, **योगी** शिवयोगी **भिक्षुके वा** भिक्षावृत्तिपरे वा, **अथवा नृपे** अथवा नृपतौ **समवृत्तिः** समाना वृत्तिः यस्य सः समवृत्तिः समबुद्धिः **भवेत्** स्यात् ॥ **सर्वशः** सर्वत्र **सर्वाणि** सकलानि **संसारस्थानि** संसारे प्रपञ्चे स्थितानि **भूतानि** चराचरात्मकानि भूतजातानि । **पश्यन्** अवलोकयन् **स्मयमानः** विस्मययुक्तः सन् **सुधीः** सुज्ञानी **परानन्दे** परमशिवानन्दे **लीनात्मा** लयंगतस्वरूपः **वर्तते** भवति ॥ अत्र स्वयजङ्गमो मुनिः, यतिः, योगी, सुधीः,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इत्यादिशब्दैः वर्णितः । सः **'स्वच्छन्दाचारसन्तुष्ठः'** । न कोऽपि धर्मिकाचारस्तस्य बन्धकः । स च स्वेच्छावर्तनवर्ती, यः कोऽपि तस्याचारो भवतु, स तु केवलं लीलास्वरूपः । तत्र नास्ति तस्य कोऽप्युद्देशो वाऽऽसक्तिर्वा । नास्ति लाभो वा नष्टो वा तदाचरणे उद्देशः । तत्र स्वाभाव एव प्रवर्तते । तदुक्तम् – "न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥" (भ.गी., ५.१४) इति । स पुनः **'ज्योतिर्लिङ्गपरायणः'** । ज्योतिर्लिङ्गं नाम चिद्रूपप्रकाशयुक्तं ज्ञानलिङ्गम् । तस्मिन् स नितरां निष्ठः । पुनरपि उक्तं स **'आत्मस्थसकलाकारः'** इति । उक्तं च – "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । वीक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥" (भ. गी., ६.२९) इति । "सर्वे लिङ्गमया लोकाः सर्वं लिङ्गे प्रतिष्ठितम्" (सू. आ., उ. भा., क्रि. पा., ३.५३) इत्यागमोक्तिः । स **'निर्ममः' 'निरहङ्कारश्च'** । अयं मम एषा मम, इदं मम, इत्यादिनी सङ्कुचिता ममत्वबुद्धिः । देहेन्द्रियादिषु मिथ्याभिमानभूतो भावोऽहङ्कारः । स्वयजङ्गमे तादृशममत्वबुद्धिर्वाऽहङ्कारो वा नास्ति । अहंममत्वभावात्मानं जननमरणचक्रे पातयतः । स्वयजङ्गमे का कथा जननमरणयोः ? शिवयोगी पुनः **'निरस्तक्लेशपञ्चकः'** । अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्च पञ्चक्लेशाः । (पश्यत – सि. शि., १२.३०-३१ – श्लोकयोः व्याख्याम्) । **'भिक्षाशी'** च सः **'समबुद्धिः'** च । भिक्षाशित्वेन तस्याऽकिञ्चनत्वं निरहङ्कारत्वं च प्रतिपादितम् । तादृशसमबुद्धित्वमुक्तम् – "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥" (भ.गी., ५.१८) इति ॥५२-५५॥

ध्यानं शैवं तथा ज्ञानं भिक्षा चैकान्तशीलता ।
यतेश्चत्वारि कर्माणि न पञ्चममिहोच्यते ॥५६॥

व्याख्या – तस्य स्वयजङ्गममुनीश्वरस्य नित्यकर्माणि कथयित्वा स्वयस्थलं समापयति – **ध्यानम्** इति । **शैवं ध्यानं** शिवध्यानम्, **तथा ज्ञानं** तथा एव शैवं ज्ञानं शिवज्ञानम्, **भिक्षा** (आहारार्थं) भिक्षाटनम्, **एकान्तशीलता च** एकान्तसेवनं चेति **यतेः** स्वयजङ्गममुनेः **चत्वारि** चतुर्विधानि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कर्माणि नित्यकार्याणि । इह अस्मिन् विषये **पञ्चमम्** पञ्चमं कर्म **न उच्यते** नैव कथ्यते, नास्तीत्यर्थः ॥ तत्र प्रथमं **शिवध्यानं** नाम शिवेऽनुस्यूतचित्तत्वम्, शिवैकताननताबुद्धिः । द्वितीयं **शिवज्ञानं** नाम शिवोऽहंभावनैरन्तर्यम्, इदमेव आत्मज्ञानम् । तृतीयं **भिक्षाटनम्** आहारार्थं भिक्षाचरणम्, तत्कालीनाहारार्थं पर्याप्तमेव सङ्गृह्णीयात्, ततो नाधिकमिति तत्र नियमः । चतुर्थम् **एकान्तसेवनं** नामाऽनपेक्षितान्यजनसहवासत्वम्, परमात्मनि एकताननताभावाय तदपेक्षितम् ॥५६॥

– इति स्वयस्थलम् –

८. अथ चरस्थलम् – (५२)

स्वरूपज्ञानसम्पन्नो ध्वस्ताहंममताकृतिः ।
स्वयमेव स्वयं भूत्वा चरतीति चराभिधः ॥५७॥

व्याख्या – स्वयलिङ्गजङ्गमः स्वयमेव स्वयं भूत्वा चरतीति चरलिङ्गजङ्गम इत्याह – **स्वरूपेत्यादिना । स्वरूपज्ञानसम्पन्नः** स्वस्वरूपज्ञानं स्वरूपज्ञानम्, शिवाभिन्नस्वरूपोऽहम् इति ज्ञानं स्वरूपज्ञानम्, तेन सम्पन्नः युक्तः, **ध्वस्ताहंममताकृतिः** अहं च मम च अहंमम, अहंकारः ममकारश्च, तयोः आकृतिः आकारः स्वरूपम्, ध्वस्ता अहंममाकृतिः यस्य सः, तादृशः स्वयलिङ्गजङ्गमः **स्वयमेव स्वयं भूत्वा** स्वयमेव स्वातन्त्र्येण स्वयम् अनन्याज्ञानुसारी भूत्वा **चरति इति** सञ्चरति इति **चराभिधः** चरः इति अभिधा नाम यस्य सः चरलिङ्गनामा इत्युच्यते ॥ तदुक्तम्– "स्वच्छन्दचारी स्वाभिन्नलिङ्गरूपो निराकुलः । भेदभ्रान्तिविहीनो यश्चरलिङ्गं स उच्यते ॥" (सू.आ., उ.भा., क्रि.पा., ८.२०) इति । इयं च चरलिङ्गजङ्गमलक्षणसंवादिनी श्रुतिः – "......आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराट् भवति तस्य सर्वेषु लोकेषु कामचारो भवति ॥" (छां. उ., ७.२५.२) इति ॥५७॥

कामक्रोधादिनिर्मुक्तः शान्तिदान्तिसमन्वितः ।
समबुद्ध्या चरेद्योगी सवत्र शिवबुद्धिमान् ॥५८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इदं मुख्यमिदं हीनमिति चिन्तामकल्पयन् ।
सर्वत्र सञ्चरेद् योगी सर्वं ब्रह्मेति भावयन् ॥५९॥

न संमानेषु सम्प्रीतिं नावमानेषु च व्यथाम् ।
कुर्वाणः सञ्चरेद्योगी कूटस्थे स्वात्मनि स्थितः ॥६०॥

अप्राकृतैर्गुणैः स्वीयैः सर्वं विस्मापयन् जनम् ।
अद्वैतपरमानन्दमुदितो देहिवच्चरेत् ॥६१॥

न प्रपञ्चे निजे देहे न धर्मे न च दुष्कृते ।
गतवैषम्यधीर्धीरो यतिश्चरति देहिवत् ॥६२॥

व्याख्या – चरलिङ्गजङ्गमस्याऽऽचारान् पञ्चश्लोकैः कथयति – **कामेत्यादिना । कामक्रोधादिनिर्मुक्तः** कामक्रोधाद्यरिषड्वर्गनिरस्तः, **शान्तिदान्तिसमन्वितः** शान्तिः शमः, अन्तरिन्द्रियभूतमनोनिग्रहः, दान्तिश्च दमः, बाह्येन्द्रियनिग्रहः, बाह्याभ्यन्तरिन्द्रियनिग्रहेण समन्वितः, **सर्वत्र** सर्वस्मिन् **शिवबुद्धिमान्** शिवः अस्तीति बुद्धियुक्तः, **योगी** शिवयोगी **समबुद्ध्या चरेत्** सर्वस्मिन् समानबुद्ध्या पक्षपातराहित्येन सञ्चरेत् ॥ **इदं मुख्यं** एतत् प्रधानम् **इदं हीनम्** एतत् कनिष्ठम् इति **चिन्तां** विचारम् **अकल्पयन्** न कुर्वन्, **योगी** शिवयोगी **सर्वं ब्रह्म इति भावयन्** "सर्वं खल्विदं ब्रह्म" (छां. उ., ३.१४.१) इति श्रुत्युक्तम् अनुस्मरन् **सर्वत्र सञ्चरेत्** सर्वत्र गच्छेत् ॥ **कूटस्थे स्वात्मनिं** अचित्संसर्गवियुक्ते स्वस्वरूपे मुक्तात्मनि **स्थितः** निलीनः **योगी** शिवयोगी **सम्मानेषु** गौरवप्रशस्त्यादिसन्दर्भेषु **न सम्प्रीतिं** न सन्तोषम् **अवमानेषु च** अपमानसन्दर्भेषु **च न व्यथां** न दुःखं **कुर्वाणः** कुर्वाणः सन् **सञ्चरेत्** सर्वत्र गच्छेत् ॥ **स्वीयैः** स्वकीयैः **अप्राकृतैः** अलोकसामान्यैः **गुणैः** गुणविशेषैः **सर्वं जनं** सर्वान् लौकिकजनान् **विस्मापयन्** विस्मितान् कुर्वन्, **अद्वैतपरमानन्दमुदितः** अद्वैतस्य शिवैकभावस्य परमानन्दः उत्कृष्टानन्दः, तेन मुदितः आनन्दितः सन् योगी **देहिवत्** शरीरधारीव **चरेत्** सञ्चरेत् ॥ **गतवैषम्यधीः** गता वैशम्यस्य धीः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यस्य सः गतवैषम्यधीः, विधिनिषेधादिषु विषमबुद्धिरहितः **धीरः** स्थिरमतिः **यतिः** शिवयोगी **निजे देहे** स्वकीये शरीरे सति **देहिवत्** शरीरधारीव **चरति** सञ्चरति, **प्रपञ्चे न** प्रपञ्चे न चरति, **धर्मे न** पुण्यकृत्ये न चरति, **दुष्कृते न** पापकृत्ये न चरति ॥ अत्र पञ्चश्लोकाः चरलिङ्गजङ्गमस्य अनितरसाधारणानि चर्याणि वर्णयन्ति । स निरस्तारि-षड्वर्गः । चिदानन्दस्वरूपिणि तस्मिन् नास्ति अरिषड्वर्गस्याऽवकाश-लेशोऽपि । भगवदुक्तदिशा इदमेव ब्रह्मनिर्वाणम् । तदुक्तम्– "कामक्रोध-विमुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्तते विदितात्म-नाम् ॥" (भ. गी., ५.२६) इति । शान्तिश्च दान्तिश्च तस्य वशे स्तः । शान्तिर्नाम शमः, आभ्यन्तरेन्द्रियभूतस्य मनसो निग्रहः । दान्तिश्च दमः, बाह्येन्द्रियग्रामस्य निग्रहः । अन्तरिन्द्रियनिग्रहसामर्थ्येन बहिरिन्द्रियाणां निग्रहश्चरस्थलिना शिवयोगिना कर्तुं शक्यते । आभ्यन्तरेन्द्रियभूते मनसि आत्मपरमात्मनोः समन्वये विलीने सति सर्ववासनाराहित्यं साध्यते । मनस्तदा इन्द्रियार्थेषु प्रवृत्तिराहित्यं सम्पद्यते । तदा शिवयोगी "समबुद्धिः" इति कीर्त्यते । सर्वत्र समबुद्धेस्तस्य सर्वत्र शिवबुद्धिर्भवति । इयमेव कूटस्थस्थितिः । एवं गतवैषम्यबुद्धिर्योगी सम्मानेष्ववमानेषु च गत-भावभेदः सन् सञ्चरति । तदा सर्वे साधारणगुणाः निरस्ताः सन्ति । स भवति दैवीसम्पदः स्थानम् । तथा चोक्तं भगवता – "अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभि-जातस्य भारत ॥" (भ.गी., १६.२-३) । "गतवैषम्यधीः" इत्यत्र मरितोण्ट-दार्येण तत्त्वप्रदीपिकायां "विधिनिषेधेषु विगतविषमबुद्धिः" इति व्याख्यातम् । तदसमञ्जसम् । यद्यद् योगी करोति तत्तत् विश्वहिताय सम्पद्यते । अत-स्तस्य गतवैषम्यधी-शब्दः विधिनिषेधरूपार्थं न स्पृशति परन्तु "न प्रपञ्चे निजे देहे न धर्मे न च दुष्कृते" इत्यनेन सङ्गच्छते ॥५८-६२॥

प्राकृतैश्वर्यसम्पत्तिपराङ्मुखमनःस्थितिः ।
चिदानन्दनिजात्मस्थो मोदते मुनिपुङ्गवः ॥६३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – साधारणैश्वर्ये विगतस्पृहश्चरलिङ्गी ब्रह्मानन्दे निमज्जतीत्युक्त्वा चरलिङ्गस्थलं समापयति – **प्राकृतैश्वर्येत्यादिना । प्राकृतैश्वर्यसम्पत्तिपराङ्मुखमनःस्थितिः** प्राकृतम् ऐश्वर्यं प्राकृतैश्वर्यम्, साधारणं लौकिकम् ऐश्वर्यम्, तस्य सम्पत्तिः वैभवम्, तस्मात् पराङ्मुखी मनसः स्थितिः यस्य सः, तादृशः, **मुनिपुङ्गवः** मुनिः पुङ्गव इव, मुनिश्रेष्ठः चरलिङ्गजङ्गमः, **चिदानन्दनिजात्मस्थः** चिदानन्दमये स्वत्मनि परमात्मनि तिष्ठतीति तथोक्तः, स्वात्मानन्दे निमग्नः सन् **मोदते** सुखम् अनुभवति ॥ स मुनिश्रेष्ठो निजबोधस्वरूपः । तदुक्तम् – "नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणः क्षत्रियवैश्यशूद्राः । न ब्रह्मचारी न गृही वनस्थो भिक्षुश्च नाहं निजबोधरूपः ॥" (यो. आ.) इति । शिवेन एकीभूतस्य तस्य जातिवर्णाश्रमदृष्ट्या नास्ति कोऽपि भेदः । सर्वे ते भेदाः केवलं लौकिकस्तरे भवन्ति । प्रकृतिजन्यास्ते सर्वे । प्राकृतैश्वर्यं तस्य मृदादिप्रायम् । चिदानन्द एव तस्य परमैश्वर्यम् । तच्च निरवयवं निरवधिकं च । अस्मान्निजबोधस्वरूपात् चरलिङ्गजङ्गमः परलिङ्गजङ्गमस्थलम् आरोहति ॥६३॥

– इति चरलिङ्गस्थलम् –

९. अथ परस्थलम् – (५३)

स्वयमेव स्वयं भूत्वा चरतः स्वस्वरूपतः ।
परं नास्तीति बोधस्य परत्वमभिधीयते ॥६४॥

व्याख्या – स्वस्वरूपेण चरतश्चरलिङ्गजङ्गमस्य परस्थलत्वमाह – **स्वयमेवेति । स्वयम् एव स्वयं भूत्वा** स्वाभिन्नशिवरूपत्वेन स्वयं भूत्वा **स्वस्वरूपतः** स्वात्मस्वरूपतः **चरतः** सञ्चरतः शिवयोगिनः **परं नास्ति इति** स्वस्मात् परं नास्ति इति **बोधस्य** ज्ञानस्य **परत्वं** परलिङ्गजङ्गमत्वम् **अभिधीयते** कथ्यते ॥ परलिङ्गजङ्गमत्वमेव परशिवब्रह्मत्वम् । स्वस्मात् परं न किञ्चिदपि नास्तीत्यवबोध एव परलिङ्गम् । तदुक्तम् – "तद्ब्रह्माऽहमिति ज्ञात्वा ब्रह्म सम्पद्यते परम्" (अमृत.बि.उ.,८) इति ॥६४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वतन्त्रः सर्वकृत्येषु स्वं परत्वेन भावितः ।
तृणीकुर्वन् जगज्जालं वर्तते शिवयोगिराट् ॥६५॥

व्याख्या – कथं वर्तते स इत्यत्राह – **स्वतन्त्र इति । स्वं परत्वेन भावितः** स्वात्मानं विश्वाधिकेन परशिवत्वेन प्रतीतिविषयीकृतः **शिवयोगिराट्** शिवयोगिनां राजा, ईश्वरः, **सर्वकृत्येषु स्वतन्त्रः** सर्वकर्मसु अपरतन्त्रवृत्तिः सन् **जगज्जालं** जगतां समूहं **तृणीकुर्वन्** तृणमिव भावयन् **वर्तते** अस्ति ॥ परमात्मस्वरूपोऽयं सर्वतन्त्रस्वतन्त्रः, स्वाधीनप्रवृत्तिः सन् न कस्याप्यादेशम् अनुसरति । सूक्ष्मागमोत्तरे परलिङ्गस्य लक्षणमुक्तम् – "निर्द्वन्द्वो हि सदा स्थणुर्गमागमविवर्जितः । ज्योतिर्लिङ्गस्वरूपोऽयं परलिङ्गमुदाहृतम् ॥" (सू.आ., उ.भा., क्रि.पा., ८.१२) इति । अत्र "स्थाणुः" इति विशेषणं परलिङ्गजङ्गमस्य चरलिङ्गजङ्गमाद् भेदं प्रदर्शयति । "गमागमविवर्जितः" इतीदं तु "स्थाणुत्वस्य" विशादीकरणमात्रम् । "निर्द्वन्द्वत्वम्" च परलिङ्गजङ्गमस्य जगज्जालसम्बन्धात् सर्वस्मात् विमुक्तत्वम् सूचयति ॥६५॥

वर्णाश्रमसमाचारमार्गनिष्ठापराङ्मुखः ।
सर्वोत्कृष्टं स्वमात्मानं पश्यन् योगी तु मोदते ॥६६॥

व्याख्या – परलिङ्गजङ्गमस्य वर्तनमाह – **वर्णाश्रमेत्यादिना । योगी** शिवयोगी, परलिङ्गी इत्यर्थः, **वर्णाश्रमसमाचारमार्गनिष्ठापराङ्मुखः** वर्णश्च आश्रमश्च वर्णाश्रमौ, तयोः समाचारः नियतः आचारः, तस्य मार्गः पन्थाः तस्मिन् निष्ठा, तस्याः पराङ्मुखः विमुखः सन् **स्वम् आत्मानं** परात्माभिन्नं स्वात्मानं **सर्वोत्कृष्टं** सर्वश्रेष्ठम् इति **पश्यन्** विभावयन् **मोदते** आह्लादम् अनुभवति ॥ परलिङ्गाभिधानो जङ्गमोऽतिवर्णाश्रमीति भावः । चिदानन्दघनपरशिवात्मकस्य परलिङ्गजङ्गमस्य वर्णाश्रमाचारेण किमपि प्रयोजनं नास्तीति तात्पर्यम् ॥६६॥

विश्वातीतं परं ब्रह्म शिवाख्यं चित्स्वरूपकम् ।
तदेवाहमिति ज्ञानी सर्वोत्कृष्टः स उच्यते ॥६७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या– परजङ्गमस्य सर्वोत्कृष्टत्वं कथमित्याह – **विश्वातीतमिति**। **चित्स्वरूपकं** चिद्रूपं **शिवाख्यं** शिवाभिधानं **परं ब्रह्म** परब्रह्मतत्त्वं **विश्वातीतं** विश्वस्मादधिकं भवति । **अहं तदेव इति** अहं तद् परशिवब्रह्म एव इति **ज्ञानी** साक्षात्कारवान् **सः** परलिङ्गजङ्गमः **सर्वोत्कृष्टः** सर्वश्रेष्ठः इति उच्यते कथ्यते । "अहं ब्रह्मास्मि" (बृ. उ., १.४.१०) इति साक्षात्कारवान् परलिङ्गजङ्गमो सर्वाधिक इत्यर्थः ॥६७॥

अचलं ध्रुवमात्मानमनुपश्यन्निरन्तरम् ।
निरस्तविश्वविभ्रान्तिर्जीवन्मुक्तो भवेन्मुनिः ॥६८॥

व्याख्या – परजङ्गमस्य जीवन्मुक्तत्वमाह – **अचलम् इति। निरस्तविश्वविभ्रान्तिः** विश्वस्य विभ्रान्तिः विश्वविभ्रान्तिः विश्वसम्बन्धिभ्रमः, निरस्ता विश्वविभ्रान्तिः यस्मात् सः, तादृशः **मुनिः** परयोगी **अचलम्** चाञ्चल्यरहितं **ध्रुवं** शाश्वतम् च **आत्मानं** स्वात्मानं **निरन्तरं** सर्वदा **अनुपश्यन्** अभिन्नत्वेन विभावयन् **जीवन्मुक्तः** जीवन्नेव मुक्तः **भवेत्** भवति ॥ अखण्डत्वे अचलत्वम्, अचलत्वे ध्रुवत्वम् । ध्रुवत्वं नाम नित्यत्वम् । यथा तात्कालिकघटमठाद्युपाधित्वेनाऽऽकाशस्य परिच्छिन्नत्वेऽप्यखण्डत्वमेव निजस्वरूपम्, तथाऽऽत्मनः शरीरयोगेन सङ्कुचितत्वेऽप्यखण्डत्वमेव स्वस्वरूपम् । सोऽचलः स्थिरश्च, सर्वव्यापकः सर्वातीतश्च, तदुक्तम् – "आसीनो दूरं व्रजति शयानो याति सर्वतः (कठ. उ., २.२१) इति । आहारव्यवहारादिकर्मणा जीवन्नपि जन्मान्तररहितत्वात् जीवन्मुक्त इत्युच्यते ॥६८॥

ब्रह्माद्याः किं नु कुर्वन्ति देवताः कर्ममार्गगाः ।
कर्मातीतपदस्थस्य स्वयं ब्रह्मस्वरूपिणः ॥६९॥

व्याख्या – कर्ममार्गरता देवताः शिवयोगिनः किमपि न कुर्वन्तीत्याह – **ब्रह्माद्या इति । स्वयं** स्वयमेव **कर्मातीतपदस्थस्य** कर्मणः अतीतं पदम्, कर्मातीतपदे तिष्ठतीति कर्मातीतपदस्थः, तस्य, **ब्रह्मस्वरूपिणः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परब्रह्मस्वरूपवतः **कर्ममार्गगाः** कर्ममार्गावलम्बिनः **ब्रह्माद्याः** ब्रह्मा, विष्णु, महेश्वरः, इत्यादयः **देवताः** देवाः **किं नु कुर्वन्ति** किं कर्तुं शक्नुवन्ति ? न किमपि कर्तुं समर्थाः इत्यर्थः ॥ वस्तुतो वीरशैवस्य वीरशैवदीक्षाप्राप्तेरारभ्यैव वर्णाश्रमविधिनिषेधा न भवन्ति । ब्रह्मविष्णु-महेश्वरा जगत्सृष्टिस्थितिलयकर्तारोऽन्ये च देवाः स्वस्वकर्मनिरता यज्ञादि-कर्मद्वारा संतृप्तिमपेक्षन्ते, संतृप्तिप्रदेभ्यः स्वर्गफलं प्रदास्यन्ति । परमानन्द-सागरभूतः परशिवस्तु कर्मातीतपदे स्थितः । तस्मिन् शिवानन्दे समर-सैक्येन निमग्नः शिवयोगी वैदिककर्मकाण्डोक्तकर्मभ्यः पराङ्मुखः भवति । कर्ममार्गगा ब्रह्मविष्ण्वादयस्तस्य न किमपि कर्तुं समर्थाः ॥६९॥

स्वेच्छया सञ्चरेद्योगी विमुञ्चन् देहमानिताम् ।
दर्शनैः स्पर्शनैः सर्वानज्ञानपि विमोचयेत् ॥७०॥

व्याख्या – शिवयोग्येवाऽज्ञानविमोचक इत्याह – **स्वेच्छयेति** । **देहमानितां** देहाभिमानं **विमुञ्चन्** परित्यजन् **योगी** शिवयोगी **स्वेच्छया** स्वेच्छानुसारं **सञ्चरेत्** प्रवर्तेत । **दर्शनैः स्पर्शनैः** दर्शनस्पर्शनैः **सर्वान्** समस्तान् **अज्ञानपि** ज्ञानरहितान् अपि ज्ञानप्रदानेन **विमोचयेत्** विमुक्तान् कुर्यात् ॥ देहाभिमानं नाम देहस्य रूपाकारादिष्वत्यासक्तिः । एषा प्रवृत्तिः सामान्यानां जनानाम् । शिवयोगी तु स्वदेहं धर्मसाधनत्वेन मन्यते। तदर्थमेव स्वदेहं पोषयति । यतो हि शिवयोगी स्वात्मसाक्षात्कारनिरतः सन् तस्य महत्त्वं जानाति । एतदुक्तम् – "इह चेदशकद् बोद्धुं प्राक् शरीरस्य विस्रसः । ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥" (कठ. उ., ६.४) इति । किमेवं कथ्यते इति चेदुच्यते – "यथाऽऽदर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके, यथाप्सु परीव ददृशे, छायातपयोरिव ब्रह्मलोके ॥" (कठ. उ., ६.५) इति । शारीरे आत्मनि आदर्शे प्रतिबिम्बवत् परशिवब्रह्म स्पष्टं द्रष्टुं शक्यते । अन्यत्र पित्रादिलोकेषु यथा स्वप्ने, अप्सु, छायातपयोर्वा तथा पूर्वपूर्वापेक्षया उत्तरोत्तरस्तरे स्पष्टतामन्दत्वमुक्तम् । ज्ञातेऽस्मिन् स्वानुभवेन शिवयोगी स्वशरीरं साधनोपायत्वेन मन्यते । शिवयोगिन आचार एव सर्वेषां साधकानाम् आचारसंहिता भवति । तस्याऽऽचारस्तु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निरपेक्षः । किञ्चिदप्यकुर्वन्नेव तिष्ठति । अकाण्डमेव कदापि स्वच्छन्देन कर्मणि प्रवर्तते । सर्वस्तस्य लीलाविशेषः ॥७०॥

नित्ये निर्मलभावने निरुपमे निर्धूतविश्वभ्रमे
सत्तानन्दचिदात्मके परशिवे साम्यं गतः संयमी ।
प्रध्वस्ताश्रमवर्णधर्मनिगलः स्वच्छन्दसञ्चारवान्
देहेप्यद्भुतवैभवो विजयते जीवन्विमुक्तः सुधीः ॥७१॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ भक्तस्थलान्तर्गत-नवविधलिङ्गस्थलप्रसङ्गो नाम पञ्चदशः परिच्छेदः समाप्तः ॥१५॥

व्याख्या – परलिङ्गजङ्गमात्मकः शिवयोग्येव जीवन्मुक्त इत्यभिधाय परलिङ्गस्थलं समापयति – **नित्ये** इति । **नित्ये** शाश्वते **निर्मलभावने** परिशुद्धस्वरूपे **निरुपमे** उपमातीते **निर्धूतविश्वभ्रमे** विश्वस्य भ्रमः विश्वभ्रमः प्राकृतप्रपञ्चमोहः, निर्धूतः विश्वभ्रमः यस्य सः, तस्मिन्, **सत्तानन्दचिदात्मके** सच्चिदानन्दस्वरूपे **परशिवे** परशिवब्रह्मणि **साम्यं गतः** सामरस्येन एकीभूतः **प्रध्वस्ताश्रमवर्णधर्मनिगलः** आश्रमश्च वर्णश्च आश्रमवर्णौ, आश्रमवर्णयोः धर्मः वर्णाश्रमाचारः, आश्रमवर्णधर्मः एव निगलः शृङ्खलः, आश्रमवर्णधर्मनिगलः, प्रध्वस्तः विनष्टः आश्रमवर्णधर्मनिगलः यस्य सः, **स्वच्छन्दसञ्चारवान्** स्वच्छन्देन स्वेच्छानुसारं स्वातन्त्र्येण सञ्चारवान् **देहे अपि** देहवानपि **अद्भुतवैभवः** विस्मयकारकसम्पद्युक्तः **सुधीः** धीरः **जीवन्विमुक्तः** जीवन्मुक्तः **विजयते** सर्वोत्कर्षेण विराजते ॥ अत्र परशिववर्णनपराणि सर्वाणि विशेषणानि जीवन्मुक्तस्यापि संभवन्ति । परशिवे साम्यप्राप्तिं श्रुतिराह – "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विहाय निरञ्जनः परमं साम्यमुपैति ॥" (मुं. उ., २.१.३) इति । कर्मणा कृतेन अकृतेन वा तस्य नास्ति कोऽपि संबन्धः । तथा चोक्तं भगवता – "न मे पार्थास्ति कर्तव्यं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्रिषु लोकेषु किञ्चन । नाऽनवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥" (भ. गी., ३.२२) इति । यद्यत्सः करोति लोके तत्सर्वं लोकसङ्ग्रहाय । तदुक्तम् — "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥" (भ. गी., ३.१२) इति । दीक्षागुर्वादिनवस्वरूपी जीवन्मुक्तः शिवयोगीश्वरः साधकानां प्रबोधाय मार्गदर्शनाय च स्वयंस्फूर्त्या यद्यत्करोति तेनाऽसङ्गः सन् शिवानन्दसमुद्रे निमग्नो विराजते ॥ अत्र शार्दूलविक्रीडितं नाम छन्दः । पूर्वं तृतीयपरिच्छेदे अन्तिमपद्यस्य व्याख्यायां तल्लक्षणं द्रष्टव्यम् ॥७१॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
पञ्चदशः परिच्छेदः समाप्तः ॥१५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

षोडशः परिच्छेदः

माहेश्वरस्थलान्तर्गतनवविधलिङ्गस्थलप्रसङ्गः

व्याख्या – अथागस्त्यप्रश्नः । अगस्त्य उवाच –

स्थलानां नवकं प्रोक्तं भक्तस्थलसमाश्रयम् ।
माहेश्वरस्थले सिद्धं स्थलभेदं वदस्व मे ॥१॥

व्याख्या – अगस्त्यस्य वचनमाह – **स्थलानाम्** इत्यादि । **भक्तस्थलसमाश्रयं** भक्तस्थलान्तर्गतं **स्थलानां** लिङ्गस्थलानां **नवकं** नवानां समाहारं **प्रोक्तं** कथितम् । **माहेश्वरस्थले** माहेश्वराख्ये स्थले **सिद्धं** विहितं **स्थलभेदं** स्थलानां भेदं **मे** मह्यं **वदस्व** कथय ॥१॥

व्याख्या – श्रीरेणुकः प्रत्युत्तरं वक्ति, रेणुक उवाच –

माहेश्वरस्थले सन्ति स्थलानि नव तापस ।
क्रियागमस्थलं पूर्वं ततो भावागमस्थलम् ॥२॥

ज्ञानागमस्थलं चाथ सकायस्थलमीरितम् ।
ततोऽकायस्थलं प्रोक्तं परकायस्थलं ततः ॥३॥

धर्माचारस्थलं चाथ भावाचारस्थलं ततः
ज्ञानाचारस्थलं चाथ क्रमादेषां भिदोच्यते ॥४॥

व्याख्या – माहेश्वरस्थलसिद्धं लिङ्गस्थलानां नवकं नाम्ना निर्दिशति – **माहेश्वरस्थले** इत्यादि । **तापस** हे मुने **माहेश्वरस्थले** माहेश्वराख्ये स्थले **नव** नवसंख्याकानि **स्थलानि** लिङ्गस्थलानि **सन्ति** भवन्ति । **पूर्वं** आदौ

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

क्रियागमस्थलम् – (१), **ततः** अनन्तरं **भावागमस्थलम्** – (२), **अथ च** अनन्तरं **ज्ञानागमस्थलम्** – (३), **सकायस्थलम्** – (४), **ईरितम्** उक्तम्, **ततः** अनन्तरं **अकायस्थलम्** – (५), **प्रोक्तम्** उक्तम्, **ततः** पश्चात् **परकायस्थलम्** – (६), **अथ च** अनन्तरं च **धर्माचारस्थलम्** – (७), **ततः** अनन्तरं **भावाचारस्थलम्** – (८), **अथ च** तदन्तरं च **ज्ञानाचारस्थलम्** – (९), **क्रमात्** क्रमेण **एषाम्** एतेषां **भिदा** भेदम् विशेषस्वरूपम् इति यावत्, **उच्यते** कथ्यते ॥२-४॥

१. अथ क्रियागमस्थलम् – (५४)

शिवो हि परमः साक्षात् पूजा तस्य क्रियोच्यते ।
तत्परा आगमा यस्मात् तदुक्तोऽयं क्रियागमः ॥५॥

व्याख्या – क्रियागमः क इत्यत्राह – **शिव इत्यादिना** । **शिवः** परशिवः **परमः** परात्परः **हि** इति प्रसिद्धम् । **साक्षात्** स्वस्वरूपतया **तस्य** परशिवस्य **पूजा** पूजाकर्म **क्रिया उच्यते** क्रिया इति कथ्यते । **यस्मात्** यत्कारणात् **आगमाः** शैवागमाः **तत्पराः** तत्पूजासम्बन्धिनः **तत्** तस्मात् **अयम्** एषः आगमः **क्रियागमः** क्रियागमः इति **उक्तः** कथितः ॥ परस्थलयोग्येव साक्षात् परशिवः । अतस्तत्पूजासम्बन्धी आगमः क्रियागम इति कथ्यते । क्रियागमनिरूपणस्थलं क्रियागमस्थलम् । "यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि" इति (तै.उ.,१.११.२) श्रुत्युक्त-दिशा परस्थलशिवयोगिस्वरूपस्य परशिवस्य पूजैवाऽनवद्यं कर्म, तदेव सेवितव्यम् । वीरशैवे ज्ञानकर्मसमुच्चयोऽङ्गीक्रियते इति वक्ष्यते (१६.११-श्लोके) । स च अन्धपङ्गुन्यायेन समर्थ्यते । जीवन्मुक्तोऽपीष्टलिङ्गपूजा परस्थलयोगिना क्रियते लोकसंग्रहायेति तूक्तम्, पुनर्वक्ष्यते च (१६.६५, भ.गी., ३.२०-२१) ॥५॥

प्रकाशते यथा नाग्निररण्यां मन्थनं विना ।
क्रियां विना तथान्तस्थो न प्रकाशो भवेच्छिवः ॥६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – क्रियाया वैशिष्ट्यमाह– **प्रकाशते इति। यथा** येन प्रकारेण **अरण्यां** निर्मन्थ्यदारुणि (यज्ञार्थं मन्थनेन अग्न्युत्पादनाय प्रयुज्यमानं दारु, तस्मिन्) **मन्थनं विना** मन्थनं विहाय **अग्निः** वह्निः **न प्रकाशते** न प्रकटतां प्राप्नोति, **तथा** तेन प्रकारेण **क्रियां विना** पूजारूपक्रियां विना **अन्तस्थः** अन्तर्लिङ्गात्मकः **शिवः** परशिवः **न प्रकाशः भवेत्** न प्रकटः स्यात् । साक्षात्कारविषयो न भवेद् इत्यर्थः ॥ यथाऽरण्याम् अग्निर्निहितो वर्तते तथैव सर्वेषां हृदयेषु शिवः वर्तते । स एवाऽन्तर्लिङ्गम् ॥ अनेन पूजा-क्रियायाः सार्थक्यं कथितम् ॥६॥

न यथा विधिलोपः स्याद्यथा देवः प्रसीदति ।
यथागमः प्रमाणं स्यात्तथा कर्म समाचरेत् ॥७॥

व्याख्या – पूजा कथं करणीया इत्यत्रोच्यते – **न यथेत्यादिना। यथा** येन प्रकारेण **विधिलोपः** विहितक्रमव्यत्ययः **न स्यात्** न भवेत्, **यथा** येन प्रकारेण **देवः** परशिवः **प्रसीदति** प्रसन्नो भवति, **यथा** येन प्रकारेण **आगमः** शैवागमः **प्रमाणं** प्रमाणभूतं **स्यात्** भवेत्, **तथा** तेन प्रकारेण **कर्म** पूजाकर्म **समाचरेत्** कुर्यात् ॥ किमिदमत्र एवमुक्तम् ? यथाविधि पूजा करणीया इत्यादि तु साधकस्याऽऽदौ दीक्षानन्तरमेवोच्यते किल । तस्मा-दत्र जीवन्मुक्तस्य किमिदम् उच्यते ? इत्याक्षेपो मा भूत्, सर्वमिदं परयोगिनो मार्गदर्शने प्रवर्तमानानां साधकानां कृते उक्तम् इति ज्ञेयम् ॥ जीवन्मुक्तयोगिना विधीयमानं पूजाकर्म स्वयमेव स्वयंस्फूर्त्या विधिर्भ-वति । स एव स्वयं शिवः । स्वयमेव शिवो भूत्वा शिवं पूजयति । तस्य करपीठमेव लिङ्गस्य पीठं भवति । लिङ्गपूजा येन विधीयते स एव शिवस्य हस्तः । लिङ्गं यद् बिभर्ति तदङ्गमेव शिवस्याऽङ्गम् । अन्तर्बहिश्च लिङ्गमेव सः । तादृशस्य पूजाकर्म साधकानां मार्गदर्शनाय । अत्र विशेषतया जीव-न्मुक्तस्य नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमदमोपरति-स्तितिक्षासमाधानश्रद्धात्मकषट्कसम्पत्तिश्चेति स्वयंस्फूर्तं साधनचतुष्टयमपि विधिर्भवति । सर्वार्पणभावः, सामरस्यम्, सर्वभेदनिरपेक्षता, सात्त्विक-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावादयोऽपि तस्य पवित्रव्यक्तित्वस्याऽविभाज्या विधयः । सर्वमिदं साधकाय स्वानुभवप्रमाणेनोपदिश्यते ॥७॥

विधिः शिवनियोगोऽयं यस्माद्विहितकर्मणि ।
शिवाराधनबुद्ध्यैव निरतः स्याद्विचक्षणः ॥८॥

व्याख्या – किमर्थं पूजाविधिरनुसर्तव्य इत्यत्राह – **विधिरित्यादिना** । **यस्मात्** यस्मात् कारणात् **विहितकर्मणि** आगमशास्त्रोक्त-पूजाकर्मणि **अयं विधिः** एष 'शिवपूजा' एवं कर्तव्या इति विधिः **शिवनियोगः** शिवनिर्देशः तस्मात् कारणात् **विचक्षणः** ज्ञानयोगी **शिवाराधनबुद्ध्या एव** शिवस्य आराधनं सन्तर्पणं शिवाराधनम्, तस्य बुद्धिः शिवाराधनबुद्धिः तया एव, **निरतः स्यात्** निश्चयेन युक्तः भवेत् ॥ शिवाराधनं नाम शिवस्य तुष्टीकरणम् । शिवयोगिनः स्वयंस्फूर्तपूजाकर्म शिवाराधानबुद्ध्यैव भवति । तच्च फलापेक्षारहितम् इत्यर्थः । "योगः कर्मसु कौशलम्" (भ.गी., २.५०) इति भगवदुक्तदिशा योगी तु कर्मफलं जहाति न तु कर्मैव ॥८॥

गुरोरादेशमासाद्य पूजयेत् परमेश्वरम् ।
पूजिते परमेशाने पूजिताः सर्वदेवताः ॥९॥

व्याख्या – गुर्वाज्ञानुसारेण शिवपूजा कर्तव्येत्याह – **गुरोरिति** । **गुरोः आदेशं** गुरोः मार्गदर्शनम् **आसाद्य** सम्प्राप्य **परमेश्वरं** भावप्राणोभय-लिङ्गानुसन्धानयुक्तम् इष्टलिङ्गरूपं परशिवं **पूजयेद्** अर्चयेत् । **परमेशाने** परमेश्वरे **पूजिते** अर्चिते सति **सर्वदेवताः** सर्वाश्च ताः देवताश्च सर्व-देवताः **पूजिताः** अर्चिताः भवन्ति ॥ गुरूपदिष्टप्रकारेण शिवपूजा करणी-येत्यस्ति नियमः । अत्र श्रीगुरुः शिवैक्यवान् जीवन्मुक्त एव, तस्य मार्ग-दर्शनम् आसाद्य साधकैः शिवपूजा कर्तव्येत्यर्थः । पूजया सन्तृप्ते शिवे सर्वे देवाः सन्तृप्ता भवन्ति, यथा वृक्षमूले वारिणा पोषिते पर्णपुष्पफलयुक्ताः शाखाः पुष्टा भवन्ति ॥९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सदा शिवार्चनोपायसामग्रीव्यग्रमानसः ।
शिवयोगरतो योगी मुच्यते नात्र संशयः ॥१०॥

व्याख्या – शिवार्चनफलमाह – **सदेति** । **सदा** सर्वदा **शिवार्चनोपायसामग्रीव्यग्रमानसः** शिवार्चनं शिवलिङ्गपूजा, तस्य उपायसामग्री साधनभूतम् उपकरणजातम्, तस्मिन् व्यग्रं तत्सम्पादने आसक्तं मानसं यस्य सः, तादृशः **शिवयोगरतः** शिवाभिन्नस्वात्मसामरस्यरूपे योगे निरतः, **योगी** परयोगी **मुच्यते** जीवन्नपि मायामलादिपाशैः मुक्तः भवति । **अत्र** अस्मिन् विषये **न संशयः** नास्ति सन्देहः ॥ शिवयोगिनः शिवार्चनसाधनसामग्रीसम्पादननिष्ठत्वं तु स्वयंस्फूर्तं नित्यं कर्म । तदिदं कर्म पर्यवेक्ष्य साधकाः प्रवर्तेरन्नित्याशयः । तेन तेषामपि मायामलादिपाशैर्मुक्तिरवश्यंभाविनी ॥१०॥

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी ।
फलोत्पत्तौ विरक्तस्य तस्मात्तद्वयमाचरेत् ॥११॥

व्याख्या – ज्ञानकर्मसमुच्चयमाह – **अन्धपङ्गुवद् इति** । **फलोत्पत्तौ** फलप्राप्तौ **विरक्तस्य** अनासक्तस्य **ज्ञानकर्मणी** ज्ञानं च कर्म च ज्ञानकर्मणी, **अन्धपङ्गुवत्** अन्धः नेत्रहीनः, पङ्गुः श्रोणः (चरणहीनः) "श्रोणः पङ्गौ" (अमर., २.३१४), अन्धश्च पङ्गुश्च अन्धपङ्गू, तौ इव, अन्धपङ्गुवत्, अन्धपङ्गुन्यायेन इत्यर्थः, **अन्योन्यसापेक्षे** अपेक्षया सहिते सापेक्षे अन्योन्यं परस्परं सापेक्षे अन्योन्यसापेक्षे भवतः । **तस्मात्** तस्मात् कारणात् **द्वयम् आचरेत्** ज्ञानकर्मोभयमपि समाचरेत् ॥ शिवयोगिनो ज्ञानं नाम स्वयमेव शिव इति; कर्म च शिवाराधनम् । उभयमपि स्वयंस्फूर्तम् । साधकस्य कृते तु शिवैकत्वज्ञानं साक्षात्करणीयम्, कर्म तु तदर्थं क्रियमाणं पूजादिकर्म । कर्म तु साधनम्, ज्ञानं च साध्यम् । उभयमपि परस्परसापेक्षम् । अत्र अन्धपङ्गुन्यायोऽङ्गीकृत उक्तवैशद्याय । कर्मरहितं ज्ञानं पङ्गुः ज्ञानरहितं कर्म अन्धः । अन्धपङ्ग्वोः परस्परसाहचर्येण द्वयोरपि अपेक्षितं साध्यते । भिक्षाटने पङ्गुरन्धस्यांसमारुह्य मार्गं निर्दिशति, अन्धो भिक्षां सङ्गृह्णाति ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तेन उभयोरप्युदरपोषणं भवति । ज्ञानं विना पङ्गुवत् कर्म साधनमार्गमभिज्ञातुं न पारयति, कर्म विना ज्ञानम् अन्धवत् मार्गे प्रवर्तितुं न पारयति ॥ शिवोऽहं भावे स्थितस्य शिवयोगिनो ज्ञानं सिद्धमेव, कर्म च केवलम् औपचारिकम् । अन्धपङ्गुन्यायस्य विशदीकरणं चन्द्रज्ञानागमोत्तरे दत्तम् – "अपश्यन्नन्धको दग्धः पश्यन् दहति पङ्गुलः । अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी ॥" (चं. आ., उ. भा., क्रि. पा., १२.६) इति । अत्र कारणागमोत्तरे विद्यमानः देवी-महादेवयोः संवादस्यायं भागोऽर्थवत्तां भजते । तथा हि – **देवी** – "ज्ञानादेव तु कैवल्यमिति प्रोक्तं त्वया पुरा । एतद्व्रतेनैव भवेन्मुक्तिरित्युच्यते कथम् ॥ ज्ञानेन न विना मुक्तिर्यदि स्याद् देहधारिणाम् । व्रतेनानुष्ठितेन स्यात् किं फलं ब्रूहि तत्त्वतः ॥" (का. आ., उ. भा., क्रि. पा., २.३-४) । महादेवः – "ज्ञानादेव तु कैवल्यमिति सत्यं वचो मम ॥ तथापि ज्ञानसम्प्राप्तिर्व्रतेन न विना भवेत् । ज्ञानोपदेशः कात्स्न्र्येन व्रतेऽस्मिन्नुच्यते किल ॥ व्रतेतानेन विना ज्ञानायाधिकृतो भवेत् ॥" (का.आ., उ.भा., क्रि.पा., २.५-६) इति । किं तद्व्रतम् ? कथं तज्ज्ञानस्य साधनं भवति ? उच्यते तत्रैव महादेवेन – "अदीक्षासंस्कृते जन्तावपवित्रहृदाकुले । उपदिष्टमपि ज्ञानं मरुवन्न प्ररोहति ॥ लब्धं कथमपि ज्ञानं लिङ्गनिष्ठाविवर्जिते । न फलाय भवत्येव यथा सस्यमरक्षितम् ॥ दीक्षासंस्कृतिसंशुद्धे चित्ते जन्तोः समर्पितम् । लिङ्गाङ्गसामरस्याख्यं मन्निष्ठागोपितं परम् । भक्तिसिक्तं मम ज्ञानं मोक्षाय भवति ध्रुवम् ॥" (का. आ., उ. भा., क्रि. पा., २.७-९) इति ॥११॥

ज्ञाने सिद्धेऽपि विदुषा कर्मापि विनियुज्यते ।
फलाभिसन्धिरहितं तस्मात् कर्म न सन्त्यजेत् ॥१२॥

व्याख्या – सिद्धज्ञानवतामपि कर्मणः प्रयोजनमस्तीत्याह – **ज्ञाने** इति । **ज्ञाने** वेदान्तजन्यशिवैक्यज्ञाने **सिद्धेऽपि** परिनिष्पन्ने अपि **फलाभिसन्धिरहितं** फलासक्तिविवर्जितं **कर्मापि** पूजादिकर्म अपि **विदुषा** ज्ञानिना **विनियुज्यते** उपयुज्यते । **तस्मात्** तस्मात् कारणात् **कर्म** तादृशं पूजादिकर्म

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

न सन्त्यजेत् न परित्यजेत् ॥ यदुच्यते काम्यकर्म तन्निषिद्धं योगिनाम् । निष्कामकर्म इति यदुच्यते तदेव विनियुज्यते ज्ञानिना । तदुक्तं भगवता – "मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि" (भ.गी., २.४७) इति । करणीये कर्मणि कर्मफलं त्याज्यम् । कर्मयोगे अयमेव विवेकः । "योगः कर्मसु कौशलम्" (भ.गी.,२.५०) इत्यत्र भगवद्वचनेनेदमेवोपदिष्टम् ॥१२॥

आचार एव सर्वेषामलङ्काराय कल्पते ।
आचारहीनः पुरुषो लोके भवति निन्दितः ॥१३॥

व्याख्या – आचारस्य महत्त्वमाह – **आचार इति । आचारः एव** धर्माचारः, भावाचारः, ज्ञानाचारः इति आचारत्रैविध्यं वक्ष्यते सर्वेषां कृते, तादृशः त्रिविधाचारः एव **सर्वेषां** सकलानां साधकानाम् **अलङ्काराय कल्पते** भूषणाय कल्पते, लोके प्रशस्तिभाजनत्वमेव भूषणम् । **लोके** प्रपञ्चे **आचारहीनः** आचाररहितः **पुरुषः** मनुष्यः **निन्दितः भवति** निन्दां प्राप्नोति ॥ अयं श्लोकश्चन्द्रज्ञानागमोत्तरभागाद् उदाहृतः । (पश्यत – चं.आ., उ.भा., क्रि.पा., ९.१६) । तत्रैव वर्तते आचारप्रशंसा – "ज्ञाने-नाचारयुक्तेन प्रसीदति महेश्वरः । तस्मदाचारवान् ज्ञानी भवेदादेह-पातनात् ॥ शिवस्य भक्तिराधार आचारः सर्वदेहिनाम् । आचारः परमो धर्म आचारः परमं धनम् । ज्ञानमाचारहीनं चेन्न तद् भवति सिद्धये ॥" (चं. आ., उ. भा., क्रि. पा., ९.१७-१९) इति । परमार्थतः आचारस्तु त्रिकरणपूर्वकं पूजाकर्म । सदाचारेण परशिवं पूजयन्नेव साधकः स्वजी-वितसाफल्यं भजते । तदुक्तम् – "यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा समभ्यर्च्य सिद्धिं विन्दति मानवः ॥" (भ.गी.,१८.४६) इति ॥१३॥

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनात् ॥१४॥

व्याख्या – आचारवानेव भवेदित्युक्त्वा क्रियागमस्थलं समापयति – **ज्ञानेनेति** । (पश्यत – अव्यवहितपूर्वश्लोकस्य व्याख्यायाम् उदाहृताम्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आचारप्रशंसाम्) । **आचारयुक्तेन** आचारसहितेन ज्ञानेन **महेश्वरः** परशिवः **प्रसीदति** प्रसन्नो भवति । **तस्मात्** तस्मात् कारणात् **ज्ञानी** शिवज्ञानी **आदेहपातनात्** देहावसानपर्यन्तं **आचारवान्** आचारयुक्त एव **भवेत्** स्यात् ॥ ज्ञानम् आचारश्च परस्परसापेक्षौ परमार्थसाधने इति भावः । आचारं विना ज्ञानं शुष्कम्, ज्ञानं विना आचारो व्यर्थः ॥ ज्ञानम् आचारश्च विहगस्य पक्षद्वयवत्, रथस्य चक्रद्वयवद्वा । न ह्येकपक्षः विहगः प्रयाति, न ह्येकचक्रो रथो गच्छति किल ॥१४॥

– इति क्रियागमस्थलम् –

२. अथ भावागमस्थलम् – (५५)

भावचिह्नानि विदुषो यानि सन्ति विरागिणः ।
तानि भावागमत्वेन वर्तन्ते सर्वदेहिनाम् ॥१५॥

व्याख्या – फलाभिसन्धिरहितस्य वैराग्यसम्पन्नस्य शिवयोगिनो भावचिह्नानि सर्वेषां भावागम इत्याह – **भावचिह्नानीति** । **यानि** यादृशानि **विरागिणः** वैराग्ययुक्तस्य **विदुषः** शिवज्ञानिनः **भावचिह्नानि** श्रद्धादिभावज्ञापकानि चिह्नानि **सन्ति** भवन्ति **तानि** तादृशानि **सर्वदेहिनां** सर्वशरीरिणाम्, साधकानाम् इत्यर्थः, **भावागमत्वेन** भावागमस्वरूपेण **वर्तन्ते** भवन्ति ॥ ज्ञानिनः शिवयोगिनः सर्वक्रियाफलानासक्तिरेव वैराग्यम् । भावशब्दस्याऽनेके अर्था भवन्ति । एकैकोऽप्यर्थोऽत्र तस्यापर्याप्तः । अतः श्रद्धादिभाव इत्येव तस्य सर्वार्थग्राही अर्थः समुचितः । एवं भावचिह्नानि नाम श्रद्धानिष्ठावैराग्यादिविविधभावसूचकानि चिह्नानि भवन्ति । ज्ञानयोगिनः शिवैक्यस्य तान्येव सर्वेषां साधकानां भावागमो मुक्तिमार्गप्रदर्शकः । अत्राह श्रुतिः – "सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति" (बृ.उ.,४.४.५) इति । शिवयोगिनो भावः शिवमयः शिवमेव परिष्वजते । तस्य जीवत्वं (अङ्गत्वं) शिवत्वे विलीय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवत्वेनैव तिष्ठति । यद्यत्स चिन्तयति तत्तच्छिवमयमेव । तज्ज्ञापक-चिह्नानि सर्वेषां मार्गदर्शको भावागमः ॥१५॥

शिवोऽहमिति भावोऽपि शिवतापत्तिकारणम् ।
न ज्ञानमात्रं नाचारो भावयुक्तः शिवो भवेत् ॥१६॥

व्याख्या – भावस्य वैशिष्ट्यमाह – **शिवोऽहम् इति** । **शिवोऽहम् इति भावः अपि** शिवोऽहं भावः अपि **शिवतापत्तिकारणं** शिवत्वप्राप्ति-हेतुभूतः । **ज्ञानमात्रं** शिवज्ञानमात्रं **न** न शिवतापत्तिकारणम्, **आचारः न** पूजादिसत्क्रियाचारः वा न तथा, **भावयुक्तः** शिवोऽहं भावयुक्तः **शिवः भवेत्** शिवो भवेत् ॥ शिवत्वप्राप्तिः सर्वेषां साधकानां परमाभिलाषभूता । जीवः शिव एव (शिवांश एव) इति तु परमं सत्यम् । अंशस्य अंशिनि भेदरहितत्वेन समरसस्तु नैसर्गिको भावः । ज्ञानम्, आचारः, भावश्चेति त्रयः अपि समवेताः शिवतापत्तिकारणम्, न तु कारणानि । तत्र ज्ञानम् "अहं ब्रह्मास्मि" (बृ.उ.,१.४.१०), "तत्त्वम् असि" (छां.उ.,६.८.७), "अयमात्मा ब्रह्म" (बृ.उ., २.५.१९) इत्यादिमहावाक्यैर्गुरूपदिष्टैः सिद्धं शिवैक्यज्ञानम् । आचारस्तु चित्तवृत्तीनां निरोधाय क्रियमाणः योगाभ्यासः । भावः पुनः भ्रमरकीटन्यायेन शिवोऽहमस्मि इति भावस्य शिवानुसन्धाने पर्यवसानम् । त्रयाणामपि समवेतत्वे शिवतापत्तिः ॥१६॥

ज्ञानं वस्तुपरिच्छेदो ध्यानं तद्भावकारणम् ।
तस्माज्ज्ञाते महादेवे ध्यानयुक्तो भवेत्सुधीः ॥१७॥

व्याख्या – ज्ञानभावयोर्भेदमाह – **ज्ञानम् इति** । **ज्ञानं** बोधो नाम **वस्तुपरिच्छेदः** इदमेतदिति वस्तुस्वरूपपरिज्ञानम्, **ध्यानं** "प्रत्ययैकतानता ध्यानम्" (यो.सू.,३.२) इति पातञ्चलोक्त्या एकस्मिन् विषये स्थिर-चिन्तनं ध्यानम्; तादृशं ध्यानं नाम **तद्भावकारणं** वस्तुनः भावस्य सहज-स्वभावधर्मावबोधस्य कारणम् । **तस्मात्** तस्मात् कारणात् **महादेवे ज्ञाते** परमेश्वरे परिज्ञाते सति **सुधीः** सुज्ञानी **ध्यानयुक्तो भवेत्** ध्यानसंयुक्तः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्यात् ॥ ज्ञानं वस्तुपरिज्ञानम्, भावस्तु निर्णितवस्तुस्वरूपस्य प्रज्ञाप्रवाहः। अत्र ज्ञानं परशिवज्ञानं यद् गुरूपदेशेन स्वानुभवेन च सम्पादितम्। भावश्च परशिवस्वरूपवाही प्रज्ञाप्रवाहः। सर्वाश्चित्तवृत्तयः शिवस्वरूपं धृत्वा निरन्तरप्रवाहरूपेण प्रवर्तन्ते। तदैव शिवानन्दस्याऽनुभूतिर्जायते। तस्मिन्ननुभवे कर्तृकर्मादिभेदः सर्वोऽपि विलयं गतः ॥१७॥

अन्तर्बहिश्च सर्वत्र परिपूर्णं महेश्वरम्।
भावयेत् परमानन्दलब्धये पण्डितोत्तमः ॥१८॥

व्याख्या – परमेश्वरस्य भावनेन परमानन्द इत्याह – **अन्तर्बहिश्चेति**। **पण्डितोत्तमः** परमज्ञानी **परमानन्दलब्धये** परमानन्दस्य प्राप्तये **अन्तर्बहिश्च** स्वशरीरस्य आभ्यन्तरे बाह्ये च **सर्वत्र परिपूर्णं** सर्वत्र व्याप्तं **महेश्वरं** परमेश्वरं **भावयेत्** स्वरूपत्वेन चिन्तयेत् ॥ 'अन्तर्बहिश्च' इत्यस्य शरीरान्तर्बहिश्चेति तु अध्यात्मं व्याख्यानम्। अत्र अधिविश्वं व्याख्यानम् समुचितं दृश्यते। तथा हि – "तत् सृष्ट्वा तदेवानुप्राविशत्" (तै. उ., २.६) इत्युक्तरीत्या परमेश्वरो विश्वस्यान्तः 'अन्तर्यामित्वेन' तिष्ठति, तथापि विश्वस्य बहिश्च व्यापकत्वेनाऽऽवृणोति। उक्तं च पुरुषसूक्ते – 'स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्' (ऋ. १०.९०.१) इति। तादृशः परमेश्वरः साधकेन स्वात्मनि साक्षात्करणीयः। तदेवोक्तं कठश्रुतौ – "यथाऽऽदर्शे तथात्मनि" (कठ. उ., ६.४) इति ॥१८॥

अर्थहीना यथा वाणी पतिहीना यथा सती।
श्रुतिहीना यथा बुद्धिर्भावहीना तथा क्रिया ॥१९॥

चक्षुर्हीना यथा रूपं न किञ्चिद्वीक्षितुं क्षमः।
भावहीनस्तथा योगी न शिवं द्रष्टुमीश्वरः ॥२०॥

व्याख्या – सदृष्टान्तं पूजाकर्म भावयुक्तं स्यादित्याह – **अर्थहीनेति**। यथा **अर्थहीना** यथा अर्थरहिता **वाणी** वाक्, **यथा पतिहीना** यथा पतिरहिता **सती** पत्नी, **यथा श्रुतिहीना** यथा श्रुतिसंमतिरहिता **बुद्धिः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानम्, तथा भावहीना तथा अध्यात्मभावरहिता **क्रिया** पूजाक्रिया, निष्फला इति शेषः ॥ **यथा चक्षुर्हीनः** यथा चक्षुरहितः **किञ्चिद्रूपं** किञ्चिदपि आकारं **वीक्षितुं न क्षमः** द्रष्टुं न समर्थः, **तथा भावहीनः** तथा भावरहितः योगी शिवयोगी **शिवं** परशिवं **न द्रष्टुम् ईश्वरः** न अवलोकयितुं समर्थः ॥ वाण्या अर्थहीनता नाम अनुपपन्नता यथा "अग्निना सिञ्चनि", "वन्ध्यापुत्रः सुन्दरः", "खपुष्पमालया अलङ्करोति", इत्यादि, अर्थस्य ज्ञानरहितत्वं यथोक्तं यास्केन – "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।" (नि. १.१८) । 'पतिहीना यथा सती' इति द्वितीयदृष्टान्तः । तत्र संप्रदायनिरूढा जनाः पतिरहितां सतीम् अमङ्गलामिति, तादृश्याः सत्याः जीवितमेव वृथेति मन्यन्ते । 'श्रुतिहीना यथा बुद्धिः' इति तृतीयदृष्टान्तः । श्रुतिप्रमाणरहिता ज्ञानमपि वृथेति मन्यन्ते श्रुतिपारम्यवादिनः । एवमेव भावहीना पूजाक्रिया वृथेत्युक्तं भवति । अत्र बिम्बप्रतिबिम्बभावघटितत्वाद् वाक्यस्य दृष्टान्तो नामाऽलङ्कारः ॥ 'चक्षुर्हीनो' यथा रूपम् इत्यादिश्लोके तूपमा नामाऽलङ्कारः ॥ बाह्यवस्तुदर्शनं चक्षुषी विना न शक्यते । भावं विना पूजाकर्म सर्वथा भवति निष्फलम् । भावोऽयं साधकस्य शरीरम् आद्यसाधनत्वेन सज्जीकृत्य "यथाऽऽदर्शे तथात्मनि" (कठ.उ.,६.५) इत्युक्तरीत्या परमात्मसाक्षात्कारं कारयति । इदं च शक्यते 'प्राक् शरीरस्य विस्रसः' (कठ.उ.,६.४)। शिवादुत्पन्नं शिवे एव निरूढं चेदं मनः परमं परिशुद्धं शिवं प्रति प्रवृत्तं च । योगेन नियन्त्रितोऽयं प्राणः शिवभावेनोतश्च प्रोतश्च । एवं शरीरमनःप्राणसमाहारः शिवे सर्वात्मना समर्पितः सन् शिवानन्दे विलीयते । अयमेव भावागमस्थलीयपरयोगिनोऽनुभवः ॥१९-२०॥

भावशुद्धेन मनसा पूजयेत् परमेष्ठिनम् ।
भावहीनां न गृह्णाति पूजां सुमहतीमपि ॥२१॥

व्याख्या – तदेव विशदयति – **भावशुद्धेनेति** । **भावशुद्धेन** परिशुद्धभावैः युक्तेन **मनसा** चित्तेन **परमेष्ठिनं** परमेश्वरं **पूजयेत्** अर्चयेत् । परमेश्वरः **भावहीनां** सद्भावरहितां **सुमहतीम् अपि** अतिमहतीम् अपि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूजाम् अर्चनम् न गृह्णाति न स्वीकरोति ॥ शिवपूजायां बहिरङ्गशुद्धि-रन्तरङ्गशुद्धिश्चेत्युभयमप्यपेक्षितम् । "इमं मे गङ्गे यमुने सरस्वति" (तै.आ.,७.१) इत्यादिमन्त्रेण स्नानोदकाभिमन्त्रणम्, "यदपा क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्" (तै. आ., ७.१) इत्यादिमन्त्रेण हस्तप्रक्षालनम्, "आपो वा इदम् सर्वं विश्वा भूतान्यापः" (तै.आ., ७.२२) इत्यादि-मन्त्रेण स्नानम्, "युवं वस्त्राणि पीवसा" (ऋ.वे., १.१५२.१) इत्यादि-मन्त्रेण शुभ्रवस्त्रधारणम्, इत्यादिक्रमेण बाह्यशुद्धिः सम्पद्येत । परं त्वाभ्यन्तरशुद्धिस्ततोऽप्यधिकं महत्त्ववती । महता साधनेन शिवयोगी-मामपि सम्पादयति । सामान्यानां जनानां कृते इयमतीवक्लेशेन निरन्तर-प्रयत्नेन योगाभ्यासद्वारा सम्पादनीया । चित्तवृत्तीनां शुद्धीकरणेन सम्पाद-नीयेत्यर्थः । आभ्यन्तरशुद्धिर्नाम भावशुद्धिरेव । तद्विना महतोऽपि महीयः पूजाकर्मापि परशिवं न प्रीणयति । बाह्यपूजायां भस्मगन्धाक्षतपुष्पपत्र-धूपदीपनैवेद्यादयो ये समर्प्यन्ते ते सर्वे परमेश्वरानुग्रहेण सम्प्राप्ताः । तेषां समर्पणमात्रं बाह्यपूजाकर्म । कस्तत्र विशेषः ? यदा वयं भगवद्भक्त्यादि-भावानां परिशुद्ध्या प्रभाविता भवामः, तैर्भावैराभ्यन्तरपूजाकर्म निर्वहामः, तदैव परशिवः सन्तृप्तो भवति । तदा वयम् अन्तश्चक्षुषा परमात्मनः दर्शनं प्राप्तुं पारयामः ॥२१॥

नैरन्तर्येण सम्पन्ने भावे ध्यातुं शिवं प्रति ।
तद्भावो जायते यद्वत् क्रिमेः कीटस्य चिन्तनात् ॥२२॥

व्याख्या – भ्रमरकीटन्यायेन शिवं ध्यात्वा शिवो भवतीत्याह – **नैरन्तर्येणेति** । **शिवं प्रति** शिवम् उद्दिश्य **ध्यातुं** ध्यानं कर्तुं **नैरन्तर्येण** अव्यवधानेन **भावे सम्पन्ने** शिवभावे सम्पद्यमाने सति, **यद्वत्** यथा **क्रिमेः** नीलङ्गोः, 'नीलङ्गुस्तु क्रिमिः' (अमर., २.२३४), **कीटस्य** भ्रमरस्य **चिन्तनात्** ध्यानात् भ्रमर एव भवति, तथा तद्ध्यानेन, शिवध्यानेन **तद्भावः** शिवभावः **जायते** उत्पद्यते । 'क्रिमेः कीटस्य चिन्तनात्' – क्रिमिकीट शब्दौ क्रमेण नीलङ्गुभ्रमरपरौ । क्रिमिः कोशे भ्रमरेण बन्धितः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आस्ते । भ्रमरः क्रिमिं तीक्ष्णतया हिनस्ति । तस्याः तीक्ष्णहिंसायाः कारणात् क्रिमिः भ्रमरं निरन्तरं ध्यायति । तेन क्रिमिः भ्रमररूपं सम्प्राप्य पलायते । एष भ्रमरकीटन्यायः ॥ शास्त्रेषु न्यायोऽयं एतन्नाम्ना प्रसिद्धः । लोके च गण्डोली नाम रक्तवर्णः कीटः (कन्नडभाषायां 'कुरुडिहुळ' इति प्रसिद्धः, यस्य 'केम्पुदुम्बि' इति अथवा 'कणजदहुळ' इति नामान्तरम्) गृहेषु द्वारफलके, भित्तौ, वातायनफलके वा कोशमेकं निर्माय तस्मिन् क्रिमिमानीय स्थापयति । तस्य कीटस्य दंशनम् अतीव तीक्ष्णवेदनां जनयतीति तं दृष्ट्वा बिभ्यन्ति जनाः । वारं वारं तस्य दंशनवेदनाम् अनुभूय भीतः कोशास्थक्रिमिस्तद्भावमेव प्राप्नोतीति ज्ञायते । स क्रिमिर्गण्डोली भूत्वा कोशात् बहिर्निर्गत्य पलायते । ग्रामस्तरे त्वयं गण्डोलीकीटन्याय इत्येव साधु ॥ यः कोऽपि वा भवतु नाम न्यायः; नैरन्तर्येण कृते शिवध्याने शिव एव जायते जीव इति तु सिद्धम् ॥२२॥

निष्कलङ्कं निराकारं परब्रह्म शिवाभिदम् ।
निर्ध्यातुमसमर्थोऽपि तद्विभूतिं विभावयेत् ॥२३॥

व्याख्या – असमर्थे निष्कलशिवध्याने तन्महिमानं चिन्तयेद् इत्युक्त्वा भावागमस्थलं समापयति – **निष्कलङ्कम् इति । निष्कलङ्कं** निष्कलं **निराकारम्** आकाररहितं **शिवाभिधं** शिवनामयुक्तं **परब्रह्म** परमं ब्रह्म **निर्ध्यातुं** नितरां चिन्तयितुम् **असमर्थः अपि** अशक्तः अपि, **तद्विभूतिं** तस्य परशिवब्रह्मणः सर्वज्ञत्वसर्वकर्तृत्वादिमहिमानं **विभावयेत्** चिन्तयेत् ॥ शिवस्य द्वे रूपे सगुणं निर्गुणं चेति । सगुणरूपे तस्य साकारत्वं विद्यते, शक्तिस्तस्य त्रिगुणात्मकस्वरूपं स्वीकरोति । शिवस्येदं सगुणस्वरूपं जगत्सृष्टिस्थितिध्वंसतिरोधानानुग्रहरूपेषु तस्य पञ्चकृत्येषु वरीवर्तते । निर्गुणरूपमेव तस्य निजं स्वरूपम् । तस्मिन् स्वरूपे तस्य निष्कलत्वं निराकारत्वं च विद्येते । शक्तिस्तस्य गुणरहितत्वे तिष्ठति । उभयोरपि स्वरूपेषु तस्य शक्तिविशिष्टत्वं तु सिद्धम् । भावागमस्थले चास्मिन् यद्विहितं तन्निर्गुणे परशिवब्रह्मणि स्वात्मत्वेनानुसन्धानम्, तच्च ज्ञानागमसम्पन्नेन योगिनैव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

साधयितुं शक्यम् । अन्ये तु केवलं परमात्मनो महिमानमेव ध्यातुं शक्नुवन्ति ॥२३॥

– इति भावागमस्थलम् –

३. अथ ज्ञानागमस्थलम् – (५६)

परस्य ज्ञानचिह्नानि यानि सन्ति शरीरिणाम् ।
तानि ज्ञानागमत्वेन प्रवर्तन्ते विमुक्तये ॥२४॥

व्याख्या – परयोगिनो ज्ञानचिह्नानि सर्वेषां ज्ञानागम इत्याह – **परस्येति** । **परस्य** भावागमनिष्णातस्य परयोगिनः **ज्ञानचिह्नानि** ज्ञानसूचकानि सङ्केतानि **यानि सन्ति** यानि भवन्ति **तानि** तानि चिह्नानि **शरीरिणां** शरीरवताम्, प्राकृतानां सामान्यजनानाम् इति यावत्, **विमुक्तये** मुक्तिप्राप्त्यर्थं **ज्ञानागमत्वेन** ज्ञानागमशास्त्रत्वेन **प्रवर्तन्ते** प्राचुर्येण वर्तन्ते ॥ परयोगिनो लक्षणमाह भगवती श्रुतिः – "मेधावी ज्ञानविज्ञानतत्परः" [अमृत. बिं. उ. (ब्रह्म. बिं. उ.), १८] इति । मेधावी ज्ञानी, स ज्ञानविज्ञाननिष्ठः । ज्ञानं नाम बहुरहस्यात्मकं सद्गुरुमात्रेण प्रबोधपथम् आनीयमानं च परशिवब्रह्मज्ञानम् । वदन्ति किल श्रुतयः "आत्मैवेदं सर्वम्" (छां. उ., ७.२५.२), "एकमेवाद्वितीयम्" (छां. उ., ६.२.१), इत्यादिभिः सूक्तिभिः । इदमेव सम्यज्ज्ञानं येन मुक्तिर्हस्तामलको भवति । विज्ञानं पुनर्लोकानुभवप्राप्तं ज्ञानम् । विज्ञानसहितं ज्ञानमिदं बन्धमुक्त्युपायत्वेन गृह्यते । तदुक्तं भगवता – "इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे । ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥" (भ.गी., ९.१) इति । अत्र साधकोत्तमभूतस्य परयोगिनो ज्ञानचिह्नानि सामान्यजनानाम् अध्यात्मज्ञानसाधनाय मोक्षाय च कल्पन्ते । अध्यात्मज्ञानमूलानि चिह्नानि भगवतैवोक्तानि – "अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥" (भ.गी., १६.२-३) इति ॥ इयमेव दैवीसम्पत् सर्वेषां ज्ञानागमत्वेन गृह्यते ॥२४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावेन किं फलं पुंसां कर्मणा वा किमिष्यते।
भावकर्मसमायुक्तं ज्ञानमेव विमुक्तिदम् ॥२५॥

व्याख्या – भावकर्मसमेताज् ज्ञानादेव कैवल्यमित्याह – **भावेनेति**। **पुंसां** जनानां **भावेन** केवलेन भावेन **किं फलं** किं प्रयोजनम्, **कर्मणा वा** केवलेन कर्मणा वा **किम् इष्यते** किम् अपेक्ष्यते। भावेन केवलेन कर्मणा वा केवलेन नास्ति मुक्तिरूपं प्रयोजनम् इत्यर्थः। किं तन्मुक्तिदम्? उच्यते। **भावकर्मसमायुक्तं** भावो भक्त्यादिभावः, कर्म पूजादिकर्म च, उभाभ्यां समायुक्तं समेतं **ज्ञानम् एव** सम्यज्ज्ञानमेव **विमुक्तिदं** मोक्षप्रदम्॥ "तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" (छां.उ., ८.१.६), एतच्छ्रुत्यनुसारं भावकर्मणोः केवलयोर्मुक्तिप्रदत्वं न भवति। "ज्ञात्वा देवं मुच्यते सर्वपाशैः" (श्वे. उ., १.८; ४.१६; ५.१३; १.१३), "ज्ञात्वादेवं सर्वपाशापहानिः" (श्वे. उ., १.११), "तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति" (श्वे.उ., ४.१५), "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०), इत्यादिश्रुतिषु यद्यपि "ज्ञानादेव मुक्तिः" इत्याशयो वरीवर्तते तथापि भावकर्मसमायुक्तमेव ज्ञानं मुक्तिप्रदमित्यवगन्तव्यम्। ज्ञानकर्मणोरन्धपङ्गुवत् परस्परसापेक्षत्वं तु पूर्वमेवोक्तम् (पश्यत – अस्मिन्नेव परिच्छेदे ११-तम श्लोकस्य व्याख्याम्)। भावस्तु ज्ञानकर्मणोः सन्धानभूतमित्यत्राऽनुसन्धेयम्। कर्मणा सह युक्तो भावस्तु "भक्तिः" ज्ञानेन सह युक्तो भावश्च "निदिध्यासनम्" ॥२५॥

केवलं कर्ममात्रेण जन्मकोटिशतैरपि।
नात्मनां जायते मुक्तिर्ज्ञानं मुक्तेर्हि कारणम् ॥२६॥

व्याख्या – न केवलं कर्म मुक्तिदमित्याह – **केवलमिति**। **आत्मनां** जीवात्मनां **केवलं कर्ममात्रेण** केवलं कर्ममार्गेण **जन्मकोटिशतैः अपि** जन्मनां कोटयः, तासां शतैः अपि **मुक्तिः** मोक्षः **न जायते** न प्राप्यते। **ज्ञानं मुक्तेः कारणं** ज्ञानमेव मोक्षस्य साधनं **हि** इति प्रसिद्धम्॥ "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गुहायां विभ्राजते यद्यतयो विशन्ति। वेदान्तविज्ञानसुनिश्चितार्थास्सन्यास-योगाद्यतयः शुद्धसत्त्वाः॥" (तै. आ., ७.१०) इति श्रुत्यनुसारेण कर्मणा प्रजया धनेन वा नास्त्यमृतत्वम्, परन्तु त्यागेन केचन अमृतत्वं भजन्ते, अन्ये यतयः केचन परमेश्वरेण हृदयगुहायां निहितं नाकं प्रविशन्ति। वेदान्तज्ञानेन स्वानुभवसिद्धेन विज्ञानेन सुनिश्चितार्थाः संन्यासयोगाद् शुद्धसत्त्वाः सन्तो यतयः मुक्तिं प्राप्नुवन्ति। कर्मणैव केवलेन मुक्तिरिति तु भ्रमः। कर्म त्वत्र सकामकर्म इत्यवगन्तव्यम्। सकामकर्म तावद् बन्धं प्रति नयति। यदा कर्म भक्तिभावेन सम्यज्ज्ञानेन च समायुक्तं भवति तदा तन्मुक्तिं प्रति नयेत्। कथमिति चेदुच्यते। उक्तं च भगवता – "यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते सदा॥" (भ. गी., ४.३७) इति। एवं ज्ञानाग्निना निर्दग्धे कर्मणि मोक्षस्तु सिद्ध एव। "स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति। महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥" (कठ. उ., ४.४)। शङ्कराचार्येण इदमेवं विव्रियते – "तं महान्तं विभुमात्मानं मत्वाऽव-गम्यात्मभावेन साक्षादहमस्मि परमात्मेति धीरो न शोचति" (कठ. उ., ४.४ शाङ्करभाष्यम्) इति॥२६॥

ज्ञानहीनं सदा कर्म पुंसां संसारकारणम्।
तदेव ज्ञानयोगेन संसारविनिवर्तकम्॥२७॥

व्याख्या – ज्ञानरहितेन कर्मणा बन्धः, ज्ञानयुक्तेन च तेन मुक्ति-रित्याह – **ज्ञानहीनम्** इति। **ज्ञानहीनं** ज्ञानरहितं **कर्म** पूजादिकर्म **पुंसां** जीविनां **सदा** सर्वदा **संसारकारणम्** जन्ममरणचक्रात्माकसंसारस्य हेतुः॥ **तद् एव** तदेव कर्म **ज्ञानयोगेन** ज्ञानसम्बन्धेन **संसारविनिवर्तनम्** संसारस्य विनिवर्तनम्, विनिवर्तते इति विनिवर्तनम्, वि नि वृतु (वर्तने) ल्युट् (=अन– "युवोरनाकौ"– पा.अ. ७.१.१), ल्युट् "ल्युट् च" (पा.अ. ३.३.११५) इति सूत्रेण, विनाशकम् इत्यर्थः॥ ज्ञानकर्मणोरन्धपङ्गुवद-न्योन्यसापेक्षत्वमुक्तं प्राक्। भक्तिस्तयोः सन्धिरित्यप्युक्तं प्राक्। तदेवात्र पुनः प्रमाणत्वेन स्मरणीयम्॥२७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

फलं क्रियावतां पुंसां स्वर्गाद्यं नश्वरं यतः ।
तस्मात्स्थायिफलप्राप्त्यै ज्ञानमेव समभ्यसेत् ॥२८॥

व्याख्या – क्रियया केवलेन नश्वरं फलं ज्ञानयुक्तेन तेन शाश्वतं फलमित्याह – **फलम्** इति । **यतः** यस्मात् कारणात् **क्रियावतां पुंसां** यज्ञयागादिक्रियामात्रव्यापृतानां जनानां **स्वर्गाद्यं फलं** स्वर्गादिफलं **नश्वरम्** अल्पकालीनम्, **तस्मात्** तस्मात् कारणात् **स्थायिफलप्राप्त्यै** स्थायि च तत् फलं च स्थायिफलं शाश्वतफलम्, तत्प्राप्त्यै तल्लाभाय **ज्ञानमेव** सम्यज्ज्ञानमेव **समभ्यसेत्** सम्यक् पौनःपुन्येन अनुसन्धानं कृत्वा साधयेत् ॥ स्वर्गादिफलस्य नश्वरत्वं सोपपत्ति प्रदर्शितं भगवता – "ते तं भुक्त्वा स्वर्गलोकं विशालम् क्षीणे पुण्ये मर्त्यलोकं विशन्ति" (भ. गी., ९.२१) इति । मुण्डकश्रुतिस्तमेव विशदयति – "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयोऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ।" (मुं. उ., १.२.७) इति । यज्ञकर्मणि व्यापृतानाम् अष्टादशानां कर्म तु अवरं भवति । षोडश ऋत्विजो यजमानस्तस्य पत्नी चेति अष्टादश यज्ञप्रवर्तकाः । तेषां कर्म अवरम्, ज्ञानवर्जितत्वात् । (पश्यत – मुं. उ., १.२.७, शाङ्करभाष्यम्) । तादृशानां यज्ञधुरन्धराणां स्वभावप्रवृत्ती सम्यक् प्रकटीक्रियते श्रुतिद्वयेन – (i) "अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । जघन्यमानाः परि यन्ति मूढा अन्धेनैव नीयमना यथान्धाः ॥" (कठ. उ., २.५; मुं. उ., १.२.८) इति, (ii) "इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति ॥" (मुं. उ., १.२.१०) इति च । एतत्सर्वं ज्ञातवन्तः शिवयोगिनस्तादृशे अवरे कर्मणि नितरां निरासक्ता भवन्ति । स्वात्माभिन्ने शिवज्ञाने निमग्ना सन्तस्ते देहधारणबाधाय । निष्कामतया पूजादिकर्म कुर्वते । तादृशं कर्म वीरशैवपरिभाषायां "पतिकर्म" इत्युच्यते ॥२८॥

शास्त्राभ्यासादियत्नेन सद्गुरोरुपदेशतः ।
ज्ञानमेव समभ्यस्येत् किमन्येन प्रयोजनम् ॥२९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – ज्ञानं तावत्कथं प्रापणीयमित्यत्राह – **शास्त्राभ्यासादित्य-नेन । शास्त्राभ्यासादियत्नेन** शास्त्रस्य अभ्यासः शास्त्राभ्यासः, शास्त्राभ्यासः अदिः यस्य सः, तादृशेन यत्नेन प्रयत्नेन, **सद्गुरोः उपदेशतः** सद्गुरोः उपदेशेन च, **ज्ञानमेव** अध्यात्मज्ञानमेव **समभ्यस्येत्** सम्यग् श्रवणमनननिदिध्यासनक्रमेण अभ्यस्य अधिगच्छेत् ॥ ज्ञानस्य मूलं शास्त्राभ्यासो गुरूपदेशश्चेति । शास्त्राभ्यासः प्राधान्येन स्वप्रयत्नतः, गुरूपदेशश्च गुरोरनुग्रहेण कारुण्येन च । शास्त्रतः, वीरशैवशास्त्रतः इति यावत्, यत् प्राप्यते तत् समग्रतया नाऽवगम्येत । तदा श्रीगुरुरेव प्रमाणम् । गुरूपदेशस्तत्र सैद्धान्तिकगत्या प्रायोगिकगत्या चाऽनिवार्यो भवति । "वेदसिद्धान्तयोरैक्यम् एकार्थप्रतिपादनात्" (सि. शि., ५.१३) इत्युक्त-दिशा वेदान्तस्य शैवागमापरनाम्नः सिद्धान्तस्य च ज्ञानं वीरशैवशास्त्रे समन्वयीभूतं विराजते । शास्त्राद् अधिगतं ज्ञानं गुरूपदेशद्वारा प्रायोगि-कानुभवत्वेनाऽऽत्मीयभावतया पर्यवस्यति ॥२९॥

ज्ञानं परशिवाद्वैतपरिपाकविनिश्चयः ।
येन संसारसम्बन्धविनिवृत्तिर्भवेत् सताम् ॥३०॥

व्याख्या – शिवाद्वैतज्ञानस्य महत्त्वमाह – **ज्ञानम्** इति । **परशिवाद्वैतपरिपाकविनिश्चयः** परशिवस्य अद्वैतं जीवात्मनः परशिवेन सह सामरस्यम्, तस्य परिपाकः परिपक्वभावः, तस्य विनिश्चयः विशेषेण निश्चयः एव **ज्ञानं** ज्ञानमित्युच्यते, **येन** येन ज्ञानेन **सतां** सत्पुरुषाणां ज्ञानयोगिनां **संसारसम्बन्धविनिवृत्तिः** संसारेण जननमरणचक्रात्मकेन सम्बन्धः समायोगः तस्मात् विनिवृत्तिः विनिवर्तनं **भवेत्** निश्चयेन स्यात् ॥ अत्र परब्रह्ममहालिङ्गादन्यन्नास्तीति ज्ञानमिति यदुक्तं मरितोण्ट-दार्येण तत्त्वप्रदीपिकायां तदसमीचीनम् । शिवाद्वैतं नाम जीवात्मनः परशिवब्रह्मणा सह ऐक्यभावः, तस्य परिपक्वविनिश्चय एव ज्ञानम् इत्यवगन्तव्यम् । तादृशज्ञानं विना संसारसमायोगो नैव विनिवर्तते ॥ (पश्यत– आगामिश्लोकम्) ॥३०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते।
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम् ॥३१॥

व्याख्या – पूर्वोक्तमेव विशदयिति – **शिवात्मकम्** इति। इदं **सर्वं** चराचरात्मकमेतत् सर्वं जगत् **शिवात्मकं** शिवस्वरूपम्, **शिवादन्यत्** शिवं विहाय तदतिरिक्तं **न विद्यते** न किञ्चिदस्ति। **शिवोऽहं** शिव एवाहम् **इति या बुद्धिः** या प्रतिपत्तिः, **तदेव** सा एव **उत्तमं ज्ञानम्** परमं ज्ञानम् भवति॥ इदं सर्वं शिवात्मकमिति श्रुतय उद्घोषयन्ति – "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" (छां. उ., ३.१४.१) इति, "ब्रह्मैवेदं सर्वम्" (मुं. उ., २.२.११) इति, "ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण" (मु. उ., २.२.११) इति, "तस्मात् सर्वगतः शिवः" (श्वे. उ., ३.११) इति, "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" (ऋ. १०.९०.२) इति। शिवोऽहमिति निश्चिता बुद्धिर्ज्ञानम् इति श्रुतिप्रमाणं सिद्धम्, यथा – "ब्रह्मैव सन् ब्रह्माप्येति" (बृ. उ., ४.४.६) इति, "अहं ब्रह्मास्मि" (बृ. उ., १.४.१०) इति च॥३१॥

अन्धो यथा पुरस्थानि वस्तूनि न पश्यति।
ज्ञानहीनस्तथा देही नात्मस्थं वीक्षते शिवम् ॥३२॥

व्याख्या – अन्धवज् ज्ञानहीन इत्याह – **अन्ध इति। यथा** येन प्रकारेण **अन्धः** दृष्टहीनः **पुरस्थानि** पुरतः स्थितानि **वस्तूनि** वस्तुजातानि **न पश्यति** न द्रष्टुं पारयति, **तथा** तेन प्रकारेण **ज्ञानहीनः** अध्यात्मज्ञान-रहितो **देही** शरीरी **आत्मस्थं** स्वत्मनि स्थितं **शिवं** परशिवं **न वीक्षते** न वीक्षितुं पारयति॥ ज्ञानं नामान्तश्चक्षुर्येनाऽऽत्मस्थं शिवं साक्षात्कर्तुं शक्यते। इदमेव सदृष्टान्तमुक्तं प्रागेव– "चन्द्रकान्ते यथा तोयं सूर्यकान्ते यथाऽनलः। बीजे यथाङ्कुरः सिद्धस्तथात्मनि शिवः स्थितः॥" (सि.शि., ५.३६) इति। "अहं ब्रह्मास्मि" (बृ.उ., १.४.१०) इत्येवंरूपं ज्ञानमेव योगिन अन्तश्चक्षुर्येनैव योगी स्वात्मनि तादात्म्यसम्बन्धेन स्थितं शिवं द्रष्टुं शक्यते। "अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढः" (बृ.उ.,४.३.३५),

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"आत्मा वा अरे द्रष्टव्यः" (बृ.उ.,२.४.५), "आत्मनैवात्मानं पश्यति" (बृ.उ., ४.४.२३) इत्यादिश्रुतीनाम् अयमेवाऽऽशयः ॥३२॥

शिवस्य दर्शनात् पुंसां जन्मरोगनिवर्तनम् ।
शिवदर्शनमप्याहुः सुलभं ज्ञानचक्षुषाम् ॥३३॥

व्याख्या – शिवसाक्षात्कारफलमाह – **शिवस्येति । शिवस्य दर्शनात्** शिवस्य स्वात्माभिन्नतया साक्षात्कारात् **पुंसां** जीविनां **जन्मरोगनिवर्तनं** जन्म एव रोगः, जननमरणचक्रात्मकसंसार एव व्याधिः, तस्य निवर्तनं निवारणम्, स्यादिति शेषः । **शिवदर्शनमपि** स्वात्माभिन्नतया शिवसाक्षात्कारोऽपि **ज्ञानचक्षुषां** ज्ञानम् एव चक्षुः येषां ते ज्ञानचक्षुषः, तेषाम्, योगिनां **सुलभं** सुलभम् इति आहुः वदन्ति ॥ जननं मरणं चेति मानवजीवितस्य कोटिद्वयम् । द्वयमपि संसारशब्देन ज्ञायते । अयं च संसारः घोराणामपि घोरो रोगः । तस्यात्यन्तिकी निवृत्तिः स्वात्माभिन्नत्वेन परशिवसाक्षात्कारादेव । शिवदर्शनादेव भवचक्रध्वंसः शक्यते । शास्त्राध्ययनं गुरूपदेशश्चेत्युभयं मिलित्वा तन्निवर्तनसाधनम् इत्युक्तं प्राक् ॥३३॥

दीपं विना यथा गेहे नान्धकारो निवर्तते ।
ज्ञानं विना तथा चित्ते मोहोऽपि न निवर्तते ॥३४॥

व्याख्या – मोहान्धकारनिवर्तने ज्ञानमेव दीपमित्याह – **दीपमिति । यथा** येन प्रकारेण **दीपं विना** दीपं विहाय **गेहे** गृहे **अन्धकारः** तमः **न निवर्तते** न निवृत्तिं प्राप्नोति, **तथा** तेन प्रकारेण **ज्ञानं विना** सम्यज्ज्ञानं विहाय **चित्ते** मनसि **मोहः अपि** अज्ञानान्धकारोऽपि **न निवर्तते** न विनाशं गच्छति ॥ ज्ञानं विना शिवज्ञानं विना इत्यर्थः । मोहस्तु अज्ञानम् इति ज्ञेयम् ॥३४॥

– इति ज्ञानागमस्थलम् –

४. अथ सकायस्थलम् – (५७)

परस्य या तनुर्ज्ञेयाऽदेहकर्माभिमानिनः ।
तया सकायो लोकोऽयं तदात्मत्वनिरूपणात् ॥३५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शिवज्ञानसम्पन्नस्य शरीरं क्रियाभावज्ञानकारणत्वेन विशिष्यते । तेन शरीरेण लोकोऽयं सकाय इत्याह – **परस्येति । या** यादृशी **अदेहकर्माभिमानिनः** देहस्य कर्म देहकर्म, न विद्यते देहकर्मणः अभिमानमस्यास्तीति अदेहकर्माभिमानी, तस्य, क्रियाभावज्ञानकारणीभूतस्य देहवतः **परस्य** परयोगिनः **तनुः ज्ञेया** ज्ञानविषयीभूतत्वेन ज्ञाता तनुः अस्ति, **तया** तादृश्या तन्वा, **तदात्मत्वनिरूपणात्** तस्य (लोकस्य) आत्मत्वेन प्रतिपादनात् **अयं लोकः** अयं प्रपञ्चः **सकायः** कायेन सह वर्तते इति सकायः इति ज्ञायते ॥ 'क्रियाभावज्ञानकारणीभूतदेहवतः' इत्यत्र पूर्वोक्तानां क्रियागमभावागमज्ञानागमस्थलानां विषयोऽभिप्रेतः । तथा हि – परयोगिनो देहः क्रिया-भाव-ज्ञान-साधनत्वेन गृह्यते । तादृशेन परयोगिनः कायेन लोकः सकायः इत्यर्थः । देहवानपि परयोगी अदेहवानिव, देहे वा देहव्यवहारे वा तस्य किञ्चिदपि सम्बन्धरहितत्वात् । तस्य कायवत्त्वं कायव्यवहारश्च केवलं लोकसङ्ग्रहाय ॥३५॥

कायं विना समस्तानां न क्रिया न च भावना ।
न ज्ञानं यत्ततो योगी कायवानेव सञ्चरेत् ॥३६॥

व्याख्या – परयोगिन कायवत्त्वं त्वनिवार्यमित्याह – **कायम् इति । यत्** यस्मात् कारणात् **कायं विना** शरीरेण विना **समस्तानां** सर्वेषां जनानां **न क्रिया** न कर्मकरणम्, **न च भावना** न च ध्यानसामर्थ्यम्, **न ज्ञानं** न ज्ञानसम्पादनम्, **ततः** तस्मात् कारणात् **योगी** परयोगी **कायवानेव** काययुक्त एव, **सञ्चरेत्** सञ्चलेत् ॥ शरीरमेव सर्वेषां कर्मणां श्रद्धायाः ज्ञानस्य च स्थानम् । वीरशैवा निराहारादिभिर्देहशोषणं न प्रतिपादयन्ति । योगादिसाधनाय देहारोग्यस्याऽऽवश्यकतां ते मन्यन्ते । योगाभ्यासो न शक्यते बलहीनेन साधयितुम् । अन्यदप्युक्तं शरीरयोगास्याऽनिवार्यतां कठश्रुतौ– "इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः। ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥" (कठ. उ., ६.४) इति । परमात्मनः स्वाभिन्नत्वेन दर्शनं च यथादर्शे तथा शरीरवत आत्मनि सुलभतया शक्यते प्राप्तुम् । यथा लौकिकानां लोकव्यवहाराय शरीरम् अपेक्ष्यते, तथा योगिनां लिङ्ग-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूजादिनित्यकर्मानुष्ठानाय योगाभ्यासाय आत्मदर्शनाय च शरीरम् अपेक्ष्यते इत्यर्थः ॥३६॥

शिवैकज्ञानयुक्तस्य योगिनोऽपि महात्मनः ।
काययोगेन सिद्ध्यन्ति भोगमोक्षादयः सदा ॥३७॥

व्याख्या – उक्तमेव विशदयति – **शिवैकेत्यादिना** । **शिवैकज्ञान-युक्तस्य** शिवेन एकः अभिन्नः अहम् इति ज्ञानं शिवैकज्ञानम्, तेन युक्तस्य समेतस्य **महात्मनः** महामहिमशालिनः **योगिनः अपि** परयोगिनः अपि **काययोगेन** काययुक्तत्वेन **भोगमोक्षादयः** भोगः ऐहिकसुखानुभवः, मोक्षः जीवन्मुक्तिपरमुक्ती, तयोरनुभवः, भोगमोक्षावित्यादयः **सदा** सर्वदा **सिद्ध्यन्ति** सिद्धिं प्राप्नुवन्ति ॥ काययुक्तत्वे ज्ञानसिद्धिः, ज्ञानसिद्ध्या मोक्षसिद्धिरिति भावः ॥३७॥

काष्ठं विना यथा वह्निर्जायते न प्रकाशवान् ।
मूर्तिं विना तथा योगी नात्मतत्त्वप्रकाशवान् ॥३८॥

व्याख्या – उक्तमेव सदृष्टन्तमाह – **काष्ठम् इति** । **यथा** येन प्रकारेण **काष्ठं विना** इन्धनं विना **वह्निः** अग्निः **न प्रकाशवान् जायते** प्रकाशयुक्तः न भवति, **तथा** तेन प्रकारेण **मूर्तिं विना** शरीररूपमूर्तिं विना **योगी** परयोगी **नात्मतत्त्वप्रकाशवान्** आत्मतत्त्वप्रकाशयुक्तः न भवति ॥ आत्म-तत्त्वप्रकाशयुक्तत्वं नाम स्वात्माभिन्नत्वेन शिवस्वरूपज्ञानम् ॥३८॥

मूर्त्यात्मनैव देवस्य यथा पूज्यत्वकल्पना ।
तथा देहात्मनैवास्य पूज्यत्वं परयोगिनः ॥३९॥

व्याख्या – पुनरपरं दृष्टान्तमाह – **मूर्त्यात्मनेति** । **यथा** येन प्रकारेण **मूर्त्यात्मना एव** मूर्तिस्वरूपेण एव लिङ्गरूपेण इति यावत् **देवस्य** परमात्मनः **पूज्यत्वप्रकल्पना** पूजनीयत्वचिन्तनम्, **तथा** तेन प्रकारेण

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहात्मना एव देहस्वरूपेण एव **अस्य परयोगिनः** अस्य परशिवयोगिनः **पूज्यत्वं** पूजनीयत्वम्, सङ्गच्छते इति शेषः ॥३९॥

निष्कलो हि महादेवः परिपूर्णः सदाशिवः ।
जगत्सृष्ट्यादिसंसिद्ध्यै मूर्तिमानेव भासते ॥४०॥

व्याख्या— सृष्ट्यादिकर्मार्थं शिवोऽपि मूर्तिधरो भवतीत्याह— **निष्कल इति । निष्कलः हि** निरवयवः इति प्रसिद्धः, **महादेवः** महांश्चासौ देवश्च महादेवः परमपुरुषः **परिपूर्णः** स्वयं परिपूर्णः, अन्यूनानतिरिक्तत्वस्थितिमान्, **सदाशिवः** परशिवः **जगत्सृष्ट्यादिसंसिद्ध्यै** जगतः सृष्ट्यादिपञ्चकृत्यसिद्ध्यर्थं **मूर्तिमान् एव** मूर्तिधरः एव **भासते** प्रकाशते ॥ मूलतः निरवयवः परिपूर्णश्च परशिवः सृष्ट्यादिपञ्चकृत्यनिर्वहणहेतोः नानामूर्तिधरो भवति॥ अध्यात्मज्ञानस्य बोध-प्रेरणा-मार्गदर्शनेभ्यः परयोगिनः सकायत्वं तु अपेक्ष्यते ॥४०॥

ब्रह्माद्या देवताः सर्वाः मुनयोऽपि मुमुक्षवः ।
कायवन्तो हि कुर्वन्ति तपः सर्वार्थसाधकम् ॥४१॥

व्याख्या – देवा मुनयश्च काययुक्ता एव तपः कुर्वन्तीत्याह – **ब्रह्माद्या इति । ब्रह्माद्याः** ब्रह्मा आद्यः यासां ताः ब्रह्माद्याः, **देवताः सर्वाः** सर्वाः देवताविशेषाः, ब्रह्मविष्ण्वादयः सर्वे देवाः इत्यर्थः, **मुमुक्षवः** मोक्तुं इच्छवः, मोक्षकाङ्क्षिणः इत्यर्थः **मुनयः अपि** मुनिजनाः अपि, **कायवन्तः** शरीरयुक्ताः सन्तः **सर्वार्थसाधकम्** सकलानाम् इष्टार्थानां प्रदायकं **तपः** तपश्चरणं **कुर्वन्ति हि** आचरन्ति इति प्रसिद्धम् ॥ देवाः सर्वे वसिष्ठादय ऋषयश्च स्वस्वाधिकारप्रभावाणां मुक्त्यादीनां सिद्धीनां च सम्पादनाय तपः कुर्वन्तीति तु प्रसिद्धम् । तदर्थं कायवन्त एव ते स्युः ॥४१॥

तपो हि मूलं सर्वासां सिद्धीनां यज्जगत्त्रये ।
तपस्तत्कायमूलं हि तस्मात् कायं न सन्त्यजेत् ॥४२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – कायपरित्यागो न कार्यः सर्वसिद्धिमूलत्वात्तस्य इत्युक्त्वा सकायस्थलं समापयति – **तपो हीति । यत् जगत्त्रये** यस्मात् कारणात् त्रिषु लोकेषु (जगतां त्रयं जगत्त्रयम्, तस्मिन्) **सर्वासां सिद्धीनाम्** अणिमाद्यष्ट-सिद्धीनां सकलानां **तपः मूलं हि** तपश्चरणं कारणमिति प्रसिद्धम्, **तपः तत्** तच्च तपश्चरणं **कायमूलं** कायमवलम्बते इत्यपि प्रसिद्धम्, **तस्मात्** तस्मात्कारणात् **कायं** शरीरं **न सन्त्यजेत्** न वैराग्येन परित्यजेत् ॥ भुक्तिमुक्त्यादिसाधनं तपः सर्वेषामिति प्रसिद्धम् । लोके सत्कर्मफलप्राप्ति-र्भुक्तिः । तस्या भुक्तेरपि सावधिकत्वात् निरवधिकसुखप्राप्तिस्तु जीवितस्य परमोन्नतिर्मोक्षरूपा । मोक्षः मनीषिणां परमध्येयः । तेषां मते अणिमा-द्यष्टसिद्धयः स्वर्गादिलोकप्राप्तिश्च मुक्तिरूपपरमफलापेक्षया न्यूनातिन्यूना इत्यवगच्छेत् । परयोगिनस्तु जीवन्मुक्तिदशायां स्थिताः सकाया अप्य-काया भवन्तीति समनन्तरमेव निरूप्यते ॥४२॥

– इति सकायस्थलम् –

५. अथ अकायस्थलम् – (५८)

औपचारिकदेहित्वाज्जगदात्मत्वभावनात् ।
मायासम्बन्धराहित्यादकायो हि परः स्मृतः ॥४३॥

व्याख्या – परयोगिन अकायत्वं सयुक्ति प्रतिपादयति – **औपचारि-केत्यादिना । परः** पूर्वोक्तलक्षणः सकायात्मकः परयोगी, **औपचारिक-देहित्वात्** देहः अस्यास्तीति देही, तस्य भावः देहित्वं देहयुक्तत्वम्, औपचारिकं च तत् देहित्वं च औपचारिकदेहित्वम्, तस्मात् औपचारिक-देहित्वात्, हेतौ पञ्चमी, प्रातिभासिकदेहयुक्तत्वात्, **जगदात्मत्वभावनात्** जगतः विश्वस्य स्वात्माभिन्नशिवस्वरूपचिन्तनात्, अत्रापि हेतौ पञ्चमी, **मायासम्बन्धराहित्यात्** मायया सह सम्बन्धः मायासम्बन्धः, तस्य राहित्यात् अभावात्, हेतौ पञ्चमी, एतत्कारणत्रयनिमित्तात् **अकायः स्मृतः हि** अकायः इति प्रसिद्ध्या ज्ञायते ॥ जगदात्मत्वभावनं नाम जगदात्मभूतं परशिवब्रह्म स्वात्माभिन्नस्वरूपमिति भावनम् । तदुक्तम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

"परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सौम्य ! स सर्वज्ञः सर्वो भवति तदेष श्लोकः ॥" (प्र. उ., ४.१०) इति । यो छायारहितं शरीररहितम् अलोहितं परिशुद्धम् अक्षरब्रह्म जानाति स सर्वज्ञः सर्वात्मा च भवति । एषा स्थितिः परयोगिनः । काययुक्तोऽपि स कायाभिनिवेशस्य नितराम् अभावाद् अकाय एव । अतः शरीरयोगस्तस्याऽऽभासमात्रम् । "स्वशक्तिप्रचयो विश्वम्" इति शिवसूत्रोक्तदिशा (३.३०) विश्वं तु शिवशक्तेः विकास-भूतम् । यदा प्रतीतिरेषां दृढतां प्राप्नोति तदा भेदज्ञानकारणीभूता माया निवर्तते । माया सेयं लोकव्यामोहो येनाऽऽत्मानं परमपदप्राप्तेः व्यावर्त्यते । एषैवाविद्या । मायातीतश्च परयोगी स्वशरीरं भगवत्सेवायाः भगवत्साक्षा-त्कारस्य साधनत्वेन मन्यमानः सन्नपि तदासक्तिराहित्याद् अकाय इत्येव मन्यते । एवम् औपचारिकदेहित्वं जगदात्मत्वभावनत्वं मायासम्बन्ध-रहितत्वं च परयोगिनो विशेषलक्षणानि ॥४३॥

परस्य देहयोगेऽपि न देहाश्रयविक्रिया ।
शिवस्येव यतस्तस्मादकायोऽयं प्रकीर्तितः ॥४४॥

व्याख्या – कथं परयोगिनोऽकायत्वमित्यत्राह – **परस्येति** । यतः यस्मात् कारणात् **देहयोगे अपि** शरीरयुक्तत्वे सत्यपि **परस्य** परयोगिनः **शिवस्य इव** परशिवस्य यथा तथा **न देहाश्रयविक्रिया** देहस्य आश्रयः देहाश्रयः; देहधारणम् इत्यर्थः, देहाश्रयात् देहाश्रयनिमित्ताद् इति यावत्, विक्रिया विकारः नास्ति । **तस्माद् अयं** तस्मात्कारणाद् एषः परयोगी **अकायः प्रकीर्तितः** अकायः इति वर्ण्यते ॥ शिवस्य कृते देहयोगेऽपीति यदुक्तं तत् सर्वेषाम् आश्चर्याय भवेत् । तथा मा भूत्, शिवस्य चराचरात्मकजगद्रूपशरीराङ्गीकृतत्वात् । शिवस्तपस्तप्त्वा विश्वं सर्वं निर्ममे इत्युक्तम् । तथा हि – "सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । तत्सृष्ट्वा तदेवानुप्राविशत् ॥" (तै. उ., २.६) इति । जगत्सृष्टिर्नाम शिवस्य चरा-चरात्मकजगद्रूपेणाऽभिव्यक्तिः । सृष्ट्यनन्तरं तद्विश्वं स स्वयमेव प्रेरकत्वेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्राविशत् । एवं जगत्तस्य शरीरम् । शिवजगतोर्मध्ये शरीरिशरीरभाव-सम्बन्धो वरीवर्तते । सत्यपि शरीरेऽस्मिन् शरीरानुबन्धिविकाराः शिवं न बाधन्ते । परयोगिनोऽत्र स्तरे शिवादभिन्नत्वात्सोऽपि शरीरानुबन्धिविकारैः नैव बाध्यते। कामाद्यरिषड्वर्गेण नितरां निरस्तः परयोगी "अकाय" इत्येव सत्यम् ॥४४॥

परलिङ्गे विलीनस्य परमानन्दचिन्मये ।
कुतो देहेन सम्बन्धो देहिवद्भासनं भ्रमः ॥४५॥

व्याख्या – अकायस्य कायवत्त्वेन भासनं भ्रम इत्याह – **परलिङ्गे** इति । **परमानन्दचिन्मये** परश्चासौ आनन्दश्च परानन्दः, शिवानन्दः, परानन्द एव चित् परनन्दचित् परानन्दरूपा चित्, परानन्दरूपं ज्ञानम्, तन्मये, **परलिङ्गे** परलिङ्गस्वरूपे परमात्मनि **विलीनस्य** विलयं प्राप्तस्य **देहेन** कायेन **सम्बन्धः** योगः **कुतः** किं प्रयुक्तम् ? तस्य **देहवद्भासनं** कायवानिव अवभासः **भ्रमः** भ्रान्तिरूपः ॥ परयोगिनस्त्वभिलाषादयः सर्वे शिव-स्वरूपे चिदानन्दमहोदधौ निमज्जन्ति । अत स 'पर्याप्तकाम' इत्युच्यते । तदुक्तम् – "कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र । पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः ॥" (मुं. उ., ३.२.२) इति । सर्वे कामास्तस्मात् निर्बीजं निरस्ता इत्यर्थः । परशिवे मज्जनं तावत्तस्य परमकामः । तं प्राप्य स पर्याप्तकामो जातः । एतद्रहस्या-नभिज्ञा जनास्तं देहवानिति भ्रमाधीना भवन्ति ॥४५॥

देहाभिमानहीनस्य शिवभावे स्थितात्मनः ।
जगदेतच्छरीरं स्याद् देहेनैकेन का व्यथा ॥४६॥

व्याख्या – देहवत्त्वेऽपि तेन न कोऽपि बाधः इत्याह – **देहाभि-मानेत्यादिना** । **देहाभिमानहीनस्य** देहे अभिमानः मिथ्याभूतः अभिनिवेशः देहाभिमानः, तस्मात् हीनः देहाभिमानहीनः, तस्य, **शिवभावे** शिवस्वरूपे **स्थितात्मनः** स्थितः आत्मा यस्य सः स्थितात्मा, निलीनस्वरूपवान्, तस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परयोगिनः **एतत् जगत्** सर्वमिदं विश्वं **शरीरं** कायः **स्यात्** भवेत्, तदा **एकेन देहेन** एकेन कायेन **का व्यथा** को बाधः, न कोऽपि बाध इत्यर्थः॥ परयोगी तु देहस्य योगक्षेमाय नात्मानं योजयति, देहयोगेऽपि देहरहित इवास्ते। देहयोगनिमित्तं याश्च क्रियाः प्रचलन्ति सर्वास्ता अप्रयत्नसिद्धाः, न तु बुद्धिपूर्विकाः। नास्ति तस्य तत्र सङ्क्लेशोऽपि। यतो हि स शिव एव। विश्वमेव सर्वं तस्य शरीरम्। विश्वरूपसमष्टिमेव भावयतस्तस्य कथं वा सङ्गः स्याद् व्यष्टिरूपे शरीरेऽस्मिन्! ॥४६॥

शिवज्ञानैकनिष्ठस्य नाहंकारभवभ्रमः।
न चेन्द्रियभवं दुःखं त्यक्तदेहाभिमानिनः ॥४७॥

व्याख्या – देहाभिमानरहितस्य कुतो भ्रमः कुतो दुःखमित्याकाङ्क्षायामाह – **शिवज्ञानैकनिष्ठस्येति। शिवज्ञानैकनिष्ठस्य** शिवस्य ज्ञानं शिवज्ञानम्, तस्मिन् एकस्मिन्नेव निष्ठस्य, 'शिवोऽहं' रूपे शिवज्ञाने दृढप्रत्यययुक्तस्य, **त्यक्तदेहाभिमानिनः** त्यक्तः देहाभिमानः अस्येति त्यक्तदेहाभिमानी, तस्य, देहाभिमानरहितस्य, **न अहंकारभवभ्रमः** अहंकारभवः अहंभावोत्पन्नः भ्रमः, अहंभावजन्या भ्रान्तिः न भवति; **न च इन्द्रियभवं दुःखं** इन्द्रियैः समुत्पन्नं दुःखं च न भवति॥ शिवज्ञानं नाम शिवोऽहमिति शिवैक्यज्ञानम्। सा च परयोगिनः स्वात्माभिन्नशिवभावना। नैषा कल्पना न वा प्रतीतिः, परं परयोगिनः सा साक्षात्कृतिः। नात्राहंकारस्य देहाभिमानस्य वाऽवकाशलेशोऽपि। परयोगी तु शिवानन्दसमुद्रे निमग्नः सन् स्वात्मभेदं नैव जानाति ॥४७॥

न मनुष्यो न देहोऽहं न यक्षो नैव राक्षसः।
शिवोऽहमिति यो बुद्ध्यात् तस्य किं देहकर्मणा ॥४८॥

व्याख्या – उक्तमेव विशदीकृत्याऽकायस्थलं समापयति – **नेति। यः** यो योगी **अहं न मनुष्यः** अहं मनुजो न भवामि, **न देहः** शरीरं न भवामि, **न यक्षः** यक्षः न भवामि, **न एव राक्षसः** राक्षसोऽपि न भवामि,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवोऽहम् इति अहं शिव एव इति **बुद्ध्यात्** जानीयात् **तस्य** तस्य अकायस्य परयोगिनः **किं देहकर्मणा** शरीरकर्मणा किं प्रयोजनम् ? न किमपि इत्यर्थः ॥ परयोगी दैविकतत्त्वम्, न तु भौतिकतत्त्वम् । देहवत्त्वं तस्याऽऽभासमात्रम् ॥४८॥

– इति अकायस्थलम् –

६. अथ परकायस्थलम् – (५९)

वशीकृतत्वात् प्रकृतेर्मायामार्गातिवर्तनात् ।
परकायोऽयमाख्यातः सत्यज्ञानसुखात्मकः ॥४९॥

व्याख्या – परयोगी प्राकृतिकमायासम्बन्धरहितत्वात् परशिवशरीरत्वात् परकाय इत्याह – **वशीकृतत्वाद् इति । सत्यज्ञानसुखात्मकः** सच्चिदानन्दस्वरूपः **अयं** परयोगी **प्रकृतेः वशीकृतत्वात्** लोकसृष्टिकारणीभूतायाः प्रकृतेः वशीकरणत्वात् **मायामार्गातिवर्तनात्** मायामार्गस्य अतिक्रमणात् **परकायः** परकायः इति **आख्यातः** कथितः ॥ अत्राह श्रुतिः – "स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम् । उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥" (मुं.उ., ३.२.१) इति । इच्छाविकारादिमुक्ताः ब्रह्मैव परमं धामेति साक्षात्कारं प्राप्य तस्मिन्नेव विश्वं सर्वं विलीनं तच्च स्वयंप्रकाशवद् इति जानन्तः तमेव परयोगिनं स्वयं परशिवं मन्यन्ते । ते हि तामसिककामादिविकारमुक्ताः भवन्ति । परः परमात्मा कायः शरीरं यस्य सः परकायः । प्रकृतिर्नाम भौतिकतत्त्वम् । सा च चतुस्त्रिंशत्तत्वानां जननी । प्रकृतिपुरुषयोर्मेलनात् शैवमतसंमतानि षट्त्रिंशत्तत्त्वानि भवन्ति । माया हि प्रकृतिजन्या, अत एव प्राकृतिकसत्त्वरजस्तमोगुणसंयुक्ता सुख-दुःख-मोहकारिणी सम्पद्यते । परयोगी तु सर्वथा मायया निर्मुक्तः ॥४९॥

परब्रह्मवपुर्यस्य प्रबोधानन्दभासुरम् ।
प्राकृतेन शरीरेण किमेतेनास्य जायते ॥५०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – भौतिकशरीरस्य विद्यमानत्वेऽपि परयोगिनस्तेन प्रयोजन-लेशोऽपि नास्तीत्याह – **परब्रह्मवपुः इति । यस्य** यस्य परयोगिनः **प्रबोधानन्दभासुरं** ज्ञानेन आनन्देन च प्रकाशमानं **परब्रह्म** परशिवब्रह्म **वपुः** शरीरं भवति **अस्य** तादृशस्य परयोगिनः **एतेन प्रकृतेन** अनेन प्रकृतिजन्येन **शरीरेण** वपुषा **किं जायते** किं भवति ? परशिवब्रह्मणः प्रकाशो ज्ञानम् आनन्दश्च । परशिवब्रह्मैव परयोगिनः परमं धाम । तादृशधामवतः प्राकृतिकशरीरेण न किमप्यस्ति प्रयोजनम् । प्राकृतशरीरं नाम पञ्चभूतात्मकं शरीरम् । मायामार्गातिक्रान्तस्य परशिवब्रह्मवपुषः परयोगिनः सत्यपि प्राकृतशरीरे तत्प्रतिभासमात्रं न किमपि कार्यं तेन । नियन्त्रितायां मायायां तदुत्पन्नानां षट्त्रिंशत्तत्त्वानि स्वयमेव भवन्ति नियन्त्रितानि । समग्रे समुद्रे वशीकृते का कथा तद्विकाराणां वीचितरङ्गादीनाम् ? ॥५०॥

सम्यज्ज्ञानाग्निसन्दग्धजन्मबीजकलेवरः ।
शिवतत्त्वावलम्बी यः परकायः स उच्यते ॥५१॥

व्याख्या – नास्ति प्रतिबन्धकत्वं शरीरस्येत्याह – **सम्यज्ज्ञानेत्यादिना । यः सम्यज्ज्ञानाग्निसन्दग्धजन्मबीजकलेवरः** सम्यक् ज्ञानं सम्यज्ज्ञानं शिवोऽहमिति निश्चितं ज्ञानम्, तज्ज्ञानमेव अग्निः सम्यज्ज्ञानाग्निः, तेन सन्दग्धं निःशेषतया दग्धम्, जन्मनो बीजं जन्मबीजम्, सम्यज्ज्ञानसन्दग्धं जन्मबीजं यस्य सः सम्यज्ज्ञानसन्दग्धजन्मबीजः, तादृशः कलेवरः यस्य सः, सुज्ञानवह्निदग्धजन्मान्तरकारणीभूतसूक्ष्मशरीरवान्, **शिवतत्त्वावलम्बी** शिवतत्त्वम् अवलम्बते इति । इनिप्रत्ययः (इन्) – "अत इनिठनौ" (पा.अ. ५.२.११५); स्वस्वरूपभूते परशिवतत्त्वे निमग्नः, **यः सः** तादृशः **सः परकायः** उच्यते परकायः इति कथ्यते ॥ जन्मान्तरकारणीभूतं सूक्ष्मशरीरमेव "पुर्यष्टक" शब्देन ज्ञायते । 'पशुः' इति व्यवह्रियमाणो जीवात्मा विज्ञानाकलः, प्रलयाकलः, सकलश्चेति त्रिविधः । तत्र द्वितीयः प्रलयाकलाख्यः पशुः मलकर्मणाम् अपक्वत्वात् पुर्यष्टकदेहयुक्तः सन् कर्मवशात् पुनः पुनः जननमरणचक्रे परिभ्रमति । तदुक्तम् – "प्रलया-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कलेषु येषामपक्वमलकर्मणी व्रजन्त्येते । पुर्यष्टकदेहयुता योनिषु निखिलासु कर्मवशात् ॥'' (स.द.सं., पृ. १८४) इति । अघोरशिवाचार्य पुर्यष्टकस्वरूपमाह – ''पुर्यष्टकं नाम प्रतिपुरुषं नियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्यादिकलापर्यन्तत्रिंशत्तत्त्वात्मकः सूक्ष्मो देहः'' (तत्रैव उल्लेखः) इति । निर्दग्धपुर्यष्टकदेहस्य परयोगिनः 'परकायः' इत्यन्वर्थं नामधेयम् ॥५१॥

इन्द्रियाणि मनोवृत्तिर्वासनाः कर्मसंभवाः ।
यत्र यान्ति लयं तेन सकायोऽयं परत्मना ॥५२॥

व्याख्या – परकायस्येन्द्रियव्यापारराहित्यमाह – **इन्द्रियाणीति** । **यत्र** यस्मिन् परमात्मनि **इन्द्रियाणि** पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि चेति दशेन्द्रियाणि, **मनोवृत्तिः** चित्तवृत्तयः, चित्तव्यापाराः, **कर्मसंभवाः** कर्मपाशोत्पन्नाः **वासनाः** संस्काराः च, **लयं यान्ति** लीनतां गच्छन्ति, **तेन परत्मना** तेन परमात्मना सह अयं परयोगी **सकायः** समानकायः सकायः, परशिवब्रह्मकायः इत्यर्थः ॥ सर्वम् इदं परशिवब्रह्मणो निर्गच्छति परशिवब्रह्मण्येव विलयं गच्छति । परयोगी च परमात्मना सकायः, न तु भौतिककायेन सकायः ॥५२॥

पराहन्तामनुप्राप्य पश्येद् विश्वं चिदात्मकम् ।
सदेहोऽतिभ्रमस्तस्य निश्चिता हि शिवात्मता ॥५३॥

व्याख्या – परयोगिनः परत्मतामाह – **पराहन्ताम्** इति । **पराहन्तां** परः एव अहम् इति पराहम्, तस्य भाव पराहन्ता; ताम्, **अनुप्राप्य** ज्ञानद्वारा लब्ध्वा **विश्वं** समग्रं जगत् **चिदात्मकं पश्येत्** परशिवस्वरूपभूतेन चिद्रूपत्वेन जानीयात् । **सदेहः** तादृशः परयोगी देहयुक्तः इति तु **अतिभ्रमः** अत्यन्तं भ्रान्तिः । **तस्य** परयोगिनः **शिवत्मता** शिवस्वरूपता **निश्चिता** निश्चयेण स्थिता **हि** इति प्रसिद्धौ ॥ पराहन्ता नाम समष्ट्यहन्ता । इयं च व्यष्ट्यहन्ताया भिन्ना । लब्धपराहन्तस्य परयोगिनः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवस्वरूपत्त्वं तु सिद्धम् । तत्र नास्ति सन्देहलेशोऽपि । तस्य देहयुक्तत्वं चाभासमात्रम् । मनः, चैतन्यम्, शक्तिः, आत्मा चेति चतुष्टयं यत्र विलयं याति तत्परमं वपुः ॥५३॥

स्वस्वरूपं चिदाकारं ज्योतिः साक्षाद्विचिन्तयन् ।
देहवानपि निर्देहो जीवन्मुक्तो हि साधकः ॥५४॥

व्याख्या – परकायः शिववदकायः, सदेहोऽपि देहरहितः सन् मुक्त इत्याह – **स्वस्वरूपम् इति । स्वस्वरूपं** स्वस्य स्वरूपं स्वात्मस्वरूपं **साक्षात्** स्वकीयज्ञानाक्षिगोचरतया **चिदाकारं** चित्स्वरूपं **ज्योतिः** परमप्रकाशः, साक्षात् शिवस्वरूपमिति **विचिन्तयन्** विशेषेण परिभावयन् **साधकः** परमार्थसाधकः, अत्र परकायाख्यः, **देहवान् अपि** भौतिकदेहयुक्तः अपि **निर्देहः** देहरहितः, साकारोऽपि निराकारः सन् **जीवन्मुक्तः** जीवन्मुक्त एव भवति । हि इति प्रसिद्धौ ॥ परयोगी शिवैक्यभावचैतन्येन प्रकाशितः सन् असम्पर्किताज्ञानान्धकारश्चित्प्रकाश एव । स च परशिवचैतन्यस्वरूप एव । परशिवचैतन्यस्य स्वकायत्वेन परयोगिनस्तस्य भौतिकदेहेन नास्ति किमपि प्रयोजनम् ॥५४॥

देहस्तिष्ठतु वा यातु योगिनः स्वात्मबोधिनः ।
जीवन्मुक्तिर्भवेत् सद्यश्चिदानन्दप्रकाशिनी ॥५५॥

व्याख्या – तदर्थमेव समर्थयति – **देह इति । स्वात्मबोधिनः** स्वत्मनः बोधः ज्ञानम् अस्यास्ति इति स्वात्मबोधी, णिनि प्रत्ययः, परमात्मा एव स्वात्मा इति ज्ञानवतः **योगिनः** परयोगिनः देहः **तिष्ठतु वा** देहवत्त्वं भवतु वा **यातु वा** गच्छतु वा, **सद्यः** समनन्तरमेव **चिदानन्दप्रकाशिनी** चिदानन्दस्य प्रकाशिनी, चिदानन्दप्रकाशशालिनी **जीवन्मुक्तिः** जीवतः एव मुक्तिः, **भवेत्** स्यात् ॥ देहस्याऽस्तित्वे नास्तित्वे वा नास्ति तस्य चिन्तालेशोऽपि । लौकिकसंसारे अनासक्तस्य तस्य भौतिकदेहव्यापारेण नास्ति योगो वा क्षेमो वा । तादृशः परयोग्येव जीवन्मुक्तः ॥५५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आत्मज्ञानावसानं हि संसारपरिपीडनम् ।
सूर्योदयेऽपि किं लोकस्तिमिरेणोपरुध्यते ॥५६॥

व्याख्या – तमर्थमेव सदृष्टान्तमाह – **आत्मज्ञानावसानम् इति । आत्मज्ञानावसानं हि** आत्मज्ञानप्राप्तिपर्यन्तमेव खलु **संसारपरिपीडनं** संसारेण परितः पीडनं सर्वतः क्लेशभाजनता । तत्र दृष्टान्तः – **सूर्योदये अपि** सूर्यस्य उदयेऽपि **लोकः** प्रपञ्चः **तिमिरेण** अन्धकारेण **उपरुध्यते किम्** आच्छाद्यते किम् ? नैव उपरुध्यते इत्यर्थः ॥ दृष्टान्तालङ्कारः । अविद्या एव संसारस्य कारणम् । अविद्यालक्षणमाह पतञ्जलिः – "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ।" (यो. सू., २.५) इति । अनित्यस्य नित्यत्वेन अशुचेः शुतित्वेन दुःखस्य सुखत्वेन आनात्मनः आत्मत्वेन च भ्रान्तिरविद्येति ज्ञातव्या । अस्मादेव भ्रान्तिवशान्मनुष्योऽनन्तं दुःखम् अनुभवन् हताशो भवति । इयं भ्रान्तिस्तत्परिणामभूतं दुःखानुभवं च तावत्पर्यन्तं न निवार्येते यावत्पर्यन्तम् आत्मज्ञानं नोदेति । अन्धकारं सूर्योदयपर्यन्तं किल ॥५६॥

देहाभिमाननिर्मुक्तः कलातीतपदाश्रयः ।
कथं याति परिच्छेदं शरीरेषु महाबुधः ॥५७॥

व्याख्या – महाज्ञानी शरीरपरिच्छेदरहितः परयोगीत्याह – **देहाभिमाननिर्मुक्त इति । देहाभिमाननिर्मुक्तः** देहस्य अभिमानः देहाभिमानः, तस्मात् निर्मुक्तः, देहाभिमानरहितः, **कलातीतपदाश्रयः** कलाः निवृत्त्यादि पञ्च, याश्च इच्छाशक्त्यादिपञ्चशक्तिसमुत्पन्नानां कर्मसादाख्यादिपञ्चसादाख्यानां सम्बद्धाः, ताभ्यः अतीतं पदं कलातीतपदं कलातीतं परशिवब्रह्मपदं, तत्पदम् आश्रयते, तत्पदे तिष्ठतीत्यर्थः, तादृशः **महाबुधः** परमज्ञानी परयोगी **शरीरेषु** भौतिकशरीरेषु **परिच्छेदं** परिमितत्वं **कथं याति** कथं प्राप्नोति? न कथमपि स प्राप्नोतीत्यर्थः । विश्वस्य निर्माणे मूलभूततत्त्वानां सिसृक्षा यदा परमात्मनि जायते तदा तद्गता इच्छादिपञ्चशक्तय आविर्भवन्ति। ताभ्यो विश्वस्य कारणभूतानि कर्मसादाख्यादि-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पञ्चसादाख्यानि समुत्पन्नानि भवन्ति । तानि निवृत्त्यादिकलासहकृतानि जगन्निर्माणे प्रवर्तन्ते । परशिवब्रह्म तु कलातीतविभवः । तदेव परमज्ञानिनः परयोगिनश्चरमं शरणम् । एवं सर्वव्यापकस्य परमचैतन्यस्यैकत्वभाजनः परयोगी कायस्य परिमितौ नैव सज्जते ॥५७॥

— इति परकायस्थलम् —

७. अथ धर्माचारस्थलम् – (६०)

तस्यैव परकायस्य समाचारो य इष्यते ।
स धर्मः सर्वलोकानामुपकाराय कल्पते ॥५८॥

व्याख्या – परकायस्याऽऽचार एव सर्वेषां धर्माचार इत्याह – **तस्येति**। **यः तस्य परकायस्य एव** यः तस्य परयोगिन एव **समाचार इष्यते** सदाचारः इच्छाविषयीक्रियते **स** स एव **धर्मः** धर्माचारः **सर्वलोकानां** समस्तजनानां **उपकाराय कल्पते** प्रयोजनाय कल्पते ॥ परकाययोगी तु प्रज्ञानघनः सन् सर्वेषां मार्गदर्शको भवति । चराचरात्मकं सर्वमिदं च विश्वं तस्य भगवत्प्रकाशस्य व्याप्तौ निवसति । तस्य सर्वे आचारा लोकस्य अचारसंहिता भवन्ति ॥५८॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा ।
दानं पूजा जपो ध्यानमिति धर्मस्य संग्रहः ॥५९॥

व्याख्या – धर्मसंहिताया अंशान् आह – **अहिंसेत्यादिना** । **अहिंसा** कायेन वाचा मनसा च हिंसारहितत्वम्, **सत्यं** सत्यवचनं 'सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्' इत्युक्तरीत्या, **अस्तेयं** परवस्तूनाम् अनपहरणम्, **ब्रह्मचर्यं** स्त्रीसङ्गरहितत्त्वम्, कायेन वाचा मनसा च कामोपभोगरहितत्त्वम्, **दया** सर्वप्राणिषु करुणा, **क्षमा** अन्यकृतापराधेषु क्षान्तिः, सहनशक्तिः, **दानं** प्रपन्नेभ्यः द्रव्यादिदानम्, **पूजा** शिवलिङ्गार्चनम्, **जपः** शिवपञ्चाक्षरीजपः, **ध्यानं** शिवस्य मनसि स्मरणम्, इति एवं दश **धर्मस्य संग्रहः** धर्मसंहिता ॥ एतानि धर्मस्य दश सूत्राणि । एतैरेव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

धर्मस्य धर्मत्वम् । हिंसादीनां पतञ्जलिर्योगस्य प्रतिपक्षत्वम् आह – "वितर्कहिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्यादिमात्रा दुःखाज्ञानान्तफला इति प्रतिपक्षभावनम् ।" (यो. सू., २.३४) इति । एते विघ्नभूता हिंसादयः प्रत्यक्षेणाऽप्रत्यक्षेण वा विधीयमाना अनुमन्यमाना वा लोभेन क्रोधेन मोहेन वा प्रचोदिताः, मृदुमध्यमादिप्रमाणयुक्ताश्च सन्तो दुःखं वाऽज्ञानं वा जनयन्ति । सर्वरीत्या सर्वत्र च यदा हिंसा त्यज्यते तदा वैरभावः नितरां निरस्तो भवति । प्राणिनोऽपि निरस्तवैरभावे स्थाने सस्नेहं निवसन्ति । "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" (यो. सू., २.३५) इति पतञ्जलिवचनस्य अयमेव अभिप्रायः । सत्यनिष्ठावत्त्वे स्वपरोभयसत्कर्मणां फलोदयः भवति । तदुक्तं पतञ्जलिना – "सत्यप्रतिष्ठाया क्रियाफलाश्रयत्वम्" (यो. सू., २.३६) इति । सत्यस्य पन्थाः सर्वोत्कृष्टत्वभाजनः । उक्तं च – "सत्यमेव जयते नाऽनृतम्" (मुं. उ., १.११) इत्यपि श्रुतिः । सत्यवचने इदं सूत्रम्– "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् । प्रियं च नाऽनृतं ब्रूयादेष धर्मः सनातनः ॥" (मनु.,४.१३८) इति । "**स्तेयं** परस्वापहरणम्, तदभावोऽस्तेयम् ।" (यो.सू., भोजवृत्तिः, २.३७) । अस्तेयव्रतनिष्ठत्वे अयाचितोपलब्धिः । तदुक्तम् – "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" (यो. सू., २.३७) । "मा गृधः कस्यस्विद्धनम्" (ई. उ., १) इत्यप्याह श्रुतिः । ब्रह्म वेदः, तदर्थं चरतीति ब्रह्मचारी, तस्य भावः **ब्रह्मचर्यम्** इति ब्रह्मचर्यशब्दस्य एका निष्पतिः । स्त्रीसङ्गरहितत्वम् अपि ब्रह्मचर्यम् । अयमेवार्थं परिगृह्य पतञ्जलिराह – "ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" (यो. सू., २.३८) इति । वीर्यनाशे बलनाशः, बलनाशे योगभङ्गः । परकाययोगिनि तद्बलम् उदात्ताध्यात्मिकशक्तिरूपेण परिणतं सद् अध्यात्मयोगे पर्यवस्यति । **दया** इति सप्तमो धर्मः । दया नाम "आत्मवत् सर्वभूतानि" (सि. शि., १६.६२) इत्युक्तदिशा सर्वप्राणिषु एकात्मताभावेन करुणाभरितत्वम् । **दानम्** इत्यस्य सोपाधिक-निरुपाधिक-सहजत्वेन पूर्वमेव (सि. शि., नवमपरिच्छेदे) व्याख्यातम् । कृपणस्य निन्दा तु प्रवर्तते एव आप्राचीनकालात् । तथा हि – "मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वध इत्स तस्य । नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥" (ऋ.वे. १०.११७.६) इति । दानं तु मनसः औदार्यं हृदयस्य च कारुण्यं व्यनक्ति । "तेन त्यक्तेन भुञ्जीथाः" इत्याह श्रुतिरन्या (ई. उ., १)। दानेन व्यक्तिगतं श्रेयः समष्टिप्रेयश्चेत्युभयमपि साध्यते । **पूजा** नाम लिङ्गत्रयसमन्वयस्य गुरुजङ्गमयोश्चाऽर्चनम् । अन्तर्बहिर्लिङ्गार्चनं गुरुजङ्गमार्चनपूर्वकं पादोदकप्रसादस्वीकारादयश्च सर्वे पूजाप्रकाराः । **जपः** पञ्चाक्षरीमन्त्रजपः, एष वाचिकोपांशुमानसरूपेण त्रिविधः । (पश्यत – सि. शि., ८.२७-२९, ३२) । मानसजपस्तु तन्मयीभावं गतेन मनसैव शक्यते कर्तुम् । **ध्यानं** नाम ध्येये वस्तुनि चित्तवृत्तिसन्धानस्य नैरन्तर्यम्। उक्तं पतञ्जलिना– "तत्र प्रत्ययैकतानता ध्यानम्" (यो.सू.,३.२) इति। ध्यानेनैव परमात्मनः सगुणनिर्गुणस्वरूपद्वैविध्यमपि शक्यते साक्षात्कर्तुम्। तेनैव शिवजीवैक्यानुसन्धानं यस्य वीरशैवपरिभाषायां लिङ्गाङ्गसामरस्यम् इत्यभिधानम् ॥५९॥

शिवेन विहितो यस्मादागमैर्धर्मसङ्ग्रहः ।
तस्मात्तमाचरन् विद्वान् तत्प्रसादाय कल्पते ॥६०॥

व्याख्या – शिवोदितधर्मसंग्रहत्वात् तदाचरणेन शिवप्रसादसिद्धिरित्याह – **यस्मात्** येन कारणेन **आगमैः** अष्टाविंशतिशिवागमद्वारा **शिवेन** परशिवेन **धर्मसंग्रहः** पूर्वोक्तधर्मसंग्रहः **विहितः** विधेयत्वेन उपदिष्टः, **तस्मात्** तेन कारणेन **तम् आचरन्** तं धर्मसंग्रहम् आचरन्, **विद्वान्** ज्ञानी साधकः **तत्प्रसादाय कल्पते** तस्य शिवस्य प्रसादः अनुग्रहः तत्प्रसादः, तस्मै कल्पते, शिवप्रसादाय योग्यो भवतीत्यर्थः ॥ शिवैक्यसम्पन्नस्य महायोगिनः सर्वा वाग् आगमभूतः सर्वे सदाचाराः सर्वेभ्यः धर्माचारभूताः । ये साधका ज्ञात्वैतत् स्वयमाचरन्ते ते शिवप्रसादभाजना भवन्ति ॥६०॥

अधर्मं न स्पृशेत् किञ्चित् विहितं धर्ममाचरेत् ।
तं च कामविनिर्मुक्तं तमपि ज्ञानपूर्वकम् ॥६१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – फलापेक्षारहितत्त्वेन ज्ञानपूर्वकत्वेन विहितं धर्मम् आचारेदित्याह – **अधर्मम् इति । किञ्चित्** किञ्चिदपि **अधर्मं** धर्मविरुद्धं **न स्पृशेत्** न कुर्यात् । **विहितं धर्मं** आगमविहितं धर्मम् **आचरेत्** कुर्यात् । **तं च** तं धर्मं, यम् आचरणीयत्वेन विहितं वर्तते, तं **कामविनिर्मुक्तं** कामात् फलेच्छातः विनिर्मुक्तं विरहितं यथा भवति तथा कुर्यात् । **तम् अपि** यं विहितं तम् पुनः **ज्ञानपूर्वकं** ज्ञानपूर्वकं यथा भवति तथा कुर्यात् ॥ स हि धर्मो येन व्यक्तिगतः शान्तिः समष्टिसामरस्यं चेत्युभयं न वाध्यते । धर्मो विहितं कर्म, अधर्मो निषिद्धं कर्म । धर्म एवाचरितव्यो नाधर्मः । धर्मभूतकर्मणः फलेच्छारहितत्वं ज्ञानपूर्वकत्वं च विहिते । इयमेव नैष्कर्म्यसिद्धिः । उक्तं च भगवता – "असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां सन्यासेनाधिगच्छति ॥" (भ.गी., १८.४९) इति । नैष्कर्म्यं तावत् "सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते ।" (भ. गी., ५.१३) इत्येवंस्वरूपम् । नैष्कर्म्यसिद्धिः सद्योमुक्तिरेव । "नैष्कर्म्यसिद्धिं.........सद्योमुक्त्यवस्थाम्" इति शङ्करः । (भ. गी., १४.४९ – शां. भा.) ॥६१॥

आत्मवत् सर्वभूतानि संपश्येद् योगवित्तमः ।
जगदेकात्मताभावान्निग्रहादिविरोधतः ॥६२॥

व्याख्या – तज्ज्ञानस्य स्वरूपमाह – **आत्मवद् इति । योगवित्तमः** योगं विदन्ति इति योगविदः, योगज्ञाः, योगविदां श्रेष्ठः योगवित्तमः, परकाययोगी इत्यर्थः, **जगदेकात्मताभावात्** जगदेव एकात्मा जगदेकात्मा, तस्य भावः जगदेकात्मता, चराचराणां भेदराहित्येन एकात्मता, तस्य भावात् तस्य स्वरूपत्वात्, **निग्रहादिविरोधतः** निग्रहः स्वातन्त्र्यहरणम्, अनुग्रहः उपकारः, इत्यादीनां विरोधत्वात्, अनवकाशात्, **सर्वभूतानि** सकलजीवजातानि **आत्मवत्** स्वात्मवत्, पक्षपातबुद्धिराहित्येन, **संपश्येत्** संभावयेत् ॥ आत्मवत् सर्वभूतानीत्येवंस्वरूपं ज्ञानं तु परकाययोगिनि प्रयत्नेन विना सिद्धमेव । तज्ज्ञानस्य अप्रयत्नसिद्धत्वे कारणद्वयमत्रोक्तम् – जगदेकात्मतायोगाद् इति, निग्रहादिविरोधत इति च । प्रथमं कारणं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चराचरात्मकस्य जगतः सर्वभेदविरहितत्त्वेनैकत्वभाव इति, तस्माद् इति हेतुत्वसूचना। परयोगिनः पुनः स्वाभिन्नसर्वजगदात्मतानुभूतिः, सा एव पूर्णताभावना यस्यां न्यूनाधिकत्वं न संभवति। "पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥" (ई.उ., शान्तिमन्त्रः) इत्येवंरूपा पूर्णता सा। द्वितीयं कारणं नास्ति कीदृश्यपि निग्रहानुग्रहप्रसक्तिरिति। न कोऽपि कमप्यन्यं निगृह्णाति, न कोऽपि कमप्यन्यम् अनुगृह्णाति। विरोधत इति हेत्वर्थपञ्चम्याः 'तसिल्'। एकताभावसम्पन्नस्य परयोगिनः केनापि जुगुप्सा वा विरोधो वा नास्ति। तदुक्तम्– "यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति। सर्वभूतेषु चात्मनं ततो न विजुगुप्सते। यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥" (ई.उ., ६-७) इति॥ इदमेव परकायस्य परकायत्वम्॥६२॥

एक एव शिवः साक्षात् जगदेतदिति स्फुटम्।
पश्यतः किं न जायेत ममकारो हि विभ्रमः ॥६३॥

व्याख्या – एकात्मताभावसम्पन्नस्य किमप्यसाध्यं नास्तीत्याह – एक इति। **शिवः** परशिवः **साक्षात्** साक्षात्स्वयं एतत् जगद् इति इदं विश्वं च **स्फुटं** वैशद्येन **एक एव** एकात्मता इति **पश्यतः** परिभावयतः परयोगिनः **किं न जायेत ?** किं न भवेत् ? सर्वं स्यादित्यर्थः। **ममकारः** प्रतिवस्तुनि ममेत्यभिमानः **विभ्रमः हि** विभ्रान्तिरेव। हि इति प्रसिद्धौ॥ परयोगिनो नास्तीच्छा कापि नाप्यस्ति किमपि प्राप्तव्यम्। स च सर्वदा तृप्तः। नाहं-ममप्रत्ययस्तस्मिन्नुदेति तस्य सर्वमयत्वात् स्वात्मेतराभावत्वात्॥६३॥

धर्म एव समस्तानां यतः संसिद्धिकारणम्।
निस्पृहोऽपि महायोगी धर्ममार्गं च न त्यजेत् ॥६४॥

व्याख्या – गृहस्थो वा विरक्तो वा धर्माचारं न त्यजेदित्याह – धर्म इति। **यतः** यस्मात् कारणात् **धर्म एव** धमामात्रं **समस्तानां** सर्वेषां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संसिद्धिकारणं समस्तसिद्धेः भोगमोक्षादेः हेतुभूतम्, तस्मात् कारणात्, **महायोगी** महांश्च असौ योगी च महायोगी, परकाययोगी इत्यर्थः, **निस्पृहः अपि** निर्गता स्पृहा यस्मात् सः निस्पृहः इच्छारहितः अपि, **धर्ममार्गं** धर्माचारपन्थानं **न त्यजेत्** न जह्यात् ॥ धर्माचारास्त्विह लोके भोगं वितन्वते । बहूनामयमेव ध्येयः । परकाययोगिन भोगेच्छा नास्तीति मोक्ष एव संसाधितध्येयः । आप्तकामस्य सर्वेच्छाविहीनस्य तस्य न किमपि करणीयमस्ति । केवलं लोकसङ्ग्रहाय धर्माचारं तेनाऽनुसन्धेयमित्युक्तम् । केवलं भोगकाङ्क्षिणां प्रतीमामपायघण्टां नादयति श्रुतिः – "श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥" (कठ. उ., २.२) इति ॥६४॥

ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न संत्यजेत् ।
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः ॥६५॥

व्याख्या – पूर्वोक्तमेव विशदयति – **ज्ञानामृतेनेति । योगी** परकाययोगी **ज्ञानामृतेन** ज्ञानम् एव अमृतं ज्ञानामृतम्, तेन **तृप्तः अपि** तृप्तिं प्राप्तवानपि **धर्मं** धर्माचारं **न संत्यजेत्** न जह्यात् । किमिति चेद् उच्यते – **आचारम् इति । महतां** महत्मनां परयोगिसदृशानां **आचारं** धर्माचारं **दृष्ट्वा** परिभाव्य **लौकिका** लोके भवाः सामान्यजनाः **प्रवर्तन्ते** आचारमार्गेऽनुप्रवृत्ता भवन्ति । अयमेव लोकसंग्रह इत्युक्तः । (सि. शि., १५.७१ – व्याख्या द्रष्टव्या) ॥६५॥

सदाचारप्रियः शम्भुः सदाचारेण पूज्यते ।
सदाचारं विना तस्य प्रसादो नैव जायते ॥६६॥

व्याख्या – सदाचारेण विना नास्ति शिवप्रसादसिद्धिरित्याह – **सदाचारप्रिय इति । सदाचारप्रियः** सदाचारः प्रियः यस्य सः, सदाचारेण प्रीयमाणः **शम्भुः** परशिवः **सदाचारेण** सदाचारेणैव **पूज्यते** अर्च्यते ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्मात् सदाचारं विना अहिंसादिधर्माचारं विना **तस्य** शिवस्य **प्रसादः** अनुग्रहः **नैव न** सर्वथा **जायते** संपाद्यते ॥६६॥

– इति धर्माचारस्थलम् –

८. अथ भावाचारस्थलम् – (६१)

भाव एवास्य सर्वेषां भावाचारः प्रकीर्तितः ।
भावो मानसचेष्टात्मा परिपूर्णः शिवाश्रयः ॥६७॥

व्याख्या – भावाचारस्वरूपम् आह – **भाव इति** । **भावः** भावो नाम **परिपूर्णः** अन्तः बहिश्च परिपक्वतया अखण्डस्वरूपः **शिवाश्रयः** शिवम् आश्रयते इति तथोक्तः, शिवः एव आश्रयः यस्य सः इति वा, शिवैक-निष्ठः इत्यर्थः, **मानसचेष्टात्मा** मनोवृत्तिस्वरूपः । **अस्य** परयोगिनः **भाव एव** तादृशः शिवनिष्ठभक्त्यादिमनोवृत्तिः एव **सर्वेषां** सकलानां लौकिकानां **भावाचारः** भावाचारसंहिता इति **प्रकीर्तितः** प्रकीर्त्यते ॥ शिवनिष्ठ-भक्त्यादिमनोवृत्तिः, तदनुवृत्त्या क्रियाचरणं च स्वार्थभावेन अननुरञ्जिते भवतः । तत्सर्वं परशिवस्य महिम्ना तं प्रति सेवया च प्रतिसम्बद्धम् । सर्वं शिवमयम्, यद्यत्क्रियते तत्सर्वं शिवपूजांशभूतम् इति मन्वानः परकायः शिवादभिन्नपदे तिष्ठति । अयमेव भावाचारो लोकहिताय कल्पते ॥६७॥

भावनाविहितं कर्म पावनादपि पावनम् ।
तस्माद् भावनया युक्तं परधर्मं समाचरेत् ॥६८॥

व्याख्या – शिवनिष्ठमनोवृत्तिविशिष्टं कर्म परयोगिनो धर्म इत्याह– **भावनाविहितम् इति** । **भावनाविहितं** परशिवनिष्ठभक्त्यादिभावैः विशिष्टं **कर्म** पूजादिपतिकर्म **पावनादपि पावनं** पवित्रादपि पवित्रम् भवति । **तस्मात्** अव्यवहितपूर्वमुक्तात् कारणात्, **भावनया युक्तं** परशिवनिष्ठ-भक्त्यादिमनोव्यापारविशिष्टं **परधर्मं** परस्य परयोगिन धर्मं धर्माचारं **समाचरेत्** सम्यगाचरेत्, सर्वः साधकगण इति शेषः ॥ कर्मणा रहितो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भक्त्यादिभावोऽन्धवत् प्रवृत्तिरहितः। एवमेव भक्त्यादिभावरहितं कर्म पङ्गुवच्चलनरहितः। अन्धपङ्गुवद् भावकर्मणोः समायोगो मुक्तिपदं प्रति नयति। मानसचेष्ठात्मायं भावस्तु परमात्मस्वरूपं सन्धार्य परमपवित्रं परकायपदं प्रापयति साधकम् ॥६८॥

भावेन हि मनःशुद्धिर्भावशुद्धिश्च कर्मणा।
इति सञ्चिन्त्य मनसा योगी भावं न सन्त्यजेत् ॥६९॥

व्याख्या – किं भावेन इत्यत्राह – **भावेन इति। भावेन** शिवनिष्ठ-भक्त्यादिभावेन **मनःशुद्धिः** चित्तशुद्धिः, **कर्मणा** कर्मजातेन पुनः **भावशुद्धिः च** भक्त्यादिभावानां परिष्कृतिः, **इति मनसा सञ्चिन्त्य** इति चित्तेन सुविचार्य, **योगी** योगविद् **भावं** भक्त्यादिभावं **न सन्त्यजेत्** न जह्यात् ॥ भक्त्यादिभावः स्वार्थदम्भविचारान् प्रतिरुध्य मनःशुद्धिं साधयति। स्वार्थदम्भादयस्तु चित्तं कलुषतां नयन्ति। परयोगिसदृशस्य महायोगिनश्चित्तकालुष्यकथैव नास्ति। एतच्च साधकानां कृते उक्तम्। तेषां कृते एव परयोगिनो भावाचारो विहितः। साधकैस्तत्र यतनीयं सिद्धिं च प्रापणीयम्। नास्मिन् विषये कोऽप्याग्रहः साधकानां प्रति। परं तु साधका एवाऽप्रयत्नसिद्धत्वेन भावकर्मणोः परस्परं शुद्धीकरण-प्रत्ययेन प्रवर्तयेयुः। अयमेव भावाचारः ॥६९॥

शिवभावनया सर्वं नित्यनैमित्तिकादिकम्।
कुर्वन्नपि महायोगी गुणदोषैर्न बाध्यते ॥७०॥

व्याख्या – शिवभावयुक्तकर्मणां बाधकत्वं नास्तीत्याह – **शिव-भावनयेति। महायोगी** परकाययोगी **शिवभावनया** 'यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्' इत्युक्तदिया शिवार्पणभावनया **नित्य-नैमित्तिकादिकं** नित्यं कर्म, नैमित्तिकं कर्म इत्यादिकं **सर्वं** कर्म **कुर्वन्नपि** आचरन्नपि **गुणदोषैः** गुणैर्वा दोषैर्वा **न बाध्यते** न बाधकतां नीयते, न लिप्यते इति भावः ॥ शास्त्रेषु नित्यम्, नैमित्तिकम्, काम्यम्, निषिद्धं चेति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चतुर्विधं कर्म प्रोक्तम् । काम्यं वा निषिद्धं वा कर्म योगी नाङ्गीकरोति । नित्यं च नैमित्तिकं च योगी लोकसंग्रहार्थमेव स्वीकरोति । तस्य कर्मणां शिवभावप्रभावितत्वेन तैः पुण्यं वा पापं वा परिणामतया नैवोत्पद्यते । उक्तं च भगवता – "बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ कर्मजं बुद्धियुक्तं हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥" (भ. गी., २.५०-५१) इति ॥७०॥

अन्तः प्रकाशमानस्य संवित्सूर्यस्य सन्ततम् ।
भावेन यदुपस्थानं तत्सन्ध्यावन्दनं विदुः ॥७१॥

व्याख्या – अन्तर्भासमानस्य चित्सूर्यस्य भावेनाऽनुवर्तनं वीरशैवानां सन्ध्यावन्दनम् इत्याह – **अन्तरिति** । **अन्तः** आभ्यन्तरे हृत्कमलस्य ऊर्ध्वं **सन्ततं** निरन्तरं **प्रकाशमानस्य** भासमानस्य **संवित्सूर्यस्य** चिदादित्यस्य **भावेन** शिवनिष्ठभक्त्यादिभावेन **यदुपस्थानं** यदनुवर्तनं **तत् सन्ध्यावन्दनं** तत्सन्ध्योपासनम् इति **विदुः** जानन्ति ॥ सन्ध्यावन्दनशब्दो ब्राह्मण-क्षत्रिय-वैश्याख्य-त्रैवर्णिकेषु रूढः । प्रातःसन्ध्या, मध्याह्नसन्ध्या, सायंसन्ध्या चेति त्रिषु सन्ध्यासु गायत्रीमन्त्रस्य जपः,सूर्याय अर्घ्यप्रदानं चेत्युभय-सम्बद्धम् उपासनं सन्ध्यावन्दनमिति त्रैवर्णिकेषु प्रचलति । वीरशैवानां 'त्रिकालशिव(लिङ्ग)पूजा' तत्संवादि । तिस्रः सन्ध्याः पूजार्थं प्रशस्ता इति वीरशैवैरपि त्रिसन्ध्यासु शिवलिङ्गपूजा करणीयत्वेन विधीयते । शैवागमेषु वीरशैवानां कृते विशिष्टं सन्ध्यावन्दनं विहितमस्ति । तथा हि – "अन्तः प्रकाशमानस्य संवित्सूर्यस्य सन्ततम् । मनसा यदुपस्थानं तत्सन्ध्यावन्दनं विदुः ॥" (सुप्र. आ., ७.१०) । इदं च आभ्यन्तरपूजास्वरूपयुक्तम् । अत्र सुप्रभेदागमश्लोकसंवादिनि श्लोके केवलं तृतीयपादारम्भे 'भावेन' इति पाठान्तरं वर्तते । संवित्सूर्योऽत्र शिवचिद्रूपम् । अतोऽन्तर्हृत्कमलस्योर्ध्वं प्रकाशमानं शिवज्योतिर्लिङ्गं मनसा भावेन ध्यानमेव सन्ध्यावन्दनमिति वीरशैवमतम् । एतदेव विशदीकृतमस्ति सहेतुकम् – "ततः सन्ध्यामुपासीत प्राणायामपुरस्सरम् । मदीयसन्ध्यकोपास्तिः सन्ध्योपास्तिः प्रकीर्तिता ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सवितुर्मण्डलस्वामी सावित्रीदेवतास्म्यहम् ॥" (का.आ., उ.भा., क्रि.पा., ३.५५) इति । एवं सन्ध्यावन्दनं शिवतेजोरूपसूर्यस्य ध्यानस्वरूपे पर्यवस्यति । त्रिसन्ध्यासु शिवपूजनं वीरशैवसाधकाय विहितम् । तदनुभवसिद्धिरूपं सन्ध्यावन्दनं परिपूर्णशिवयोगसम्पन्नस्य परयोगिनः सहजस्पन्दनरूपेण निरन्तरं प्रचलति ॥७१॥

आत्मज्योतिषि सर्वेषां विषयाणां समर्पणम् ।
अन्तर्मुखेन भावेन होमकर्मेति गीयते ॥७२॥

व्याख्या – परयोगिनो होमकर्म आह – **आत्मज्योतिषीति । आत्मज्योतिषि** चित्स्वरूपवह्नौ **सर्वेषां** सकलानां **विषयाणां** लौकिकानुभवसंस्काररूपाणां वस्तूनां **अन्तर्मुखेन भावेन** आभ्यन्तरवृत्तियुक्तेन भावस्वरूपेण **समर्पणं** हवनं **होमकर्म इति** आत्महोमाख्यं होमकर्म इति **गीयते** प्रशंस्यते ॥ होमकर्म वीरशैवेषु नास्तीति भ्रमाधीना भावना वरीवर्ति । तदसमीचीनम् । हिंसात्मकयज्ञकार्याणां निषेधोऽस्त्येव वीरशैवेषु । परं तु वह्नौ घृतादिहविषां समर्पणरूपं होमकर्म न निषिद्धम् । शिवदीक्षादिकार्येषु मन्त्रदोषादिनिवारणार्थं होमकर्म आचरितव्यमिति शास्त्रेषु विधीयते । अत्र त्विदं होमकर्म समस्तबाह्यवस्तुनिरपेक्षं चिदात्मके आत्मवह्नौ सकलैर्लौकिकानुभवसंस्काररूपैर्भाववस्तुभिः क्रियमाणमस्ति । अस्मिन् भावाचारस्थलस्य स्तरे सान्तसृष्टिसीमानम् अतीत्य स्थितः परकाययोगी शिवाभिन्नस्वात्मनि चिद्रूपाग्निं परिभाव्य तत्र सर्व लौकिकसंस्काररूपान् भावान् समर्पयति । इदं च सात्त्विकं होमकर्माऽतीव पवित्रम् ॥७२॥

भावयेत्सर्वकर्माणि नित्यनैमित्तिकानि च ।
शिवप्रीतिकराण्येव सङ्गराहित्यसिद्धये ॥७३॥

व्याख्या – कुवन्नेव हि कर्माणि कथं तत्सङ्गराहित्यं साधनीयमित्यत्राह – **भावयेद् इति । सङ्गराहित्यसिद्धये** रहितस्य भावः राहित्यम्,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सङ्गस्य राहित्यं सङ्गराहित्यं संसारबन्धराहित्यं, तस्य सिद्धिः, तस्यै, संसारबन्धनिवृत्त्यर्थम् इत्यर्थः, **नित्यनैमित्तिकानि च** नित्यकर्माणि नैमित्तिककर्माणि च, एवं **सर्वकर्माणि** सकलकर्माणि **शिवप्रीतिकराणि एव** शिवानुग्रहप्राप्तिसाधनानि इत्येव **भावयेत्** सम्यग् विचारयेत् ॥ अत्रेदम् अनुसन्धेयम् । सर्वकर्मणां परित्यागः सर्वथाऽसंभवः । "कुर्वन्नेव हि कर्माणि जिजीविषेत् शतं समाः" (ई. उ., २) इति श्रुत्युक्तदिशा यावज्जीवं कर्मत्यागो नैव शक्यते । कर्मत्यागस्य दुष्करत्वेऽपि कर्मफलत्यागस्य सुकरत्वमेव । कर्मफलानासक्ततया कर्म क्रियते चेत् कर्मसङ्ग एव न जायते । अतोऽसक्त एव कर्म करणीयम् । 'सर्वकर्माणि शिवप्रीतिकराण्येव' इत्यनेन तदेवाऽभिप्रेतम् । सर्वकर्माणि यदा फलत्यागबुद्ध्या क्रियन्ते तर्हि तानि शिवप्रीतिकराणि भवन्ति । तथा कर्म कुर्वन् योगी सर्वदा कर्मणा न लिप्यते । तदा विषदन्तरहितसर्पवत् कर्माण्यनपायीनि भवन्ति ॥७३॥

शिवे निवेश्य सकलं कार्याकार्यं विवेकतः ।
वर्तते यो महाभागः स सङ्गरहितो भवेत् ॥७४॥

व्याख्या – कर्मणां सङ्गरहितं कथम् इत्यत्राह – **शिवे** इति । यः यः योगी **महाभागः** महाशयः **विवेकतः** स्वविवेचनतः **सकलं** सर्वं **कार्याकार्यं** कार्यं वा अकार्यं वा **शिवे** परशिवे **निवेश्य** विन्यस्य **वर्तते** तिष्ठति **स** तादृशः महाशयः **सङ्गरहितः** लौकिकसम्बन्धरहितः **भवेत्** स्यात् ॥ उक्तं भगवता – "ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ॥" (भ. गी., ५.१०-१२) इति । इदं सङ्गराहित्यमेव भावाचारस्याऽऽधारः ॥७४॥

आत्मानमखिलं वस्तु शिवमानन्दचिन्मयम् ।
एकभावेन सततं संपश्यन्नेव पश्यति ॥७५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— सङ्गराहित्यं शिवदर्शने पर्यवस्यतीत्याह— **आत्मानम् इति।** **आत्मानं** स्वात्मानम् **अखिलं वस्तु** विश्वस्य चराचरात्मकं सर्वं पदार्थजातं **शिवानन्दचिन्मयं** शिवज्ञानानन्दमयं च **सततं** निरन्तरं **एकभावेन** एकात्मतास्वरूपेण **पश्यन् एव** परिभावयन् एव सः परयोगी **पश्यति** परमात्मानं परशिवं साक्षात्करोति ॥ शिवस्वरूपभूतचिदानन्दे स्वात्मानं स्वानुभवाधिष्ठानभूतं सर्वं विश्वं चैक्यानुसन्धानेन सम्यक् पश्यन् सर्वत्र शिवमेव पश्यति । आदौ जीवात्मा, जगत्, परमात्मा च परशिवब्रह्मणः त्रैविध्यम् । तदुक्तम् – "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ।" (श्वे. उ., १.१२) इति । (सि. शि., ५.३८ – अत्रापि अयमेव विचारः प्रस्तुतः) । यद्यपि त्रयमपि एकमेव तथापि जगद्व्यापारनिमित्तं "तदैक्षत बहुस्यां प्रजायेय" (छां. उ., ६.२.३) इत्युक्तदिशा एकं त्रिधा जातम् । इयं परशिवस्य वैश्वलीला । शिवयोगी त्वेतद्रहस्यं जानन् जगदिदं परशिवादभिन्नं स्वात्मापि शिवादभिन्नः इति साक्षात्कृतवान् । अयमेव आत्मसाक्षात्कारः । "सर्वं खल्विदं ब्रह्म" (छां. उ., ३.१४.१) इत्युक्तरीत्या सर्वं शिवमयमिति दृढं विचारयति । इयमेव "शिवदृष्टिः" या भावाचारस्य अधिष्ठानम् । इयमेव जीवन्मुक्तावस्था यस्यामत्यखण्डशान्तेः, अनन्तानन्दस्य च साम्राज्यम् ॥७५॥

– इति भावाचारस्थलम् –

९. अथ ज्ञानाचारस्थलम् – (६२)

अस्य ज्ञानसमाचारो योगिनः सर्वदेहिनाम् ।
ज्ञानाचारो यदुक्तोऽयं ज्ञानाचारः स कथ्यते ॥७६॥

व्याख्या – भावाचारसम्पन्नस्य ज्ञानाचारमाह – **अस्येति । अस्य योगिनः** अस्य भावाचारसम्पन्नस्य परयोगिनः **ज्ञानसमाचारः** ज्ञानेन युक्तः सम्यग् आचारः एव, **सर्वदेहिनां** सकलानां शरीरिणां **ज्ञानाचारः** ज्ञानाचारसंहिता इति **यद् उक्तः** यस्मात् कारणात् कथितः, तस्मात् कारणात् **सः सोऽयं ज्ञानाचारः** ज्ञानाचारः इति **कथ्यते** उच्यते ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अयमाचारः शिवज्ञानम् आधरते इति ज्ञानाचार इति कथ्यते। अयं च ज्ञानाचारः परयोगिन्यप्रयत्नसिद्धः। "सत्यं ज्ञानमनन्तं ब्रह्म" (तै. उ., २.१.१) इति परमात्मनः ज्ञानं ज्ञानाचारस्य मूलम्। अयं ज्ञानाचारो न केवलं साक्षात्कारः परयोगिनः, परं तु तस्य निजस्थितिः। शिवज्ञानं नाम शिवाद्वयज्ञानम् ॥७६॥

शिवाद्वैतपरं ज्ञानं ज्ञानमित्युच्यते बुधैः।
सिद्धेन वाप्यसिद्धेन फलं ज्ञानान्तरेण किम् ॥७७॥

व्याख्या – उक्तमेव विशदयति – **शिवाद्वैतपरम्** इति। **शिवाद्वैतपरं** शिवाद्वैतविषयकं **ज्ञानं** प्रबोधं **बुधैः** ज्ञानिभिः **ज्ञानम्** इति सम्यङ्ज्ञानम् इति **उच्यते** कथ्यते। इदं विहाय **सिद्धेन** प्राप्तेन **असिद्धेन वा** अप्राप्तेन वा **ज्ञानान्तरेण** अन्यं ज्ञानं ज्ञानान्तरम्, तेन, किं **फलम्**? किं प्रयोजनम्? न किमपि प्रयोजनम् इत्यर्थः॥ सिद्धे स्वात्माभिन्नपरशिवज्ञाने परमार्थे, प्राप्तेनाऽप्राप्तेन वा ज्ञानान्तरेण परयोगिनो न किमपि प्रयोजनम्। परमार्थे शिवाद्वैतज्ञाने जाते तद्रूपपोतेन साधकः संसारसागरं समुत्तरति। अन्यत् सर्वं ज्ञानं जीवनमार्गे क्षेमेण यशस्वितया च साधकं नीयेत। परं तु तस्य व्याप्तिः केवलं लौकिकजीवनपर्यन्तम्, न तु तदतीतम्। (पश्यत – सि. शि., १४.११) ॥७७॥

निर्मलं हि शिवज्ञानं निःश्रेयसकरं परम्।
रागद्वेषादिकलुषं भूयः संसृतिकारणम् ॥७८॥

व्याख्या – पूर्वोक्तं समर्थयति – **निर्मलम्** इति। **निर्मलं** परिशुद्धं अणवादिमलरूपकालुष्यविमुक्तं, **परं शिवज्ञानं** परमार्थभूतं स्वाभिन्न-शिवाद्वैतज्ञानं, **निःश्रेयसकरं हि** निश्चितं श्रेयः निःश्रेयः, 'अच्' प्रत्ययेन निपातितः (पा.अ. ५.४.७७), निःश्रेयसं करोति इति निःश्रेयसकरम्, मुक्तिप्रदं इत्यर्थः। **रागद्वेषादिकलुषं** रागद्वेषादिभिः कलुषं दोषयुक्तम्, ज्ञानम् इत्यर्थः, तत् **भूयः** पुनः पुनः **संसृतिकारणं** जननमरणचक्रात्मकस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संसारस्य कारणं हेतुः ॥ (मलत्रयविषयः सि. शि., ६.१४ तमश्लोकस्य व्याख्यायां द्रष्टव्यः) । यावत्पर्यन्तं द्वैतम् अनुवर्तते तावत्पर्यन्तम् अहं-ममकारेण त्वंतवकारेण वा तन्मिश्रीभूयेष्टे वस्तुनि सङ्गम् अप्रिये वस्तुनि हेयभावं च जनयति । अद्वैतज्ञानं तु तारकत्वेन साधकं मुक्तिभाजनं करोति ॥७८॥

परिपूर्णं महाज्ञानं परतत्त्वप्रकाशकम् ।
अवलम्ब्य प्रवृत्तो यो ज्ञानाचारः स उच्यते ॥७९॥

व्याख्या – ज्ञानस्वरूपं तु पूर्वमुक्तम्, तदाचारः कीदृश इत्यत्राह – **परिपूर्णम् इति । परतत्त्वप्रकाशकं** परशिवतत्त्वस्य प्रकाशकम्, प्रकाशतां नीयमानं **परिपूर्णं** परिच्छेदरहितम्, अखण्डम् इत्यर्थः, **महाज्ञानं** शिवाद्वैतात्मकं महाज्ञानम् **अवलम्ब्य** आश्रित्य **यः** यः आचारः **प्रवृत्तः** प्रवर्तते **स ज्ञानाचारः** सः ज्ञानाचारः इति **उच्यते** कथ्यते ॥ महाज्ञानं नाम शिवाद्वैतज्ञानं, तस्यैव परमोत्कृष्टत्वात् परमार्थत्वाच्च । तस्य वैशिष्ट्यं द्विधा वर्णितं परतत्त्वप्रकाशकमिति परिपूर्णमिति च । परशिवात्मकं परमतत्त्वं प्रकाशयति इति परतत्त्वप्रकाशकम् । परिपूर्णत्वं तु समुद्रवत् । समुद्रः स्वयमेव स्वात्मन्येव परिपूर्णः । बाह्यजलप्रवेशेन नाधिको जायते । निजजलनिर्गमनेव नापि न्यूनो भवति । ''पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥'' (ई. उ., शान्तिमन्त्रः) इति श्रुतिः । एतज्ज्ञानावलम्बी आचारः सर्वेषां कृते ज्ञानाचारः ॥७९॥

निर्विकल्पे परे धाम्नि निष्कले शिवनामनि ।
ज्ञानेन योजयेत् सर्वं ज्ञानाचारी प्रकीर्तितः ॥८०॥

व्याख्या – ज्ञानाचारिणः स्वरूपमाह – **निर्विकल्पे इति । निर्विकल्पे** भेदरहिते **निष्कले** निरवयवे **शिवनामनि** परशिवब्रह्माभिधानयुक्ते **परे धाम्नि** परशिवात्मके अधिष्ठाने **सर्वं** चराचरात्मकं विश्वजालं **ज्ञानेन** अभेदज्ञानद्वारा **योजयेत्** यः विलयेत् सः **ज्ञानाचारी** ज्ञानाचारवान् इति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रकीर्तितः वर्णितः ॥ जगदिदं सर्वं द्वैतभावेन, भेदजातेन, तरतमभावेन च व्याप्तम् । परमतत्त्वमेव केवलम् अद्वैतम्, भेदरहितम् निरवयवं च । जगदिदं पुनर्देशकालवस्तुपरिच्छेदैर्नियन्त्रितम् । परिपूर्णं परतत्त्वं तु सर्वदाऽखण्डमेव । ज्ञानमिदं महाज्ञानं, तेन चराचरात्मकं सर्वं यः परवस्तुनि योजयति स ज्ञानाचारीति कथ्यते ॥८०॥

ज्ञानं मुक्तिप्रदं प्राप्य गुरुदृष्टिप्रसादतः ।
कः कुर्यात् कर्मकार्पण्ये वाञ्छां संसारवर्धने ॥८१॥

व्याख्या – ज्ञानाचारसम्पन्नस्य कर्मकार्पण्यं नास्तीत्याह – **ज्ञानम्** इति । **मुक्तिप्रदं** मुक्तिं प्रददति इति मुक्तिप्रदम्, तत्, मोक्षप्रापकं **ज्ञानं** शिवाद्वैतज्ञानं **गुरुदृष्टिप्रसादतः** गुरोःदृष्टिः गुरुदृष्टिः गुरुकृपादृष्टिः, तस्याः प्रसादतः तदनुग्रहवशात् **प्राप्य** लब्ध्वा **संसारवर्धने** संसारदैर्घ्यनिमित्तभूते **कर्मकार्पण्ये** कृपणस्य भावः कार्पण्यम्, कर्मणः कार्पण्यम्, तस्मिन्, कर्मणः हेयफले **वाञ्छाम्** इच्छां **कः** कः ज्ञानी **कुर्यात्** विदध्यात् ? न कोऽपि कुर्याद् इत्यर्थः ॥ "ज्ञानादेव तु कैवल्यम्" इति प्राचुर्येण श्रूयते । शास्त्राध्ययनेन मुक्तिकाङ्क्षी साधकः तज्ज्ञानं प्राप्येत । परन्तु तत्साक्षात्काराय निजज्ञानत्वेन तत्सम्पादनाय च गुरुकृपादृष्टिप्रसादो नितराम् अपेक्षितः । अन्यथा तदध्यात्मरहस्यं ज्ञातुं न शक्यते । तद्रहस्यम् आह – "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥" (कठ.उ., २.१२) इति । अध्यात्मयोगाधिगमस्तु गुरुकारुण्यादेव । कर्मफलभूतावुभावपि हर्षशोकौ बन्धकारणभूतौ ॥ गुरुकृपादृष्टिवशाद् अध्यात्मयोगाधिगमेन मुक्तिप्रदं ज्ञानं साक्षात्कृत्वा सर्वात्मना लौकिककर्मफलरूपबन्धनाद् विमुक्तो भवति ॥८१॥

कर्म ज्ञानाग्निना दग्धं न प्ररोहेत् कथञ्चन ।
यदाहुः संसृतेर्मूलं प्रवाहानुगतं बुधाः ॥८२॥

व्याख्या – ज्ञानाचारिणः कर्म ज्ञानाग्निना दग्धं पुनर्न प्ररोहतीत्याह – **कर्मेति** । **यद् बुधाः** यत्कर्म ज्ञानिनः **संसृतेः मूलं** संसारस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मूलकारणं सत् **प्रवाहानुगतं** जलप्रवाहन्यायेन आदिरहितत्वेन **श्रुतेः** अनुगतं श्रुत्यनुसारम् **आहुः** ब्रुवते, तत्कर्म **ज्ञानाग्निना** ज्ञानस्वरूपवह्निना **दग्धं** संप्लुष्टं सत् **कथञ्चन** कथमपि **न प्ररोहेत्** न अङ्कुरेत् ॥ कर्मजातं तावत् संसारस्य मूलकारणम् । उक्तमेव पूर्वम् – "चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः । जात्यायुर्भोगवैषम्यकारणं कर्म केवलम् ॥" (सि. शि., ५.४९) इति । संसारो नाम भ्रमणशीलं जननमरणचक्रम् । 'चक्रनेमि-क्रमेण' इत्यर्थवत्त्वं संसारचक्रप्रवर्तनस्य । दग्धे तादृशे बीजभूते कर्मणि ज्ञानवह्निना संसारचक्रप्रवर्तनं निरुद्धं भवति, पुनस्तस्य प्ररोहस्य नास्ति संभावनापि । अस्यां स्थितौ शिवयोगी कर्तृत्वभावनया नैव नियन्त्रितः । तस्य पुनर्जन्म सर्वथा नास्ति ॥८२॥

ज्ञानेन हीनः पुरुषः कर्मणा बद्ध्यते सदा ।
ज्ञानिनः कर्मसङ्कल्पा भवन्ति किल निष्फलाः ॥८३॥

व्याख्या – ज्ञानहीनस्य कर्मबन्धनम् इत्याह – ज्ञानेनेति । **ज्ञानेन हीनः** ज्ञानरहितः, शिवाद्वैतज्ञानसाक्षात्काररहितः **पुरुषः** साधकः **कर्मणा** कर्मजातेन **सदा** सर्वदा **बद्ध्यते** बद्धः भवति । **ज्ञानिनः** ज्ञानयुक्तस्य योगिनः **कर्मसङ्कल्पाः** कर्म करणीयम् इत्येवंरूपाः विचाराः **निष्फलाः** फलरहिताः **भवन्ति** जायन्ते, **किल** ननु तथा ज्ञायते इत्यर्थः ॥ सम्यज्ज्ञान-सहिताः पुरुषाः कर्मपाशवशा भवन्ति, ज्ञानिनस्तु कर्मपाशमुक्ता इत्यर्थः । पद्मपत्रन्यायेन इदं विव्रियते । तथा हि – "यथा पुष्करपलाश आपः न श्लिष्यन्ते, एवमेवंविदि पापकर्म न श्लिष्यते ॥" (छां.उ.,४.१४.३) इति । यथा कमलपत्रे जलं न श्लिष्यति, एवमेव ज्ञानिनि पापकर्मफलं न श्लिष्यति इत्यर्थः ॥८३॥

शुद्धाचारे शुद्धभावो विवेकी
ज्योतिः पश्यन् सर्वतश्चैवमेकम् ।
ज्ञानध्वस्तप्राकृतात्मप्रपञ्चो
जीवन्मुक्तश्चेष्टते दिव्ययोगी ॥८४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादिसारभूते श्रीसिद्धान्तशिखामणौ माहेश्वरस्थलान्तर्गत-नवविधलिङ्गस्थलप्रसङ्गो नाम षोडशः परिच्छेदः समाप्तः ॥१६॥

व्याख्या – ज्ञानाचारस्थलं समापयति – **शुद्धाचारे इति । शुद्धाचारे** निर्मले ज्ञानाचारे **शुद्धभावः** शुद्धाः भावाः यस्य सः, परिशुद्धभाववान् **विवेकी** कार्याकार्यविचक्षणः **एवं** अनया रीत्या **सर्वतः** समन्ततः **एकं** एकम् अद्वितीयं **ज्योतिः** शैवं तेजः **पश्यन्** अवलोकयन्, **दिव्ययोगी** स्वयं-प्रकाशवान् शिवयोगी **ज्ञानध्वस्तप्राकृतात्मप्रपञ्चः** ज्ञानं शिवाद्वैतज्ञानम्, प्राकृतात्मा प्राकृतदेहवानात्मा, तस्य प्रपञ्चः, प्राकृतात्मप्रपञ्चः, ज्ञानेन ध्वस्तः विनाशितः प्राकृतात्मप्रपञ्चः यस्य सः, तादृशः सन् **जीवन्मुक्तः** सदेहमुक्तिभाजनः **चेष्टते** व्यवहरति ॥ माहेश्वरस्थलाश्रितनवलिङ्गस्थल-निरूपके षोडशपरिच्छेदेऽस्मिन् परिशुद्धाचारभावज्ञानानां समन्वयं साधयति ग्रन्थकृत् । परिशुद्धाचारास्तु ते ये लौकिकफलापेक्षारहिताः । परिशुद्ध-भावास्तु ते ये कार्याचरणे अहंममकाररहिताः । परिशुद्धज्ञानं च तद् यच्छिवाद्वैतपरं भवति । तादृशसमन्वययुक्तः शिवयोगी सर्वत्र सर्वदा शिवतेज एव परामृशति । तेन सर्वभेदज्ञानस्य निष्कासनं भवति । स योगी जीवन्मुक्तः सन् लोके सञ्चरन्नपि कर्मपाशैर्न कदापि बद्धः ॥ शालिनी-वृत्तम् । तल्लक्षणम्– "मात्तौगौ चेच्छालिनी वेदलोकैः" (आप्टे, पृ.६५१)– मगण (–––), तगण (––U), तगण (––U), ग ग (––) ॥८४॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना
डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां
श्रीशिवयोगिशिवाचार्यकृतश्रीसिद्धान्तशिखामणेः
शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
षोडशः परिच्छेदः समाप्तः ॥१६॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सप्तदशः परिच्छेदः

प्रसादिस्थलान्तर्गतनवविधलिङ्गस्थलप्रसङ्गः

अथागस्त्यप्रश्नः । अगस्त्य उवाच—

स्थलानि तानि चोक्तानि यानि माहेश्वरस्थले ।
वदस्व स्थलभेदं मे प्रसादिस्थलसंश्रितम् ॥१॥

व्याख्या— प्रसादिस्थलान्तर्गतं स्थलभेदं कथय इति श्रीरेणुकं प्रार्थयते— स्थलानि इति । यानि माहेश्वरस्थले यानि माहेश्वरस्थलान्तर्गतत्वेन स्थलानि नवविधलिङ्गस्थलानि सन्ति तानि उक्तानि च तानि कथितानि । प्रसादिस्थलसंश्रितं प्रसादिस्थलान्तर्गतं स्थलभेदं लिङ्गस्थलभेदं वदस्व कथय ॥१॥

श्रीरेणुक उवाच—

स्थलभेदा नव प्रोक्ताः प्रसादिस्थलसंश्रिताः ।
कायानुग्रहणं पूर्वमिन्द्रियानुग्रहं ततः ॥२॥

प्राणानुग्रहणं पश्चात् ततः कायार्पितं मतम् ।
करणार्पितमाख्यातं ततो भावार्पितं मतम् ॥३॥

शिष्यस्थलं ततः प्रोक्तं शुश्रूषुस्थलमेव च ।
ततः सेव्यस्थलं चैषां क्रमशः शृणु लक्षणम् ॥४॥

व्याख्या— श्रीरेणुकेन प्रसादिस्थलान्तर्गतानि नवविधस्थलानि क्रमशः उद्दिष्टानि । तथा हि— १. कायानुग्रहस्थलम्, २. इन्द्रियानुग्रहस्थलम्,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

३. प्राणानुग्रहस्थलम्, ४. कायार्पितस्थलम्, ५. करणार्पितस्थलम्, ६. भावार्पितस्थलम्, ७. शिष्यस्थलम्, ८. शुश्रूषुस्थलम्, ९. सेव्यस्थलं चेति नव स्थलानि । **क्रमशः** क्रमेण **एषां** एतेषां **लक्षणं** स्वरूपं **शृणु** आकर्णय ॥ प्रसादिस्थलान्तर्गतानां नवविधलिङ्गस्थलानामवधौ परमशिवयोगी सर्वव्यापकं शिवमयत्वम् अनुभवविषयीकुर्वन् सर्वत्र शिवमेव पश्यति— सर्वं शिवमयं चिद्विलासम् । अनेन शिवमयचिद्विलासेन व्याप्तं परयोगिनो मनः । बाह्येऽपि सर्वत्र स तदेव परिभावयति । इयमेव प्रसादिस्थलसम्बद्धाऽवधानभक्तिर्यया परयोगी स्वयं स्वात्मानं शिवलिङ्गत्वेन पश्यति । ये ये चेष्टाविशेषास्तेन प्रदर्शिता ये ये च कर्मविशेषास्तेन क्रियमाणाः, ते ते सर्वे शिवलिङ्गचिद्विलासाः । सशरीरेन्द्रियमनोहृदयचिन्तनभावमात्मानं शिवलिङ्गे समर्पितवतस्तस्य प्रत्येकभूतम् अस्तित्वमेव नास्ति । तस्य शरीरेन्द्रियमनोभावादयः सर्वे परिशुद्धाः सन्तोऽन्येषाम् अनुग्रहाय कल्पन्ते ॥२-४॥

१. अथ कायानुग्रहस्थलम् – (६३)

अनुगृáाति यल्लोकान् स्वकायं दर्शयन्नसौ ।
तस्मादेष समाख्यातः कायानुग्रहनामकः ॥५॥

व्याख्या— ज्ञानाचारवान् शिवयोगी कायानुग्राहको भवतीत्याह— **अनुगृáातीति । असौ** ज्ञानाचारसम्पन्नः शिवयोगी **यद्** यस्मात् कारणात् **स्वकायं** स्वशरीरं **दर्शयन्** प्रकटयन् **लोकान्** सर्वान् जनान् **अनुगृáाति** अनुग्रहेण प्रसादयति **तस्मात्** तस्मात् कारणात् **एषः** शिवयोगी **कायानुग्रहनामकः** कायेन अनुग्रहः यस्य सः कायानुग्रहः, तन्नामकः कायानुग्रहनामकः **समाख्यातः** कथितः ॥ तस्य स्वरूपमुक्तम्— "विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः । अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् । अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥" (कै. उ., ५) इति । शिवाद्वैतज्ञानसाकाररूपः शिवयोगी श्रुत्युक्तस्याऽस्य वर्णनस्य संवादी भवति । शिवयोगी साक्षात् शिव एव ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अतः सोऽपि शिववद् अनुग्रहशक्तिमान् । शिवयोगिनः कायदर्शनेन सर्वे जना अनुगृहीता भवन्तीति स एव कायानुग्रह इत्युच्यते ॥५॥

यथा शिवोऽनुगृह्णाति मूर्तिमाविश्य देहिनः ।
तथा योगी शरीरस्थः सर्वानुग्राहको भवेत् ॥६॥

व्याख्या— कथम् अनुगृह्णातीत्यत्राह— **यथेति । यथा** येन प्रकारेण **मूर्तिमाविश्य** चन्द्रशेखरादिलक्षणयुक्तां मूर्तिम् आविश्य प्रविश्य **देहिनः** जीविनः **अनुगृह्णाति** अनुग्रहं करोति, **तथा** तेनैव प्रकारेण **योगी** ज्ञानाचारयोगी **शरिरस्थः** शरीरे तिष्ठति इति शरीरस्थः, तथा सन्, **सर्वानुग्राहकः** सर्वेषाम् अनुग्राहको **भवेत्** स्यात् ॥ शिवयोगी प्रत्यक्षं शिव एव । शिवसाकारत्वात् शिवयोगी सर्वजीविनाम् अनुग्रहसमर्थः । शिवस्य मूर्तयो लिङ्गम्, चन्द्रशेखरः, नटराजः, इत्याद्यनेकप्रकाराः । ता मूर्तीः प्रविश्य परशिवो लोकान् अनुगृह्णाति । तथैव शिवयोगी स्वकायेन सर्वान् अनुगृह्णाति । शिवस्य मूर्तयः चन्द्रशेखराद्यः प्रतिष्ठासमये पञ्चामृताद्यभिषेकैः प्राणप्रतिष्ठापनेन च पावित्र्यं भजन्ते, अनुग्रहशक्तिं च प्राप्नुवन्ति । शिवयोग्यप्यादौ शिवदीक्षासंस्कारेण पश्चात् बाह्याभ्यन्तरलिङ्गत्रयसमन्वयपूजनेनाऽन्ते च शिवाद्वैतज्ञानसाक्षात्कारेणाऽनुग्रहशक्तिं सम्पादयति लोकान् तयाऽनुगृह्णाति च । शिवयोगिनः शरीरं तु शरीरधर्मेण रहितं शरीरम् । यथा शिवो मूर्तीः प्रविश्य मूर्तिभिरेवाऽनियन्त्रितः, तथा शिवयोगी देहेनाऽनियन्त्रितः । तादृशो ज्ञानाचारयोगी स्वदेहेन सर्वानुग्राहकः ॥६॥

शिवः शरीरयोगेऽपि यथा सङ्गविवर्जितः ।
तथा योगी शरीरस्थो निःसङ्गो वर्तते सदा ॥७॥

व्याख्या— शिवयोगी शिववदसङ्गः इत्याह— **शिवेति । यथा** येन प्रकारेण **शिवः** परशिवः **शरीरयोगे अपि** चन्द्रशेखरादिमूर्तिरूपदेहसम्बन्धेऽपि, **सङ्गविवर्जितः** सङ्गरहितः, **तथा** तेनैव प्रकारेण **योगी** शिवयोगी

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शरीरस्थः शरीरे तिष्ठन्नपि **सदा** सर्वदा **निःसङ्गः** सुखदुःखादिसंपर्करहितो **वर्तते** भवति ॥ यथा शिवः सच्चिदानन्दस्वरूपः, तथा शिवयोगी तदद्वैत-योगेन सच्चिदानन्दस्वरूप एव । उभयोरपि दुःखसङ्गस्य कथैव नास्ति । शिवयोगी लौकिकसुखमनपेक्ष्य शिवानन्दमेवाऽनुभवति ॥७॥

शिवभावनया युक्तः स्थिरया निर्विकल्पया ।
शिवो भवति निर्धूतमायावेशपरिप्लवः ॥८॥

व्याख्या— शिवयोगिनो मायादर्शनं नास्तीत्याह— **शिवभावनयेति** । **स्थिरया** दृढया **निर्विकल्पया** भेदरहितया **शिवभावनया** शिवोऽहं-भावनया **युक्तः** समाविष्टः शिवयोगी **निर्धूतमायावेशपरिप्लवः** मायाया आवेशो मायावेशो मायासमावेशः, स एव परिप्लवः प्रवाहः माया-वेशपरिप्लवः, निर्धूतो निरस्तो मायावेशपरिप्लवो यस्मात् सः, तादृशः सन् **शिवः भवति** शिव एव भवति ॥ शिवभावना नाम शिवोऽहंभावना । अहंभावेन युक्तो मनुष्यः संसारपाशबद्धः सन् दुःखम् अनुभवति । यदा स सोऽहंभावेन युक्तो भवति तदा संसारपाशैर्मुक्तो भवति । सोऽहंभावनया युक्तस्य शिवयोगिनः कुतो मायाप्रभावः ? सर्वथा नास्ति इत्यर्थः । शिवभावनया परिपूर्णे शिवयोगिनि कथं वा भवेत् प्रवेशो मायायाः ? कथमपि न भवति निरवकाशत्वात् ॥८॥

चित्तवृत्तिषु लीनासु शिवे चित्सुखसागरे ।
अविद्याकल्पितं वस्तु नान्यत् पश्यति संयमी ॥९॥

व्याख्या— परयोगी अविद्याजातं किमपि न पश्यतीत्याह— **चित्त-वृत्तिष्विति** । **चित्सुखसागरे** चिदानन्दसमुद्रे **शिवे** परशिवे, **चित्तवृत्तिषु लीनासु** सतीषु मनोव्यापारेषु लयं गतेषु सत्सु **संयमी** शिवयोगी **अविद्याकल्पितं** अविद्यया कल्पितम् अविद्याकल्पितं मायापरिकल्पितम् **अन्यद् वस्तु** वस्त्वन्तरं **न पश्यति** न विलोकयति ॥ शिवयोगी शिवे लीनः, अर्थात्, चिदानन्दसमुद्रे लीनः । सर्वास्तस्य चित्तवृत्तयो यदा तस्मिन् समुद्रे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लीना भवन्ति तदा मायाकल्पितं किमपि न तस्य दृष्टिपथम् आयाति । तदेव परिपूर्णम् एकत्वम् । तस्मिन् अखण्डैकत्वे स्थितस्य योगिनः स्वरूपमाह भगवती श्रुतिः— "ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥" (मुं. उ., २.२.११) इति । शिवयोगिनः सर्वत्र शिव एव दृश्यते, न पुनः भेदजातं वैविध्यमयं च जगत् ॥९॥

नेदं रजतमित्युक्ते यथा शुक्तिः प्रकाशते ।
नेदं जगदिति ज्ञाते शिवतत्त्वं प्रकाशते ॥१०॥

व्याख्या— पूर्वोक्तं सदृष्टान्तं विशदयति— **नेदम् इति । यथा** येन प्रकारेण **न इदं रजतं** इदं पुरतो विद्यमानं वस्तु न रजतम् **इत्युक्ते** इति कथिते **शुक्तिः** शुक्तिमात्रं **प्रकाशते** दृश्यते, तथा, **न इदं जगद् इति** नैतद् विश्वम् इति **ज्ञाते** अवगते **शिवतत्त्वं प्रकाशते** शिवाद्वैततत्त्वमात्रं प्रकाशतां नीयते ॥ अत्र 'शुक्तिरजतन्यायः' दृष्टान्तत्त्वेन स्वीकृतः । प्रकाशमाने सूर्ये स्फुरद्वस्तु रजतमिति पूर्वं भ्रमितं पश्चात् शुक्तिरियम् नेदं रजतमिति अवगम्यते । तदा तद्वस्तु शुक्तिरिति ज्ञानमात्रं प्रकाशते । यावत्पर्यन्तं पुरुषः संसारसागरे निमग्नस्तावत्पर्यन्तं सो भेदजातं प्रपञ्चमेव पश्यति । यदा नेदं विश्वं, नेदं मदीयम् इति ज्ञाते शिवाद्वैततत्त्वमात्रं प्रकाशते । शिवयोगिदृष्ट्या भेदजातं जगत् न दृश्यते । अन्येषां कृते तु भेदजातं जगद् अस्त्येव । अत्र नास्त्यध्यासलेशोऽपि । एकस्मिन् वस्तुनि तन्मयीभूतस्यान्यं वस्तु तत्र विद्यमानमपि न दृश्यते । एवं शिवोऽहं-भावरूपे शिवतत्त्वे विलीनमनसः शिवयोगिनो भेदजातं जगदिदं न दृश्यते ॥१०॥

यथा स्वप्नकृतं वस्तु प्रबोधेनैव शाम्यति ।
तथा शिवस्य विज्ञाने संसारं नैव पश्यति ॥११॥

व्याख्या— दृष्टान्तान्तरम् आह— **यथेति । यथा** येन प्रकारेण **स्वप्नकृतं** स्वप्ने रचितं **वस्तु प्रबोधेन एव** जागरणमात्रेण **शाम्यति** अदृश्यं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवति, **तथा** तेनैव प्रकारेण **शिवस्य विज्ञाने** शिवोऽहंभावरूपविशेषज्ञाने जाते, शिवयोगी **संसारं** जननमरणचक्ररूपां संसृतिं **न एव पश्यति** न खलु अवलोकयति ॥ स्वप्नदृश्यं लौकिकजीवनस्य दृष्टान्ततया ग्राह्यम् । एवं जाग्रदवस्था चाऽध्यात्मजागृतिं सूचयति । स्वाप्निकानुभवाः प्रबोधेऽदृश्यतां गच्छन्ति । तानि स्वाप्नदृश्यानीत्येव प्रबुद्धो जानाति । एवमेव शिवोऽहंभावे जागृते सति शिवयोगी सर्वं भेदजातं प्रपञ्चवैविध्यमदृश्यतां गच्छति । केचन विश्वमात्रं पश्यन्ति तदेवालम् अस्माकं जीवनायेति मन्यन्ते । पुनः केचन विश्वजाते जीवन्तोऽस्मादतीतं किञ्चिदन्यदिति मन्वते । अन्ये केचन तद् 'अन्यत् किञ्चित्' शिवतत्त्वमेव तदस्माभिः प्राप्तव्यमिति विचारयन्ति । पुनरन्ये केचन तत्किञ्चित् स्वाभिन्नशिवतत्त्वस्वरूपं साक्षात्कृत्य तद्विहाय न किञ्चिदपि पश्यन्ति । इयमवस्था ज्ञानयोगिनः ॥११॥

अज्ञानमेव सर्वेषां संसारभ्रमकारणम् ।
तन्निवृत्तौ कथं भूयः संसारभ्रमदर्शनम् ॥१२॥

व्याख्या— अज्ञाननिवर्तने संसारदर्शनं नास्तीत्याह— **अज्ञानमिति**। **अज्ञानमेव** विश्वविषयकम् अज्ञानम् एव **सर्वेषां** सकलानां जीवानां **संसारभ्रमकारणं** संसारस्य भ्रमः, तस्य कारणम्, संसाराधिष्ठानभूतस्य जगन्मिथ्यात्वभ्रमस्य हेतुः । **तन्निवृत्तौ** तस्य शिव एव विश्वम् इति ज्ञानोदयेन तदज्ञाननिवर्तने **कथं** केन प्रकारेण **भूयः** पुनरपि **संसारभ्रमदर्शनं** संसारभ्रमस्य दर्शनं स्यात् ? न कथमपि तथा भवतीत्यर्थः ॥ शुक्तिरजतदृष्टान्ते गृहीते वक्तुं शक्यते— यथा शुक्तिरेव रजतम्, शिव एव विश्वम् इति । इदं वीरशैवानां 'जगदिदं सत्यम्' इति मूलभूतसिद्धान्तस्य संवादि भवति । पुरतो विद्यमानं वस्त्वेकम् । पूर्वं तद्वस्तु रजतत्वेन गृहीतं पश्चात्तदेव शुक्तिरिति ज्ञायते । अस्तु नामैक्यारोपः, यदवशिष्यते तत्तु तद्वस्तु, तद्वस्त्वेव सत्यमिति ज्ञानं च । तथैव यज्जगद् इत्युच्यते तत् सत्यमेव । लौकिका विश्वं संसारस्वरूपम् इत्यैक्यानुसन्धानं कुर्वते विश्वसंसारयोर्मध्ये । शिवयोगिनस्तु विश्वं शिवस्वरूपाभिव्यक्ति-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रूपमिति विश्व-शिवयोरैक्यानुसन्धानं मन्वते । सर्वं वस्तुजातं सत्यम् । भ्रमादिषु स्वप्ने वा सत्यमेव वस्तु चित्तस्य पुरतः प्रस्तूयते । यत् वस्तुत्वेन प्रस्तूयते तदसद् इति शङ्करमतम् असमीचीनम् । यद्भवति परमार्थतो वस्तु वा तज्ज्ञानं वा तद् वस्तुस्वरूपं न भजते इति यदुक्तं शङ्कराचार्येण तदप्यसमीचीनम् । यत्र परमात्मजीवात्मानोर्ज्ञानं च वस्तुस्वरूपेण प्रस्तूयते तत्र जीवात्मपरमात्मानौ चेतने वस्तुनी ज्ञानं चाऽजडं वस्तु ॥१२॥

गलिताहङ्कृतिग्रन्थिः क्रीडाकल्पितविग्रहः ।
जीवन्मुक्तश्चरेद्योगी देहिवन्निरुपाधिकः ॥१३॥

व्याख्या— अयं शिवयोगी जीवन्मुक्त इत्युक्ता कायानुग्रहस्थलं समापयति— **गलिताहङ्कृतिग्रन्थिरिति । गलिताहङ्कृतिग्रन्थिः** अहङ्कृतिरेव ग्रन्थिः अहङ्कृतिग्रन्थिः, गलितः अहङ्कृतिग्रन्थिः यस्य सः, निवृत्ताहङ्काररूपग्रन्थिः, **क्रीडाकल्पितविग्रहः** क्रीडया कल्पिताः विग्रहाः येन सः, लीलाधृतशशिचूडाद्विशरीरः, **निरुपाधिकः** उपाधिरहितः, प्रतिवन्धरहितः इत्यर्थः, **जीवन्मुक्तः** सदेहमुक्तः **योगी** शिवयोगी **देहिवत्** देहवान् इव **चरेत्** सञ्चरेत् ॥ जीवन्मुक्तस्थितौ शिवयोगिनो जीवनं क्रीडावद् अवभासते । साहङ्कारं तु जीवनं गम्भीर्यवदिवाऽवभासते, निरहंकारं च तद् बाललीलावद् अवभासते । शिवयोगी तावद् अहङ्कारजनितैरवरोधैर्नितरां निर्मुक्तः । तस्य स्वीये इष्टानिष्टे न स्तः, केनापि स्नेहो द्वेषो वा नास्ति । अजानन्नेव स्वयंस्फूर्ततया सर्वेषां हिताय सुखाय च कार्याणि कुर्वन्नास्ते ॥१३॥

— इति कायानुग्रहस्थलम् —

२. अथ इन्द्रियानुग्रहस्थलम् – (६४)

दर्शनात्परकायस्य करणानां विवेकतः ।
इन्द्रियानुग्रहः प्रोक्तः सर्वेषां तत्त्ववेदिभिः ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— कायानुग्रहकारकस्य शिवयोगिनः इन्द्रियविवेचनमेव सर्वेषां कृते इन्द्रियानुग्रहः इत्याह— **दर्शनाद् इति । परकायस्य** कायानुग्रह-सम्पन्नस्य शिवयोगिनो **दर्शनात्** प्रत्यक्षम् अवलोकनात्, **करणानाम्** इन्द्रियाणां **विवेकतः** विवेचनशक्तिवशात् **सर्वेषां** सकलानां प्राकृतानाम् **इन्द्रियानुग्रहः** करणानुग्रहः इति **तत्त्ववेदिभिः** तत्त्वज्ञानिभिः **प्रोक्तः** उक्तः ॥ इन्द्रियानुग्रहशालिनो महायोगिनः सिद्धिमाह भगवती श्रुतिः— "त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निरुध्य । ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥" (श्वे. उ., २.८) इति । ब्रह्मज्ञानमेवोडुपं येन भयङ्करान् सर्वान् संसारप्रवाहान् समुत्तर्तुं शक्यते । तदर्थं योगी वक्षःकण्ठशिरांस्युन्नतानि यथा भवन्ति तथा शरीरं समं संस्थाप्य योगासनं रचयेत् । यदा शरीरं तथा संस्थाप्यते तदाऽऽ-धार-स्वाधिष्ठान-मणिपूरक-अनाहत-विशुद्ध-आज्ञा-सहस्रारचक्राणि मूलाधार-उपस्थ-नाभि-हृदय-कण्ठ-भ्रूमध्य-ब्रह्मरन्ध्रस्थानेषु क्रमेण भावि-तानि लम्बस्थितौ समं तिष्ठन्ति । तथा चक्राणि स्वस्वस्थानेषु भावितेषु चक्रभेदनेन कैलासस्थानं (सहस्रदलाम्बुजे विमलचन्द्रबिम्बे विद्यमानं सूक्ष्मरन्ध्रं यत्र शम्भुं भावयेत्) प्रापणीयम् । (पश्यत— सि. शि. १२.२५-२७, व्याख्याम्) । हृदयगुहायाम् अङ्गुष्ठमात्रे पुरुषे आत्मनि निहिते मनसि सर्वेन्द्रियाणां सन्निरोधरीत्या तेषां निग्रहणं शिवयोगिनः परमं साधनम् । (पश्यत— "अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति" — कठ.उ.,४.१२; "अङ्गुष्ठमात्रः पुरुषः ज्योतिरिवाधूमकः"— कठ.उ., ४.१३) "यस्तु विज्ञानवान् भवति युक्तेन मनसा सह । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥" (कठ.उ., ४.६) इत्युक्तरीत्या सिद्धेन्द्रिय-निग्रहस्य शिवयोगिनोऽनुग्रहशक्तिर्जागृता भवति । सा चाऽनुग्रहशक्तिः सर्वेषां लौकिकानाम् इन्द्रियानुग्रहाय कल्पते ॥१४॥

इन्द्रियाणां समस्तानां स्वार्थेषु सति सङ्गमे ।
रागो वा जायते द्वेषस्तौ योगी परिवर्जयेत् ॥१५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— योगी रागद्वेषौ जह्याद् इत्याह— **इन्द्रियाणाम् इति । समस्तानां** सर्वेषाम् **इन्द्रियाणां** श्रोत्रादीन्द्रियाणां **स्वार्थेषु** स्वस्वविषयेषु **सङ्गमे सति** सन्निकर्षे जाते सति, **रागो वा** अत्यासक्तिः वा **द्वेषो वा** द्वेषभावो वा **जायते** समुत्पद्यते, **योगी** शिवयोगी **तौ** रागद्वेषौ **परिवर्जयेत्** नितरां निरस्येत् ॥ इन्द्रियाणां सहजप्रवृत्तिस्तु बाह्यमुखी भवति, तथा एव बाह्यप्रवृत्तियुक्तत्वेन भगवान् तानि सृष्टवान् इति कारणात् । अत एव मनुष्यः बहिरङ्गमेव पश्यति नान्तरङ्गम् । केवलं योगविदो ज्ञानिन एव बाह्यं विहायाऽन्तरात्मानमेव पश्यन्ति । तेन ते अमृतत्वं भजन्ते । तदुक्तम्— "पराञ्चि खानि व्यतृणात्स्वयंभूस्तस्मात् पराङ्पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥" (कठ.उ.,२.१) इति । इन्द्रियद्वारा बाह्यविषयसुखस्याऽनुवर्तनं मृत्युपाशबन्धने पर्यवस्यतीति निश्चयेन निरूढबुद्धिः शिवयोगी तद्विहाय शिवेन समरसैक्यं सम्प्राप्य शान्त आस्ते । इन्द्रिय-विषयसन्निकर्षजन्यौ रागद्वेषौ योगिना तेन सर्वथा परित्यजनीयौ । शिवयोगिनो मार्गदर्शने प्रवर्तमानस्य साधकस्य कृतेऽयमेव विधिः ॥१५॥

इन्द्रियाणां बहिर्वृत्तिः प्रपञ्चस्य प्रकाशिनी ।
अन्तः शिवे समावेशो निष्प्रपञ्चस्य कारणम् ॥१६॥

व्याख्या— तस्यैव शिवयोगिन लोकातीतव्यवहारमाह— **इन्द्रियाणाम् इति । इन्द्रियाणां** श्रोत्रादीन्द्रियाणां **बहिर्वृत्तिः** बहिर्मुखवर्तनं **प्रपञ्चस्य** संसारस्य **प्रकाशिनी** आविर्भावकारणम् । रागद्वेषादिना भूयः संसारचक्रे वन्धनम् इत्यर्थः । **अन्तः** आभ्यन्तरे **शिवे** परशिवब्रह्मणि तेषाम् इन्द्रियाणां **समावेशः** अन्तर्भावः **निष्प्रपञ्चस्य** मायाप्रपञ्चनिर्वर्तनस्य **कारणं** हेतुः ॥ इन्द्रियाणां बहिर्मुखप्रवृत्तौ सत्यां प्रपञ्चस्य वैविध्यं दरीदृश्यते प्रापञ्चिक-पाशेन बन्धनेन निरुध्यते मनुष्यः । इदमेव प्रपञ्चस्य प्रकाशनम् । किमत्र क्रियते शिवयोगिनेति चेद् उच्यते— बहिःप्रवृत्तिं निरुध्याऽन्तः परशिव-ब्रह्मणि तेषां विनिवेशनं कृत्वा निष्प्रपञ्चो भवति । कामम् इतरेषां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वेषां प्रपञ्चस्याऽस्तित्वं स्यात्, शिवयोगिनस्तु तन्नास्ति । तादृशयोगिनः सर्वाणीन्द्रियाण्यनुग्रहशक्तिवन्ति भूत्वा सर्वान् जीवान् अनुगृह्णन्ति । इयमेवाऽनुग्रहशक्तिः "परुषम्" इति कथ्यते । नेत्रपरुषम्, श्रोत्रपरुषम्, रसनापरुषम्, घ्राणपरुषम् इत्यादयः शिवयोगिन उच्चोच्चतरसिद्धिप्राप्ति-समर्थानि साधनानि भवन्ति ॥१६॥

क्षणमन्तः शिवं पश्यन् केवलेनैव चेतसा ।
बाह्यार्थानामनुभवं क्षणं कुर्वन् दृगादिभिः ॥१७॥

सर्वेन्द्रियनिरूढोऽपि सर्वेन्द्रियविहीनवान् ।
शिवाहितमना योगी शिवं पश्यति नापरम् ॥१८॥

व्याख्या— पूर्वोक्तायाम् अवस्थायां सत्याम् इदमुच्यते— **क्षणम्** इति । **योगी** शिवयोगी **क्षणं** क्षणमात्रं **केवलेन चेतसा** बाह्येन्द्रियानपेक्षं मनसा **शिवं** परशिवं **पश्यन्** निरीक्षमाणः, **क्षणं** क्षणान्तरं **दृगादिभिः** चक्षुरादीन्द्रियैः **बाह्यार्थानां** बाह्यविषयाणाम् **अनुभवम्** अनुभूतिं **कुर्वन्** क्रियमाणः सन्, **सर्वेन्द्रियनिरूढः अपि** सर्वेन्द्रियसिद्धोऽपि **सर्वेन्द्रिय-विहीनवान्** सर्वेन्द्रियाभाववान् च सन्, **शिवाहितमनाः** शिवे आहितं मनः यस्य सः, शिवे विनिवेशितमनस्कः **शिवं** परशिवं **पश्यति** अवलोकयति, **अपरं न** शिवादन्यं न पश्यति ॥ अत्र कथं शिवयोगी बाह्याभ्यन्तरयोः शिवं पश्यतीति निरूप्यते । आभ्यन्तरे केवलं मन एव ज्ञानकरणम् । नास्ति तत्र बाह्येन्द्रियाणां कचिदपि प्रवृत्तिः । आभ्यन्तरे शिव एव केवलम् । परशिवे स्वात्मनो लोलीभावे, शिवं विना न किञ्चिद् अन्यदस्ति । अत एवोक्तम्— "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन" (कठ. उ., ४.११) इति । इदं चेत् साक्षात्कृतेऽन्तः शिवं विहाय न किञ्चिदस्ति बाह्येऽपि । मनसेदम् अवाप्य परयोगी केवलम् आत्मानम् अन्तर्बहिश्च पश्यति सम्भावयति च विश्वं सर्वं भगवतो बाह्याभिव्यक्तिरिति । इदमेव परशिवस्य बाह्याभ्यन्तर-दर्शनं 'साक्षिदृष्टिः' इति ज्ञायते । अन्तर्मुखमनाः परयोगी स्वीयसाक्षि-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दृष्ट्याऽन्तर्यामिनं पश्यति न तु नामरूपे । अस्य परयोगिनः सर्वेन्द्रियाणि सर्वेषां जीविनां कृतेऽनुग्रहशक्त्याऽनुग्रहं कुर्वन्ति ॥१७-१८॥

न जरा मरणं नास्ति न पिपासा न च क्षुधा ।
शिवाहितेन्द्रियस्यास्य निर्मानस्य महात्मनः ॥१९॥

व्याख्या— परयोगिनो जरामरणादिकं नास्तीत्याह— **नेति । शिवाहितेन्द्रियस्य** शिवे निविष्टेन्द्रियगणस्य **निर्मानस्य** देहाद्यभिमानरहितस्य **अस्य महात्मनः** एतस्य परयोगिनः **न जरा** वार्धक्यं नास्ति, **मरणं नास्ति** मृत्युः न भवति, **पिपासा न** पातुम् इच्छा पिपासा, जलादिपानेच्छा नास्ति **क्षुधा न च** भोजनेच्छापि नास्ति ॥ क्षुत्पिपासे, जरामरणे, सुखदुःखे चाऽहत्य षडूर्मयः । शिवयोगी तु सर्वथा षडूर्मिविमुक्तोऽसाधरणतां भजते । षडूर्मिषु जरामरणे देहधर्मौ, क्षुत्पिपासे प्राणधर्मौ, सुखदुःखे च मनोधर्मौ । तेषां त्वात्मधर्मत्वं न कदापि भवति । प्राकृतास्तु जनाः षडूर्मिजातम् आत्मधर्मत्वेन मन्यमानाः 'वृद्धोऽहम्', 'मरणमुखोऽहम्', 'क्षुधा मां बाधते', 'पिपासितोऽस्मि', 'सुखी अहम्', 'दुःखी अहम्' इत्यादिमिथ्यावादान् कुर्वते । अयम् आत्मानात्मविवेकाभावस्तान् पीडयति ॥ अनितरसाधारणस्याऽस्य परयोगिनः सर्वेन्द्रियाणि सर्वेषां भवन्त्यनुग्राहकाणि ॥१९॥

मनो यत्र प्रवर्तेत तत्र सर्वेन्द्रियस्थितिः ।
शिवे मनसि संलीने क्व चेन्द्रियविचारणा ॥२०॥

यद्यत् पश्यत् दृशा योगी मनसा चिन्तयत्यपि ।
तत्तत् सर्वं शिवाकारं संविद्रूपं प्रकाशते ॥२१॥

व्याख्या— सर्वेन्द्रियव्यापारनिरोधाय मनोनिग्रहं प्राथम्येनाऽपेक्ष्यते इत्याह— **मन इति । यत्र** यस्मिन् **मनः** चित्तं **प्रवर्तेत** प्रवर्तते चेत् तर्हि **तत्र** तस्मिन् **सर्वेन्द्रियस्थितिः** सर्वेन्द्रियाणां प्रवृत्तिर्भवति । **शिवे मनसि**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संलीने परशिवे मनसि लयं गते सति, **इन्द्रियविचारणा** इन्द्रियाणां प्रवर्तनं **क्व** कुत्र भवितुम् अर्हति ? न कुत्रापि इत्यर्थः ॥ **यद्यत्** यत् किमपि वस्तु **दृशा** – दृगादीन्द्रियेण **पश्यन्** प्रत्यक्षविषयीकुर्वन् **योगी** शिवयोगी **मनसा** चित्तेन **चिन्तयति अपि** विचारयत्यपि, **तत्तत् सर्वं** तत्तत् समग्रं **संविद्रूपं** चिद्रूपं सत् **शिवाकारं** शिवस्वरूपं **प्रकाशते** विराजते ॥ यद्यपि दशेन्द्रियेभ्यः साकं मनसोऽपीन्द्रियत्वम् उच्यते तथापि तस्य सर्वेन्द्रियाध्यक्षत्वेन वैशिष्ट्यं विद्यते । मनसा प्रेरितानि योजितानि च यदा भवन्ति तदैव सर्वेन्द्रियाणि स्वस्वव्यापारे प्रवर्तन्ते । मनोव्यापारे निरुद्धे सति सर्वेन्द्रियव्यापारो निरुद्धो भवति । महति परिशुद्धे च परवस्तुनि निदिध्यासं विना मनोव्यापारस्य निरोधो न कदापि भवति । अत एवोच्यते— 'शिवे मनसि संलीले क्व चेन्द्रियविचारणा' इति प्रश्नमुखेन मनोनिरोधप्रसङ्गः । एवं शिवयोगिनो निर्व्यापारस्थितिरुक्ता । तदा सर्वस्य शिवमयत्वमेव दृश्यते । इयमेव 'शिवदृष्टिः' परमशिवयोगिनः । अनया शिवदृष्ट्या परयोगी सर्वेषाम् अनुग्रहं करोति ॥२०-२१॥

करणैः सहितं प्राणं मनस्याधाय संयमी ।
योजयेत् स शिवः साक्षात् यत्र नास्ति जगद्भ्रमः ॥२२॥

व्याख्या— शिवयोगिनः प्राणनिग्रहप्रकारमाह— **करणैरिति** । यः **करणैः सहितं** यः चक्षुरादीन्द्रियैः सह **प्राणं** प्राणम् अपि **मनसि** चित्ते **आधाय** संस्थाप्य **संयमी** शिवयोगी तन्मनः पुनः शिवेन **योजयेत्** योजनं कुर्यात् **सः साक्षात् शिवः** स स्वयं शिव एव, **यत्र** यस्मिन् शिवयोगिनि **जगद्भ्रमः** जगद्रूपा भ्रान्तिः **नास्ति** न भवति ॥ यथा उक्तं भगवता— "मनः संयम्य मच्चित्तो युक्त आसीत मत्परः" (भ. गी., ६.१४) इति, तथा शिवयोगी स्वकीयं मनः परशिवे विलयति । मनसि विश्रान्ते सति तत्साहाय्येन व्यापारयताम् इन्द्रियाणामपि विश्रान्तिर्जायते । तदुक्तं भगवता— "युञ्जन्नेवं सदात्मानं योगी नियतमानसः। शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥" (भ. गी., ६.१५) इति । तस्याः स्थितिं पुनराह

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भगवान्— "यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥" (भ. गी., ६.२०) इति । इयमेव योगस्य परमा सिद्धिः । तां सिद्धिमवाप्य शिवयोगी शिव एव भवति । एवं शिवो भूत्वा योगी स्वकीयैरिन्द्रियैः सर्वान् अनुगृह्णाति ॥२२॥

सर्वेन्द्रियप्रवृत्त्या च बहिरन्तः शिवं यजन् ।
स्वच्छन्दचारी सर्वत्र सुखी भवति संयमी ॥२३॥

व्याख्या— बहिरन्तः शिवदर्शनसंपन्नो योगी स्वयमेव स्वातन्त्र्येण चरतीत्युक्त्वा इन्द्रियानुग्रहस्थलं समापयति— **सर्वेन्द्रियेति** । **सर्वेन्द्रियप्रवृत्त्या** सर्वेन्द्रियप्रवर्तनद्वारा **बहिरन्तश्च** बाह्ये आभ्यन्तरे च **शिवं** परशिवम् इष्टप्राणभावाख्यलिङ्गत्रयसमन्वयभूतं **यजन्** पूजयन् **सर्वत्र** सर्वस्थानेषु **स्वच्छन्दचारी** स्वेच्छानुसारं सञ्चरन् **संयमी** शिवयोगी **सुखी भवति** आनन्दमनुभवन्नास्ते ॥ मनःप्राणयोर्नियन्त्रणेन बाह्याभ्यन्तराणाम् इन्द्रियाणां नियन्त्रणं शिवयोगी साधयति । स च बाह्ये आभ्यन्तरे च शिवदर्शनमेव संप्राप्य मोदते । सर्वेन्द्रियप्रवृत्तिरत्र सर्वत्र शिवदृष्टिसम्पादनाय कल्पते । शिवदृष्टिसम्पन्नः शिवयोगी सर्वत्र स्वातन्त्र्येण सञ्चरन् सर्वान् स्वेन्द्रियैरनुगृह्णाति ॥२३॥

— इति इन्द्रियानुग्रहस्थलम् —

३. अथ प्राणानुग्रहस्थलम् – (६५)

शिवस्य परकायस्य यत् तात्पर्यावलोकनम् ।
तत्प्राणानुग्रहः प्रोक्तः सर्वेषां तत्त्ववेदिभिः ॥२४॥

व्याख्या— कोऽयं प्राणानुग्रह इत्यत्राह— **शिवस्येति** । **परकायस्य** इन्द्रियानुग्रहसम्पन्नस्य शिवयोगिनः **शिवस्य** शिवात्मकस्य **यत् तात्पर्यावलोकनं** यत् तदेकभावेन पर्यालोचनम् अस्ति **तत्** तदेव **सर्वेषां** सकलानां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

साधकानां **प्राणानुग्रहः** प्राणानुग्रह इति **तत्त्वदर्शिभिः** तत्त्वज्ञानसम्पन्नैः **प्रोक्तः** कथितः ॥ अत्र तात्पर्यावलोकनमेव प्राणानुग्रह इत्युक्तम् । तत्कथमिति चेदुक्तं भगवत्या श्रुत्या— "प्राणान् प्रपीड्येह स युक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत । दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेदप्रमत्तः ॥" (श्वे. उ., २.९) इति । प्रथमं प्राणा मनसा साकं मूलाधारादिषु प्राणायामद्वारा नियम्येत । अनन्तरं परिष्कृतक्रियाभिः 'युक्तचेष्टः' भूयात् । कथमिति चेदुक्तं भगवता— "युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥" (भ. गी., ६.१७) इति । युक्तत्वं नाम मनोनियन्त्रणपूर्वकं सर्वाभिः स्पृहाभिर्मुक्तत्वम् । तदुक्तम्— "यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥" (भ. गी., ६.१८) इति । मनस्तु निर्वातदीप इव स्तब्धः तिष्ठति । उक्तं तत्— "यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।" (भ. गी., ६.१९) इति । क्षीणे प्राणे योगी स्वैरं पूरक-रेचकावुभयनासिकारन्ध्रयोरीडापिङ्गलयोरभ्यसेत् । अयमेवाऽभ्यासः कुम्भकयोगे पर्यवस्यति । तात्पर्यदर्शनं नाम स्वात्मनः सर्वस्य चान्यस्य शिवस्वरूपत्वेन निरन्तरानुसन्धानम् इति । तात्पर्ययोगेन सर्वान् जनान् अनुग्रहीतुं सामर्थ्यं योगी विन्दति । एवं परयोग्येव प्राणानुग्राहक इत्युच्यते ॥२४॥

प्राणो यस्य लयं याति शिवे परमकारणे ।
कुतस्तस्येन्द्रियस्फूर्तिः कुतः संसारदर्शनम् ॥२५॥

व्याख्या— शिवे प्राणलये सति संसारनिवृत्तिरित्याह— **प्राण इति** । **यस्य** यस्य योगिनः **प्राणः** प्राणः **परमकारणे** परमं चेदं कारणं च, तस्मिन्, कारणस्य कारणे, सर्वकारणे **शिवे** परशिवे **लयं याति** लीनतां गच्छति, **तस्य** तादृशस्य योगिनः **इन्द्रियस्फूर्तिः** इन्द्रियप्रवृत्तिः **कुतः** कुत्र ? न कुत्रापि इत्यर्थः, **संसारदर्शनं** संसृतेर्विकारप्रकटनं **कुतः** कुत्र ? न कुत्रापि इत्यर्थः ॥ परशिवस्य परमकारणत्वमुक्तम् । इदं कारणकरणत्वं श्रुत्या

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वर्णितम्— "तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् । पतिः पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम् ॥" (श्वे. उ., ६.७) इति । शिवयोगी स्वकीयं प्राणं कारणकारणभूते परमकारणे परशिवे विलयति । विलयनमिदं नातिसुलभम् । परिणतेन प्राणायामेन बहुधाऽभ्यासः करणीयः । यथोक्तं स्वामिविवेकानन्देन "सुदीर्घेणाऽऽभ्यन्तरेण समाधिमहिम्ना प्रभूतं चैतन्यं संगृह्यते । तच्च यदा सुशुम्नाद्वारोर्ध्वमुखं प्रवहद् आधारादि प्रतिचक्रं ताडयति तदा स्वप्नस्य कल्पनाया वा यत्सञ्चलनं जायेत ततोऽपि महत्तीव्रम्, इन्द्रियप्रत्यक्षस्य च यत्सञ्चलनं दृश्येत ततोऽपि तीव्रतमम् तद् अनुभूयते" इति योगाभ्यासः श्रमसाध्यः परिणामे चाऽतीव आनन्दमयः। [योगिभिर्ध्यायमानानां चक्राणां तत्तत्स्थानानां तत्रस्थकमलानां दलसंख्यादीनां च प्रपञ्चार्थम् – पश्यत – सि.शि., १०.२५-२७ व्याख्याम्] । विवेकानन्दमहोदयोक्तः सुदीर्घ ऊर्ध्वमुखसमाधिः पूरक-रेचक-कुम्भकरूपस्य प्राणायामस्य सश्रद्धं निरन्तराभ्यासेन साधयितुं शक्यते । आरम्भे तावद् एते पूरकादयः कृतकाभ्यासतयाऽवभासन्ते । अस्याभ्यासस्य मूलभूतं तन्त्रं नाम प्राणवायोः स्तम्भनम् । रेचकाद् अनन्तरं यद् वायुस्तम्भनं भवति तद्बाह्यम्, पूरकादनन्तरम् अन्तर्वायुस्तम्भनं च यत्तद् आभ्यन्तरं भवति । अस्याऽभ्यासस्य स्थिरताप्राप्तौ पूरक-रेचक-कुंभका अप्रयत्नसिद्धाः स्वाभाविकाश्च भवन्ति । तदा चतुर्थः प्राणायाम इति कथ्यते । तदुक्तम्— "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" (यो. सू., २.५१) इति । यदा शिवयोगी सम्पूर्णप्राणवायुनियन्त्रणे कुशलो जायते, तदा स अध्यात्मदर्शनस्तरे औन्नत्यं सम्पादयति । परशिवध्याने मग्नस्य तस्य सहजतया प्राणवायुस्तम्भनं सम्पद्यते । स्तम्भनमिदं सुदीर्घकालपर्यन्तं निर्वोढुं शक्यते । अयं कुम्भकयोग इति प्रसिद्धः । [अत्रेयं सूचना– परिणतयोगिन एवेदं कर्तुं समर्थाः, तैरेव इदं करणीयम्] । कुम्भकयोगसमाधौ कुण्डलिता कुण्डलिनी जागृता सती योगिनः प्रेरणया पृष्ठवंशम् अनूर्ध्वमुखं सुषुम्नानालद्वारा प्रवर्तयन्ती षट्चक्राण्यतीत्य शिरसि सप्तमचक्रे लीना भवति । तत्रस्थसूक्ष्मरन्ध्रं कैलासस्थानमिति कथयन्ति । शिवयोगिनः प्राणस्तत्रस्थशम्भौ

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लीना भवति । तदा मनसा सह सर्वेन्द्रियव्यापारो निरस्तो भवति । तदनन्तरं शिव एव केवलम्, नास्ति किमप्यन्यत् । सर्वत्र शिवदर्शनाद् इदमेव तात्पर्यावलोकनम् । अपरिमित आनन्दः करुणाभावोऽनुग्रहभावश्च परकाययोगिनः संभूय सर्वेषां साधकानां प्राणानुग्रहं कुर्वन्ति ॥२५॥

करणेषु निवृत्तेषु स्वार्थसङ्गात् प्रयत्नतः ।
तैः समं प्राणमारोप्य स्वान्ते शान्तमतिः स्वयम् ॥२६॥

व्याख्या— स्वविषयनिवृत्तकरणः शिवयोगी शिवे प्राणं विलीय शान्तो भवतीत्याह— **करणेष्विति । करणेषु** चक्षुरादीन्द्रियेषु सर्वेषु **स्वार्थ-सङ्गात्** शब्दादिस्वविषयसम्पर्कात् **प्रयत्नतः** स्वप्रयत्नतः, स्वयमेव, **निवृत्तेषु** निवृत्तिं गतेषु सत्सु, **स्वान्ते** मनसि **तैः समं** चक्षुरादीन्द्रियैः सह **प्राणम् आरोप्य** प्राणं संयोज्य **स्वयं शान्तमतिः** स्वयं रागद्वेषविरहितः सन्नास्ते ॥ कुम्भकयोगोऽयम् । अस्मिन् जीवन्मुक्तः सन् शिवयोगी शान्त आस्ते । उक्तं तत्— "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।" (छां. उ., ३.१४.१) इति ॥२६॥

शान्तत्वात् प्राणवृत्तीनां मनः शाम्यति वृत्तिभिः ।
तच्छान्तौ योगिनां किञ्चिच्छिवादन्यन्न दृश्यते ॥२७॥

व्याख्या— शान्तमतित्वे शिवयोगिनः किं भवतीत्यत्राह— **शान्त-त्वाद्** इति । **प्राणवृत्तीनां** पूरकरेचकात्मकानां प्राणवृत्तीनां **शान्तत्वात्** केवल कुम्भकयोगेन शान्ततां गतत्वात् **मनः** चित्तम् अपि **वृत्तिभिः शाम्यति** स्वव्यापारैः शान्ततां गच्छति । **तच्छान्तौ** तन्मनसि शान्ते सति **योगिनां** शिवयोगिनां **शिवाद् अन्यत्** शिवं विहायाऽन्यत् **न किञ्चिद् दृश्यते** न किञ्चिद् द्रष्टुम् अवशिष्यते ॥२७॥

प्राण एव मनुष्याणां देहधारणकारणम् ।
तदाधारः शिवः प्रोक्तः सर्वकारणकारणम् ॥२८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— परमकारणभूतः शिवः प्राणाधार इत्याह— **प्राण इति।** **प्राणः एव** प्राणवायुरेव **मनुष्याणां** नराणां **देहधारणकारणं** देहस्य धारणं देहधारणं शरीरधृतिः, तस्य कारणं हेतुः। **तदाधारः** तस्य देहधारण-हेतुभूतस्य प्राणस्य अधिष्ठानं **सर्वकारणकारणं** सर्वेषां कारणानां मूल-कारणभूतः **शिवः** परशिवः **प्रोक्तः** कथितः॥ गर्भस्य सप्तममासे प्राणो गर्भं प्रविशति। तदारभ्य प्राणः शरीरधारणहेतुत्वेन तिष्ठति। अष्टमे मासे गर्भश्चेतनयुक्तो भवति। [पश्यत— निजगुणशिवयोगिनो भाषाग्रन्थयोः प्रथमे 'परमार्थगीते' इत्याख्ये ४ गतिम्, द्वितीये 'परमानुभवबोधे' इत्याख्ये च प्रथमसन्धिम्]। प्राणस्याऽऽधारशक्तिः शिव एव, यः सर्वकारणकारणं भवति॥२८॥

निराधारः शिवः साक्षात् प्राणस्तेन प्रतिष्ठितः।
तदाधारा तनुर्ज्ञेया जीवो येनैव चेष्टते ॥२९॥

व्याख्या— पूर्वोक्तस्याऽपरपक्षमाह— **निराधार इति।** **शिवः** पर-शिवः **साक्षात्** स्वयं **निराधारः** आधाररहितः, अनपेक्षिताधारः इत्यर्थः, **तेन** परशिवेन **प्राणः** प्राणवायुः **प्रतिष्ठितः** प्रतिष्ठापितः, **तदाधारा** तस्य प्राणस्य आधारा आश्रयभूता **तनुः** शरीरम् इति **ज्ञेया** ज्ञातव्या, **येन एव** येन प्राणेनैव **जीवः चेष्टते** जीवः क्रियादिव्यवहारं करोति॥ अयम् अभिप्रायः— परशिवो न कमप्याधारम् अपेक्षते। स एव सर्वस्याऽऽधारः। स च प्राणस्याऽऽधारः; 'प्राणः शरीरस्य आधारः' इत्युक्ते प्राणस्य बलेन जीवः चेष्टते इति भावः। प्राणो यदि परशिवे निलीनः, तर्हि कस्य बलेन शरीरं जीवति ? अस्य प्रश्नस्य उत्तरम् आगामिनि श्लोके दत्तमस्ति॥२९॥

शिवे प्राणो विलीनोऽपि योगिनो योगमार्गतः।
स्वशक्तिवासनायोगाद् धारयत्येव विग्रहम् ॥३०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— शिवयोगी स्वशक्तिसंस्कारेण देहं धारयतीत्याह— **शिवे इति । योगिनः** शिवयोगिनो **योगमार्गतः** कुम्भकयोगमार्गात्, पञ्चमी-विभक्त्यर्थे तसिल् (तस्), **प्राणः** प्राणवायुः **शिवे** परशिवे **विलीनः अपि** विलयं प्राप्तोऽपि, **स्वशक्तिवासनायोगात्** स्वस्य शक्तिः स्वशक्तिः, तस्य योगिनः स्वकीययोगबलम्, तस्याः वासना संस्कारः, तस्या योगात् सम्बन्धाद् **विग्रहं** शरीरं **धारयति एव** दधात्येव ॥ यद्यपि प्राणः कुम्भक-योगेन परशिवे विलयं प्राप्तः, तथापि योगिनः योगबलाद् अन्तर्निरूढ-स्वशक्तिसंस्कारेण देहं धारयन्ति । कुम्भकयोगस्वरूपः प्राणो देहान्न निर्गतः । अतः शरीरं न पतति, केवलं तद् विहीनसर्वचेष्टं तिष्ठति ॥३०॥

स चाभ्यासवशाद्भूयः सर्वतत्त्वातिवर्तिनि ।
निष्कलङ्के निराकारे निरस्ताशेषविक्लवे ॥३१॥

चिद्विलासपरिस्फूर्ति – परिपूर्णसुखाद्वये ।
शिवे विलीनः सर्वात्मा योगी चलति न क्वचित् ॥३२॥

व्याख्या— योगी कथं भवतीत्यत्र युग्मेनाह— **स इति । स च योगी** स च शिवयोगी **भूयः** पुनरपि **अभ्यासवशात्** पौनः पुन्येन प्रवृत्तिवशात्, **सर्वतत्त्वातिवर्तिनि** सर्वाणि च तानि तत्त्वानि च सर्वतत्त्वानि भूम्यादि-शिवान्तानि षट्त्रिंशत्तत्त्वानि, तान्यतिवर्तते इति, अतीत्य तिष्ठतीति, सर्वतत्त्वातिवर्ती, णिनि प्रत्ययः, तस्मिन्, **निष्कलङ्के** जन्ममरणादिसर्व-दोषरहिते **निराकारे** निरस्तः आकारः यस्मात् सः निराकारः, तस्मिन्, आकाररहिते, **निरस्ताशेषविक्लवे** अशेषाः सर्वे विक्लवा बाधाः अशेष-विक्लवाः, निरस्ताः निष्कासिताः अशेषविक्लवाः यस्मात् सः निरस्ताशेष-विक्लवः, तस्मिन्, **चिद्विलासपरिस्फूर्तिपरिपूर्णसुखाद्वये** चितः चैतन्यस्य विलासः प्रकाशः चिद्विलासः, तस्य परिस्फूर्तिः स्पन्दः, चिद्विलासपरि-स्फूर्तिः, तया परिपूर्ण (सुखस्य अद्वैतं) सुखाद्वयम् आनन्दाद्वयं यस्य सः चिद्विलासपरिस्फूर्तिपरिपूर्णसुखाद्वयः, तस्मिन्, **शिवे** परशिवे **विलीन-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वात्मा विलयीभूतसर्वव्यापारः सन्, **क्वचित्** क्वचिदपि **न चलति** न स्पन्दते ॥ शिवयोगी स्वात्मन्येव जागृतपरशिवज्ञानवान् परशिवे विलयं गतः । तस्य समाधिस्थितिरियं यस्यां परिपूर्णाद्वयभावं स प्राप्तवान् । इदमेव शिवजीवसामरस्यं यद्वीरशैवपरिभाषायां लिङ्गाङ्गसामरस्यम् इति कथ्यते । इदमेव परिपूर्णसच्चिदानन्दाद्वैतम् । कश्चन योगी स्वानुभूतां समाधिस्थितिम् एवं वर्णयति— "वाचा वक्तुमशक्यमेव मनसा मन्तुं न वा शक्यते, स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेर्वैभवम् । अम्भोराशिविशीर्ण-वार्षिकशिलाभावं भजन्मे मनो, यस्यांशांशलवे विलीनमधुनाऽऽनन्दात्मना निर्वृतम् ॥ क्व गतं केन वा नीतं कुत्र लीनमिदं जगत् । अधुनैव मया दृष्टं नास्ति किं महदद्भुतम् ॥ किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम् । अखण्डानन्दपीयूषपूर्णे ब्रह्ममहार्णवे ॥ न किञ्चिदत्र पश्यामि न शृणोमि न वेद्म्यहम् । स्वात्मनैव सदानन्दरूपेणास्मि विलक्षणः ॥" (शङ्करः – वि.चू., ४८३-४८६) इति । समाधिस्थितिं प्राप्य पुनः कस्मिंश्चिदधस्तन-स्तरे स्थितस्य योगिनो वचनमिदम् । अयमेव सुखाद्वयविशिष्टः शिव-जीव-समरसभावः ॥३१-३२॥

प्रध्वस्तवासनासङ्गात् प्राणवृत्तिपरिक्षयात् ।
शिवैकीभूतसर्वात्मा स्थाणुवद्भाति संयमी ॥३३॥

व्याख्या— शिवयोगी काष्ठवद् अस्पन्दस्तिष्ठतीत्युक्त्वा प्राणानु-ग्रहस्थलं समापयति— **प्रध्वस्तवासनासङ्गाद्** इति । **प्रध्वस्तवासनासङ्गात्** वासनायाः सङ्गः वासनासङ्गः, प्रध्वस्तः विनष्टः, प्रध्वस्तश्च असौ वासना-सङ्गश्च प्रध्वस्तवासनासङ्गः, तस्मात् कारणात्, **प्राणवृत्तिपरिक्षयात्** प्राणस्य वृत्तिः प्राणवृत्तिः प्राणव्यापारः, तस्याः प्राणवृत्तेः परिक्षयः नाशः, प्राणवृत्तिपरिक्षयः, तस्मात् कारणात्, **शिवैकीभूतसर्वात्मा** सर्वश्च असौ आत्मा च सर्वात्मा सर्वेन्द्रियव्यापारः, शिवेन एकीभूतः सर्वात्मा यस्य सः, तादृशः, **संयमी** शिवयोगी **स्थाणुवत्** निश्चलस्तम्भवत् **भाति** प्रकाशते ॥ प्राणवृत्तिरेव मानसभौतिकोभयोरपिव्यवहारयोः कारणम् । तत्प्राणवृत्तौ

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वथा निरुद्धायां सत्यां सर्वचेष्टानां नास्ति कापि कथा। इन्द्रियविषयाणां संस्कारा यावत्पर्यन्तं प्रवर्तन्ते तावत्पर्यन्तं मनोव्यापारः प्रवर्तते। यदा संस्कारास्ते प्रध्वस्ता भवन्ति तदा शरीरं निरस्तसञ्चलनं भवति। एवं शिवयोगी निश्चलो भवति ॥३३॥

— इति प्राणानुग्रहस्थलम् —

४. अथ कायार्पितस्थलम् – (६६)

शिवस्य पररूपस्य सर्वानुग्राहिणोऽर्चने।
त्यागो देहाभिमानस्य कायार्पितमुदाहृतम् ॥३४॥

व्याख्या— प्राणानुग्रहसम्पन्नस्य परयोगिनः सुलभं कायार्पितस्थलमाह— **शिवस्येति**। **सर्वानुग्राहिणः** सर्वान् अनुगृह्णाति इति सर्वानुग्राही, णिनि प्रत्ययः, तस्य शिवानुग्राहिणः, **पररूपस्य** परयोगिस्वरूपस्य **शिवस्य** परशिवस्य **अर्चने** उपासने **देहाभिमानस्य** देहस्य अभिमानः देहाभिमानः देहे अभिनिवेशः, तस्य **त्यागः** परित्यागः, **कायार्पितं** कायार्पितम् इति **उदाहृतं** कथितम् ॥ अत्रोक्तो देहाभिमानपरित्यागो न तु देहपरित्यागः। देहस्तु परयोगिनः परशिवाय समर्पितम्। तथा कृते देहाभिमानः परिपूर्णतया परित्यक्तः। कायार्पितत्वे न केवलं देहाभिमानः परित्यक्तः, परं सर्वेन्द्रियविषयज्ञानमपि परशिवाय समर्पितं भवति। तस्य शिवयोगिनः 'देहवानस्मि' इति प्रज्ञाऽपि नावशिष्यते। तदा तेन 'प्रसादकायत्वम्' प्राप्यते ॥ कायार्पितत्वेऽकिञ्चनत्वम्, अकिञ्चनत्वे शिवत्वप्राप्तिः, इति भावः ॥३४॥

यदा योगी निजं देहं शिवाय विनिवेदयेत्।
तदा भवति तद्रूपं शिवरूपं न संशयः ॥३५॥

व्याख्या— कायार्पितेन किं भवतीत्यत्राह— **यदा इति**। **यदा** यस्मिन् समये **योगी** शिवयोगी **निजं देहं** स्वकीयं शरीरं **शिवाय** परशिवाय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विनिवेदयेत् समर्पयेत्, **तदा** तस्मिन् समये **तद्रूपं** शिवयोगिस्वरूपं **शिवरूपं** परशिवस्वरूपं **भवति** सम्पद्यते, **न संशयः** अस्मिन् विषये कोऽपि सन्देहः नास्ति ॥ यत्तेन शिवाय समर्पितं तन्न स्वकीयं परं 'ईशावास्यम्' इति योगी जानाति। यत्तेन समर्पितं तत् शरीरम्। तच्च पञ्चभूतात्मकम्। पञ्चभूतानि भवन्ति शिवस्य सृष्ट्यन्तर्भूतानि । शिवयोगी शिवस्वम् एव शिवाय समर्प्य शिव एव भवति । शिवत्वम् अपि न तस्य स्वकीयम् । तथापि तस्य शिवस्वरूपं पारितोषिकत्वेन लभते । निरन्तरम् अध्यात्मसाधनद्वारा शिवैकीभूतसर्वात्मत्वसम्पादनस्य फलमेतत् ॥३५॥

इन्द्रियप्रीतिहेतूनि विषयासङ्गजानि च ।
सुखानि सुखचिद्रूपे शिवयोगी निवेदयेत् ॥३६॥

व्याख्या— देहेन सह किमन्यत् समर्पितं भवतीत्यत्राह— **इन्द्रियप्रीतिहेतूनीति । शिवयोगी** कायार्पितशिवयोगी **इन्द्रियप्रीतिहेतूनि** इन्द्रियाणां प्रीतिः इन्द्रियप्रीतिः तस्याः हेतूनि, इन्द्रियप्रीतिकारणभूतानि, **विषयासङ्गजानि** विषयाणाम् आसङ्गः विषयासङ्गः, इन्द्रियविषयाणां सन्निकर्षः, ततः जायन्ते इति विषयासङ्गजानि, विषयसन्निकर्षोत्पन्नानि **सुखानि** सुखविशेषभूतानि **सुखचिद्रूपे** चिदानन्दस्वरूपे परशिवे **निवेदयेत्** समर्पयेत् ॥ इन्द्रियजन्यसुखानीन्द्रियेभ्यः प्रीतिकराणि । प्राकृतजनानां कृते इदं सत्यमेव । शिवयोगिनां कृते तेषां स्वेच्छयाऽनन्विष्टत्वात् निःस्वार्थपरत्वाच्च तानि परिशुद्धानि पवित्राणि च । तान्येव सुखानि परशिवे समर्पितानि । शिवस्तु स्वयम् आनन्दसागरः किल । तस्य तेषां सुखानाम् अपेक्षा कापि नास्ति । शिवयोगिनः स्वकीयकर्मभारनिवर्तनद्वारा शिवत्वप्राप्त्यर्थं स्वात्मनः लघूकरणाय चेन्द्रियसुखैः समं स्वशरीराणि परशिवे समर्पयन्ति ॥३६॥

दर्शनात् स्पर्शनात् भुक्तेः श्रवणाद् घ्राणनादपि ।
विषयेभ्यो यदुत्पन्नं शिवे तत्सुखमर्पयेत् ॥३७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— शिवयोगी सर्वमिन्द्रियसुखं शिवे समर्पयेदिति पुनराह— **दर्शनाद् इति । दर्शनात्** चक्षुःप्रत्यक्षात्, **स्पर्शनात्** त्वक्प्रत्यक्षात् **भुक्तेः** रसनाप्रत्यक्षात्, **श्रवणात्** श्रुतिप्रत्यक्षात् **घ्राणनाद् अपि** घ्राणप्रत्यक्षाद् अपि **विषयेभ्यः** इन्द्रियविषयेभ्यः **यद् उत्पन्नं** यदुद्भूतं **तत्सुखं** तत् सुखविशेषं **शिवे** परशिवे **अर्पयेत्** निवेदयेत् ॥ गतश्लोकस्य व्याख्यां पश्यत ॥३७॥

देहद्वारेण यद्यत् स्यात् सुखं प्रासङ्गमात्मनः ।
तत्तन्निवेदयन् शम्भोर्योगी भवति निर्मलः ॥३८॥

व्याख्या— देहद्वारा प्राप्यमाणं सुखं सर्वं शिवे निवेदयेद् इत्युक्त्वा कायार्पितस्थलं समापयति— **देहद्वारेणेति । देहद्वारेण** शरीरद्वारा **यद्यत्** यत्किमपि **सुखं** सुखविशेषभूतम् **आत्मनः** स्वस्य **प्रासङ्गं** प्रसङ्गप्राप्तं **स्यात्**, **तत्तत् सुखं** तत् सर्वमपि सुखं **शम्भोः** शिवस्य **निवेदयन्** समर्पयन् **योगी** शिवयोगी **निर्मलः** मलदोषरहितः **भवति** अस्ति ॥ इन्द्रियार्थसन्निकर्ष-जातानि सर्वाणि सुखानि कायिकानि भवन्ति । प्राकृतजनास्तथा मन्वते । शिवयोगी तु सर्वाणि तानि शिवे निवेदयति । तथा यदि तानि शिवे समर्प्यन्ते तर्हि तेषां संस्कारा नाऽवशिष्यन्ते । तदा सर्वाणि तानि सुखानि 'प्रसादः' भवन्ति । कायोऽपि प्रसादकायो भवति । एवं शरीरं शरीरसुखानि च शिवे समर्प्य शिवयोगी कायार्पितो भवति ॥३८॥

— इति कायार्पितस्थलम् —

५. अथ करणार्पितस्थलम् – (६७)

आसञ्जनं समस्तानां करणानां परात्परे ।
शिवे यत् तदिदं प्रोक्तं करणार्पितमागमे ॥३९॥

व्याख्या— कायार्पितस्थलसम्पन्नस्य करणार्पितस्थलमाह— **आसञ्जनम् इति । यत्** यद् भवति **समस्तानां** सकलानां **करणानां** चक्षुरादीन्द्रियाणां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परात्परे विश्वस्मात् परमोत्कृष्टाद् उत्कृष्टतमे **शिवे** परशिवे **आसञ्जनं** संयोजनं **तदिदं** तत्सर्वमेतत् **करणार्पितं** करणानाम् अर्पितं समर्पणम् इति **आगमे** शिवागमे **प्रोक्तम्** कथितम् ॥ मनसा सह सर्वकरणानां शिवे समर्पणं क्रियते चेत् तानि ज्ञानिनः करणानि सर्वदा वश्यानि भवन्ति । तदुक्तम्— "यस्तु विज्ञानवान् भवति युक्तेन मनसा सह । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥" (कठ. उ., ३.६) इति । मनसि वशम् आगते सति सर्वाणि करणानि वशम् आगच्छन्ति । 'सदश्वा इव सारथेः' इति दृष्टान्तः तद्विषयं विशदीकरोति । मनोनिग्रहस्य परमम् अव्यभिचरितं च साधनं कुम्भकयोगेन प्राणवायुनिरोधः । मनसि शिवे योजिते सति, बाह्याभ्यन्तरकरणानि सर्वाणि शिवे योजितानि भवन्तीतीदं करणार्पणम् ॥३९॥

यद्यत् करणमालम्ब्य भुङ्क्ते विषयजं सुखम् ।
तत्तच्छिवे समर्प्यैष करणार्पक उच्यते ॥४०॥

व्याख्या— एष योगी कथं करणार्पको भवतीत्यत्राह— **यद्यद् इति** । **यद्यत् करणम् आलम्ब्य** यद्यद् इन्द्रियमाश्रित्य **विषयजं** विषयजन्यं **सुखं** सुखविशेषं **भुङ्क्ते** तत्तदिन्द्रियद्वारा भुनक्ति, **तत्तत्** तत्तत्करणं **शिवे** परशिवे **समर्प्य** विनिवेद्य **एषः** अयं शिवयोगी कायार्पितसंपन्नः, **करणार्पकः** करणार्पक इति **उच्यते** कथ्यते ॥ यद्यत्करणम् अवलम्ब्य विषयसुखं भुज्यते तत्तत्करणं शिवे समर्प्य करणार्पको भवति योगी इत्यन्वयः साधीयान् । कायार्पणस्थले तावत् इन्द्रियद्वारा सम्पन्नं कायसुखं शिवे समर्पणीयमिति विधीयते । अत्र करणार्पणेन करणार्पितस्थलम् । करणार्पणप्रकार आगामिषु पञ्चश्लोकेषु निरूप्यते ॥४०॥

अहङ्कारमदोद्रिक्तमन्तःकरणवारणम् ।
बध्नीयाद् यः शिवालाने स धीरः सर्वसिद्धिमान् ॥४१॥

व्याख्या— अन्तःकरणभूतं मनः कथं वशीकरणीयमित्यत्र रूपकमुखेनाह— **अहङ्कारेत्यादिना । यः** यः योगी **अहङ्कारमदोद्रिक्तमन्तःकरण-**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वारणं अहङ्कारः एव मदः मदमत्तता अहङ्कारमदः, तेन **उद्रिक्तः** उद्रेकवशंगतः, अन्तःकरणम् एव वारणः गजः अन्तःकरणवारणः मनो-रूपवारणः, तम्, **शिवालाने** शिवः परशिवः एव आलानं बन्धनस्तम्भः तस्मिन्, **बध्नीयात्** बद्धं कुर्यात् **सः धीरः** तादृशः ज्ञानी **सर्वसिद्धिमान्** सर्वाः सिद्धयः अस्य सन्तीति सर्वसिद्धिमान्, भवतीति शेषः ॥ अहङ्कार एव मदः, अन्तःकरणमेव वारणः, शिव एव आलानम्, इति त्रीणि रूप-काणि दत्तानि । बन्धनरज्जुसम्बन्धि रूपकं न दत्तमित्यपूर्णमिदं रूपकम् । मनःप्रधानान्तःकरणवारणस्य शिवालाने बध्नीयते चेद् योगी सर्वसिद्धि-मान् भवति । सर्वसिद्धिमत्वं नाम करणार्पकयोगिनो जीवन्मुक्तस्थितौ विराजमानत्वम् ॥४१॥

इन्द्रियाणां समस्तानां मनः प्रथममुच्यते ।
वशीकृते शिवे तस्मिन् किमन्यैस्तद्वशानुगैः ॥४२॥

व्याख्या— मनोमात्रबन्धेन कथम् इन्द्रियाणां बन्ध इत्यत्राह— **इन्द्रियाणामिति । समस्तानां** सकलानां **इन्द्रियाणां** चक्षुरादीन्द्रियाणां **मनः** चित्तं **प्रथमं** प्रधानम् इति **उच्यते** कथ्यते ॥ शिवे आधारभूते परशिवे **तस्मिन्** मनसि **वशीकृते** नियन्त्रिते सति **अन्यैः** इतरैः **तद्वशानुगैः** तदधीनैः अनुचरैः **किं** किमु वक्तव्यम्? परशिवे लीनत्वेन मनसि वशमागते चक्षुरादिसर्वेन्द्रियाणि वशमागतान्येव । चक्षुरादीन्द्रियापेक्षया मनः प्रधानम्, स्वामी । तदुक्तम्— "इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः । मारुतस्य लयो नाथस्तन्नाथं लयमाश्रयः ॥" (वराह. उ., २.८०) इति । इन्द्रियाणां मनः स्वामी, मरुत मनसः स्वामी, मारुतस्य लय-स्थानभूतः परमात्मा स्वामी [लीयते अस्मिन्निति लयः परमात्मा], तल्लयभूतः परमात्मा एव सर्वाश्रयः । शिवैकाग्रतावशात् शिवयोगिनो मनः परशिवे विलीनः । परशिवे मनोलयात् सर्वेन्द्रियाणि तत्रैव लयं गच्छन्ति । शिवैकाग्रता कथं भवतीति श्रुतिराह— "पुङ्खानुपुङ्खविषये-क्षणतत्परोऽपि ब्रह्मावलोकनधियं न जहाति योगी । संगीतताललयवाद्य-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वशं गताऽपि मौलिस्थकुम्भरक्षणधीर्नटीव ॥" (वराह. उ., २.८२) इति। इन्द्रियविषयदर्शननिरतोऽपि योगी ब्रह्मावलोकनदृष्टिं न त्यजति, यथा काचन मौलिधृतकुम्भवती नटी संगीतवाद्यशब्दानुसारं नाट्यं कुर्वती शिरस्थकुम्भं यथास्थितं रक्षति। एवं मनसि शिवे समर्पिते सर्वेन्द्रियाणि समर्पितानि भवन्ति ॥४२॥

इन्द्रियाणां वशीकारो निवृत्तिरिति गीयते।
लक्ष्यीकृते शिवे तेषां कुतः संसारगाहनम् ॥४३॥

व्याख्या— इन्द्रियनियन्त्रणं कृत्वा तेषां शिवे योजनेन संसारो निवर्तते इत्याह— **इन्द्रियाणामिति। इन्द्रियाणां** चक्षुरादीन्द्रियाणां **वशीकारः** वशीकरणं **निवृत्तिः इति गीयते** 'निवृत्तिः' इति कथ्यते। **शिवे** परशिवे **तेषां** तेषाम् इन्द्रियाणां **लक्ष्यीकृते** लक्ष्यबिन्दुत्वेन संयोजिते **संसारगाहनं** संसाररूपसागरे निमज्जनं **कुतः** कुत्र भवेत्? कुतोऽपि न भवेद् इत्यर्थः॥ यदा सर्वाणीन्द्रियाणि स्वस्वविषयेभ्यः विनिवर्त्य शिवे नियोज्यन्ते तदा भवति सर्वेच्छानिवृत्तिः। तेषां बहिरिन्द्रियाणां व्यवहाररहितत्त्वमेव "निवृत्तिः" इत्याख्यायते। इयमेवाऽऽगामिनि श्लोके "उपशान्तिः" इत्युच्यते ॥४३॥

संसारविषकान्तारसमुच्छेदकुठारिका।
उपशान्तिर्भवेत् पुंसामिन्द्रियाणां वशीकृतौ ॥४४॥

व्याख्या— इन्द्रियव्यापारनिवृत्त्या संसारनिवृत्तिरित्याह— **संसारेत्यादिना। इन्द्रियाणां** चक्षुरादीन्द्रियाणां **वशीकृतौ** वशीकरणे सति, **पुंसां** साधकजनानां **उपशान्तिः** इच्छानाम् उपशमनं **भवेत्** स्यात्, सा उपशान्तिः **संसारविषकान्तारसमुच्छेदकुठारिका** संसारः एव विषकान्तारः विषवृक्षसमुदायः, तस्य समुच्छेदाय विच्छेदाय कुठारिका कुठारभूता॥ सर्वेच्छोपशमने जाते संसारः सर्वथा निवर्तते। सर्वेषाम् इन्द्रियाणां शिवे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संयोजनेन एषोपशान्तिर्जायते । सैव संसारविषवृक्षच्छेदनसमर्था कुठारिका भवति ॥४४॥

इन्द्रियैरेव जायन्ते पापानि सुकृतानि च ।
तेषां समर्पणादीशे कुतः कर्मनिबन्धनम् ॥४५॥

व्याख्या— इन्द्रियसमर्पणेन कर्मबन्धनिवृत्तिरित्याह— **इन्द्रियैरिति**। **इन्द्रियैः एव** चक्षुरादीन्द्रियैरेव **पापानि** दुष्कृतानि **सुकृतानि च** पुण्यानि च **जायन्ते** उत्पद्यन्ते । **तेषाम् ईशे समर्पणात्** तेषां शिवे समर्पणवशात् **कर्मनिबन्धनं** पापपुण्यात्मककर्मबन्धनं **कुतः** कुत्रः ? न कुतोऽपि इत्यर्थः॥ कर्मवशाद् इन्द्रियाणि साध्वसाधुविषयेष्वभिनिवेशं जनयन्ति । अतस्तानि पापपुण्यकारणानि भवन्ति । यदि तानि परशिवे समर्प्यन्ते तर्हि तेषां व्यापाराः उपशान्ताः भवन्ति । तदा नास्ति कर्मबन्धलेशोऽपि ॥४५॥

प्रकाशमाने चिद्वह्नौ बहिरन्तर्जगन्मये ।
समर्प्य विषयान् सर्वान् मुक्तवज्जायते जनः ॥४६॥

व्याख्या— चिदग्नौ सर्वविषयसमर्पणेन मुक्तिरित्याह— **प्रकाशमाने** इति । **बहिरन्तर्जगन्मये** बाह्ये आभ्यन्तरे च विश्वस्वरूपे **चिद्वह्नौ** चिद्रूपाग्नौ **प्रकाशमाने** सति विराजमाने सति **जनः** साधकजनः **सर्वान् विषयान्** समस्तान् इन्द्रियविषयान् **समर्प्य** विनिवेद्य **मुक्तवज् जायते** मुक्त इव भवति ॥ 'मुक्तवज्जायते' इत्यनेन जीवन्मुक्त एव जायते इत्यवगन्तव्यम् । योगी सर्वं वस्तुजातं विश्वं चिदात्मके वह्नौ समर्पयति । तेन स सर्वेभ्यो मनोविकारेभ्यो मुक्तो भवति । इदं चेन्द्रियविषयाणां समर्पणं ज्ञानयज्ञमेव नान्यत् । उक्तं तथा भगवता— "सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥" (भ. गी., ४.२७) इति । अनेन ज्ञानयज्ञेन शिवयोगी भवति करणार्पकः। चित्प्रकाश एव, यो हृदये निहितः स भवति ज्ञानाग्निः, तस्मिन् मनो-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बुद्धीन्द्रियाणि हवीरूपेण हूयन्ते येन स शिवयोगी भवति संसारभयनिर्मुक्तो जीवन्मुक्तः ॥४६॥

चित्तद्रव्यं समादाय जगज्जातं महाहविः ।
चिद्वह्नौ जुह्वतामन्तः कुतः संसारविप्लवः ॥४७॥

व्याख्या— ज्ञानयज्ञस्यास्य किं साधनमित्यत्राह— **चित्तद्रव्यम्** इति । **जगज्जातं** विश्वसमुदायम्, पञ्चतन्मात्रस्वरूपिणं शब्दादिविषयजातं **महाहविः** महच्च तत् हविश्च महाहविः, उत्कृष्टं हविः, तादृशं **चित्तद्रव्यं** चित्तमेव द्रव्यं चित्तद्रव्यम्, मनोरूपहविर्द्रव्यं **समादाय** सङ्गृह्य **चिद्वग्नौ** चिद्रूपवह्नौ **जुह्वतां** होमं कुर्वतां शिवयोगिनां **संसारविप्लवः** संसाररूपबाधः **कुतः** कुत्र ? कुत्रापि नास्तीत्यर्थः ॥ ज्ञानयज्ञोऽयं सर्वद्रव्ययज्ञानामपेक्षया परमोत्कृष्टः । उक्तं च— "श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप । सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥" (भ. गी., ४.३३) इति । इदमपि तत्रोक्तम्— "यथेधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥" (भ. गी., ४.३७) इति । 'शिवोऽहं' भावरूपज्ञानाग्निः शिवयोगिनः सर्वकर्माणि भस्मसात्कुरुते । तदा नास्ति काऽपि संसारभीतिः ॥४७॥

आत्मज्योतिषि चिद्रूपे प्राणवायुनिबोधिते ।
जुह्वन् समस्तविषयान् तन्मयो भवति ध्रुवम् ॥४८॥

व्याख्या— शिवे सर्वेन्द्रियविषयहोमेन शिवमयो भवतीत्याह— **आत्मज्योतिषीति** । **चिद्रूपे** ज्ञानप्रकाशरूपे **प्राणवायुनिबोधिते** प्राणवायुना प्रज्वालिते **आत्मज्योतिषि** आत्मा परमात्मा एव ज्योतिः आत्मज्योतिः, तस्मिन्, परशिवस्वरूपे आत्मज्योतिषि, **समस्तविषयान्** सकलेन्द्रियविषयान् **जुह्वन्** हवीरूपेण समर्पयन् **तन्मयः** चिन्मयपरशिवस्वरूप एव **ध्रुवं** निश्चिततया **भवति** जायते ॥ आत्मज्योतिर्नाम शिवोऽहंरूपज्ञानप्रकाश एव । प्राणवायुनिबोधितत्वं नाम कुम्भकयोगेन प्रज्वालितत्वम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानप्रकाशरूपे कुम्भकयोगप्रज्ज्वालिते च आत्मज्योतिषि सर्वेन्द्रियविषयान् जुह्वन् शिवयोगी करणार्पको भवति । तेन स चिदग्निरूपपरशिव एव भवति ॥४८॥

इन्द्रियाणि समस्तानि शरीरं भोगसाधनम् ।
शिवपूजाङ्गभावेन भावयन् मुक्तिमाप्नुयात् ॥४९॥

व्याख्या— करणानां प्राकृतत्वेऽपि तज्जन्यसुखादि शिवार्पणयोग्यमित्याह— **इन्द्रियाणीति** । **समस्तानि** सर्वाणि **इन्द्रियाणि** चक्षुरादीनि **भोगसाधनं** भोगसाधनभूतं **शरीरं** च देहश्च **शिवपूजाङ्गभावेन** शिवपूजायाः अङ्गभावनया **भावयन्** समर्पणभावेन विचारयन् योगी **मुक्तिम् आप्नुयात्** मोक्षं प्राप्नुयात् ॥ यद्यपि करणजन्यसुखानि शरीरं च प्राकृतानि भवन्ति तथापि तेषां शिवपूजसाधनत्वेन भावनाद् योगी मुक्तिभाजनो भवति । कायार्पितस्थले यदुक्तमासीत् तस्य प्रसङ्गवशात् करणार्पितस्थले पुनर्निरूपणं कृतम् ॥४९॥

— इति करणार्पितस्थलम् —

६. अथ भावार्पितस्थलम् – (६८)

शिवे निश्चलभावेन भावानां यत्समर्पणम् ।
भावार्पितमिदं प्रोक्तं शिवसद्भाववेदिभिः ॥५०॥

व्याख्या— करणार्पितसम्पन्नस्य शिवयोगिनो भावार्पणमाह— **शिवे इति** । **यत् शिवे** यत् परशिवे **निश्चलभावेन** स्थिरभावेन **भावानां** शिवसंश्रितमानसचेष्टात्मनां श्रद्धानिष्ठाभक्त्यादिभावानां **समर्पणं** निवेदनम् **इदं** तदिदं **शिवसद्भाववेदिभिः** शिवस्य सद्भावः निजस्वरूपम्, तम् सद्भावं विदन्तीति शिवसद्भावेदिनः, णिनि प्रत्ययः, तैः, **भावार्पितम्** इति भावार्पितस्थलमिति **प्रोक्तं** कथितम् ॥ भावार्पितत्वं नाम शिवयोगिना स्थिराणां

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शुद्धानां च मनोवृत्तिरूपाणां भावानां शिवे समर्पितत्वम् । यद्यत् करोति शिवयोगी तत्तत्सर्वं परिशुद्धभावेन प्रोत्साहितम् । न केवलं कर्मफलानां परं सकलानां परिशुद्धभावानामपि शिवे समर्पणमत्र विहितम् । भावार्पितत्वेन तस्य शिवानन्दे निमज्जनं सिद्धम् ॥५०॥

चित्तस्थ सकलार्थानां मननं यत्तु मानसे ।
तदर्पणं शिवे साक्षान्मानसो भाव उच्यते ॥५१॥

व्याख्या— भावलक्षणमाह— **चित्तस्थेत्यादिना** । **मानसे** मनसि **चित्तस्थसकलार्थानां** चित्ते संस्कारकोशभूतायां बुद्धौ स्थितानां सकलानाम् अर्थानां **यत्तु मननं** यत्तु अनुभवाश्रयीकरणं **तत् साक्षात्** तत् साक्षत्तया **शिवे** परशिवे **अर्पणं** समर्पणं **मानसो भावः** मनोवृत्तिरूपो भाव इति **उच्यते** कथ्यते ॥ शिवयोगीदं कर्तुं समर्थः, तथा करोति च । आजन्मतो मनुष्यो बाह्यवस्तूनां ज्ञानम् चक्षुरादीन्द्रियद्वारा सङ्गृह्णाति । मनः सुखदुःखादीनाम् अनुभवं प्राप्नोति । तथार्जिताः सर्वे अनुभवाः संस्काररूपे पर्यवस्यन्तो बुद्धौ सङ्गृहीता भवन्ति । इदं सङ्ग्रहणकार्यं जन्मस्वनेकेषु प्रचलति । एवं चित्तं (बुद्धिः) संस्कारकोशो भवति । कारणभूतसन्दर्भे प्राप्ते ते संस्कारा अभिव्यक्ताः सन्तो मनसि क्षोभं जनयन्ति । इयं च स्थितिः प्राकृतानां जनानाम् । शिवयोगरतानां तु तथा न भवति । परिपक्वाध्यात्मस्थितिं प्राप्तवन्तः शिवयोगिवर्याः परिनिष्ठशिवोऽहंभाववशाद् अनुभवविषयीकृतान् सर्वान् भावान् परशिवे समर्पयन्ति । अतः इदं भावार्पितं भवति ॥५१॥

भाव एव हि जन्तूनां कारणं बन्धमोक्षयोः ।
भावशुद्धौ भवेन्मुक्तिर्विपरीते तु संसृतिः ॥५२॥

व्याख्या— भावस्य कार्यमाह— **भाव इति** । **जन्तूनां** प्राणिनां **भावः** **एव** मनोभाव एव **बन्धमोक्षयोः** बन्धस्य मोक्षस्य च, संसारस्य मुक्तेश्च इत्यर्थः, **कारणं** हेतुः । **भावशुद्धौ** भावस्य निर्मलत्वे **मुक्तिः** **भवेत्** मोक्षः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्यात् **विपरीते तु** तदतिरिक्ते भावनैर्मल्याभावे तु **संसृतिः** संसारः ॥ "मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥" (ब्र. बिन्दु. उ., २) इति मन्त्रस्य संवादी अस्य श्लोकस्य विषयः ॥५२॥

भावस्य शुद्धिराख्याता शिवोऽहमिति योजना ।
विपरीतसमायोगे कुतो दुःखनिवर्तनम् ॥५३॥

व्याख्या— का नाम भावशुद्धिरित्यत्राह— **भावस्येति** । **शिवोऽहम् इति योजना** शिवोऽहमिति समायोगः **भावस्य शुद्धिः** भावशुद्धिः इति **आख्याता** कथिता । **विपरीतसमायोगे** 'नाहं शिवः' इति पूर्वोक्तस्य विरुद्धसमायोगे, **दुःखनिवर्तनं कुतः** सांसारिकदुःखनिवृत्तिः कुतः? कुतोऽपि नास्तीत्यर्थः ॥ यदा बाह्यविषयसंसर्गवशाद् यानि सुखान्युत्पद्यन्ते तानि सर्वाणि परशिवे निरहंकारभावेन समर्प्यन्ते तदा भावशुद्धिर्जायते । भावशुद्धिर्नाम 'शिवोऽहम्' इति भावसमावेशः । भावशुद्ध्या मुक्तिर्विपरीते तु संसारः ॥५३॥

भोक्ता भोग्यं भोजयिता सर्वमेतच्चराचरम् ।
भावयन् शिवरूपेण शिवो भवति वस्तुतः ॥५४॥

व्याख्या— भोक्त्रादि सर्वं शिवत्वेन भावनात् शिवत्वमेवेत्याह— **भोक्तेति** । **भोक्ता** जीवः **भोग्यं** भोगवस्तु **भोजयिता** भोगप्रवर्तकः शिवः, **चराचरम् एतत्सर्वं** जगद्रूपमिदं सर्वं **शिवरूपेण** परशिवस्वरूपेण **भावयन्** दृढं विचारयन् शिवयोगी **वस्तुतः** परमार्थतः **शिवो भवति** शिव एव भवति । उक्तं च— "भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ।" (श्वे. उ., १.१२) इति । 'त्रिविधं ब्रह्म' इत्युक्तम् । ब्रह्मणः अभिव्यक्तस्वरूपत्वाद् विश्वमिदं भोक्ता भोज्यं (भोग्यं) प्रेरयिता चेति वस्तुत्रयघटितम् इत्यवगन्तव्यम् । सर्वान्तर्यामिभूतः शिवस्तत्र प्रेरकः । स्वीयेन चिदानन्देन सर्वान् प्रेरयति । सर्वान्तर्यामित्वे सति सर्वातीतत्वं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वव्यापकत्वमपि तस्य । वस्तुत्रये भोक्ता जीवः, भोज्यं सर्वं भोग्यवस्तु प्रेरकश्च परशिवः । वस्तुत्रयमिदं शैवशास्त्रे पशुः, पाशः, पतिश्चेति प्रसिद्धम् । त्रयमपीदं शिवरूपेण भावयन् योगी स्वयमेव शिवो भवति । इदमपि भावार्पितत्वम् ॥५४॥

मिथ्येति भावयन् विश्वं विश्वातीतं शिवं स्मरन् ।
सत्तानन्दचिदाकारं कथं बद्धुमिहार्हति ॥५५॥

व्याख्या— प्रकारान्तरेण भावनां निरूपयति— **मिथ्येति** । **विश्वं** सर्वं जगत् **मिथ्या इति** मिथ्याकल्पम् इति **भावयन्** विचारयन् **विश्वातीतं** विश्वोत्तीर्णं **सत्तानन्दचिदाकारं** च सच्चिदानन्दस्वरूपं च **शिवं** परशिवं **स्मरन्** ध्यायन् **कथं बद्धुमर्हति** कथं बन्धनं प्राप्तुम् अर्हति ? न कथमपि इत्यर्थः ॥ विश्वमत्र 'मिथ्या' इत्युक्तम् । जगत्सत्यत्ववादिनां वीरशैवानां मते विश्वमेव मिथ्येति न, परं तु 'इदं मम' इति ममकारः मिथ्या इत्यवगन्तव्यम् । अथवा शिवजीवसामरस्याख्ये जीवन्मुक्तस्थितौ शिवयोगिनो विश्वं मिथ्याप्राय इत्यवगन्तव्यम् । "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्" (ईश. उ., १) इत्युक्तरीत्या जगति ममत्वभावो भ्रान्तिरेव। "स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्" (ऋ. १०.९०.१) इति श्रुतेः प्रमाणेन शिवो विश्वातीतः सर्वव्यापकश्च । शिवः सच्चिदानन्दस्वरूप इति तु प्रसिद्धम् । एवं परशिवं ध्यायतः शिवयोगिनो न कापि बन्धस्य भीतिः ॥५५॥

सर्वं कर्मार्चनं शम्भोर्वचनं तस्य कीर्तनम् ।
इति भावयतो नित्यं कथं स्यात्कर्मबन्धनम् ॥५६॥

व्याख्या— भावनान्तरं कथयति— **सर्वम् इति** । **सर्वं कर्म** सकलं कर्म **शम्भोः** परशिवस्य **अर्चनं** सोपचारपूजा, **वचनं** वाक् **तस्य** परशिवस्य **कीर्तनं** स्तुतिः, **इति भावयतः** एवं विचारयतो योगिनः **कथं कर्मबन्धनं स्यात्** कथं पापपुण्यरूपकर्मफलेन बन्धः स्यात्? कथमपि न भवतीत्यर्थः ॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

'सर्वं कर्मार्चनम्' इति यदुक्तं तस्य प्रपञ्चः शङ्करेण दत्तोऽस्ति। तथा हि— "आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं, पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः। सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो, यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्॥" (शि.मा.पू.स्तो.,४) इति। एवं शिवे समर्पितसर्वकर्मवचनः शिवयोगी कर्मपाशेन बद्धो न भवति। (पश्यत— प्राणलिङ्गपूजावैभवम्, सि.शि., १२.१४-२०) ॥५६॥

सर्वेन्द्रियगतं सौख्यं दुःखं वा कर्मसम्भवम्।
शिवार्थं भावयन् योगी जीवन्मुक्तो भविष्यति ॥५७॥

व्याख्या— जीवन्मुक्तिदायिनीं भावनाम् उक्त्वा भावार्पितस्थलं समापयति— **सर्वेन्द्रियगतम्** इति। **सर्वेन्द्रियगतं** चक्षुरादिसर्वेन्द्रियेषु विद्यमानं **कर्मसम्भवं** कर्मफलरूपेण अनुभूयमानं **सौख्यं वा** सुखं वा, **दुःखं वा** शोकं वा **शिवार्थं** शिवायेदं न ममेति **भावयन्** ध्यायन् **योगी** शिवयोगी **जीवन्मुक्तो भविष्यति** जीवन्नेव मोक्षभाजनो भवति॥ शिवयोगी सर्वान् इन्द्रियविषयकानुभवान् कर्मफलानि सर्वाणि परशिवायेति ध्यायन् जीवन्नेव मुच्यते। उक्तं च शङ्कराचार्येण— "वर्तमानेऽपि देहेऽस्मिन् छायावदनुवर्तिनि। अहंताममताऽभावो जीवन्मुक्तस्य लक्षणम्॥" (वि. चू., ४३२) इति ॥५७॥

— इति भावार्पितस्थलम् —

७. अथ शिष्यस्थलम् – (६९)

शासनीयो भवेद्यस्तु परकायेन सर्वदा।
तत्प्रसादात्तु मोक्षार्थी स शिष्य इति कीर्तितः ॥५८॥

व्याख्या— शिष्यलक्षणमाह— **शासनीय** इति। यः यः साधकः **सर्वदा** सर्वकालं **परकायेन** परकायशिवयोगिना **शासनीयो** शिक्षणीयः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भवेत् स्यात्, यश्च **तत्प्रसादात् तु** तस्य परयोगिनः अनुग्रहरूपप्रसादात् तु **मोक्षार्थी** मोक्षकाङ्क्षी च **सः शिष्यः** सः शिष्याभिधानः **इति कीर्तितः** इति प्रशंसितः ॥ अयं च जीवन्मुक्तस्य शिवयोगिनः कर्तव्य-विशेषः। अत्र शिवयोगी गुरुर्मित्रं दार्शनिक इति त्रिपुटीभावं निर्वहन् अध्यात्मसिद्धिसोपानम् आरोहतः साधकशिष्यान् मार्गदर्शनिनाऽनु-गृह्णाति। अतोऽयं वीरशैवमार्गः "महायानः" यस्मिन् मोक्षान्वेषणपरा निजमुक्तिमात्रे न विश्रान्ताः परम् अन्येषां साधकशिष्याणां मुक्तिं प्रति नयनपरा अपि भवन्ति। "सिद्धिदः सिद्धवृन्दस्य" इति रेणुकाचार्यस्तु सुप्रसिद्धः। गुरुणा परीक्ष्य स्वीकृतः साधक एव शिष्यः, यथा यमेन परीक्ष्य शिष्यत्वेन स्वीकृतो नचिकेताः। परकायशिवयोगी तु शिष्यमार्ग-दर्शने कुशलः, शिष्योऽपि कुशलः स्वादित्यपेक्षा। तदुक्तम्— "आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः" (कठ. उ., २.७) इति। अयमेव सूक्ष्मो बिन्दुः शिष्यस्थलस्य ॥५८॥

भावो यस्य स्थिरो नित्यं मनोवाक्कायकर्मभिः।
गुरौ निजे गुणोदारे स शिष्य इति गीयते ॥५९॥

व्याख्या— प्रकारान्तरेण शिष्यलक्षणमाह— **भाव इति। यस्य** यस्य साधकस्य **भावः** निष्ठाभावः **गुणोदारे** ज्ञानवैराग्यादिगुणोत्कृष्टे **निजे गुरौ** स्वगुरुवर्ये **मनोवाक्कायकर्मभिः** मनसा वाचा कायकर्मणा च **स्थिरः** दृढः, **सः** तादृशः **शिष्यः इति** शिष्याभिधानः इति **गीयते** कीर्त्यते ॥ साक्षात् परशिवरूपो परयोगी त्रिकरणपूर्वकसेवानिरताय मोक्षैकस्थिरनिष्ठाय शिष्यायाऽऽध्यात्मज्ञानं बोधयति, तं मोक्षपर्यन्तं नयति च ॥५९॥

शान्तो दान्तस्तपःशीलः सत्यवाक् समदर्शनः।
गुरौ शिवे समानस्थः स शिष्याणामिहोत्तमः ॥६०॥

व्याख्या— उत्तमशिष्यलक्षणमाह— **शान्त इति। शान्तः** अन्त-रिन्द्रियनिग्रहसम्पन्नः, **दान्तः** बाह्येन्द्रियनिग्रहयुक्तः **तपश्शीलः** तपः एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शीलं यस्य सः, अष्टाङ्गयोगनिरतः **सत्यवाक्** सत्यवचनः **समदर्शनः** उच्चनीचादिषु समानदृष्टिमान् **गुरौ शिवे** आचार्ये परशिवे च **समानस्थः** समानगौरवयुक्तः (यः भवति) **स शिष्याणां** स एव शिष्याणां मध्ये इह अत्र लोके **उत्तमः** श्रेष्ठः ॥ पारमेश्वरागमे निजवीरशैवभक्तस्य षडङ्गानि यान्युक्तानि तानि शिष्योत्तमस्य भवितुमर्हन्ति । तथा हि— "शमो दमस्तितिक्षोपरतिः श्रद्धासमाधयः । षडङ्गानि महादेवि वीरशैवस्य लिङ्गिनः ॥ यद्येकेनापि चैतेषां विहीनो हीन एव सः । अङ्गलोपे भवेद् व्यङ्गी तेनाधो निपतेद्ध्रुवम् ॥" (पार. आ., १०.७२-७३) इति षडङ्गानि । वीरशैवशब्दनिष्पत्त्यनुसारं शिव-जीवैक्यविद्यायां रममाणो शैवो वीरशैवः । स एव निजवीरशैवः । (पश्यत— सि. शि., ५.१५-१६) । तादृशो वीरशैव एवात्र शिष्यशब्देन ज्ञायते । तस्य सत्यवाक्त्वम्, समदर्शनत्वम्, गुरौ शिवे समभावश्चाऽन्यत्र निरूपिताः । तथाहि— (१) "गुरु-मन्त्रात्मदैवेषु तथैवासनमुद्रयोः । अभेदभावनाधीरं सत्यवादिनमास्तिकम्" (पार. आ., २.७१-७२) इति; (२) "युक्त इत्युच्यते योगी समलोष्टाश्म-काञ्चनः ।" (भ. गी., ६.८) इति; (३) "समः शत्रौ च मित्रे च तथा मानापमानयोः । शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥" (भ. गी., १२.१८) इति; (४) "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैताः कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" (श्वे. उ., ६.२३) इति च ॥६०॥

गुरुमेव शिवं पश्येच्छिवमेव गुरुं तथा ।
नैतयोरन्तरं किञ्चिद्विजानीयाद्विचक्षणः ॥६१॥

शिवाचारे शिवध्याने शिवज्ञाने च निर्मले ।
गुरोरादेशमात्रेण परां निष्ठामवाप्नुयात् ॥६२॥

व्याख्या— शिष्यः कथं स्यादित्यत्राह— गुरुम् इति । **गुरुम् एव** आचार्यम् एव **शिवं पश्येत्** परशिवम् इति भावयेत्, **तथा** एवमेव **शिवम् एव** परशिवम् एव **गुरुम्** आचार्यं भावयेत् । **विचक्षणः** विवेकशाली शिष्यः **एतयोः** अनयोः शिवगुर्वोः **अन्तरं** भेदं **किञ्चिद्** किञ्चिदपि न

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विजानीयात् न अवगच्छेत् ॥ **गुरोः** श्रीगुरोः **आदेशमात्रेण** आज्ञामात्रेण (शिष्यः) **शिवाचारे** शिवसम्बन्धिनि आचारे, **शिवध्याने** शिवनिष्ठध्याने, **निर्मले** दोषरहिते **शिवज्ञाने** शिवोऽहंरूपात्मज्ञाने च **परां निष्ठां** परमोत्कृष्टं विश्वासं **अवाप्नुयात्** प्राप्नुयात् ॥ पश्यत— (१) "ओम् आत्मा परशिवद्वयो गुरुः शिवः । गुरुः शिव एव लिङ्गम् ।" (रुद्र. उ., उ. सं., २.३०८-३०९) इति; (२) "यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः । गुरुर्वा शिव एवाथ विद्याकारेण संज्ञितः ॥" [चं. आ., उ.भा., क्रि. पा., २.७ — विद्याकारेण = ज्ञानस्वरूपेण] इति । तादृशो गुरुः शिष्यस्य मार्गदर्शकः । अत्र परयोग्येव गुरुः । शिष्यश्च त्रिकरणसेवानिष्ठः ॥ गुरुप्रसादभाजन एव शिष्यो मोक्षयोग्यः । तदुक्तम्— "गुरुप्रसादपात्रं यः स हि मोक्षाय कल्पते । न मुक्तिमूलमन्यद्धि विहाय गुरुसत्कृपाम् ॥" (चं. आ., उ. भा., क्रि. पा., २.९६) इति ॥६१-६२॥

ब्रह्माण्डबुद्बुदोद्भूतं मायासिन्धुं महत्तरम् ।
गुरोः कवलयत्याशु कटाक्षवडवानलः ॥६३॥

गुरोः कटाक्षवेधेन शिवो भवति मानवः ।
रसवेधाद् यथा लोहो हेमतां प्रतिपद्यते ॥६४॥

व्याख्या— गुरुकृपामहत्त्वं युग्मेनाह— **ब्रह्माण्डेत्यादिना** । **ब्रह्माण्डबुद्बुदोद्भूतं** बुद् इत्यव्यक्तध्वनिं बुन्दति करोति इति, बुद्बुदः [बुन्दिर् निशायने 'कः' (अ) – वार्तिक – पा. अ. २.३.५] ब्रह्माण्डाः एव बुद्बुदाः, तेषाम् उद्भूतं यस्मात् सः, तम्, ब्रह्माण्डबुद्बुदोद्भूतम्, तादृशं **महत्तरं** महतामपि महत्तरः, तम्, **मायासिन्धुं** माया एव सिन्धु मायासिन्धुः मायासमुद्रः, तम्, **गुरोः** श्रीगुरोः **कटाक्षवडवानलः** कटाक्षः एव वडवानलः वडवाग्निः **आशु** शीघ्रं **कवलयति** ग्रसते ॥ **यथा** येन प्रकारेण **रसवेधात्** पारदस्य सम्यगावेशात् **लोहः** आयः **हेमतां** सुवर्णतां **प्रतिपद्यते** प्राप्नोति, तथा **गुरोः** श्रीगुरोः **कटाक्षवेधेन** कटाक्षस्य समावेशात् **मानवः** मनुष्यः **शिवः** परशिव एव **भवति** आस्ते ॥ श्रीगुरोः कृपाकटाक्षः संसारव्याधेरत्यन्तं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिणामकारि औषधम् । सूक्ष्मागमोत्तरे श्रीगुरुकटाक्षः संसारदावाग्ने-रुपशमनकार्यामृतम् इत्युक्तम् । तथा हि— "संसारदावदहनज्वाला येन विनाशिता । कटाक्षामृतवर्षेण को हि तत्सदृशो भवेत् ॥" (क्रि.पा., ५.२४) इति । तादृशस्य श्रीगुरोर्न कोऽपि सदृशो भवति । प्रसिद्ध-दृष्टान्तद्वारा कथं शिष्यः शिवो भवेदिति निरूप्यते ॥६३-६४॥

न लङ्घयेद् गुरोराज्ञां ज्ञानमेव प्रकाशयन् ।
शिवासक्तेन मनसा सर्वसिद्धिमवाप्नुयात् ॥६५॥

व्याख्या— शिष्यः स्वगुरोराज्ञां न लङ्घयेदित्याह— **नेति** । **ज्ञानमेव** शिवाद्वैतज्ञानमेव **प्रकाशयन्** अभिव्यञ्जयन् शिष्यः **गुरोः आज्ञां** श्रीगुरोः आदेशं **न लङ्घयेत्** न अतिक्रामेत् । सः **शिवासक्तेन** शिवस्मरणनिष्ठेन **मनसा** चित्तेन **सर्वसिद्धिं** सकलां निश्रेयसादिसिद्धिम् **आप्नुयात्** लभेत् ॥ तदुक्तम्— "श्रेयोऽर्थी यदि गुर्वाज्ञां मनसाऽपि न लङ्घयेत् । गुर्वाज्ञा-पालको यस्मात् ज्ञानसम्पत्तिमश्नुते ॥" (चं.आ., उ.भा., क्रि.पा., २.१०) इति । श्रीगुरुकृपावशादेव शिष्यः शिवाद्वैतज्ञानं तज्ज्ञानसाक्षात्काररहस्यं च लभते । न केवलं श्रुतेन तत्साक्षात्कारं कोऽपि प्राप्तुं शक्यते । तदुक्तम्— "अन्धो यथाऽर्थजातं च द्रष्टुं समभिकाङ्क्षति । गुरुं विना तथा मुक्तिं प्राप्तुमिच्छति मूढधीः ॥" (सू. आ., उ. भा., क्रि. पा., ५.२६) इति । अतः शिष्यः— "सर्वप्रयत्नेन तस्याज्ञां शिरसा वहेत्" (चं. आ., उ. भा., क्रि. पा., २.९) । अत एवोक्तम्— "न विना गुरुणा सिद्ध्यै साधनानि भवन्त्यलम्" (चं. आ., उ. भा., क्रि. पा., २.५) इति ॥६५॥

शिवादन्यज्जगन्मिथ्या शिवः संवित्स्वरूपकः ।
शिवस्त्वमिति निर्दिष्टो गुरुणा मुक्त एव सः ॥६६॥

व्याख्या— गुरूपदेशमहत्त्वमाह— **शिवाद्** इति । **जगद्** इदं विश्वं **शिवाद् अन्यद्** परशिवाद् भिन्नम् इति **मिथ्या** असत्यम् । **शिवः** परशिवः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संवित्स्वरूपकः चित्स्वरूपसंपन्नः । **शिवः त्वम् इति** "तत् त्वम् असि" (छां. उ., ६.८.७) इत्युक्तप्रमाणेन शिव एव त्वम् इति **गुरुणा** आचार्येण **निर्दिष्टः** निर्देशः दत्तः इति चेत् **सः** शिष्यः **मुक्तः एव** जीवन्मुक्त एव ॥ इदमेव सत्यम् । 'संवित्स्वरूपकः' इत्यनेन विश्वस्य चिदन्तर्गतत्वात् चिन्मयत्वम्, नो चेत् चिद्बाह्यत्वेन विद्यते इत्यत्र मानाभावात्, अतो विश्वं शिवादन्यदिति सर्वथाऽसदेव इत्यवगन्तव्यम् । "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" (छां. उ., ६.८.७) इत्येषा भगवती श्रुतिर्जगत्सत्यत्वमेव प्रतिपादयति । अस्याः श्रुतेरङ्गत्वेन विद्यमानं "तत्त्वमसि" इति वाक्यं जीवितस्य रहस्यं गुरुद्वारा उद्घाटयति । तेन शिष्यः जीवन्मुक्तो भवति ॥६६॥

गुरोर्लब्ध्वा महाज्ञानं संसारामयभेषजम् ।
मोदते यः सुखी शान्तः स जीवन्मुक्त एव हि ॥६७॥

व्याख्या— उक्तमेव विशदीकृत्य शिष्यस्थलं समापयति— **गुरोरिति**। गुरोः श्रीगुरोः सकाशात् **संसारामयभेषजं** संसारः एव आमयः, तस्य भेषजम्, संसाररोगोपशमनहेतुभूतम् औषधं **महाज्ञानं** महत् ज्ञानं महाज्ञानं "तत्त्वमसि" इत्येवंरूपं महावाक्यज्ञानं **लब्ध्वा** प्राप्य **यः** यः साधकः **मोदते** आनन्दमनुभवति **सः** सः साधकः **जीवन्मुक्त एव हि** जीवन्नेव मुक्त एव, इति प्रसिद्धमेव ॥ महाज्ञानं नाम तत्त्वमस्यादिमहावाक्यज्ञानम् । "तत् त्वम् असि" इत्यनया सह "अहं ब्रह्माऽस्मि" (बृ. उ., १.४.१०), "सर्वं खल्विदं ब्रह्म" (छां. उ., ३.१४.१), इयाद्यः श्रुतयः महावाक्यशब्देन व्यवह्रियन्ते । षट्स्थलमार्गे भक्तिविकासक्रमेण प्रसादिस्थले अवधान-भक्तिबलात् सर्वदा शिवभावजागृतचित्तवान् शिष्यो गुरोः सकाशात् महावाक्यज्ञानं प्राप्य जीवन्मुक्तः भवतीति भावः । तदेवोक्तम्— "भक्त्यभ्यासात् समुत्पन्नं ज्ञानं च सुदृढं भवेत् । ज्ञानेन योगमाप्नोति ताभ्यां सिद्धो विमुच्यते ॥" (पार. आ., २२.६१) इति ॥६७॥

— इति शिष्यस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

८. अथ शुश्रूषुस्थलम् – (७०)

बोध्यमानः स गुरुणा परकायेन सर्वदा ।
तच्छुश्रूषारतः शिष्यः शुश्रूषुरिति कथ्यते ॥६८॥

व्याख्या— शुश्रूषुस्थलं प्रतिपिपादयिषुः ग्रन्थकारः शुश्रूषुलक्षणमाह— **बोध्यमान इति । सर्वदा** सर्वकालं **परकायेन** परमात्मकायेन **गुरुणा** आचार्येण **बोध्यमानः** उपदिश्यमानः **तच्छुश्रूषारतः** उपदेशश्रवणेच्छायुक्तः **शिष्यः** भक्तिसम्पन्नः साधकः **शुश्रूषुः** इति श्रोतुम् इच्छा शुश्रूषा, तद्वान् शुश्रूषुः इति **कथ्यते** निगद्यते ॥ परकायस्वरूपवान् श्रीगुरुराप्तशिष्याय शिवाद्वैतात्मिकाम् अध्यात्मविद्यां प्रददाति । तदुपदेशश्रवणे शिष्यस्य नितरामासक्तिरस्तीति शुश्रूषुत्वम् । सामान्यतः शुश्रूषाशब्दः 'सेवा' इत्यस्मिन्नर्थे प्रयुक्तः । अत्र तु श्रवणेच्छापरे यौगिकार्थे प्रयुक्तः । गुरुशिष्ययोर्मध्ये आप्तसंवादः प्रचलति । शिष्यः परमार्थतत्त्वजिज्ञासया केवलं गुरुं प्रति कांश्चन प्रश्नान् पृच्छति । गुरुस्तस्य प्रश्नान् समाधत्ते । तादृशसंवादस्य चित्रमेकं ७४-७९ श्लोकेषु दीयते ग्रन्थकृता ॥६८॥

किं सत्यं किं नु वाऽसत्यं क आत्मा कः परः शिवः ।
इति श्रवणसंसक्तो गुरोः शिष्यो विशिष्यते ॥६९॥

व्याख्या— इदानीं शिष्यकृतप्रश्नप्रकारं प्रदर्शयति— **किम् इति । सत्यं किं** नित्यं किम् ? **असत्यं वा किम्** अनित्यं वा किम् ? **आत्मा कः** जीवात्मा कः ? **परः शिवः कः** परशिवः कः ? इति **श्रवणसंसक्तः** प्रश्नानाम् उत्तरश्रवणे अत्यन्तम् आसक्तः **गुरोः शिष्यः** श्रीगुरोः शिष्यः **विशिष्यते** विशेषेण विराजते, सर्वोत्कृष्टत्वेन विराजते इत्यर्थः ॥ 'किं नित्यं किम् अनित्यम्' इत्यनेन शिष्य आत्मानात्मविवेकजिज्ञासुरित्यवगम्यते । आत्मा एव नित्यः सर्वमन्यत् शरीरेन्द्रियमनोबुद्ध्याद्यनित्यम्; एवमेव लौकिकाः पदार्थाः, अनुभवाः, सम्बन्धादयः नित्याः, सर्वमन्यद् वैविध्यमयं विश्वम् सर्वदा अनित्यम् । अस्मिन् श्लोके उद्भाविताः प्रश्ना आधारभूताः।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समीचीनानि तेषाम् उत्तराणि परमप्राज्ञेन गुरुणैव प्रदातुं शक्यानि। केवलसेवादुरन्धराणां शिष्याणामपेक्षया गुरोः सकाशाद् अध्यात्मसम्बन्धिप्रश्नानामुत्तरशुश्रूषुः शिष्यो विशिष्यते। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ. उ., २.४.५) इति श्रुत्युक्तदिशाऽऽत्मदर्शने श्रवणमेव प्रथमं सोपानम्। तदेवात्रोक्तम् ॥६९॥

श्रुत्वा श्रुत्वा गुरोर्वाक्यं शिवसाक्षात्क्रियावहम्।
उपशाम्यति यः स्वान्ते स मुक्तिपदमाप्नुयात् ॥७०॥

व्याख्या— पूर्वोक्तशिष्यस्य श्रेष्ठतामाह— **श्रुत्वा इति। यः यः** शुश्रूषुः शिष्यः **शिवसाक्षात्क्रियावहं** शिवस्य प्रत्यक्षीकरणसमर्थं **गुरोः वाक्यं** श्रीगुरोः बोधनं **श्रुत्वा श्रुत्वा** पुनः पुनः निशम्य **स्वान्ते** स्वान्तरङ्गे **उपशाम्यति** शान्तो भवति **सः** सः शिष्यः **मुक्तिपदं** मुक्तस्थितिं **आप्नुयात्** लभेत ॥ मोक्षं काङ्क्षमाणेन शुश्रूषुणा शिष्येण चित्तोपशमनं प्रथमं साधनीयम्। चित्तोपशमनं तु पौनःपुन्येन गुरूपदेशश्रवणेन प्राप्तुं शक्यते। महावाक्यानां स्वानुभवपूर्वकसाक्षात्कारव्यञ्जकं गुरूपदेशश्रवणं कृत्वा शिष्यः स्वयमेव मनननिदिध्यासद्वारा परिपुष्टानुभवं प्राप्य मुक्तिपदं प्राप्नोति। शिवोऽहंभावसाक्षात्कारेण शिवानन्दे निमज्जतीत्यर्थः ॥७०॥

न बुध्यति गुरोर्वाक्यं विना शिष्यस्य मानसम्।
तेजो विना सहस्रांशोः कथं स्फुरति पङ्कजम् ॥७१॥

व्याख्या— गुरुबोधं विना शिष्यस्य जागरणं न भवतीति सदृष्टान्तम् आह— **नेति। गुरोः वाक्यं विना** श्रीगुरोः उपदेशवचनं विना **शिष्यस्य** शुश्रूषुः **मानसं** चित्तं **न बुध्यति** न जागृतं भवति। **सहस्रांशोः तेजो विना** सूर्यस्य किरणप्रकाशं विना **पङ्कजं** कमलं **कथं स्फुरति** केन विधानेन विकासं प्राप्नोति ? न कथञ्चिदपि विकासं प्राप्नोतीत्यर्थः ॥ अत्र दृष्टान्तालङ्कारः। लक्षणमुक्तं प्रागेव। यथा सूर्यस्य किरणैः कमलं विकासं प्राप्नोति तथा गुरोरुपदेशेन शिष्यस्य मानसं जागृतं भवति (विकासं प्राप्नोति इत्यर्थः)।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तदर्थं शिष्याय गुरुरेव शरणम् । अत एवोक्तम्— "परीक्ष्य लोकान्-कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥" (मुं.उ., १.२.१२) इति । ये चाहङ्कारवशाद् स्वार्जितेन शास्त्रज्ञानेनैव शिवतत्त्वं ज्ञातुं समर्था वयम् इति मन्यन्ते तेषां कृते भगवत्याः श्रुतेरियं पूर्वसूचना । शास्त्र-ज्ञानदुरन्धरत्वेऽपि कोऽपि श्रीगुरोः कृपापूर्वकं मार्गदर्शनं विना आत्म-साक्षात्कारं प्राप्तुं न पारयति । श्रीशङ्कराचार्यः श्रुतिशासनं समर्थयति । तथा हि— "शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात्" (मुं.उ., १.२.१२, शाङ्करभाष्यम्) इति शङ्कराचार्यस्य स्पष्टवचनम् ॥७१॥

सूर्यस्योदयमात्रेण सूर्यकान्तः प्रकाशते ।
गुरोरालोकमात्रेण शिष्यो बोधेन भासते ॥७२॥

व्याख्या— दृष्टान्तान्तरद्वारा तदेव समर्थयति— **सूर्यस्येति** । **सूर्यस्य** तिग्मांशोः **उदयमात्रेण** केवलं उदयेन **सूर्यकान्तः** सूर्यकान्तशिला **प्रका-शते** प्रकाशं व्यनक्ति । **गुरोः आलोकमात्रेण** श्रीगुरोः कृपादृष्टिमात्रेण **शिष्यः** शुश्रूषुनामा शिष्यः **बोधेन भासते** ज्ञानेन प्रकाशते ॥ यथा सूर्यस्य किरणैर्विना सूर्यकान्तः न प्रकाशते तथा गुरोः कृपादृष्टिं विना शिष्यः ज्ञानप्रकाशं न लभते । यदा गुरोः कृपापूर्वकं मार्गदर्शनेन शिष्यस्य चित्तं ज्ञानेन विकसति तदा एव सः शिवोऽहंज्ञानेन तत्साक्षात्कारेण च कृतकृत्यो भवति ॥७२॥

अद्वैतपरमानन्द-प्रबोधैकप्रकाशकम् ।
उपायं शृणुयाच्छिष्यः सद्गुरुं प्राप्य प्राञ्जलिः ॥७३॥

व्याख्या— तत्प्रबोधाय "गुरुमेवाभिगच्छेत्" इत्यादि (मुं. उ., १.२.१२) श्रुतिवचनानुसारं गुरुमेव प्राप्नुयादित्याह— **अद्वैतेत्यादिना** । **शिष्यः** शुश्रूषुनामकः शिष्यः **सद्गुरुं** श्रेष्ठं गुरुं **प्राप्य** गत्वा **प्राञ्जलिः** मुकुलितकरयुगलः सन् **अद्वैतपरमानन्दप्रबोधैकप्रकाशकम्** अद्वैतं शिव-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जीवयोः समरसैक्यरूपं द्वैतरहितत्वं, तस्य परमानन्दः उत्कृष्टानन्दः, तस्य प्रबोधः साक्षादनुभवः, तन्मात्रप्रकाशकः तदनुभवमात्रं प्रकाशयति इति तत्प्रकाशकः, तम्, अद्वैतपरमानन्दानुभवमात्रस्य प्रकाशकम् इत्यर्थः, तादृशं **उपायं** रहस्यात्मकम् उपायं **शृणुयात्** श्रवणविषयीकुर्यात् ॥ अद्वैत-परमानन्दो नामाऽद्वैतपरमानन्दस्य साक्षादनुभवः । शिष्यस्तत्प्रकाशकम् उपायं गुरोः सकाशात् प्राप्नुयात् ॥७३॥

किं तत्त्वं परमं ज्ञेयं केन सर्वे प्रतिष्ठिताः ।
कस्य साक्षात्क्रिया मुक्तिः कथयेति समासतः ॥७४॥

व्याख्या— गुरुशिष्ययोर्मध्ये प्रश्नोत्तरीप्रकारं प्रदर्शयन् प्रथमं शिष्य-कृतप्रश्नप्रकारमाह— **किम्** इति । **किं** कीदृशं **ज्ञेयं** ज्ञातुं योग्यं **परमं** परमार्थं **तत्त्वं** सत्यम्? **केन** केन चैतन्येन **सर्वे** चराश्च अचराश्च **प्रतिष्ठिताः** संस्थापिताः ? **कस्य** कस्य चैतन्यस्य **साक्षात्कारेण** साक्षात्क्रियया **मुक्तिः** मोक्षः भवेत् ? **समासतः** संग्रहेण **कथय** वद ॥ श्वेताश्वतरश्रुतौ परम-सत्यमुद्दिश्य प्रश्ना उद्भाविताः समुचितोत्तराणि दत्तानि च । तथा हि – "किं कारणम् ? ब्रह्म, कुतः स्म जाताः ? जीवाम केन ? क्व च सम्प्रतिष्ठाः ? अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ।" (श्वे.उ., १.१) । श्लोकेऽस्मिन्नुद्भाविताः प्रश्नाः श्वेताश्वतरीयमन्त्रे उद्भा-वितैः प्रश्नैः संवादिनः सन्ति । तथा हि— 'किं तत्त्वं परमं ज्ञेयम् ?' — अयं श्रुत्युक्तेन 'किं कारणम् ?' इत्यनेन संवादी । तत् परमतत्त्वमेव सर्वकारणं भवति । 'केन सर्वे प्रतिष्ठिताः ?' — अयं तत्र 'जीवाम केन ?', 'अधिष्ठिताः केन सुखेतरेषु वर्तामहे ?' इत्युभयप्रश्नाभ्यां संवादी । 'कस्य साक्षात्क्रिया मुक्तिः ?' इत्ययं प्रश्नः तत्र 'क्व च सम्प्रतिष्ठाः ?' इत्यनेन संवादी । मुक्तौ कीदृशे ब्रह्मणि वयमेकत्वेन अवस्थिताः ? इत्यस्य अर्थः । एते प्रश्नाः परशिवस्य सृष्टि-स्थिति-लय-तिरोधानाऽनुग्रहाख्यपञ्चकृत्य-सम्बद्धा भवन्ति । परशिवस्य वैश्विकलीलान्तर्गतत्वेन पञ्चकृत्यान्युक्तानि। परतत्त्वसाक्षात्काररूपा मुक्तिरेव मानवजीवितस्य परमं ध्येयम् । सा एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

'परा गतिः'। 'परमं पदम्' इत्यपि कथ्यते। सर्वे तत्पदं प्राप्तुम् असमर्थाः। केवलं ते एव योगिनस्तत्प्राप्नुवन्ति ये परशिवानुग्रह-गुरुकृपाभ्यां लब्धाशीर्वादा भवन्ति। तेषां मनसि उद्भूतानां प्रश्नानां समाधानं श्रीगुरोः सकाशात् प्राप्य परमसिद्धिम् आप्नुवन्ति। तादृशप्रश्नानां समाधाने प्रायोगिकमार्गदर्शने च श्रीगुरुरेव ज्ञानेन स्वानुभवेन च प्रमाणम् ॥७४॥

इति प्रश्ने कृते पूर्वं शिष्येण नियतात्मना।
ब्रूयात्तत्त्वं गुरुस्तस्मै येन स्यात् संसृतेर्लयः ॥७५॥

व्याख्या— कृतप्रश्नस्य शिष्यस्य संशयनिवृत्त्यर्थं श्रीगुरुः समाधत्ते इत्याह— **इति इति**। **इति** एवं **पूर्वं** प्रागेव **शिष्येण** तत्त्वजिज्ञासुना अन्तेवासिना **प्रश्ने कृते** प्रश्ने पृष्टे सति **गुरुः** श्रीगुरुः **तस्मै** तमुद्दिश्य **तत्त्वं** परमसत्यं, **ब्रूयात्** दद्यात्, **येन** तत्त्वज्ञानेन **संसृतेः** **लयः** संसारस्य नाशः **स्यात्** भवेत् ॥ तत्त्वज्ञानपूर्वकतत्त्वसाक्षात्कारान्मुक्तिर्निश्चिता। मुक्तिर्नाम संसारलयः ॥७५॥

शिव एव परं तत्त्वं चिदानन्दसदाकृतिः।
स यथार्थस्तदन्यस्य जगतो नास्ति नित्यता ॥७६॥

व्याख्या— श्रीगुरुः क्रमेण उत्तरं ददाति। तत्र प्रथमप्रश्नस्य 'किं तत्त्वं परमं ज्ञेयम्' इत्यस्य उत्तरम्— **शिव एवेति**। **चिदानन्दसदाकृतिः** सच्चिदानन्दस्वरूपः **शिवः एव** परशिव एव **परं तत्त्वं** परमसत्यम्। **स यथार्थः** सः शिव एव नित्यः, **तदन्यस्य** तद्व्यतिरिक्तस्य **जगतः** विश्वस्य **नित्यता** नित्यत्वं **नास्ति** न भवति ॥ शिव एव नित्योऽन्यत्सर्वम् अनित्यम् इत्यर्थः। अत्र शब्द एव मौनं वहति। परम् अनुभावशक्तिगर्भितं श्रीगुरोर्वचनं शिष्यमानसं परमार्थतत्त्वेन व्याप्नोति ॥७६॥

अयथार्थप्रपञ्चोऽयं प्रतितिष्ठति शङ्करे।
सदात्मनि यथा शुक्तौ रजतत्त्वं व्यवस्थितम् ॥७७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— 'केन सर्वे प्रतिष्ठिताः ?' इत्यस्य द्वितीयप्रश्नस्योत्तरमाह— **अयथार्थेत्यादिना** । **अयम्** एषः **अयथार्थप्रपञ्चः** अनित्यः प्रपञ्चः **शङ्करे** परशिवे **प्रतितिष्ठति** आधेयत्वेन तिष्ठति । **यथा** येन प्रकारेण **सदात्मनि** अस्तीति विद्यमाने **शुक्तौ** शङ्के, "शुक्तिः शङ्खनके शङ्खे कपालखण्डद्रुग्रुजोः" इति हैमः, **रजतत्त्वं** रूप्यत्वं, रजतस्य भावः, 'दुर्वर्णं रजतं रूप्यम्' इत्यमरः (२.६८८), **व्यवस्थितं** तिष्ठति ॥ सदात्मा नाम ज्ञानकर्मेन्द्रियाणां गोचरीभूतत्वात् सत्स्वरूपः, तस्मिन् सदात्मनि । यथा तादृशे शुक्तिकाशकले रजतत्त्वं ज्ञानेन्द्रियमात्रगोचरीभूतं तिष्ठति तथा परशिवे ब्रह्मणि अनित्यप्रपञ्चस्तिष्ठति । दृष्टान्ते रजतत्वावभासः तत्र उत्तरक्षणबाध्यमानत्वाद् अनित्यो न तु मिथ्याभूतः । दार्ष्टान्तिके शिवः परमसद्रूपं नित्यं सत्यम् । प्रपञ्चः केवलसद्रूपम् अनित्यसत्यम् एव । दृष्टान्तदार्ष्टान्तिकौ उभावपि जगत्सत्यत्ववादपरौ न तु जगन्मिथ्यात्ववादपरौ ॥७७॥

शिवोऽहमिति भावेन शिवे साक्षात्कृते स्थिरम् ।
मुक्तो भवति संसारान्मोहग्रन्थेर्विभेदतः ॥७८॥

व्याख्या— 'कस्य साक्षात्क्रिया मुक्तिः ?' इति तृतीयप्रश्नस्य उत्तरम् आह— **शिवोऽहमिति** । **शिवोऽहम् इति** अहं शिव एव इति **भावेन** दृढप्रत्ययेन **शिवे** परशिवे **स्थिरं** दृढतया **साक्षात्कृते** प्रत्यक्षीकृते सति **मोहग्रन्थेः विभेदतः** मोहरूपग्रन्थेर्मोहरूपबन्धस्य **विभेदतः** शिथिलीकरणात् **संसारात्** जननमरणचक्रात् **मुक्तः भवति** स्वतन्त्रो भवति ॥ "अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः" इत्युक्तम् । (पश्यत— सि.शि., ५.३४)। एवं जीवशिवयोः अंशांशिभावसम्बन्धवशात् तयोश्चिद्रूपत्वं समानम् । अतः "शिवोऽहम्" इति दृढभावः सजातीयसम्बन्धत्वात् निसर्गसिद्धः । केवलं योगी तं भावं साक्षात्करोति । तदा योगी संसारान्मुक्तो भवति ॥७८॥

शिवं भावय चात्मानं शिवादन्यं न चिन्तय ।
एवं स्थिरे शिवाद्वैते जीवन्मुक्तो भविष्यसि ॥७९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— उक्तार्थे शिष्यं नियोजयन्नाह— **शिवम् इति**। आत्मानं त्वं स्वात्मानं **शिवं भावय** शिवमिति भावय दृढभावेन साक्षात्कुरु, **शिवाद् अन्यं** शिवभिन्नं कोऽप्यन्यम् अस्तीति **न चिन्तय** न विचारय। **एवम्** अनेन प्रकारेण **शिवाद्वैते** शिवाद्वैतभावे **स्थिरे** दृढतां प्राप्ते सति, त्वं **जीवन्मुक्तः** जीवन्नेव मुक्तः **भविष्यसि** निश्चयेन भविष्यसि॥ जीवः शिवं ज्ञात्वा निर्मुक्तसर्वसंसारग्रन्थिः शिव एव भवति। उक्तं मुण्डकश्रुतौ— "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति। तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति॥" (मुं.उ.,३.२.९) इति। अविद्याया मोक्षैकबाधकत्वात् ज्ञानेनैव सर्वे बाधका निरस्ता भवन्ति। यो हि लोके ब्रह्म विजानाति स एव ब्रह्म भवति। अत्र यथोक्तं शङ्कराचार्येण "देवैरपि तस्य ब्रह्मप्राप्तिं प्रति विघ्नो न शक्यते कर्तुम्" इति, ब्रह्मज्ञानसाक्षात्कारवतो शिष्यस्य ब्रह्मप्राप्तिमार्गे न कोऽपि विघ्नो भवितुमर्हति। इयमेव चरमा सिद्धिः। स च सर्वान् धर्माधर्मप्रकारान् अतीत्य हृदयगुहास्थिताविद्याग्रन्थेर्मुक्तो भवति। अयमेव 'शिवं भावय चात्मानम्' इत्यस्याऽऽशयः। 'शिवादन्यं न चिन्तय' इत्यनेन 'शिवादन्यं कमपि न चिन्तय' इत्यर्थे गृहीते सति तदभावात्मकचिन्तनं स्यात्। भावात्मकं चिन्तनं स्याद् यदि वयं शिवादन्यद् जगदेवेति चिन्तयामः। परं तु सकलस्य जगतः शिवमयत्वान्नास्ति किञ्चिदपि शिवाद् अतिरिक्तम्। अयमेव "तदनन्यत्वम् आरम्भणशब्दादिभ्यः।" इति ब्रह्मसूत्रस्य आशयः (२.१.१४) ॥७९॥

एवं प्रचोदितः शिष्यो गुरुणा गुणशालिना।
शिवमेव जगत् पश्यन् जीवन्मुक्तोऽभिजायते ॥८०॥

व्याख्या— गुरोरादेशम् अनुसरन् शिष्यो जीवन्मुक्तो भवतीत्युक्त्वा शुश्रूषुस्थलं समापयति— **एवमिति**। एवं उक्तरीत्या **गुणशालिना** गुणेन शालते इति गुणशाली, तेन, **गुरुणा** श्रीगुरुणा **प्रचोदितः** प्रेरितः **शिष्यः** शुश्रूषुनामा शिष्यः **जगत्** विश्वं **शिवम् एव** शिवात्मकमेव इति **पश्यन्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विभावयन्, **जीवन्मुक्तो** जीवन्नेव मुक्तः **अभिजायते** भवति ॥ सर्वमिदं विश्वं शिवस्याऽभिव्यक्तरूपत्वान्न शिवाद् भिन्नम् । साक्षात्कारवशादस्य शिष्यः शिवादतिरिक्तत्वेन विश्वं न पश्यति । शिवाभिन्नत्वेन स्वात्मानं पश्यन् शिष्यः शिवं सर्वाधिष्ठानत्वेन परिभावयति । सर्वं शिवादभिन्नं सत् सच्चिदानन्दस्वरूपत्वेन गृह्यते चेत् तदेव शिष्यस्य परमा सिद्धिरिति ज्ञेया । शिवस्य स्वात्माभिन्नत्वेन शिवस्वरूपग्रहणे कृते सति, सर्वमपि शिवस्वरूपमिति तेन ज्ञायते । तदतिरिक्तं किमप्यन्यन्नास्तीति ज्ञायते । उक्तं च— "सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् । सच्चिदानन्दरूपं तदवाङ्मानसगोचरम् ॥ तस्मिन् सुविदिते सर्वं वाऽज्ञातं स्यादिदं शुक । तदात्मत्वात् सर्वस्य तस्माद् भिन्नं न हि क्वचित् ॥" (रु. हृ. उ., २६-२७) इति । इदमेव सुष्ठु प्रबोधितम्— "एकेनैव तु पिण्डेन मृत्तिकायाश्च गौतम । विज्ञातं मृण्मयं सर्वं मृदभिन्नं हि कायकम् । .... कारणाभिन्नरूपेण कार्यं कारणमेव हि ॥" (पं. ब्र. उ., ३५, ३७) इति । अस्य सर्वात्मकप्रबोधेन साधको जीवन्मुक्तो भवति ॥८०॥

— इति शुश्रूषुस्थलम् —

९. अथ सेव्यस्थलम् – (७१)

गुरुवाक्यामृतास्वादात् प्राप्तबोधमहाफलः ।
शुश्रूषुरेव सर्वेषां सेव्यत्वात् सेव्य उच्यते ॥८१॥

व्याख्या— गुरूपदेशेन सिद्धिं प्राप्तवान् शुश्रूषुरेव सेव्य इति सेव्यस्थलमाह— **गुरुवाक्येत्यादिना** । **गुरुवाक्यामृतास्वादात्** वाक्यमेव अमृतं वाक्यामृतम्, गुरोः वाक्यामृतं गुरुवाक्यामृतम्, तस्य आस्वादात्, गुरुवचनामृतसेवनात्, **प्राप्तबोधमहाफलः** महत् फलं महाफलम्, बोध एव महाफलं बोधमहाफलम्, तत्त्वज्ञानमहाफलम्, प्राप्तं बोधमहाफलं येन सः, तादृशः **शुश्रूषुः** एव शुश्रूषुनामा शिवयोग्येव **सर्वेषां** सकलजनानां **सेव्यत्वात्** सेवायोग्यत्वात् **सेव्य उच्यते** सेव्यः इति कथ्यते ॥ बोधोऽत्र

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवाद्वैतज्ञानम् । प्राप्ते एतत्परमसाक्षात्कारे सर्वेऽविद्याविकारा नश्यन्ति । उक्तं चैतत्— (१) ''भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥'' (मुं.उ.,२.२.८) इति; (२) ''दृष्टिः स्थिरा यस्य विनैव दृश्यं वायुः स्थिरो यस्य विना प्रयत्नम् । चित्तं स्थिरं यस्य विनावलम्बं स एव योगी स गुरुः स सेव्यः ॥'' (यो. आ. उल्लेखः— तत्त्वप्रदीपिकायाम्) इति च । द्वेऽपि भगवत्यौ श्रुती शिवाद्वैतस्थितिं हृदयङ्गमतया वर्णयतः । परतत्त्वे साक्षात् कृते योगिनो हृदयग्रन्थिर्भिद्यते । हृदयग्रन्थिर्नाम बुद्धिम् अवलम्ब्योत्पद्यमाना सत्यविद्याकारणाद् वर्धमाना इच्छा । इच्छायास्तस्या निर्मूलनमेव हृदयग्रन्थिभेदः । ज्ञेयविषयाणां प्रति सन्देहा नश्यन्ति । सन्देहनाशे अविद्याया उपशमः, अविद्याया उपशमे पूर्वजन्मनां सञ्चितकर्माणि विनष्टा भवन्ति । अत्र मुण्डकश्रुतौ 'तस्मिन् दृष्टे परावरे' इत्यस्याऽर्थः ग्राह्यः । परं ब्रह्माऽपरं ब्रह्मेति परावरशब्दस्याऽर्थः । तत्र परं ब्रह्म कारणस्वरूपम् अपरं ब्रह्म कार्यस्वरूपम् । कारणस्वरूपं कार्यस्वरूपं च एकस्यैव परशिवब्रह्मणः स्वरूपद्वयम् इत्यवगम्यते । अयं शिवाद्वैतबोध एव । योगजागमवाक्यं च सेव्ययोगिनः स्वरूपं सम्यग् उद्बोधयति । तथा हि— सामान्यतया दृष्टिः केनापि वस्तुना युक्ते स्थिरा भवति । योगिनः दृष्टिस्तु तादृशं वस्तु विनापि स्थिरा भवति । प्राणवायुः समान्यतया प्राणायामेन स्थिरः भवति । परं तु योगिनः प्राणवायुः प्राणायामं विनापि स्थिरः भवति । मनः पुनः सामान्यतया कस्मिन्नपि विषये लग्नं सत् स्थिरं भवति । योगिनस्तु मनो विषयालग्नमपि भवति स्थिरम्, यतो हि योगी शिवं विना न किञ्चिदपि पश्यति । न किञ्चिद् वस्तु तस्य दृष्टिं समाकर्षति निराकर्षति वा । उक्तं चान्यत्र— ''दृष्टिः स्थिरा यस्य विना सदृश्यं वायुः स्थिरो यस्य विना प्रयत्नम् । चित्तं स्थिरं यस्य विनाऽवलम्बं स ब्रह्मतारान्तरनादरूपः, इत्युपनिषत् ॥'' (नाद. बिं. उ., ५६) इति ॥८१॥

गुरूपदिष्टे विज्ञाने चेतसि स्थिरतां गते ।
साक्षात्कृतशिवः शिष्यो गुरुवत् पूज्यते सदा ॥८२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— स सेव्यः गुरुवत् पूजनीय इत्याह— **गुरूपदिष्टे इति** । **गुरूपदिष्टे** गुरुणा उपदिष्टे बोधिते **विज्ञाने** विशेषज्ञाने, शिवाद्वैतस्वरूपे विज्ञाने, **चेतसि** मनसि **स्थिरतां गते** दृढतां प्राप्ते सति, **साक्षात्कृतशिवः** साक्षात्कृतः शिवः येन सः, शिवाद्वैतसाक्षात्कारयुक्तः **शिष्यः** सेव्यनामा शिष्यः **सदा** सर्वदा **गुरुवत्** श्रीगुरुसदृशं **पूज्यते** अर्च्यते ॥ स्तुत्यः खलु स गुरुर्यः शिष्यस्य चित्ते शिवाद्वैतविज्ञानस्य जागरणं करोति । स्तुत्यः खलु स शिष्यो यः स्वीये मनसि गुरुदत्तशिवाद्वैतप्रज्ञां स्थिरतां नयति । एवं तं शिवाद्वैतविज्ञानं यः साक्षात्करोति तस्यैव साकारतां प्राप्नोति च स शिष्यो गुरुवत् पूजनीय एव । यद्यपि स शिष्यः स्वयं गुरुसमान इति न भावयति, तथापि गुरुशिष्ययोस्तयोर्मध्ये भेद एव विनश्यति ॥८२॥

ज्ञानाधिक्यसम्पत्तिर्गुरोर्यस्मादुपस्थिता ।
तस्माज्ज्ञानागमाच्छिष्यो गुरुवत्पूज्यतां व्रजेत् ॥८३॥

व्याख्या— पूर्वोक्तमेव समर्थयति— **ज्ञानाधिक्येत्यादिना** । **यस्मात्** यस्मात् कारणात् **गुरोः** श्रीगुरोः **ज्ञानाधिक्यसम्पत्तिः** ज्ञानस्य आधिक्यं ज्ञानाधिक्यं ज्ञानातिशयः, तद् आधिक्यम् एव सम्पत्तिः सम्पत् **उपस्थिता** समागता, **तस्मात्** तस्मात् कारणात् **ज्ञानागमात्** ज्ञानस्य आगमात् आगमवशात् **शिष्यः** सेव्यः **गुरुवत्** गुरुसदृशं **पूज्यतां** आराधनीयतां **व्रजेत्** गच्छेत् ॥ अत्र ज्ञानाधिक्यं नाम गुरुणा साक्षात्कृतं 'शिवोऽहं' – स्वरूपम् आनन्दमयं ज्ञानं यत्तेन शिष्याय प्रदत्तं यच्च शिष्यः स्वानुभवेन स्वायत्तीकृतम् । एवं स्वायत्तीकृतशिवोऽहंभावः शिष्यो गुरुवत् पूजनीयो भवति । एवं मठानां गुरुपरम्परासु पूर्वगुरुणा गुरुस्थाने संस्थापितः शिष्यो गुरुवत् पूज्यते । गुरु-शिष्य-परम्परास्तु गुरुपरम्परात्वे पर्यवस्यन्ति । वीरशैवास्तु गुरुपरम्परागतान् सर्वान् गुरुन् पूर्वपूर्वगुरूणाम् अध्यात्मपरम्पराभागिनः शिवस्वरूपिणश्चेत्यत्यन्तं गौरवेण मन्यन्ते ॥८३॥

शिवोऽहमिति भावस्य नैरन्तर्याद् विशेषतः ।
शिवभावे समुत्पन्ने शिववत् पूज्य एव सः ॥८४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— हेत्वन्तरेण सेव्यस्य शिववत् पूजनीयत्वमाह— **शिव इति**। **शिवोऽहम् इति भावस्य** शिवादभिन्नोऽहं इति प्रत्ययस्य **नैरन्तर्यात्** निरन्तरस्य भावः नैरन्तर्यम्, तस्मात्, मिथो निरवकाशस्वरूपाद् **विशेषतः** अनन्यसाधारणलक्षणतः, **शिवभावे समुत्पन्ने** शिवस्वरूपे समुद्भूते सति **सः** सेव्यनामा शिष्यः **शिववत्** शिवसदृशं **पूज्यः एव** पूजनीय एव ॥ अत्र भ्रमरकीटन्यायेन निरन्तरशिवध्यानवतः सेव्यस्य शिववत् पूजनीयत्वमुक्तम् ॥८४॥

विषयासक्तचित्तोऽपि विषयासङ्गवर्जितः ।
शिवभावयुतो योगी सेव्यः शिव इवापरः ॥८५॥

व्याख्या— विषयसम्पर्केऽपि विषयसङ्गरहितस्य योगिनः शिवभावयुक्तत्वे शिववत् पूज्यत्वमाह— **विषयासक्तचित्तोऽपि** विषयेषु आसक्तं चित्तं यस्य सः, तादृशः अपि, **विषयासङ्गवर्जितः** विषयाणाम् आसङ्गः, तेन वर्जितः, विषयासक्तिरहितः **योगी** सेव्यस्वरूपी योगी **शिवभावयुक्तः** शिवभावसहितः, तस्माद् हेतोः **अपरः शिवः इव** अन्यशिववत् **सेव्यः** सेवायोग्यः, पूजनीयः इत्यर्थः ॥ यद्यपि शिवयोगी लौकिकव्यवहारे विद्यमानोऽपि नितरां लौकिकविषयासङ्गरहितो भवति । स चाऽहं-मम-भावाभ्यां सर्वथा मुक्तः । देहवानपि देहासङ्गवर्जितः, इन्द्रियसहितोऽपि इन्द्रियसुखानासक्तः, मनोयुक्तोऽपि मनोविकाररहितश्च वर्तते । एवं सेव्ययोगी परमात्मनोऽभिन्नस्वरूपः। अतः स शिववदेव पूजनीयः ॥८५॥

मुक्तः संशयपाशतः स्थिरमना बोधे च मुक्तिप्रदे ।
मोहं देहभृतां दृशा विघटयन् मूलं महासंसृतेः ॥
सत्तानन्दचिदात्मके निरुपमे शैवे परस्मिन् पदे ।
लीनात्मा क्षयितप्रपञ्चविभवो योगी जनैः सेव्यते ॥८६॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागम-पुराणादिसारभूते श्रीसिद्धान्तशिखामणौ प्रसादिस्थलान्तर्गत नवविध-लिङ्गस्थलप्रसङ्गो नाम सप्तदशः परिच्छेदः समाप्तः ॥१७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— सेव्ययोगी शिववत् पूजनीय इत्युक्त्वा सेव्यस्थलं परिच्छेदं च समापयति— **मुक्त इति । संशयपाशतः** संशयः एव पाशः संशयपाशः, तस्मात्, **मुक्तः** निर्मुक्तः, **मुक्तिप्रदे** मुक्तिदायके **बोधे च** ज्ञाने च **स्थिरमनाः** स्थिरं मनः यस्य सः स्थिरमनाः, दृढमतिः, **महासंसृतेः** महासंसारस्य **मूलं** मूलकारणं **देहभृतां** देहधारिणां **मोहं** भ्रमं **दृशा** कृपाकटाक्षेण **विघटयन्** निर्मूलयन्, **सत्तानन्दचिदात्मके** सच्चिदानन्दस्वरूपे **निरुपमे** अनुपमे (निर्गता उपमा यस्मात् सः, तस्मिन्) **शैवे परस्मिन् पदे** शिवस्वरूपे परमपदे, शिवतत्त्वे इत्यर्थः, **लीनात्मा** लीनस्वात्मा **क्षयितप्रपञ्चविभवः** प्रपञ्चस्य विभवः प्रपञ्चविभवः, क्षयितः प्रपञ्च-विभवः यस्य सः, निरस्तविश्ववैभवः सन् **योगी** सेव्ययोगी **जनैः** भक्तजनैः **सेव्यते** पूज्यते ॥ संशयभूयिष्ठता मनुष्यस्य विशेषता । आत्मस्वरूपं किम् ? देहो वा मनो वा बुद्धिर्वा तत् ? कोऽहम् ? शिवो वाऽहम् आहोस्वित् न ? परमात्मस्वरूपं किम् ? परमात्मना सह को मम सम्बन्धः ? जगतः स्वरूपं किम् ? सत्यं वा मिथ्या वा तत् ? नित्यं किम् ? अनित्यं किम् ? मनुष्येण किं प्राप्तव्यम् ? स्वर्गो वा प्राप्तव्यः मुक्तिर्वा प्राप्तव्या ? परमतत्त्वसाक्षा-त्कारवते शिवयोगिनि सर्वे तादृशसंशयाः निरस्ताः भवन्ति । परमानन्द-मयमुक्तिप्रदं ज्ञानं शिवाद्वैतज्ञानमेवेति दृढबुद्धिमान् स सेव्ययोगी जीविनां संसारदुःखस्य मूलहेतुभूतम् अज्ञानभ्रमं निष्कासयितुं समर्थः । अत एव स सर्वेषां पूजनीयः सर्वत्र सर्वदा च । प्रसादिस्थलसम्बद्धं लिङ्गं च शिवलिङ्गम्। अतः लिङ्गस्थलानि अत्र शिवलिङ्गस्थलानि ॥ अस्य पद्यस्य शार्दूलविक्रीडितं वृतम् । पञ्चमपरिच्छेदस्यान्ते तल्लक्षणं दत्तम् ॥८६॥

— इति सेव्यस्थलम् —

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना डाक्टर्-
उपाधिभाजा शिवकुमारस्वामिना विरचितायां श्रीशिवयोगि-
शिवाचार्यकृतश्रीसिद्धान्तशिखामणेः शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
सप्तदशः परिच्छेदः समाप्तः ॥१७॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अष्टादशः परिच्छेदः

प्राणलिङ्गिस्थलान्तर्गतनवविधलिङ्गस्थलप्रसङ्गः

व्याख्या— अथ प्राणलिङ्गिस्थलभेदाः कथ्यन्ते । अथागस्त्यप्रश्नः—

प्रसादिस्थलसंबद्धाः स्थलभेदाः प्रकीर्तिताः ।
प्राणलिङ्गिस्थलारूढान् स्थलभेदान् वदस्व मे ॥१॥

व्याख्या— अगस्त्य उवाच— प्रसादीत्यादि । **प्रसादिस्थलसम्बद्धाः** प्रसादिस्थलाश्रिताः **स्थलभेदाः** लिङ्गस्थलभेदाः **प्रकीर्तिताः** कथिताः । **प्राणलिङ्गिस्थलारूढान्** प्राणलिङ्गिस्थलसंश्रितान् **स्थलभेदान्** लिङ्गस्थल-प्रकारान् **मे** मह्यं **वदस्व** कथय ॥१॥

व्याख्या— अथ श्रीरेणुकस्तद्भेदान् विशेषकेण (श्लोकत्रयेण) प्राह—

स्थलानां नवकं प्रोक्तं प्राणलिङ्गिस्थलाश्रितम् ।
आदावात्मस्थलं प्रोक्तमन्तरात्मस्थलं ततः ॥२॥

परमात्मस्थलं पश्चान्निर्देहागमसंज्ञितम् ।
निर्भावागमसंज्ञं च ततो नष्टागमस्थलम् ॥३॥

आदिप्रसादनामाथ ततोऽन्त्यप्रसादकम् ।
सेव्यप्रसादकं चाथ शृणु तेषां च लक्षणम् ॥४॥

व्याख्या— प्राणलिङ्गिस्थलाश्रितानां नवलिङ्गस्थलानां नामान्याह— १. आत्मस्थलम्, २. अन्तरात्मस्थलम्, ३. परमात्मस्थलम्, ४. निर्देहा-गमस्थलम्, ५. निर्भावागमस्थलम्, ६. नष्टागमस्थलम्, ७. आदिप्रसादि-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्थलम्, ८. अन्त्यप्रसादिस्थलम्, ९. सेव्यप्रसादिस्थलं चेति **प्राणलिङ्गिस्थला-श्रितम्** प्राणलिङ्गिस्थलसम्बद्धं **स्थलानां नवकं** लिङ्गस्थलानां नवविधत्वं **प्रोक्तं** कथितम् ॥ **तेषां च लक्षणं** तेषां च स्वरूपं **शृणु** आकर्णय ॥२-४॥

१. अथ आत्मस्थलम् – (७२)

जीवभावं परित्यज्य यदा तत्त्वं विभाव्यते ।
गुरोश्च बोधयोगेन तदात्मायं प्रकीर्तितः ॥५॥

व्याख्या— सेव्यस्थली एव परतत्त्वरूपेण भाव्यमान एवाऽऽत्मा इत्याह— **जीवभावम् इति । अयम्** एषः सेव्ययोगी एव **यदा** यस्मिन् काले **गुरोः च** श्रीगुरोश्च **बोधयोगेन** शिवज्ञानसाक्षात्कारसम्बन्धेन **जीवभावं** किञ्चिज्ज्ञत्वादिजीवस्वरूपं **परित्यज्य** विहाय **तत्त्वं** परतत्त्वं **विभाव्यते** विशेषेण भाव्यते **तदा** तस्मिन् काले **आत्मा** आत्मा इति **प्रकीर्तितः** कथितः ॥ सेव्यस्थलसम्पन्नो योगी मुक्तिपथे प्रवर्तमान आत्माख्यस्थल-सोपानम् आरोहति । जीवभावो नाम किञ्चिज्ज्ञत्व-किञ्चित्कर्तृत्वादि-लक्षणयुक्तत्वे सति देहेन्द्रियादिष्वासक्तत्वम् । आसक्तिरेषा शिवोहंभाव-विस्मरणाय कल्पते । तत्र गुरूपदेशप्रभावेण नष्टजीवभावः सन् योगी शिवोऽहंभावरूपपरतत्त्वं साक्षात्करोति । स एव सकलासक्तिरहित आत्मा नित्यः सर्वव्यापी च । तदुक्तम्— "स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिता एष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः सत्यसङ्कल्पः ।" (छां. उ., ८.१.५) इति । शरीरमिदं ब्रह्मपुरम् अन्तरा-काशनामकम् । एतन्न जरया जीर्यति न शास्त्रेण छेद्यते । एतत्सत्यम् । पुण्डरीकाख्ये अस्मिन् ब्रह्मपुरे सर्वे कामाः समाहिता भवन्ति । अत्रैष आत्मा निरस्तसर्वपाप्मा, जरामरणरहितः, सर्वदुःखविमुखः, क्षुत्पिपासा-रहितः, सत्यकामः, सत्यसङ्कल्पश्च ॥५॥

वालाग्रशतभागेन सदृशो हृदयस्थितः ।
अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत् ॥६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— आत्मनोऽतिसूक्ष्मत्वमाह— **वालाग्रेत्यादिना** । **वालाग्रशतभागेन** केशाग्रस्य शतभागेन **सदृशः** समानः सन् **सर्वं कर्मफलम् अश्नन्** सर्वं सुखदुःखात्मकं कर्मफलं भुञ्जन् **हृदयस्थितः** हृदये हृत्कमले स्थितः तिष्ठन् **आत्मा** जीवात्मा **दीपवत्** दीपसदृशं **स्फुरति** प्रकाशते ॥ "अणोरणीयान्" (कठ. उ., २.२०) इति श्रुतेरयमेव भावः । अत्र श्वेताश्वतरश्रुतिः— "वालाग्रशतभागेन शतधा कल्पितेन तु । भाग आत्मा स विज्ञेयः स चानन्त्याय कल्पते ॥" (५.९) इति । "अङ्गुष्ठमात्र पुरुषः मध्ये आत्मनि" (कठ. उ., ४.१२) इति, "निहितो गुहायाम्" (कठ. उ., २.२०) इति, "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः" (कठ. उ., ४.१३) इति च, एवमनेकाः श्रुतय आत्मनः सूक्ष्मत्वं दीपवत् प्रकाशकत्वं च दर्शयन्ति । अत्र दीपदृष्टान्तोऽतीवाऽऽर्थगर्भितः । विशालप्रकोष्ठे एकत्र स्थापितो दीपो यथा समग्रप्रकोष्ठं प्रकाशयति तथैवाऽऽत्मा एकत्र हृदयकमले तिष्ठन्नङ्गानि सर्वाणि व्याप्नोति तत्तदङ्गगतसुखदुःखाद्यनुभवान् प्राप्नोति च । अत्रेदं ज्ञेयम् — वीरशैवतत्त्वदर्शिन आत्मानम् अणुत्वेन मन्यन्ते । न्याय-वैशेषिकाः साङ्ख्याः पूर्वमीमांसकाश्चाऽऽत्मानं विभुत्वेन, जैनाः मध्यमपरिमाणवत्त्वेन च मन्यन्ते । आत्मानं विभुत्वेन मन्यमाना दार्शनिका आत्मनोऽणुत्वं मन्यमानानां प्रत्याक्षेपम् उत्थापयन्ति । तथा हि— यदि भवदभिमताणुपरिमाणवान् आत्मा शरीरे एकत्र स्थितः, तर्हि सर्वाङ्गानां सुखदुःखादीन् अनुभवान् प्राप्तुं स कथं पारयतीति । दीपदृष्टान्तेनाऽस्याऽऽक्षेपस्योत्तरं दीयते अणुपरिमाणवादिभिः ॥६॥

आत्मापि सर्वभूतानामन्तःकरणमाश्रितः ।
अणुभूतो मलासङ्गादादिकर्मनियन्त्रितः ॥७॥

व्याख्या— जीवात्मनोऽणुत्वं कथं जातम् इत्यत्राह— **आत्मेति** । **सर्वभूतानां** सर्वेषां जीविनाम् **आत्माऽपि** परमार्थतो व्यापकोऽपि आत्मा **मलासङ्गाद्** आणवादिमलसम्पर्काद् **अणुभूतः** अणुस्वरूपं प्राप्तः, अणुवद् अतिसूक्ष्मत्वं प्राप्तः इत्यर्थः, **आदिकर्मनियन्त्रितः** प्राचीनकर्मपाशनिरुद्धः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सन् अन्तःकरणम् आश्रितः अहङ्कारम् आश्रयते ॥ परशिवब्रह्मणः सर्व जीविनाम् आत्मत्वात् सर्वव्यापकत्वं स्वाभाविकम् । "तत् सृष्ट्वा तदेवानुप्राविशत्" (तै. उ., २.६) इति श्रुत्युक्तदिशा परशिवश्चराचरात्मकं विश्वं सृष्ट्वा तदेव प्रेरकत्वेन प्रविष्टवान् । व्यापकोऽपि सः जीवात्मभावे अणुत्वं स्वीकृत्य सर्वभूतानाम् आत्मा भवति । "अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः" (सि. शि., ५.३४) इत्यस्यापि अयमेव भावः। एवम् अस्य जीवात्मनोऽणुत्वकारणम् आणवादिमलासङ्ग इत्युक्तम्। आणवमलम्, मायीयमलम्, कार्मिकमलं चेति मलत्रयम् । इच्छाशक्तिसङ्कोच आणवमलम्, तेन आत्मनो विभुत्वापेक्षयाऽणुत्वम् । ज्ञानशक्तिसङ्कोचो मायीयमलम्, तेन सर्वज्ञात्वापेक्षया किञ्चिज्ज्ञत्वम् । क्रियाशक्तिसङ्कोचः कार्मिकमलम्, तेन सर्वकर्तृत्वापोक्षया किञ्चित्कर्तृत्वम् । अन्तःकरणमाश्रितोऽणुभूतो जीवात्मा कर्मनियन्त्रितो भूत्वा गतविवेकः सन् देहाद्यभिमानं वहति ॥७॥

जपायोगाद्यथा रागः स्फटिकस्य मणेर्भवेत् ।
तथाऽहङ्कारसम्बन्धादात्मनो देहमानिता ॥८॥

व्याख्या— उक्तमेव सदृष्टान्तम् आह— **जपायोगाद्** इति । **यथा** येन प्रकारेण **जपायोगात्** जपाकुसुमसम्पर्कात् **स्फटिकस्य मणेः** स्फटिकमणेः **रागः** रक्तवर्णो **भवेत्** स्यात्, **तथा** तेन प्रकारेण **आत्मनः** स्वात्मनः **अहङ्कारसम्बन्धाद्** अहङ्कार सम्पर्काद् **देहमानिता** देहाभिमानयुक्तत्वम् स्यात् ॥ अत्राहंकारः परिमिताहंकारत्वेन भाव्यः, पराहन्तापेक्षयाऽस्य परिमितत्वात् । जपाकुसुमदृष्टान्तेन आत्मनोऽणुत्वं कथं सञ्जातमिति विशदीकृतम् । स्फटिकमणेर्नैसर्गिको वर्णः स्वच्छश्वेतवर्णः । रक्तवर्णस्य जपाकुसुमस्य सम्पर्केण स्फटिकमणिः रक्तवर्णः सञ्जायते । तथैवाऽहङ्कारस्य सम्पर्काद् आत्माऽणुपरिमाणः सञ्जायते । तेनाऽऽत्मनो देहाद्यभिमानता समुत्पद्यते । देहाद्यभिमानत्वेन परमात्मनोंऽशीभूतो जीवात्मा संसारी भवति । तदतीतस्तु सेव्ययोगी परमात्मनोऽभिन्नत्वेनाऽऽत्मा भवति ॥८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अशरीरोऽपि सर्वत्र व्यापकोऽपि निरञ्जनः।
आत्मा मायाशरीरस्थः परिभ्रमति संसृतौ ॥९॥

व्याख्या— कथम् आत्मा शरीरस्थो भवतीत्यत्राह— **अशरीर इति। अशरीरः अपि** शुद्धविद्यास्वरूपत्वेन शरीररहितोऽपि, **व्यापकोऽपि** परिच्छेदरहितत्वेन सर्वव्यापकोऽपि **निरञ्जनः** दोषरहितत्वेनाऽनासक्तः **आत्मा** परमात्मा **मायाशरीरस्थः** स्वमायापरिकल्पितकलादिभूपर्यन्तैकोन-त्रिंशत्तत्त्वकारणीभूतयाऽधोमायया घटिते शरीरे निवसन् जीवात्मतया संभूतः **संसृतौ** संसारे **परिभ्रमति** जननमरणचक्रे बद्धः पुनः पुनः परिवर्तते ॥ परमार्थत आत्मनः परशिवत्वात् तस्याऽशरीरत्वम्। सञ्चित-कर्मवशात् शरीरी भूत्वा सुखदुःखाद्यनुभवद्वारा पुण्यपापरूपं कर्म निष्का-सयति। देहिभावप्राप्तेरिदमेव कारणम्। देहिभावस्तु नैमित्तिको देहात्मनोः सम्बन्धस्य तात्कालिकत्वात्। यावत्पर्यन्तं कर्माऽनुवर्तते तावत्पर्यन्तम् अयं देहिभावः प्रवर्तते। क्षीणे निमित्ते देहात्मनोः सम्बन्धोऽपि निवर्तते। सामान्यानां प्राकृतानां कृते कर्मनिवृत्तेर्दीर्घविलम्बः जायेत, तेषां लौकिक-जीवनासक्तिबाहुल्यात्। तत्कारणतः कर्मसञ्चयः पुनः पुनो वर्धितः सन् कर्मक्षयेऽधिकविलम्बो जायते। शिवयोगिनां कृते तु लौकिकासङ्गरहित-त्वाद् देहात्मनोः सम्बन्धः शीघ्रं त्रुट्यति जीवन्मुक्तिश्च लभ्यते। स च स्वकीये निजे शिवस्वरूपे सर्वव्यापको भवति ॥९॥

आत्मस्वरूपविज्ञानं देहेन्द्रियविभागतः।
अखण्डब्रह्मरूपेण तदात्मप्राप्तिरुच्यते ॥१०॥

व्याख्या— जीवस्य कथमात्मत्वम् इत्यत्राह— **आत्मेत्यादिना। देहे-न्द्रियविभागतः** देहेन्द्रियविभक्तत्वेन **अखण्डब्रह्मरूपेण** अपरिच्छिन्नब्रह्म स्वरूपेण च **आत्मस्वरूपविज्ञानम्** आत्मनः स्वरूपम् आत्मस्वरूपम्, तस्य विज्ञानम्, आत्मनः स्वस्वरूपज्ञानं शिवोऽहमिति यदा भवति, तदा तस्मिन् काले **आत्मप्राप्तिः** आत्मलाभः, आत्मत्वलाभः इत्यर्थः, **उच्यते** कथ्यते ॥ आत्मस्वरूपविज्ञानं देहेन्द्रियादिविभक्तत्वेनाऽपरिच्छिन्नब्रह्मस्वरूपत्वेन चेति

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्विधा भवति । देहेन्द्रियविभक्तत्वेनाऽऽत्मज्ञानं पिण्डज्ञानस्थले (सि.शि., ५.५६-५८) विशदीकृतम् । कठोपनिषदि देहेन्द्रियमनोबुद्धिविषयाणां पार्थक्यं रथादिदृष्टान्तेन सम्यङ् निरूपितम् । तथा हि— "आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्ते-त्याहुर्मनीषिणः ॥" (३.३-४) इति । आत्मा न स्वयमेव भोक्ता भवितुमर्हति, शुद्धचैतन्यत्वात् । देहेन्द्रियबुद्धिमनोविषयेषु संसक्तत्वे एव मनीषिणस्तमात्मानं भोक्तेति वदन्ति । तादृशभोक्ता भूत्वा सुखदुःखादि-कर्मफलानाम् अनुभवेनैव कर्मक्षयं साधयितुं शक्नोति । कर्मक्षयार्थमेव परमात्मा तिरोधानशक्त्याऽऽत्मनो निजस्वरूपज्ञानं तिरोदधाति । पुनः कर्मक्षये जाते परमात्मा तम् अनुग्रहशक्त्या भक्तिरूपशक्तिपातद्वारा मुक्तिमार्गं प्रति नयति । भक्तिसम्पन्नः प्रज्ञानात्मा मनसा सह इन्द्रियाणि वशीकुर्वन् योगमार्गं साधयति । तदुक्तम्— "यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥" (कठ. उ., ३.६) इति । योगाभ्यासकुशलो ह्यात्मा मनसा सहेन्द्रियाण्य-न्तर्मुखीकृत्य चिद्रूपशिवलिङ्गे लीनो भवति । एषा दशा भवति महावाक्य-ज्ञानसाक्षात्कारेणाऽऽत्मविज्ञानवत आत्मस्थलिनः । पूर्वोक्तः साधनमार्गः साधकानां कृते वर्णितः । आत्मस्थली तु सिद्धिदशायां तिष्ठति ॥१०॥

न चास्ति देहसम्बन्धो निर्देहस्य स्वभावतः ।
अज्ञानकर्मयोगेन देही भवति भुक्तये ॥११॥

व्याख्या— परिच्छेदरहितस्य परशिवस्य कथं परिच्छिन्नशरीरवत्वम् इत्यत्राह— **न चेति** । **निर्देहस्य** शरीररहितस्य परशिवस्य **देहसम्बन्धः** शरीरसम्बन्धः **स्वभावतः** निजस्वभावेन **न च अस्ति** न च भवति । **अज्ञानकर्मयोगेन** अज्ञानं च कर्म च अज्ञानकर्मणी, तयोः योगेन सम्बन्धेन **भुक्तये** संसारनिवृत्त्यर्थं **देही भवति** देहवान् भवति ॥ शरीररहितस्य परशिवस्य परमार्थतो नास्त्येव शरीरसम्बन्धः । तथापि "सोऽकामयत बहु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्यां प्रजायेयेति'' परिच्छिन्नत्वकाङ्क्षया स्वेनैव परिकल्पितानाम् आणवादिमलानां सम्बन्धात् अंशभूतदशायाम् अज्ञानकर्मयोगेन देही भवति। शिवदृष्टिशास्त्रे अस्य दृष्टान्तमुक्तम्— ''यथा नृपः सार्वभौमप्रभावामोदबृंहितः। क्रीडन् करोति पादातिधर्मं तद्धर्मधर्मितः ॥'' (१.३७) इति। यथा नृपः सार्वभौमपदामोदभरितोऽपि स्वातन्त्र्येण पादातिधर्मं संभावयन् पादातिधर्मं परिपालयति तथा स्वातन्त्र्यपरिकल्पितमलत्रयवशाद् अज्ञानकर्मणी सम्भाव्य देहिवद् व्यापारयति। अस्मिन्नर्थे श्रुतिद्वयम् — (१) ''स वै नैव रेमे। तस्मादेकाकी न रमते। स द्वितीयमैच्छत्। स हैतावानास।'' (बृ.उ., १.४.३) इति, (२) ''तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चभवत्।'' (तै. उ., २.६) इति च। भगवदुक्तिद्वयमपि — (१) ''विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।'' (भ. गी., १०.४२) इति, (२) ''ममैवांशो जीवलोके जीवभूतः सनातनः'' (भ. गी., १५.७) इति च। मुण्डकश्रुतिस्तु परमात्मनो जीवात्मनश्च (देहिनश्च) अंशांशिभावं सम्यग् विवृणोति— ''यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाऽक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥'' (२.१.२) इति ॥११॥

नासौ देवो न गन्धर्वो न यक्षो नैव राक्षसः।
न मनुष्यो न तिर्यक् च न च स्थावरविग्रहः ॥१२॥

नानाकर्मविपाकाश्च नानायोनिसमाश्रिताः।
नानायोगसमापन्नाः नानाबुद्धिविचेष्टिताः ॥१३॥

नानामार्गसमारूढाः नानासङ्कल्पकारिणः।
अस्वतन्त्राश्च किञ्चिज्ज्ञाः किञ्चित्कर्तृत्वहेतवः ॥
लीलाभाजनतां प्राप्ताः शिवस्य परमात्मनः ॥१४॥

व्याख्या— असौ जीवः केन नाम्ना बोध्यते इत्यत्राह— **नासौ** इत्यादि **विशेषकेन**। **असौ** अयं जीवः **देवः न देवो न** भवति, **गन्धर्वः न गन्धर्वो**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

न भवति, **यक्षः न** यक्षो नास्ति, **राक्षसः नैव** राक्षसो न भवत्येव, **मनुष्यः** न मानवो न भवति, **तिर्यक् च न** पशुश्च न भवति, **स्थावरविग्रहः च न** शिलादिनिर्मितचलनरहितमूर्तिश्च न भवति । तर्हि एते जीवाः कीदृशाः इत्यत्राह — ते देहिनो **नानाकर्मविपाकाः** विविधकर्मपरिपाकवशाः, अत एव **नानायोनिसमाश्रिताः** देवतिर्यङ्मनुष्यादिनानाजन्मवशंगताः, **नानायोगसमापन्नाः** नानाविधस्वर्गादिभोगसम्बन्धयुक्ताः, **नानासङ्कल्पकारिणः** नानाविधसङ्कल्पकरणबुद्धयः, **अस्वतन्त्राश्च** स्वातन्त्र्यहीनाः, **किञ्चिज्ज्ञाः** परिमितज्ञानयुक्ताश्च **किञ्चित्कर्तृत्वहेतवः** परिमितकर्तृत्वकारणाः, एतादृशा जीवाः **परमात्मनः शिवस्य** परमात्मभूतस्य परशिवस्य **लीलाभाजनतां प्राप्ताः** विश्वलीलान्तर्गतत्वं प्राप्ताः ॥ एते जीवाः तत्तद्देहयोगेन देवादिनामभाजना भवेयुः, परं तु परमार्थत एते तु परमात्मन विश्वलीलाभाजनतां गताः । **नानाकर्मविपाकाः** विविधप्राचीनकर्मपरिपाकवशात् सुखदुःखानुभवेषु निमग्नाः, स्वस्वरूपज्ञानरहिता जननमरणचक्रवशंगताः । सञ्चितकर्मवशादेव जात्यायुर्भोगवैषम्यं भवति । उक्तं च पूर्वम्— "चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः । जात्यायुर्भोगवैषम्यकारणं कर्म केवलम् ॥" (सि.शि.,५.४९) इति । **नानायोनिसमाश्रिताः**— स्कन्दपुराणे उक्तम्— "देवाः षोडशलक्षाणि नवलक्षाणि मानुषाः । दशभिर्दशभिस्तद्वज्जलजा विहगा मृगाः ॥ सरीसृपास्तु लक्षाण्येकादश चरेतराः । अष्टौ च दशलक्षणि सप्तजन्मान्यमूनि वै ॥" (उल्लेखः – तत्त्वप्रदीपिकायाम्) । आहत्य सप्तविधजीवाः चतुरशीतिविधदेहवन्तो भवन्ति । **नानायोगसमापन्नाः** — अज्ञानिनां दशां निर्दिशति । अज्ञानिनः स्वर्गादिभोगम् अभिलषन्ति, स्वर्गादिभोगयोगम् (अप्राप्तस्य प्राप्तिम्) अभिलषन्ति। तस्यापि लौकिकजीवनवदेव नश्वरत्वं न जानन्ति ते । केवलं नचिकेतसः सदृशा धन्यभागाः "अतिदीर्घे जीविते को रमेत" (कठ. उ., १.२८) इति विचारयन्ति । **नानाबुद्धिविचेष्टिताः** — जीवा विविधसंस्कारान् धारयन्तः स्वीये चिन्तने वचने क्रियायां च तैरेव प्रभाविताः भवन्ति । स संस्कारसमुदायः पुरुषस्य प्रकृतिः (स्वभावः) इति व्यवह्रियते । तदुक्तम्— "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

किं करिष्यति ॥'' (भ. गी., ३.३३) इति । प्रकृतिस्वरूपं च उक्तम्— "प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः" (भ.गी., ३.३३– शाङ्करभाष्यम्) इति । **नानामार्गसमारूढाः** — मुक्तिमार्गम् अन्विषन्तः वैष्णवादिनानामतनिर्दिष्टान् मार्गान् अनुसरन्ति । अत्र स्वस्व-परम्परागतकुलसम्प्रदायस्तेषां मार्गदर्शकः । तेन भ्रमितमतयः समुचित-मार्गचयने असमर्था भवन्तीत्यर्थः । **नानासङ्कल्पकारिणः** — स्वस्वजीविते ते लौकिकयोगक्षेमस्वर्गप्राप्त्यादिविविधोद्देशसाधनसङ्कल्पान् कुर्वन्ति, विहाय मुक्त्युपायसाधनसङ्कल्पम् । मुक्त्युपायस्तु एक एव, परशिवे सर्वार्पणभावेन शरणागतिरूपः । तदुक्तम्— "तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥'' (भ. गी., १८-६२) इति । **अस्वतन्त्राः** — नियतिकृतनियमाधीनाः सन्तो जीवाः स्वातन्त्र्य-रहिता भवन्ति । तत्र परशिव एव सूत्रधारो नियतेः । श्रीगुरोः कृपया मार्गदर्शनेन च यदा लौकिकजीवनासक्तिरूपो भारो विनिवर्तते तदैव ते स्वातन्त्र्यभाजनो भवन्ति । अत्यासक्तिः स्वातन्त्र्यं हरति, अना-सक्तिश्च स्वातन्त्र्यम् आहरति । **किञ्चिज्ज्ञाः किञ्चित्कर्तृत्वहेतवः**— आणवादिमलत्रयसम्बन्धात् किञ्चिज्ज्ञाः (परिमितज्ञानवन्तः) किञ्चित्क-र्तारः (परिमितकर्तृत्वयुक्ताः) भवन्ति । तत्र मायीयमलयोगेन ज्ञानशक्तेः सङ्कोचः, तेन परिमितज्ञानरूपा किञ्चिज्ज्ञता, कार्मिकमलसम्बन्धेन क्रिया-शक्तेः सङ्कोचः, तेन परिमितकार्यपटुत्वरूपा किञ्चित्कर्तृता । एवंभूता जीवाः परमात्मनो वैश्विकलीलानाटके यथाकर्म यथाज्ञानं च पात्रधारिणो भवन्ति ॥१२-१४॥

चोदिताः परमेशेन स्वस्वकर्मानुसारतः ।
स्वर्गं वा नरकं वापि प्राणिनो यान्ति कर्मिणः ॥१५॥

व्याख्या— एतादृशानां प्राणिनां का नाम गतिरित्यत्राह— **चोदिता** इति । **परमेशेन** परमेश्वरेण **स्वस्वकर्मानुसारतः** स्वस्वकर्मानुगुण्येन **चोदिताः** प्रेरिताः **कर्मिणः** कर्मानुसारिणः **प्राणिनः** जीवाः **स्वर्गं वा**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वर्लोकं वा **नरकं वा** नरकसदनं वा **यान्ति** गच्छन्ति ॥ पुण्यरूपकर्मणा स्वर्गः पापरूपकर्मणा च नरकम् इति तु लोकप्रसिद्धिः ॥१५॥

पुनः कर्मावशेषेण जायन्ते गर्भकोटरात् ।
जाता मृताः पुनर्जाताः पुनर्मरणभाजिनः ॥
भ्रमन्ति घोरसंसारे विश्रान्तिकथया विना ॥१६॥

व्याख्या— ततः किम् इत्यत्राह— **पुनरिति । पुनः** पुनरपि जीवाः **कर्मावशेषेण** कर्मणः अवशेषेण **गर्भकोटरात्** गर्भकोशात् **जायन्ते** जन्म लभन्ते । **जाताः** प्राप्तजन्मानः **मृताः** मरणं प्राप्नुवन्ति, **पुनः जाताः** पुनः प्राप्तजन्मानः **पुनः मरणभाजिनः** मरणं भजन्ते इति मरणभाजिनः, पुनः मरणं भजन्ते । **विश्रान्तिकथया विना** श्रमापनोदनवार्तया विना **घोरसंसारे** भयङ्करसंसृतौ **भ्रमन्ति** सञ्चरन्ति ॥ स्वर्गं वा नरकं वा प्राप्तानां तत्र स्थिरतया वासो नास्ति । अवशिष्टे कर्मणि पुनर्जन्म प्रापणीयमेव । जातस्य मरणं मृतस्य पुनः जन्म कर्मवशाद् भवत्येव । संसारे भ्रमणं कुर्वतो जीवस्य विश्रान्तेरवकाशो नास्ति, जननमरणचक्रभ्रमणस्य नैरन्तर्यात् । भगवती श्रुतिराह— "अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति मूढाः । यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोका च्यवन्ते ॥ इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति ॥" (मुं. उ., १.२.९-१०) इति । [क्षीणलोकाः = क्षीणकर्मफलाः] ॥१६॥

जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम् ।
निरस्यते गुरोर्बोधाज्ज्ञानशक्तिः प्रकाशते ॥१७॥

व्याख्या— जीवत्वनिरसनाय श्रीगुरोर्बोधः समर्थ इत्याह— **जीवत्वम्** इति । **मलकल्पितम्** आणवादिमलत्रयेण कल्पितं **तदिदं** तदेतज् **जीवत्वं** जीवस्वरूपं **दुःखसर्वस्वं** दुःखमयत्वम् । तदिदं जीवत्वं **गुरोः बोधाद्** गुरोः

CC-0 : Jangamwadi Math Collection. Digitzed by eGangotri

उपदेशात् **निरस्यते** निवार्यते । तदा जीवात्मनि **ज्ञानशक्तिः** स्वस्वरूपज्ञानरूपा शक्तिः **प्रकाशते** विराजते ॥ मुण्डकश्रुतिराह— "परीक्ष्य लोकान् कर्मचितान् ब्रह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥" (१.२.१२) इति । श्रीगुरोर्बोधेन तत्साक्षात्कारेण च जीवत्वं निरस्तं भवति ॥१७॥

— इत्यात्मस्थलम् —

२. अथान्तरात्मस्थलम् – (७३)

यदा निरस्तं जीवत्वं भवेद् गुर्वनुबोधतः ।
तदन्तरात्मभावोऽपि निरस्तस्य भवेद् ध्रुवम् ॥१८॥

व्याख्या— जीवभावरहितस्याऽन्तरात्मत्वं भवतीत्याह— **यदेति** । **यदा** यस्मिन् समये **गुर्वनुबोधतः** गुरोः उपदेशात् **जीवत्वं** जीवभावः **निरस्तं भवेत्** निवारितः स्यात् तद् तदा **निरस्तस्य** निरस्तजीवभावस्य **अन्तरात्मभावः अपि** अन्तरात्मत्वम् अपि **ध्रुवं भवेत्** निश्चयेन स्यात् ॥ श्रीगुरोराध्यात्मिकबोधेन प्रायोगिकमार्गदर्शनेन च जीवत्वं निरस्यति । निरस्ते जीवभावेऽन्तरात्मभावो ध्रुवं प्राप्यते । यावत्पर्यन्तं मलत्रयाच्छादनम् अनुवर्तते तावत्पर्यन्तम् आत्मभावो वर्तते । श्रीगुर्वनुग्रहप्राप्तासु त्रिविधदीक्षासु क्रियादीक्षया स्थूलशरीरे तद्गतकार्मिकमलह्रासपूर्वकम् इष्टलिङ्गं प्रदीयते, मन्त्रदीक्षया सूक्ष्मशरीरे तद्गतमायीयमलह्रासपूर्वकं प्राणलिङ्गं स्थाप्यते, वेधादीक्षया च कारणशरीरे तद्गताणवमलह्रासपूर्वकं भावलिङ्गं प्रतिष्ठाप्यते । एतदारभ्य क्रमशः कर्मनिर्मूलनद्वारा जीवभावनिरसनप्रक्रियाऽऽरभ्यते । कर्मनिर्मूलने परिसमाप्ते देहिभावस्य सर्वाः परिमितयः परिसमाप्ता भवन्ति । तदा जीवत्वं निरस्तं भवति । इयमेव दशाऽन्तरात्मनः । यदा स्वात्मा परमात्मनः सर्वथाऽभिन्न इत्येवंरूपनिश्चितप्रत्ययो जायते तदा भवति दशा परमात्मनः । अतोऽन्तरात्मदशाऽऽत्मत्वपरमात्मत्वदशयोर्मध्यवर्तिनी भवति ॥१८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहस्थितोऽप्ययं जीवो देहसङ्गविवर्जितः ।
बोधात् परात्मभावित्वादन्तरात्मेति कीर्तितः ॥१९॥

व्याख्या— अन्तरात्मस्वरूपमाह— **देहस्थित इति । देहस्थितः अपि** देहे निवसन्नपि **जीवः** जीवात्मा **देहसङ्गविवर्जितः** देहेन सङ्गः देहसङ्गः, तेन विवर्जितः, देहसङ्गरहितः सन् **बोधात्** 'शिवोऽहं' भावरूपस्वस्वरूप-ज्ञानात् **परात्मभावित्वात्** परात्मा परमात्मा, तस्य भावः अस्य अस्तीति परात्मभावी, तस्य भावः परात्मभावित्वम्, तस्मात्, परमात्मभाववत्त्वात् **अन्तरात्मा इति** अन्तरात्मा इति नाम्ना **कीर्तितः** व्यवहृतः ॥ अत्र शिवयोगिनो महत्साधनं नाम देहयोगेऽपि देहसङ्गराहित्यम् । सामान्यानां जनानाम् इदं न शक्यते साधयितुम् । शिवयोगिनां त्विदं स्वाभाविकम् । अत्र श्रुतिराह— "यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् । अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥" (श्वे. उ., २.१५) इति । प्रत्यगात्मेत्यपरनामभाग् जीवात्मा दीपोपम इत्युक्तम् । कस्मादिति चेद् उच्यते— यथा दीप एकत्र प्रकोष्ठे स्थापितः सन् सर्वं प्रकोष्ठं तद्गतसर्ववस्तूनि च प्रदर्शयति, तथा प्रत्यगात्मा हृदयगुहायां स्थितः सर्वाण्यङ्गानि, इन्द्रियाणि, मनः, बुद्धिं च स्वकीयप्रभावेण व्याप्नोति । स च "तत् त्वम् असि" (छां. उ., ६.८.७) इत्यस्मिन् महा-वाक्ये त्वंपदवाच्यः । इदं च आत्मतत्त्वं शिवतत्त्वेन संयोजयन् स्वात्मानमेव शिवतत्त्वत्वेन भावयति । इयमेव स्थितिरन्तरात्मनः ॥१९॥

आत्मान्तरालवर्तित्वाज्जीवात्मपरमात्मनोः ।
योगादुभयधर्माणामन्तरात्मेति कीर्तितः ॥२०॥

व्याख्या — आत्मपरमात्मनोर्मध्यवर्तित्वादन्तरात्मेत्याह— **आत्मे-त्यादिना । जीवात्मपरमात्मनोः** जीवात्मनः परमात्मनश्च **अन्तराल-वर्तित्वात्** मध्ये वर्तमानत्वात् कारणात् **उभयधर्माणाम्** उभयोः जीवात्म-परमात्मनोः लक्षणानां **योगात्** संमेलनात् कारणाच्च, **अन्तरात्मा इति** अन्तरात्मा इति नाम्ना **कीर्तितः** व्यवहृतः ॥ शिष्याणां प्रज्ञानवर्धकत्वेन

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तदन्तर्यामित्वेन परमात्मधर्मयोगः । आहारव्याहारक्रियादिषु जीवात्मधर्मयोगः । एवं जीवात्मपरमात्मनोरुभयोरपि धर्म-योगाद् अन्तरात्मा इति कथितः ॥२०॥

अहङ्कारस्य सम्बन्धान्मनुष्यत्वादिविभ्रमः ।
न स्वभाव इति ज्ञानादन्तरात्मेति कथ्यते ॥२१॥

व्याख्या— अन्यप्रकारेणाऽन्तरात्मस्वभावमाह— **अहङ्कारस्येति** । **अहङ्कारस्य** अहंभावस्य **सम्बन्धाद्** योगात् **मनुष्यत्वादिविभ्रमः** मनुष्यत्वं गन्धर्वत्वं राक्षसत्वम् इत्यादि भ्रान्तिः स्यात्, **न स्वभावः** न निजस्वभावः **इति ज्ञानात्** इति बोधाद् **अन्तरात्मा** इति अन्तरात्मा भवतीति **कथ्यते** उच्यते ॥ परिमितस्वभावत्वरूपस्याऽहङ्कारस्य कारणान्मनुष्यत्वादिस्वरूपभ्रान्तिर्भवेत् । एतादृशपरिमितस्वभावत्वं नात्मनः स्वाभाविकम् इति निरस्तभ्रमत्वे सति अन्तरात्मा भवतीत्यर्थः ॥२१॥

यथा पद्मपलाशस्य न सङ्गो वारिणा भवेत् ।
तथा देहजुषोऽप्यस्य न शरीरेण सङ्गतिः ॥२२॥

नीडस्थितो यथा पक्षी नीडाद्भिन्नः प्रदृश्यते ।
देहस्थितस्तथात्मायं देहादन्यः प्रकाशते ॥२३॥

व्याख्या— अन्तरात्मस्थलिनो देहेन सङ्गो नास्तीति सदृष्टान्तमाह युग्मेन— **यथेति** । **यथा** येन प्रकारेण **वारिणा** सरसः जलेन **पद्मपलाशस्य** कमलदलस्य **सङ्गः न भवेत्** सम्पर्कः न स्यात्, **तथा** तेन प्रकारेण **देहजुषः अपि** देहयुक्तोऽपि **अस्य** अन्तरात्मस्थलिनः **शरीरेण** देहेन सह **न सङ्गतिः** सङ्गः न भवति ॥ **यथा** येन प्रकारेण **नीडस्थितः** नीडस्थः **पक्षी** विहगः **नीडाद् भिन्नः** नीडाद् व्यतिरिक्तः **प्रदृश्यते** दृष्टिपथमायाति **तथा** तेन प्रकारेण **देहस्थितः** देहस्थः **अयम् आत्मा** एष आत्मा **देहाद् अन्यः** शरीराद् व्यतिरिक्तः **प्रकाशते** दृश्यते ॥ पद्मपलाशदृष्टान्तेन देहेना-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ऽन्तरात्मस्थलिनः सङ्गराहित्यम्, विहगदृष्टान्तेन तस्य देहाद् व्यतिरिक्तत्वं चात्रोक्ते ॥२२-२३॥

आच्छाद्यते यथा चन्द्रो मेघैरासङ्गवर्जितैः ।
तथात्मा देहसङ्घातैरसङ्गपरिवेष्टितः ॥२४॥

व्याख्या— दृष्टान्तान्तरम् आह— **आच्छाद्यते इति । यथा** येन प्रकारेण **चन्द्रः** चन्द्रमाः **आसङ्गवर्जितैः** सम्पर्करहितैः **मेघैः आच्छाद्यते** आव्रियते **तथा** तेन प्रकारेण **आत्मा** अन्तरात्मस्थली **देहसङ्घातैः** स्थूलादि-शरीरसङ्घातैः **असङ्गपरिवेष्टितः** असङ्गः सन् परिवृतः ॥ चन्द्र-मेघावरण-दृष्टान्तोऽत्यन्तं समीचीनः । पद्मपलाश-वारिदृष्टान्तो नीड-पक्षि-दृष्टान्त-श्चेत्युभयमपि पूर्णरूपेण दार्ष्टान्तिकसंवादि । तयोर्दार्ष्टान्तिकेनाऽसङ्गत्यंशः स्थूलतया प्रदर्श्यते; पद्मपलाश-वारिणोः नीड-पक्षिणोश्च साक्षादासङ्गः स्पष्टतया दृश्यते । देहात्मनोश्च साक्षादासङ्गो न दृश्यते । चन्द्र-मेघयोः शरीरजीवात्मनोरिव साक्षात्सम्बन्धो न दृश्यते । साक्षात्सम्बन्धविरहेऽप्य-सङ्गत्यंशे दृष्टान्त-दार्ष्टान्तिकयोः संवादो दृश्यते ॥२४॥

निर्ममो निरहङ्कारो निरस्तोपाधिविक्लवः ।
देहस्थोऽपि सदा ह्यात्मा शिवं पश्यति योगतः ॥२५॥

व्याख्या— अन्तरात्मस्थली शिवं पश्यन्नास्ते इत्याह— **निर्मम इति । निर्ममः** ममत्वरहितः **निरहङ्कारः** अहङ्काररहितः **निरस्तोपाधिविक्लवः** निरस्तः उपाधीनां विक्लवः यस्मात् सः, उपाधीनां निरोधरहितः **देहस्थः अपि** शरीरस्थितोऽपि **आत्मा हि** अन्तरात्मा हि **सदा** सर्वदा **योगतः** योगवलात् **शिवं** परशिवं **पश्यति** स्वात्माभिन्नत्वेन साक्षात्करोति ॥ देहादिष्वासङ्गो विषयासक्तियुक्तत्वेनेन्द्रियाणां बाह्यव्यापारः, लौकिक-सुखासक्तिरित्यादय आत्मनो बलह्रासकरा उपाधयः । परशिवे आत्मनः स्थितौ स्वात्माभिन्नत्वेन परशिवदर्शने प्राप्ते तादृशोपाधीनां बाधो नितरां निरस्यति ॥२५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भोक्तृभोज्यपरित्यागात् प्रेरकस्य प्रसादतः ।
भोक्तृताभावगलितः स्फुरत्यात्मा स्वभावतः ॥२६॥

व्याख्या— परमात्मनः प्रेरणया गलितभोक्तृभाव आत्मा स्वस्वरूपेण भासते इत्याह — **भोक्तृभोज्येत्यादिना । प्रेरकस्य** प्रेरकस्य परशिवस्य **प्रसादतः** अनुग्रहाद् **भोक्तृभोज्यपरित्यागात्** भोक्ता च भोज्यं च भोक्तृ-भोज्ये, तयोः परित्यागः, तस्मात् निमित्तात्, भोक्ताऽहं भोज्यं विषय-जातमिदम् इति भेदज्ञानपरित्यागात्, **भोक्तृताभावगलितः** भोक्तृत्व-भावस्य च्यवनविशिष्टः **आत्मा** अन्तरात्मा **स्वाभावतः** स्वस्वरूपेण, शिवाभिन्नस्वरूपेण **स्फुरति** प्रकाशते ॥ भोक्तृभोज्यपरित्यागो नाम भोक्तृभोज्ययोर्भेदपरित्यागः । स च प्रेरकस्य परशिवस्य कृपापूर्णेना-ऽनुग्रहेण भवति । भोक्तृभोज्यभावसम्बन्धनिवृत्तौ भोक्तृत्वभावः स्वयं निवर्तते । तदाऽऽत्मा स्वस्वरूपेण विराजते । अस्य स्वस्वरूपं नाम जीवात्म-परमात्मनोः साधारणीभूतान्तरात्मस्वरूपम् ॥२६॥

सर्वेषां प्रेरकत्वेन शम्भुरन्तःस्थितः सदा ।
तत्परिज्ञानयोगेन योगी नन्दति मुक्तवत् ॥२७॥

व्याख्या— परशिवस्य प्रेरकत्वपरिज्ञानेन शिवयोगी मोक्षानन्दम् अनुभवतीत्युक्त्वाऽन्तरात्मस्थलं समापयति— **सर्वेषाम्** इति । **शम्भुः** परशिवः **सर्वेषां** समेषां जनानां **प्रेरकत्वेन** प्रेरणादायकत्वेन **सदा** सर्वदा **अन्तःस्थितः** अन्तर्यामित्वेन तिष्ठति । **तत्परिज्ञानयोगेन** तत्साक्षात्कार-सम्बन्धेन **योगी** अन्तरात्मस्वरूपो योगी **मुक्तवत्** मुक्तिभाजनसदृशं **नन्दति** आनन्दम् अनुभवति ॥ जीवात्म-परमात्मनोर्मध्यवर्तित्वाद् अन्तरात्मनो मुक्तवदानन्दवत्त्वम् । स देहे तत्सम्बन्धिविषयेषु चाऽनासक्तिविशेषयुक्तो जीवात्मैव स्वात्माभिन्नशिवत्वभावविशेषयुक्तोऽन्तरात्मा ॥२७॥

— इत्यन्तरात्मस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

३. अथ परमात्मस्थलम् – (७४)

निर्धूते तत्प्रबोधेन मले संसारकारणे ।
सामरस्यात् परात्मस्थात् परमात्मायमुच्यते ॥२८॥

व्याख्या— अन्तरात्मैव शुद्धपरमात्मस्वरूपत्वात् परमात्मेत्याह— **निर्धूते इति । तत्प्रबोधेन** अन्तरात्मस्थलप्राप्तशिवाद्वैतज्ञानेन **संसारकारणे** जननमरणचक्ररूपसंसारहेतुभूते **मले** आणवादिमले **निर्धूते** निःशेषेन निष्कासिते सति **परात्मस्थात्** परमात्मस्थात् **सामरस्यात्** समरसभावात् अयं एषः अन्तरात्मा **परमात्मा** परशिवस्वरूपत्वात् परमात्मा इति **उच्यते** कथ्यते ॥ तत्र श्रुतिः— "एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् । समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥" (कै.उ., २४) इति । सर्वेऽनात्मभूते विश्वजाते अदृश्यतां गते यत्साक्षात्क्रियते स्वात्मरूपं तदेव परमात्मस्वरूपम् । परमात्मा परमार्थत एकोऽद्वितीयश्च । तथापि सर्वेषां हृदयगुहासु तिष्ठतीति स एव गुहाशयः । प्राणान्नामपर्यन्ताभिः कलाभिः स एव निर्मुक्तः । द्वितीयरहितः सोऽद्वितीयः । समस्तजगद्व्यापारस्य साक्षीभूतः स च पुनर्व्यक्ताव्यक्तविश्वातीतः, अतः सदसद्विहीन इत्युच्यते । शुद्धचैतन्यस्वरूपश्च स परमात्मा । तेन सह जीवात्मनो जलेन सह जलमिव समरसीभाव एव परमात्मस्थलम् । कैवल्यश्रुतौ परमात्मस्वरूपं यद्वर्णितं तदतीवसुन्दरमस्ति। तथा हि— "अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रम् । पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः । अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम् ॥ वेदैरनेकैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम् । न पुण्यपापे मम नास्ति नाशो न जन्मदेहेन्द्रियबुद्धिरस्ति । न भूमिरापो मम वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च ॥" (कै.उ.,२०-२३) । इदमेव परमसामरस्यं परमात्मस्थले निरूप्यते ॥२८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वेषामात्मभेदानामुत्कृष्टत्वात् स्वतेजसा ।
परमात्मा शिवः प्रोक्तः सर्वगोऽपि प्रकाशवान् ॥२९॥

व्याख्या— शिव एव परमात्मा इत्याह— **सर्वेषाम् इति** । **स्वतेजसा** स्वकीयेन तेजसा **सर्वगः अपि** सर्वव्यापकोऽपि **प्रकाशवान्** कान्तिमान् **सर्वेषां** समेषाम् **आत्मभेदानाम्** आत्मप्रकाराणाम् उत्कृष्टत्वात् श्रेष्ठत्वात् **शिवः** परशिव एव **परमात्मा प्रोक्तः** परमात्मा इति कथितः ॥ श्रुतिराह— "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥" (श्वे. उ., ६.११) इति । स हि नभवद् व्यापकः, परं तद्वन्न जडः । स हि देवः, प्रकाशमानत्वात् । स न दृश्यते प्राणिनां हृदयगुहासु निगूढत्वात् । स हि सर्वव्यापकः सर्वप्राणिषु चैतन्यरूपेण प्रविष्टत्वात् । अत एव अन्तर्यामीति कथ्यते । सर्वेषां कर्मणां सुखदुःखादिप्रदानेऽधिकृतत्वात् स एव कर्माध्यक्षः । सर्वेषां नियन्त्रकत्वात् सः सर्वभूताधिवासः । सर्वद्रष्टृत्वात् स हि साक्षी । स चैतन्यस्वरूपश्चैतन्यप्रदाता च । स हि गुणातीतः, गुणैरुद्भूतविकारैः कथमप्यप्रभावितः ॥२९॥

ब्रह्माण्डबुद्बुदस्तोमा यस्य मायामहोदधौ ।
उन्मज्जन्ति निमज्जन्ति परमात्मा स उच्यते ॥३०॥

व्याख्या— परमात्मलक्षणम् आह— **ब्रह्माण्डेत्यादिना** । **यस्य मायामहोदधौ** यस्य मायासमुद्रे **ब्रह्माण्डबुद्बुदस्तोमाः** ब्रह्माण्डा एव बुद्बुदाः ब्रह्माण्डबुद्बुदाः, तेषां स्तोमाः समूहाः, **उन्मज्जन्ति** उद्भवन्ति **निमज्जन्ति** विलयं प्राप्नुवन्ति **सः परमात्मा** स परमात्मा इति **उच्यते** कथ्यते ॥ ब्रह्माण्डबुद्बुदस्तोमा इत्यत्र स्तोमशब्देन तेषाम् अगणितत्वं व्यज्यते । ते परमात्मनः शिवस्य मायासमुद्रे उद्भवन्ति विलयं गच्छन्ति च । अतः स एव परमात्मा ॥३०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यस्मिन् ज्योतिर्गणाः सर्वे स्फुलिङ्गा इव पावकात् ।
उत्पत्य विलयं यान्ति तद्रूपं परमात्मनः ॥३१॥

व्याख्या— परमात्मस्वरूपं सदृष्टान्तम् आह— **यस्मिन्निति । यस्मिन्** यस्मिन् परवस्तुनि **सर्वे** समस्ताः **ज्योतिर्गणाः** जीवरूपतेजःसमूहाः **पावकात्** अग्नेः **स्फुलिङ्गाः इव** अग्निकणाः इव **उत्पत्य** उत्पन्नाः सन्तः **विलयं यान्ति** विलयं गच्छन्ति **तद्रूपं** तस्य परवस्तुनः रूपं **परमात्मनः** परमात्मनः रूपं भवति ॥ अत्र दत्तो दृष्टान्तो मुण्डकश्रुतेरिमं मन्त्रं स्मारयति— "यथा सुदीप्तात्पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥" (२.१.१) इति । सर्वे जीवाः शैवचैतन्यपावकस्य विस्फुलिङ्गाः । शिवयोगी स्वात्मानं शैवचैतन्यवह्नेः विस्फुलिङ्गत्वेन साक्षात्करोति । इदमेव तस्य परमात्मस्थलम् । श्रुतिरेका दृष्टान्तान्तरं दत्त्वा परमात्मस्वरूपं विशदयति— "यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति ताः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति ॥" (प्र. उ., ४.२) इति । यस्मिन्नेते सर्वे भावा निमज्जन्ति स एकोऽद्वितीयः परमात्मा ॥३१॥

यस्मिन् समस्तवस्तूनि कल्लोला इव वारिधौ ।
सम्भूय लयमायान्ति तद्रूपं परमात्मनः ॥३२॥

व्याख्या— दृष्टान्तान्तरेण पुनः परमात्मस्वरूपमेवाह— **यस्मिन्निति । यस्मिन्** यस्मिन् परवस्तुनि **समस्तवस्तूनि** सर्वाणि भूम्यादितत्त्वानि **वारिधौ** समुद्रे **कल्लोला इव** तरङ्गा इव **सम्भूय** एकीभूय **लयम् आयान्ति** विलयं गच्छन्ति **तद् रूपं** तदेव स्वरूपं **परमात्मनः** परमात्मनः परशिवस्य स्वरूपम् ॥ अत्र परमात्मा समुद्रः, सर्वाणि षट्त्रिंशतत्त्वसमुत्पन्नानि वस्तूनि कल्लोलाः । परमात्मसमुद्रे षट्त्रिंशत्तत्त्वसमुत्पन्नानि वस्तूनि विलयं गच्छन्ति । विलीनसर्ववस्तुरूपं हि परमात्मस्वरूपम् । श्रुतिरियम् नदी-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समुद्रदृष्टान्तेन परमात्मस्वरूपम् आह— "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥" (मुं. उ., ३.२.७; छां. उ., ६.९.१) इति ॥३२॥

निरस्तमलसम्बन्धं निःशेषजगदात्मकम् ।
सर्वतत्त्वोपरि प्रोक्तं स्वरूपं परमात्मनः ॥३३॥

व्याख्या— सर्वतत्त्वातीतं परमात्मस्वरूपम् इत्याह— **निरस्तेत्यादिना**। **निरस्तमलसम्बन्धं** निरस्तो मलानां सम्बन्धः यस्मात् तत्, आणवादिमलानां सम्बन्धरहितम्, **निःशेषजगदात्मकं** समग्रविश्वस्वरूपं **परमात्मनः** शिवस्य परमात्मनः स्वरूपं निजरूपं **सर्वतत्त्वोपरि** भूम्यादिशिवान्तषट्त्रिंशत्तत्त्वानाम् उपरीति **प्रोक्तं** कथितम् ॥ मुक्तात्मा निरस्ताणवादिमलत्रयः स्वकीये निजे परमात्मस्वरूपे तिष्ठति । जीवात्मा तु देहस्य जीवातुतत्त्वरूपेण तिष्ठति, नामरूपात्मकजगतः व्यवहारे निरतो भवति, षट्त्रिंशत्तत्त्वानां सङ्कुचितसीमनि बद्धोऽस्ति च । मुक्तात्मेदानीं तु परमात्मनः निजस्वरूपे तिष्ठन् षट्त्रिंशत्तत्त्वान्यतिक्रम्य विराजते ॥३३॥

यथा व्याप्य जगत्सर्वं स्वभासा भाति भास्करः ।
तथा स्वशक्तिभिर्व्याप्य परमात्मा प्रकाशते ॥३४॥

व्याख्या— कथं परमात्मा भातीत्यत्राह— **यथेति** । **यथा** येन प्रकारेण **भास्करः** सूर्यः **जगत्सर्वं** सर्वं विश्वं **व्याप्य** व्याप्तवान् सन् **स्वभासा** स्वप्रकाशेन **भाति** भासते **तथा** तेन प्रकारेण **परमात्मा** परशिवः **स्वशक्तिभिः** इच्छाज्ञानादिस्वशक्तिभिः **व्याप्य** व्याप्नुवन् सन् स्वभासा **प्रकाशते** विभासते ॥ परमात्मा स्वशक्तिपञ्चकेन पाञ्चभौतिकं सृष्टिं व्याप्नोति । तथा चोक्तं पञ्चाशिकाशास्त्रे— "धूमावती पृथिव्यां ह्लादाप्सु शुचौ तु भास्वती प्रथते । वायौ स्पन्दा विभ्वी नभसि व्याप्तं जगत्ताभिः ॥ धूमावती तिरोधौ भास्वत्यवभासतेऽध्वनां शक्तिः । क्षोभे स्पन्दा व्याप्तौ विभ्वी ह्लादा च पुष्टौ स्यात् ॥" (विरू. प., २५-२६) इति । अत्र यथा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वप्रकाशेन जगद्व्याप्य भासमानस्य भास्करस्याऽभेदस्तथा शिवाद् विश्वस्याभेदः, भूम्यादेः शक्तिस्वरूपत्वात्, शक्तीनां च शिवस्वभावत्वाद् इति नाशङ्कनीयम् । व्यापनेन सूर्यस्य तथाऽभेदे भासमानेऽपि, विश्वं नैव सूर्यतेजोरूपम्, परन्तु सम्बन्धमात्रम् । परमात्मनस्तु विश्वेन सहाऽभेदो नैजः । दृष्टान्त-दार्ष्टान्तिकयोर्व्याप्तिमात्रे साम्यम् ॥३४॥

विश्वतो भासमानोऽपि विश्वमायाविलक्षणः ।
परमात्मा स्वयंज्योतीरूपो जीवात्मनां भवेत् ॥३५॥

व्याख्या— विश्वं व्याप्य प्रकाशमानोऽपि परमात्मा विश्वमायाव्यतिरिक्त इति प्रतिपादयन् परमात्मस्थलं समापयति— **विश्वत इति । परमात्मा** परशिवः परमात्मा **विश्वतः** सर्वत्र (विश्वे) **भासमानोऽपि** प्रकाशमानोऽपि **विश्वमायाविलक्षणः** विश्वमायाव्यतिरिक्तः सन् **जीवात्मनां** वैराग्यसम्पन्नानां देहिनां **स्वयंज्योतीरूपः** बुद्धिप्रकाशकत्वेन स्वयंज्योतिस्वरूपः **भवेत्** स्यात् ॥ विश्वमाया नाम विश्वगतषड्भावविकारदोषयुक्तत्वम् । जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति चेति षड्भावविकाराः (या. नि., १.२) । परमात्मा तु तादृशविकाररहितत्वाद् विश्वमायाव्यतिरिक्तः । स च विश्वस्योपदानकारणीभूतस्तत्सृष्ट्वा तदेवानुप्रविशत् । तथापि स विश्वमायागतविकारदोषैर्नैव मलिनीकृतः । सर्वपरिशुद्धः सन् परमात्मा सर्वजीवात्मनां बुद्धिप्रकाशको भवति । तादृशेन बुद्धिप्रकाशेन जीवात्मानः सांसारिकजीवनस्य स्वर्गादिफलानां च नश्वरतां जानन्ति ॥३५॥

— इति परमात्मस्थलम् —

४. अथ निर्देहागमस्थलम् – (७५)

देहिनोऽपि परात्मत्वभाविनो निरहङ्कृतेः ।
निरस्तदेहधर्मस्य निर्देहागम उच्यते ॥३६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— देहवतो जीवात्मनो देहधर्मनिरास एव निर्देहागम इत्याह— **देहिन इति । परात्मत्वभाविनः** परात्मनः भावः परात्मत्वम्, परात्मत्वं भावयतीति परात्मभावी, णिनि प्रत्ययः, परात्मा परमात्मा अहम् इति भाविनः इत्यर्थः, **देहिनः अपि** शारीरस्यापि, देहवद् आत्मनः, जीवात्मनः इत्यर्थः, **निरहङ्कृतेः** अहङ्काररहितस्य, अहंममभावशून्यस्य **निरस्तदेहधर्मस्य** स्थूलत्वादिदेहधर्मविहीनस्य शिवयोगिनः **निर्देहागमः** निर्देहागमस्थलम् **उच्यते** कथ्यते ॥ निर्देहागमो नाम निर्देहप्राप्तिः । 'अहं स्थूलः', 'अहं कृशः', 'अहं युवा', 'अहं वृद्धः', इत्यादिषु देहधर्मासङ्ग उक्तः । तदासङ्गवर्जनमेव निरस्तदेहधर्मत्वम् । तादृशस्य देहधर्मानासक्तस्य निर्देहागमस्थलमिति कथ्यते । तदुक्तम्— "आश्रयो द्वन्द्वमित्युक्तं द्वन्द्व-त्यागात् परो धर्मः । जीवन्मुक्तः सदा योगी देहत्यागाद् विमुत्यते ।" (देवी.आ., ४४) इति ॥३६॥

गलिते ममताहन्ते संसारभ्रमकारणे ।
पराहन्तां प्रविष्टस्य कुतो देहः कुतो रतिः ॥३७॥

व्याख्या— शिवयोगिनः परमात्मस्थितिं प्रतिपादयति— **गलिते इति । संसारभ्रमकारणे** संसारस्य भ्रमः संसारभ्रमः संसारभ्रान्तिः, तस्य कारणं हेतुः, तस्मिन्, **ममताहन्ते** ममता च अहन्ता च, तयोः समाहारः ममताहन्तम्, तस्मिन्, **गलिते** प्रच्युते सति **पराहन्तां** परमाहन्ताम्, सर्वव्यापकाहन्तां **प्रविष्टस्य** प्रवेशं कृतवतः, प्रवेशं प्राप्तस्य इत्यर्थः, **कुतो देहः** कुतः शरीरम् ? कुतोऽपि नास्तीत्यर्थः । **कुतः रतिः** कुत आसक्तिः? न कुतोऽपीत्यर्थः ॥ अत्र प्रथमपादे 'ममताहन्ते' इत्यस्य 'कृत्रिमाहन्त्वे' इति पाठान्तरम् । (पश्यत – सि. शि., उज्ज्ञनीशस्य कन्नडव्याख्यासमेतः – १८.४३; तथा काशीनाथशास्त्रिणः कन्नडव्याख्या समेतः – १८.३८ सोसले-रेवणाराध्यस्य कन्नडव्याख्यासमेते ग्रन्थे तु 'ममताहन्ते' इत्येव पाठः–१८.३८)। यावत्पर्यन्तं संसारकारणभूतः ममताहंकारभावः प्रवर्तते

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तावत् पर्यन्तं देहप्रज्ञा प्रवर्तते । पराहन्तां प्रविष्टस्य शिवयोगिनस्तु देहभावो निरस्यति । इदमेव शिवयोगिनो निर्देहागमस्थलम् ॥३७॥

केवले निष्प्रपञ्चौघे गम्भीरे चिन्महोदधौ ।
निमग्नमानसो योगी कथं देहं विचिन्तयेत् ॥३८॥

व्याख्या— उक्तमेव प्रकारान्तरेण निरूपयति— **केवले इति । केवले** अद्वितीये **निष्प्रपञ्चौघे** प्रपञ्चानाम् ओघः प्रपञ्चौघः, निर्गतः प्रपञ्चौघः यस्मात् सः निष्प्रपञ्चौघः, तस्मिन्, चराचरप्रपञ्चप्रवाहायुक्ते, **गम्भीरे** अतिगहने **चिन्महोदधौ** चिन्महासमुद्रे **निमग्नमानसो** निमग्नं मानसं यस्य सः, लीनमनाः **योगी** शिवयोगी **कथं** केन प्रकारेण **देहं** शरीरं **विचिन्तयेत्** चिन्तयेत् ? न केनापि प्रकारेण इत्यर्थः ॥ चिन्महोदधौ लीनमनाः शिवयोगी निरस्तसर्वप्रापञ्चिकसम्पर्को भवति । तादृशं मनो देहं न कदापि चिन्तयति । अयमेव श्रीशङ्कराचार्येण 'मनसः अमनीभावः' इत्युच्यते, माण्डूक्य कारिकायाम् अयम् 'अस्पर्शयोगः' इति व्यवह्रियते – पश्यत – "अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः । योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥" (३.३९) इति— अत्र श्रीशङ्कराचार्यः विवृणोति— "अस्पर्श-योगो नामायं सर्वसम्बन्धाख्यस्पर्शवर्जितत्वादस्पर्शयोगो नाम वै स्मर्यते प्रसिद्ध उपनिषत्सु ।" इति । शिवयोगी योगे निष्णातः सन् स्वमानसं गहने चित्समुद्रे विलयीकुर्वन् कथमपि शरीरं न चिन्तयति । इदमेव निर्देह-गमस्थलम् ॥३८॥

अपरिच्छेद्यमात्मानं चिदम्बरमिति स्मरन् ।
देहयोगेऽपि देहस्थैर्विकारैर्न विलिप्यते ॥३९॥

व्याख्या— निर्देहागमस्थलं प्रकारान्तरेण निरूप्यते— **अपरिच्छेद्य-मिति । आत्मानं** स्वात्मानम् **अपरिच्छेद्यं** परिच्छेत्तुं शक्यं परिच्छेद्यम्, न परिच्छेद्यम् अपरिच्छेद्यम्, अविभाज्यम् इत्यर्थः, **चिदम्बरम् इति** चिदा-काशम् इति **स्मरन्** स्मृतौ धारयन्, **देहयोगेऽपि** शरीरयुक्तत्वेऽपि शिव-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

योगी **देहस्थैः** शरीरस्थैः **विकारैः** स्थूलत्वकृशत्वादिविकारैः **न विलिप्यते** विलिप्तो न भवति ॥ अत्र अस्य विषयस्य विशदीकरणाय प्रसिद्धः वारि-पुष्करपलाशयोर्दृष्टान्तः प्रयोज्यते । तथा हि— "यथा पुष्करपलाशा आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते इति ।" (छां. उ., ४.१४.३) इति ॥३९॥

अखण्डसंविदाकारमद्वितीयं सुखात्मकम् ।
परमाकाशमात्मानं मन्वानः कुत्र मुह्यति ॥४०॥

व्याख्या— कथं शिवयोगी शरीर्यहमिति न मुह्यतीत्यत्राह— **अखण्डे-त्यादिना** । **अखण्डसंविदाकारम्** अखण्डा संविद् अखण्डसंवित्, तस्याः आकारः अखण्डसंविदाकारः, तम्, **अद्वितीयं** न विद्यते द्वितीयः यस्य सः अद्वितीयः, तम्, **सुखात्मकं** आनन्दस्वरूपः, तम्, **परमाकाशं** महदाकाशम् इति **मन्वानः** मन्यमानः शिवयोगी **कुत्र मुह्यति** कस्मिन् स्थाने 'अहं शरीरी इति' मोहम् अनुभवति ? न कुत्रापि, परमात्माभिन्नप्रदेशाभावात् इत्यर्थः ॥ आत्मानम् अखण्डसंविद्रूपम् अद्वितीयं चिदानन्दमयम् इति मन्यमानः शिवयोगी न कदापि कुत्रापि वा 'शरीर्यहम्' इति मुह्यति । शिवयोगिनः परमात्माभिन्नत्वेन परमाकाशस्वरूपत्वम् । "आकाशशरीरं ब्रह्म सत्यात्मप्राणारामं मन आनन्दं शान्तिसमृद्धम् ।" (छां. उ., १.६.२) इति श्रुतिः । परमात्मा च सत्यात्मा इत्युच्यते, तस्य स्वरूपं परमार्थ-तोऽखण्डसत्यमिति ज्ञातत्वात् । स प्राणारामः, प्राणास्तस्य क्रीडोपरण-त्वात् । स पुनः मनआनन्दः, तन्मनसः परमानन्दसारत्वात् । स शान्ति-समृद्धोऽपि, शान्तिरेव तस्य विभवत्वात् । तादृशं हि परमात्मनः स्वरूपम् । तस्य न कदापि शरीर्यहमिति भ्रान्तिः ॥४०॥

उपाधिविहिता भेदा दृश्यन्ते चैकवस्तुनि ।
इति यस्य मतिः सोऽयं कथं देहमितो भवेत् ॥४१॥

व्याख्या— सोपाधिकभेदाः स्युर्न तु पारमार्थिकभेदा इत्यवगतस्य योगिनो देहपरिमितत्वं नास्तीत्याह— **उपाधीत्यादिना** । **एकवस्तुनि**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एकस्मिन् वस्तुनि **उपाधिविहिताः** उपाधिना कृताः **भेदाः** प्रकाराः **दृश्यन्ते** अवलोक्यन्ते इति **यस्य** यस्य योगिनः **मतिः** निश्चितबुद्धिः सः **कथं** केन प्रकारेण **देहमितः** शरीरमात्रपरिमितः **भवेत्** स्यात् ? न केनापि प्रकारेण स देहमितः इत्यर्थः ॥ अत्र आकाश उदाहरणत्वेन ग्रहीतुं शक्यते । आकाशस्य घटमठाद्युपाधिविहिता घटाकाश-मठाकाशादिभेदा दृश्यन्ते । एते भेदाः केवलम् उपाधिविहिताः, न तु पारमार्थिकाः, उपाधिनिष्कासने तेषाम् अदृश्यत्वाद् इति यो ज्ञानी निश्चयेन जानाति तस्य देहपरिमितत्वभ्रमो न जायते । स च शरीरस्योपाधित्वे त्यक्ते उपेक्षिते वा तस्मिन् स्वात्माऽखण्डात्मनि परशिवे एकीभवतीति च निश्चयेन जानाति ॥४१॥

भेदबुद्धिः समस्तानां परिच्छेदस्य कारणम् ।
अभेदबुद्धौ जातायां परिच्छेदस्य का कथा ॥४२॥

व्याख्या— उक्तमेव प्रकारान्तरेण विशदयति— **भेदबुद्धिरिति** । **भेदबुद्धिः** भिन्नताप्रतीतिः **समस्तानां** सर्वेषां **परिच्छेदस्य** परिमितत्वज्ञानस्य **कारणम्** हेतुः, **अभेदबुद्धौ जातायां** एकत्वप्रतीतौ उत्पन्नायां सत्यां **परिच्छेदस्य** परिमितत्वस्य **का कथा** का वार्ता ? परिच्छेदवार्ता न कापीत्यर्थः ॥ यावत्पर्यन्तं परिच्छेदबुद्धिः प्रवर्तते तावत्पर्यन्तं देशकालाकाराद्युपाधिवशाद् भेदप्रतीतिरनुवर्तते । अपगतायाम् भेदबुद्धौ अखण्डैकत्वप्रतीतिर्दृढा भवति । सा एव स्थितिः परमात्मनः । शिवयोगी 'शिवोऽहं' भावेनाऽऽत्मानं पश्यति सर्वत्र शिवभावमेव वीक्षमाणो देहासङ्गं नितरां विस्मरति च ॥४२॥

शिवोऽहमिति यस्यास्ति भावना सर्वगामिनी ।
तस्य देहेन सम्बन्धः कथं स्यादमितात्मनः ॥४३॥

व्याख्या— शिवाद्वैतभावयुक्तस्य देहसम्बन्धो नास्ति इत्युक्त्वा निर्देहागमस्थलं समापयति— **शिवोऽहम् इति** । **यस्य** यस्य योगिनः **शिवोऽहम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति शिव एवाहम् इति **सर्वगामिनी** सर्वव्यापकीभूता **भावना** शिवाद्वैत-भावना **अस्ति** भवति, **तस्य अमितात्मनः** तस्य अपरिमितात्मवतः योगिनः **कथं** केन प्रकारेण **देहेन** शरीरेण **सम्बन्धः** सङ्गतिः **स्यात्** भवेत्? न केनापि प्रकारेण स्यादित्यर्थः ॥ शिवयोगिनो न कथञ्चिदपि देहासङ्गो भवतीति निर्देहागमस्थलित्वम् ॥४३॥

— इति निर्देहागमस्थलम् —

५. अथ निर्भावागमस्थलम् – (७६)

व्यतिरेकात् स्वरूपस्य भावान्तरनिराकृतेः ।
भावो विकारनिर्मुक्तो निर्भावागम उच्यते ॥४४॥

व्याख्या— शिवयोगिनो निर्भावस्वरूपमाह— **व्यतिरेकाद्** इति । **स्वरूपस्य** आत्मनः निर्देहरूपनिजस्वरूपस्य **व्यतिरेकात्** व्यतिरिक्तत्वाद्, विसंवादित्वाद् इत्यर्थः, **भावान्तरनिराकृतेः** अन्यभावनिराकरणात् **विकार-निर्मुक्तः** इन्द्रियविकारविनिर्मुक्तो **भावः** मनोभावः **निर्भावागम उच्यते** निर्भावागमः इति कथ्यते ॥ निर्देहशिवयोगिनो निजस्वरूपं नाम परमात्मनः सच्चिदानन्दस्वरूपम् । अत्र अन्ये सर्वे मनोभावाः परित्यक्ताः, तेषां निजस्वभावविसंवादित्वात् । अत इदं निर्भावागमस्थलम् इति व्यवह्रियते । भावस्य लक्षणं पूर्वमेवोक्तम्— "भावो मानसचेष्टात्मा परिपूर्णः शिवात्मकः" (सि. शि. १६.६७) इति । उक्तं च निर्भावलक्षणम्— "नैवोर्ध्वं धारयेश्चित्तं न मध्यं नाप्यधः क्वचित् । अन्तर्भावविनिर्मुक्तं सदाकुर्यान्निराश्रयम् ॥" (देवी.आ., ३८) इति । अनेन निर्भावेन स्वात्मा परमात्मनोऽभिन्नः। स चाऽनुभवसारो नान्यः कश्चित्। एतदेव आत्मैकत्वावधानम्। शिवयोगिनस्त्वनुभवोऽप्रयत्नसिद्धः । बृहदारण्यकोपनिषदि चास्य दृष्टान्त-वर्णनम् अतीव मनोज्ञं वर्तते । तथा हि— "स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः । स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शङ्खस्य तु ग्रहणेन शङ्खाध्मातस्य वा शब्दो गृहीतः । स यथा वीणायै वाद्यमानायै न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय वीणायै तु ग्रहणेन वीणावादनस्य वा शब्दो गृहीतः ॥'' (२.४.७-९) इति । एवमेव शिवोऽहं-भावैकानुभवसारे सति शिवैक्यभावव्यतिरिक्तो नान्योऽनुभवो भवितु-मर्हति । अन्ये सर्वे भावा निरस्ता भवन्ति । इदमेव निर्भावागमस्थलम् ॥४४॥

अहं ब्रह्मेति भावस्य वस्तुद्वयसमाश्रयः ।
एकीभूतस्य चिद्व्योम्नि तदभावो विनिश्चितः ॥४५॥

व्याख्या— निर्भावागमं प्रकरान्तरेण निरूपयति— **अहम् इति** । **अहं ब्रह्म इति** 'अहं ब्रह्मास्मि' इति **भावस्य** प्रत्ययस्य **वस्तुद्वयसमाश्रयः** अहम् इति ब्रह्मेति वस्तुद्वयस्य समाश्रयः अवलम्बनं अपेक्ष्यते । **चिद्व्योम्नि** चिदाकाशे **एकीभूतस्य** सामरस्येन एकत्वं प्राप्तस्य भावस्य **तदभावः** वस्तुद्वयसमाश्रयाभावः **विनिश्चितः** विशेषेण निश्चितः॥ "अहं ब्रह्मास्मि" इत्यस्याम् उक्तावेव 'अहम्' 'ब्रह्म' इति वस्तुद्वयस्योल्लेखः कृतः । स्वात्मनश्चिदाकाशे विलये जाते भेदोऽयं नैव दृश्यते । प्रस्तुतवाक्ये 'अस्मि' — शब्दवशात् 'अहं ब्रह्मणि एकीभूतः' इत्यर्थः प्रतीयते । इयं च साक्षात्कारप्रक्रिया द्वयोश्चिदाकाशे समरसीभावेन पूर्णतां गच्छति । अत्र द्वैतभावस्य गन्धोऽपि नास्ति । भावविकाराणां क्वचन सत्ता न विद्यते । इदं खलु समस्तं ब्रह्म । अहमन्य इदं चान्यदिति भ्रान्तिः सर्वथा नास्ति ॥४५॥

एकभावनिरूढस्य निष्कलङ्के चिदम्बरे ।
क्व जातिवासनायोगः क्व देहित्वं परिभ्रमः ॥४६॥

व्याख्या— चिदाकाशे समरसीभूतस्य मायिकजातिभेदसंस्कारो नास्ती-त्याह— **एकेत्यादिना** । **निष्कलङ्के** निर्गतः कलङ्कः यस्मात् सः निष्कलङ्कः, तस्मिन्, निर्दोषे इत्यर्थः, तादृशे **चिदम्बरे** चिदाकाशे **एकभावनिरूढस्य** तादात्म्येन एकभावं प्राप्तस्य शिवयोगिनः क्व **जातिवासनायोगः** जाति-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संस्कारसम्बन्धः कुत्र ? न कुत्रापि इत्यर्थः, **क्व देहित्वं** कुत्र देहवत्त्वम् ? न कुत्रापि इत्यर्थः । क्व **परिभ्रमः** कुत्र वा संसारचक्रे परिभ्रमणम् ? न कुत्रापि इत्यर्थः ॥ सर्वे वर्णाश्रमादिभेदा अज्ञानवातप्रेरिताः सन्तो मायासमुद्रतरङ्गा भवन्ति । मायाशक्तिस्तु तिरोधानतत्परस्य परमात्मनः कार्ये प्रवृत्ता सती सर्वं विश्वं भ्रमयति । केवलं शिवयोगी तन्मायाशक्तिं जित्वा परमात्मरूपे चिन्महाकाशे विलयं गच्छति तद्गतपरमानन्दम् अनुभवति च । यद् देहत्वेन भासते तदसत्प्रायम् । यद्यद् देहसम्बद्धं वर्णाश्रमादि तत्सर्वमप्यदृश्यतां गच्छति । एष एवैकीभावः, अद्वयस्थितिरित्यपि कथ्यते । जातिवासनायोगे निरस्ते एकभावः सिद्ध्यति । कथमेष योगो निरस्तो भवतीति सम्यग्वर्णितं बृहदारण्यकश्रुतौ, यथा— "ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद, लोकास्त परादुर्योऽन्यत्रात्मनो लोकान् वेद, देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद, भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद..... ॥" (बृ. उ., २.४.६) इति । ब्राह्मणवर्णः पुरुषं जह्यात्, पुरुषस्तं वर्णम् अनात्मत्वेन गृह्यते इति कारणात् । एवमेव क्षत्रियवर्णः, लोकाः, देवाः, भूतानि, सर्वं चेति ते तं जहति, तेन तेषाम् अनात्मत्वेन ग्रहणात् ॥४६॥

शून्ये चिदम्बरे स्थाने दूरे वाङ्मानसाध्वनः ।
विलीनात्मा महायोगी केन किं वापि भावयेत् ॥४७॥

व्याख्या— चिदाकाशे विलीनो महायोगी किमपि वस्तु भावयतीत्याह— **शून्ये इति** । **शून्ये** सर्वाकाररहिते **वाङ्मानसाध्वनः दूरे** वाङ्मनोगोचराद् अतीते **चिदम्बरे स्थाने** चिदाकाशस्थाने **विलीनात्मा** विलीनः आत्मा यस्य सः, तादात्म्येन समरसीभूतस्वात्मा **महायोगी** शिवयोगी **केन** केन प्रकारेण **किं वापि** किं वा वस्तु **भावयेत्** चिन्तयेत् ? न केनापि प्रकारेण किमपि वस्तु भावयतीत्यर्थः ॥ "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तै. उ., २.४; ब्र. उ., २२) इति श्रुतेरखण्डतत्त्वरूपचिदाकाशो वाङ्मनोमार्गागोचरः । परमानन्दमयः सोऽयं चिदाकाशो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निराकारो निर्वर्णश्च । तर्हि कथं स मनसा वेन्द्रियेभ्यो वा ग्रहीतुं शक्यते? महायोगिनि तस्मिन् चिदाकाशे समरसीभूते सति, न किमपि भावनायोग्यं तस्याऽवशिष्यते । अत एव स निर्भाव इत्युच्यते ॥४७॥

अविशुद्धे विशुद्धे वा स्थले दीप्तिर्यथा रवेः ।
पतत्येवं सदाद्वैती सर्वत्र समवृत्तिमान् ॥४८॥

व्याख्या— निर्भावयोगिनः सर्वत्र समवृत्तित्वमाह— **अविशुद्धे इति । यथा** येन प्रकारेण **रवेः** सूर्यस्य **दीप्तिः** प्रकाशः **अविशुद्धे** अशुद्धे **विशुद्धे वा** शुद्धे वा **स्थले** स्थाने **पतति** प्रसरति, **एवं** तेन प्रकारेण **अद्वैती** निरूढाद्वैत-सम्पन्नः शिवयोगी **सदा** सर्वदा **सर्वत्र** सर्वस्थलेषु **समवृत्तिमान्** समान-प्रवृत्तिमान् ॥ तथा सन् सञ्चरतीत्यर्थः ॥ इयं स्थितिर्भगवता मनोज्ञत-योक्ता— "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥" (भ. गी., १८.५४) इति । पराभक्तिस्तु वीरशैवशास्त्रे ऐक्यभक्तिरित्यपरपर्याया समरसभक्तिरेव ॥४८॥

न बिभेति जरामृत्योर्न क्षुधया वशं व्रजेत् ।
परिपूर्णनिजानन्दं समास्वादन् महासुखी ॥४९॥

व्याख्या— तामेव स्थितिं प्रकारान्तरेण उक्त्वा निर्भावागमस्थलं समापयति— **नेति** । परमशिवयोगी **जरामृत्योः** वार्धक्यमरणयोः **न बिभेति** न भीतो भवति, **क्षुधया** बुभुक्षया **न वशं व्रजेत्** न वशं गच्छेत्, तया न अभिभूयाद् इत्यर्थः, **परिपूर्णनिजानन्दं** अखण्डस्वात्मानन्दं **समास्वादन्** समास्वादं कुर्वन् **महासुखी** महत्सुखम् अनुभवति ॥ शिवानन्दे निमग्नो निर्भावशिवयोगी महासुखी भूत्वा संसाराद् भीतो न भवति, क्षुत्पिपासाभ्यामनभिभूतश्च तिष्ठति ॥४९॥

— इति निर्भावागमस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

६. अथ नष्टागमस्थलम् – (७७)

भेदशून्ये महाबोधे ज्ञात्रादित्रयहीनकः ।
ज्ञानस्य नष्टभावेन नष्टागम इहोच्यते ॥५०॥

व्याख्या— निर्भावस्थलसम्पन्नस्य भेदज्ञानरहितत्वेन नष्टागमत्वमाह— **भेदशून्ये इति** । **भेदशून्ये** द्वैतरहिते **महाबोधे** परशिवज्ञाने सति, निर्भावशिवयोगी **ज्ञात्रादित्रयहीनकः** ज्ञातृ-ज्ञेय-ज्ञानात्मकत्रिपुटीरहितः भवति । तस्मात् **ज्ञानस्य** भेदज्ञानस्य **नष्टभावेन** नष्टत्वेन सः **इह** अत्र, अस्मिन् स्तरे **नष्टागम उच्यते** नष्टागमः इत्युच्यते ॥ आगमो नाम शास्त्रं तज्ज्ञानं च । अत्र ज्ञानं भेदज्ञानम् । भेदज्ञानशून्यत्वमेव नष्टागमत्वम् । अस्य स्वरूपं बृहदारण्यके वर्ण्यते— "यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरं शृणोति, तदितर इतरम् अभिभवति, तदितर इतरं मनुते, तदितर इतरं विजानाति, यत्र वा अस्य सर्वमात्मैवाभूत्तत् केन कं जिघ्रेत् तत् केन कं पश्येत् तत्केन कं श्रृणुयात्, तत्केन कम् अभिभवेत् तत्केन कं मन्वीत, तत्केन कं विजानीयात् । येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयदिति ॥" (बृ. उ., २.४.१४) इति । अत्र शङ्कराचार्य आह— "तस्मात् परमार्थात्मैकत्वप्रत्यये क्रियाकारकफलप्रत्ययानुपपत्तिः" इति ॥५०॥

अद्वैतवासनाविष्टचेतसां परयोगिनाम् ।
पश्यतामन्तरात्मानं ज्ञातृत्वं कथमन्यथा ॥५१॥

व्याख्या— शिवयोगिनः ज्ञातृत्वादित्रिपुटीमयप्रपञ्चरहितत्वमाह— **अद्वैतेत्यादिना** । **अद्वैतवासनाविष्टचेतसाम्** अद्वैतस्य वासना, अद्वैतवासना, अद्वैतसंस्कारः, अद्वैतवासनया आविष्टं चेताः येषां ते अद्वैतवासनाविष्टचेतसः, तेषाम्, तादृशानाम्, **अन्तः** अन्तः स्वहृदये **आत्मानं** स्वत्मानं **पश्यताम्** अवलोकयतां **परयोगिनां** नष्टागमस्थलीनानां शिवयोगिनां **कथं** केन प्रकारेण **अन्यथा** स्वातिरिक्तपदार्थान्तरतया **ज्ञातृत्वं** ज्ञातृत्वादि-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्रिपुटीज्ञानं स्यात्? न कथमपि त्रिपुटीप्रपञ्चसम्बन्धः भवतीत्यर्थः ॥ अद्वैतवासना तु "अहं परतत्त्वमस्मि" इत्येवंरूपा। परतत्त्वे परशिवब्रह्मणि नास्ति त्रिपुटीभेदः, ज्ञातृज्ञेयभावस्यैकस्मिन्नेव समरसीभूतपरतत्त्वे निहितत्वात्, ज्ञातृ-ज्ञेययोरेकत्वे भेदज्ञानस्य निरवकाशत्वाच्च ॥५१॥

अकर्ताऽहमवेत्ताहमदेहोऽहं निरञ्जनः ।
इति चिन्तयतः साक्षात् संविदेव प्रकाशते ॥५२॥

व्याख्या— ज्ञातृत्वाद्यभावे किं प्रकाशते परयोगिन इत्यत्राह— **अकर्तेति** । **अहम् अकर्ता** नाहं कर्ता, **अहम् अवेत्ता** नाहं ज्ञाता, **अहम् अदेहः** नाहं शरीरम्, **अहं निरञ्जनः** अहं निरासक्तः, **इति चिन्तयतः** एवं विचारयतः **साक्षात्** निजरूपेण **संविद् एव** शिवाद्वैतज्ञानम् एव **प्रकाशते** विद्योतते ॥ केवले शिवाद्वैतज्ञाने त्रिपुटीभावो नास्ति । तदन्यज्ञाने तु नास्ति त्रिपुटीभावनिर्मुक्तिः । इदमेव नष्टागमस्थलसम्पन्नत्वम् । कर्तृत्वं कर्मेन्द्रियव्यवहारमवलम्बते, वेत्तृत्वं ज्ञानेन्द्रियव्यवहारमवलम्बते, कर्मेन्द्रिय-ज्ञानेन्द्रियव्यवहारश्च मनःसंसर्गम् अवलम्बते । शिवाद्वैते एकरसीभूतस्य महायोगिनः कर्तृत्ववेत्तृत्वयोः सम्बन्धो नास्ति, मनसः कर्मज्ञानेन्द्रियाणां च निर्व्यापारत्वात् । अकर्ताऽहमित्यादिवचनं तद्गतचिन्तनं वा शिवाद्वैते स्थितस्य शिवयोगिनो न भवितुमर्हति । त्रिपूटीज्ञानशून्यत्वस्थित्या आक्षिप्यते । केवलम् अस्माकम् अवगमार्थं ग्रन्थकृता तादृशचिन्तनं शब्दविषयीक्रियते इति ज्ञेयम् ॥५२॥

निरस्तभेदजल्पस्य निरीहस्य प्रशाम्यतः ।
स्वे महिम्नि विलीनस्य किमन्यज्ज्ञेयमुच्यते ॥५३॥

व्याख्या— अस्य परयोगिनो नास्ति ज्ञेयान्तरमित्याह— **निरस्तेत्यदिना** । **निरस्तभेदजल्पस्य** भेदस्य जल्पः निराधारवचनं भेदजल्पः, निरस्तः भेदजल्पः यस्मात् सः निरस्तभेदजल्पः, तस्य, निरस्तभेदविषयकासम्बद्ध-प्रलापस्य, **निरीहस्य** निरपेक्षस्य **प्रशाम्यतः** प्रशान्तिं प्राप्तस्य, **स्वे महिम्नि**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वकीये माहात्म्ये **विलीनस्य** निमग्नस्य शिवयोगिनः **किमन्यत्** किमपरं **ज्ञेयं** ज्ञातव्यम् **उच्यते** कथ्यते ॥ अहंममकाराभावे निर्देहागमत्वम्, सर्वभावातीतत्वे निर्भावागत्वम्, त्रिपुटीज्ञानरहितत्वे च नष्टागमत्वमिति विवेकः । यस्मिन् शिवानन्दे शिवयोगी निमग्नस्तस्य तु स्वस्वरूपानतिरिक्तत्वमेव । द्वैतचिन्तनमत्र सर्वथाऽनुपपन्नम् । शिवः, जीवः, जगच्चेति भेदो नितरां निरस्तः । अयमेव परमार्थः नष्टागमस्य ॥५३॥

एकीभूते निजाकारे संविदा निष्प्रपञ्चया ।
केन किं वेदनीयं तद्वेत्ता कः परिभाष्यते ॥५४॥

व्याख्या— उक्तमेव प्रकारान्तरेण निरूपयति— **एकीभूते इति** । **निजाकारे** स्वस्वरूपे **निष्प्रपञ्चया** निर्गतः प्रपञ्चः यस्याः सा निष्प्रपञ्चा, तया, प्रपञ्चरहितया **संविदा** ज्ञानेन केवलशिवाद्वैतज्ञानेन इति यावत्, **एकीभूते** समरसीभूते सति **केन किं वेदनीयं** केन किं वस्तु ज्ञातव्यम् ? न केनापि किमपि वस्तु ज्ञेयं भवतीत्यर्थः; **तद्वेत्ता कः** तस्य ज्ञेयस्य ज्ञाता कः इति **परिभाष्यते** विचार्यते ? न कोऽपि ज्ञाता इत्यर्थः ॥ तदुक्तम्— "एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित्" (श्वे. उ., १.१२) इति। मायाकल्पितत्रिपुटीभावयुक्तप्रपञ्चस्याऽनुभवः शिवयोगिनां नास्ति ॥५४॥

महासत्ता महासंवित् विश्वरूपा प्रकाशते ।
तद्विना नास्ति वस्त्वेकं भेदबुद्धिं विमुञ्चतः ॥५५॥

व्याख्या— कीदृशस्तस्याऽनुभव इत्यत्र वदन्नष्टागमस्थलं समापयति— **महासत्ता इति** । **महासत्ता** महती सत्ता महासत्ता, सर्वपदार्थव्यापकत्वरूपा महासत्ता, **महासंवित्** सर्वव्यापकीभूता महती संवित् च **विश्वरूपा** विश्वाकारत्वेन **प्रकाशते** विद्योतते । **तद्विना** तद्व्यतिरिक्तम्, महासच्चित्स्वरूपभूतविश्वं विहायान्यद् **एकं वस्तु** एकमपि वस्तु **भेदबुद्धिं** भेदभावनां **विमुञ्चतः** परित्यजतः शिवयोगिनः **नास्ति** न भवति ॥ परतत्त्वपरब्रह्मणो-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

र्महती सत्तारूपा शक्तिर्महासत्ता। महासत्तामहासंविद्रूपमिदं शक्तिद्वयं तु चराचरात्मकविश्वरूपेण प्रकाशते। महसत्ता विश्वस्याऽऽधारभूता, महासंविच्च विश्वस्य प्रकाशिका। परतत्त्वे परशिवे निमग्नस्य शिवयोगिनो विश्वं महासत्ता-महासंविदोः स्वरूपे परिदृश्यते। शिवयोगिनि त्रिपुटीभावस्य नास्ति कोऽप्यवकाशः। नष्टागमसम्पन्नोऽयं परयोगी त्वादिप्रसादिस्थलयोग्यो भवति ॥५५॥

— इति नष्टागमस्थलम् —

७. अथ आदिप्रसादिस्थलम् – (७८)

सर्वाधिष्ठातृकः शम्भुरादिस्तस्य प्रसादतः।
आदिप्रसादीत्युक्तोऽयं निर्विकारपदे स्थितः ॥५६॥

व्याख्या— आदिप्रसादिस्थलं विवक्षुः आदिप्रसादी क इत्यत्राह—. **सर्वेत्यादिना। सर्वाधिष्ठातृकः** सर्वस्य विश्वस्य आधारभूतः **शम्भुः** परशिवः **आदिः** मूलकारणम्, **तस्य प्रसादतः** तस्य प्रसादवशात्, प्रसन्नताकारणाद् इत्यर्थः, **निर्विकारपदे स्थितः** विकाररहिते नष्टागमस्थले स्थितोऽयं शिवयोगी **आदिप्रसादी इति** आदिप्रसादवानिति **उक्तः** कथितः॥ शिवयोगी परमानासक्तस्थितौ तिष्ठन् लौकिकजीवनसम्बन्धिविकाररहितो भवति। अयं च परशिवप्रसादस्य परिणामत्वेनः सम्पद्यते। अस्य स्थितिः प्रशान्ता परमानन्दमयी च। सृष्ट्यादिपञ्चकृत्यमूलकारणत्वात् परशिव आदिशब्देन गीयते। अस्मिन् स्थले प्राप्तशिवानुग्रहः शिवयोगी परमानन्दभाजनः भवति। अत एव स आदिप्रसादीत्यन्वर्थनाम्ना ज्ञायते। "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं महादेवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥" (श्वे. उ., ६.१८) इत्युक्तरीत्या शिवयोगी शरणागत्याऽऽदिप्रसादी भवति। इदं तस्य स्थलम्। अस्य शिवाद्वैतस्थितिः मनोज्ञतया तत्रैव वर्णिता— "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्॥" (श्वे. उ., ६.१९) इति ॥५६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अनेकजन्मशुद्धस्य निरहङ्कारभाविनः ।
अप्रपञ्चस्यादिदेवः प्रसीदति विमुक्तये ॥५७॥

शिवप्रसादसम्पत्त्या शिवभावमुपेयुषि ।
शिवादन्यज्जगज्जालं दृश्यते न च दृश्यते ॥५८॥

शम्भोः शिवप्रसादेन संसारच्छेदकारिणा ।
मोहग्रन्थिं विनिर्भिद्य मुक्तिं यान्ति विवेकिनः ॥५९॥

व्याख्या— आदिप्रसादिनो महत्त्वमाह विशेषकेन— **अनेकजन्मशुद्धस्येत्यादिना । अनेकजन्मशुद्धस्य** अनेकजन्मसु शुद्धस्य, अनेकजन्मसु कृतपुण्यवशात् परिशुद्धात्मनः, **निरहङ्कारभाविनः** निर्गतः अहङ्कारः निरहङ्कारः, तस्य भावः अस्यास्तीति निरहङ्कारभावी, तस्य, देहाद्यभिमानरहितस्य, **अप्रपञ्चस्य** प्रपञ्चगतभेदरहितस्य योगिनः **विमुक्तये** मोक्षाय **आदिदेवः** सृष्ट्यादिपञ्चकृत्यमूलकारणभूतो महादेवः **प्रसीदति** अनुगृह्णाति ॥ **शिवप्रसादसम्पत्त्या** शिवप्रसादस्य सम्पत्तिः, तया, शिवप्रसादसम्पदा **शिवभावमुपेयुषि** शिवभावम् उपेयुषि, उपेयुषि इति उपेयिवांस् इति 'क्वसु' — प्रत्ययान्तस्य सप्तमीविभक्तौ एकवचने रूपम्, (विद्वांसशब्दवत् — उपेयिवान् उपेयिवांसौ उपेयिवांसः, इत्यादिरूपाणि), शिवभावं प्राप्तवति शिवयोगिनि **शिवादन्यत्** शिवव्यतिरिक्तम् इव **जगज्जालं** जगतां जालं जगज्जालम्, विश्वानायः (आनायः — आनीयन्ते मत्स्यादयोऽनेन इति, जालशब्दस्य पर्यायपदम्), विश्वानां समुदायः इत्यर्थः, **दृश्यते** भासते, परन्तु **न च दृश्यते** न च एतदिदंरूपेण शिवव्यतिरिक्तत्वेन दृश्यते ॥ **विवेकिनः** नित्यानित्यवस्तुविवेकशालिनः **संसारच्छेदकारिणा** संसारस्य च्छेदः, संसारच्छेदं करोतीति संसारच्छेदकारी, तेन, संसारविनाशकर्त्रा, **शम्भोः** परशिवस्य **शिवप्रसादेन** शुभानुग्रहेण **मोहग्रन्थिम्** अज्ञानरूपमोहग्रन्थिं, **विनिर्भिद्य** विच्छेद्य **मुक्तिं यान्ति** मोक्षं प्राप्नुवन्ति ॥ साधकस्य प्रथमस्थले पिण्डस्थलनाम्न्यनेकजन्मसु कृतपुण्यवशात् परिशुद्धान्तःकरणे जीवात्मनि शिवानुग्रहेण शैवीभक्तिः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समुत्पद्यते। परमात्मनि या शक्तिः सा एव जीवात्मनि भक्तिः। अत एव भक्त्युदयं शक्तिपात इति कथ्यते। अनेन शक्तिपातेन पिण्डशब्दाभिधेयोऽन्त्यशरीरीति विज्ञायते। तदारभ्य आदिप्रसादिस्थलपर्यन्तम् आध्यात्मिकयात्रां कुर्वन् बहुदूरं परिक्रम्य शिवयोगी मुक्तिशिखरम् आरोहति। तत्र स शिवेन समरसीभूतः परमोक्षात्मके परमपदे तिष्ठति। ततः स नैव पुनरावर्तते। सदेहत्वात् तत्सम्बद्धकर्म कुर्वन्नपि कर्मफलासङ्गरहितः सन् सञ्चरति। जगज्जालस्य वैविध्यं पश्यन्नपि न पश्यति। केवलं शिवाद्वैतानन्दे निमज्जति। सर्वं शिवप्रकाशमयत्वेन पश्यति। शिवाद्वैतानन्दप्राप्तिस्तु तस्य महती सिद्धिः। तेन सर्वमोहग्रन्थिं निर्भिद्य तत्सिद्धिं प्राप्नोतीति तु स्पष्टमेव ॥५७-५९॥

विना प्रसादमीशस्य संसारो न निवर्तते।
विना सूर्योदयं लोके कुतः स्यात् तमसो लयः ॥६०॥

व्याख्या— शिवानुग्रहादेव संसारनिवृत्तिरित्याह सदृष्टान्तम्— **विनेति**। **ईशस्य** परमेश्वरस्य **प्रसादं विना** अनुग्रहं विना **संसारः** जननमरणचक्रं **न निवर्तते** न निवृत्तो भवति। **लोके** प्रपञ्चे **सूर्योदयं विना** भानूदयं विना **कुतः** कुत्र **तमसः लयः** तिमिरस्य लयः **स्यात्** भवेत्? न कुत्रापि तमोलयः भवतीत्यर्थः ॥ दृष्टान्तालङ्कारः। लोकेऽनेके भवन्ति चन्द्रनक्षत्रादयः प्रकाशवन्तः। एतेषां तु मन्दप्रकाशत्वात् तिमिरं निःशेषतया निवर्तयितुं शक्तिर्नास्ति। व्याप्ते रवितेजसि तमसो नास्ति नितराम् अवकाशः। तथैव परमात्मनः परमप्रकाशवतः प्रसादात् संसारस्य निवृत्तिर्जायते, तस्य सर्वथा तत्र निरवकाशत्वात्। शिवप्रसादेन शिवसाक्षात्कारः, तत्साक्षात्कारेण संसारस्य, अर्थात् संसारदुःखस्य, निवृत्तिः शक्यते प्राप्तुम्। अत एवोक्तम्— "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥" (श्वे. उ., ६.२०) इति। अत्रेदम् अनुसन्धेयम्— शिवसाक्षात्कारो नाम शिवयोगिनः शिवोऽहंभावेन समरसीभूतत्वम्; शिवप्रसादलाभेन शिवयोगी शिवो भूत्वा परमानन्दम् अनुभवतीति ॥६०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वानुग्राहकः शम्भुः केवलं कृपया प्रभुः ।
मोचयेत् सकलान् जन्तून् न किञ्चिदिह कारणम् ॥६१॥

व्याख्या— पक्षपातराहित्येन परशिवो मुक्तियोग्यान् सर्वान् मोचयति इत्याह — **सर्वानुग्राहक इति । प्रभुः** सर्वतन्त्रस्वतन्त्रः **सर्वानुग्राहकः** सर्वान् अनुगृह्णाति इति सर्वानुग्राहकः, सर्वेषां हितकारकः, **शम्भुः** परशिवः **केवलं कृपया** कृपामात्रेण **सकलान्** सर्वान् **जन्तून्** प्राणिनः **मोचयेत्** मोक्षभाजः कुर्यात् । **इह** अस्मिन् विषये, अर्थात् कृपामात्रेण इत्यस्मिन् विषये, **न किञ्चित् कारणं** न किञ्चिदन्यत् कारणम् ॥ यः सर्वान् प्रवर्तयति स प्रभुः । तदुक्तम्— "महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः ।" (श्वे. उ., ३.१२) इति । परमेश्वरः सर्वान् सत्कार्ये, परमात्मसेवायाम्, अन्तःकरण-परिशुद्धौ तपःसमाधिसाधने च प्रवर्तयति । आदौ श्रीगुरुद्वारा तेषां आत्मनः शरीरेन्द्रियमनोव्यतिरिक्तत्वम् अवगमयति, ततः पश्चात् सोऽहं-भावेन तेषां शिवस्वरूपत्वं साक्षात्कारयति । एवं परमेश्वरः सर्वान् सत्त्वान् संसारबन्धात् मोचयति । एतदर्थं पूर्वं स्वीयतिरोधानशक्त्या सर्वकर्मक्षय-पर्यन्तं तिरोधाय, स्वीयानुग्रहशक्त्या मुक्तियोग्यान् करोति ॥६१॥

— इत्यादिप्रसादिस्थलम् —

८. अथ अन्त्यप्रसादिस्थलम् – (७९)

लयः सर्वपदार्थानामन्त्य इत्युच्यते बुधैः ।
प्रसादोऽनुभवस्तस्य तद्वानन्त्यप्रसादवान् ॥६२॥

व्याख्या— अन्त्यप्रसादिस्वरूपमाह— **लय इति । सर्वपदार्थानां** सर्ववस्तुनां **लयः** लयाश्रयीभूतः परशिव एव **अन्त्यः** सर्वान्त्यः इति **बुधैः उच्यते** इति विद्वद्भिः कथ्यते । **तस्य** तस्य परशिवस्य **अनुभवः** साक्षात्कार एव **प्रसादः** अनुग्रहः, **तद्वान्** तत्प्रसादयुक्तः **अन्त्यप्रसादवान्** अन्त्यप्रसादी, इति ज्ञायते इति शेषः ॥ लयो नाम लयाश्रयः । परशिव एव, यस्मिन् भूम्यादिशिवपर्यन्तषट्त्रिंशत्तत्त्वनां लयो भवति, अन्त्यशब्देन ज्ञायते ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परशिवस्य स्वात्माभिन्नत्वेन साक्षात्कारः प्रसाद इत्युच्यते । तत्साक्षात्कारवान् अन्त्यप्रसादीति परिभाष्यते । "अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम् । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥" (कठ.उ., २.२०; श्वे.उ., ३.२०— "महिमानमात्मनः" इत्यस्य "महिमानमीशन्" इति पाठान्तरम्, शरभ. उ., १८ — तदेव पाठान्तरम्) इति । भगवती श्रुतिरियं परमात्मस्वरूपं वर्णयति । परमात्मनो महिमा योगिना स्वात्मनि साक्षात्क्रियते । इन्द्रियमनःपरिशुद्ध्या (धातुः प्रसादात्) प्राप्तोऽयं साक्षात्कार एव अन्त्यप्रसादः । तद्वान् अन्त्यप्रसादीत्यर्थः ॥६२॥

देवतिर्यङ्मनुष्यादिव्यवहारविकल्पना ।
मायाकृता परे तत्त्वे तल्लये तत्क्षयो भवेत् ॥६३॥

व्याख्या— कथं मायालयो भवतीत्यत्राह— **देवेत्यादिना** । **देवतिर्यङ्मनुष्यादिव्यवहारविकल्पना** देवाः, तिर्यञ्चः, मनुष्याः इत्यादि व्यवहारे विकल्पना विविधकल्पना **मायाकृता** महेश्वरस्य एव मायाशक्त्या सृष्टा, **परतत्त्वे** परतत्त्वभूते परशिवे **तल्लये** तस्याः मायायाः लये सति **तत्क्षयो भवेत्** विकल्पनायाः **क्षयो भवेत्** नाशः स्यात् ॥ आदिमे पिण्डस्थले देवतिर्यङ्मनुष्यादिजातिभेदः परशिवस्य मायाशक्त्या सृज्यते इत्युक्तम् । तत्र परशिव एव मायी भूत्वा सर्वान् प्रेरयति । (पश्यत — सि. शि., ५.३५) । तत्र प्रमाणम्— "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।" (श्वे. उ., ४.१०) इति । यदिदं सर्वं मायया सृष्टं तत्सर्वम् परतत्त्वे मायाया लये सति, क्षयं याति ॥६३॥

साक्षात्कृते परे तत्त्वे सच्चिदानन्दलक्षणे ।
क्व पदार्थपरिज्ञानं कुतो ज्ञातृत्वसम्भवः ॥६४॥

व्याख्या— उक्तमेव प्रकारान्तरेण विवृणोति— **साक्षात्कृते इति** । **सच्चिदानन्दलक्षणे** सच्चिदानन्दस्वरूपे **परे तत्त्वे** परशिवतत्त्वे **साक्षात्कृते**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मनःप्रत्यक्षीभूते सति **पदार्थपरिज्ञानं** मायाकल्पितवस्तुपरिज्ञानं कुत्र ? न कुत्रापि इत्यर्थः । **ज्ञातृत्वसम्भवः कुतः** ज्ञेयज्ञानविरहितज्ञातृत्वभावस्य उदयः कुत्र ? न कुत्रापि इत्यर्थः ॥ "क्व पदार्थपरिज्ञानम्" इत्यनेन प्रश्नेन मायानिवृत्तिः सूच्यते । द्वैतानुवर्तनपर्यन्तं ज्ञातृज्ञेयज्ञानात्मकत्रिपुटीभावस्तिष्ठति । अद्वैते समासादिते त्रिपुटीभावः पलायते । ज्ञानज्ञेययोः परतत्त्वे लयीभूते ज्ञातृत्वमपि निरवकाशः सम्पद्यते ॥६४॥

सुषुप्तस्य यथा वस्तु न किञ्चिदपि भासते ।
तथा मुक्तस्य जीवस्य न किञ्चिद्वस्तु दृश्यते ॥६५॥

व्याख्या— उक्तमेव सदृष्टान्तं विशदयति— **सुषुप्तस्य इति** । **यथा** येन प्रकारेण **सुषुप्तस्य** सुषुप्तिं गतस्य **न किञ्चिदपि वस्तु** न कोऽपि पदार्थः **भासते** दृश्यते, **तथा** तेनैव प्रकारेण **मुक्तस्य** मुक्तिं प्राप्तस्य, जीवन्मुक्तस्य इति यावत्, **जीवस्य** जीवात्मनः **किञ्चिद्वस्तु न दृश्यते** न कोऽपि पदार्थः दृश्यते ॥ अत्र जीवन्मुक्तोऽपि वस्तुजातं पश्यत्येवेत्येवम् आक्षिप्येत । मा तावत्, तस्य शिवाव्यतिरिक्तत्वेनैव वस्तुजातस्य दर्शनात्, प्राकृतस्वरूपेण न किञ्चिदपि दृश्यते इत्येव सत्यम् ॥६५॥

यथाकाशमविच्छिन्नं निर्विकारं स्वरूपतः ।
तथा मुक्तस्य जीवस्य स्वरूपमवशिष्यते ॥६६॥

व्याख्या— उक्तमेव दृष्टान्तान्तरेण विशदयति— **यथाकाशम् इति** । **यथा** येन प्रकारेण **आकाशं** नभः **स्वरूपतः** स्वस्वरूपेण **अविच्छिन्नम्** अविभक्तं **निर्विकारं** विकाररहितं च **तथा** तेनैव प्रकारेण **मुक्तस्य** जीवन्मुक्तस्य **जीवस्य** जीवात्मनः **स्वरूपम् अवशिष्यते** अनुवर्तते ॥ अखण्डत्वं निर्विकारत्वं चाऽऽकाशस्य मूलस्वरूपम् । परन्तु घटमठादिषूपाधिषु सत्सु नभः विच्छिन्नतया परिमिततया च भासते । तस्याऽखण्डत्वं सर्वव्यापकत्वं च विनष्टतयाऽवभासते । उपाधिषु निरस्तेष्वाकाशः स्वस्वरूपेण तिष्ठति । एवमेव देहेन्द्रियमनोरूपादिषूपाधिषु सत्सु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जीवात्मा बद्ध इव भासते । गतेषूपाधिषु जीवात्मा स्वस्वरूपभूतेन शिवस्वरूपेण प्रकाशते । तदुक्तम्— "घटादिषु प्रलीनेषु घटाकाशादयो यथा । आकाशे सम्प्रलीयन्ते तद्वज्जीवा इहात्मनि ॥" (माण्डूक्य., ३.४) इति ॥६६॥

न किञ्चिदपि मुक्तस्य दृश्यं कर्तव्यमेव वा ।
सुखस्फूर्तिस्वरूपेण निश्चला स्थितिरुच्यते ॥६७॥

व्याख्या— जीवन्मुक्तः कथं वर्तते इत्यत्राह — **नेति** । **मुक्तस्य** जीवन्मुक्तस्य **किञ्चिदपि** किञ्चनापि **दृश्यं** द्रष्टव्यं **कर्तव्यम् एव वा** करणीयम् एव वा **न** नास्ति । तस्य **सुखस्फूर्तिस्वरूपेण** सुखस्य स्फूर्तिः सुखस्फूर्तिः, तस्य स्वरूपं सुखस्फूर्तिस्वरूपम्, तेन, आनन्दस्फुरणरूपेण **निश्चला** स्थिरा **स्थितिः** अवस्था **उच्यते** कथ्यते ॥ तादृशी सुखनिश्चला स्थितिः गौडपादाचार्येण वर्ण्यते— "स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।" (गौड.का., ३.४७) इति । इयमेवाऽऽत्मनो ब्राह्मी स्थितिः ॥६७॥

शिवाद्वैतपरिज्ञानशिथिलाशेषवस्तुनः ।
केवलं संविदुल्लासदर्शिनः केन को भवेत् ॥६८॥

व्याख्या— पूर्वोक्तस्य हेतुमुक्त्वा अन्त्यप्रसादिस्थलं समापयति— **शिवाद्वैतेत्यादिना** । **शिवाद्वैतपरिज्ञानशिथिलाशेषवस्तुनः** शिवाद्वैतस्य परिज्ञानम्, तेन शिथिलानि अशेषाणि वस्तूनि यस्य सः शिवाद्वैतपरिज्ञानशिथिलाशेषवस्तुः, तस्य, शिवाद्वैतसाक्षात्कारेण निवृत्तसकलभेदवस्तुरहितस्य, **संविदुल्लासदर्शिनः** संविदुल्लासः चिद्विलासः तं पश्यतीति संविदुल्लासदर्शी, तस्य, शिवयोगिनः **केन को भवेत्** केन कः स्यात् ? न केनापि कोऽपि उपयोगः विद्यते इत्यर्थः ॥ तस्य केनापि ज्ञानेन्द्रियव्यापारेण कर्मेन्द्रियव्यापारेण वा किमपि प्रयोजनं नास्तीति भावः । अत्र पूर्वोक्तम् आदिप्रसादिस्थलम् उपक्रमभूतम्, अन्त्यप्रसादिस्थलं च उपसंहारभूतमिति ज्ञातव्यम् ॥६८॥

— इत्यन्त्यप्रसादिस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

९. अथ सेव्यप्रसादिस्थलम् – (८०)

सेव्यो गुरुः समस्तानां शिव एव न संशयः ।
प्रसादोऽस्य परानन्दप्रकाशः परिकीर्त्यते ॥६९॥

सेव्यो गुरुः स्मृतो ह्यस्य प्रसादोऽनुभवो मतः ।
तदेकावेशरूपेण तद्वान् सेव्यप्रसादवान् ॥७०॥

गुरुदेवः परं तत्त्वं परतत्त्वं गुरुः स्मृतः ।
तदेकत्वानुभावेन न किञ्चिदवशिष्यते ॥७१॥

व्याख्या— सेव्यशिवगुरुप्रसादेनाऽन्त्यप्रसाद्येव सेव्यप्रसादीति विशेषकेन निरूपयति— **सेव्यो इत्यादिना** । **समस्तानां** सर्वेषां **सेव्यः** सेवायोग्यः **गुरुः** श्रीगुरुः **शिव एव** साक्षात् शिव एव, **न संशयः** अत्र सन्देहो नास्ति । **अस्य प्रसादः** अस्य श्रीगुरोः प्रसन्नता **परानन्दप्रकाशः** परमानन्दप्रकाश इति **परिकीर्त्यते** प्रशंस्यते ॥ **गुरुः** शिवस्वरूपः श्रीगुरुरेव **सेव्यः** सेवायोग्य इति **स्मृतः** ज्ञायते; **अस्य** अस्य श्रीगुरोः **अनुभवः** उपदिश्यमानः स्वानुभव एव **प्रसादः** प्रसादस्वरूपभूतः, हि इति प्रसिद्धौ; **तदेकावेशरूपेण** तयोः एकावेशः, तस्य रूपेण, स्वयं गुरोः तत्प्रसादस्य चेत्युभयोः समरसीभावेन **तद्वान्** तदनुभववान् **सेव्यप्रसादवान्** सेव्यप्रसादी भवति ॥ **गुरुरेव** श्रीगुरुः एव **परं तत्त्वं** परतत्त्वम्, **परतत्त्वं** परशिवतत्त्वमेव **गुरुः** श्रीगुरुरिति **स्मृतः** ज्ञातः; **तदेकत्वानुभावेन** तदेकत्वसाक्षात्कारेण **न किञ्चिद् अवशिष्यते** परशिवं विहाय न किञ्चिदन्यद् **अवशिष्यते** शेषत्वेन परिशिष्यते ॥ श्रीगुरुः साक्षाद्रूपेण शिवस्य शक्तिः शिवश्च शक्तिमान् । शक्तिशक्तिमतोरभेदः सिद्धः । समष्टिभूतं व्यष्टिभूतं चेति सर्वं विश्वं शिवशक्तेरभिव्यक्तरूपमिति श्रीगुरुः सम्यग् जानाति । तस्य भावनायां सर्वं शिवमयं जगत् । शिवश्रीगुर्वोः समरसीभावः सेव्य इत्युच्यते । तत्सामरस्यं सेव्यत्वेन जानन् शिवयोगी तद्गुरुशिवसमन्वयानन्दस्याऽनुभवरूपं प्रसादं प्राप्नोति । अत एव तस्य सेव्यप्रसादित्वम् । सेव्यप्रसादप्राप्तेः सुवर्णमार्गं श्रुतिषु कथितम् । तथा हि— "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्यैताः कथिता ह्यर्था प्रकाशन्ते महात्मनः ॥" (श्वे.उ.,६.२३; यो.शि.उ., २.२२) इति । योगशिखोपनिषदि तु परमात्मनः शिवो गुरुश्चेति सेव्य-स्वरूपद्वयं मनोज्ञतया वर्ण्यते— "दिव्यज्ञानोपदेष्टारं देशिकं परमेश्वरम् । पूजयेत्परया भक्त्या तस्य ज्ञानफलं भवेत् ॥ यथा गुरुस्तथैवेशो यथैवेश-स्तथा गुरुः । पूजनीयो महाभक्त्या न भेदो विद्यतेऽनयोः ॥........। अद्वैतं भावयेद् भक्त्या गुरोर्देवस्य चात्मनः ॥" (५.५७-५९) इति । 'गुरोर्देवस्य चात्मनः' अद्वैतभावनायुक्तो गुरु-शिवसामरस्यानन्दम् अनुभवति । अत एव स सेव्यप्रसादीति कथ्यते ॥६९-७१॥

अपरिच्छेद्यमात्मस्थमवाङ्मानसगोचरम् ।
आनन्दं पश्यतां पुंसां रतिरन्यत्र का भवेत् ॥७२॥

ज्ञानामृतेन तृप्तस्य किमन्यैर्भोज्यवस्तुभिः ।
ज्ञानादेव परानन्दं प्रकाशयति सच्छिवः ॥७३॥

व्याख्या— परमानन्दभाजः सेव्यप्रसादिनः प्रीतिरन्यत्र नास्तीति कथयति— **अपरिच्छेद्यम् इति । अपरिच्छेद्यं** परिच्छेदरहितम्, अखण्डम् इत्यर्थः, **आत्मस्थं** शिवैक्ये स्वात्मनि स्थितम्, **अवाङ्मानसगोचरं** वाक् च मानसं च वाङ्मानसे, तयोः गोचरं वाङ्मानसगोचरम्, न वाङ्मानस-गोचरम् अवाङ्मानसगोचरम्, वाचः मानसस्य च अगोचरम्, अतीतमित्यर्थः, तादृशम् **आनन्दं** परमानन्दं **पश्यतां** साक्षात्कुर्वतां **पुंसां** शिवयोगिनाम् अन्यत्र विषयजाते **रतिः** प्रीतिः **का भवेत्** कीदृशी स्यात् ? न कापि रतिर्भवेदित्यर्थः ॥ **ज्ञानामृतेन** ज्ञानरूपेणाऽमृतेन **तृप्तस्य** तुष्टस्य **अन्यैः** तद्व्यतिरिक्तैः **भोज्यवस्तुभिः** भोज्यपदार्थैः **किं** किं प्रयोजनम् ? न किमपि प्रयोजनमित्यर्थः ॥ "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ., २.१.१) इति, "विज्ञान-मानन्दं ब्रह्म" (बृ. उ., ३.९.३४) इति च श्रुतिद्वयं परमात्मनोऽनन्तत्वं नित्यानन्दत्वं श्रावयति । यथा औष्ण्यं प्रकाशमानत्वं च वह्नेः नैसर्गिके भवतः, तथा नित्यम् अखण्डत्वं नित्यानन्दत्वं च परशिवपरब्रह्मपरतत्त्व-महालिङ्गाद्यनेकनामान्तरभाजः परमचिदात्मनो नैसर्गिके स्तः । आत्मसाक्षा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्कारेणाऽनेन शिवयोगी नित्यानन्दे निमज्जति । एवं नित्यानन्दे मग्नस्य, तेन नित्यानन्देन तृप्तस्याऽन्यस्मिन् कस्मिन्नपि पदार्थे प्रीतिः सर्वथा नास्ति ॥७३॥

मुक्तिरेव परा तृप्तिः सच्चिदानन्दलक्षणा ।
नित्यतृप्तस्य मुक्तस्य किमन्यैर्भोगसाधनैः ॥७४॥

व्याख्या— उक्तमेव स्फुटयति— **मुक्तिरिति । सच्चिदानन्दलक्षणा** सच्चिदानन्दस्वरूपा **मुक्तिः एव** मोक्ष एव **परा तृप्तिः** परमतुष्टिः; **नित्यतृप्तस्य** निरन्तरतुष्टस्य **मुक्तस्य** लब्धमोक्षस्य सेव्ययोगिनः **अन्यैः** तदितरैः **भोगसाधनैः** भोगोपकरणैः **किं** किं प्रयोजनम् ? न किमपि प्रयोजनमित्यर्थः ॥ 'सच्चिदानन्दलक्षणा मुक्तिः' इत्यनेन सच्चिदानन्दस्वरूपिणः परशिवस्याऽव्यतिरिक्तत्वं द्योत्यते ॥७४॥

न बाह्यकर्म तस्यास्ति न चान्तर्नैव कुत्रचित् ।
शिवैक्यज्ञानरूढस्य देहभ्रान्तिं विमुञ्चतः ॥७५॥

व्याख्या— देहभ्रान्तिरहितस्य न किमपि कर्म करणीयमस्ति, इत्याह— **नेति । देहभ्रान्तिं** शरीरम् अहंप्रत्ययवेद्यत्वेन गृह्यमाणां भ्रान्तिं **विमुञ्चतः** त्यजतः **शिवैक्यज्ञानरूढस्य** शिवेन ऐक्यं शिवैक्यम्, तस्य ज्ञानम्, तेन रूढः, तस्य, शिवैक्यबोधनिष्ठस्य **तस्य** सेव्यप्रसादिशिवयोगिनः **बाह्यकर्म** पूजादिबहिरङ्गकर्म **नास्ति** न भवति, **न च अन्तः** अन्तरङ्गे क्रियमाणम् ध्यानाद्यन्तरङ्गकर्म नास्ति, **नैव कुत्रचित्** क्वापि विधीयमानं कर्म न भवत्येव ॥ निष्ठायुक्तप्रामाणिकप्रयत्नद्वारा सोऽयं सेव्यप्रसादी देहेन्द्रियमनोभावनापरिशुद्धिं संसाध्य सोपानक्रमेण भक्तादिषट्स्थलमार्गम् अनुसरन् परमपदं प्राप्तवान् सन् अस्ति । परमचिदात्मनि शिवानन्दे निमग्नस्य तस्य परशिवव्यतिरिक्ता स्थितिर्नास्ति । अतस्तस्य बाह्याभ्यन्तरादिकर्म नास्ति ॥७५॥

न कर्मबन्धे न तपोविशेषे
न मन्त्रयोगाभ्यसने तथैव ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ध्याने न बोधे च तथात्मतत्त्वे
मनःप्रवृत्तिः परयोगभाजाम् ॥७६॥

— इति सेव्यप्रसादिस्थलम् —

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादि-सारभूते श्रीसिद्धान्तशिखामणौ माहेश्वरस्थलान्तर्गतप्राणलिङ्गिस्थलान्तर्गत-नवविधलिङ्गस्थलप्रसङ्गो नाम अष्टादशः परिच्छेदः समाप्तः ॥१८॥

व्याख्या— सेव्यप्रसादिस्थलं समाप्य प्राणलिङ्गिस्थलाश्रित-नवविध-लिङ्गस्थलयुक्तम् अष्टादशतमं परिच्छेदम् उपसंहरति— **नेति । परयोग-भाजां** परयोगसम्पन्नानां **मनःप्रवृत्तिः** मनसः प्रवर्तनं **कर्मबन्धे** कर्म एव बन्धः कर्मबन्धः, तस्मिन्, अनेन रूपकेण अभेदोपचारः, अतः बन्धकारणी-भूते सत्कर्मवशात् सुखात्मकपरिणामवत्पुण्ये दुष्कर्मवशात् दुःखात्मक-परिणामवत्पापे च **न** न भवति, **तपोविशेषे न** तपोविशेषेषु एकतमे **न** न भवति, **मन्त्रयोगाभ्यसने** मन्त्रयोगाभ्यासे **न** न भवति, **तथैव** एवमेव **ध्याने** ध्यानयोगे **न** न भवति, **बोधे** स्वस्वरूपज्ञाने **न** न भवति, **तथा** तथैव **आत्मतत्त्वे** स्वस्वरूपबोधे **न** न भवति ॥ परात्मनि समरसयोगवतां मनःप्रवृत्तिर्न कुत्रापि भवति । अत्रोपजातिवृत्तम् । प्रथम-द्वितीय-चतुर्थ-पादानाम् उपेन्द्रवज्रा, केवलं तृतीयपादस्य इन्द्रवज्रा । लक्षणमुक्तं प्राक् । (पश्यत — सि. शि., २.३३, व्याख्यायाम्) ॥७६॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां श्रीशिवयोगि-शिवाचार्यकृतश्रीसिद्धान्तशिखामणेः शिवाद्वैतप्रदीपिकाख्यव्याख्यायां अष्टादशः परिच्छेदः समाप्तः ॥१८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एकोनविंशः परिच्छेदः

शरणस्थलान्तर्गतद्वादशलिङ्गस्थलप्रसङ्गः

व्याख्या— अथागस्त्य उवाचेति — अगस्त्यप्रश्नः—

स्थलभेदाः समाख्याताः प्राणलिङ्गिस्थलाश्रिताः ।
कथय स्थलभेदं मे शरणस्थलसंश्रितम् ॥१॥

व्याख्या— अगस्त्यः पृच्छति— **स्थलभेदा इति ।** **प्राणलिङ्गिस्थलाश्रिताः** प्राणलिङ्गिस्थलं समाश्रिताः **स्थलभेदाः** लिङ्गस्थलानां प्रकाराः **समाख्याताः** कथिताः । **शरणस्थलसंश्रितं** शरणस्थलं समाश्रितं **स्थलभेदं** लिङ्गस्थलभेदं **मे** मह्यं **कथय** वद ॥१॥

व्याख्या— अथ श्रीरेणुक उत्तरं वक्ति — रेणुक उवाचेति—

शरणस्थलमाश्रित्य स्थलद्वादशकं मया ।
उच्यते नाम सर्वेषां स्थलानां शृणु तापस ॥२॥

दीक्षापादोदकं पूर्वं शिक्षापादोदकं ततः ।
ज्ञानपादोदकं चाथ क्रियानिष्पत्तिकं ततः ॥३॥

भावनिष्पत्तिकं चाथ ज्ञाननिष्पत्तिकं ततः ।
पिण्डाकाशस्थलं चाथ बिन्द्वाकाशस्थलं ततः ॥४॥

महाकाशस्थलं चाथ क्रियायाश्च प्रकाशनम् ।
भावप्रकाशनं पश्चात् ततो ज्ञानप्रकाशनम् ॥
स्वरूपं पृथगेतेषां कथयामि यथाक्रमम् ॥५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— श्रीरेणुकः शरणस्थलान्तर्गत-द्वादशलिङ्गस्थलानि नाम्ना निर्दिशति — **शरणस्थलम् इति । शरणस्थलम् आश्रित्य** शरणसम्बन्धि स्थलम् आश्रित्य **मया** रेणुकेन मया **स्थलद्वादशकं** लिङ्गस्थलानां द्वादशकं द्वादशसंख्यायुक्तत्वम् **उच्यते** कथ्यते । **तापस** हे तापस **सर्वेषां स्थलानां** सकलानां तेषां द्वादशलिङ्गस्थलानां **नाम** अभिधानं **शृणु** आकर्णय । पूर्वोक्त-रीत्या शरणस्थलाश्रित-द्वादशलिङ्गस्थलानां नामानि विशेषकेन निर्दिशति— **दीक्षापादोदकेत्यादिना** । १. दीक्षापादोदकस्थलम्, २. शिक्षापादोदकस्थलम्, ३. ज्ञानपादोदकस्थलम्, ४. क्रियानिष्पत्तिस्थलम्, ५. भावनिष्पत्तिस्थलम्, ६. ज्ञाननिष्पत्तिस्थलम्, ७. पिण्डाकाशस्थलम्, ८. बिन्द्वाकाशस्थलम्, ९. महाकाशस्थलम्, १०. क्रियाप्रकाशस्थलम्, ११. भावप्रकाशस्थलम्, १२. ज्ञानप्रकाशस्थलं च । **एतेषां** निर्दिष्टानाम् एतेषां लिङ्गस्थलानां **पृथक् स्वरूपं** पृथक्तया विशेषस्वरूपं **यथाक्रमं** क्रमम् अनतिक्रम्य यथाक्रमम्, उक्तक्रमानुसारं **कथयामि** वदामि ॥२-५॥

१. अथ दीक्षापादोदकस्थलम् – (८१)

दीक्षयाऽपगतद्वैतं यज्ज्ञानं गुरुशिष्ययोः ।
आनन्दस्यैक्यभावेन दीक्षापादोदकं स्मृतम् ॥६॥

व्याख्या— सेव्यप्रसादिनः दीक्षापादोदकस्थलमाह— **दीक्षयेति । गुरु-शिष्ययोः** सेव्यगुरोः शिष्यस्य च **दीक्षया** त्रिविधदीक्षासम्बन्धेन **अपगतद्वैतं** अपगतं द्वैतं याभ्यां तद् अपगतद्वैतम्, निर्गतद्वैतभावं **यज्ज्ञानं** यद् विज्ञानं तत् **आनन्दस्य ऐक्यभावेन** आनन्दस्य एकीभूतत्वेन **दीक्षा-पादोदकं** दीक्षापादोदकम् इति **स्मृतम्** अवगतम् ॥ सच्चिदानन्दस्वरूपः परशिवः स्वीयेन त्रिकालाबाधितेन अनन्तसद्रूपेण गुरुः, अनन्याश्रितत्वेन सर्वप्रकाशकेनाऽनन्तचिद्रूपेण लिङ्गम्, सर्वानन्दाश्रयीभूतेनाऽखण्डेन चानन्ता-नंन्दरूपेण जङ्गमः, इति त्रिधा भवति । तदुक्तम्— "एकमूर्तेस्त्रयो भागा

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गुरुर्लिङ्गं च जङ्गमः'' (चं. आ., उ. भा., क्रि. पा., ९.१५) इति। शिवज्ञानस्य दानं पाशानां क्षयश्चेति स्वरूपद्वयात्मिकया दीक्षया शिष्यस्य गुरुस्वरूपेण सह 'अद्वैतज्ञानम्' यदस्ति तद्वशात् गुरुशिष्ययोः 'आनन्दैक्यम्' एव **दीक्षापादोदकम्**। शिक्षावशाद् योगिनो लिङ्गस्वरूपैक्यत्वेन यदानन्दैक्यं तदेव **शिक्षापादोदकम्**। ज्ञानवशाद् योगिनो जङ्गमस्वरूपैक्यत्वेन यदानन्दैक्यं तदेव **ज्ञानपादोदकम्**। उक्तं च— ''पादतीर्थं त्रिधा शम्भोर्गुरुजङ्गमयोरपि शिक्षा दीक्षा ज्ञानमिति त्रिसंज्ञं तद्भवत्यहो'' (चं. आ., उ. भा., क्रि. पा., ५.५) इति। दीक्षापादोदकप्रस्तावे गुरुशिष्यसम्बन्धमाह भगवती श्रुतिः— ''आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्या सन्धिः'' (तै. उ., १.३) इति। अत्र अध्ययनप्रक्रिया ध्यानविषयत्वेन गृहीता, गुरुशिष्ययोरात्मीयसम्बन्धत्वात्। आध्यात्मिकबोधाय गुरुशिष्ययोर्बिम्बप्रतिबिम्बात्मकः सम्बन्धः स्यात्। ''न हि ज्ञानेन सदृशं पवित्रमिह विद्यते'' (भ. गी., ४.३८) इति भगवदुक्तिः। तादृशज्ञानस्य साक्षात्काराय गुरुशिष्यसम्बन्धस्तादृश एव स्यात् ॥६॥

अथवा पादशब्देन गुरुरेव निगद्यते।
शिष्यश्चोदकशब्देन तयोरैक्यं तु दीक्षया ॥७॥

व्याख्या— पक्षान्तरेण पादोदकशब्दं निर्वक्ति— **अथवेति**। अथवा पूर्वोक्तस्य विकल्पतया **पादशब्देन** पाद इति पदेन **गुरुरेव** गुरुस्वरूपमेव **निगद्यते** कथ्यते, **उदकशब्देन** उदकमिति पदेन **शिष्यः** च अन्तेवासी च निगद्यते; **दीक्षया** दीक्षाद्वारा **तयोः ऐक्यं** तयोरेकीभावः, गुरुशिष्यैक्यं दीक्षापादोदकमिति शेषः ॥ पादशब्दः द्विधा निष्पद्यते 'पद्यते असौ इति पादः' इति, 'पद्यते अनेन इति पादः' इति च। 'पद्यते असौ' इत्यत्र ''पदरुजविशस्पृशो घञ्'' (पा.अ. ३.३.१६) इति कर्तरि घञ् प्रत्ययः। 'पद्यते अनेन' इत्यत्र ''अकर्तरि च कारके संज्ञायाम्'' (पा.अ. ३.३.१९) इति करणे घञ् प्रत्ययः। पद् धातुः गत्यर्थकः। सर्वे गत्यर्थकाः ज्ञानार्थकाः भवन्ति। कर्तरि घञि पादशब्दः गमनकर्ता अथवा ज्ञाता इत्यर्थं प्रति-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पादयति । करणे घञि पादशब्दः गमनसाधनम् अथवा ज्ञानसाधनमित्यर्थं प्रतिपादयति । श्रीगुरुः ज्ञाता ज्ञानसाधनं चेत्युभयार्थेऽपि पादशब्दवाच्यः । स्वयं ज्ञानसमुद्रो गुरुः शिष्यकृते ज्ञानसाधनो भूत्वा शिष्याय मुक्तिमार्गं निर्दिशति । उदक शब्दः 'उन्दी क्लेदने' इति धातोः "उदकं च" इति उणादि सूत्रेण (१९७) — 'उनत्तिक्लेदयति' इत्यस्मिन्नर्थे क्वुन् (वु) प्रत्यय-योजनेन, 'वु' इत्यस्य स्थाने 'अक' इत्यस्य योजनेन च ["युवोरनाकौ" (पा.अ. ७.१.१)— यु = अन, वु = अक] निष्पद्यते । उदकम् आर्द्रता-वाचकः । स्वीयगुणशीलैः शिष्यः श्रीगुरौ संप्रीतिरूपामार्द्रतां जनयतीति उदकशब्दवाच्यो भवति । गुरुशिष्ययोर्दिक्षाद्वारा प्राप्तैक्यभावेनाऽऽनन्दैक्य-मेव दीक्षापादोदकम् इति कथ्यते ॥७॥

परमानन्द एवोक्तः पादशब्देन निर्मलः ।
ज्ञानं चोदकशब्देन तयोरैक्यं तु दीक्षया ॥८॥

व्याख्या— पुनः पक्षान्तरेण दीक्षापादोदकशब्दं निर्वक्ति— **परमानन्द इति । पादशब्देन** पाद इति पदेन निर्मलः मलरहितः **परमानन्द एव** परशिवानन्द एव **उक्तः** कथितः, **उदकशब्देन च** उदकम् इति पदेन च **ज्ञानं** शिवस्वरूपज्ञानम् उक्तम् । **तयोः** परमानन्द-ज्ञानयोः **ऐक्यं तु** अद्वैतं **तु दीक्षया** दीक्षाद्वारा भवति ॥ परशिवस्वरूपानन्दज्ञानैक्यं पादोदकम् इत्यर्थः ॥ "विज्ञानमानन्दं ब्रह्म" (बृ. उ., ३.९.२८) इति ब्रह्मस्वरूप-मुक्तम् ॥ विज्ञानं नाम आध्यात्मिकं ज्ञानम् । तदेवानन्दः, विषयज्ञानव-न्नाननुस्यूतदुःखत्वात् । शान्तिः, माङ्गल्यम्, संतृप्तिः, आनन्दश्च तद्विज्ञानस्य सारभूताः । "सत्यं ज्ञानमनन्तं ब्रह्म" (तै. उ., २.१) इति, "आनन्दं ब्रह्मेति व्यजानात्" (तै. उ., ३.६) इति, "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" (तै. उ., २.९) इति श्रुतयः परशिवब्रह्मस्वरूपनिर्देश-पराः । परमबोधस्वरूपः परमानन्द एव परशिवः । परमानन्दज्ञानयोः सामरस्यमेव परशिवपदम् । इदं च सामरस्यम् आभ्यन्तरदीक्षायाः पर्यवसानम् । (पश्यत— सि. शि., ६.३१) । अत्र स्थले गुरुशिष्ययोर्भेदो

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निवर्तते शिवानन्दानुभव उभयोः सामरस्यं द्रढयति च । सेव्यप्रसादी चायं शिवयोगी शिवस्वरूपेण गुरुणा परमसामरस्यं संप्राप्य दीक्षापादोदक-सम्पन्नो भवति ॥८॥

परसंवित्प्रकाशात्मा परमानन्दभावनाम् ।
अधिगम्य महायोगी न भेदं क्वापि पश्यति ॥९॥

व्याख्या— तज्ज्ञानानन्दमेव विशदयति— **परसंविदित्यादिना** । **महा-योगी** दीक्षापादोदकानुभवसम्पन्नः शिवयोगी **परसंवित्प्रकाशात्मा** परं ब्रह्म, तस्य संवित् परमज्ञानम्, तस्य प्रकाशः एव आत्मा स्वरूपं यस्य सः, परशिवब्रह्मज्ञानप्रकाशस्वरूपवान् सन्, **परमानन्दभावनां** परमानन्दानु-भवात्मिकां भावनाम् **अधिगम्य** संप्राप्य **क्वापि** कुत्रापि **भेदं** तज्ज्ञानानन्द-भेदं **न पश्यति** न अवगच्छति, तद्वाह्यदेशाभावात् ॥ ''यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ॥'' (तै.उ., २.४; २.९) इति श्रुत्यनुसारं परशिवस्वरूपं मनसा बुद्ध्या च निश्चेतुम् अशक्यम्, वाचा वाऽवर्णनीयं च । यो हि तत्परशिवानन्दं साक्षात्कृतवान् तस्य न किञ्चनाऽस्ति भयम्, परशिवस्याऽनतिक्रमणीयशान्तिमूलत्वात् । यो हि परशिवं निराकरोति स्वात्मानं वा परशिवाद् भिन्नत्वेन भावयति तस्यैव विद्यते भयम् । परमात्मानं साक्षात्कृत्य परमभयरूप-मृत्युपाशाद् विमुक्तो भवति । तदुक्तम्— ''अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥'' (कठ.उ., ३.१५) इति । इन्द्रियाणि तत्र कथं प्राप्नुयुः व्यापारयेयुश्च? कथं वा मनस्तत्र प्राप्नुयाद् इन्द्रियव्यापारम्, साहाय्यमाचरेच्च? तदुक्तम्— ''नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा'' (कठ. उ., ६.१२) । तदात्मनः परमं पदं शुद्धचित्स्वरूपम्, इन्द्रियज्ञानातीतं च । स्थलेऽस्मिन् शिवयोगी मृत्युमुखान्निर्मुक्तः, संसारचक्राच्च विनिर्मुक्तः । इयं हि स्थितिर्भूमा इति कथ्यते । तथा हि— ''नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा'' (छां.उ., ७.२४.१) । ''यो वै भूमा तदमृतम्'' (छां.उ., ७.२४.१)

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

इति, "यो भूमा तत्सुखम्" (छां.उ., ७.२३.१) इति च श्रुतिद्वयं भूमस्वरूपं विशदयति । शिवयोगिनश्चेतसि सर्वे भेदभावा निरस्ता भवन्ति, सर्वेषां शिवचैतन्येन व्याप्तत्वात् ॥९॥

देशकालाद्यवच्छेदविहीनं नित्यनिर्मलम् ।
आनन्दं प्राप्य बोधेन नान्यत्काङ्क्षति संयमी ॥१०॥

व्याख्या— दीक्षापादोदकस्थली शिवयोगी प्राप्तानन्दः सन् न किमपि काङ्क्षतीत्याह— **देशकालादीत्यादिना** । **संयमी** शिवयोगी **देशकालाद्यवच्छेदविहीनं** देशश्च कालश्च देशकालौ, तौ अदी यस्य सः, देशकालादिः अवच्छेदः विच्छेदः, तेन विहीनः रहितः, तम्, आनन्दम् इति द्वितीयान्तस्य विशेषणम्, **नित्यनिर्मलं** निरन्तरं मलसम्पर्करहितम् **आनन्दं** शिवानन्दं **बोधेन** शिवस्वरूपज्ञानेन **प्राप्य** लब्ध्वा **न अन्यत् काङ्क्षति** न तदानन्दातिरिक्तं किञ्चिदपि वस्तु अपेक्षते ॥ लौकिकानि सुखानि देशकालवस्तुसन्दर्भाद्यवलम्बन्ते । एवं तानि देशकालाद्यवच्छेदयुक्तानि । शिवे प्राप्तसामरस्यवतः शिवयोगिनः परमानन्दस्तु देशकालाद्यवच्छेदरहितः । सर्वापेक्षासंतृप्तिदशायाम् अखण्डपरमानन्द एव । तदा का वा आकाङ्क्षा अवशिष्येत ? न कापि अवशिष्यते इत्यर्थः । उक्तं च— "सर्वे कामा मनोगता व्यावर्तन्ते दुःखे नोद्विग्नः सुखे न स्पृहा त्यागो रागे सर्वत्र शुभाशुभयोरनभिस्नेहो न द्वेष्टि न मोदं च । सर्वेषामिन्द्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते । यत्पूर्णानन्दैकबोधस्तद्ब्रह्मैवाहमस्मीति कृतकृत्यो भवति ।" (परम. उ., अन्तिमभागः) इति । इयं हि स्थितिः श्रीगुरोरात्मीयोपदेशमार्गदर्शनाभ्यां लभते ॥१०॥

ज्ञानामृतमपि स्वच्छं गुरुकारुण्यसम्भवम् ।
आस्वाद्य रमते योगी संसारामयवर्जितः ॥११॥

व्याख्या— गुरुकृपालब्धज्ञानामृतम् आस्वाद्य योगी रमते इत्युक्त्वा दीक्षापादोदकस्थलं समापयति— **ज्ञानामृतम् इति** । **गुरुकारुण्यसम्भवं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

करुणायाः भावः कारुण्यम्, गुरोः कारुण्यात् संभवम्, गुरुकृपासमुद्भूतम् **स्वच्छं निर्मलं ज्ञानामृतम् अपि, आस्वाद्य** ज्ञनसुधामपि पीत्वा, **संसारामय-वर्जितः** संसारः एव आमयः रोगः, तेन वर्जितः, संसाररूपव्याधिना निर्मुक्तः, सन् **योगी** दीक्षापादोदकसम्पन्नः शिवयोगी **रमते** आनन्दति ॥ परशिवस्वरूपज्ञानमेवाऽमृतम् । तदेव भूमा । "यो वै भूमा तदमृतम्" (छां. उ., ७.२४.१) इत्युक्तम् । गुरुकारुण्येन लभते तज्ज्ञानम् । यो हि गुरु-शिवयोरैक्यमेव पश्यति स गुरु-शिवसमावेशे स्वत्मानमपि समाविष्टं मन्यते । इदं दीक्षापादोदकस्य पर्यवसानं यस्मिन् योगी मोदते ॥११॥

— इति दीक्षापादोदकस्थलम् —

२. अथ शिक्षापादोदकस्थलम् – (८२)

गुरुशिष्यमयं ज्ञानं शिक्षा योगिनमीर्यते ।
तयोः समरसत्वं हि शिक्षापादोदकं स्मृतम् ॥१२॥

व्याख्या— दीक्षापादोदकसम्पन्नस्य शिक्षापादोदकमाह— **गुरुशिष्य-मयम् इति । शिक्षा** शिक्षा नाम **गुरुशिष्यमयं ज्ञानं** पूर्वोक्तरीत्या पादोदकशब्दवाच्यं गुरुशिष्यतन्मयीभूतं ज्ञानं **योगिनं** दीक्षापादोदक-सम्पन्नं शिवयोगिनम् **ईर्यते** प्रेरयति, **तयोः** तयोः शिक्षाज्ञानयोः **समरसत्वं हि** सामरस्यं हि **शिक्षापादोदकं** शिक्षापादोदकम् इति **स्मृतं** ज्ञातम् ॥ अस्मिन् स्तरे योगिनः स्वात्मगुर्वोरद्वैतमेव परमार्थः । इदमद्वैतं पुनर्महतः परशिवब्रह्माद्वैतस्यांशभूतमपि । अस्य अद्वैतस्य परमार्थत्वमाह— "माया-मात्रमिदं द्वैतमद्वैतं परमार्थतः । विकल्पो विनिवर्तेत कल्पितो यदि केनचित् । उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥" (माण्डूक्य., १.१७-१८) इति । इदं कारिकाद्वयं द्वैतस्य मिथ्यात्वम् अद्वैतस्य परमार्थत्वं च प्रतिपादयति । इदं च योगिनां परमार्थदृष्ट्या भासते । अद्वैतदृष्टिमेव तां गुरु-परशिव-शिष्यमयीम् अत्र शिक्षां मन्यन्ते । शिष्यस्य तु प्रगतदशा, देशिकश्च परमार्थोपदेशकः, एकसूत्रसूत्रितः सर्वेषाम् आत्मनाम् एकीभावः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परमार्थः । द्वैतस्य सर्वे विकाराः लौकिकदशायां भवन्ति । परमार्थदशायां तु परमानन्द एव केवलः । एवं शिक्षाज्ञानयोः सामरस्यं शिक्षापादोदमिति कथ्यते ॥१२॥

मथिताच्छास्त्रजलधेर्युक्तिमन्थानवैभवात् ।
गुरुणा लभ्यते बोधसुधा सुमनसां गणैः ॥१३॥

व्याख्या— एतादृशं ज्ञानामृतं कैः कस्माच्च प्राप्यते इत्यत्राह— **मथिताद् इति । युक्तिमन्थानवैभवात्** युक्तिः एव मन्थानः मन्थदण्डकः ('मन्थानो मन्थदण्डकः' — अमर., २.६६३), तस्य वैभवात् सामर्थ्यात्, **शास्त्रजलधेः** शास्त्रम् एव जलधिः समुद्रः तस्मात्, **गुरुणा** शिक्षाप्रदेन आचार्येण **मथितात्** मन्थनवशात् **बोधसुधा** शिवाद्वैतज्ञानामृतं **सुमनसां गणैः** शुद्धमनस्कानां शिवयोगिनां **गणैः** समुदायैः **लभ्यते** प्राप्यते ॥ अत्र श्लिष्टपरम्परितरूपकं नामालङ्कारः । गुरुशब्दः श्लेषेण श्रीगुरुः बृहस्पतिश्चेति अर्थद्वयं प्रतिपादयति । वीरशैवशास्त्रं जलधिः, युक्तिः मन्थानम्, शिवाद्वैतम् अमृतम्, शिवयोगिनश्च देवाः [सुमनसः शुद्धचित्ताः (योगिनः) देवाश्च— "अमरा निर्जरा देव त्रिदशा विबुधास्सुराः । सुपर्वाणः सुमनसः......." (अमर. १.७)] । वीरशैवशास्त्रमन्थानेन शिवाद्वैतामृतं यो लभते स गुरुः, तदमृतास्वादनपटुः शिष्यश्च प्राकृतसाधारणस्तरम् अतीतौ गुरुशिष्यौ शिवाद्वैतस्तरे तिष्ठतः । अद्वैतवादो बाह्ये औचित्यं न भजते, परन्तु अन्तरङ्गे अद्वैतमेव नाऽन्यत् । इदमुद्घोष्यते भगवत्या श्रुत्या— "यथा गुरुस्तथैवेशो यथैवेशस्तथा गुरुः । पूजनीयो महाभक्त्या न भेदो विद्यतेऽनयोः । नाद्वैतवादं कुर्वीत गुरुणा सह कुत्रचित् । अद्वैतं भावयेद्भक्त्या गुरोर्देवस्य चात्मनः ॥" (यो. शि. उ., ४.५८-५९) इति । वोधकः, बोध्यः बोधविषयश्चेति यत्र त्रयाणाम् ऐक्यं तदेव शिक्षापादोदकस्थलम् । अत्रेदम् अनुसन्धेयम् — यत्समुद्रमन्थनम् अत्र वर्ण्यते तन्न बाह्यव्यापारः, परं तु शिवयोगिनोऽन्तरङ्गे प्रचलति मनोव्यापारः । इदं तु सूच्यते— "हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥"

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

(श्वे. उ., ४.१७) इति, "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति ॥" (श्वे. उ., ४.२०) इति च । भावना, बुद्धिः, इच्छा चेति चित्तसामर्थ्य-विशेषाणां संस्कारसमाधिभ्याम् अन्तरङ्गे समुत्पन्नशक्त्यतिशये सति, शिवयोगी स्वात्मनि अभिन्नत्वेन गुरुशिवसामरस्यं साक्षात्कृत्य मोदते । अयमेव प्रमोदः शिक्षापादोदकस्थलस्य परमरहस्यम् ॥१३॥

ज्ञानचन्द्रसमुद्भूतां परमानन्दचन्द्रिकाम् ।
पश्यन्ति परमाकाशे मुक्तिरात्रौ महाधियः ॥१४॥

व्याख्या— रूपकान्तरेणोक्तमेव विशदयति— **ज्ञानचन्द्रेत्यादिना** । **महाधियः** महत्यः धियः येषां ते **महाधियः** सूक्ष्मबुद्धयः शिवयोगिनः **मुक्तिरात्रौ** मुक्तिरेव रात्रिः मुक्तिरात्रिः, तस्याम्, **परमाकाशे** परशिवस्य सद्रूपहृदयाकाशे **ज्ञानचन्द्रसमुद्भूतां** ज्ञानमेव चन्द्रः ज्ञानचन्द्रः, ततः समुद्भूतां समुत्पन्नां **परमानन्दचन्द्रिकां** परमानन्द एव चन्द्रिका, ताम्, चन्द्रप्रकाशम्, परमानन्दज्योत्स्नाम्, **पश्यति** अवलोकयति, स्वस्वरूपेण परामृशतीत्यर्थः ॥ परा मुक्तिर्लौकिकानां कृते तिमिरावृतरात्रिवद् भासते । अतो मुक्तिं रात्रिरूपेण रूप्यते ॥ परन्तु प्रबोधशालिनां शिव-योगिनां कृते परमानन्दज्योत्स्नया प्रकाशते । परमाकाशस्तु योगिनां हृदयाकाशः । स च परमसद्रूप-परशिवस्वरूपः ॥१४॥

दृष्टे तस्मिन् परानन्दे देशकालादिवर्जिते ।
द्रष्टव्यं विद्यते नान्यच्छ्रोतव्यं ज्ञेयमेव वा ॥१५॥

व्याख्या— परमानन्दे दृष्टे नान्यद् द्रष्टव्यम् विद्यते इत्याह— **दृष्टे इति। देशकालादिवर्जिते** देशकालाद्यवच्छेदरहिते **तस्मिन् परानन्दे** तस्मिन् परशिवानन्दे **दृष्टे** अनुभूते सति **नान्यद्** न वस्त्वन्तरं **द्रष्टव्यं** दर्शनयोग्यम्, **श्रोतव्यं** श्रवणयोग्यम् **ज्ञेयम्** एव **वा** ज्ञातुं योग्यम् एव वा **विद्यते** भवति; तादृशं वस्त्वन्तरं नैव दृश्यते इत्यर्थः; सर्वस्यापि तत्कार्यत्वेन तद्भिन्नत्वा-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावात् ॥ तदाह याज्ञवल्क्यः— "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि दृष्टे श्रुते विज्ञाते इदं सर्वं विदितम्" (बृ.उ., ४.५.६) इति । "सर्वं खल्विदं ब्रह्म" (छां. उ., ३.१४.१) — अस्मिन् ब्रह्मणि ज्ञाते सर्वं ज्ञातमिति भावः। "शान्त उपासीत" (छां.उ., ३.१४.१) इत्युक्तदिशा स्वात्मनि दृष्टं स्वात्मन्येव उपासितव्यम् इत्यर्थः ॥१५॥

आत्मानन्देन तृप्तस्य का स्पृहा विषये सुखे ।
गङ्गाजलेन तृप्तस्य कूपतोये कुतो रतिः ॥१६॥

व्याख्या— नान्यत् काङ्क्षतीत्याह— **आत्मानन्देनेति । आत्मानन्देन** परशिवसामरस्यजनितेन स्वात्मानन्देन **तृप्तस्य** तृप्तिं प्राप्तस्य **विषये सुखे** इन्द्रियविषयजाते सुखे, वैषयिकसुखे इति यावत्, **का स्पृहा** का वा अपेक्षा? न कापि इत्यर्थः । **गङ्गाजलेन** पवित्र-गङ्गोदकेन **तृप्तस्य** तृप्तिं प्राप्तस्य **कूपतोये** सामान्यकूपजले **रतिः** प्रीतिः **कुतः** कस्मात्? न कस्मादपि कारणाद् इत्यर्थः ॥ दृष्टान्तालङ्कारः । शिवयोगी सर्वाणीन्द्रियाणि मनसा सह स्वस्वविषयेभ्यः परावर्तयति, तानि बुद्ध्या सह शिवाद्वैतानन्दे विनिवेशयति च । अतो वैषयिकसुखे तस्य प्रवृत्तिरेव नास्ति । आनन्दस्य महत्त्वम् अखण्डत्वं च अनुभूतवतः शिवयोगिनोऽल्पे वैषयिकसुखे कापि स्पृहा नार्हति भवितुम्। अखण्डात्मानन्दस्तु भूमा, वैषयिकसुखं पुनरल्पम्। उक्तं च— "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति" (छां. उ., ७.२३.१) इति । तत्रैकीभूतः तत्रैव तिष्ठति ॥१६॥

यस्मिन्नप्राप्तकल्लोले सुखसिन्धौ निमज्जति ।
सामरस्यान्महायोगी तस्य सीमा कुतो भवेत् ॥१७॥

व्याख्या— परयोगिनः परिमितिर्नास्तीति प्राह— **यस्मिन्निति । यस्मिन्** यत्र **अप्राप्तकल्लोले** प्राप्ताः कल्लोलाः येन सः प्राप्तकल्लोलः, न प्राप्तकल्लोलः अप्राप्तकल्लोलः, तस्मिन्, वीचीतरङ्गरहिते, शान्ते इत्यर्थः । तादृशे **सुखसिन्धौ** आनन्दसमुद्रे **महायोगी** परयोगी **सामरस्यात्** समरस-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावात् **निमज्जति** विलयं गच्छति, **तस्य** सुखसिन्धोः **सीमा** परिमितिः **कुतः भवेत्** कुत्र स्यात् ? न कुत्रापि इत्यर्थः ॥ यस्मिन् आनन्द-समुद्रे समरसभावेन शिवयोगी निमज्जति तस्य सीमा कापि नास्ति। तत्रास्ति अखण्डा शान्तिः। "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ., २.१) इत्याह श्रुतिः ॥१७॥

गुरुप्रसादचन्द्रेण निष्कलङ्केन चारुणा।
यन्मनःकुमुदं नित्यबोधितं तस्य को भ्रमः ॥१८॥

व्याख्या— न योगिनः कदाचित्कुत्रचिद्वा भेदभ्रान्तिः संभवतीत्युक्त्वा शिक्षापादोदकस्थलं समापयति— **गुरुप्रसादेत्यादिना। निष्कलङ्केन** कलङ्क-रहितेन **चारुणा** सुन्दरेण **गुरुप्रसादचन्द्रेण** गुरुप्रसादः एव चन्द्रः, तेन, **यन्मनःकुमुदं** यस्य मनःकुमुदं मनोरूपं नीलकमलं **नित्यबोधितं** नित्यं निरन्तरं बोधितं विकसितं, **तस्य** तस्य महायोगिनः **भ्रमः कः** का भ्रान्तिः? न कोऽपि भ्रमः इत्यर्थः ॥ अत्र स्थले शिवयोगिनो मनो गुर्वनुग्रहेण पूर्णतया विकसितम्। गुरुप्रसादोऽत्र चन्द्रत्वेन रूप्यते। चन्द्रप्रकाशः खलु शीतलः सुखकरश्च। गुरुप्रसादोऽपि शान्तिप्रदः कृपाविष्टश्च। गुरु-प्रसादरूपश्चन्द्रो निष्कलङ्कः, अन्यः सकलङ्कः। एवं उपमानाद् उपमेयस्य अधिक्यमुक्तम्। अतो व्यतिरेको नामाऽलङ्कारः ॥१८॥

— इति शिक्षापादोदकस्थलम् —

३. अथ ज्ञानपादोदकस्थलम् – (८३)

तदैक्यसम्पदानन्दज्ञानं ज्ञानगुरुर्मतः।
तत्सामरस्यं शिष्यस्य ज्ञानपादोदकं विदुः ॥१९॥

व्याख्या— शिक्षापादोदकसम्पन्नस्य ज्ञानपादोदकमाह— **तदैक्येत्या-दिना। तदैक्यसम्पदानन्दज्ञानं** तदैक्यं पादोदकशब्दवाच्ययोः आनन्दज्ञानयोः ऐक्यम्, तस्य सम्पत् समृद्धिः, तस्याः आनन्दः, तस्य ज्ञानं बोधः, स एव,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानगुरुः मतः ज्ञानगुरुः इति संमतः । **तत्सामरस्यं** तेन आनन्दज्ञानयोः ऐक्येन समरसभावः **ज्ञानपादोदकं विदुः** ज्ञानपादोदकम् इति जानन्ति ॥ प्रत्यक्षादिज्ञानप्रकाराः सर्वे लौकिकस्तरे भवन्ति । शिवज्ञानं तु न प्रत्यक्षम्, न लैङ्गम् (अनुमितिः), नापि शाब्दम्, परन्तु स्वात्मन्येवाऽन्तःस्फुरणतयाऽपृथग्यत्नतया साक्षात्तया साक्षात्क्रियमाणम् । तच्च परिशुद्धं पवित्रं च । तज्ज्ञानं आनन्देन समरसभावं भजते, उक्तं तत् — "विज्ञानमानन्दं ब्रह्म" (बृ. उ., ३.९.२८) इति । शिक्षापादोदकस्थलिनः तज्ज्ञानमेव गुरुः । विज्ञानानन्दयोः सामरस्यं पादोदकशब्देन गीयते । पादोदकमेव ज्ञानगुरुः । शिक्षापादोदकसम्पन्नस्य शिष्यस्य तेन पादोदकेन (ज्ञानगुरुणा) सामरस्यं ज्ञानपादोदकम् उच्यते ॥१९॥

अविद्याराहुनिर्मुक्तो ज्ञानचन्द्रः सुनिर्मलः ।
प्रकाशते पराकाशे परानन्दमहाद्युतिः ॥२०॥

व्याख्या— ज्ञानं चन्द्रत्वेन संभाव्य तत्प्रकाशमाह— **अविद्येत्यादिना** । **अविद्याराहुनिर्मुक्तः** अविद्या अज्ञानम् एव राहुः अविद्याराहुः, तेन निर्मुक्तः निःशेषेण मुक्तः **सुनिर्मलः** सुष्ठु परिशुद्धः **परानन्दमहाद्युतिः** महती चेयं द्युतिश्च महाद्युतिः परमानन्दः एव महाद्युतिः यस्य सः, परमानन्दरूपमहाप्रकाशश्च **ज्ञानचन्द्रः** ज्ञानम् एव चन्द्रः ज्ञानचन्द्रः, **पराकाशे** महाकाशे सर्वश्रेष्ठहृदयाकाशे **प्रकाशते** विराजते ॥ परशिवाभिन्नस्वात्मसाक्षात्काररूपम् आत्मज्ञानम् एव चन्द्रः । तदेव ज्ञानचन्द्र इत्याख्यायते । अविद्यारूपराहुना सोऽसंस्पृष्टः, मलरूपकलङ्केनादूषितः । अत एव सुनिर्मलः । शिवयोगिनो हृदाकाशे चन्द्रत्वेन रूपितं स्वात्मज्ञानं विराजमानं सद् अविद्याराहुग्रहणं विना परमानन्दरूपेण तिष्ठति । तेन परशिवयोगी लौकिकजगतः सुदूरं नीयते ॥२०॥

अज्ञानमेघनिर्मुक्तः पूर्णज्ञानसुधाकरः ।
आनन्दजलधेर्वृद्धिमनुपश्यन् विभासते ॥२१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— ज्ञानचन्द्र एव प्रकारान्तरेण वर्ण्यते— **अज्ञानेत्यादिना** । **अज्ञानमेघनिर्मुक्तः** अज्ञानम् एव मेघः, तस्मात् निर्मुक्तः, अविद्याजलद-विनिर्मुक्तः, **पूर्णज्ञानसुधाकरः** ज्ञानम् एव सुधाकरः चन्द्रः, ज्ञानसुधाकरः, पूर्णः ज्ञानसुधाकरः, **आनन्दजलधेः** आनन्द एव जलधिः समुद्रः, तस्य, **वृद्धिम् अनुपश्यन्** उच्चलनं प्रतीक्षमाणः **विभासते** विभाति ॥ पूर्णचन्द्रस्य उदये समुद्र उच्चलतीति कविसमयः । एवमेव शिवानन्दसमुद्रः पूर्णज्ञान-चन्द्रस्योदये वर्धते इति कथ्यते । मेघैराच्छादिते चन्द्रमसि सति समुद्रस्य समुच्चलनं न भवति । परन्तु शिवज्ञानचन्द्रस्याऽविद्यामेघसम्पर्कातीतत्वेन शिवानन्दसमुद्रस्योच्चलनं न कदापि बाध्यते । या 'नाहं शिवः' इत्येवंरूपा प्रतीतिः साऽविद्या । यदा योगी स्वात्मानं परशिवे अण्डरसन्यायेनाऽ-दृश्यतया विलयं गतम् इति मन्यते, तदा स ज्ञानपादोदकस्थली भवति । तस्य पूर्णज्ञानचन्द्रस्याऽखण्डतास्वरूपं न कदापि हीयते । एवमेव शिव-योगिनः शिवस्वरूपे निमग्नस्याऽखण्डा शैवीस्थितिर्न हीयते ॥२१॥

ज्ञानचन्द्रोदये जाते ध्वस्तमोहतमोभराः ।
पश्यन्ति परमां काष्ठां योगिनः सुखरूपिणीम् ॥२२॥

व्याख्या— ज्ञानचन्द्रस्योदये योगिनः परमानन्दमेवानुभवन्तीत्याह— **ज्ञानचन्द्रोदये इति** । **ज्ञानचन्द्रोदये** ज्ञानचन्द्रस्य उदये **जाते** सञ्जाते सति **योगिनः** शिवयोगिनः **ध्वस्तमोहतमोभराः** मोह एव तमः मोहतमः, तस्य भरः समूहः, ध्वस्तः मोहभरः येषां ते, तादृशाः सन्तः, **सुखरूपिणीं** सुखस्य रूपम् इव रूपं यस्याः सा सुखरूपिणी, ताम्, **परमां काष्ठां** परमां गतिं **पश्यन्ति** अनुभवन्ति ॥ "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" (ई. उ., ७) इत्युक्तदिशा परमैक्यस्थितिमनुभूयमानानां शिवयोगिनाम् कृतेऽविद्यातिमिरस्य, भ्रमस्य, मोहस्य वा नास्ति कोऽप्यवकाशः । ज्ञान-पदोदकिनः स्थितिस्तादृशतिमरनिर्मुक्ता ॥२२॥

मायारजन्या विरमे बोधसूर्ये प्रकाशिते ।
निरस्तसर्वव्यापारश्चित्रं स्वपिति संयमी ॥२३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— गतायामपि रात्रौ उदिते च सूर्ये योगिनः स्वपनं विस्मयायेत्याह— **मायारजन्या इति । मायारजन्याः** माया एव रजनी, तस्याः, मायारूपरात्रेः, **विरमे** अवसाने **बोधसूर्ये** ज्ञानसूर्ये **प्रकाशिते** उदिते सति **संयमी** शिवयोगी **निरस्तसर्वव्यापारः** सर्वे व्यापाराः सर्वव्यापाराः निरस्ताः सर्वव्यापाराः यस्य सः, परित्यक्तसर्वव्यापारः सन्, **स्वपिति** निद्रां गच्छति इति तु **चित्रम्** आश्चर्यकरम् ॥ एतदुक्तं भगवता— "या निशा सर्वभूतानां तस्यां जगर्ति संयमी । यस्यां जग्रति भूतानि सा निशा पश्यतो मुनेः ॥" (भ.गी., २.६९) इति । स्वतिमिरे सर्ववस्तूनां स्वरूपम् आच्छादयति रजनीति तु प्रसिद्धम् । प्राकृतजनाः सर्वे दिने स्वीयैः व्यापारैर्जागृता इव भासन्ते । परन्तु मायाशक्तिवशात् सत्यम् अनृतवत्, ज्ञानम् अज्ञानवत्, नित्यम् अनित्यवच्च भावयन्तः सत्यं निद्रां गता एव । योगी पुनः ज्ञानदृष्ट्या सर्वदा जागृतः सन्नविद्यागोचरान् अतिक्रान्तः शिवज्ञाने नितरां मोदते । स्वात्मनि तस्य मायारजनी विरमति, ज्ञानसूर्यः प्रकाशते च । तदा तस्य न किञ्चिदपि करणीयम् अस्ति, केवलम् आनन्दानुभवे निमग्नः स्वपिति । तादृशः शिवयोगी भवति ज्ञानपादोदकस्थली ॥२३॥

अनाद्यविद्याविच्छित्तिवेलायां परयोगिनः ।
प्रकाशते परानन्दः प्रपञ्चेन विनाकृतः ॥२४॥

व्याख्या— परानन्दः कदा भवतीत्यत्राह— **अनादीत्यादिना । अनाद्यविद्याविच्छित्तिवेलायां** न विद्यते आदिः यस्याः सा अविद्या अनाद्यविद्या, तस्याः विच्छित्तिः विनाशः, विच्छित्तिवेलायां विनाशवेलायां **परयोगिनः** परशिवयोगिनः **परानन्दः** परमानन्दः **प्रपञ्चेन विनाकृतः** प्रपञ्चेन रहितः सन् **प्रकाशते** विराजते ॥ प्रपञ्चेन विनाकृत आनन्दो नाम निरुपाधिक आनन्दः । निरुपाधिकानन्दो नाम सः, यो बाह्योपाधीन् कारणांशान् वा न संश्रयते । अयमानन्दो मायिकानन्दो न, तत्र चक्षुरादीनाम् इन्द्रियाणां व्यापाराभावात् । उक्तं च— "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ध्यायमानः ॥'' (मुं. उ., ३.१.८) इति । [अन्यैर्देवैः = इतरेन्द्रियैः — शङ्करः] । अयम् एव सूक्ष्मस्वभाव आत्मनः । एष तु गृह्यते अन्तःस्फुरणेन केवलम्— ''एषोऽणुरात्मा चेतसा वेदितव्यः'' (मुं. उ., ३.१.९) इति । स्वात्मनः परमात्मस्वरूपेणान्तःस्फुरणेन दर्शनम् आत्मनः सुक्ष्मता । जाते तत्साक्षात्कारे परमानन्द एवाऽवशिष्यते । इदम् अत्र ज्ञानपादोदकम् ॥२४॥

नित्यानन्दे निजाकारे विमले परतेजसि ।
विलीनचेतसां पुंसां कुतो विश्वविकल्पना ॥२५॥

व्याख्या— नित्यानन्दे निमग्नानां योगिनां कुतोऽपि प्रपञ्चविषयचिन्तनं नास्तीत्याह— **नित्यानन्दे** इति । **नित्यानन्दे** नित्यानन्दात्मके **निजाकारे** निजस्वरूपयुक्ते **विमले** निर्मले **परतेजसि** परशिवात्मके तेजसि प्रकाशे **विलीनचेतसां** विलीनं चेतः येषां ते विलीनचेतसः, तेषाम्, **पुंसां** साधकानां **विश्वविकल्पना कुतः** विश्वभेदकल्पना कुतः ? न कुतः अपि इत्यर्थः ॥ परतेजो नाम परमप्रकाशः, परशिव इत्यर्थः । स एव स्वयंप्रकाशः सर्वं प्रकाशयति, नाऽन्यः प्रकाशस्तत्र विभाति । तदुक्तम्— ''न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥'' (कठ. उ., ५.१५; श्वे. उ., ५.१४) इति । परशिवब्रह्म परानन्दस्वरूपम् इति तु श्रुतिषु प्रसिद्धम् । दशायाम् अस्यां शिवयोगिनः प्रापञ्चिकभेदकल्पना कुतोऽपि नास्ति । परानन्दे निमग्ने सति शिवयोगी ''शिवोऽहं'' भावे मग्नस्तिष्ठति । परमतेज एव तस्य निजस्वरूपम् । स प्रपञ्चे जीवति इति तु सत्यम् । परं तु स तत्र तथा जीवति यथा प्रापञ्चिकव्यवहारस्य प्रज्ञाऽपि तस्य न भवेत् ॥२५॥

कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः ।
साक्षात्कृतपरानन्दज्योतिषः साम्यकल्पना ॥२६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— शिवयोगिनः परानन्दो ब्रह्मादीनाम् आनन्दम् अतिरिच्य तिष्ठतीत्याह— **कुत इति**। **कुतो ब्रह्मा** कुत्र सृष्टिकर्ता ब्रह्मा, **कुतो विष्णुः** कुत्र स्थितिकर्ता विष्णुः, **कुतो रुद्रः** कुत्र लयकर्ता रुद्रः **कुतो रविः** कुत्र दिनकरो रविः ? **साक्षात्कृतपरानन्दज्योतिषः** परानन्दः एव ज्योतिः परानन्दज्योतिः, साक्षात्कृतं परानन्दज्योतिः येन सः साक्षात्कृतपरानन्दज्योतिः, तस्य, साक्षात्कृत-परमानन्दप्रकाशस्य शिवयोगिन आनन्देन ब्रह्मादीनां कुतः **साम्यकल्पना** समानताविचारः ? न कुतोऽपि ब्रह्मादीनाम् आनन्दः तदंशभूतानन्देन सम इत्यर्थः ॥ तदुक्तम्— "अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" (बृ. उ., ४.३.३२) इति । तैत्तिरीयोपनिषदि दत्तायाम् आनन्दमीमांसायाम् इदं सत्यं स्पष्टीक्रियते । (पश्यत— तै.उ.,२.८.१-४; बृ.उ., ४.३.३३) । शिवयोगिनः प्रवुद्धमतयः सर्वापेक्षाविनिर्मुक्ताश्च । ब्रह्मादीनाम् आनन्दः शिवयोगिन आनन्दांशलेशः । योगिशिवयोरभेदोऽत्र स्वीकृतः । परशिवस्त्वानन्दः शिवयोगी त्वानन्दी । आनन्दानन्दिनोरैक्यं सिद्धमेव ॥२६॥

अपरोक्षपरानन्दविलासस्य महात्मनः ।
ब्रह्मविष्ण्वादयो देवा विशेषाः सुखबिन्दवः ॥२७॥

व्याख्या— उक्तमेव विशदयति— **अपरोक्षेत्यादिना** । **अपरोक्षपरानन्दविलासस्य** अपरोक्षः साक्षत्तयाऽनुभूतः परानन्दः परमानन्दः, तस्य विलासः अभिव्यक्तिः यस्य, तादृशस्य **महात्मनः** महायोगिनः **ब्रह्मविष्ण्वादयः** ब्रह्मा, विष्णुः, इत्यादयः **देवाः** देवताः **विशेषाः** व्यष्टिरूपाः **सुखविन्दवः** आनन्दविप्रुषः ॥२७॥

यन्मात्रासहितं लोके वाञ्छन्ति विषयं नराः ।
तदप्रमेयमानन्दं परमं को न वाञ्छति ॥२८॥

व्याख्या— तस्य ज्ञानानन्द एव ज्ञानपादोदकम् इत्युक्त्वा ज्ञानपादोदकस्थलं समापयति— **यन्मात्रासहितम् इति** । **लोके** इह प्रपञ्चे **नराः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जनाः **यन्मात्रासहितं** यस्य परमानन्दांशेन सहितं **विषयं** विषयसुखं वाञ्छन्ति अभिलषन्ति, **तदप्रमेयं** तस्य विषयसुखस्य अपरिमितपरमम् **आनन्दं** परमानन्दं **को न वाञ्छति** कः न अभिलषति ? सर्वे अभिलषन्ति इत्यर्थः ॥ लोकेऽस्मिन् सर्वे जनाः सुखम् इच्छन्ति । तत्सुखं प्राप्तुं प्रयतन्ते च । यत्ते सुखम् इति मन्यन्ते तद् इन्द्रियैर्विषयसम्पर्केण मनसि जायते । तच्च दुःखेन मिश्रितं नश्वरं च । तथापि तादृशं सुखं वाञ्छन्ति । एवं स्थिते को न वाञ्छन्ति परमानन्दम् ? सर्वे वाञ्छन्तीत्यर्थः ॥ शिवयोगी तु परमानन्दे शिवे निमग्नः परमानन्द एव भवति ॥२८॥

— इति ज्ञानपादोदकस्थलम् —

४. अथ क्रियानिष्पत्तिस्थलम् – (८४)

परकाये क्रियापत्तिः कल्पितैव प्रकाशते ।
रज्जौ भुजङ्गवद् यस्मात् क्रियानिष्पत्तिमानयम् ॥२९॥

व्याख्या— ज्ञानपादोदकसम्पन्नस्य रज्जुसर्पन्यायेन क्रियानिष्पत्तिमाह— **परकाये इति । परकाये** परब्रह्मशरीरे, परब्रह्म एव कायः यस्य सः परकायः, तस्मिन्, शिवयोगिनि इत्यर्थः, **क्रियापत्तिः** क्रियायाः आपत्तिः निष्पत्तिः, **रज्जौ भुजङ्गवद्** रज्जौ सर्पवद् **यस्मात्** यस्मात् कारणात् **कल्पिता एव** कल्पितविषय एव इति **प्रकाशते** अवभासते, तस्मात् कारणाद् **अयम्** अयं ज्ञानपादोदकसम्पन्नः **क्रियानिष्पत्तिमान्** क्रियानिष्पत्तिस्थलीनः इति ज्ञायते ॥ क्रियापत्तिः = क्रियानिष्पत्तिः, अत्र निष्पत्तिशब्द उत्पत्त्यर्थकः निवृत्त्यर्थकश्च । क्रियानिवृत्तिर्नाम क्रियाफलनिवृत्तिः, शिवयोगिन क्रियाफलासक्तिरहितत्वात् । ज्ञानेन शिवाद्वैतात्मकेन परमानन्दः । परमानन्दे निमग्नस्य क्रियाफले कदापि स्पृहा न भवति । तज्ज्ञानमेवाग्निरिव कर्मफलं भस्मीकरोति । तदेवोक्तं भगवता— "यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥" (भ.गी.,४.३७) इति । कर्मफलत्यागेन कर्मणि युक्तोऽपि तस्य न

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पापपुण्यलेपः। इदमपि उक्तं भगवता— "त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥" (भ. गी., ४.२०) इति। अतः नित्यतृप्तः फलासक्तिरहितत्त्वेन कर्मणा युक्तः कर्म कुर्वन्निव भासते परं तु न किञ्चित् करोति॥२९॥

ज्ञानिनां यानि कर्माणि तानि नो जन्महेतवः।
अग्निदग्धानि बीजानि यथा नाङ्कुरकारणम् ॥३०॥

व्याख्या— ज्ञानिनां कर्मफलं नास्तीत्याह— **ज्ञानिनाम्** इति। **यथा** येन प्रकारेण **अग्निदग्धानि** अग्निना दग्धानि, वह्निप्लुष्टानि **बीजानि अङ्कुरकारणं** बीजानि उद्भिदहेतुः **न** न भवन्ति तथा **यानि ज्ञानिनां कर्माणि** यानि शिवज्ञानिनां पापपुण्यात्मकानि कर्माणि **तानि जन्महेतवः** तानि पुनर्जन्मकारणानि **न उ** न खलु भवन्ति॥ येषां कर्माणि पुनर्जन्मकारणानि न भवन्तीति तु सूच्यते तेषामेव परमज्ञानसम्पदः। उक्तं च भगवता— "यस्य सर्वे समारभ्याः कामसङ्कल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥" (भ. गी., ४.१९) इति। यस्य कर्माणि दग्धबीजवन्न भवन्ति परिणाममुखानि तस्य कर्मनिष्पत्तिस्थलित्वम्। पूर्वम् अन्यस्थलस्य (ऐक्यस्थलीनाङ्गस्थलस्य आचारसम्पत्तिस्थलनाम्नः) प्रस्तावे शिवयोगिनः देहयात्रां लौकिकीमाह— "निर्दग्धकर्मबीजस्य निर्मलज्ञानवह्निना। देहिवद्भासमानस्य देहयात्रा तु लौकिकी॥" (सि. शि., १४.२७)। 'देहयात्रा तु लौकिकी' इत्यनेन यावत्पर्यन्तं शरीरं प्रवर्तते तावत्पर्यन्तम् ऐक्यः शरीरसम्बद्धानि कर्माणि कुर्यादिति सूच्यते। अस्मिन् स्थले निर्दग्धबीजवत् शिवयोगिनः कर्माणि पुनर्जन्मकारणानि न भवन्तीति कथितम्॥३०॥

कर्मणा कृतेनापि ज्ञानिनो निरहङ्कृतेः।
विक्रिया प्रतिबिम्बस्था किं करोति हिमद्युतेः ॥३१॥

व्याख्या— कर्मकरणेऽपि ज्ञानिनः प्रयोजनं किमपि न स्यादित्याह— **कर्मणेति। कर्मणा कृतेन अपि** कर्मकरणेनापि **निरहङ्कृतेः** अहङ्कार-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रहितस्य **ज्ञानिनः** शिवस्वरूपं स्वात्मनः स्वरूपम् इति ज्ञातस्य शिवयोगिनः, **प्रतिबिम्बस्था** प्रतिबिम्बरूपेण तिष्ठन्ती **विक्रिया** विकृतिः **हिमद्युतेः** चन्द्रस्य **च किं करोति** किं कर्तुं शक्नोति? न किमपि कर्तुं शक्नोतीत्यर्थः ॥ सर्वकर्माणि ''अहमेव कर्ता'' इत्यहङ्कारमूलानि। तदुक्तं भगवता— ''अहङ्कारविमूढात्मा कर्ताहमिति मन्यते'' (भ. गी., ३.२७) इति । अत एवाऽयं मूलाहङ्कार इत्युच्यते । यदा तन्मूलाहङ्कारः शिवज्ञानाग्निना भस्मसात्क्रियते, तदा शिवयोगी निरहङ्कारवान् भवति। शिवयोगे तस्मिन् विलयं प्राप्ते सति तस्य कर्मफलैः कालुष्यं नास्ति । अस्य वैशद्याय बिम्बभूतस्य चन्द्रस्य तत्प्रतिबिम्बस्य च दृष्टान्तो दत्तः । वार्यादर्शादिप्रतिफलनवशात् प्रतिबिम्बस्य विकारो बिम्बस्य न किमपि कर्तुं शक्यते । एवमेव कर्मकरणेन निरहङ्कारवतो ज्ञानिनो न कोऽपि विकारो जायते ॥३१॥

चन्द्रस्य मेघसम्बन्धाद् यथा गमनकल्पना ।
तथा देहस्य सम्बन्धादारोप्या स्यात् क्रियात्मनः ॥३२॥

व्याख्या— ज्ञानिनि क्रिया कल्पितेत्याह— **चन्द्रस्येति । यथा** येन प्रकारेण **मेघसम्बन्धात्** मेघस्य सम्पर्कात् **चन्द्रस्य** विधोः **गमनकल्पना** सञ्चलनस्य अवभासः, **तथा** तेन प्रकारेण **देहस्य सम्बन्धात्** शरीरस्य सम्पर्कात् **आत्मनः** स्वात्मनः **क्रिया** क्रियावभासः **आरोप्या स्यात्** आरोपणीया भवेत् ॥ यदाऽऽकाशे मेघाः सञ्चरन्ति तदा तैराच्छादनानाच्छादनयोः पौनःपुन्येन चन्द्रः सञ्चरद्भिः मेघैः सह सञ्चरतीव दृश्यते। परमार्थतश्चन्द्रस्य चलनमेव नास्ति। तथैव शरीरसम्बन्धाद् योगी कर्म कुर्वन्निव दृश्यते परंतु न किञ्चित् करोति । अत्रापरो दृष्टान्तः— अत्यधिकवेगेन धावतो यानस्य उभयपार्श्वयोः स्थिता वृक्षा अपि पृष्ठतः धावन्तीव अवभासन्ते, परन्तु तेषां चलनमेव नास्ति । एवं सञ्चलनयुक्तानां सम्बन्धेन स्थावराणामपि सञ्चलनम् अवभासते । एवमेव शरीरयोगेनाऽऽत्मनः कर्तृता केवलम् आरोप्यते, परंत्वात्मनः परमार्थतो नास्ति कर्तृता ॥३२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानी कर्मनिरूढोऽपि लिप्यते न क्रियाफलैः ।
घृतादिना यथा जिह्वा भोक्त्री चापि न लिप्यते ॥३३॥

व्याख्या— कर्म कुर्वन्नपि योगी कर्मफलेन न लिप्यते इत्याह— **ज्ञानी** इति । **कर्मनिरूढः अपि** कर्मणि प्रवृत्तः अपि **ज्ञानी** शिवयोगी **क्रियाफलैः** कर्मफलैः **न लिप्यते** न अज्यते, **यथा** येन प्रकारेण **भोक्त्री चापि** स्वादग्राहिणी चापि **जिह्वा** रसना **घृतादिना** घृतादिना स्निग्धवस्तुना **न लिप्यते** न अज्यते ॥ रसना तु सर्वस्वादग्राहिणी । तथापि तस्या घृतादिभिर्लेपो नास्ति । एवमेव शिवयोगी यत्किमपि कर्म कुर्यात्, कर्मफलेभ्यः स उदास्थितः । कर्मत्यागो मा भूत्, कर्मफलत्यागस्तु भवेत् । इदमेव "कर्मणि कौशलम्" (भ. गी., २.५०) । एवं बुद्धियुक्ता योगिनः कर्मफलं त्यक्त्वा बन्धाद् विनिर्मुक्ताः सन्तः परमपदं प्राप्नुवन्ति । उक्तं च भगवता— "कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥" (भ. गी., २.५१) इति । शिवयोगिनः स्वरूपं भगवता निरूपितम्— "योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥" (भ. गी., ५.७) इति ॥३३॥

निरस्तोपाधिसम्बन्धे जीवे या या क्रियास्थितिः ।
सा सा प्रतीतिमात्रेण निष्फला चात्र लीयते ॥३४॥

व्याख्या— शिवयोगिनः कर्मफललेपो नास्तीति सहेतुकम् आह— **निरस्तेत्यादिना** । **निरस्तोपाधिसम्बन्धे** उपाधेः सम्बन्धः उपाधिसम्बन्धः निरस्तः उपाधिसम्बन्धः यस्मात् सः, तस्मिन्, निरस्ताहङ्कारोपाधि-सम्बन्धे **जीवे** देहिनि सति, **या या क्रियास्थितिः** या या क्रियायाः स्थितिः अस्ति **सा सा** सा क्रियास्थितिः **प्रतीतिमात्रेण** परिज्ञानमात्रेण **निष्फला** फलरहिता सती एव **अत्र** स्वात्मन्येव [च इति पादपूरणः] **लीयते** लयं गच्छति ॥ अहङ्कारोपाधिरूपेणोपलक्षणेन शरीरम्, इन्द्रियाणि, प्राणाः, मनः, बुद्धिश्चेति सर्वे बाह्योपाधयो ग्राह्याः । आत्मनाऽतिरिक्ता

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बाह्योपाधयः सर्वेऽनात्मानः । एते बाह्योपाधय आत्मनि 'अहंममे'ति, कर्ता भोक्ता चेति मिथ्याप्रतीतिम् उत्पादयन्ति । अहङ्कारमूलकौ 'अहं-ममप्रत्ययौ' कर्मफलसम्बन्धस्य कारणभूतौ । शिवयोगी त्वहङ्काराद्युपा-धिनिर्मुक्तः । अतस्तस्य कर्मसम्बन्धः प्रतीतिमात्रम्, न तु यथार्थः । तथैवोक्तं शङ्कराचार्येण — "तत्त्ववित्तु नाहं करोमीति मन्यते न तत्फल-मभिसन्धत्ते" (भ. गी., २.१०, भाष्ये) इति । इदं दग्धरज्जुन्यायेन समर्थ्यते । शिवयोगिनः कर्म दग्धरज्जुवद् अवभासते, परं तु तस्य न कश्चिदपि परिणामोऽस्ति ॥३४॥

गच्छंस्तिष्ठन् स्वपन् वापि न निष्कर्मास्ति कश्चन ।
स्वभावो देहिनां कर्म ज्ञानिनां तत्तु निष्फलम् ॥३५॥

व्याख्या— ज्ञानिनः कर्मफललेपो नास्तीति वक्तव्यम्, न तु कर्मैव नास्तीति, इत्यत्र कारणमाह— **गच्छन्निति** । **गच्छन्** गमनं कुर्वन् **तिष्ठन्** स्थितः सन्, **स्वपन् वा** स्वप्नदशायां सन् वा **न कश्चन निष्कर्मा** न कोऽपि कर्मरहितः । **कर्म देहिनां स्वभावः** कर्म तु देहवतां नैसर्गिकः स्वभावः । **तत्तु** तत् कर्म तु **ज्ञानिनां** प्रबुद्धानां **निष्फलम्** प्रयोजनरहितम् ॥ श्रुतिराह— "कुर्वन्नेव हि कर्माणि जिजीविषेच्छतं समाः" (ईश. उ., २) इति । तथा च प्रोक्तं भगवता— "न हि कश्चित् क्षणमपि जातु तिष्ठत्य-कर्मकृत् ।" (भ.गी., ३.५) इति । एवं कर्मणोऽनिवार्यत्वेऽपि, योगिनः कर्मफलेन न लिप्यन्ते— "न कर्म लिप्यते नरे" (ईश. उ., २) इत्युक्तम् । किमिति चेद् उच्यते— "योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ।" (भ.गी., ५.११) इति, "कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।" (भ.गी., ३.२०) इति च । पूर्वम् आचारसम्पत्तिस्थले (सि.शि., १४.२३), ऐक्यस्थले स्वकीयं सर्वं व्यवहारं शिवपूजान्तर्गतत्वेन मन्यते । अत्र स्थले शिवाभिन्नतया स्थितः शिवयोगी कर्म कुर्वन्नपि कर्मलेपेन न दूष्यते इति प्रतिपादितम् ॥३५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिपूर्णमहानन्दभाविनः शुद्धचेतसः ।
न भवेत् कर्मकार्पण्यं नानाभोगफलप्रदम् ॥३६॥

व्याख्या— कर्मणः शरीरिस्वभावत्वेऽपि योगिनः कर्मलेपो नास्तीति वदन् क्रियानिष्पत्तिस्थलं समापयति— **परिपूर्णेत्यादिना । शुद्धचेतसः** शुद्धं चेतः यस्य सः शुद्धचेताः, तस्य, निर्मलान्तःकरणस्य, **परिपूर्णमहानन्दभाविनः** परिपूर्णस्य महानन्दस्य भावः अस्यास्तीति परिपूर्णमहानन्दभावी, णिनि(इन्)प्रत्ययः, तस्य, अखण्डपरमानन्दानुभवयुक्तस्य शिवयोगिनः **नानाभोगफलप्रदं** नानाविधः भोगः एव फलं, तत् प्रददातीति नानाविधफलप्रदम्, नानाविधानुभवफलदायकं **कर्मकार्पण्यं** कर्मणः कार्पण्यं, कृपणस्य भावः, दैन्यम्, वशीकरणं **न भवेत्** न स्यात् ॥ कर्मभूमौ जीवन्नपि योगी कर्मफलासङ्गनिर्मुक्तः । कर्मनिष्पत्तिस्थलीनः शिवयोगी कर्मकार्पण्येन न पीडितः, पापपुण्ययोः भाररहितत्वात् ॥३६॥

— इति क्रियानिष्पत्तिस्थलम् —

५. अथ भावनिष्पत्तिस्थलम् – (८५)

भावः प्रतीयमानोऽपि परकाये तु कल्पितः ।
शुक्तौ रजतवद् यस्माद्भावनिष्पत्तिमानयम् ॥३७॥

व्याख्या— क्रियानिष्पत्तिवतः शुक्तिरजतन्यायेन भावनिष्पत्तिमाह— **भाव इति । परकाये तु** क्रियानिष्पत्तिसम्पन्ने परात्मशरीरे तावत् **प्रतीयमानः अपि** अभिव्यज्यमानोऽपि **भावः** मनोवृत्तिसमुदायः **यस्मात्** यस्मात् कारणात् **शुक्तिरजतवत्** शुक्तौ रजतवत् **कल्पितः** कल्पनाविषयीभूतः, तस्माद् **अयम्** एष परकाययोगी **भावनिष्पत्तिमान्** भावनिष्पत्तिस्थली भवति ॥ भावनिष्पत्तिर्नाम स्वात्मैव परशिव इत्येवंरूपः स्थिरभावः । शिवस्वरूपत्वेन परयोगी यथा क्रियायुक्तोऽपि क्रियानिष्पत्तिमान् तथैव मनोवृत्तिभिः कैश्चिद् युक्तोऽपि भावनिष्पत्तिमान् । निष्पत्तिर्नाम पर्यवसानं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिपाको वा । क्रियाफलाभावात्तस्य यथा क्रियानिष्पन्नत्वम्, तथा मनोवृत्तीनां स्थिरभावे पर्यवसानात् तस्य भावनिष्पत्तिरिति मन्तव्यम् । तदा कर्म वा भावो वा न कस्यचन साधनं भवति ॥३७॥

भावेन नास्ति सम्बन्धः केवलज्ञानयोगिनः ।
तथापि भावं कुर्वीत शिवे संसारमोचके ॥३८॥

व्याख्या— भावसम्बन्धविरहेऽपि ज्ञानयोगिना परशिवे भावः स्थापनीय इत्याह— **भावेनेति । केवलज्ञानयोगिनः** परिशुद्धशिवज्ञानयोगिनः यद्यपि **भावेन** मनोवृत्तिजातेन **सम्बन्धः** सम्पर्कः **नाऽस्ति** न भवति, **तथापि संसारमोचके** संसारान्मोचयतीति संसारमोचकः, तस्मिन्, संसारान्मुक्तिप्रदायके **शिवे** परशिवे **भावं कुर्वीत** शुद्धमनोवृत्तिं स्थापयेत् ॥ केवलज्ञाने स्थितस्य शिवयोगिनो भावसम्बन्धोऽस्ति वा न वेति शङ्का जायेत । तन्निवारणार्थमिदमुक्तम् — परमार्थतो नास्ति शिवयोगिनो भावेन सम्बन्धः । परं तु यावत्पर्यन्तं स सदेहो वर्तते तावत्पर्यन्तं मनोव्यापारोऽनिवार्य एव । तस्माद् इन्द्रियविषयेभ्यो मनो निवर्तयितव्यम् । तदर्थं मनोवृत्तेः कश्चन स्थिर आश्रयः कल्पयितव्यः । शिव एवाऽऽश्रयस्तादृशः । अत एवोक्तम्— 'तथापि भावं कुर्वीत शिवे संसारमोचके' इति । भावस्त्वत्र "शिवोऽहम्" स्वरूपः शुद्धभावः ॥३८॥

परिपूर्णप्रबोधेऽपि भावं शम्भौ न वर्जयेत् ।
भावो हि निहितस्तस्मिन् भवसागरतारकः ॥३९॥

व्याख्या— परिपूर्णज्ञानिनाऽपि शिवे भावो न वर्जनीय इत्याह— **परिपूर्णेति । परिपूर्णप्रबोधे अपि** परिपूर्णः प्रबोधः परिपूर्णप्रबोधः, तस्मिन्नपि, परिपूर्णे ज्ञाने सत्यपि, शिवयोगी **शम्भौ** शंभावयित्रे परशिवे **भावं** तादात्म्यभावं **न वर्जयेत्** न जह्यात् । किमिति चेदुच्यते— **भावो हीति । तस्मिन्** परशिवे **निहितः** स्थापितो **भावः** तादात्म्यभावः **भवसागरतारकः भवः** संसारः, स एव सागरो भवसागरः, तस्मात्

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तारयतीति भवसागरतारकः [तारकः = तॄ प्लवनतरणयोरिति धातोर्णिजन्तात् "ण्वुल्" (वु = अक) योगेन निष्पन्नः]। हि इति प्रसिद्धौ ॥ परकायशिवयोगी तु ज्ञानानन्दस्वरूपः। एवं तस्य स्वरूपे एव "शिवोऽहम्"—भावो निहितः। अतः परिपूर्णप्रबोधेऽपि तद्भावं नैव शक्यते वर्जयितुम्। तेनैव संसारचक्रनिर्मुक्तो योगी जीवन्मुक्तो भवति ॥३९॥

निवर्त्य जन्मजं दुःखं भावः शैवो निवर्तते।
यथा काष्ठादिकं दग्ध्वा स्वयं शाम्यति पावकः ॥४०॥

व्याख्या— कथं कदा वा भावस्य पर्यवसानमित्यत्राह— **निवर्त्येति**। **जन्मजं दुःखं** जन्मना जातं दुःखम्, संसारदुःखमित्यर्थः, **निवर्त्य** निवार्य **शैवो भावः** शिवसम्बद्धो भावः, शिवे निविष्टा मनोवृत्तिः, **निवर्तते** निवर्तिता भवति; **यथा** येन प्रकारेण **काष्ठादिकं दग्ध्वा** इन्धनादिकं सन्दह्य **पावकः** अग्निः **स्वयं** स्वयमेव **शाम्यति** शान्तो भवति ॥ शैवो भावस्त्वत्र साधनम् संसारदुःखनिवृत्तिः साध्यम्। साध्ये सिद्धे सति साधनस्य प्रयोजनाभावात्स्वयमेव निवर्त्य शिवे विलयं गच्छति। अत्र दृष्टान्तः—पावकः काष्ठादिकं सन्दह्य स्वयमेव शाम्यति। इदमेव भावस्य पर्यवसानम् (भावनिष्पत्तिः)। आगामिनं श्लोकं पश्यत ॥४०॥

प्रकाशिते शिवानन्दे तद्भावैः किं प्रयोजनम्।
सिद्धे साध्ये चिरेणापि साधनैः किं प्रयोजनम् ॥४१॥

व्याख्या— शिवानन्दे प्राप्ते भावैर्नास्ति प्रयोजनमित्याह— **प्रकाशिते** इति। **शिवानन्दे** परशिवस्वरूपभूतानन्दे **प्रकाशिते** साक्षादनुभूते **तद्भावैः** तत्साधनभूतैर्भावैः **किं प्रयोजनम्** किं साध्यभूतं प्रयोजनं भवति ? न किमपि प्रयोजनम् इत्यर्थः। **साध्ये** फलरूपेण साधनीये **चिरेणापि** विलम्बेनापि **सिद्धे** साधिते सति **साधनैः** साधनभूतैः **किं प्रयोजनं** किं फलरूपं प्रयोजनम् ? न किमपि प्रयोजनमित्यर्थः ॥ आत्मनो निजस्वरूपज्ञानाभावः संसारस्य कारणम्। तन्निजस्वरूपज्ञाने, "शिवोऽहं"—

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावज्ञाने, साक्षात्कृते, संसारकारणभूतमज्ञानं निवर्तते। एवं "शिवोऽहं"— भावः संसारामयनिवारकः। तेन सिद्धे साध्ये तत्साधनभूतः शैवो भावः स्वयमेव निवर्तते, अखण्डे शिवज्ञाने विलयं गच्छति च। अज्ञानतिमिर-निवारणपूर्वकं समुज्ज्वलज्ञानप्रकाशे समुदिते सति, "शिवोऽहं"भाव एव निरोधकत्वेन भाव्यते। अतस्तद्भावः शिवज्ञानेनैव निगीर्यते ॥४१॥

एकीकृते शिवे भावे ज्ञानेन सह संयमी।
विस्मितात्मसमावेशः शिवभावे विभासते ॥४२॥

व्याख्या— एवं भावलये जाते योगिनः का स्थितिरित्यत्राह— **एकीकृते इति। शिवे भावे** "शिवोऽहं"— भावे **ज्ञानेन सह** बाह्यमनोवृत्ति-ज्ञानेन समं **एकीकृते** शिवज्ञानैकीभूते सति **संयमी** भावनिष्पत्तिसम्पन्नः शिवयोगी **विस्मितात्मसमावेशः** आत्मनः समावेशः आत्मसमावेशः, विस्मितः आत्मसमावेशः येन सः, तादृशः सन्, आश्चर्यकरस्वरूप-समावेशयुक्तः सन्, **शिवभावे** "शिवोऽहम्" इति शिवभावे **विभासते** प्रकाशते॥ भावस्य ज्ञानस्य च परस्परं सापेक्षता वर्तते। विना भावेन ज्ञानस्योत्पत्तिर्दृढता च न साध्येते। ज्ञानं च "शिवोऽहं"भावस्य रक्षका-वरणम्। भावस्य ज्ञानस्य चैकीभूतत्वमिदं भावनिष्पत्तिरुच्यते ॥४२॥

न भावेन विना ज्ञानं न भावो ज्ञानमन्तरा।
मोक्षाय कारणं प्रोक्तं तस्मादुभयमाश्रयेत् ॥४३॥

व्याख्या— भावज्ञानयोः सापेक्षत्वमाह— **नेति। भावेन विना** भावं वर्जयित्वा **ज्ञानं न** मनोवृत्तिज्ञानं न भवति। **ज्ञानम् अन्तरा** ज्ञानं विना **भावो न** भावो न भवति। इदं भावज्ञानयोः परस्परकारणत्वम्। तदेव **मोक्षाय कारणं** मुक्तिहेतुः इति **प्रोक्तं** कथितम्, **तस्मात्** तत्कारणाद् **उभयम् आश्रयेत्** भावं ज्ञानं चेत्युभयमपि, द्वयमपि, **समाश्रयेत्** सम-वलम्बयेत्॥ "तत् त्वम् असि" (शिवस्त्वमसि) इत्येतादृशगुरूपदेशा-दारभ्य, "शिवोऽहं"भावमुद्रा तु शिवभक्तस्य मनसि स्थिरतया लक्ष्यते।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

संस्कारोऽयं शिवयोगिनि सत्यसाक्षात्कारतां भजते । "शिवोऽहं"भावः साक्षात्कृतज्ञानत्वेन पर्यवस्यति । "शिवोऽहं"भावः "शिवोऽहं"ज्ञानमित्युभयमपि मोक्षस्य कारणमुच्यते । तस्मान्मोक्षार्थं तदुभयमप्याश्रयणीयमित्युक्तम् ॥४३॥

— इति भावनिष्पत्तिस्थलम् —

६. अथ ज्ञाननिष्पत्तिस्थलम् – (८६)

ज्ञानस्य व्यवहारेऽपि ज्ञेयाभावात् स्वभावतः ।
स्वप्नवज्ज्ञाननिष्पत्त्या ज्ञाननिष्पन्न इत्यसौ ॥४४॥

व्याख्या— भावनिष्पन्नयोग्येव ज्ञाननिष्पत्त्या ज्ञाननिष्पत्तिस्थली भवतीत्याह— **ज्ञानस्येति** । **व्यवहारे अपि** विश्वव्यवहारेऽपि **ज्ञानस्य** व्यावहारिकज्ञानस्य **स्वभावतः** स्वभावानुसारेण स्थिरताप्राप्त्या **ज्ञेयाभावात्** ज्ञेयविषयराहित्याद् **असौ** अयं भावनिष्पत्तिमान् योगी **स्वप्नवत्** स्वप्नसदृशं **ज्ञाननिष्पत्त्या** ज्ञानस्य निष्पत्त्या विगलितत्वेन **ज्ञाननिष्पन्नः** ज्ञाननिष्पत्तिमान् इति इत्येवम् उच्यते इति शेषः ॥ यथा स्वप्नावसाने स्वप्नदृश्यानामवसानं भवति तथैव विश्वव्यवहारज्ञानावसाने लौकिकज्ञानस्याऽवसानं जायते । विगलितस्वप्न इव योगी विगलितलोकव्यवहारज्ञानवान् भवति । अत एवैष ज्ञाननिष्पत्तिस्थलीत्युच्यते । शिवयोगी स्वात्मानं शिव इत्येव मनुते । इदं च परमार्थज्ञानम् । जातेऽस्मिन् परमज्ञाने शिवयोगिनो न किञ्चिदवशिष्यते ज्ञातुम् । दैनन्दिनं लौकिकव्यवहारज्ञानं तस्य गतस्वप्नवदकिञ्चनप्रयोजनवदेव ॥ अत एवासौ ज्ञाननिष्पत्तिमान् ॥४४॥

स्वप्नजातं यथा ज्ञानं सह स्वार्थैर्निवर्तते ।
तथात्मनि प्रकाशे तु ज्ञानं ज्ञेयं निवर्तते ॥४५॥

व्याख्या— उक्तमेव विशदयति— **स्वप्नजातमिति** । **यथा** येन प्रकारेण **स्वप्नजातं ज्ञानं** स्वप्नेनोत्पन्नं मिथ्याभूतं ज्ञानं **स्वार्थैः सह** दृश्यभूतैः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वविषयैः समं **निवर्तते** निवृत्तिं प्राप्नोति, **तथा** तेनैव प्रकारेण आत्मनि स्वात्मनि **प्रकाशे तु** स्वस्वरूपज्ञानप्रकाशे तावज्ञाते **ज्ञानं** जागृदवस्थाज्ञानं **ज्ञेयं** ज्ञातव्यं विश्वात्मकविषयं च **निवर्तते** निवृत्तिं प्राप्नोति ॥ यथोक्तं पूर्वमेव स्वप्नावसाने स्वप्नविषयास्तेषां ज्ञानं च निवर्तेते । एवमेव स्वात्मज्ञानप्रकाशे प्रबुद्धस्य शिवयोगिनः कृते सर्वः स्वप्नप्रपञ्चस्तज्ज्ञानं च सममदृश्यतां गच्छतः । स च सर्वं शिवमयत्वेन पश्यति । अतो न कश्चिदन्यः पदार्थस्तज्ज्ञानं वा शक्यते तत्पुरतः स्थातुम् ॥४५॥

परिपूर्णे महानन्दे परमाकाशलक्षणे ।
शिवे विलीनचित्तस्य कुतो ज्ञेयान्तरे कथा ॥४६॥

व्याख्या— परशिवैक्यस्य ज्ञेयमन्यन्नावशिष्यते इत्याह— **परिपूर्णे इति । परिपूर्णे** अखण्डे **महानन्दे** परमानन्दस्वरूपे **परमाकाशलक्षणे** महाकाशस्वरूपे च **शिवे** परशिवे **विलीनचित्तस्य** विलीनं चित्तं यस्य सः विलीनचित्तः, तस्य, **कुतः** कुत्र **ज्ञेयान्तरे** वेद्यान्तरे वेद्यान्तरविषये **कथा** विचारः ? न कुत्रापीत्यर्थः ॥ शुद्धपरमचैतन्यव्यतिरिक्तं शिवयोगिनो नास्ति मनः । तच्च परमचैतन्यम् अखण्डमनन्तमानन्दमयं च । स च योगी परिपूर्णेनाऽनन्तेन निरुपाधिकेन चाऽऽकाशेनाऽभिन्नस्तिष्ठति । तथा स्थिते न तस्य स्वस्वरूपं विना ज्ञेयान्तरं विद्यते ॥४६॥

अखण्डानन्दसंवित्तिस्वरूपं ब्रह्म केवलम् ।
मिथ्या तदन्यदित्येषा स्थितिर्ज्ञानमिहेष्यते ॥४७॥

व्याख्या— ज्ञाननिष्पन्नयोगिनो ज्ञानं कीदृशम् इत्यत्राह— **अखण्डे-त्यादिना । ब्रह्म केवलं** परशिवब्रह्ममात्रम् **अखण्डानन्दनिष्पत्तिस्वरूपम्** अखण्डश्चासौ आनन्दश्च अखण्डानन्दः, तस्य निष्पत्तिः अभिव्यक्तिः, तस्य स्वरूपम् अखण्डानन्दनिष्पत्तिस्वरूपम्, केवलमखण्डानन्दाभिव्यक्तिलक्षणम् । **तदन्यद्** तदितरं तस्माद् ब्रह्मणो व्यतिरिक्तं जगज्जालं **मिथ्या इत्येषा** मिथ्यैवेति भासमानैतादृशी **स्थितिः** स्थितिरेव इह स्थलेऽस्मिन् **ज्ञानम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उच्यते ज्ञानमिति कथ्यते ॥ इदमेव ज्ञाननिष्पत्तिमतः शिवयोगिनो ज्ञान-स्वरूपम् । स च सर्वम् अखण्डपरमानन्दचैतन्यपरशिवब्रह्मस्वरूपत्वेन पश्यति । तद्विना नास्ति किमप्यन्यत् । तथा स्थिते, यदुच्यते सर्वमन्यज्जग-ज्जालमिति तन्मिथ्याप्रायमेवेत्यवगन्तव्यम् । ज्ञानस्य पर्यवसानमिदम् आत्म-साक्षात्कारस्वरूपेण तिष्ठति । एषैव शिवयोगिनः 'पूर्णताप्राप्तिः' ॥४७॥

सत्तात्मनानुवृत्तं यद् घटादिषु परं हि तत् ।
व्यावर्तमाना मिथ्येति स्थितिर्ज्ञानमिहोच्यते ॥४८॥

व्याख्या— प्रकारान्तरेण तस्य ज्ञानलक्षणमाह— **सत्तात्मनेति । यद्** यद्यद् **घटादिषु** घटपटादिवस्तुषु सर्वेषु **सत्तात्मना** सद्रूपेण **अनुवृत्तम्** अनुवर्तमानं **तत्** तत्तत् **परं** परशिवब्रह्म **हि** इति प्रसिद्धम् । ततः परशिवब्रह्मणो **व्यावर्तमाना** व्यतिरिच्यमाना **मिथ्या इति** मिथ्यास्वरूपेति **स्थितिः** स्थितिरेव **इह** अत्र **ज्ञानम् उच्यते** ज्ञानम् इति कथ्यते ॥ अत्र परं नाम परशिवब्रह्म, यच्च परमसद्रूपम् । परमचिता परमानन्देन च तत् सच्चिदानन्दस्वरूपम् । सर्वमेतज्जगति स्वसत्ताप्राप्त्यर्थं तत्सत्तातत्त्वमेवाऽवल-म्बते । जगत्सृष्टेः प्रागेव— "आनीदवातं स्वधया तदेकम्" (ऋ.वे., १०.१२९.२) इत्युक्तदिशा तदेकमेव सत्तत्वेनासीत् । इदमेव सत्तत्वं सत्यं नित्यं च । यत् सद्भिन्नं तदनित्यं मिथ्याकल्पं च । इदमेवास्मिन् स्थले शिवयोगिनो ज्ञानम् । "सदेव सोम्य इदमग्र आसात्" (छां. उ., ६.२.१) इत्युक्तरीत्या सर्वस्य सद्रूपत्वेन ग्राह्यम् । अतोऽत्र जगन्मिथ्यात्ववादस्य गन्धोऽपि नास्ति ॥४८॥

अकारणमकार्यं यदशेषोपाधिवर्जितम् ।
तद्ब्रह्म तदहं चेति निष्ठा ज्ञानमुदीर्यते ॥४९॥

व्याख्या— अत्र ज्ञानस्य स्वरूपान्तरमाह— **अकारणमिति । यद्** यद्वस्तु **अकारणं** न विद्यते कारणं यस्य तत्, **अकार्यं** न कार्यम्, **अशेषो-पाधिवर्जितं** न शेषः अशेषः, अशेषश्चासौ उपाधिश्च अशेषोपाधिः, तेन वर्जितम् अशेषोपाधिवर्जितम्, समग्रोपाधिरहितं च **तत्** तद्वस्तु **ब्रह्म** ब्रह्मैव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तद् अहं च तद्विश्वं अहं च **इति** इत्येवम् अहमिदमिति विद्यमानं सर्वं ब्रह्मेति **निष्ठा** दृढासक्तिरेव **ज्ञानम् उदीर्यते** ज्ञानमिति कथ्यते ॥ अत्र श्वेताश्वतरश्रुतिराह— "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥" (६.८) इति । स्वशक्तिद्वारैव परमात्मा प्रवृत्तिदशायां बहुत्वं भजते निवृत्तिदशायां सर्वं वैविध्यं स्वस्मिन्नेव विलीयैकत्वं च भजते । अत्र शिवयोगी स्वात्मानमेव परशिवं मनुते । तदुक्तम्— "मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥" (बृ.उ., ४.४.१९; कठ.उ., ४.११– प्रथमपादे 'मनसैवेदमाप्तव्यम्' इति पाठान्तरम्) इति । शिवयोगिनः कृते लौकिकनानात्वं नास्ति । अतः स ज्ञाननिष्पत्तिस्थली भवति ॥४९॥

ज्ञाताप्यहं ज्ञेयमिदमिति व्यवहृतिः कुतः ।
अभेदब्रह्मस्वारस्ये निरस्ताखिलवस्तुनि ॥५०॥

व्याख्या— ज्ञाननिष्पत्तिमतो योगिनः स्वातिरिक्तत्रिपुटीव्यवहारो नास्तीत्याह— **ज्ञातापीति** । **निरस्ताखिलवस्तुनि** निरस्तानि अखिलानि वस्तूनि यस्मात् तत् निरस्ताखिलवस्तु, तस्मिन्, सर्ववैषयिकप्रपञ्चनिर्मुक्ते **अभेदब्रह्मस्वारस्ये** ब्रह्मणः स्वारस्यं ब्रह्मस्वारस्यम्, न विद्यते भेदः यस्मिन् तत् अभेदम्, अभेदं ब्रह्मस्वारस्यम् अभेदब्रह्मस्वारस्यम्, तस्मिन्, अद्वैतब्रह्मसामरस्ये सति **ज्ञातापि अहं** ज्ञाता पुनरहम्, **ज्ञेयम् इदं** ज्ञातव्यमेतद् विश्वादि **इति व्यवहृतिः** इति व्यवहारः **कुतः** कस्मात्? न कस्मादपीत्यर्थः ॥५०॥

— इति ज्ञाननिष्पत्तिस्थलम् —

७. अथ पिण्डाकाशस्थलम् – (८७)

यथा पिण्डस्थ आकाशस्तथात्मा पूर्ण उच्यते ।
एतदर्थविवेको यः पिण्डाकाशस्थलं विदुः ॥५१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— ज्ञाननिष्पत्तिसम्पन्नस्य पिण्डाकाशस्थलमाह— **यथेति** । **यथा** येन प्रकारेण **पिण्डस्थः** पिण्डे तिष्ठतीति पिण्डस्थः, शरीरस्थः आकाशः **तथा** तेनैव प्रकारेण **आत्मा** शारीर आत्मा **पूर्णः उच्यते** अखण्ड इत्युच्यते । **यः एतदर्थविवेकः** यद् अस्यार्थस्य विवेचकत्वं तत् **पिण्डाकाशस्थलं विदुः** पिण्डाकाशस्थलम् इति जानन्ति ॥ आकाशस्तु विभुरनन्तश्च । तथापि शरीरस्थो भवति । एवमेवाऽऽत्मा विभुरेकश्च; तथापि शरीरस्थः शरीरी भवति । यदाऽऽश्रयस्य परिमितिरुपेक्ष्यते, तदाऽऽत्मापि विभुरनन्तश्च विश्वात्मन्येकत्वं भजते । तदुक्तम्— "एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥" [अमृत(ब्रह्म) – बिं.उ., १२] इति ॥५१॥

घटोपाधिर्यथाकाशः परिपूर्णः स्वरूपतः ।
तथा पिण्डस्थितो ह्यात्मा परिपूर्णः प्रकाशते ॥५२॥

व्याख्या— पूर्वोक्तमेव विशदयति— **घटोपाधिरिति** । **यथा** येन प्रकारेण **घटोपाधिः आकाशः** घटः उपाधिर्यस्य सः घटोपाधिः आकाशः, घटोपाधियुक्ताकाशः, **स्वरूपतः** स्वस्वरूपवशात् **परिपूर्णः** अखण्डः, **तथा** तेनैव प्रकारेण **पिण्डस्थितः हि आत्मा** शरीरस्थो हि आत्मा, स्वरूपत इत्येव, स्वस्वरूपभूतसच्चिदानन्दस्वरूपवशात्, **परिपूर्णः प्रकाशते** परिपूर्णत्वेन विराजते ॥ पञ्चभूतेषु मध्ये आकाश एव केवलम् आत्मस्वरूपविशदीकरणे दृष्टान्तत्वेन सामञ्जस्यं भजते । यथाऽऽत्मा ह्येको विभुरनन्तश्च, तथैवाऽऽकाशो विभुरेकोऽनन्तश्च । यस्मिन् स्तले शिवयोगी विभुरेकोऽनन्तश्चाऽऽत्मेति जानाति तदेतत्पिण्डाकाशस्थलम् ॥५२॥

अन्तःस्थितं पराकाशं शिवमद्वैतलक्षणम् ।
भावयेद् यः सुमनसा पिण्डाकाशः स उच्यते ॥५३॥

व्याख्या— कः पिण्डाकाश इत्यत्राह— **अन्तःस्थितमिति** । **अन्तःस्थितं** अन्तरङ्गे हृदयाकाशे स्थितं **शिवम् अद्वैतलक्षणं** परशिवब्रह्म अद्वितीयत्व-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वरूपं **पराकाशं** परमाकाशं **यः** यो योगी **सुमनसा** सुष्ठु मनः यस्य सः सुमनाः, तेन, सुचित्तेन, **भावयेत्** ध्यानविषयीकुर्यात् **सः पिण्डाकाशः उच्यते** स योगी पिण्डाकाशाख्य इति कथ्यते ॥ परशिवब्रह्मण एकत्वमद्वितीयत्वं च बह्व्यः श्रुतय उद्घोषयन्ति । तथा हि— (१) "एक एव रुद्रो न द्वितीयाय तस्थुः" (श्वे.उ., ३.२) इति; (२) "एकमेवाऽद्वितीयम्" (छां.उ., ६.२.१) इति; (३) "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" (श्वे.उ., ६.११) इति; (४) "आत्मा वा इदमेक एवाग्र आसीत्" (ऐ.उ., १.१.१) इति; (५) "आत्मैवेदमग्र आसीत्" (बृ.उ., १.४.१) इति; (६) "आत्मैवेदं सर्वम्" (छां.उ., ७.५.२) इति; (७) "ब्रह्मैवेदं सर्वम्" (मुं.उ.,२.२.११) इति च । तच्चान्तरङ्गे हृदयाकाशस्थितपराकाशः । बहिरङ्गदृष्टिः परिमिता, अन्तरङ्गदृष्टिस्तु विभुरनन्तश्च । "शिवमद्वैतं चतुर्थं स आत्मा स विज्ञेयः" (गौड. कां., ७) इत्युक्तदिशा परशिवं स्वात्मत्वेन ध्यायेत् । यो हि शिवयोगी परशिवमन्तरङ्गे निरालम्बमनसा पराकाशत्वेन ध्यायेत्स एव पिण्डाकाशस्वरूपो भवति ॥५३॥

शिवागारमिदं प्रोक्तं शरीरं बोधदीपितम् ।
षट्त्रिंशत्तत्त्वघटितं सुमनः पद्मपीठकम् ॥५४॥

पराकाशस्वरूपेण प्रकाशः परमेश्वरः ।
हृदाकाशगुहालीनो दृश्यतेऽन्तः शरीरिणाम् ॥५५॥

व्याख्या— हृदाकाशे पराकाशध्यानेन परमेश्वर एव प्रकाशत इत्याह युग्मेन— **शिवागारमित्यादिना** । **इदं शरीरं** शरीरमेतत् **षट्त्रिंशत्तत्त्वघटितं** शिवादिभूम्यन्तषट्त्रिंशत्तत्त्वनिर्मितं **सुमनःपद्मपीठकं** सुष्ठु मनः सुमनः, पद्माकारं पीठकं पद्मपीठकम्, सुमनः एव पद्मपीठकं सुमनःपद्मपीठकं यस्य तत्, **बोधदीपितं** ज्ञानदीपेन प्रकाशितं **शिवागारं** शिवालयम् इति **प्रोक्तं** कथितम् ॥ **पराकाशस्वरूपेण** पराकाशात्मकेन **प्रकाशः** प्रकाशते इति प्रकाशः, प्रकाशमानः इत्यर्थः, **परमेश्वरः** महेश्वरः **शरीरिणां** जीवात्मनां **अन्तः** आभ्यन्तरे **हृदाकाशगुहालीनः** हृदयाकाशः एव गुहा;

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्यां विलीनः, हृदयाकाशे निमग्नः, दृश्यते प्रतिभासते ॥ देहस्य देवालयत्वकल्पना त्वागमेषु दृश्यते। तथा हि— "देहः शिवालयः साक्षात् तत्रास्ते परमः शिवः। इति निश्चयसद्भावः पिण्डजं लिङ्गमुच्यते ॥" (वातुल. आ. उल्लेखः — तत्त्वप्रदीपिकायाम्) इति; "देहो देवालयः प्रोक्तो जीवो देवः सदाशिवः" (सू. आ., उ. भा., क्रि. पा., ८.२७) इति च। अयं च देहः शिवादिपृथिव्यन्तषट्त्रिंशत्तत्त्वकलापेन निर्मितः। तानि देवालयस्यास्य स्तम्भा भित्तयश्च भवन्ति। मनस्तत्र देवाय सज्जीकृतं सिंहासनम्। स्वात्मानं परशिवत्वेन साक्षात्कृतो जीवश्च तत्र देवः। स एव हृदयगुहायाम् अङ्गुष्ठमात्रः पुरुषो यस्य वर्णनं श्रुतिषु स्मृतिषु विद्यते। तथा हि— "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति" (कठ. उ., ४.१२) इति; "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः" (कठ. उ., ४.१३) इति; "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" (भ. गी., १८.६१) इति च। यो हि स्वात्मानं "शिवोऽहं"भावेन परामृशति स एव "पिण्डाकाश-स्थली"। स च निर्मुक्तो निर्भयश्च। तदुक्तम्— "अङ्गुष्ठमात्रः पुरुषोऽन्त-रात्मा सदा जनानां हृदये संनिविष्टः। हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥" (श्वे. उ., ३.१३) इति ॥५४-५५॥

एतच्छिवपुरं प्रोक्तं सप्तधातुसमावृतम्।
अत्र हृत्पङ्कजं वेश्म सूक्ष्माम्बरमनोहरम् ॥५६॥

तत्र सन्निहितः साक्षात् सच्चिदानन्दलक्षणः।
नित्यसिद्धः प्रकाशात्मा जलस्थाकाशवच्छिवः ॥५७॥

व्याख्या— पक्षान्तरेणोक्तमेव विशदयति— **एतदित्यादियुग्मेन**। **एतद्** इदं **सप्तधातुसमावृतं** सप्तधातुभिः रसादिभिः **समावृतं** समाच्छादितं शरीरमेव (पिण्डमेव) **शिवपुरं** शिवस्य पुरमिति **प्रोक्तं** कथितम्। **अत्र** अस्मिन् शिवपुरे **सूक्ष्माम्बरमनोहरं** सूक्ष्मम् अम्बरं सूक्ष्माम्बरम् तेन मनोहरं रमणीयं **हृत्पङ्कजं** हृदयकमलं **वेश्म** गृहम् ॥ **तत्र** हृत्कमलरूपे वेश्मनि **सच्चिदानन्दलक्षणः** सच्च चिच्च आनन्दश्च सच्चिदानन्दाः, ते एव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लक्षणं स्वरूपं यस्य सः, तादृशः, **नित्यसिद्धः** नित्यम् अखण्डत्वेन सिद्धः, तादृशः, **प्रकाशात्मा** प्रकाशः आत्मा स्वरूपं यस्य सः, तादृशः, **शिवः** परशिवः **साक्षात्** स्वस्वरूपेण **जलस्थाकाशवत्** (स्वच्छ)जले तिष्ठतीति जलस्थः, जले प्रतिबिम्बरूपेण स्थितः **आकाशवत्** आकाशसदृशं **सन्निहितः** सहैव तिष्ठति ॥ एतदुक्तम्— "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ।" (छां. उ., ८.१.१) इति । शरीरमेवेदं परशिवब्रह्मपुरम्, राजधानीवद्राज्ञः । पुरे तस्मिन् सूक्ष्मं हृदम्बरं तस्य राजभवनं यत्र "ब्रह्मण उपलब्ध्यधिष्ठानम्" (शङ्करः) यत्र च मनोबुद्धीन्द्रियादयः प्रजास्तस्य सेवायां निरताः सन्ति । पुनरेतदुक्तम्— "दह्रं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ॥" (तै. आ., ७.१०) इति । शिवपुरं सप्तधातुसमावृतमित्युक्तम् । तत्र रसासृग्मांसमेधोऽस्थिमज्जाशुक्राणि सप्तधातवः । [रसः = अन्नरसः] ॥५६-५७॥

अन्तराकाशबिम्बस्थमशेषोपाधिवर्जितम् ।
घटाकाश इव च्छिन्नं भावयेच्चिन्मयं शिवम् ॥५८॥

व्याख्या— अपरिच्छिन्नोऽपि परमशिवः कथं परिच्छिन्न इत्युक्त्वा पिण्डाकाशस्थलं समापयति— **अन्तरिति** । **अन्तराकाशबिम्बस्थम्** अन्तर् आकाशः हृदयाकाशः, बिम्बे तिष्ठतीति बिम्बस्थम्, अन्तराकाशस्य बिम्बस्थम् अन्तराकाशबिम्बस्थम्, अन्तराकाशस्थाने स्थितम्, **अशेषोपाधिवर्जितम्** न शेषः अशेषः, समस्तः, अशेषः उपाधिः, समस्तोपाधिः, तेन वर्जितं रहितम्, **चिन्मयं शिवं** चिद्रूपं परशिवं **घटाकाशः इव** घटोपाधिकाकाशवत् **छिन्नं** विभक्तं **भावयेत्** विभावयेत् ॥ पिण्डाकाशस्थली शिवयोगी परशिवं घटाकाशवद् भावयन् स्वात्मानं तेन तन्मयीभावमनुभवति ॥५८॥

— इति पिण्डाकाशस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

८. अथ बिन्द्वाकाशस्थलम् – (८८)

यथाकाशो विभुर्ज्ञेयः सर्वप्राण्युपरि स्थितः ।
तथात्मेत्युपमानार्थं बिन्द्वाकाशस्थलं विदुः ॥५९॥

व्याख्या— पिण्डाकाशस्थलसम्पन्नस्य सुलभतया प्राप्यं बिन्द्वाकाशस्थलमाह— **यथेति** । **यथा** येन प्रकारेण **सर्वप्राण्युपरि स्थितः** सर्वप्राणीनां सकलजीवानाम् उपरि स्थितः उपरि वर्तमानः **आकाशः** नभः **विभुः ज्ञेयः** सर्वव्यापीति ज्ञातुं योग्यः, **तथा** तेन प्रकारेणैव **आत्मा** स्वात्मा सर्वजीवोपरि वर्तमानः सन् सर्वव्यापी इति ज्ञातुं योग्यः, **इत्युपमानार्थम्** इति सादृश्यपरिगणनार्थं **बिन्द्वाकाशस्थलम् विदुः** बिन्द्वाकाशस्थलम् इति मन्यन्ते ॥ सर्वव्यापकः निराकारश्चाऽऽकाशो घटे आश्रयमाकारं च प्राप्यते। एवमेव सर्वव्यापकः निराकारश्चाऽऽत्मा शरीरे मृग्यते साकारत्वं च भजते। सर्वव्यापकोऽप्याकाशो घटे बिन्दुरूपेण दृश्यते । एवमेवाऽऽत्मा सर्वव्यापकोऽपि हृदयगुहायाम् अङ्गुष्ठमात्रः पुरुषो भवति । "अङ्गुष्ठमात्रपुरुषः" इति श्रुतिस्मृतिप्रसिद्धम् ॥ तथा हि — (पश्यत — कठ. उ., ४.१२.१३; श्वे. उ., ३.१३; भ. गी., १८.६१) ॥५९॥

यथैको वायुराख्यातः सर्वप्राणिगतो विभुः ।
तथात्मा व्यापकः साक्षात् सर्वप्राणिगतः स्वयम् ॥६०॥

यथा वह्निरमेयात्मा सर्वत्रैकोऽपि भासते ।
तथा शम्भुः समस्तात्मा परिच्छेदविवर्जितः ॥६१॥

सर्वेषां देहिनामन्तश्चित्ततोयं प्रकाशते ।
तस्मिन् प्रतिफलत्यात्मा शिवो दर्पणवद्विभुः ॥६२॥

एकोऽवशीकृतः संवित्प्रकाशात्मा परात्परः ।
सर्वप्राणिगतो भाति तथापि विभुरुच्यते ॥६३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या— एकोऽपि सर्वभूतान्तरात्मेति स्वात्मस्वरूपं कालापकेन सदृष्टान्तं समर्थयति— **यथेत्यादिना** । **यथा** येन प्रकारेण **एकः वायुः** एक एव वायुः **सर्वप्राणिगतः** सकलजीवानामन्तर्वर्ती सन् **विभुः** सर्वव्यापकः इति **आख्यातः** कथितः, **तथा** तेन प्रकारेणैव **आत्मा** स्वात्मा **स्वयं सर्वप्राणिगतः** स्वयमेव सकलजीवान्तर्गतः सन् **साक्षात्** स्वस्वरूपेण **व्यापकः** सर्वव्यापकः ॥ **यथा** येन प्रकारेण **अमेयात्मा** अपरिमितस्वरूपः **वह्निः** अग्निः **एकः अपि** एकैव पुनः **सर्वत्र भासते** सर्वत्र प्रकाशते, सर्वव्यापको दृश्यते इत्यर्थः, **तथा** तेनैव प्रकारेण **शम्भुः** शंभावयिता शङ्करः **समस्तात्मा** समस्तानाम् आत्मा भूत्वा **परिच्छेदविवर्जितः** विभागरहितः अस्ति ॥ **सर्वेषां** सकलानाम् **अन्तः** आभ्यन्तरे **चित्ततोयं** चित्तं हृदयम्, तोयं च कमलम्, चित्ततोयं हृदयकमलं, "चित्तं तु चेतो हृदयं कमलं सलिलं जलम्" (अभि.को.–उल्लेखः–त.प्र.) **दर्पणवत् प्रकाशते** आदर्शवद् दृश्यते । **तस्मिन्** तस्मिन् दर्पणवद्दृश्यमाने हृदयकमले **विभुः शिवः** सर्वव्यापकः शङ्करः **आत्मा** स्वात्मा सन् **प्रतिफलति** प्रतिबिम्बरूपेण प्रकाशते ॥ **अवशीकृतः** न वशीकृतः, स्वतन्त्रः, **परात्परः** उत्कृष्टादुत्कृष्टतरः **संवित्प्रकाशात्मा** चित्प्रकाशस्वरूपः **एकः** एकः एव परशिवः **सर्वप्राणिगतः भाति** सकलप्राणिषु अन्तर्यामित्वेन प्रकाशते, **तथाऽपि** तथा सन्नपि **विभुः उच्यते** सर्वव्यापकः इति कथ्यते ॥ कठश्रुतौ वायुदृष्टान्तो दत्तः, यथा "वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥" (कठ. उ., १.१६) इति । अग्निदृष्टान्तोऽपि तत्रैव दत्तः, यथा— "अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥" (कठ.उ., ५.९) इति । सर्वव्यापी चात्मा क्षीरदृष्टान्तेनापि वर्ण्यते, यथा— "सर्वव्यापिनमात्मनं क्षीरे सर्पिरिवार्पितम् ॥" (श्वे. उ., १.१६) इति । अत्र विचार्यमाणं विषयं श्वेताश्वरश्रुतिः संक्षिपति, यथा— "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" (६.११) इति । ये एतद्रहस्यं जानन्ति ते एव परमं सुखं प्राप्नुवन्ति, इतरे तु न । एतदुक्तम्— "एको वशी सर्वभूतान्तरात्मा एकं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥" (कठ. उ., ५.१२) इति, "एको वशी निष्क्रियाणां बहूनामेकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरस्तेषां सुखं शाश्वतं नेतरेषाम् ॥" (श्वे. उ., ६.१२) इति च ॥६०-६३॥

एक एव यथा सूर्यस्तेजसा भाति सर्वगः ।
तथात्मा शक्तिभेदेन शिवः सर्वगतो भवेत् ॥६४॥

व्याख्या— पूर्वोक्तमेव सूर्यदृष्टान्तेन विशदीकृत्य बिन्द्वाकाशस्थलं समापयति— **एक इति । यथा** येन प्रकारेण **एक एव** भेदरहितत्वेन एक एव **सूर्यः** आदित्यः **तेजसा** स्वप्रकाशेन **सर्वगः** सर्वव्यापकः सन् **भाति** प्रकाशते, **तथा** तेनैव प्रकारेण **आत्मा शिवः** स्वात्मभूतः परशिवः **शक्तिभेदेन** स्वीयेच्छाज्ञानादिशक्तिभेदेन **सर्वगतः भवेत्** सर्वव्यापकः स्यात् ॥ यथाऽद्वितीयः सूर्यः स्वकीयेन वृष्टिहिमोष्णकालीनतेजोवैविध्येन सर्वव्यापको भूत्वा प्रकाशते, तथा जीवात्मभूतः परशिवः स्वकीयेनेच्छाज्ञानादिशक्तिवैविध्येन सर्वव्यापको भूत्वा प्रकाशते । अत्र कठश्रुतेः— "सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥" (५.११) इत्यस्य मन्त्रस्य विचारः प्रतिध्वन्यते । यद्यपि सूर्यस्य प्रकाशेन सर्वं वस्तु विभाति, तथापि बाह्यविषयाणां दोषैर्न दूष्यते । तथैव लोकातीत आत्मा सर्वशरीरिषु निवसन्नपि लोकदुःखैर्न लिप्यते । लोकदुःखैर्वैविध्यैश्च विदूरः शिवयोगी स्वात्मनि सर्वव्यापिनं परशिवं दर्पणे हस्तिनमिव पश्यति बिन्द्वाकाशस्थलिनः स्थितिमनुभवति च । बिन्द्वाकाशस्थलिनः स्वरूपमाह भगवती श्रुतिः— "यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः ।" (मुं. उ., २.२.७) इति । इयमेव बिन्द्वाकाशस्थलीया स्थितिः ॥६४॥

— इति बिन्द्वाकाशस्थलम् —

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

९. अथ महाकाशस्थलम् – (८९)

पिण्डाण्डस्थं महाकाशं न भिन्नं तद्वदात्मनः ।
अभिन्नः परमात्मेति महाकाशस्थलं विदुः ॥६५॥

यथा न भिन्नमाकाशं घटेषु च मठेषु च ।
तथाऽण्डेषु पिण्डेषु स्थितो ह्यात्मा न भिद्यते ॥६६॥

व्याख्या— बिन्द्वाकाशस्थलसम्पन्नस्य सुलभप्राप्यं महाकाशस्थलम् आह— **पिण्डाण्डस्थमित्यादिना युग्मेन । पिण्डाण्डस्थं** पिण्डस्थं शरीरगतं अण्डस्थं ब्रह्माण्डगतं च **महाकाशं** परमाकाशं **न भिन्नम्** अभिन्नं **तद्वत्** तत्सदृशम् **आत्मनः** स्वात्मनः **अभिन्नः** न भिन्नः **परमात्मा इति** परशिव इति **महाकाशस्थलं** महाकाशाख्यं स्थलमिति **विदुः** जानन्ति ॥ **यथा** येन प्रकारेण **घटेषु च मठेषु च** घटेषु स्थितं मठेषु च स्थितम् आकाशं न भिन्नम् अभिन्नम्, **तथा** तेनैव प्रकारेण **अण्डेषु** ब्रह्माण्डेषु **पिण्डेषु** शरीरेषु च **स्थितः** विद्यमानः **आत्मा** सर्वात्मभूतः परमात्मा **न भिद्यते** अभिन्नत्वेन तिष्ठति ॥ लोकसिद्धे प्रयोगे घटाकाशो मठाकाशश्च पृथक्तया गृह्येते । द्वावपि महाकाशस्य प्रकारौ । तयोर्भेदस्तु केवलमौपाधिकः । परमार्थतो नास्ति तयोर्भेदः । पिण्डाकाशस्त्वात्मा परमात्मा च महाकाशः । अनेनात्म-परमात्मनोरभेदो विशदीकृतः । तदुक्तम्— "आकाशो वै नाम नामरूप-योर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा ।" (छां.उ., ८.१४.१) इति । देवीकालोत्तरे चोक्तम्— "व्योमाकारं महासूक्ष्मं व्यापकं यो न भावयेत् । संसारी स भवेल्लोके बीजकोशक्रिमिर्यथा ॥" (देवी. आ., २४) इति ॥६५-६६॥

अनिर्देश्यमनौपम्यमवाङ्मानसगोचरम् ।
सर्वतोमुखसम्पन्नं सत्तानन्दं चिदात्मकम् ॥६७॥

कालातीतं कलातीतं क्रमयोगादिवर्जितम् ।
स्वानुभूतिप्रमाणस्थं ज्योतिषामुदयस्थलम् ॥६८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवाख्यं परमं ब्रह्म परमाकाशलक्षणम् ।
लिङ्गमित्युच्यते सद्भिर्यद्विना न जगत्स्थितिः ॥६९॥

व्याख्या— महाकाशमेव महालिङ्गमित्याह— **अनिर्देश्यमित्यादिना विशेषकेन । परमाकाशलक्षणम्** परमाकाशम् महाकाशम् एव लक्षणं स्वरूपं यस्य तत्, महाकाशस्वरूपं **शिवाख्यं** शिवाभिधानं **परमं ब्रह्म** परं ब्रह्म **लिङ्गम् इति** महालिङ्गम् इति **सद्भिः** सज्जनैः वेदान्तनिष्णातैः **उच्यते** कथ्यते, **यद्विना** येन महालिङ्गेन विना **न जगत्स्थितिः** न जगतः, विश्वस्य, अस्तित्वम् । कीदृशं शिवाख्यम्? — **अनिर्देश्यम्** । इदमिति निर्देष्टुम् अशक्यम् । कठश्रुताविदं सम्यग् विशदीकृतम्, तथा हि— "अशब्द-मस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।" (कठ. उ., ३.१५) इति । पुनः कीदृशम् ? **अनौपम्यम्** न विद्यते औपम्यं येन तत्, असदृशम्, उपमातीतम् । समानयोरेव सादृश्यविचार उपपद्यते । विना साधारणधर्मं कथं वा सम्भवेदौपम्यचिन्तनम् । "न तत्समोऽभ्यधिकश्च" (श्वे. उ., ६.८) इत्याह श्रुतिः । पुनः कीदृशम् ? **अवाङ्मानसगोचरम्** । वाक् च मानसं च वाङ्मानसे, तयोर्गोचरं वाङ्मानसगोचरम्, न वाङ्मानसगोचरं अवाङ्मानसगोचरम्, वागतीतं मानसातीतं च । तदाह श्रुतिः— "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥" (कठ. उ., ६.९) इति, "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥" (कठ. उ., ६.१२) इति, "हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ।" (श्वे. उ., ३.१३) इति, "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति ॥" (श्वे. उ., ४.२०) इति च । एताः श्रुतय आत्मनः सर्वेन्द्रियविदूरत्वं मनोग्राह्यत्वं च सम्यक् समर्थयन्ति । गुर्वनुग्रहेण गुरूपदेशमार्गदर्शनाभ्यां चैव केवलं हृदिस्थं परशिवब्रह्म मनसा प्राप्तुं शक्यते, नाऽन्यथा नाप्यन्यत्र । पुनः कीदृशम् ? **सर्वतोमुखसम्पन्नम्** । मुखैः सम्पन्नं मुखसम्पन्नम्, सर्वतः मुखसम्पन्नं सर्वतोमुखसम्पन्नम्, सर्वासु दिशासु

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मुखैर्युक्तम् । तदुक्तम्— "ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥" (मुं. उ., २.२.११) इति, "सर्वा दिशः ऊर्ध्वमधश्च तिर्यक् प्रकाशयन् भ्राजते यद्वनड्वान् ।" (श्वे. उ., ५.४) इति च । [अनड्वान् = आदित्यः]। पुनः कीदृशम् ? **सत्तानन्दं चिदात्मकम्** सच्चिदानन्दस्वरूपम् । भूतवर्तमानभविष्यदिति त्रिषु कालेषु यन्न क्षयं गच्छति तत्सत्, यतः सर्वं सत्तां विन्दति । तदेवोक्तम्— "सन्मूलाः सोम्येमाः सर्वाः प्रजाः" (छां. उ., ६.८.४) इति । परशिवब्रह्माऽपरिमितानन्दस्वरूपम्— "आनन्दो ब्रह्मेति व्यजानात्" (तै. उ., ३.६) इति श्रुतेः । सर्वाणि भूतानि तत एव कञ्चिदानन्दांशं प्राप्नुवन्ति । अत्र श्रुतिराह— "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।" (बृ. उ., ४.३.३२) इति । चिदिति चैतन्यप्रकाशो यो हि स्वयंव्यक्तः येन च सर्वं विभाति— "तस्य भासा सर्वमिदं विभाति" (कठ. उ., ५.१५) इति श्रुतेः । "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ., २.१) इति, "विज्ञानमानन्दं ब्रह्म" (बृ.उ., ३.९.२८) इति च । श्रुतिद्वयमिदं परशिवब्रह्मणः स्वरूपपरम् । पुनः कीदृशम् ? **कालातीतम्** कालांशैर्न परिमितम् । तदेव कालस्याधिष्ठानम् । कालोऽपि सर्ववत् ततो निर्गतं तत्रैव स्थित्वा तस्मिन्नेव लयं गच्छति । आद्यन्तरहितं तद्ब्रह्मेति प्रसिद्धम् । "कालोऽस्मि लोकक्षयकृत्" इति भगवदुक्तिः (भ. गी., ११.३२)। परशिवब्रह्मैव सर्वसमर्थः कालः । पुनः कीदृशम् ? **कलातीतम्** अष्टा-त्रिंशत्कलातीतम् । सद्योजातवामदेवाघोरतत्पुरुषेशानाख्यानि परशिवब्रह्मणः पञ्चमुखानि कलाब्रह्माणीति तत्त्वस्वरूपाणि प्रसिद्धानि । तेषां स्तोत्रपराणि पञ्चब्रह्ममन्त्रा आहत्याऽष्टात्रिंशत्कलाघटिता भवन्ति । तदुक्तम्— "ईशानः पुरुषश्चैवमघोरो वामदेवकः । सद्योजातश्च पञ्चैते कलाब्रह्म प्रकीर्तिताः । ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः । अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश । सद्यस्याष्टकला ज्ञेया अष्टात्रिंशत्कलाः स्मृताः ॥" (वा.शु.आ., ब्रह्मभेदपटलः, १९-२१) इति । [**ईशानस्य पञ्चकलाः** — १. ईशानः सर्वविद्यानाम्, २. ईश्वरः सर्वभूतानाम्, ३. ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा, ४. शिवो मे अस्तु, ५. सदाशिवोम् ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तत्पुरुषस्य चतुष्कलाः — १. तत्पुरुषाय विद्महे, २. महादेवाय धीमहि तन्नो, ३. रुद्रः, ४. प्रचोदयात् । **अघोरस्याष्टौ कलाः** — १. अघोरेभ्यः, २. अथ घोरेभ्यः, ३. घोर घोर, ४. तरेभ्यः, ५. सर्वेभ्यः, ६. सर्व, ७. शर्वेभ्यः नमस्ते अस्तु, ८. रुद्ररूपेभ्यः । **वामदेवस्य त्रयोदशकलाः** — १. वामदेवाय, २. ज्येष्ठाय, ३. रुद्राय, ४. कालाय, ५. कल, ६. विकरणाय, ७. बल, ८. विकरणाय, ९. बलाय, १०. बलप्रमथनाय, ११. सर्वभूतदमनाय, १२. मन, १३. उन्मनाय । **सद्योजातस्याष्टौ कलाः** — १. सद्योजातं प्रपद्यामि, २. सद्योजाताय वै नमः, ३. भवे, ४. भवे, ५. नातिभवे, ६. भवस्व मां, ७. भवो, ८. उद्भवाय । आहत्य (५.४.८.१३.८ = अष्टात्रिंशत् कलाः) । पुनः कीदृशम् ? **क्रमयोगादिवर्जितम्** । क्रमयोगो नाम जन्मनः प्रभृति विकृतीरनुभूयानन्तरमन्ते नाशाभिगमनम् । आद्यन्तरहितस्य परशिवब्रह्मणो नास्त्येव क्रमयोगः । पुनः कीदृशम् ? **स्वानुभूतिप्रमाणस्थम्** । स्वानुभूतिप्रमाणस्थितम्, स्वानुभवमात्रप्रमाणवेद्यम्, इन्द्रियवाङ्मानसगोचरत्वाभावात् । श्रुतिराह— "तदेतद्ब्रह्म, अपूर्वमनपरमनन्तरमबाह्यम्, अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्" (बृ.उ., २.५.१९) इति । पुनः कीदृशम् ? **ज्योतिषामुदयस्थलम्** । सर्वस्य ज्योतिर्गणस्य जन्मस्थानम् । परशिवब्रह्मैव सर्वेषां सूर्यचन्द्रतारकादीनां ज्योतिषां प्रकाशस्य मूलम् । उक्तं च – "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥" (कठ. उ., ५.१५; मुं. उ., २.२.१०) इति । उक्तं तथा भगवता – "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥" (भ.गी.,१५.१२) इति । तदेव परशिवब्रह्म परमाकाशस्वरूपम्, महालिङ्गमिति तन्नामान्तरम् ॥६७-६९॥

परमाकाशमव्यक्तं प्रबोधानन्दलक्षणम् ।
लिङ्गं ज्योतिर्मयं प्राहुर्लीयन्ते यत्र योगिनः ॥७०॥

संविदेव परा काष्ठा परमानन्दरूपिणी ।
तामाहुः परमाकाशं मुनयो मुक्तसंशयाः ॥७१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – उक्तमेव विषयं युग्मेन विशदयति – **परमाकाशेति**। **यत्र** यस्मिन् **योगिनः** शिवयोगिनः **लीयन्ते** लयं गच्छन्ति, तत् **अव्यक्तं** न व्यक्तम् अव्यक्तम् **प्रबोधानन्दलक्षणं** प्रबोधः ज्ञानम्, प्रबोधश्च आनन्दश्च प्रबोधानन्दौ, तौ लक्षणं यस्य तत्, ज्ञानानन्दस्वरूपं, सच्चिदानन्दस्वरूपम् **ज्योतिर्मयं** प्राचुर्येण ज्योतिःस्वरूपम् **लिङ्गम्** इति महालिङ्गम् इति आहुः ब्रुवन्ति ॥ **परमानन्दरूपिणी** परमश्चासौ आनन्दश्च परमानन्दः, तस्य स्वरूपमिव स्वरूपं यस्याः सा, परमसुखस्वरूपिणी **संविद्** संविद् एव दैवी प्रज्ञा एव **परा काष्ठा** परमोत्कृष्टा। **तां** तां परमसुखरूपिणीं संविदं **मुक्त-संशयाः** मुक्तः संशयः येभ्यः ते, विगतसन्देहाः **मुनयः** वसिष्ठादिमुनिजनाः **परमाकाशं** महाकाशम् इति आहुः ब्रुवन्ति ॥ अव्यक्तं नाम यन्नेन्द्रिय-वाङ्मानसगोचरं तत्। ये लोके सन्ति पदार्थास्ते सर्वे व्यक्ताः सन्तः परिमितस्वरूपं भजन्ते। परशिवब्रह्म तु सर्वाधिष्ठानभूतम् अपरिमित-स्वरूपं च। अखण्डत्वादेकत्वाच्च तदव्यक्तम्। इन्द्रियमनोबुद्धिभिस्तन्न ग्राह्यम्। अन्तरात्मन्येव तत्साक्षात्क्रियते। यद्बाह्ये ज्ञायते बाह्येन्द्रियैर्गृह्यते च तत्परिमितस्वरूपम्। यदव्यक्तम् अन्तःप्रज्ञया ग्राह्यं तदनन्तम्। अतोऽव्यक्तमन्तःप्रज्ञया ग्राह्यं च परशिवब्रह्माऽनन्दमेव। तच्च प्रज्ञानानन्द-स्वरूपम्। तदुक्तम् – "प्रज्ञानं ब्रह्म" (ऐ. उ., ५.३) इति, "विज्ञान-मानन्दं ब्रह्म" (बृ. उ., ३.९.२८) इति च। तदेव वीरशैवपरिभाषायां महालिङ्गमित्युच्यते। तस्मिन्नेव परशिवब्रह्मात्मके महालिङ्गे महायोगी विलयं गच्छति। परमानन्दलक्षणं प्रज्ञानमेव सर्वोत्कृष्टम्। तदेव परम-ज्ञानिभिर्मुनिभिर्महाकाशमिति प्रोच्यते ॥७०-७१॥

तरङ्गादि यथा सिन्धोः स्वरूपान्नातिरिच्यते।
तथा शिवाच्चिदाकाशाद् विश्वमेतन्न भिद्यते ॥७२॥

व्याख्या – चिद्रूपपरशिवाज्जगदिदं न भिद्यते इति सदृष्टान्तमाह – **तरङ्गादीति**। **यथा** येन प्रकारेण **तरङ्गादि** तरङ्गादिजातं **सिन्धोः स्वरूपात्** समुद्रस्य लक्षणात् **नाऽतिरिच्यते** नाऽतिभिद्यते, **तथा** तेनैव प्रकारेण

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चिदाकाशात् चिद्रूपाकाशस्वरूपात् **शिवात्** परशिवाद् **एतद्विश्वम्** इदं जगत् **न भिद्यते** नाऽतिरिच्यते ॥ समुद्रस्य तरङ्गोच्चलनं दर्शनीयमिति प्रशंसन्ति जना लोके । अत्र समुद्रस्येति षष्ठीप्रयोगेन समुद्रोऽन्यस्त-रङ्गादि चान्यदिति भेदः स्फुरति । परमार्थे तु तरङ्गादि समुद्रादभिन्नमेव । प्रवातवेगवशादुद्भूतास्तरङ्गादय उच्चलन्ति, प्रवातदौर्बल्ये अधश्चरन्ति च । एवं तरङ्गादयः समुद्रादभिन्नाः । अयमेव समुद्रतरङ्गन्यायः । एतन्न्यायानु-सारं परमात्मन उत्पन्नं विश्वं परमात्मनोऽभिन्नमेव । परमात्मैव विश्व-रूपेणाऽभिव्यनक्ति इत्यर्थः ॥७२॥

यथा पुष्पपलाशादि वृक्षरूपान्न भिद्यते ।
तथा शिवात् पराकाशाज्जगतो नास्ति भिन्नता ॥७३॥

व्याख्या – पुनर्दृष्टान्तान्तरमाह – **यथेति** । **यथा** येन प्रकारेण **पुष्पपलाशादि** पुष्पपर्णादि **वृक्षरूपात्** तरुस्वरूपात् **न भिद्यते** न भेदेन तिष्ठति **तथा** तेनैव प्रकारेण **पराकाशात्** परमाकाशस्वरूपात् **शिवात्** परशिवात् **जगतः** विश्वजातस्य **भिन्नता** भेदः **नास्ति** न भवति ॥ शिवो विश्वान्न भिद्यते इति पूर्वस्मिन् श्लोके सागरतरङ्गन्यायेन कृतं समर्थनम् । इममेव विषयं पुनर्दृष्टान्तान्तरेणात्र समर्थयति । तथा हि – मूलम्, काण्डः, शाखाः, पलाशाः, पुष्पाणि, फलानि च वृक्षस्याङ्गानि सर्वाण्येतानि भवन्त्याहत्य वृक्षः । अतस्तानि वृक्षादभिन्नानीत्येव सत्यम् । तथैव यानि पञ्चभूतानि दृश्यन्ते, तेषां च कार्याण्यपि दृश्यन्ते तानि परमात्म-नोऽभिन्नानि । परमात्मा तावदेतेषां स्वरूपं धारयति । अस्मान्महाकाशा-च्छिवादभिन्नं खल्विदं विश्वम् ॥७३॥

यथा ज्योतींषि भासन्ते भूताकाशे पृथक्पृथक् ।
तथा भान्ति पराकाशे ब्रह्माण्डानि विशेषतः ॥७४॥

व्याख्या– चिदाकाशभूते परमात्मनि कथं जगत् प्रकाशते इत्य-त्राह– **यथेति** । **यथा** येन प्रकारेण **भूताकाशे** पञ्चभूतेष्वेकतमे आकाशे

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्योतींषि ज्योतिर्बिम्बाः **पृथक् पृथक्** प्रत्येकतया **भासन्ते** विराजन्ते, **तथा** तेनैव प्रकारेण **पराकाशे** परशिवब्रह्मभूते परमाकाशे ब्रह्माण्डानि जगन्त्यनेकानि **विशेषेण** विशेषतया **भान्ति** प्रकाशन्ते ॥ 'ज्योतींषि' इत्यनेन नक्षत्राणि गृह्यन्ते इति मरितोण्टदार्यः । चन्द्रादयोऽपि ग्राह्याः । यथा निरवयवे भूताकाशे ज्योतिषां बिम्बाः प्रकाशन्ते तथा निरवयवे महाकाशेऽपि जगन्ति विराजन्ते । निरवयवत्वेऽपि जगतामाश्रयत्वं परमात्मन इत्यवगन्तव्यम् ॥७४॥

निरस्तोपाधिसम्बन्धं निर्मलं संविदात्मकम् ।
पराकाशं जगच्चित्रविलासालम्बभित्तिकम् ॥७५॥

व्याख्या – तमेव महाकाशजगद्विकल्पानां सम्बन्धं संसूच्य महाकाशस्थलं समापयति – **निरस्तेति** । **निरस्तोपाधिसम्बन्धं** निरस्तः उपाधीनां सम्बन्धः यस्मात् तत् निरस्तोपाधिसम्बन्धम्, बाह्योपाधिसम्बन्धरहितम्, **निर्मलम्** निर्गतं मलं यस्मात्तत्, मलसम्बन्धरहितम् **संविदात्मकं** शुद्धचैतन्यस्वरूपम्, **पराकाशं** परब्रह्मस्वरूपं परमाकाशं **जगच्चित्रविलासालम्बभित्तिकम्** जगतां चित्रं जगच्चित्रम्, तस्य विलासः वैभवम्, तस्याऽऽलम्बभित्तिकं तदुल्लेखनकुड्यम् भवति ॥ (पश्यत – सि.शि., १.१) ॥७५॥

– इति महाकाशस्थलम् –

१०. अथ क्रियाप्रकाशस्थलम् – (९०)

शिवस्य परिपूर्णस्य चिदाकाशस्वरूपिणः ।
आत्मत्वेनानुसन्धानात् क्रियाद्योतनवान् यमी ॥७६॥

व्याख्या – महाकाशस्थलसम्पन्नस्य शिवयोगिनः क्रियाप्रकाशस्थलमाह – **शिवस्येति** । **चिदाकाशस्वरूपिणः** चिदाकाशः चिद्रूपाकाशः, तस्य स्वरूपमस्यास्तीति चिदाकाशस्वरूपी, तस्य **परिपूर्णस्य** अखण्डस्य **शिवस्य**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परशिवस्य **आत्मत्वेन अनुसन्धानात** स्वात्मत्वेन निदिध्यासनात् **यमी** संयमी, शिवयोगी **क्रियाद्योतनवान्** क्रियाप्रकाशवान्, भवतीति शेषः ॥ अत्र श्रुतिराह – "क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः" (मुं. उ., ३.२.१०) इति । शिवयोगिनोऽस्मिन् स्थले क्रिया नाम परशिवस्य स्वात्मत्वेनानुसन्धानम् । अनुसन्धानं पुनः लोलीभावः, ऐक्यानुभवश्च । शिवयोगिनस्तु स्वात्मानुसन्धानमेव परशिवानुसन्धानम् । स्वात्मपरमात्मनोरैक्यभावः शिवयोगिनोऽन्तश्चक्षुषि स्फुरति प्रदीपवत् । शिवयोगी तु शिव-जीवानुसन्धानस्य विग्रहवान् प्रतीकः । आकाशदृष्टान्तस्तावत् स्वात्मनः परिपूर्णताद्योतनाय दत्तः । तथा चेदपि दृष्टान्तभूतस्याऽऽकाशस्य जडत्वात् स्वात्मनोऽपि जडत्वमङ्गीकार्यमित्याक्षेप्तुं न शक्यते, आद्यन्तरहितस्य परमकारणभूतस्य परशिवाभिन्नस्य च स्वात्मनां भौतिकाशादतीतत्वात् । कर्तृ-कारण-कार्यं, भोक्तृ-भोग्य-भोगं, प्रमातृ-प्रमेय-प्रमाणं चेति त्रिविध-त्रिपुटीसम्बन्धैरपरामृष्टस्याऽपि शिवयोगिनः स्वस्वरूपानुसन्धानरूपक्रिया एवाऽव-शिष्यते । इदमेव क्रियाप्रकाशस्थलम् ॥७६॥

निष्कलङ्कचिदानन्दगगनोपमरूपिणः ।
शिवस्य परिपूर्णस्य वृत्तिश्चैतन्यरूपिणी ॥७७॥

व्याख्या – पूर्वोक्तानुसन्धानक्रियामेव विशेषयति – **निष्कलङ्केति** । **निष्कलङ्कचिदानन्दगगनोपमरूपिणः** निष्कलङ्कः दुःखमोहादिदोषरहितः चिदानन्दः चित्सुखम्, तस्य गगनम् आकाशः, तस्य उपमा यस्य तस्य रूपमस्यास्तीति निष्कलङ्क......रूपी, तस्य, **परिपूर्णस्य** अखण्डस्वरूपस्य, **शिवस्य** परशिवस्य **वृत्तिः** वर्तनम्, अस्मीति स्थितिः **चैतन्यरूपिणी** परमार्थचैतन्यस्वरूपिणी भवति ॥ "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वे. उ., ६.८) इति श्रुतेः, पराशक्तिस्वरूपचैतन्यमय आत्मा परमात्माभिन्नः सर्वशक्तिमांश्च । 'अहमखण्डोऽस्मि, सदस्मि, चिदस्मि, आनन्दोऽस्मि' इत्यनुभूयमान आत्मा स्वयं परशिवादव्यतिरिक्त इति मन्यते । इयमेवात्मानुसन्धानक्रिया । यद्यन्मनसि

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विचार्यते तदेव बाह्ये दृश्यते । शिवमेव चित्ते यदा ध्यायते तदैव बाह्ये सर्वत्र दृश्यते । एतदनुसन्धानक्रियैव चैतन्यरूपिणीति ज्ञातव्या ॥७७॥

निष्कलङ्के निराकारे नित्ये परमतेजसि ।
विलीनचित्तवृत्तस्य तथा शक्तिः क्रियोच्यते ॥७८॥

व्याख्या – स्वस्वरूपपरामर्शोऽपि शक्तिरूपा क्रियेत्याह – **निष्कलङ्के** इति । **निष्कलङ्के** कलङ्करहिते **निराकारे** आकाररहिते **नित्ये** शाश्वते **परमतेजसि** परशिवतेजसि **विलीनचित्तवृत्तस्य** चित्तस्य वृत्तं वर्तनं व्यवहारः चित्तवृत्तम्, विलीनं चित्तवृत्तं यस्मिन् तत्, तस्य, विलीन-मनोव्यापारस्य शिवयोगिनः **तथा** तादृशी **शक्तिः क्रिया** 'सोऽहं'-भावाऽऽत्मानुसन्धानरूपा सा क्रियाशक्तिरिति **उच्यते** कथ्यते ॥ चित्तवृत्तं नाम मनोव्यापारः । यदा स मनोव्यापारः कलङ्करहिते आकाररहिते नित्ये च परशिवतेजसि विलयं गच्छति तदा 'शिवोऽहं'-भावात्मकाऽऽत्मानु-सन्धानरूपा क्रियाशक्तिः परमात्मतेजःस्वरूपिण्येव भवति । अयमेव शिवयोगिनोऽभिव्यज्यमानः क्रियाप्रकाश इत्युच्यते ॥७८॥

सर्वज्ञः सर्वकर्ता च सर्वगः परमेश्वरः ।
तदैक्यचिन्तया योगी तादृशात्मा प्रकाशते ॥७९॥

व्याख्या – परशिवैक्यध्यानेन शिवयोगी परशिवस्वरूपो भवतीत्याह – **सर्वज्ञ इति । सर्वज्ञः** सर्वं जानातीति सर्वज्ञः सर्वज्ञानसम्पन्नः **सर्वकर्ता** सर्वं करोतीति सर्वकर्ता, सर्वकर्तृत्वशीलः **सर्वगः च** सर्वव्यापकश्च **परमेश्वरः** सर्वेश्वरः परशिवः । **तदैक्यचिन्तया** तेन परमेश्वरेण ऐक्यम्, तस्य चिन्ता ध्यानम् तदैक्यचिन्ता, तया, तादृशपरमेश्वरध्यानेन **योगी** शिवयोगी **तादृशात्मा प्रकाशते** तादृशस्वरूपवान् विराजते ॥ "सर्वज्ञः पञ्चकृत्यसंपन्नः सर्वेश्वर ईशः पशुपतिः" (जा. उ., २) इति श्रुतिः । अत्राऽऽत्मानुसन्धानस्य प्रयोजनं स्पष्टतयोक्तम् । समानसमरसैक्यं शिवे जीवस्य तदनुसन्धानफलम् । समानसमरसैक्यं नाम "यथा नद्यः स्यन्द-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥'' (मुं.उ., ३.२.८) इत्युक्तदिशा भेदलेशस्याप्यवकाशरहितत्वेन जले जलमिव मिश्रीभावरूपमैक्यम् ॥ (पश्यत – सि. शि. २०.६१ – ''जले जलमिव न्यस्तम्'') । ''ब्रह्म वेद ब्रह्मैव भवति'' (मुं. उ., ३.२.९) इति श्रुतिरपि तदेव द्योतयति ॥७९॥

सर्वेन्द्रियाणां व्यापारे विद्यमानेऽपि संयमी ।
प्रत्युन्मुखेन मनसा शिवं पश्यन् प्रमोदते ॥८०॥

व्याख्या – योगिनः शिवदर्शने इन्द्रियव्यापारोऽपि न बाधक इत्याह – **सर्वेन्द्रियाणामिति** । **सर्वेन्द्रियाणां** सर्वेषाम् इन्द्रियाणां **व्यापारे** स्वाभाविकव्यवहारे **विद्यमानेऽपि** प्रवर्तमानेऽपि **संयमी** शिवयोगी **प्रत्युन्मुखेन** अन्तर्मुखेन **मनसा** चित्तेन **शिवं** परशिवं **पश्यन्** वीक्षमाणः सन् **प्रमोदते** प्रहृष्यति ॥ सर्वेषामिन्द्रियाणां व्यापारः स्वयमेवाऽप्रयत्नसिद्धत्वेन प्रवर्तमानेऽपि, ''कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्'' (कठ. उ., ४.१) इति श्रुत्युक्तदिशाऽन्तर्मुखेन मनसाऽन्तरात्मनि परशिवं पश्यन् योगी आनन्दमनुभवति । ''प्रत्युन्मुखेन पश्चिमचक्राभिमुखेन मनसेत्यर्थः'' इत्याह मरितोण्टदार्यः । तत्र पश्चिमचक्रम् आधारादिनवचक्रेषु नवमं चक्रं शिखाचक्रात् किञ्चित् पश्चिमस्थाने भाव्यमानम् । तत्र स्थितं मनस्तत्र स्थितेन ज्ञानप्रकाशेन देदीप्यते । सर्वेन्द्रियव्यापारप्रभावस्तम्भनशीलेन पश्चिमचक्रेण सह मनःसामरस्यं परमशिवानन्दे पर्यवस्यति । इदमेव क्रियाप्रकाशस्थलम् ॥८०॥

कूटस्थमचलं प्राज्ञं गुणातीतं गुणोत्तरम् ।
शिवतत्त्वं स्वरूपेण पश्यन् योगी प्रमोदते ॥८१॥

व्याख्या – केन स्वरूपेण शिवं वीक्षमाणो योगी प्रहृष्यतीत्यत्राह – **कूटस्थमिति** । **कूटस्थम्** परमोन्नतं परिणामरहितं निरन्तरं समानं च तत्, **अचलं** निश्चलम्, **प्राज्ञं** ज्ञानस्वरूपम्, **गुणातीतं** प्राकृतिकसत्त्वादि-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गुणातीतम्, **गुणोत्तरं** गुणैः उत्तरं श्रेष्ठम्, वैराग्यादिगुणैः श्रेष्ठमित्यर्थः, तादृशं **शिवतत्त्वं** परशिवतत्त्वं **स्वरूपेण** स्वस्वरूपेण **पश्यन्** वीक्षमाणः **योगी** शिवयोगी **प्रमोदते** मोमुद्यते ॥ शिवतत्त्वं कूटस्थम्, सर्वकूटप्राथम्यात् । तथाहि – अण्डज-पिण्डज-बिन्दुजाः जातिकूटः, स्वर्ग-मर्त्य-नरकात्मका लोककूटः, जाग्रत्स्वप्नसुषुप्तिस्वरूपा अवस्थाकूटः, वैश्व-तैजस-प्राज्ञा जीवकूटश्चेति चतुर्षु कूटेषु सर्वोत्तमस्थानस्थितं कूटस्थम्, तदेव सर्वाधिष्ठानम् । आद्यनादि-नादबिन्दु-जीवात्मपरमात्म-चराचरादिभिर-सम्पर्कितत्वाद् अचलं तत् । तत् प्राज्ञम्, ज्ञानस्वरूपत्वाज् ज्ञाननिधित्वाच्च। तद् गुणातीतम्, सत्त्वरजस्तमोरूपैः प्राकृतिकगुणैरतीतत्वात् । पुनस्तद् गुणोत्तरम्, वैराग्यादिगुणैः श्रेष्ठत्वात् । तादृशशिवतत्त्वं स्वस्वरूपेन वीक्षमाणो योगी परमशिवानन्दम् अनुभवति ॥ इदमानन्दानुसन्धानमेव क्रियाप्रकाश इत्युच्यते ॥८१॥

परात्मनि क्रिया सर्वा गन्धर्वनगरीमुखा ।
प्रकाशत इति प्रोक्तं क्रियायास्तु प्रकाशनम् ॥८२॥

व्याख्या – शिवयोगिनः सर्वा क्रियाऽस्थिरेत्युक्त्वा क्रियाप्रकाशस्थलं समापयति – **परात्मनीति । परात्मनि** परशिवस्वरूपवति शिवयोगिनि **सर्वा क्रिया** समग्रा क्रिया **गन्धर्वनगरीमुखा** गन्धर्वाणां नगरी, गन्धर्व-नगरी मुखं यस्याः सा, गन्धर्वनगरीमुखा, गन्धर्वनगरीसमानं **प्रकाशत इति** विद्योतत इति [विद्योतते इति – विद्योततय् इति ("एचोऽयवायावः" – पा. अ., ६.१.७८); विद्योतत इति ("लोपः शाकल्यस्य"– पा. अ., ८.३.१९)], विराजत इति कारणात् **क्रियायास्तु प्रकाशनं** क्रिया-प्रकाशनमिति **प्राक्तं** कथितम् ॥ शिवयोगिविषये सर्वाः क्रिया अस्थिरा निष्फलाश्च, प्रतिक्षणं भिद्यमानमेघरचना इव गन्धर्वनगरीव वा । क्रिया त्वियं मानसी स्वस्वरूपानुसन्धारूपा । तत्सम्बन्धिस्थलं क्रियाप्रकाश-स्थलम् ॥८२॥

– इति क्रियाप्रकाशस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

११. अथ भावप्रकाशस्थलम् – (९१)

तरङ्गाद्या यथा सिन्धौ न भिद्यन्ते तथात्मनि ।
भावा बुद्ध्यादयः सर्वे यत्तद् भावप्रकाशनम् ॥८३॥

व्याख्या – भावप्रकाशनं नाम किमित्यत्राह – **तरङ्गाद्या इति । यथा** येन प्रकारेण **सिन्धौ** समुद्रे **तरङ्गाद्याः** तरङ्गफेनादयः **न भिद्यन्ते** न भिन्नत्वेन दृश्यन्ते, तथा, **सर्वे** सकलाः **बुद्ध्यादयः** बुद्धिरित्यादयः **भावाः** आभ्यन्तरभावविशेषाः न भिद्यन्ते इति **यत्तद्** यदुच्यते तद् **भावप्रकाशनं** भावप्रकाशनस्थलम् ॥ यथा बुद्ध्यादयो भावाः सर्वे परमभावैकत्वे (शिवजीवैक्यभावे) विलयं गच्छन्ति तदा ते सर्वे परशिवस्वरूपे दृश्यन्ते । सर्वेषां पवित्रभावानां परशिवस्वरूपत्वेन भावनमेव भावप्रकाशः । अत्र समुद्रतरङ्गादयो दृष्टान्ताः । यथा समुद्रस्य तद्विकारभूतानां तरङ्गफेनादीनां च भेदो नास्ति तथा शिवस्वरूपस्यात्मनो बुद्ध्यादिभावानां च भेदो नास्ति । परमार्थे शिवयोगिन आत्मा शैवचैतन्यस्य महान् समुद्रः । तस्य महालिङ्गमिति नामान्तरम् । तस्मिन्नेव महालिङ्गे सर्वे भावाः, सर्वे विचाराः, सर्वा भावनाः, सर्वे अनुभवाश्च निमग्नाः सन्तो विगलितभेदा भवन्ति । एषैव भावाभिव्यक्तिर्भावप्रकाश इत्युच्यते ॥८३॥

शिव एव जगत्सर्वं शिव एवाहमित्यपि ।
भावयन् परमो योगी भावदोषैर्न बाध्यते ॥८४॥

शिवभावे स्थिरे जाते निर्लेपस्य महात्मनः ।
ये ये भावाः समुत्पन्नास्ते ते शिवमयाः स्मृताः ॥८५॥

व्याख्या – शिवयोगिनो भावाः शिवमया इत्याह – **शिव इत्यादिना युग्मेन । शिव एव** परशिव **एव जगत्सर्वं** सकलं विश्वं **शिव एव** परशिव **एव अहम् इत्यपि** स्वात्मा इति च **भावयन्** मनसा विचारयन् **परमो योगी** श्रेष्ठः शिवयोगी **भावदोषैः** भावात्मककलङ्कैः **न बाध्यते** न दुष्यते ॥ तस्य

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निर्लेपस्य महात्मनः लेपरहितस्य महायोगिनः **शिवभावे** शिवोऽहंभावे **स्थिरे जाते** स्थिरतां गते सति **य ये भावाः** ये केऽपि भावविशेषाः **समुत्पन्नाः** समुद्भूताः **त ते** ते सर्वे भावाः **शिवमयाः** शिवत्वप्रचुराः **स्मृताः** ज्ञाताः ॥ शिव एव जगत्सर्वमिति श्रुतिसंमतं सत्यम् । उक्तं च श्रुतिभिः – "ब्रह्मैवेदं सर्वम्" (छां. उ., ७.२५.२) इति, "सर्वं खल्विदं ब्रह्म" (छां.उ., २.२.११) इति, "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" (ऋ. वे. १०.९०.२) इति च । शिव एवाहमित्यपि श्रुतिसिद्धं सत्यम् । तथा हि – "अहं ब्रह्मास्मि" (बृ. उ., १.४.१०) इति, "तत् त्वम् असि" (छां. उ., ६.८.७) इति च । यथा चन्द्रकला चन्द्रमसि विलयं प्राप्य चन्द्र एव भवति, यथा सूर्यरश्मिः सूर्ये विलीय सूर्य एव भवति, यथाऽग्निज्वालाऽग्नौ विलीयाऽग्निरेव भवति, यथा दीपः दीपे विलयं प्राप्य दीप एव भवति, यथा च तरङ्गाद्याः समुद्रे विलीय समुद्र एव भवन्ति, तथैव जीवात्मा परमात्मनि विलीय परमात्मैव भवति । परमशिवयोगी तु जीवभावस्य शरीरेन्द्रियमनोरूपलक्षणानि नितरां निरस्य भावांश्च सर्वान् शिव-चैतन्याग्नौ समर्पयन् स्वरूपे स्वभावे च शिव एव भवति । एवं स भावप्रकाशस्थली जायते । स च पुनर्वैराग्यसंस्कारद्वारा नितरां निष्पन्न-निर्मलभावः सम्पद्यते । परशिवोऽहंभावे स्थिरे जाते सर्वं जगच्छिवमयत्वेन दृश्यते । यदा भावा शिवमया भवन्ति तदा भेदलेशस्याप्यवकाशो नास्ति । सर्वत्र शिवभावाभिव्यक्तिरेव भावप्रकाशः क्रियाप्रकाशवतः शिवयोगिनः कृते ॥८४-८५॥

अद्वितीयशिवाकारभावनाध्वस्तकर्मणा ।
न किञ्चिद्भाव्यते साक्षाच्छिवादन्यन्महात्मना ॥८६॥

व्याख्या – निरस्तकर्मणा योगिना किं भाव्यते इत्यत्राह – **अद्वितीयेति । अद्वितीयशिवाकारभावनाध्वस्तकर्मणा** न विद्यते द्वितीयः यस्य सः अद्वितीयः, अद्वयः, अद्वितीयश्चासौ शिवश्च अद्वितीयशिवः, तस्य आकारः स्वरूपम्, तदाकारस्य भावना, तया ध्वस्तं कर्म यस्य सः तेन,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

महात्मना महायोगिना **साक्षात्** साक्षात्तया **शिवादन्यत्** शिवव्यतिरिक्तं **किञ्चिद्** किञ्चिदपि **न भाव्यते** न भावनाविषयीक्रियते ॥ शिवस्त्वेकमेवद्वितीयं ब्रह्म "एकमेवाद्वितीयम्" (छां. उ., ६.२.१) इति, "एको हि रुद्रो न द्वितीयाय तस्थुः" (श्वे. उ., ३.२) इति श्रुतिद्वयं तदेव सत्यमुद्घोषयति । परमेश्वरेण सह स्वात्मनः समरसैक्ये अद्वितीयत्वमेवावशिष्यते । निरूढाद्वैतिनो नास्ति कर्मबन्धः । दग्धे कर्मणि नास्ति संसारचक्रे भ्रमणम् ॥८६॥

गलिताज्ञानबन्धस्य केवलात्मानुभाविनः ।
यत्र यत्रेन्द्रियासक्तिस्तत्र तत्र शिवात्मता ॥८७॥

व्याख्या – कथं शिवादन्यन्न भाव्यते इत्यत्राह – **गलितेत्यादिना । गलिताज्ञानवन्धस्य** अज्ञानस्य बन्धः अज्ञानबन्धः गलितः अज्ञानबन्धः यस्य सः, तस्य, अज्ञानबन्धनरहितस्य **केवलात्मानुभाविनः** केवलम् आत्मानुभावः अस्यास्तीति केवलात्मानुभावी, तस्य, केवलं शिवोऽहं-भावरूपाभ्यन्तरानुभवयुक्तस्य, तादृशस्य शिवयोगिनो **यत्र यत्र** यस्मिन् यस्मिन् विषये **इन्द्रियासक्तिः** साक्षादिन्द्रियसन्निकर्षः, **तत्र तत्र** तस्मिन् तस्मिन् विषये **शिवात्मता** भावनात्मकशिवस्वरूपदर्शनम् । गलिताज्ञानबन्धत्वं केवलात्मानुभावित्वं च परिशुद्धमपरिमितं च लक्षणं शिवयोगिनः । यत्र यत्र तस्येन्द्रियाणि प्रवर्तन्ते तत्र तत्र तस्य शिवस्वरूपानुसन्धानमेव केवलम् । यद्यत् पश्यति, शृणोति, स्वदते, जिघ्रति, स्पृशति तत्तत् सर्वं शिवात्मकमेव । एवं तस्येन्द्रियाणि परशिवात्मकसूर्यस्य किरणानां बहिर्निर्गमनद्वाराणि भवन्ति ॥८७॥

रागद्वेषादयो भावाः संसारक्लेशकारणम् ।
तेषामुपरमो यत्र तत्र भावः शिवात्मकः ॥८८॥

व्याख्या – बन्धहेतुभूतरागद्वेषादिभावास्तत्र वर्ज्या इत्याह – **रागद्वेषादय इति । रागद्वेषादयः भावाः** रागद्वेषादिभावाः समुदिताः **संसारक्लेशकारणं** जननमरणचक्रपीडाहेतुः भवन्ति । **यत्र** यस्मिन् **तेषाम्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उपरमः तेषां रागद्वेषादीनाम् उपशमनं **तत्र** तस्मिन् शिवयोगिनः **भावः** मनोभावः **शिवात्मकः** शिवस्वरूपः । रागद्वेषादिभावानां यत्र नितरामभावस्तत्र सर्वत्र शिवात्मकत्वमित्युक्तं भवति । "अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः" (यो.सू.,२.३) इत्युक्तदिशाऽविद्यादयः पञ्चक्लेशाः । ते च भावाः पञ्चक्लेशहेतवः । ते एव कार्यकारणाभेदोपचारेण क्लेशा उच्यन्ते । "अविद्या क्षेत्रमुत्तरेषाम्" (यो.सू., २.४) इत्युक्तरीत्या 'अविद्या' एवोत्त-रेषां चतुर्णां कारणम् । अविद्याया निर्मूलने अन्येषां चतुर्णां निमूलनं स्वयमेव भवतीति सूच्यते । अविद्या तु शिवयोगिनः स्वात्मसाक्षात्कारेणैव निरस्यते । तत्कार्यभूताश्चत्वारोऽपि क्लेशा स्वयमेव निरस्ता भवन्ति । तदा सर्वत्र शिवभावदर्शने न कोऽपि बाधकोऽवशिष्यते ॥८८॥

यथा सूर्यसमाक्रान्तौ न शक्नोति तमः सदा ।
तथा प्रकाशमात्मानं नाविद्याक्रामति स्वयम् ॥८९॥

व्याख्या – तमोभावः शिवयोगिनं न व्याप्नोतीत्युक्त्वा भावप्रकाशस्थलं समापयति – **यथेति । यथा** येन प्रकारेण **तमः** तिमिरं **सूर्यसमाक्रान्तौ** सूर्यस्य समाक्रमणे **सदा** सर्वदा **न शक्नोति** न समर्थो भवति, **तथा** तेनैव प्रकारेण **अविद्या** अज्ञानं **प्रकाशम् आत्मानं** शुद्धप्रकाशरूपं शिवयोगिन आत्मानं **स्वयं** स्वयमेव **न आक्रामति** न व्याप्नोति ॥ शिवयोगिनो ज्ञानं परशिवाद्वैतसाक्षात्काररूपम् । बोध एवैषोऽज्ञानतिमिरनाशे सूर्यायते । सूर्यान्धकारयोर्दृष्टान्तस्त्वत्र समीचीनः । यथाऽन्धकारः सूर्यमावरितुमसमर्थस्तथैवाऽविद्या परशिवाद्वैतसम्पन्नं शिवयोगिनमावरितुमसमर्थेति तेन विशदीकृतम् ॥८९॥

– इति भावप्रकाशस्थलम् –

१२. अथ ज्ञानप्रकाशस्थलम् – (९२)

मुख्यार्थेऽसम्भवे जाते लक्षणायोगसंश्रयात् ।
तज्ज्ञानयोजनं यत्तदुक्तं ज्ञानप्रकाशनम् ॥९०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – भावप्रकाशस्थलसम्पन्नस्य शिवयोगिनः सुलभं ज्ञान-प्रकाशमाह – **मुख्यार्थे इति।** **मुख्यार्थे** अभिधाप्रतिपादिते मुख्यार्थे, वाच्यार्थे, **असम्भवे जाते** अनुपपन्ने जाते सति, **लक्षणायोगसंश्रयात्** लक्षणाख्य-व्यापारसमाश्रयेण **तज्ज्ञानयोजनं** मुख्यार्थासम्बद्धत्वे सति उपपत्तियुक्त-त्वलक्षणस्य अर्थस्य योजनं समन्वयनं **यत्** तद् यत्क्रियते तत् **ज्ञान-प्रकाशनम्** ज्ञानप्रकाशनमिति **उक्तम्** कथितम् ॥ अत्र मुख्यार्थस्तु लिङ्गाङ्गसामरस्यमिति यद्वीरशैवपरिभाषायामुच्यमानं शिवजीवैक्यम् इति। अस्मात् पदादयमर्थो बोद्धव्य इति सङ्केतयुक्तोऽर्थो मुख्यार्थः। जीव-शिवयोमुख्यार्थौ यथा – किञ्चिज्ज्ञत्व-किञ्चित्कर्तृत्वशक्तिविशिष्टः शरीरस्य चैतन्यदायी शरीरी 'जीवः', सर्वज्ञत्व-सर्वकर्तृत्वशक्तिविशिष्टः परमात्मा 'शिवः'। तयोर्भिन्नशक्तिविशिष्टयोः कथं भवेत् सामरस्यमिति मुख्यार्थस्य बाधो जायते। अतोऽत्र लक्षणावृत्त्याश्रयणं करणीयम्। तेन जीवशिव-योर्भिन्नशक्तिविशिष्टत्वार्थविशेषं विहाय, चैतन्यरूपोभयसामान्यार्थविशेषं स्वीकृत्य तयोः सामरस्यमुपपादयितुं शक्यते। परस्परविरुद्धांशभागत्याग-पूर्वकं परस्परसामन्यांशभागं स्वीकृत्य शिवजीवयोः सामरस्योपपादनादियं जहदजहल्लक्षणा। भागत्यागलक्षणेत्यस्या नामान्तरम्। एतदुक्तं भवति– "गवामनेकवर्णानां क्षीरस्याप्येकवर्णता। क्षीरवत् पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा॥" (अमृत (ब्रह्म.) बिं. उ., १९) इति। भिन्नवर्णानां गवां मध्ये क्षीरस्यैकवर्णता। धीमन्तः शिवयोगिनो क्षीरस्य समानवर्णवच्चैतन्य-समानवत्वेनैक्यं शिवजीवयोः पश्यन्ति। अन्ये विविधवर्णरूपचिह्नम् अवलम्बमाना लिङ्गिनः गवां भिन्नतामेव पश्यन्ति। अत एव शिवयोगिनां ज्ञानं नाम शिवजीवैक्यसमर्थनात्मकमेव। तेष्वेवं शिवजीवसमरसैक्यज्ञानं स्फुरणरूपेणाभिव्यक्तमिति ते ज्ञानप्रकाशस्थलिनो भवन्ति ॥९०॥

मुक्तस्य ज्ञानसम्बन्धो ज्ञेयाभावः स्वभावतः।
उपाधिसहितं ज्ञानं न भेदमतिवर्तते ॥९१॥

ज्ञानमित्युच्यते सद्भिः परिच्छेदोऽपि वस्तुनः।
परमात्मन्यपरिच्छेदे कुतो ज्ञानस्य सम्भवः ॥९२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानस्याविषये तत्त्वे शिवाख्ये चित्सुखात्मनि ।
आत्मैकत्वानुसन्धानं ज्ञानमित्युच्यते बुधैः ॥९३॥

व्याख्या – शिवज्ञानस्वरूपमाह विशेषकेन – **मुक्तस्येत्यादिना** । **मुक्तस्य** जीवन्मुक्तस्य **ज्ञानसम्बन्धः** लक्षणया प्राप्तेन ज्ञानेन सम्बन्धः, **ज्ञेयाभावः** ज्ञातुं योग्यस्य अभावश्च **स्वभावतः** स्वाभाविकः । **उपाधिसहितं ज्ञानं** मुख्यार्थभूतजीवशिवयोः कार्योपाधि-कारणोपाधित्वरूपं ज्ञानं **भेदं** भिन्नतां **न अतिवर्तते** न अतिक्रम्य वर्तते ॥ **वस्तुनः** पदार्थस्य, शिवजीव-रूपवस्तुनः, **परिच्छेदः अपि** पृथक्त्वज्ञानमपि **ज्ञानमिति** सम्यज्ज्ञानमिति **उच्यते** कथ्यते । **परात्मनि अपरिच्छेदे** परात्मनि परशिवे प्रत्येकत्वज्ञाना-भावे सति **ज्ञानस्य संभवः कुतः** भेदसिद्धज्ञानस्य, द्वैतज्ञानस्य इति यावत्, तस्य उद्भवः कुत? तत्सम्भवो नास्तीत्यर्थः ॥ **चित्सुखात्मनि** चिदानन्दस्वरूपे **ज्ञानस्य अविषये** स्वप्रकाशत्वात्तज्ज्ञानस्य स्वातिरिक्तज्ञानान्तस्य अगोचरे **शिवाख्ये** परशिवाभिधाने **तत्त्वे** वस्तुनि **आत्मैकत्वानुसन्धानम्** आत्मैकत्व-भावानुध्यानं **ज्ञानम् इति** आत्मबोधरूपं ज्ञानम् इति **बुधैः** विद्वद्भिः **उच्यते** कथ्यते ॥ परशिवादभिन्नस्य जीवन्मुक्तस्य शिवयोगिनो न किञ्चदस्ति ज्ञेयम् । सामरस्यात्मकज्ञानसम्बन्धः स्वयंस्फूर्तः । शिवयोगिनस्तज्ज्ञानस्य च भिदा नास्ति । शिवयोगिनं विहाय न किञ्चिदन्यदस्ति । अतः स ज्ञानज्ञेयरहितः । स एव शिवः । अतो न तस्य ज्ञातृत्वम् । तादृश एव शिवयोगी ज्ञानप्रकाशस्थलीत्युच्यते । जीवस्तु शरीराद्युपाधियुक्तः, ईश्वरश्च विश्वरूपोपाधियुक्तः । अतो जीवेश्वरौ तावुपाधिभिः परिच्छिन्नौ । त्रिपुटीभावे सति ज्ञानं द्वैतात्मकमेव । यदा स त्रिपुटीभावोऽभावतां गच्छति, तदा केवलम् अखण्डसंविद्रूपः परशिव एवावशिष्यते । नाऽत्र द्वैतलेशोऽपि । इदमेवाऽत्मैकत्वानुसन्धानं ज्ञानप्रकाश इत्युच्यते ॥९१-९३॥

अपरिच्छिन्नमानन्दं सत्ताकारं जगन्मयम् ।
ब्रह्मेति लक्षणं ज्ञानं ब्रह्मज्ञानमिहोच्यते ॥९४॥

ब्रह्मज्ञाने समुत्पन्ने विश्वोपाधिविवर्जिते ।
सर्वं संविन्मयं भाति तदन्यन्नैव दृश्यते ॥९५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्मादद्वैतविज्ञानमपवर्गस्य कारणम् ।
भावयन् सततं योगी संसारेण न लिप्यते ॥९६॥

व्याख्या – परशिवब्रह्मज्ञानं विशेषकेन विशेषयति – **अपरिच्छिन्न-मिति** । **अपरिच्छिन्नम् आनन्दम्** परिच्छेदरहितत्वेनाऽखण्डं सुखम्, **सत्ताकारम्** अखण्डसद्रूपात्मकं **जगन्मयं** विश्वमयं च **ब्रह्म इति** परशिवब्रह्म इति **लक्षणं ज्ञानं** लक्षणरूपं ज्ञानम् इह अत्र **ब्रह्मज्ञानं** परशिवब्रह्मज्ञानम् इति **उच्यते** कथ्यते ॥ **विश्वोपाधिविवर्जिते** जगद्रूपोपाधिरहिते **ब्रह्मज्ञाने समुत्पन्ने** परशिवब्रह्मसाक्षात्कारे जाते **सर्वं** सकलमपि विश्वं **संविन्मयं** चिन्मयं **भाति** प्रकाशते, **तदन्यत्** शिवशक्त्योरव्यतिरेकात् परशिव-ब्रह्मव्यतिरिक्तं **नैव दृश्यते** नैव गोचरति ॥ **तस्मात्** अत एव **अद्वैत-विज्ञानम्** अद्वैताख्यं विशेषज्ञानं **अपवर्गस्य** मोक्षस्य **कारणं** हेतुरिति **सततं** निरन्तरं **भावयन्** ध्यायन् **योगी** शिवयोगी **संसारेण** जननमरणचक्रभूतेन जीवनेन **न लिप्यते** न सम्पर्कयुक्तो भवति ॥ अखण्डं परशिवब्रह्माऽखण्ड-चिदानन्दमयम् । जगति सर्वं चराचरात्मकं वस्तु तस्याखण्डचिदानन्द-स्यांशमादृत्य सत्तानन्दौ वहति । एवं सर्वोपाधिरहिते परशिवब्रह्मज्ञाने जाते शिवयोगी सर्वं शिवमयत्वेन पश्यति । परशिवब्रह्मव्यतिरिक्तं तस्य न किमपि स्फुरति ॥९४-९६॥

नित्ये निर्मलसत्त्वयोगिषु परे निर्वासने निष्कले ।
सर्वातीतपदे चराचरमये सत्तत्मनि ज्योतिषि ॥
संविद्व्योम्नि शिवे विलीनहृदयस्तद्भेदवैमुख्यतः ।
साक्षात् सर्वगतो विभाति विगलद्विश्वः स्वयं संयमी ॥९७॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादि-सारभूते श्रीसिद्धान्तशिखामणौ शरणस्थलान्तर्गतद्वादशलिङ्गस्थलप्रसङ्गो नामैकोनविंशः परिच्छेदः समाप्तः ॥१९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शिवयोगी भेदविमुखः चिदाकाशे शिवे विलीनचित्तः सर्वगतत्वेन विराजते इत्युक्त्वा ज्ञानप्रकाशस्थलं समापयति – **नित्ये इति**। **नित्ये** निरन्तरे **निर्मलसत्त्वयोगिषु** शुद्धसत्त्वगुणप्राधान्यवत्सु शिवयोगिषु **परे** प्राधान्येन विद्यमाने, **निर्वासने** वेद्यादिसंस्काररहिते, **निष्कले** निरवयवे, **सर्वातीतपदे** सर्वोत्तीर्णस्थानभूते, **चराचरमये** चराचरात्मकजगद्व्याप्तिमति, **सत्तात्मनि** सत्तास्वरूपे, **ज्योतिषि** प्रकाशमाने **संविद्व्योम्नि** संविद्रूपाकाशे **शिवे** परशिवे ब्रह्मणि **विलीनहृदयः** विलीनं हृदयं यस्य सः, तादृशः, **तद्भेदवैमुख्यतः** तस्मात् परशिवब्रह्मणो भेदवैमुख्यतः भेदविमुखीभूतत्वात् **सर्वगतः** सर्वव्यापकः **संयमी** शिवयोगी **विगलद्विश्वः** विगलितविश्वभेदः सन् **स्वयं** स्वयमेव **साक्षात्** साक्षात्स्वयं **विभाति** विशेषेण प्रकाशते ॥ शिवयोगिनो हृदये सर्वदा शिवाद्वैतावधानं जागर्ति। ज्योतिष्मतः परशिवतत्त्वस्य वर्णने सर्वविशेषा अभिव्यक्ताः। तथा हि – परशिवतत्त्वं नित्यम्, भूतवर्तमानभविष्यत्कालत्रितयेऽपि विद्यमानत्वात्, कालत्रितयेऽप्यबाधितत्वाच्च; निर्वासनम्, कालातीतत्वात्; निष्कलम् (निरवयवम्), अध्वातीतत्वात्; सर्वातीतपदे स्थितम्, सर्वाप्राप्यत्वात्; चराचरमयम्, विश्वं व्याप्य स्थितत्वात्, तस्य मूलकारणत्वात्, अधिष्ठानत्वाच्च; सत्तात्मकं, षट्त्रिंशत्तत्त्वप्रविष्टत्वात्; ज्योतिःस्वरूपम्, सूर्यचन्द्रतारकादीनां प्रकाशमूलत्वात्; चिद्व्योमस्वरूपम्, सर्वज्ञानमूलत्वाच्च । शिवयोगी त्वखण्डसत्तानन्दस्वरूपे परशिवे सामरस्यं प्राप्य परशिवात्मके एव चिद्व्योम्नि विहरति। स एव योगिराट् ॥ अत्र शार्दूलविक्रीडितं वृत्तम्। (उक्तं तल्लक्षणम् – पश्यत – १५.७१ – तमश्लोकस्य व्याख्याम्) ॥९७॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना डाक्टर्-
उपाधिभाजा शिवकुमारस्वामिना विरचितायां श्रीशिवयोगि-
शिवाचार्यकृतश्रीसिद्धान्तशिखामणेः शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
एकोनविंशः परिच्छेदः समाप्तः ॥१९॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विंशः परिच्छेदः

ऐक्यस्थलान्तर्गतनवविधलिङ्गस्थलप्रसङ्गः

अथागस्त्यप्रश्नः । अगस्त्य उवाच –

स्थलभेदास्त्वया प्रोक्ताः शरणस्थलसंश्रिताः ।
ऐक्यस्थलगतान् ब्रूहि स्थलभेदान् गणेन्द्र मे ॥१॥

व्याख्या – ऐक्यस्थलाश्रित स्थलभेदान् अगस्त्य पप्रच्छ – स्थलभेदा इति । शरणस्थलसंश्रिताः शरणस्थलसमाश्रिताः स्थलभेदाः लिङ्गस्थलप्रकाराः त्वया भवता प्रोक्ताः । हे गणेन्द्र हे गणेश्वर ऐक्यस्थलगतान् ऐक्यस्थलसमाश्रितान् स्थलभेदान् लिङ्गस्थलप्रकारान् मे मह्यं ब्रूहि कथय ॥१॥

अथ श्रीरेणुकोऽस्य प्रश्नस्योत्तरं वक्ति । श्रीरेणुक उवाच –

स्थलानां नवकं चैक्यस्थलेऽस्मिन् प्रकीर्त्यते ॥२॥
तत्स्वीकृतप्रसादैक्यस्थलमादौ प्रकीर्तितम् ।
शिष्टोदनस्थलं चाथ चराचरलयस्थलम् ॥३॥
भाण्डस्थलं ततः प्रोक्तं भाजनस्थलमुत्तमम् ।
अङ्गालेपस्थलं पश्चात् स्वपराज्ञस्थलं ततः ॥४॥
भावाभावविनाशं च ज्ञानशून्यस्थलं ततः ।
तदेषां क्रमशो वक्ष्ये शृणु तापस लक्षणम् ॥५॥

व्याख्या – अस्मिन् एतस्मिन् ऐक्यस्थले च शिवलिङ्गैक्यस्थले स्थलानां नवकं स्थलानां नवविधत्वं प्रकीर्त्यते उच्यते । आदौ आरम्भे तत्स्वीकृत-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रसादैक्यस्थलं [उज्ज्निनीशकन्नडव्याख्यासहिते ग्रन्थे – "तत्स्वीकृतप्रसादाख्य-स्थलम्" इति पाठान्तरम्], **स्वीकृतप्रसादिस्थलम्** – (१) **प्रकीर्तितं** कथितम्। **अथ च** अनन्तरं **शिष्टोदनस्थलम्** – (२) **चराचरलयस्थलम्** – (३)। **ततः** तदनन्तरम् **भाण्डस्थलम्** – (४) **प्रोक्तं** कथितम्। ततः **भाजनस्थलम्** – (५) **उत्तमं** श्रेष्ठम्। **पश्चाद्** अनन्तरम् **अङ्गालेपस्थलम्** – (६) ततः तदनन्तरं **स्वपराज्ञस्थलम्** – (७)। **भावाभावविनाशस्थलम्** – (८) **ततः** अनन्तरं **ज्ञानशून्यस्थलम्** – (९) **च**। **तापस** हे तपस्विन् **तदेषां** एतेषां **क्रमशः** क्रमेण **लक्षणं** विशेषस्वरूपं **वक्ष्ये** वदामि, **शृणु** श्रूयताम् ॥२-५॥

१. अथ स्वीकृतप्रसादिस्थलम् – (९३)

मुख्यार्थो लक्षणार्थश्च यत्र नास्ति चिदात्मनि।
विशृङ्खलतया तस्य प्रसादः स्वीकृतो भवेत् ॥६॥

व्याख्या – ज्ञानप्रकाशसम्पन्नो योगी ज्ञानरूपप्रसादस्वीकारात् स्वीकृतप्रसादीत्याह – **मुख्यार्थ इति। यत्र** यस्मिन् **चिदात्मनि** चिद्रूपे आत्मनि, चित्स्वरूपपरशिवाभिन्ने **मुख्यार्थः** अभिधावृत्तिप्रतिपादितो वाच्यार्थः, **लक्षणार्थः च** मुख्यार्थबाधादिप्रसक्तलक्षणावृत्तिप्रतिपादितो लक्ष्यार्थश्चेत्युभयमपि **नास्ति** न भवति, **तस्य** चिदात्मभूतस्य शिवयोगिनो **विशृङ्खलतया** निरङ्कुशतया **प्रसादः** पूर्णज्ञानरूपः प्रसादः **स्वीकृतः** स्वायत्तीकृतो **भवेत्** स्यात् ॥ शिवजीवयोर्द्वैतमत्र मुख्यार्थः। अयं च चिदात्मभूते शिवयोगिनि नितरां निरस्तः। शिवजीवयोः समरसैक्यं तु लक्ष्यार्थः, उभयोरपि चैतन्यविशिष्टत्वात्। स च नैव जीवः शिवो वा, स केवलं निर्विशेष आत्मा। सर्वस्तस्य विशेषः खलु सच्चिदानन्दात्मके चिदात्मनि विलीनो भवतीति। इदमेव स्वात्मज्ञानं प्रसादः। अस्यानन्दावस्थां प्राप्तवतः शिवयोगिनः स्वीकृतप्रसादित्वम् उक्तम् ॥६॥

मातृमेयप्रमाणादिव्यवहारे विहारिणीम्।
संवित्साक्षात्कृतिं लब्ध्वा योगी स्वात्मनि तिष्ठति ॥७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – उक्तमेव विशदयति – **मातृमेयप्रमाणादीत्यादि । मातृमेयप्रमाणादिव्यवहारे** माता ज्ञाता च मेयं मातुं योग्यं प्रमेयं च ज्ञेयम् इत्यर्थः, प्रमाणं मानं च, ज्ञानमित्यर्थः, मातृमेयमानादित्रिपुटीमये व्यवहारे **विहारिणीं** विहर्तुं शीलम् अस्या इति विहरिणी, ताम्, **संवित्साक्षात्कृतिं** परिपूर्णचित्साक्षात्कारं **लब्ध्वा** प्राप्य **योगी** शिवयोगी **स्वात्मनि तिष्ठति** स्वस्वरूपे तिष्ठति ॥ प्रमातृप्रमेयप्रमाणानां समाहारः प्रमातृप्रमेयप्रमाणम्, कर्तृकरणकर्मणां समाहारः कर्तृकरणकर्म, ध्यातृध्येयध्यानानां समहारः ध्यातृध्येयध्यानं चेति तिस्रः सकलेषु लोकव्यवहारेषु त्रिपुट्यः । परमचैतन्यात्मकः परशिवः सर्वं सत्तारूपेण व्याप्नोति । तत्परमचैतन्यावस्थायां स्थितः शिवयोगी स्वीकृतप्रसादिस्थली भवति, तत्साक्षात्कारस्यैव प्रसादत्वात् ॥७॥

अद्वैतबोधनिर्धूतभेदावेशस्य योगिनः ।
साक्षात्कृतमहासंवित्प्रकाशस्य क्व बन्धनम् ॥८॥

व्याख्या – एतादृशस्य शिवयोगिनः कुतो पाशबन्धनमित्यत्राह – **अद्वैतबोधेत्यादिना । अद्वैतबोधनिर्धूतभेदावेशस्य** अद्वैतबोधः शिवाद्वैतज्ञानम्, तेन निर्धूतः निवारितः भेदस्य आवेशः प्रभावः यस्य सः अद्वैत.... भेदावेशः, तस्य, **साक्षात्कृतमहासंवित्प्रकाशस्य** साक्षात्कृतः साक्षात्कारविषयीकृतः महासंवित्प्रकाशः महाचैतन्यप्रकाशः यस्य सः साक्षात्कृतमहासंवित्प्रकाशः, तस्य, **योगिनः** शिवयोगिनः **बन्धनं** पाशबन्धनं **क्व** कुत्र? कुत्रापि नास्तीत्यर्थः ॥ भेदावेशो नाम द्वैतभावस्य प्रेरणा । भेदो वा द्वैतभावो वा अद्वैतांशभूतः, द्वैताद्वैतयोः कार्यकारणभावत्वात् । परमार्थतस्तु द्वैतम् अद्वैते विलयं गच्छति । अद्वैतं तु परमार्थसत्यम् । द्वैतदृष्टिर्भ्रमारूपा अद्वैतदृष्टिश्च परमज्ञानरूपा । अतो द्वैताद्वैतदृष्ट्योर्न कोऽपि विरोधः परस्परम् । तदुक्तम् – "अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते । तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥" (माण्डूक्य., ३.१८) इति । भेदावेशो भूतावेशवत् । अत्राऽऽणव-तिरोधानशक्ति-बिन्दु-माया-कर्मात्मकानां भूतानाम् आवेशो दृश्यते । यो हि एतद्भूताविष्टः स संसारी

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भूत्वा जननमरणचक्रे परिभ्रमति । शिवयोगी त्वद्वैतभावे तिष्ठन्नात्मानन्दमनुभवन् स्वीकृतप्रसादी भवति ॥८॥

चिदात्मनि शिवे न्यस्तं जगदेतच्चराचरम् ।
जायते तन्मयं सर्वमग्नौ काष्ठादिकं यथा ॥९॥

व्याख्या – स्वीकृतप्रसादिनः शिवयोगिनः प्रपञ्चदर्शनं सुतरां नास्तीत्याह – **चिदात्मनीति** । **चिदात्मनि** चित्स्वरूपिणि **शिवे** परशिवे **न्यस्तम्** उपवेशितं **चराचरं जगत् सर्वं** स्थावरजङ्गमात्मकं विश्वं सर्वं **अग्नौ काष्ठादिकं यथा** वह्नौ इन्धनं सर्वं यथा तथा **तन्मयं जायते** शिवमयं भवति ॥ सर्वस्य शिवमयत्वात् विश्वं प्रत्येकतया न दृश्यते । अग्नौ निक्षिप्तम् इन्धनं यथाऽग्निस्वरूपेण दृश्यते तथा शिवे विनिवेशितं विश्वं परशिवस्वरूपेण विराजते ॥९॥

न भाति पृथ्वी न जलं न तेजो नैव मारुतः ।
नाऽऽकाशो न परं तत्त्वं शिवे दृष्टे चिदात्मनि ॥१०॥

व्याख्या – स्वात्मनि शिवदर्शने जाते अन्यन्न किञ्चिद् दृश्यते इत्याह – **नेति** । **चिदात्मनि** चिद्रूपात्मनि **शिवे दृष्टे** शिवदर्शने जाते **पृथ्वी** पृथिवी **न भाति** न प्रकाशते, **न जलं** जलं न प्रकाशते, **न तेजः** तेजो न दृश्यते, **नैव मारुतः** वायुरपि न प्रकाशते, **नाऽऽकाशः** आकाशो न प्रकाशये, **न परं तत्त्वं** तत्त्वान्तरं किञ्चिन्न प्रकाशते ॥ यदा परमचित्स्वरूपः परशिवो ज्ञातः पृथिव्यादिपञ्चभूतास्तद्भिन्नतया न प्रतिभान्ति, तद्रूपतयैव विराजन्ते । तदुक्तम् – "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्" (छां. उ., ६.१.४) इति । अयं श्रुत्युक्तदृष्टान्तः पूर्वोक्तसमर्थनायां साधुः । जगत्पञ्चभूतात्मकमिति तु प्रसिद्धम् । तच्च जगत् परशिवाभिन्नतया भाति, शिवयोगिना सर्वं जगत् परशिवमयत्वेन दृष्टत्वात् । तादृशः शिवयोग्येव स्वीकृतप्रसदीति कथ्यते । अत्रेदमनुसन्धेयम् – जगतो दर्शनं द्विधा भवितुमर्हति, सामान्यतया बाह्ये यथा दृश्यते तथाऽथवा पारमार्थिकतयाऽऽभ्यन्तरे यथा परशिवस्वरूपे भाति तथा ।

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूर्वं त्वप्रयत्न सिद्धम् अपरं च मनसा सह सर्वेन्द्रियाणाम् अन्तर्मुखीकरण-रूपेण तेषां परशिवे विलयनरूपेण चोभयात्मकप्रयत्नेन सिद्धम् । तादृशेन निरन्तरेण प्रज्ञापूर्वकेण च प्रयत्नेन शिवयोगी परमशिवेन पूर्णसामरस्यं प्राप्य सर्वं शिवमयत्वेन पश्यति ॥१०॥

ज्योतिर्लिङ्गे चिदाकारे ज्वलत्यन्तर्निरन्तरम् ।
विलीनं निखिलं तत्त्वं पश्यन् योगी न लिप्यते ॥११॥

व्याख्या – परशिवे विलीनं विश्वं तन्मयत्वेन पश्यन् शिवयोगी सर्वदोषविदूरस्तिष्ठतीत्याह – **ज्योतिर्लिङ्गे** इति । **चिदाकारे** चित्स्वरूपे **ज्योतिर्लिङ्गे** ज्योतिर्मयलिङ्गे **अन्तः निरन्तरं ज्वलति** सति अन्तर्हृदयकमले सततं प्रकाशमाने सति **योगी** शिवयोगी **निखिलं तत्त्वं** सर्वं शिवादि-भूम्यन्तषट्त्रिंशत्तत्त्वजातं परशिवे तस्मिन् **विलीनं पश्यन्** विलयं प्राप्तमिति परिभावयन् **न लिप्यते** दोषविदूरत्वेन तिष्ठति ॥ यदा शिवयोगी मनसा सह सर्वेन्द्रियाणां बाह्यसम्पर्केभ्यः सर्वेभ्यो नितरां निर्मोचनं संसाध्यान्त-र्मुखीभूतेन्द्रियो भवति, तदाऽखण्डचिद्रूपपरशिवावधानरूपे अनन्तदीर्घो-ज्ज्वलप्रकाशे योगी निमज्जति । तदेव ज्योतिर्लिङ्गाभिधानं महालिङ्गम् । तदेव लिङ्गं शिवयोगी मध्येहृदयकमलं शुद्धभाववस्तुभिः पूजयन्नासीत् । इदानीं तु तज्ज्ञानोपासनं स्थिरं निरन्तरं च जातम् । इदमेवात्र श्लोके निरन्तर-शब्देनाऽभिप्रेतम् । अस्मिन्ननुभवपारम्ये शिवयोगी चराचरविश्वनिर्माण-साधनभूतं षट्त्रिंशत्तत्त्वजातं महालिङ्गे निमग्नं भावयति । तदवस्थायां न किमपि तं स्पृशति दूषयति च । इयमेव स्थितिः स्वीकृतप्रसादिनः शिव-योगिनोऽलिप्तस्वरूपिणी ॥११॥

अन्तर्मुखेन मनसा स्वात्मज्योतिषि चिन्मये ।
सर्वानप्यर्थविषयान् जुह्वन् योगी प्रमोदते ॥१२॥

व्याख्या – उक्तार्थमेव होमरूपेण विशेषयति – **अन्तर्मुखेनेति** । **अन्तर्मुखेन** प्रत्युन्मुखेन **मनसा** चित्तेन **चिन्मये** चित्स्वरूपे **स्वात्मज्योतिषि**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्वस्वरूपाग्नितेजसि **सर्वान् अपि अर्थविषयान्** सकलानपि पदार्थान् **जुह्वन्** हवीरूपेण समर्पयन् **योगी** शिवयोगी **प्रमोदते** प्रमोदमनुभवति ॥ अत्र योगिनो विशेषहोमविधिर्निरूप्यते । शिवयोगिनो मन एव यजमानः । तच्च मनः परशिवात्मके महति चिन्महोदधौ निमग्नम् । परशिवात्मकस्यैव ज्योतिर्लिङ्गस्यौज्ज्वल्यमेव होमाग्निः । तत्र हवींषि भवन्ति सकलमानसप्रतिमाभूतानि सर्वेन्द्रियवस्तूनि । एतान्यपि परशिवात्मके परमचैतन्ये निमग्नानि । अन्ते यज्ञफलं च परशिवाभिन्नशिवयोगिनाऽनुभूयमान आनन्दः (प्रमोदः) ॥१२॥

सच्चिदानन्दजलधौ शिवे स्वात्मनि निर्मलः ।
समर्प्य सकलान् भुङ्क्ते विषयान् तत्प्रसादतः ॥१३॥

व्याख्या – सकलेन्द्रियविषयान् शिवाभिन्ने स्वात्मनि समर्प्य तान् प्रसादरूपेण शिवयोगी स्वीकरोतीत्युक्त्वा स्वीकृतप्रसादिस्थलं समापयति – **सच्चिदानन्देत्यादिना । निर्मलः** परमपवित्रः शिवयोगी **सच्चिदानन्दजलधौ** सच्चिदानन्दसमुद्रे **स्वात्मनि** स्वस्यात्मनि **शिवे** तत्स्वरूपे परशिवे **सकलान्** सर्वान् **विषयान्** शब्दादीन्द्रियविषयान् **समर्प्य** अर्पयित्वा **तत्प्रसादतः** तत्प्रसादरूपेण **भुङ्क्ते** भुनक्ति ॥ परशिवे समरसैक्यवान् योगी साक्षात्सच्चिदानन्दस्वरूपो भवति स्वयम् । विश्वे सर्वं वस्तु परशिवस्य स्वकम्, शिवयोगी सर्वं वस्तु शिवमयत्वेन पश्यति । एवं सर्वं वस्तु शिवयोगिकृते शिवप्रसाद एव । इदं च पारमार्थिकस्तरे । लौकिकस्तरे तु शिवयोगी सर्वं वस्तुजातं तादात्म्येन परशिवे समर्प्य तत्प्रसादत्वेन स्वीकरोति ॥१३॥

– इति स्वीकृतप्रसादिस्थलम् –

२. अथ शिष्टोदनस्थलम् – (९४)

प्रकाशते या सर्वेषां माया सैवोदनाकृतिः ।
लीयते तत्र चिल्लिङ्गे शिष्टं तत्परिकीर्तितम् ॥१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

जगदङ्गे परिग्रस्ते मायापाशविजृम्भिते ।
स्वात्मज्योतिषि बोधेन तदेकमवशिष्यते ॥१५॥

व्याख्या – तच्छित्प्रसादरूपेण स्वीकृतप्रसादिनः शिवयोगिनो मायातत्त्वमेव शिष्टोदनमिति युग्मेनाह – **प्रकाशते इत्यादिना । या माया** या मिश्रात्मिकाऽधोमायेत्यपरनामधेया माया **सर्वेषां प्रकाशते** सकलानां शरीरेन्द्रियविश्वभोगवस्तुरूपेण प्रकटतां गच्छति, **सा एव** सा मायैव **ओदनाकृतिः** ओदनस्वरूपिणी । **तत्र चिल्लिङ्गे** तस्मिन् चिद्रूपलिङ्गे सा माया लीयते लयं गच्छति । **तत्** तदेव **शिष्टं परिकीर्तितं** शिष्टमिति, प्रसादशेष इति यावत्, कथ्यते ॥ **मायापाशविजृम्भिते** कलादिपृथिव्यन्तत्रिंशत्तत्त्वरूपैः पाशैः परिवृते **जगदङ्गे** विश्वमेव शरीरत्वेन ध्रियमाणे **स्वात्मज्योतिषि** स्वस्वरूपप्रकाशे **बोधेन** स्वात्मज्ञानेन **परिग्रस्ते** आक्रान्ते सति **तदेकं** तन्मायातत्त्वमेवैकम् **अवशिष्यते** अवशेषत्वेन तिष्ठति ॥ शैवैर्वीरशैवैश्चाऽङ्गीकृतेषु षट्त्रिंशत्तत्त्वेषु मध्ये शिव-शक्ति-सदाशिवेश्वर-शुद्धविद्याख्यमादिपञ्चकं शुद्धतत्त्वानि; ततः पश्चात्सप्ततत्त्वानि माया-पुरुष-कलाऽविद्या-राग-काल-नियत्याख्यानि शुद्धाशुद्धतत्त्वानि; प्रकृतितत्त्वादारभ्य भूमिपर्यन्तं चतुर्विंशतितत्त्वानि केवलम् अशुद्धतत्त्वानि । तत्र मायातत्त्वोद्भूतानि त्रिंशत्तत्त्वानि स्वीकृतप्रसादसम्पन्नस्य शिष्टोदनं भवति । यदा तानि मायोत्पन्नतत्त्वानि परशिवे विलयं गच्छन्ति तदा माया शक्तिरूपमूलस्वरूपेण तिष्ठति । "तदेकमवशिष्यते" इत्यस्यायमेव भावः ॥१४-१५॥

अखण्डसच्चिदानन्दपरब्रह्मस्वरूपिणः ।
जीवन्मुक्तस्य धीरस्य माया कैङ्कर्यवादिनी ॥१६॥

व्याख्या– शिवयोगिनो माया कथमास्ते इत्यत्राह– **अखण्डेत्यादिना । अखण्डसच्चिदानन्दपरब्रह्मस्वरूपिणः** सच्च चिच्च आनन्दश्चेत्येषां समाहारः सच्चिदानन्दम्, अखण्डं च तत् सच्चिदानन्दं चाऽखण्डसच्चिदानन्दम्, तादृशं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परब्रह्म, तस्य स्वरूपम् अस्यास्तीति अखण्ड.....स्वरूपी तस्य, तादृशस्य **जीवन्मुक्तस्य** सदेहमुक्तिभाजनस्य **धीरस्य** धीसम्पन्नस्य च शिवयोगिनः **माया** अवशिष्टा मूलस्वरूपिणी मायाशक्तिः **कैङ्कर्यवादिनी** किङ्करस्य भावः कैङ्कर्यं दासभावः, कैङ्कर्यं वदतीति कैङ्कर्यवादिनी, स्वयमेव दासभावं ब्रुवन्ती सत्यास्ते ॥ यद्यपि मायोत्पन्नानि त्रिंशत्तत्त्वानि परमात्मनि विलयं गच्छन्ति, तथापि माया स्वयं सृष्टिपूर्वदशायां यथा मूलविमर्शाशक्ति-रूपेणाऽऽसीत्तथैवाऽवशिष्यते इत्युक्तम् । ननु यदि मायाजातानि सर्वाणि तत्त्वानि परशिवे विलयं गच्छन्ति तर्हि कथं मायामात्रमवशिष्यते इत्या-क्षेपे कृते एवं समाधीयते – मूलस्वरूपे तिष्ठन्ती सा माया शिवैक्यस्य जीवन्मुक्तस्य धीसम्पन्नस्य च शिवयोगिनः कैङ्कर्यं साधयितुं तथाऽऽस्ते इति । परिपूर्णसच्चिदानन्दस्वरूपेण परशिवेनाऽविनाभावेन तिष्ठन्ती सा शक्तिः परशिवे समरसैक्यं प्राप्तस्य शिवयोगिनः कैङ्कर्यं करोतीत्यर्थः ॥१६॥

विश्वसंमोहिनी माया बहुशक्तिनिरङ्कुशा ।
शिवैकत्वमुपेतस्य न पुरः स्थातुमीहते ॥१७॥

व्याख्या – एवंभूतां शक्तिं विशेषयति – **विश्वसंमोहिनीति** । **विश्व-संमोहिनी** विश्वं संमोहयतीति तादृशी, जगन्मोहकारिणी, **बहुशक्ति-निरङ्कुशा** बह्वीभिः शक्तिभिनिरर्गला सत्यपि **माया** मायाशक्तिः **शिवै-कत्वमुपेतस्य** शिवे समानसमरसैक्यभावं प्राप्तस्य शिवयोगिन **पुरः** अभिमुखे **स्थातुं न ईहते** मोहकत्वेन स्थातुं नेच्छति ॥ यथा परशुर्दारुदण्डस्य साहाय्येन वृक्षं छिनत्ति तथैव शिवयोगी मायायाः साहाय्येन मायाव्यवहारं भिनत्ति । कथं माया शिवयोगिनं दासीभावेन सेवते इत्यनेन स्पष्टं भवति । एवं मायास्वायत्तीकरणेन शिवयोगी शिष्टोदनस्थली भवति ॥१७॥

ज्योतिर्लिङ्गे चिदाकारे निमग्नेन महात्मना ।
भुज्यमाना यथायोगं नश्यन्ति विषयाः स्वतः ॥१८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शिवैक्यस्य नष्टविषयत्वमाह – **ज्योतिर्लिङ्गे इति** । चिदाकारे चित्स्वरूपे **ज्योतिर्लिङ्गे** ज्योतिःस्वरूपिणि महालिङ्गे **निमग्नेन** विलयं गतेन **महात्मना** महामहिमेन शिवयोगिना **यथायोगं** यथावकाशं **भुज्यमानाः** अनुभूयमानाः **विषयाः** इन्द्रियविषयाः **स्वतः नश्यन्ति** स्वयमेव क्षयं गच्छन्ति ॥ शिवयोगिनो भोगो नामेन्द्रियविषयांस्तान् परशिवे समर्प्य प्रसादरूपेण तेषां भुक्तिः । तत्परिणामस्तावत् तेषां विषयाणां वासना तस्य शिवयोगिनो मनसि नाऽवशिष्यते । वासनैव तावद्बन्धकारिणी, न तु विषयाणामनुभूतिः । यथासम्भवं विषयाणामनुभवेन मनोविक्षेपो न सञ्जायते, परन्तु विषयानुभवेच्छा समुपतिष्ठति चेत्तदैव विक्षिप्तमना भवति मनुष्यः । विगतेच्छावतः शिवयोगिनो यथायोगं विषयानुभूतिर्न भवति मनोविक्षेपकारणं नापि बन्धकारणम् । शिष्टोदनस्थलिनः शिवयोगिनो मनः समुच्चलनरहितशान्तसमुद्रवद् इन्द्रियविषयैर्न भवति विक्षिप्तम् । तदुक्तं भगवता – "आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् । तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥" (भ. गी., २.७०) इति । इयमेव 'ब्राह्मी स्थितिः' । तदेवोक्तम् – "एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति" (भ. गी., २.७२) इति ॥१८॥

शब्दादयोऽपि विषयाः भुज्यमानस्तदिन्द्रियैः ।
आत्मन्येव विलीयन्ते सरितः सागरे यथा ॥१९॥

व्याख्या – विषयाः कथं विलयं गच्छन्तीत्यत्राह – **शब्दादय इति** । **शब्दादयः अपि** शब्दस्पर्शरूपरसगन्धादयोऽपि **विषयाः** इन्द्रियविषयाः, **तदिन्द्रियै** तत्तदिन्द्रियैः श्रवणादिभिः **भुज्यमानाः** अनुभूयमानाः **आत्मन्येव** शिवयोगिनः स्वात्मन्येव **सरितः** नद्यः **सागरे यथा** समुद्रे यथा तथा **विलीयन्ते** विलयं गच्छन्ति ॥ [पश्यत – पूर्वश्लोकस्य व्याख्याम्] । चिदानन्दस्यानुभूतिः स्वीकृतप्रसादिस्थलम्, मायावशीकरणं च शिष्टोदनस्थलम् ॥१९॥

अर्थजातमशेषं तु ग्रसन् योगी प्रशाम्यति ।
स्वात्मनैवास्थितो भानुस्तेजोजालमशेषतः ॥२०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – शिवयोगी कथं स्वस्थो भवतीत्यत्रोक्त्वा शिष्टोदनस्थलं समापयति – **अर्थजातमिति । योगी** शिवयोगी **अशेषं** न विद्यते शेषः यस्मिन् कर्मणि तथा **अर्थजातं** पदार्थसमुदायं **ग्रसन्** स्वस्वरूपे उपसंहरन् **प्रशाम्यति** स्वस्थो भवति । **भानुः** सूर्यः **अशेषतः** निःशेषं यथा भवति तथा **तेजोजालं** स्वकिरणसमुदायं **ग्रसन्** उपसंहरन् **आत्मनैव** स्वयमेव **आस्थितः** स्वस्थो भवति ॥ दृष्टान्तालङ्कारः । सूर्यः स्वकिरणसमूहम् उपसंहरन्नस्तं गच्छति । शिवयोगी च स्वात्मन्येव सर्वमर्थसमूहमुपसंहरन् स्वस्थो भवति । सूर्यास्ते जाते दिनस्य व्यवहारजालं रात्रिगतप्रशान्तौ स्वैरं स्वैरं विलयं गच्छति । शिवयोगिनः सर्वेन्द्रियविषयजाते स्वात्मनि विलयं गते तस्य मनश्चित्तसमुद्रे प्रशान्तिं गच्छति तस्य शिवाद्वैतज्ञाने प्राप्तजागृतेः सर्ववासना-निर्मुक्तिर्जाता । तादृशः शिष्टोदनस्थली चराचरलयस्थलयोग्यो भवति ॥२०॥

– इति शिष्टोदनस्थलम् –

३. अथ चराचरलयस्थलम् – (९५)

लिङ्गैक्ये च समापन्ने चरणाचरणे गते ।
निर्देही स भवेद्योगी चराचरविनाशकः ॥२१॥

व्याख्या – शिष्टोदनस्थलसम्पन्नस्य शिवयोगिनश्चराचरलयस्थलमाह – **लिङ्गैक्ये इति । चरणाचरणे गते** चराचरात्मके विश्वे विलयं गते **लिङ्गैक्ये समापन्ने** महालिङ्गसामरस्ये समासादिते सति **योगी** शिवयोगी **निर्देही** निर्देहः भूत्वा **चराचरविनाशकः** जङ्गमस्थावरविश्वमलनिर्मूलन-कारी **भवेत्** स्यात् ॥ अग्निहोत्रादिकर्मजातम्, तपश्चरणम्, तत्फलभूतं ज्ञानं च प्रपञ्चः । सर्वश्चासौ प्रपञ्चः शिवसृष्टिश्चराचरात्मिका, या परशिवसामरस्यवति शिवयोगिनि विलीयाऽदृश्यतां गच्छति । एषैव चराचरलयः (चराचरविनाशः) यथा विषसम्बन्धिनी शक्तिर्मन्त्रेण निरुध्यते तथैव मलशक्तिस्तदिदं न विश्वं परन्तु परशिवब्रह्मेति ज्ञानेन निरुध्यते । अत एव सोऽलिप्तो निर्देही । स एव चराचरविनाशकः, परशिवादन्यत्वेन चराचरस्याऽऽस्तिक्याभावात् ॥२१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अनाद्यविद्यामूला हि प्रतीतिर्जगतामियम् ।
स्वात्मैकबोधात्तन्नाशे कुतो विश्वप्रकाशनम् ॥२२॥

व्याख्या – अविद्याजन्यं जगद् विद्ययैव नष्टं भवतीत्याह – **अनादी-त्यादिना** । **इयम्** एषा **जगतां** लोकानां **प्रतीतिः** प्रतिपत्तिः **अनाद्य-विद्यामूला** अनादिभूता अविद्या मूलं कारणं यस्याः सा, तादृशी, हीति प्रसिद्धिः । **स्वात्मैकबोधात्** परशिवेन स्वात्मन ऐक्यज्ञानात् **तन्नाशे** तस्या अविद्याया नाशे सति **विश्वप्रकाशनं कुतः** विश्वस्याभिव्यक्तिः कुतः स्यात् ? न कुतोऽपि भवतीत्यर्थः ॥ "अनाद्यविद्यासम्बन्धात्तदंशो जीव-नामकः" (सि. शि., ५.३४) इति, "ममैवांशो जीवलोके जीवभूतः सनातनः" (भ. गी., १५.७) इति चोक्तरीत्याऽनाद्यविद्याकारणादेव परशिवांशो जीवो मनसेन्द्रियैश्च सह शरीरधारी भूत्वेन्द्रियविषजातं भुञ्जन् स्वस्य निजस्वरूपं नितरां विस्मरति । तद्भोगव्यामोहेन निजस्वरूप-ज्ञानमाव्रियते । अविद्या तत्र मनोहरविषयमयस्य प्रपञ्चस्य मोहकारणं भवति । अनाद्यविद्याकारणादेव शिवांश एव जीव इत्येष साक्षात्कारो विद्या । एष च साक्षात्कारो गुरूपदेशमार्गदर्शनाभ्यां तत्त्वमस्यादि-महावाक्यानां श्रवण-मनन-निदिध्यासनैर्जायते । प्रकाशेन तिमिरनाशवद् विद्ययाऽविद्यानाशः । शिवयोगिनामस्मिन् स्थले शिवजीवैक्यबोधरूपा विद्या नैरन्तर्यं भजते । एवमविद्यानाशे जाते जगद्भावदर्शनमेव नास्ति । एष एव चराचरलयः ॥२२॥

यथा मेघाः समुद्भूता विलीयन्ते नभस्थले ।
तथाऽत्मनि विलीयन्ते विषयाः स्वानुभाविनः ॥२३॥

व्याख्या – यथाऽऽकाशे मेघाः संभूय विलीयन्ते तथैव शब्दादिविषया चैतन्यात्मनि सम्भूय विलीयन्ते इत्याह – **यथेति** । **यथा** येन प्रकारेण **नभस्थले मेघाः** जलधराः आकाशे **समुद्भूताः** समुत्पन्नाः सन्तः तत्रैव **विलीयन्ते** विलयं गच्छन्ति, **तथा** तेन प्रकारेणैव **स्वानुभाविनः** स्वानुभावोऽ-स्यास्तीति स्वानुभावी, तस्य, तादृशस्य स्वस्वरूपानुभाविनः शिवयोगिनः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आत्मनि स्वात्मचैतन्ये **विषयाः** इन्द्रियविषयाः शब्दादयः समुत्पन्नाः सन्तः विलीयन्ते ॥ विश्वसृष्टिस्थितिलयकारणं परशिवब्रह्मेत्युक्तत्वात्, परशिवब्रह्मणि समरसैक्यं प्राप्तस्य शिवयोगिनः स्वात्मनि सर्वमिदमिन्द्रियविषयजातं लयं गतमित्यवगन्तव्यम् । मेघनभस्थलदृष्टान्तस्तावत् कुतो वा विषया संभूताः कुत्र वा ते विलयं गच्छन्तीति विशदीकरणे समर्थः ॥२३॥

स्वप्ने दृष्टं यथा वस्तु प्रबोधे लयमश्नुते ।
तथा सांसारिकं सर्वमात्मज्ञाने विनश्यति ॥२४॥

व्याख्या – उक्तमेव दृष्टान्तान्तरेण विशदयति – **स्वप्ने इति । यथा** येन प्रकारेण **स्वप्ने दृष्टं वस्तु** स्वप्ने अनुभूतं वस्तुजातं **प्रबोधे** निद्रावसाने **लयम् अश्नुते** अदृश्यतां गच्छति, **तथा** तेन प्रकारेण **आत्मज्ञाने** स्वात्मस्वरूपज्ञाने जाते, शिवोऽहंबोधे जाते, **सांसारिकं सर्वं** संसारसम्बन्धि सर्वं वस्तुजातं **विनश्यति** विनाशं गच्छति ॥ अद्वैतिनो जाग्रत्स्वप्नसुषुप्त्यवस्थासु जागृत्स्वप्नावस्थे व्यावहारिकसत्यत्वेन सुषुप्त्यवस्थां प्रातिभासिकसत्यत्वेन च मन्वते । उभयमपि सत्यत्वं मिथ्यात्वपक्षे विनिवेशयन्ति । तेषां मते ब्रह्मैव पारमार्थिकं सत्यम् । परन्तु वीरशैवसिद्धान्ते प्रपञ्चस्य शिवमयत्वाङ्गीकारात्, सर्वावस्थासु जगत् सत्यमेव । जीवेश्वरजगतां मध्ये भेदोऽपि सत्यं शिवजीवैक्ये विश्वलयत्वात्तेषां जीवेश्वरजगतामभेदोऽपि सत्यमेव । स्वप्नान्ते जागृदवस्थाऽनुवर्तते, एवमद्वैते जाते सर्वोऽपि भेदो निवर्तते । पूर्वावस्थावसाने परावस्था जायते चेत्पूर्वावस्थाया मिथ्यात्वं न शक्यते वक्तुम् । अतो स्वप्नसादृश्याङ्गीकाराज्जगतो सत्यत्वं न हीयते । आत्मज्ञाने जाते सर्वमिदं दृश्यं जगद्विलीयते । अयमेव चराचरविनाशः ॥२४॥

जाग्रत्स्वप्नसुषुप्तिभ्यः परावस्थामुपेयुषः ।
किं वा प्रमाणं किं ज्ञेयं किं वा ज्ञानस्य साधनम् ॥२५॥

व्याख्या– उक्तमेव प्रकारान्तरेणाह– **जाग्रदित्यादिना । जाग्रत्स्वप्नसुषुप्तिभ्यः** जाग्रदवस्था, स्वप्नावस्था, सुषुप्त्यवस्था चेति तिसृभ्यः अवस्थाभ्यः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परावस्थाम् अतिरिक्तां तुरीयावस्थाम् **उपेयुषः** प्राप्तस्य **शिवयोगिनः किं वा प्रमाणं किं ज्ञेयं किं वा ज्ञानस्य साधनम्** ? त्रिपुटीमयप्रपञ्चातीतत्वात् मान-मेय-ज्ञानकरणानि कानि वा भवितुमर्हन्ति ? न कान्यपीत्यर्थः ॥ योगशास्त्रोक्तरीत्या खेचरीमुद्रा शाम्भवीमुद्रा चेत्युभयप्रकाराभ्यां परशिव-ब्रह्मानुसन्धानमुद्राभ्यां तुरीयावस्था शिवयोगिना प्राप्यते । चराचरात्मकं विश्वं व्याप्यमाने सर्वविश्वसाक्षिभूतज्ञानप्रदीपस्वरूपे च परशिवब्रह्मणि चित्तैकाग्र्यानुसन्धानं भवति खेचरी मुद्रा । तदुक्तम् – "जाग्रत्स्वप्न-सुषुप्तिषु स्फुटतरा या संविद्विजृम्भते, या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी । सैवाऽहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति स चण्डालोऽस्तु द्विजोऽस्तु वा स तु गुरुरित्येषा मनीषा मम ॥ (मनीषा प., ५) इति । शरीररूपशिवपुरे हृत्कमलरूपे देवसद्मनि चिच्छक्त्यात्मके सिंहासने चित्प्रकाशभूतो यः परशिवो विराजते स एव स्वात्मेति चित्तैकाग्र्या-नुसन्धानं च या भवति सा शाम्भवी-मुद्रा । मुद्रयोरनयोः सिद्धिद्वारा स्वस्वरूप-नुसन्धानमेव तुरीयावस्था, यस्या जाग्रदादित्रयवस्थात्वात् पराव-स्थेति नामान्तरमन्वर्थमेव । अवस्थायामस्यां स्थितस्य शिवयोगिनो नास्ति त्रिपुटीमयप्रपञ्चावभासः । त्रिपुट्येव चराचरम्, त्रिपुटीरहितत्वमेव चराचरलयस्थलम् ॥२५॥

तुर्यातीतपदं यत्तद् दूरं वाङ्मनसाध्वनः ।
अनुप्रविश्य तद्योगी न भूयो विश्वमीक्षते ॥२६॥

व्याख्या – इदानीं तुर्यातीतपदं विशदयति – **तुर्यातीतपदमिति । यत्** तुर्यातीतपदं यदुच्यते तुर्यातीतपदमिति **तद् वाङ्मनसाध्वनः दूरं** तद् स्तुतिध्यानमार्गतोऽतीतम् । **तद् अनुप्रविश्य** तत्तुर्यातीतपदम् **अनुप्रविश्य** **योगी** शिवयोगी **भूयः** पुनरपि **विश्वं न ईक्षते** विश्वं न पश्यति ॥ मौनशान्तिमतिक्रम्य स्थितायाः शान्तेः स्वरूपभूतया 'मौनान्तमुद्रया' प्राप्तेयमवस्था तुर्यातीतपदमित्युच्यते । स्तुत्यादिवागगोचरं ध्यानादिमनो-व्यवहारातीतं च तत्पदम् । तत्पदं प्राप्तः प्रविष्टो वा शिवयोगी न पुनर्विश्वं पश्यति । अतस्तस्य शिवयोगिनो नास्ति चराचरात्मकविश्वसम्बन्धः ॥२६॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नान्यत्पश्यति योगीन्द्रो नान्यज्ज्ञानाति किञ्चन ।
नान्यच्छृणोति सन्दृष्टे चिदानन्दमये शिवे ॥२७॥

व्याख्या – सच्चिदानन्दस्वरूपस्य परशिवस्य स्वाभिन्नत्वेन दर्शने जाते मायिकरूपादिदर्शनं नास्तीत्याह – **नान्यदिति । चिदानन्दमये** चिदानन्दस्वरूपे **शिवे** परशिवे **सन्दृष्टे** स्वात्माभिन्नत्वेन साक्षात्कृते सति, योगीन्द्रो योगिराट् शिवयोगी **नान्यत् पश्यति** नाऽन्यद्रूपं वीक्षते, **नाऽन्यत्किञ्चन जानाति** नाऽपरं किञ्चिज्ज्ञानाति, **नाऽन्यच्छृणोति** नाऽपरं किञ्चित् निशामयते ॥ द्वैतभावे सत्येवान्यद्रूप-रस-गन्ध-स्पर्शशब्द-प्रत्यक्षस्याऽवकाशो भवति । सर्वस्यैवात्मत्वे न किञ्चिदस्ति दर्शनादि-विषयमन्यत् । तत्र श्रुतिराह – "यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति, यत्र वा अस्य सर्वमात्मैवाभूत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्त-त्केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयाद्येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ।" (बृ. उ., २.४.१४) इति ॥२७॥

असदेव जगत्सर्वं सदिव प्रतिभासते ।
ज्ञाते शिवे तदज्ञानं स्वरूपमुपपद्यते ॥२८॥

व्याख्या – पूर्वोक्तमेव विशदीकुर्वन् चराचरलयस्थलं समापयति – **असदेवेति ।** असद् एव परशिवातिरिक्तत्वेन असदेव **सर्वं जगत्** सकलं विश्वं **सदिव प्रतिभासते** परशिवातिरिक्तत्वेन सदिवाऽवभासते । **ज्ञाते शिवे** परशिवे साक्षात्कृते सति **तदज्ञानं** भेदबुद्धिकारणीभूता मूलाऽविद्या **स्वरूपम् उपपद्यते** मूलचिच्छक्तिस्वरूपं प्राप्नोति ॥ शिवातिरिक्तत्वेन शिवयोगिनो नास्ति स्वविमर्शनमिति भावः । परशिवव्यतिरिक्तत्वेन जगतोऽस्तित्वमेव नास्ति । परशिवव्यतिरिक्तत्वेन विश्वस्य प्रतीतिरेव

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भ्रमाधीना । स्वात्मसाक्षात्कारयुक्तस्य शिवयोगिनः परशिवातिरिक्तत्वेन न किञ्चदन्यदस्ति ॥२८॥

– इति चराचरलयस्थलम् –

४. अथ भाण्डस्थलम् – (९६)

ब्रह्माण्डशतकोटीनां सर्गस्थितिलयान् प्रति ।
स्थानभूतो विमर्शो यस्तद्भाण्डस्थलमुच्यते ॥२९॥

व्याख्या – चराचरलयस्थलसम्पन्नस्य शिवयोगिनो भाण्डस्थलमाह – **ब्रह्माण्डेत्यादिना** । **ब्रह्माण्डशतकोटीनाम्** अगणितकोटिब्रह्माण्डानां **सर्गस्थितिलयान् प्रति** सृष्टिस्थितिसंहारान् प्रति **यः स्थानभूतः** यः आश्रयभूतः **विमर्शः** शब्दब्रह्मरूपविचारः **भाण्डस्थलम् उच्यते** भाण्डस्थलमिति कथ्यते ॥ ज्ञानकर्मसमरसस्वरूपिणः परशिवस्य विमर्शाशक्तिर्महामाया, कुण्डलिनी, शब्दतत्त्वम्, शब्दब्रह्म, शुद्धमाया, पराशक्तिरित्यादिबहुभिर्नामभिर्ज्ञायते । परशिवस्य परिग्रहशक्तिर्या सैव परबिन्दुरिति कथ्यते । परबिन्दुस्वरूपेऽस्मिन् सा शुद्धाध्वनः सृष्टौ कारणभूता । इयं प्रज्ञा हि शिवयोगिनि भाण्डमित्युच्यते । तस्मिन् भाण्डे शक्तेरारभ्य भूमिपर्यन्तं पञ्चत्रिंशत्तत्त्वान्यन्तर्भूतानि । स्वीये भाण्डे विलीनपञ्चत्रिंशत्तत्त्वः सन् स्वात्मसाक्षात्कारवान् शिवयोग्येव भाण्डस्थलीत्युच्यते । अयमाद्योन्मेषः शिवतत्त्वस्य यो हीच्छाज्ञानादिशक्तिप्रभावेण जगत उपादानकारणं भवति । द्वितीयोन्मेषस्तु सदाशिवतत्त्वस्वरूपेण यो हि नादबिन्दू अवलम्बते । ईश्वरतत्त्वस्वरूपेण पुनस्तृतीयोन्मेषो यस्मिन्ननन्ताद्यष्टौ विद्येश्वरा निवसन्ति । शुद्धविद्यातत्त्वरूपेण च चतुर्थोन्मेषो भवति यस्मिन् सप्तकोटिमन्त्राः शैवागमाश्च निहिताः सन्ति । बिन्दुशब्देन गीयमानायाः शक्तेर्वर्णाध्वादिषडध्वानः संभवन्ति । ततः शिवाज्ञया जीवानामुपकाराय लोकसृष्टिः प्रवर्तते । सुखदुःखात्मककर्मफलभोगेन कर्मक्षयं संसाध्य पुनरावृत्तिरहितमोक्षप्राप्त्यवसरः परशिवेन कल्प्यते इति जीवानामुपकाराय

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लोकसृष्टिरित्युक्तम् । फलभोगाय कल्पितमिदं विश्वं फलभोगान्ते मायाशक्तौ विलयं गच्छति । सा माया पुनः परशिवादविनाभावसंपन्ना पराशक्तिरिति वा विमर्शाशक्तिरिति वा वर्ण्यमानायां महामायायां विलीना भवति । इयमेव विमर्शाशक्तिः प्रपञ्चसृष्टिस्थितिलयमूल-कारणीभूता सती शिवयोगिनो भाण्डस्थलं भवति । विश्वसृष्ट्यादिप्रक्रिया शिवयोगिनो विमर्शायां प्रवर्तमाना महाविचारस्वरूपिणी । अत एवायं शिवयोगी भाण्डस्थलीत्युच्यते ॥ भाण्डं नाम सर्ववस्तूनां समूहः । "सर्वमावपनं भाण्डम्" इत्यमरः (२.६.२१) । परशिवे समरसैक्यं प्राप्तस्य शिवयोगिनो विमर्शे चराचरात्मकप्रपञ्चो विलयं गतः । परशिवा-न्निःसृतोऽयं प्रपञ्चः "ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्लं तदब्रह्म तदेवामृतमुच्यते । तस्मिँलोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥" इत्येवंरूपेण दृष्टान्तेन विशदीक्रियते कठश्रुतौ (६.१) । भगव-द्गीतायामयवेव दृष्टान्तो विव्रियते । तथा हि – "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । छन्दांसि तस्य पर्णानि यस्तं वेद स वेदवित् ॥ अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥ न रूपमस्येह तथोपलभ्यते नान्तरे न चादिर्न च सम्प्रतिष्ठा । अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा ॥ ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः ॥" (भ. गी., १५.१-४) इति । एष अश्वत्थः सुष्ठु रूढमूलः । तथापि कठिनेना-सङ्गकुठारेण च्छेत्तुं शक्यते । तदनन्तरं तत्पदमन्वेष्टव्यं यत्प्राप्य न पुनरावर्तन्ते । पदमिदं जीवन्मुक्तस्य पदम् । बीजोद्भेदात्पूर्वं यथाऽश्व-त्थस्य पर्णशाखादयो बीजे एव निहिता भवन्ति, तथा सृष्टेः प्राक् सर्वं चराचरमिदं विश्वं परमात्मनि शक्तिविशिष्टपरशिवे विलीनमासीत् । स्थितिकालेऽधिष्ठानभूते परमात्मनि विस्तरेण विराजते । संहारकाले सर्वं तत्पुनः परशिवे लयं गच्छतीति सृष्टिस्थितिलयानां सरणिः । जीवन्मुक्तस्य शिवयोगिनस्त्वेषा सरणिः स्वविमर्शे विचाररूपेण प्रवर्तते । स विमर्श एव भाण्डम् । तदस्यास्तीति शिवयोगी भाण्डस्थलीत्युच्यते ॥२९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विमर्शाख्या पराशक्तिर्विश्वोद्भासनकारिणी ।
साक्षिणी सर्वभूतानां समिन्धे सर्वतोमुखी ॥३०॥

व्याख्या – भाण्डभूतस्य विमर्शस्य स्वरूपमाह – **विमर्शाख्येति ।** **विमर्शाख्या** 'विमर्शा' इत्यभिधानवती, **विश्वोद्भासनकारिणी** विश्वस्य उद्भासनं जगतोऽभिव्यक्तिः, विश्वोद्भासनं करोतीति विश्वोद्भासनकारिणी, तादृशी **पराशक्तिः** शुद्धमायाशक्तिः **सर्वभूतानां** सर्वेषां तत्त्वानां **साक्षिणी** साक्षीभूता **सर्वतोमुखी** सर्वतोमुखानि यस्याः सा, सर्वतो परिवीक्षमाणा सती **समिन्धे** प्रकाशते ॥ शुद्धमाया हि ज्ञानेच्छाक्रियाशक्तिस्वरूपमवधार्य विश्वं प्रकाशयतीति विश्वोद्भासनकारिणी । सैव पञ्चत्रिंशत्तत्त्वानामधिष्ठात्री षट्त्रिंशत्तत्त्वेष्वादिभूतेन शिवेन सहयोगे तिष्ठन्ती सर्वं व्याप्नोति । सैव शुद्धाध्वनि पराशक्तिरूपेण देवानां तनुभूता, सदाशिवतत्त्वरूपेण करणभूता, ईश्वरतत्त्वरूपेण भुवनभूता, शुद्धविद्यातत्त्वरूपेण च भोगविषयभूता तिष्ठति ॥ एषैव भाण्डशब्देन गीयते ॥३०॥

विश्वं यत्र लयं याति विभात्यात्मा चिदाकृतिः ।
सदानन्दमयः साक्षात्सा विमर्शमयी कला ॥३१॥

व्याख्या – विमर्शाया विशेषं पुनर्विमृशति – **विश्वमिति ।** **यत्र** यस्यां **विश्वं** चराचरात्मकं जगत् **लयं याति** लयं गच्छति, यस्यां **चिदाकृतिः** चित्स्वरूपः **आत्मा** स्वात्मा **विभाति** प्रकाशते, यस्यां शिवयोगी **सदानन्दमयः** सच्च आनन्दश्च, सदानन्दौ, तौ प्राचुर्येण वर्तते इति सदानन्दमयः, **सा** सैव **विमर्शमयी कला** विमर्शमयी शक्तिः, विमर्शाशक्तिरित्यर्थः ॥ विमर्शाशक्तिः परबिन्दुरिति कलेति च व्यवह्रियते । परशिवस्य विमर्शाशक्तित आविर्भूयेदं जगद् पुनरावृत्य तस्यामेव विलयं याति । कार्याणि हि स्वोपादानकारणे विलीयन्ते अथवा परमार्थतो तद्रूपेणैवाशिष्यन्ते । मृण्मयो घटोऽन्ते मृद्रूपेणैव पर्यवस्यति । एवं विमर्शाया अभिव्यक्तिभूतश्चिद्रूप आत्मा तामेव प्रविश्याऽपरामृष्टबाह्यविश्वस्तद्गतचिदानन्दं भुङ्क्ते ॥३१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पराहन्तासमावेशपरिपूर्णविमर्शवान् ।
सर्वज्ञः सर्वगः साक्षी सर्वकर्ता महेश्वरः ॥३२॥

व्याख्या – लिङ्गाङ्गपदवाच्ययोः शिवजीवयोर्भाण्डभूतविमर्शाश्रयत्वमाह – **पराहन्तेत्यादिना** । **पराहन्तासमावेशपरिपूर्णविमर्शवान्** पराहन्तायाः समावेशः समष्टिभूतशिवजीवसमानाधिष्ठानरूपसहयोगः, तेन परिपूर्णः सर्वात्मना पूर्णो विमर्श अस्यास्तीति परा.....विमर्शवान्, तादृशः **महेश्वरः** परमेश्वरः **सर्वज्ञः** सर्वज्ञाता **सर्वगः** सर्वव्यापकः **साक्षी** सर्वस्य कर्मणः साक्षिभूतः **सर्वकर्ता** सर्वकर्तृत्वशाली च नो चेत्स्फटिकादिप्रकाशवद् भवेज्जडः ॥ "अहमस्मि प्रथमजा" (तै. उ., ३.१०.६) इति, "अहमादिर्हि देवानाम्" (भ. गी., १०.२) इति, "अहं सर्वस्य प्रभवः" (भ. गी., १०.८) इति च यदुक्तं तदनुसारेण परशिव एवादिः सर्वेषाम् । पराहन्तारूपा तस्योर्ध्वमायैव विमर्शेत्युच्यते । अस्याः पराहन्तायाः समवेशेन परशिवः सर्वज्ञत्वादिचैतन्यस्वरूपं भजते । तत्स्वरूपं विना तस्य स्फटिकादिप्रकाशवज्जडता प्रसज्येत । शिवयोग्यपि परशिवे समरसीभूतत्वाद् परशिवसाधारण्येन विमर्शवान् निवृत्तसर्वभेदः सर्वज्ञत्वादिवैशिष्ट्यं भजते । तद्विमर्शवान् योगी भाण्डस्थली भवति ॥३२॥

विश्वाधारमहासंवित्प्रकाशपरिपूरितम् ।
पराहन्तामयं प्राहुर्विमर्शं परमात्मनः ॥३३॥

विमर्शभाण्डविन्यस्तविश्वतत्त्वविजृम्भणः ।
अनन्यमुखसम्प्रेक्षी मुक्तः स्वात्मनि तिष्ठति ॥३४॥

व्याख्या – पुनर्विमर्शस्य स्वरूपमाह युग्मेन – **विश्वाधारेत्यादिना** । **विश्वाधारमहासंवित्प्रकाशपरिपूरितम्** विश्वस्य जगतः आधारः अधिष्ठानं विश्वाधारः, महती संवित् महासंवित्, महाज्ञानम्, विश्वाधारभूता महासंवित्, विश्वाश्रयीभूतमहाज्ञानम्, तस्य प्रकाशः द्युतिः, तेन प्रकाशेन परिपूरितं परिपूर्णं **परमात्मनः विमर्शं** परशिवस्य विमर्शं **पराहन्तामयं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पराहन्तास्वरूपमिति **प्राहुः** वदन्ति ॥ **विमर्शभाण्डविन्यस्तविश्वतत्त्व-विजृम्भणः** विमर्शः एव भाण्डं विमर्शभाण्डम्, तस्मिन् विन्यस्तं विमर्श-भाण्डविन्यस्तं विमर्शभाण्डे स्थापितम्, विश्वतत्त्वानि विश्वनिर्माण-सामग्रीभूतानि पञ्चत्रिंशत्तत्त्वानि विमर्शभाण्डविन्यस्तविश्वतत्त्वानि, तैः विजृम्भते प्रकाशते इति विमर्श.....विजृम्भणः, **मुक्तः** जीवन्मुक्तः शिवयोगी **अनन्यमुखसम्प्रेक्षी** अन्यमुखसम्प्रेक्षी अन्यत् मुखं सम्प्रेक्षते इति तादृशः, अन्यदर्शनापेक्षावान्, न अन्यमुखसम्प्रेक्षी अनन्यमुखसम्प्रेक्षी, अनन्यदर्शनापेक्षावान् सन् **स्वात्मनि तिष्ठति** स्वस्वरूपेण (स्वाभिन्नशिव-स्वरूपेण) तिष्ठति ॥ पराहन्ता एव विमर्शशक्तिरित्युक्तम् । ऊर्ध्वमाया-धोमायादीनि परहन्ताया रूपाणि । विश्वाधारभूता पराहन्ताऽघटित-घटनासामर्थ्यवती । शिवयोगी शुद्धाशुद्धमिश्रतत्त्वानि सर्वाणि तस्यामेव समर्प्य स्वस्थः शिवस्वरूपाभिन्ने स्वस्वरूपे तिष्ठति ॥३३-३४॥

– इति भाण्डस्थलम् –

५. अथ भाजनस्थलम् – (९७)

समस्तजगदण्डानां सर्गस्थित्यन्तकारणम् ।
विमर्शो भासते यत्र तद्भाजनमिहोच्यते ॥३५॥

विमर्शाख्या पराशक्तिर्विश्ववैचित्र्यकारिणी ।
यस्मिन् प्रतिष्ठिता ब्रह्म तदिदं विश्वभाजनम् ॥३६॥

व्याख्या – भाण्डस्थलसम्पन्नस्य शिवयोगिनो विमर्शाश्रयीभूता तिरोधानशक्तिरेव भाजनमिति युग्मेनाह – **समस्तेत्यादिना** । **समस्तजग-दण्डानां** सकलविश्वाश्रयीभूतकोशानां **सर्गस्थित्यन्तकारणं** सृष्टिस्थिति-लयकारणीभूता **विमर्शः** विमर्शाशक्तिः **यत्र** यस्यां **भासते** प्रकाशते **तद्भाजनं** सा तिरोधानशक्तिः भाजनम् इति भाजनशब्दवाच्येति **इह उच्यते** अत्र कथ्यते ॥ कला, अविद्या, रागः, कालः, नियतिश्चेति-पञ्चकञ्चुकपरिवृतचैतन्यस्य पुरुषस्य मलमायादिपाशानुसारिण्याः शिव-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शक्तेस्तिरोधानमेव भाजनम् इत्यर्थः ॥ **विश्ववैचित्र्यकारिणी** जगद्रूप-वैविध्यकर्त्री **विमर्शाख्या** विमर्शेत्यभिधानवती **पराशक्तिः** परमा शक्तिः **यस्मिन्** यत्र **प्रतिष्ठिता** अविनाभावेन तिष्ठति तद् **ब्रह्म** तत् परशिवब्रह्म, **तदिदं** तदेवात्र **विश्वभाजनं** विश्वभाजनमिति कथ्यते ॥ यदिदं ब्रह्मस्वरूपं तदग्न्युष्णत्वन्यायेन शुक्लपटन्यायेन वा स्वसमवेततिरोधानशक्तिचित्-क्रियास्वरूपं सद् विश्वभाजनमिति कथ्यते इत्यर्थः ॥ परशिवब्रह्मस्वरूपे वर्तमानस्य शिवयोगिनस्तिरोधानशक्तिरेव भाजनमुच्यते, यतो हि तस्य विमर्शाशक्तिस्तामाश्रितवती । शक्तेस्तस्याः कारणादेव पञ्चकञ्चुक-संयुक्तः सन् वैषयिकप्रपञ्चरूपां प्रकृतिं भोक्तुमुद्युक्तो भवति । पुण्य-पापफलरूपसुखदुःखादिकमनुभवतीत्यर्थः । अत्रेदमनुसन्धेयम् – स्वसम-वेततिरोधानशक्तिः परशिवो भाजनमुच्यते । तेन सहाविनाभावसम्बन्धेन युक्ता तिरोधानशक्तिरप्यभेदोपचारेण भाजनमुच्यते । शिवयोग्यपि तद्भाजनभूतपरशिवे समानसमरसैक्यं प्राप्तत्वात् भाजनस्थलीति कथ्यते। पूर्वस्मिन् स्थले स एव भाण्डस्थलीति कथितः । तत्र परशिवसमवेत-विमर्शाशक्तेः प्रकाशेन भाण्डस्थलीत्युच्यते । अस्मिन् स्थले तद्विमर्शाश्रयी-भूततिरोधानशक्तेर्ज्ञानक्रियाभ्यां समरसीभूतो शिवयोगी भाजनस्थली-त्युच्यते । भाण्डं भाजनमिति शब्दद्वयमपि 'अधिष्ठानं (आश्रयं)' इत्यर्थे प्रयुज्यते । परशिवसमवेतविमर्शाशक्तिर्विश्ववैविध्यस्याऽधिष्ठानम् । यदा समस्तजगदण्डानि मयूर्यण्डरसन्यायेन स्वात्मनि धारयति तदा सा भाण्डशब्देन गीयते । यदा पुनस्तद्भाण्डमेव परशिवसमवेततिरोधान-शक्तिमाश्रयते तदा सा भाजनशब्देन विमृश्यते । आश्रयभूतायां शक्तौ आश्रितभूतायाः शक्तेः समावेशेऽपि तयोर्भेदो वा गात्रं वाऽवगन्तुं न शक्यते, तयोः सम्बन्धस्याऽतीवसूक्ष्मत्वात् । तत्समवेतशक्तिभिः सह परशिवब्रह्मणि परिपूर्णसामरस्यं प्राप्तः शिवयोगी स्वानुभवद्वारा प्रायस्त-दवगन्तुं शक्येत वा न वा ॥३५-३६॥

अन्तःकरणरूपेण जगदङ्कुररूपतः ।
यस्मिन् विभाति चिच्छक्तिर्ब्रह्मभूतः स उच्यते ॥३७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – तिरोधानविमर्शयोः कथं मिश्रणं जायते इत्यत्राह – **अन्तःकरणेत्यादिना । यस्मिन्** यत्र **जगदङ्कुररूपतः** विश्वोद्भिद्भूतेन **अन्तःकरणरूपेण** मूलाहङ्कारस्वरूपतः **चिच्छक्तिः** समवेतविमर्शाशक्तिः, समवेततिरोधानशक्तिरिति यावत्, **विभाति** प्रकाशते **सः ब्रह्मभूतः उच्यते** सः परब्रह्माख्यपरशिव इति कथ्यते ॥ चिच्छक्तिरत्र तिरोधानशक्तिस्वरूपिणीति गृह्यते । तिरोधानाश्रयीभूतविमर्शः कारणभूतमूलाहङ्काररूपेण वर्तते । सृष्ट्युन्मुखतत्त्वविकासप्रक्रियायां शक्तितत्त्वं महत्पात्रं वहति । परशिवब्रह्मणि समवेतविमर्शाशक्तेः स्पन्दनेनैव षट्त्रिंशत्तत्त्वानां विकासः प्रवर्तते । प्रवृत्तिक्रमे शिवतत्त्वाद्भूमितत्त्वपर्यन्तं विकासो जायते, निवृत्तिक्रमे च भूमितत्त्वात्परशिवतत्त्वपर्यन्तं संहृतिः प्रवर्तते । ऐक्यस्थलीयलिङ्गस्थलेषु शिवयोगी तु निश्चयेन परशिवब्रह्मणि समरसीभूतस्वात्मरूपफलके निवृत्तिपरसंहृतिचित्रसरणिं चलचित्रवत्पश्यति । तथा हि – **स्वीकृतप्रसादिस्थले** महाबोधरूपो प्रसादो दृश्यते । महाबोधोऽयं "तत्त्वमसि" इत्यस्य महावाक्यस्य शिवयोगिनि स्वानुभवद्वारा साक्षात्कारः । एतन्महाबोधे एव षट्स्त्रिंशत्तत्त्वानि विलयं गच्छन्ति । अयं हि स्वात्मज्ञानाग्नौ तत्त्वानां होमः । अस्मिन् स्थले यो यः स्वानुभवः शिवयोगिनः स स तद्धोमोत्पन्नप्रसादः । **शिष्टोदनस्थले** कलातत्त्वादारभ्य भूमितत्त्वपर्यन्तं (मायाशक्तिस्तस्या उत्पन्नानीत्यर्थः) तत्त्वसमुदायः शिवयोगिनः खाद्यं भवति । सर्वः स तत्त्वसमुदायो मायाशक्तौ विलीनो भवति, मायाशक्तिरपि शिवयोगिनः स्वात्मबोधे विलयं गच्छतीत्यर्थः । **चराचरलयस्थले** शिवयोगिनो महाबोधवशान्मलशक्तिनाशे चराचरसमुदायः सर्वः स्वात्मज्ञाने मेघो नभसीव विलयं गच्छतीति प्रदर्श्यते । त्रिपुटीव्यवहाररहितत्वाच्छिवयोगी सर्वथा विगलितलोकप्रज्ञः तिष्ठति । तस्य त्वनुभवः केवलं सच्चिदानन्दशिवमयो नान्यः कश्चन । **भाण्डस्थलान्तर्गतत्वेन** संख्यातीतजगदण्डानां सृष्टिस्थितिलयकारणभूतो विचाररूपो विमर्श एव भाण्डमिति प्रदर्श्य तद्भाण्डे विश्रान्तः शिवयोगी पराहन्तानुभवद्वारा सर्वज्ञत्वम्, सर्वगत्वम्, सर्वकर्तृत्वम्, सर्वसाक्षित्वं चेति दैवीशक्तिसमन्वितपरशिव एव जायते । प्रस्तुते च **भाजनस्थले** योगी

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परशिवसमवेततिरोधानशक्तिं स्वविमर्शस्य भाजनत्वेन साक्षात्क्रियते। स्वात्मपरशिवसाधारणीभूतविमर्शस्वरूपिणि परबिन्दौ तिरोधानशक्तेर्विलये जाते शिवयोगी परशिवब्रह्मपदं स्वयम् आश्रयते। अस्मिन् स्थले शिवयोगिगततिरोधानशक्तेः परशिवब्रह्मगतविश्वकारणीभूतविमर्शशक्तेश्च नास्ति कश्चिदपि भेदः। पश्चात्तनेषु चतुर्षु लिङ्गस्थलेषु **अङ्गालेपस्थलं** दिग्देशकालोपाध्यवच्छिन्नेभ्यः सर्वेभ्यः शिवयोगिनः सम्पर्कविदूरत्वं प्रदर्शयति। ततः **स्वपराज्ञस्थलं** विगलितवेद्यान्तरानन्दस्वरूपं शिवाद्वैतवैभवं पश्यन् स्व-परभेदं कथं शिवयोगी विस्मरतीति दर्शयति। **भावाभावलयस्थले** तदखण्डानन्दानुभवसम्पन्नः शिवयोगी सर्वं भावात्मकं वाऽभावात्मकं वा न जानातीति निरूप्यते। **ज्ञानशून्यस्थले** च त्रिपुटीव्यवहाररहितत्वात् परापर-भावाभावादिज्ञानशून्यत्वं शिवयोगिन उच्यते। तत्र शिवजीवयोः सामरस्यं जले जलस्य सामरस्यवद् भेदपरामर्शरहितत्वेनाऽखण्डम् इति ज्ञेयम् ॥३७॥

यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी।
तथा शक्तिर्विमर्शात्मा प्रकारे ब्रह्मणि स्थिता ॥३८॥

व्याख्या – परशिवब्रह्मणि विमर्शाशक्त्याः स्थिरतां सदृष्टान्तमाह – **यथेति। यथा** येन प्रकारेण **चन्द्रे** चन्द्रमसि **विश्ववस्तुप्रकाशिनी** विश्वं वस्तु विश्ववस्तु, तत् प्रकाशयतीति विश्ववस्तुप्रकाशिनी, सर्ववस्तुप्रकाशिनी **स्थिरा** स्थिरतया स्थिता, **तथा** तेनैव प्रकारेण **ब्रह्मणि** परशिवब्रह्मणि **विमर्शात्मा** विमर्शास्विरूपिणी **शक्तिः** परामर्शकारिणी पराशक्तिः **प्रकारे** स्वयं परशिवब्रह्मणा कल्पिते भागे **स्थिता** स्थिरेण स्थिता॥ ज्योत्स्ना चन्द्रे स्थिता, तथापि सर्वं विश्वं प्रकाशयति। चन्द्रज्योत्स्नयोर्नास्ति परस्पर-भिदा। तयोर्मध्ये समवायः सम्बन्धः। परशिवसमवेता विमर्शाशक्तिरेकांशे स्थिता विश्वप्रकाशिनी भवति। 'विश्वप्रकाशिनी' इत्यनेन 'विश्ववैचित्र्यकारिणी' इत्यस्यार्थो ग्राह्यः। तादृशी तिरोभावलक्षणा विमर्शा विश्वभाजमित्यर्थः ॥३८॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अकारः शिव आख्यातो हकारः शक्तिरुच्यते ।
शिवशक्तिमयं ब्रह्म स्थितमेकमहंपदे ॥३९॥

व्याख्या – अहंपदवाच्यो शक्तिविशिष्टं परशिवब्रह्मेत्याह – **अकार** इति । **अकारः** अक्षरसमाम्नायस्य प्रथमाक्षरः अकारः **शिवः आख्यातः** शिवः इत्याख्यायते, **हकारः** अक्षरसमाम्नायस्यान्तिमः हकारः **शक्तिरुच्यते** शक्तिः इति कथ्यते । एवम् **अहंपदे** अहमिति पदे **शिवशक्तिमयं** शिवशक्तिस्वरूपम्, शक्तिविशिष्टशिवस्वरूपमिति यावत्, **ब्रह्म** परब्रह्म **एकम्** अद्वितीयत्वेन **स्थितं** कालत्रितयेऽपि तिष्ठति ॥ अहंपदे अकारो हकारश्चेत्यक्षरद्वयमस्ति । तत्राऽकारः शिववाचको हकारश्च शक्तिवाचकः । एवमहंपदं शक्तिविशिष्टपरशिवब्रह्मवाचकम् । अत एवोक्तमहंपदे शिवशक्तिमयं ब्रह्म स्थितमिति । "अक्षराणाम् अकारोऽस्मि" इति भगवदुक्तिः (भ. गी., १०.३३); "अकारो वै सर्वा वाक्" (ऐ. आ., २.३.६) इति श्रुतिः । हकारोत्तरबिन्दुम् – ('अम्') सहितं 'हम्' इति विमर्शाशक्तिं (इच्छाज्ञानक्रियात्मिकां शक्तिं) परामृशति । एवम् 'अहम्'-पदं शिवशक्तिसमायोगम् अर्थतः प्रकाशयति । शिवशक्तिसमावेशार्थे प्रयुज्यमानम् 'अहम्' पदं सर्वव्यापकत्वरूपं विशालार्थं प्रददाति । इदमेवाऽहंपदस्य समष्टिस्वरूपव्यञ्जकत्वम् । केवलं जीवात्मनोऽर्थे प्रयुज्यमानम् 'अहम्'पदं सङ्कुचितार्थं प्रददाति । इदमहंपदस्य व्यष्टिस्वरूपव्यञ्जकत्वम् । शिवशक्तिसमावेशार्थयुक्तोऽहम् 'पूर्णाहन्ता' अथवा 'पराहन्ता' इति व्यवह्रियते । भाजनस्थलेऽस्मिन् परयोगी 'पराहन्ता'स्तरे विराजते, यस्मिन् परमशान्तिरेव विराजते ॥३९॥

अहन्तां परमां प्राप्य शिवशक्तिमयीं स्थिराम् ।
ब्रह्मभूयंगतो योगी विश्वात्मा प्रतिभासते ॥४०॥

व्याख्या – पराहन्तां प्राप्तो योगी विश्वात्मा भवतीत्याह – **अहन्तामिति** । **शिवशक्तिमयी** शिवशक्तिस्वरूपिणीं **स्थिरां** स्थिरतया स्थितां **परमाम् अहन्तां** पराहन्तां **प्राप्य** लब्ध्वा **योगी** परशिवयोगी

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ब्रह्मभूयंगतः ब्रह्मणो भावः ब्रह्मभूयम्, ब्रह्म भू क्यप् ("भुवो भावे" इति क्यप् – पा. अ., ३.१.१०७), ब्रह्मभूयंगतः ब्रह्मत्वं प्राप्तः, ब्रह्मणि लयं गतः; "अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥" (भ. गी., १८.५३) इति भगवदुक्तिः; एवं ब्रह्मत्वं गतः सन् **विश्वात्मा** जगदात्मा **प्रतिभासते** प्रकाशते, विश्वात्मत्वेन प्रकाशते इत्यर्थः ॥ शिवयोगिनः पराहन्ताप्राप्तत्वमेव भाजनस्थलत्वम् । इदं च समष्टिस्वरूपमिति पूर्वमेवोक्तम् । एतत्स्वरूपमेव तस्य विश्वात्मरूपत्वम् । तदुक्तम् – "सर्वभूतस्थलात्मानं सर्वभूतानि चात्मनि । संपश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥.....॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ अणोरणीयानहमेव तद्वन् महानहं विश्वमहं विचित्रम् । पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः । अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम् ॥" (कै. उ., १०, १८-२१) इति ॥४०॥

वृक्षस्थं पत्रपुष्पादि वटबीजस्थितं यथा ।
तथा हृदयबीजस्थं विश्वमेतत्परात्मनः ॥४१॥

व्याख्या – वटबीजे वटवृक्षांशवच्छिवयोगिनो हृदयबीजे विश्वांशो विलीन इत्युक्त्वा भाजनस्थलं समापयति – **वृक्षस्थमिति** । **यथा** येन प्रकारेण **वृक्षस्थं** वटवृक्षे स्थितं विद्यमानं **पत्रपुष्पादि** पत्रपुष्पादिवृक्षांशभूतं सकलं **वटबीजस्थितं** वटबीजे तिष्ठति, **तथा** तेनैव प्रकारेण **एतद् विश्वम्** एतत्सर्वं जगदंशभूतं **परात्मनः** परमात्मनः, परमात्माभिन्नस्य भाजनस्थलसम्पन्नस्य शिवयोगिन इत्यर्थः, तस्य **हृदयबीजस्थं** हृद्बीजे तिष्ठति ॥ उक्तमेतत् – "यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः । तथा हृद्बीजस्थं जगदेतच्चराचरम् ॥" (परा. त्रिं., २४) इति । इदमुद्दालकश्वेतकेतोः संवादं स्मृतिपथमानयति । तत्संवादो यथा – "न्यग्रोधफलमत

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आहरेति, इदं भगव इति, भिन्द्धीति, भिन्नो भगव इति, किमत्र पश्यसीति, अण्व्य इवेमा धाना भगव इति, आसामङ्गैकां भिन्द्धीति, भिन्नो भगव इति, किमत्र पश्यसीति, न किञ्चन भगव इति । तं होवाच – यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान् न्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति ॥'' (छां. उ., ६.१२.१-२) इति । अनेन संवादेन यद्व्यज्यते तदेवं प्रस्तूयते – यथा बृहन्न्यग्रोधवृक्षो न्यग्रोध-बीजे सूक्ष्मरूपेण निहितं वर्तते, तथा समग्रमिदं विश्वं परमात्माभिन्नस्य शिवयोगिनो हृदयबीजे सुक्ष्मरूपेण निहितं वर्तते इति । शिवशक्ति-समावेशसङ्केतभूतेन 'अहम्'-पदेन निरूपितं क्रियासामरस्यरूपं विश्वं शिव-शिवयोगिसमावेशस्य हृदयबीजे निहितं तिष्ठति । एवं शिवयोगिनो हृदयमेव विश्वभाजनम्, तेन शिवयोगी भाजनस्थलीति कथ्यते ॥४१॥

– इति भाजनस्थलम् –

६. अथ अङ्गालेपस्थलम् – (९८)

दिक्कालाद्यनवच्छिन्नं चिदानन्दमयं महत् ।
यस्य रूपमिदं ख्यातं सोऽङ्गालेप इहोच्यते ॥४२॥

व्याख्या – भाजनस्थलसम्पन्नशिवयोगिसुलभम् अङ्गालेपस्थलमाह – **दिक्कालादीत्यादिना । दिक्कालाद्यनवच्छिन्नं** दिग्देशकालत्रितयपरिच्छेदहीनं **चिदानन्दमयं** चिदानन्दस्वरूपं **महत्** महत्त्वयुक्तं च **इदम्** एतादृशं **रूपं** स्वरूपं **यस्य** भाजनसम्पन्नस्य शिवयोगिनो रूपमिति **ख्यातं** प्रसिद्धं **सः** स एव **इह** अत्र (अस्मिन् स्थले) **अङ्गालेपः** अङ्गगतकर्मलेपरहितः इति **उच्यते** कथ्यते ॥ अयमङ्गालेपस्तु श्रुत्युक्तं यथा – ''यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेव पापकर्म न श्लिष्यते'' (छां. उ., ४.१४.३) इति । प्रारब्धकर्मवशाच्छिवयोगी शरीरं प्राप्तवान् । देहधारणात्कारणादेवा-निवार्यतया क्रियासु निरतो भवेत् । तथापि तस्य क्रियाफलसम्पर्को नास्ति। अङ्गकर्मपरिणामविदूरत्वात् शिवयोगी 'अङ्गालेपस्थली' इति कथ्यते ॥४२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समस्तजगदात्मापि संविद्रूपो महामतिः ।
लिप्यते नैव संसारैर्यथा धूमादिभिर्नभः ॥४३॥

व्याख्या – शिवयोगिनोऽज्ञालेपत्वं सदृष्टान्तमाह – **समस्तेत्यादिना**। **समस्तजगदात्मापि** सकलविश्वस्वरूपोऽपि **संविद्रूपः** चिद्रूपः **महामतिः** महाधीमान् शिवयोगी **यथा** येन प्रकारेण **नभः** आकाशः **धूमादिभिः** धूममेघादिभिः न लिप्यते **तथा** तेनैव प्रकारेण **संसारैः** संसारपापकर्मभिः **नैव** न खलु **लिप्यते** श्लिष्यते ॥ नभसि धूमः प्रसरति, मेघाः सञ्चरन्ति, धूलियुक्तो वायुर्व्याप्नोति । परं तु न केऽप्याकाशे श्लिष्यन्ति । न वायुराकाशं चालयति, नाग्निस्तं दहति, न जलं तं क्लेदयति, न धूमस्तमाच्छादयति, न मेघास्तं व्याप्नुवन्ति । एवमाकाशः सर्वथाऽलिप्तः । एवमेव योगी न लिप्यते कर्मफलैः ॥४३॥

न विधिर्न निषेधश्च न विकल्पो न वासना ।
केवलं चित्स्वरूपस्य गलितप्राकृतात्मनः ॥४४॥

व्याख्या – कुतः संसारैर्न लिप्यते इत्यत्राह – **न विधिरिति**। **गलितप्राकृतात्मनः** गलितं प्राकृतं, प्राकृतं कर्म इत्यर्थः, तदेव गलितं प्राकृतं कर्म आत्मा स्वरूपं यस्य सः गलितप्राकृतात्मा, तस्य, तादृशस्य **केवलं चित्स्वरूपस्य** चिद्रूपमात्रस्य शिवयोगिनः **न विधिः** विधिविहितं कर्म नास्ति, **न निषेधः च** निषिद्धं कर्माऽपि नास्ति, **न विकल्पः** अस्ति वा नास्ति वेति उभयात्मकसन्देहो नास्ति, **न वासना** तत्संस्कारोऽपि नास्ति ॥ शिवयोगिनो हृदयं तु पारमार्थिकप्रकाशस्य मन्दिरः । न तत्रास्ति लेशोऽप्यवकाशोऽज्ञानतिमिरस्य । तस्य देहाद्यभिमानरहितस्य शिवयोगिनश्चिन्मात्ररूपत्वाद् विधिनिषेधौ नोपपद्येते । देहाद्यभिमानशालिनां तु तावुपपद्येते । शिवज्ञानानन्दे तन्मयीभूतस्य परयोगिनो विकल्पसन्देहादिमनोविकारा न संभवन्ति ॥४४॥

घटादिषु पृथग्भूतं यथाऽऽकाशं न भिद्यते ।
तथोपाधिगतं ब्रह्म नानारूपं न भिद्यते ॥४५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अनश्वरमनिर्देश्यं यथा व्योम प्रकाशते ।
तथा ब्रह्मापि चैतन्यमत्र वैशेषिकी कला ॥४६॥

व्याख्या – शिवयोगिनोऽभिन्नताज्ञानं सदृष्टान्तं युग्मेन विशेष्यते – **घटादिष्वित्यादिना । यथा** येन प्रकारेण **घटादिषु** उपाधिभूतघटमठादिषु **पृथग्भूतं** पृथक्त्वेन स्थितम् **आकाशं** नभः **न भिद्यते** भिन्नत्वं न भजते, **तथा** तेनैव प्रकारेण **उपाधिगतं** देवदानवमनुष्याद्युपाधिनिष्ठं **नानारूपम्** अत एव विविधरूपं **ब्रह्म** परशिवब्रह्म **न भिद्यते** न भिन्नं भवति ॥ **यथा** पुनर्येन प्रकारेण **अनश्वरं** नाशरहितम् **अनिर्देश्यं** निर्देष्टुम् अशक्यं च **व्योम** आकाशं **प्रकाशते** दृष्टिगोचरमायाति, **तथा** तेनैव प्रकारेण **ब्रह्मापि** परशिवब्रह्मापि प्रकाशते । **अत्र** ब्रह्मणि **चैतन्यं** चिद्रूपत्वं **वैशेषिकी** विशेषीभूता **कला** संवित् ॥ आकाशो नामाऽवकाशः । घटेष्वनेकेषु विद्यमान आकाशः पृथक्त्वेन भासते । अत्र घटा आकाशस्य परिच्छेदहेतुभूतोपाधयः । तेषामुपाधीनां निष्कासने अपरिमिताकाश एव, भूताकाश इति यावत्, दृश्यते । एवमेव यावन्तो जीविनः तावन्ति शरीराणि भवन्ति । परशिवस्तु सर्वेषु शरीरेषु चैतन्यरूपेण निवसति । शरीराण्येतानि पृथक्त्वावभासहेतुभूतोपाधयः । उपाधीनामपरिगणने 'अनन्तं ब्रह्मैव' नाऽन्यत् । "एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूव" (कठ.उ., ५.९) इति, "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" (श्वे.उ., ६.११) इति चोभयश्रुतिप्रमाणतः परशिवः जगतोऽन्तरात्मा सर्वव्यापी च । घटाकाश-भूताकाशयोर्दृष्टान्तोऽत्र परशिवस्यैकत्वेऽपि सर्वभूतान्तरात्मत्वं प्रतिपादयति । आकाशोऽनश्वरोऽनिर्देश्यश्च । एवमेव परशिवोऽनश्वरोऽनिर्देश्यश्च । परशिवश्चैतन्यविशिष्ट आकाशस्त्वचेतन इति तयोर्भेदः । अत आकाशवत्परशिव इत्युक्ते आकाशवत्परशिवोऽपि जडः स्यादिति नापादनीयम् ॥४५-४६॥

न देवत्वं न मानुष्यं न तिर्यक्त्वं न चान्यथा ।
सर्वाकारत्वमाख्यातं जीवन्मुक्तस्य योगिनः ॥४७॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – जीवन्मुक्तस्य सर्वाकारत्वमुक्त्वाऽङ्गालेपस्थलं समापयति – **न देवत्वमिति । जीवन्मुक्तस्य** जीवन्नेव मुक्तिभाजनस्य **योगिनः** शिवयोगिनः **न देवत्वं** देवभावो नास्ति, **न मानुष्यं** मनुष्यभावो नास्ति, **न तिर्यक्त्वं** तिर्यक्प्राणिभावो नास्ति, **न च अन्यथा** तद्व्यतिरिक्तश्च कोऽपि भावो नास्ति, तस्य **सर्वाकारत्वं** सर्वतः परिपूर्णस्वरूपत्वम् **आख्यातम्** उक्तम् ॥ अङ्गालेपस्थलीनपरिपक्वयुक्तः शिवयोगी तु परमात्मैव । तस्य किमपि स्वरूपं नास्ति, तत्तत्कारणीभूतकर्मरहितत्वात् । कर्मफलं पुण्यम्, पापम्, उभयमिश्रं चेति त्रिविधं भवितुमर्हति । पुण्यं नास्तीति देवत्वं नास्ति, पापं नास्तीति तिर्यक्त्वं नास्ति, उभयमिश्रमपि नास्तीति मनुष्यभावो नास्ति, एवमेव कर्मशेषाभावान्नास्त्यन्यभावः । स चाखण्डचिद्रूपत्वेन सर्वात्मतां भजते ॥४७॥

– इति अङ्गालेपस्थलम् –

७. अथ स्वपराज्ञस्थलम् – (९९)

अप्रमेये चिदाकारे ब्रह्मण्यद्वैतवैभवे ।
विलीनः किं नु जानाति स्वात्मानं परमेव वा ॥४८॥

व्याख्या – अङ्गालेपस्थलसम्पन्नस्य स्व-परानभिज्ञत्वमाह – **अप्रमेये इति । अप्रमेये** प्रमातुमशक्ये **चिदाकारे** चित्स्वरूपे **अद्वैतवैभवे** अद्वैतस्य वैभवं यस्य सः अद्वैतवैभवः, तस्मिन्, अद्वैतसम्पद्युक्ते, **ब्रह्मणि** परशिवब्रह्मणि **विलीनः** विलयं गतः शिवयोगी **स्वात्मानं परम् एव वा** स्वात्मा वाऽहमिति वा परमात्मा वाऽहमिति भेदं **किं नु जानाति** अभिजानाति किम् ? नाऽभिजानातीत्यर्थः ॥ परमात्मनि लीनस्य शिवयोगिनः स्वात्मा परमात्मा चेति स्व-परभेदज्ञानं सर्वथा नास्ति । श्रुतिराह – "यथा स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चिन वेद नान्तरम्, एवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" (बृ.उ., ४.३.२१) इति । परशिवलीनस्वात्मनः परयोगिनो न बाह्याभ्यन्तर-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वेदनान्तरं नास्त्येव, तस्य तु विगलितवेद्यान्तरस्थितिः। अस्यां स्थितौ स्वात्म-परमात्मभेदज्ञानरहितः सन् परमात्मभावे एवाऽऽनन्दमनुभवन्नास्ते। स्थितिरसौ चैतन्यमयी। अतः स्व-पराज्ञत्वकारणं पुरस्कृत्य तस्य जडत्वं नापादनीयम् ॥४८॥

यत्र नास्ति भिदायोगादहं त्वमिति विभ्रमः।
न संयोगो वियोगश्च न ज्ञेयज्ञातृकल्पना ॥४९॥

न बन्धो न च मुक्तिश्च न देवाद्यभिमानिता।
न सुखं नैव दुःखं च नाज्ञानं ज्ञानमेव वा ॥५०॥

नोत्कृष्टत्वं न हीनत्वं नोपरिष्टान्न चाऽप्यधः।
न पश्चान्नैव पुरतो न दूरे किञ्चिदन्तरे ॥५१॥

सर्वाकारे चिदानन्दे सत्यरूपिणि शाश्वते।
पराकाशमये तस्मिन् परे ब्रह्मणि निर्मले ॥५२॥

एकीभावमुपेतानां योगिनां परमात्मनाम्।
परापरपरिज्ञानपरिहासकथा कुतः ॥५३॥

व्याख्या – उक्तमेवार्थं कुलकेन विशेषयति – **यत्रेत्यादिना**। **यत्र** अद्वैतविभवसम्पन्ने परमात्मनि **योगात्** समानसमरसैक्याद् **अहं त्वम् इति** अस्मत्पदवाच्यत्वं युष्मत्पदवाच्यत्वमिति **भिदाविभ्रमः** भेदभ्रमः **न अस्ति** न भवति, अत एव **न संयोगः न वियोगः च** संयोगवियोगौ न स्तः, भेदाभावे क्रियाया अनुपपन्नत्वात्; **न ज्ञेयज्ञातृकल्पना** ज्ञेयमिदमयं ज्ञातेति नास्ति विचारः, **न बन्धः न च मुक्तिः च** संसारबन्धो नास्ति मोक्षोऽपि नास्ति, परिपूर्णशिवानन्दे मग्नत्वात्, कर्मफलराहित्याच्च; **न देवाद्यभिमानिता** देवोऽहमित्यादिरूपोऽभिमानो नास्ति, शिवोऽहंभावनाव्यतिरिक्तभावाभावात्; **न सुखं न एव दुःखं च** पुण्य-पापात्मककर्मफलाभावादेव वैषयिके सुख-दुःखे न स्तः; **न अज्ञानं ज्ञानम् एव वा** इन्द्रियजमज्ञानं ज्ञानं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वा न भवतः, सर्वेन्द्रियव्यवहारराहित्ये लौकिकवस्तुजातेन सम्पर्काभावात्; **न उत्कृष्टत्वं न हीनत्वं** श्रेष्ठत्वनिकृष्टत्वे न भवतः, लौकिकप्रज्ञाधीनोच्च-नीचभावाभावात्; **न उपरिष्टान् न चापि अधः** उपरिभागाधोभागौ न विद्येते, परिपूर्णशैवप्रज्ञायां मग्नस्योपर्यधोरूपसापेक्षकल्पनाभावात्; **न पश्चान् न एव पुरतः** पश्चाद्भागपूर्वभागौ न स्तः, शैवचैतन्यविलीनस्य पश्चात् पूर्वमिति सापेक्षव्यवहाराभावात्; **न दूरे किञ्चिद् अन्तरे** दूरे किञ्चिदन्तरे चेति विचारो नास्ति, शिवप्रज्ञानिमग्नस्य दूरान्तिकादि-सापेक्षान्तरव्यवहारविरहात् । **सर्वाकारे** सर्वस्वरूपे **चिदानन्दे** चिदानन्दा-त्मके **सत्यरूपिणि** परमसत्यस्वरूपवति **शाश्वते** त्रिकालाबाधिते **निर्मले** परिशुद्धे **पराकाशमये** महाकाशस्वरूपे **तस्मिन् परे ब्रह्मणि** तस्मिन् परशिवब्रह्मणि **एकीभावम् उपेतानाम्** समरसैक्यभावं प्राप्तानां **परमात्मनां** परमात्मस्वरूपिणां **योगिनां** शिवयोगिनां **परापरपरिज्ञानपरिहासकथा** परं च अपरं च परापरे, तयोः परिज्ञानं परापरपरिज्ञानम्, तदेव परिहासः परापरपरिज्ञानपरिहासः, तस्य कथाप्रसङ्गः, स्वात्मपरात्मभेदरूपापहास्य-प्रसङ्गः **कुतः** कस्मात् ? न कुतोऽपि तादृशः प्रसङ्ग उपपद्यते ॥४९-५३॥

देशकालानवच्छिन्नतेजोरूपसमाश्रयात् ।
स्वपरज्ञानविरहात् स्वपराज्ञस्थलं विदुः ॥५४॥

व्याख्या – उक्तमेव विशेषयन् स्वपराज्ञस्थलं समापयति – **देशेत्या-दिना । देशकालानवच्छिन्नतेजोरूपसमाश्रयात्** देशश्च कालश्च देशकालौ, ताभ्याम् अनवच्छिन्नम् अपरिमितं **तेजोरूपं** तेजसो रूपं चित्प्रकाश-स्वरूपम्, तत् समाश्रयते इति देशकालानवच्छिन्नतेजोरूपसमाश्रयः, तस्मात्, **स्वपरज्ञानविरहात्** स्वात्मपरमात्मभेदाभावात् **स्वपराज्ञस्थलं** स्वपराज्ञ-स्थलम् इति **विदुः** जानन्ति ॥ देशकालानवच्छिन्नत्वं नाम परशिवयोगि-नोऽपरिमितव्यापकत्वं कालतः देशतश्च । अयं परशिवयोगी स्वयं परशिव-चैतन्यप्रकाशरूपः स्वात्म-परमात्मभेदशूयत्वात्तस्य स्वपराज्ञत्वम् ॥५४॥

– इति स्वपराज्ञस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

८. अथ भावाभावलयस्थलम् – (१००)

त्वन्ताहन्ताविनिर्मुक्ते शून्यकल्पे चिदम्बरे ।
एकीभूतस्य सिद्धस्य भावाभावकथा कुतः ॥५५॥

व्याख्या – स्वपराज्ञस्य परशिवयोगिनो भावाभावस्थलमाह – **त्वन्तेत्यादिना** । **त्वन्ताहन्ताविनिर्मुक्ते** त्वम् इत्यस्य भावः त्वन्ता, अहम् इत्यस्य भावः अहन्ता, त्वन्ता चाऽहन्ता च त्वन्ताहन्ते, ताभ्यां विनिर्मुक्ते, परिमितशरीरविशिष्टत्वमहंभावविरहिते अत एव **शून्यकल्पे** शून्यसदृशे **चिदम्बरे** चिदाकाशे **एकीभूतस्य** समरसैक्यं प्राप्तस्य **सिद्धस्य** सिद्धिमतः शिवयोगिनः **भावाभावकथा** भावः सत्तात्मकः पदार्थः, अभावः असत्तात्मकः पदार्थः, तयोः कथा प्रसङ्गः भावाभावकथा, **कुतः** कस्मात्, न कस्मादपि भावाभावप्रसङ्गो भवतीत्यर्थः ॥ अत्र श्रुतिराह – "स्वप्रान्तं जागरितान्तं चोभौ यो वा न जानाति येनानुपश्यति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥" (कठ. उ., ४.४) इति । स्वप्ने दृश्यमानान् जागृदवस्थायां विद्यमानांश्च पदार्थान् यो जानाति स आत्मा परिशुद्धचैतन्यरूपः । तस्मिन् परिशुद्धचैतन्ये भावाभावादिद्वन्द्वानि न सन्ति । अत्र भावो नाम परिमितशरीरसम्बन्धी अहंभावः, अभावो नाम शरीरव्यतिरिक्त आत्मा नास्तीति भ्रमः । परिमितप्रत्ययभूते त्वन्ताहन्ते परशिवस्वरूपे चिदाकाशे निमज्जतः । परशिवे विलीनस्य परयोगिनो भावाभावप्रत्ययौ न स्तः । अत इदं तस्य भावाभावलयस्थलम् ॥५५॥

अहंभावस्य शून्यत्वादभावस्य तथात्मनः ।
भावाभावविनिर्मुक्तो जीवन्मुक्तः प्रकाशते ॥५६॥

सुखदुःखादिभावेषु नाभावो भाव एव वा ।
विद्यते चित्स्वरूपस्य निर्लेपस्य महात्मनः ॥५७॥

व्याख्या – भावाभावलयस्य स्वरूपं युग्मेनाह – **अहंभावस्येति** । **अहंभावस्य शून्यत्वात्** अहंभावरहितत्वात् **तथा** तथैव **आत्मनः अभावस्य**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

देहाभिन्नात्मा नास्तीति अभावस्य शून्यत्वाद् **जीवन्मुक्तः** जीवन्नेव मुक्तिभाजनः शिवयोगी **भावाभावविनिर्मुक्तः** भावाभावलयसम्पन्नः, अहंरूपपरिमितदेहसम्बन्धी भावः शरीराभिन्नात्मा नास्तीत्यभावश्च, ताभ्यां विनिर्मुक्तः सन् **प्रकाशते** विराजते ॥ **चित्स्वरूपस्य** चिद्रूपस्य **निर्लेपस्य** अहंकारममकारादिलेपरहितस्य **महात्मनः** महापुरुषस्य परशिवयोगिनः **सुखदुःखादिभावेषु** सुखदुःखादिद्वन्द्वभावेषु **न अभावः भाव एव वा** अभावसम्बन्धो वा भावसम्बन्धो वा न भवति ॥ ५५-तम श्लोकस्य व्याख्यायां भावाभावस्वरूपं निरूपितम् अस्ति, पश्यत ॥५६-५७॥

यस्मिन् ज्योतिषि चिद्रूपे दृश्यते नैव किञ्चन ।
सद्रूपं वाप्यसद्रूपं भावाभावं विमुञ्चतः ॥५८॥

व्याख्या – भावाभावलयस्थलीनो न किमपि पश्यतीत्याह – **यस्मिन्निति । भावाभावं विमुञ्चतः** भावाभावकल्पनं त्यजतः शिवयोगिनः **चिद्रूपे** चित्स्वरूपे **यस्मिन्** यत्र **ज्योतिषि** प्रकाशे **सद्रूपं वा असद्रूपम् अपि** व्यक्तरूपं वा अव्यक्तरूपं वाऽपि **न एव किञ्चन दृश्यते** न खलु किञ्चिदपि दृश्यते ॥ शिवयोगी चित्प्रकाशस्वरूपे परशिवे समरसीभवति । अतस्तस्य सद्रूपं वाऽसद्रूपं वा नास्ति ॥५८॥

प्रतीयमानौ विद्येते भावाभावौ न कुत्रचित् ।
लिङ्गैक्ये सति यत्तस्माद्भावाभावलयस्थलम् ॥५९॥

व्याख्या – लिङ्गे समरसैक्यं प्राप्तस्य भावाभावौ न स्त इत्युक्त्वा भावाभावलयस्थलं समापयति – **प्रतीयमानाविति । लिङ्गैक्ये सति** शिवलिङ्गैकरसीभूतशिवयोगिविषये **यत्** यस्मात्कारणात् **भावाभावौ** भावश्च अभावश्च **कुत्रचित्** कुतश्चन अपि **न प्रतीयमानौ विद्येते** अभिव्यक्तौ न स्तः, **तस्मात्** तस्मात्कारणात् **भावाभावलयस्थलं** भावाभावलयात्मकं स्थलं भवति ॥ अस्मिन् स्थले शिवयोगिनः भावाभावरूपं द्वन्द्वं नास्ति । अत एवेदं तस्य भावाभावलयस्थलम् ॥५९॥

– इति भावाभावलयस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

९. अथ ज्ञानशून्यस्थलम् – (१०१)

परापरसमापेक्षभावाभावविवेचनम् ।
ज्ञानं ब्रह्मणि तन्नास्ति ज्ञानशून्यस्थलं विदुः ॥६०॥

व्याख्या – भावाभावलयसम्पन्नस्य शिवयोगिनो ज्ञानशून्यस्थलमाह – **परापरेत्यादिना** । **ब्रह्मणि** परब्रह्मस्वरूपिणि भावाभावलयसम्पन्ने शिवयोगिनि, **परापरसमापेक्षभावाभावविवेचनं ज्ञानं** परापरयोः समापेक्षा यस्य तत् परापरसमापेक्षम्, परापरपरिज्ञानाभिलाषयुक्तम्, भावाभावयोः विवेचनं भावाभावविवेचनं भावाभावविवेकः, परापरपरिज्ञानाभिलाष-युक्तभावाभावविवेकसहितं ज्ञानं **नास्ति** न विद्यते, तत् तदेव **ज्ञान-शून्यस्थलं** ज्ञानशून्यस्थलम् इति **विदुः** जानन्ति ॥ अन्तिमे परमार्थ-स्तरेऽस्मिन् द्वैतभावो न प्रविशति । परमार्थस्थितिरियमनिर्वचनीया सामान्यप्रतीत्यतीता च । द्वैतज्ञानं सर्वं सापेक्षम् अस्ति । साधु चाऽसाधु च, पुण्यं च पापं च, उपरि चाऽधश्च, पश्चाच्च पुरतश्च, इत्यादिद्वन्द्वानि सापेक्षाणि भवन्ति । जगति भावाभावरूपं द्वन्द्वमपि सापेक्षम् । परमात्मनि समरसीभूतशिवयोगिनि किमपि सापेक्षभूतं ज्ञानं नास्ति । अत एव ज्ञानशून्यमिदं शिवयोगिनः स्थलम् । ज्ञानशून्यत्वं नाम नाऽभावस्थितिः, परं तु केवलं परिशुद्धज्ञानरूपा भावस्थितिः । तस्या अनिर्वचनीयत्वा-च्छून्यत्वं सापेक्षज्ञानरहितत्वाच्च ॥६०॥

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम् ।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते ॥६१॥

सर्वात्मनि परे तत्त्वे भेदशङ्काविवर्जिते ।
ज्ञात्रादिव्यवहारोत्थं कुतो ज्ञानं विभाव्यते ॥६२॥

व्याख्या – शिवयोगी कथं वर्तते इत्याह युग्मेन – **जले इत्यादिना** । **जले जलमिव न्यस्तं** सलिले सलिलमिव मिश्रितम्, **वह्नौ वह्निरिव अर्पितं**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अग्नौ अग्निरिव समर्पितम्, **परे ब्रह्मणि** परशिवब्रह्मणि **लीनात्मा** लीनः शिवयोगी **विभागेन** भिन्नरूपेण **न दृश्यते** नाऽवगम्यते ॥ **भेदशङ्काविवर्जिते** भेदविकल्परहिते **सर्वात्मनि** सर्वान्तर्यामिनि **परे तत्त्वे** परमे महालिङ्ग-तत्त्वभूते शिवयोगिनि **ज्ञात्रादिव्यवहारोत्थं** ज्ञातृ-ज्ञेय-ज्ञानरूपात् त्रिपुटी-व्यवहारादुद्भूतं **ज्ञानं** ज्ञायमानं **कुतो विभाव्यते** कुतः संभाव्यते ? न कुतोऽपि संभाव्यते इत्यर्थः ॥ जले जलस्याऽग्नावग्नेश्च मिश्रणे भेदलेश-स्याप्यवकाशो नास्ति । एवमेव समरसात्मके शिवाद्वैते परमात्मशिव-योगिनोरपि भेदस्यावकाशो नास्ति । श्रुतिराह – "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥" (मुं. उ., ३.२.८; छां. उ., ६.९.१) इति । अयं नदीसमुद्रदृष्टान्तः परशिवशिवयोगिनोः समरसैक्यस्वरूपं निरूपयितुमुद्दिष्टः । समुद्रे कतिचनापि नद्यः प्रविशन्तु नाम, समुद्रस्तु न स्वतीरमतिक्राम्य प्रवहति विहाय 'सुनामि' प्रकारस्य चण्डमारुतस्य प्रसङ्गम् । नद्यः न प्रविशन्ति चेदपि समुद्रस्य जलं न न्यूनतां गच्छति । एवमेव चित्समुद्रभूते परशिवे जीवात्मनां मेलनेन स्वरूपाधिक्यं वाऽन्यथा न्यूनता वा न सम्पद्यते । इदमेव समानसमरसरूपैक्यम् ॥६१-६२॥

निर्विकारं निराकारं नित्यं सीमाविवर्जितम् ।
व्योमवत्परमं ब्रह्म निर्विकल्पतया स्थितम् ॥६३॥

न पृथ्व्यादीनि भूतानि न ग्रहा नैव तारकाः ।
न देवा मनुष्याश्च न तिर्यञ्चो न चापरे ॥६४॥

तस्मिन् केवलचिन्मात्रसत्तानन्दैकलक्षणे ।
त्वन्ताहन्तादिसंरूढं विज्ञानं केन भाव्यते ॥६५॥

व्याख्या – तदेव शून्यस्वरूपं विशेषकेन विशदयति – **निर्विकार-मिति । निर्विकारं** विकाररहितं **निराकारम्** आकाररहितं **नित्यं** निरव-धिकं **सीमाविवर्जितं** परिमितिरहितं **परमं ब्रह्म** परशिवब्रह्म **व्योमवद्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आकाशवत् **निर्विकल्पतया स्थितं** भेदरहितत्वेन तिष्ठति ॥ अत एव तद्भिन्नतया **न पृथ्व्यादीनि भूतानि** पृथिव्यप्तेजोवाय्वाकाशरूपाणि पञ्च-भूतानि न सन्ति, न प्रतीयन्ते इत्यर्थः; **न ग्रहाः** सूर्यचन्द्रादिग्रहाः न सन्ति; **नैव तारकाः** अश्विनीभरण्यादीनि नक्षत्राणि नैव भवन्ति; **न देवाः** विष्ण्वादयो देवा न विद्यन्ते; **न मनुष्याः** मनुष्या न भवन्ति; **न तिर्यञ्च** तिर्यक्प्राणिनश्च न भवन्ति; **न चाऽपरे** परेऽपि न सन्ति ॥ तस्मात् **तस्मिन् केवलचिन्मात्रसत्तानन्दैकलक्षणे** सच्चिदानन्दमात्रस्वरूपे केवले तस्मिन् परशिवब्रह्म-शिवयोगिसमन्वये **त्वन्ताहन्तादिसंरूढं** त्वमहंभावादि-व्यावहारिकविशेषज्ञानं **केन भाव्यते** केन संभाव्यते ? न केनापि सम्भाव्यते इत्यर्थः ॥ परशिवब्रह्मणो निर्विकारत्वं नाम षड्भावविकाररहितत्वम् – [जायते, अस्ति, परिणमते, विवर्धते, अपक्षीयते, विनश्यति चेति षड्-भावविकाराः] । तस्याऽनन्तत्वादखण्डत्वाच्च सीमाविवर्जितत्वं तु सिद्ध-मेव । कालस्य तत्सत्तावीचिमात्रत्वात् तन्नित्यम्, त्रिकालाबाधितमित्यर्थः । भूताकाशस्यापि निर्विकारत्वान्निरवधिकत्वादेकत्वान्नित्यत्वाद्व्यापकत्वाच्च परशिवब्रह्मसादृश्यत्वमुक्तम् । परमार्थतस्तु स चाकाशः केवलं पञ्चभूतेष्वे-कतमम् । अत एव षट्त्रिंशत्तत्त्वाङ्गभूत आकाशो भूताकाश इत्युक्तः । परशिवब्रह्मणि सर्वाणि षट्त्रिंशत्तत्त्वानि विलयं गताः । तस्मात् त्वन्ता-हन्ताव्यवहारादि तस्मिन्न सम्भाव्यते ॥६३-६५॥

ज्ञेयाभावाद्विशेषेण शून्यकल्पं विभाव्यते ।
ज्ञातृज्ञेयादिभिः शून्यं शून्यं ज्ञानादिभिर्गुणैः ॥६६॥

आदावन्ते च मध्ये च शून्यं सर्वत्र सर्वदा ।
द्वितीयेन पदार्थेन शून्यं शून्यं विभाव्यते ॥६७॥

व्याख्या – स्वस्वरूपबोधवतस्त्रिपुटीव्यवहारज्ञानं न भवतीति युग्मे-नाह – **ज्ञेयाभावादिति** । **ज्ञेयाभावात्** ज्ञातव्यस्य अभावात्, सर्वपदार्थज्ञान-राहित्यात् **विशेषेण** विशेषतः **शून्यकल्प** शून्यसदृशं न तु शून्यमेव, **विभाव्यते** संभाव्यते । **ज्ञातृज्ञेयादिभिः शून्यं** ज्ञातृज्ञेयज्ञानात्मकत्रिपुटी-

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्यवहारेण विरहितं शून्यं शून्यस्थलीनं शून्यं **ज्ञानादिभिः गुणैः शून्यं** ज्ञानेच्छादिभिः गुणैः शून्यं भवति ॥ **आदौ अन्ते मध्ये च** आद्यन्तमध्येषु **सर्वत्र सर्वदा** सर्वस्थानेषु सर्वकालेषु च **शून्यं** शून्यकल्पम्, **द्वितीयपदार्थेन शून्यं** पदार्थान्तररहितं **शून्यं विभाव्यते** शून्यमित्येव विशेषेण भाव्यते ॥ "एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं च किञ्चित्" (श्वे. उ., १.१२) इति, "केवलं ज्ञेयमित्युक्तं वेदितव्यं न किञ्चन" (देवी. आ., १८) इति च श्रुतिद्वयोक्तदिशा पदार्थान्तरे विद्यमाने सत्येव, ज्ञानं भवितुमर्हति । अत्र द्वितीयः पदर्थो नास्ति, अतः शून्यमेव ज्ञानम् । परशिवपरयोगिनि त्रिपुटीप्रपञ्चव्यवहारविशेषभूतेच्छाज्ञानादिराहित्यात् सर्वदा सर्वत्र ज्ञानशून्यत्वमेव ॥६६-६७॥

केवलं सच्चिदानन्दप्रकाशाद्वयलक्षणम् ।
शून्यकल्पं पराकाशं परब्रह्म प्रकाशते ॥६८॥

व्याख्या – शून्यं तत्किं विभाव्यते इत्यत्राह – **केवलमिति । केवलं सच्चिदानन्दप्रकाशाद्वयलक्षणं** सच्चिदानन्दद्युतिविशिष्टम् अद्वैतस्वरूपमात्रं **पराकाशं** महाकाशरूपं **परब्रह्म** परशिवब्रह्म **शून्यकल्पं** शून्यसदृशं **प्रकाशते** विद्योतते ॥ परशिवपरयोगिनि ज्ञानशून्ये सति, स केवलं सच्चिदानन्दात्मके स्वस्वरूपे तिष्ठति । सादृश्यासादृश्यरूपभेदरहितत्वात्तस्य शून्यकल्पत्वमुक्तम् । परशिवब्रह्मणि सर्ववैचित्र्यपर्यवसानेन एकत्वविश्रान्त्या जगद् गच्छति शून्यताम् । परशिवब्रह्म तु न शून्यकल्पं परं तु परमाकाशस्वरूपम् ॥६८॥

शून्यज्ञानादिसङ्कल्पे शून्यसर्वार्थसाधने ।
ज्योतिर्लिङ्गे चिदाकारे स्वप्रकाशे निरुत्तरे ॥
एकीभावमुपेतस्य कथं ज्ञानस्य संभवः ॥६९॥

व्याख्या – परशिवब्रह्मणि समरसैक्यं प्राप्तवतः शिवयोगिनो नास्ति विकल्पज्ञानसंभव इत्याह – **शून्यज्ञानेत्यादिना । शून्यज्ञानादिसङ्कल्पे शून्यः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानादिसङ्कल्पः यस्मिन् तत् शून्यज्ञानादिसङ्कल्पम्, तस्मिन्, ज्ञानाद्यपेक्षाशून्ये, **शून्यसर्वार्थसाधने** सर्वेषाम् अर्थानां साधनं सर्वार्थसाधनं शून्यं सर्वार्थसाधनं यस्मिन् तत् शून्यसर्वार्थसाधनम्, तस्मिन्, सकलपुरुषार्थसाधनशून्ये, **निरुत्तरे** निर्गतम् उत्तरं यस्मात् तत् निरुत्तरम्, तस्मिन्, सर्वोपरि स्थिते, **चिदाकारे** चित्स्वरूपे, **स्वप्रकाशे** स्वयंप्रकाशे **ज्योतिर्लिङ्गे** ज्योतीरूपलिङ्गे **एकीभावम् उपेतस्य** एकत्वं प्राप्तस्य **ज्ञानस्य संभवः** विकल्पज्ञानस्य उत्पत्तिः, **कथं** कथं स्यात् ? न कथमपि स्यादित्यर्थः ॥ ज्ञानशून्यस्थितिस्तु नाऽभावस्थितिः, परं तु परशिवब्रह्मणि समरसैक्यं प्राप्तेन शिवयोगिना समासादिता चित्प्रकाशमयी शिवाद्वैतपराकाशस्थितिः । अस्मिन् स्तरे शिवयोगिनो नास्ति ज्ञाने प्रवृत्तिः, नास्ति पुरुषार्थसाधनापेक्षा च । परमपुरुषार्थे मोक्षे प्राप्ते शिवयोगिनो नास्ति किमप्यपेक्षा । ज्ञानादिसङ्कल्पराहित्ये पुरुषार्थसाधनापेक्षाशून्यत्वे च तस्य भेदज्ञानशून्यत्वात् ज्ञानशून्यस्थलित्वम् ॥६९॥

यस्य कार्यदशा नास्ति कारणत्वमथापि वा ।
शेषत्वं नैव शेषित्वं स मुक्तः पर उच्यते ॥७०॥

व्याख्या – परमुक्तलक्षणमुक्त्वा ज्ञानशून्यस्थलं समापयति – **यस्येति** । **यस्य** सर्वतत्त्वातीतस्य परयोगिनः **कार्यदशा नास्ति** जगद्रूपकार्यावस्था न भवति, **अथ कारणत्वमपि** अथोपादानादिकारणावस्थापि नास्ति । **शेषत्वं शेषित्वं नैव** अनीशत्वं शेषत्वम् ईशत्वं च शेषित्वम्, अत्रोभयमपि नास्ति, सः तादृशः परयोगी **मुक्तः पर उच्यते** परमुक्तः इत्युच्यते । परशिवब्रह्मणि समरसीभूते शिवयोगिनि नास्ति भेदलेशोऽपि । तदा कार्यकारणयोरेकत्वात् कार्यावस्था कारणावस्था चेत्युभयमपि नास्ति । ईशानीशभेदरहितत्वात् शेषत्वशेषित्वेऽपि न स्तः । यस्य कार्यत्वं वा कारणत्वं वा नास्ति, शेषत्वं वा शेषित्वं वा नास्ति स परमुक्त इत्युच्यते ॥७०॥

– इति ज्ञानशून्यस्थलम् –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एतावदुक्त्वा परमप्रबोधम्
अद्वैतमानन्दशिवप्रकाशम् ।
देव्यै पुरा भाषितमीश्वरेण
तूष्णीमभूद् ध्यानपरो गणेन्द्रः ॥७१॥

एवमुक्त्वा समासीनं शिवयोगपरायणम् ।
रेणुकं तं समालोक्य बभाषे प्राञ्जलिर्मुनिः ॥७२॥

व्याख्या – शास्त्रसमाप्तिं सूचयन् रेणुकगणेन्द्रस्तूष्णीं बभूव, तदनन्तंरमगस्त्यः श्रीरेणुकगणेन्द्रं सप्रश्रयमाहेति युग्मेन ग्रन्थकृदाह – **एतावदित्यादिना** । **एतावत्** एतावत्पर्यन्तं **गणेन्द्रः** श्रीरेणुकगणेश्वरः **ईश्वरेण** परमेश्वरेण **देव्यै** देव्यै पार्वत्यै **पुरा** पूर्वकाले एकदा **भाषितं** उपदिष्टम् **आनन्दशिवप्रकाशकम्** आनन्दमयशिवं प्रकाशयतीति आनन्दशिवप्रकाशकः, तम्, शिवानन्दानुभवदायकम् **अद्वैतम्** अद्वैतस्वरूपं **परमप्रबोधं** परमार्थज्ञानम् **उक्त्वा** प्रबोध्य **तूष्णीं** मौनं **ध्यानपरो** ध्याने तन्मयो **अभूत्** अभवत् ॥ **एवम् उक्त्वा** एवं कथयित्वा **समासीनम्** उपविष्टं **शिवयोगपरायणं** शिवयोगनिष्ठं **तं रेणुकं** तं रेणुकगणेश्वरं **समालोक्य** दृष्ट्वा **प्राञ्जलिः** अञ्जलिं बद्ध्वा **मुनिः** अगस्त्यमुनिः **बभाषे** अवदत् ॥ 'प्राञ्जलिर्बभाषे' इत्यनेन मुनिरगस्त्यः श्रीरेणुकं प्रति स्तुतिपरं वचनमारब्धवानिति व्यज्यते ॥ "एतावदुक्त्वा" इत्यादि श्लोक इन्द्रवज्रावृत्ते निबद्धः । लक्षणमुक्तं प्राक् (पश्यत – ७.६७ – व्याख्याम्) ॥७१-७२॥

शिवयोगविशेषज्ञ शिवज्ञानमहोदधे ।
समस्तवेदशास्त्रादिव्यवहारधुरन्धर ॥७३॥

आलोकमात्रनिर्धूतसर्वसंसारबन्धन ।
स्वच्छंन्दचरितोल्लास स्वप्रकाशात्मवच्छिव ॥७४॥

अवतीर्णमिदं शास्त्रमनवद्यं त्वदाननात् ।
श्रुत्वा मे मोदते चित्तं ज्योतिः पश्ये शिवाभिधम् ॥७५॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अद्य मे सफलं जन्म गतो मे चित्तविभ्रमः ।
सञ्जाता पाशविच्छित्तिस्तपांसि फलितानि च ॥७६॥

इदनीमेव मे जातं मुनिराजोत्तमोत्तमम् ।
इतः परं मया नास्ति सदृशो भुवनत्रये ॥७७॥

शास्त्रं तव मुखोद्गीर्णं शिवाद्वैतपरम्परम् ।
मां विना कस्य लोकेषु श्रोतुमस्ति तपः शुभम् ॥७८॥

तपसां परिपाकेन शङ्करस्य प्रसादतः ।
आगतस्त्वं महाभाग मां कृतार्थयितुं गिरा ॥७९॥

व्याख्या – श्रीरेणुकं प्रति मुनिरगस्त्यः कार्तज्ञ्यं प्रकटायामास कुलकेन – **शिवयोगेत्यादिना । शिवयोगविशेषज्ञ** शिवयोगस्य विशेषं जानातीति शिवयोगविशेषज्ञः, तत्सम्बुद्धौ शिवयोगविशेषज्ञ; **शिवज्ञानमहोदधे** शिवज्ञानस्य महान् उदधिः, तत्सम्बुद्धौ, शिवज्ञानमहासमुद्र; **समस्तवेदशास्त्रादिव्यवहारधुरन्धर** समस्तानि वेदशास्त्रादीनि, तेषां व्यवहारः, तस्य धुरं धरतीति समस्तवेदशास्त्रादिव्यवहारधुरन्धरः, तत्सम्बुद्धौ, सकलवेदशास्त्रादीनां शङ्कासमाधानरूपव्यवहारप्रवर्तक; **आलोकमात्रनिर्धूतसर्वसंसारबन्धन** आलोकमात्रेण निर्धूतं सर्वस्य संसारस्य बन्धनं येन सः, तत्सम्बुद्धौ, दृष्टिपातेन केवलेन निरस्तसकलसंसारबन्धन; **स्वच्छन्दचरितोल्लास** स्वच्छन्दं चरितं स्वच्छन्दचरितं स्वेच्छानुसारेण वर्तनम्, तस्य उल्लासः स्वच्छन्दचरितोल्लास यस्य सः, स्वच्छन्दचरितोल्लासः, तस्य सम्बुद्धौ, **स्वप्रकाशात्मवच्छिव** स्वप्रकाशः स्वयं प्रकाशः, स्वप्रकाशः आत्मा स्वरूपं यस्य सः स्वप्रकाशात्मा, तद्वान् शिवः स्वप्रकाशात्मवच्छिवः, तत्सम्बुद्धौ, स्वप्रकाशेन चैतन्यवान् शिव; **त्वदाननात्** तव मुखान् **अनवद्यं** परिशुद्धम् **इदं शास्त्रम्** एतद्दर्शनं **अवतीर्णम्** उद्गतम् । **श्रुत्वा तच्छास्त्रं** श्रवणविषयीकृत्य **मे चित्तं** मम मनः **मोदते** आनन्दमनुभवति । **शिवाभिधं** शिवाख्यं **ज्योतिः** प्रकाशं **पश्ये** पश्यामि ॥ **अद्य** इदानी **मे जन्म** मम जन्म

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सफलं कृतार्थीभूतम् । अद्य मे **चित्तविभ्रमः** चित्तविकारः **गतः** गलितः, **पाशविच्छित्तिः** पाशविच्छेदः **सञ्जाता** सञ्जातः, **तपांसि** तपोविशेषभूतानि **फलितानि च** फलयुक्तानि च ॥ **इदानीम् एव** अद्यैव **मे** मम **मुनिराजोत्तमोत्तमं** मुनीश्वराणाम् उत्तमोत्तमत्वं **जातं** प्राप्तम् । **इतः परं** इतोऽनन्तरं **भुवनत्रये** त्रिषु लोकेषु **मया सदृशः** मत्सदृशो **नास्ति** न भवति ॥ **तव मुखोद्गीर्णं** तव मुखान्निर्गतं **शिवाद्वैतपरम्परं** शिवयोः शिवजीवयोः अद्वैतम्, शिवाद्वैतमेव परम्परा यस्य तत्, शिवाद्वैतपरम्परासम्बद्धं **शास्त्रं** दर्शनं **श्रोतुम्** आकर्णयितुं **लोकेषु** जगत्सु **मां विना** मां विहाय **कस्य** कस्य पुरुषस्य **शुभं तपः अस्ति** शुभतपःफलं भवति ? न कस्यापि भवतीत्यर्थः ॥ हे **महाभाग** महाशय **तपसां** तपोविशेषाणां **परिपाकेन** परिणामेन **शङ्करस्य प्रसादतः** शिवानुग्रहेण च **त्वं** भवान् **मां गिरा कृतार्थयितुं** मां वाण्या कृतार्थीकर्तुम् **आगतः** अत्र प्राप्तः ॥७३-७९॥

इति स्तुवन्तं विनयादगस्त्यं मुनिपुङ्गवम् ।
आलोक्य करुणादृष्ट्या बभाषे स गणेश्वरः ॥८०॥

व्याख्या – अगस्त्यकृतां स्तुतिमाकर्ण्य गणेश्वरो रेणुकः उवाच इत्याह– **इतीति** । **इति** एवं **विनयात् स्तुवन्तं** सप्रश्रयं स्तुतिं कुर्वन्तं **मुनिपुङ्गवं** मुनिश्रेष्ठम् **अगस्त्यं** कलशसम्भवम् **आलोक्य** दृष्ट्वा **स गणेश्वरः** स श्रीरेणुकगणेश्वरः **करुणादृष्ट्या** अनुग्रहदृष्ट्या **बभाषे** अवदत् ॥८०॥

अगस्त्य मुनिशार्दूल तपःसिद्धमनोरथ ।
त्वां विना शिवशास्त्रस्य कः श्रोतुमधिकारवान् ॥८१॥

पात्रं शिवप्रसादस्य भवानेको न चापरः ।
इति निश्चित्य कथितं मया ते तन्त्रमीदृशम् ॥८२॥

स्थाप्यतां सर्वलोकेषु तन्त्रमेतत्त्वया मुने ।
ईदृशं शिवबोधस्य साधनं नास्ति कुत्रचित् ॥८३॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

रहस्यमेतत् सर्वज्ञः सर्वानुग्राहकः शिवः ।
अवादीत् सर्वलोकानां सिद्धये पार्वतीपतिः ॥८४॥

तदिदं शिवसिद्धन्तसाराणामुत्तमोत्तमम् ।
वेदवेदान्तसर्वस्वं विद्याचारप्रवर्तकम् ॥८५॥

वीरमाहेश्वरग्राह्यं शिवाद्वैतप्रकाशकम् ।
परीक्षितेभ्यो दातव्यं शिष्येभ्यो नान्यथा क्वचित् ॥८६॥

एतच्छ्रवणमात्रेण सर्वेषां पापसंक्षयः ।
अवतीर्णं मया भूमौ शास्त्रस्यास्य प्रवृत्तये ॥
प्रवर्तय शिवाद्वैतं त्वमपि ज्ञानमीदृशम् ॥८७॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादि-सारभूते श्रीसिद्धान्तशिखामणौ माहेश्वरस्थलान्तर्गतैक्यस्थलान्तर्गत-नवविधलिङ्गस्थलप्रसङ्गो नाम विंशः परिच्छेदः समाप्तः ॥२०॥

व्याख्या – श्रीरेणुकगणेन्द्रो मुनिश्रेष्ठमगस्त्यमाह – **अगस्त्येत्यादिना कुलकेन । मुनिशार्दूल** मुनिश्रेष्ठ **तपःसिद्धमनोरथ** तपसा सिद्धः मनोरथः यस्य सः तपः सिद्धमनोरथः, तत्सम्बुद्धौ, **अगस्त्य** कुम्भसंभव, **त्वां विना** भवन्तं विहाय **कः** कः पुरुषः **शिवशास्त्रस्य** शिवाद्वैतदर्शनस्य **श्रोतुम्** आकर्णयितुं **अधिकारवान्** अधिकारी भवितुमर्हति ? न कोऽपीत्यर्थः ॥ **भवान् एकः** भवानेवैकः **शिवप्रसादस्य** शिवानुग्रहस्य **पात्रं** योग्यः, **न चापरः** न कोऽप्यन्यः, **इति निश्चित्य** एवमवधार्य **मया** मन्मुखात् **ईदृशं तन्त्रम्** एतदृशं शास्त्रं **कथितं** बोधितम् ॥ **मुने** तपस्विन् **सर्वलोकेषु** सर्वेषु लोकेषु **त्वया** भवता **स्थाप्यतां** स्थापनीयम् । **शिवबोधस्य** शिवज्ञानस्य **ईदृशम्** एतादृशं **साधनं** प्रमाणभूतं साधनं **कुत्रचित्** कुत्रापि **नास्ति** न विद्यते ॥ **सर्वज्ञः** सर्वज्ञाता **सर्वानुग्राहकः** सर्वान् अनुग्रहीतुं समर्थः **पार्वतीपतिः** पार्वतीधवः **सर्वलोकानां सिद्धये** सर्वेषां लोकानां हितसिद्धये

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एतद् रहस्यं एतादृशं रहस्यबोधम् **अवादीत्** अनुग्रहदृष्ट्या कथितवान् ॥ **शिवसिद्धान्तसाराणां** शिवसिद्धान्तस्य सारभूतानाम् शास्त्राणां मध्ये **उत्तमोत्तमम्** उत्तमेषु उत्तमं, सर्वश्रेष्ठम् इत्यर्थः, **वेदवेदान्तसर्वस्वं** वेदसंहितानाम् उपनिषदां च सारसर्वस्वम्, **विद्याचारप्रवर्तकं** विद्या ज्ञानम् आचारः सत्कर्माचरणं चेत्युभयोः प्रवर्तनक्षमम्, **वीरमाहेश्वरग्राह्यं** वीर-माहेश्वरैः ज्ञेयम्, **शिवाद्वैतप्रकाशकं** शिवाद्वैतं प्रकाशयतीति शिवाद्वैत-प्रकाशकं, तत्, **तदिदं** तदेतद्दर्शनं **परीक्षितेभ्यः** परीक्षितनिष्ठावद्भ्यः **शिष्येभ्यः** साधकशिष्येभ्यः **दातव्यं** देयम् । **क्वचिद् अन्यथा न** क्वचिदपि भिन्नरीत्या, परीक्षामकृत्वा इत्यर्थः, न दातव्यम् ॥ **एतच्छ्रवणमात्रेण** एतस्य केवलं श्रवणेन **सर्वेषां** सर्वजीविनां **पापसंक्षयः** पापनाशः भवति । **अस्य शास्त्रस्य प्रवृत्तये** अस्य दर्शनस्य प्रवृत्त्यर्थमेव **मया भूमौ अवतीर्णं** मया पृथिव्याम् अवतारं कृतम् । **त्वमपि** भवानपि **ईदृशं शिवाद्वैतं ज्ञानं** एतादृशं शिवाद्वैतदर्शनं **प्रवर्तय** प्रचारय ॥ मुनिमगस्त्यं निमित्तीकृत्य श्रीरेणुक-गणेश्वरेणोपदिष्टं शिवाद्वैतदर्शनं सर्वेषां हिताय कल्पते ॥८१-८७॥

शिवाद्वैतमिदं शास्त्रमेकोत्तरशतस्थलम् ।
रेणुकागस्त्यसंवादं वेद-वेदान्तसंमतम् ॥
शैवागमोक्तसिद्धान्तं सर्वलोकहितावहम् ।
प्रणीतं येन योगीन्द्रं वन्दे तं भवभञ्जकम् ॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना डाक्टर्-उपाधिभाजा शिवकुमारस्वामिना विरचितायां श्रीशिवयोगि-शिवाचार्यकृतश्रीसिद्धान्तशिखामणेः शिवाद्वैतप्रदीपिकाख्यव्याख्यायां विंशः परिच्छेदः समाप्तः ॥२०॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एकविंशः परिच्छेदः

विभीषणाभीष्टप्रदानम्

व्याख्या – गतविंशतिपरिच्छेदानां मध्ये श्रीशिवयोगिशिवाचार्य आदितश्चतुर्षु परिच्छेदेषु प्रथमे मङ्गलाचरणपूर्वकं स्वीयवंशानुक्रमं ग्रन्थावतारक्रमं च, द्वितीये परशिवकृतसृष्टिक्रमं रेणुकदारुकाख्यगणेश्वराभ्यां कृतपरमेश्वरसेवां च, तृतीये परशिवसभां लोके श्रीरेणुकावतारकारणीभूतशापप्रसङ्गं च, चतुर्थे च कोल्लिपाक्यां सोमेश्वराख्यलिङ्गाद् रेणुकगणेन्द्रस्य अवतारम्, मुनेरगस्त्यस्याऽऽश्रमं प्रति तस्य गमनम्, आश्रमे अगस्त्यकृतरेणुकसत्कारं च वर्णितवान् । पञ्चमपरिच्छेदादारभ्य चतुर्दशपरिच्छेदपर्यन्तं दशपरिच्छेदेषु भक्तादिषट्स्थलाश्रितानि चतुश्चत्वारिंशदङ्गस्थलानि, पञ्चदशपरिच्छेदादारभ्य विंशपरिच्छेदपर्यन्तं षट्परिच्छेदेषु भक्तादिषट्स्थलाश्रितानि सप्तपञ्चाशल्लिङ्गस्थलानि च श्रीरेणुकागस्त्यसंवादरूपेण निरूप्यन्ते । एकविंशेऽस्मिन् परिच्छेदे रेणुक-विभीषणसंवादः श्रीरेणुकस्य पुनः कोल्लिपाक्यां सोमेश्वरलिङ्गे ऐक्यं च वर्ण्येते ।

इत्युक्त्वा पश्यतस्तस्य पुरस्तादेव रेणुकः ।
अन्तर्दधे महादेवं चिन्तयन्नन्तरात्मना ॥१॥

य इदं शिवसिद्धान्तं वीरशैवमतं परम् ।
शृणोति शुद्धमनसा स याति परमां गतिम् ॥२॥

व्याख्या – श्रीरेणुकगणेन्द्रस्याऽगस्त्याश्रमान्निर्गमनं सिद्धान्तस्य फलश्रुतिं चाह – इत्युक्त्वेति । इत्युक्त्वा एवं कथयित्वा रेणुकः रेणुकगणेश्वरः तस्य अगस्त्यस्य पश्यतः दृश्यमानस्य पुरस्ताद् एव अग्रत एव अन्तरात्मना

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अन्तर्मुखचित्तेन **महादेवं** परमेश्वरं **चिन्तयन्** ध्यायन् **अन्तर्दधे** अन्तर्धानो बभूव ॥ **यः** यः पुरुषः **इदम्** एतत् **वीरशैवमतं** वीरशैवसम्मतं **परं शिवसिद्धान्तं** सर्वोत्कृष्टं वेदवेदान्तसंमतं शिवाद्वैतदर्शनं **शुद्धमनसा** निर्मलचित्तेन **शृणोति** आकर्णयति **सः** स पुरुषः **परमां गतिं** परमस्थितिं **याति** गच्छति ॥१-२॥

स्वच्छन्दाचाररसिकः स्वेच्छानिर्मितविग्रहः ।
आससाद पुरीं लङ्कां रेणुको गणनायकः ॥३॥

समागतं महाभागं सर्वागमविशारदम् ।
विभीषणः समालोक्य गेहं प्रावेशयन्निजम् ॥४॥

भद्रासने निजे रम्ये निवेश्य गणनायकम् ।
अर्घ्यपाद्यादिभिः सर्वैरुपचारैरपूजयत् ॥५॥

पूजितेन प्रसन्नेन रेणुकेन निरूपितः ।
निषसाद तदभ्याशे स निजासनमाश्रितः ॥६॥

व्याख्या – अन्तर्धानं गतो रेणुकगणेश्वरो लङ्कां प्राविशदित्याह – **स्वच्छन्देत्यादिना कालापकेन । स्वच्छन्दाचाररसिकः** स्वेच्छावर्तने रसिकः रुचिमान्, **स्वेच्छानिर्मितविग्रहः** स्वेच्छया निर्मितः प्रकटितः विग्रहः दर्शनयोग्याकारः येन सः, **रेणुकः गणनायकः** श्रीरेणुकगणेन्द्रः **पुरीं लङ्कां** लङ्कानगरीम् **आससाद** प्राप्तवान् ॥ **सर्वागमविशारदं** सर्वेषु आगमेषु विशारदं निष्णातं **महाभागं** सौभाग्यसम्पन्नं श्रीरेणुकं **समागतं** प्राप्तं **समालोक्य** दृष्ट्वा **विभीषणः** तदानींतन लङ्काधीशो विभीषणः तं श्रीरेणुकं **निजं गेहं** स्वकीयं राजभवनं **प्रावेशयत्** प्रवेशयति स्म ॥ **निजे रम्ये भद्रासने** स्वकीये मनोहरे सिंहासने **गणनायकं** गणेश्वरं रेणुकं **निवेश्य** उपवेश्य **सर्वैः** सकलैः **अर्घ्यपाद्यादिभिः** आचमनार्थं जलमर्घ्यम्, पादप्रक्षालनार्थं जलं पाद्यम्, इत्यादिभिः **उपचारैः** सत्कारप्रकारैः **अपूजयत्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूजयाञ्चकार ॥ पूजितेन सत्कृतेन प्रसन्नेन संप्रीतेन रेणुकेन श्रीरेणुक-गणेन्द्रेण निरूपितः सूचितः सन् सः विभीषणः तदभ्याशे तस्य श्रीरेणुकस्य समीपे निजासनम् आश्रितः स्वकीयासनमन्यदाश्रित्य निषसाद उपाविशत् ॥३-६॥

आबभाषे गणेन्द्रं तं कृताञ्जलिर्विभीषणः ।
मानुषाकारसम्पन्नं साक्षाच्छिवमिवापरम् ॥७॥

रेणुक त्वां गणाधीश शिवज्ञानपरायण ।
अवतीर्णं महीमेनामिति सम्यक् श्रुतं मया ॥८॥

मद्भाग्यगौरवादद्य समायास्त्वं पुरीमिमाम् ।
कथं भाग्यविहीनानां सुलभाः स्युर्भवादृशाः ॥९॥

मत्समो नास्ति लोकेषु भाग्यातिशयवत्तया ।
यस्य गेहं स्वयं प्राप्तो भवान् साक्षान्महेश्वरः ॥१०॥

कृतार्था मे पुरी ह्येषा कृतार्थो राक्षसान्वयः ।
जीवितं च कृतार्थं मे यस्य त्वं दृष्टिगोचरः ॥११॥

व्याख्या– अथ विभीषण आह– कृताञ्जलिः अञ्जलिं बद्ध्वा विभीषणः लङ्काधीशः मानुषाकारसम्पन्नं मनुष्यरूपधारिणं साक्षाद् अपरं शिवम् इव साक्षात्तया अन्यं शिवम् इव तं गणेन्द्रं तं रेणुकगणेश्वरं आबभाषे विज्ञापयामास ॥ किं विज्ञापयामास इत्यत्राह – रेणुकेति । रेणुक गणाधीश भो रेणुक गणेश्वर, शिवज्ञानपरायण शिवज्ञानैकतन्मय त्वां भवन्तं एनां महीम् इमां भूमिं अवतीर्णम् अवातरद् इति मया इत्येवं मया सम्यक् श्रुतं साधुतया आकर्णितम् ॥ अद्य इदानीं मद्भाग्यगौरवात् मदीयसौभाग्यातिशयात् इमां पुरीं एनां नगरीं लङ्कां (मदीयां) त्वं भवान् समायाः समागतः । भाग्यविहीनानां सौभाग्यरहितानां भवादृशाः भवत्सदृशाः

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कथं **सुलभाः** लब्धुं सरलाः? कथमपि न सुलभाः इत्यर्थः ॥ **भाग्यातिशयवत्तया** सौभाग्याधिक्ययुक्ततया **यस्य गेहं** यस्य निजनिवासं **साक्षात् महेश्वरः** साक्षत्तया परमेश्वरः **भवान् स्वयं प्राप्तः** भवान् स्वेच्छया आगतः तादृशस्य **मत्समः** मम समानः **लोकेषु** त्रिषु लोकेषु **नास्ति** न भवति ॥ **एषा हि मे पुरी** इयं हि मम नगरी लङ्का **कृतार्था** सफला, **राक्षसान्वयः** राक्षसवंशः कृतार्थः कृतकृत्यः, **यस्य त्वं दृष्टिगोचरः** यस्य भवान् दृष्टिपथमागतः तस्य **मे जीवितं च** मम जीवनं च **कृतार्थं** सफलम् ॥७-११॥

इति ब्रुवाणं कल्याणं राक्षसेन्द्रं गणेश्वरः ।
बभाषे सस्मितो वाणीं विश्वोल्लासकरीं शुभाम् ॥१२॥

विभीषण महाभाग जाने त्वां धर्मकोविदम् ।
त्वां विना कस्य लोकेषु जायते भक्तिरीदृशी ॥१३॥

समस्तशास्त्रसारज्ञं सर्वधर्मपरायणम् ।
अध्यात्मविद्यानिरतमाहुस्त्वां राक्षसेश्वर ॥१४॥

व्याख्या – विभीषणवचनं श्रुत्वा तमुद्दिश्य श्रीरेणुकः किमुक्तवान् इत्यत्राह – **इतीति** । **इति** एवं **ब्रुवाणं** ब्रुवन्तं **कल्याणं** मङ्गलयुक्तं **राक्षसेन्द्रं** राक्षसाधिपं विभीषणं प्रति **गणेश्वरः** श्रीरेणुकगणनायकः **सस्मितः** स्मितेन सह **विश्वोल्लासकरीं** सर्वेषामानन्ददायिनीं **शुभां** मङ्गलमयीं **वाणीं** वाचं **बभाषे** अवदत् ॥ किमवददित्यत्राह – **विभीषणेति** । **विभीषण** हे विभीषण, **महाभाग** भाग्यशालिन्, **त्वां** भवन्तं **धर्मकोविदं** धर्मज्ञं, **लोकेषु** त्रिषु लोकेषु **त्वां विना** भवन्तं विहाय **कस्य** अन्यस्य कस्य **ईदृशी भक्तिः** एतादृशी भक्तिः **जायते** उत्पद्यते ? न कस्याप्यन्यस्येत्यर्थः ॥ **राक्षसेश्वर** राक्षसाधिप **त्वां** भवन्तं **समस्तशास्त्रसारज्ञं** सकलशास्त्रसारं जानातीति, तादृशम्, **सर्वधर्मपरायणं** सकलधर्मज्ञानपरवशम् **अध्यात्मविद्यानिरतं** शिवाद्वैतज्ञानरूपाध्यात्मज्ञाननिष्ठम् **आहुः** ब्रुवन्ति ॥१२-१४॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

त्वदीयधर्मसम्पत्तिं श्रुत्वाहं विस्मिताशयः ।
व्रजन् कैलासमचलं त्वदन्तिकमुपागतः ॥१५॥

प्रीतोऽस्मि तव चारित्रैः शोभनैर्लोकविश्रुतैः ।
दास्यामि ते वरं साक्षात् प्रार्थयस्व यथेप्सितम् ॥१६॥

व्याख्या – श्रीरेणुकः पुनराह – **त्वदीयेत्यादिना युग्मेन । त्वदीयसम्पत्तिं** तव शिवधर्मसम्पदं **श्रुत्वा** आकर्ण्य **अहं विस्मिताशयः** आश्चर्ययुक्तमानसः सन्नहं **कैलासाचलं व्रजन्** कैलासपर्वतमार्गे गच्छन् **त्वदन्तिकं** त्वत्समीपम् **उपागतः** आगतोऽस्मि ॥ **तव** भवतः **शोभनैः** मनोहरैः **लोकविश्रुतै** लोके प्रसिद्धैः **चारित्रैः** नैतिकवर्तनैः **प्रीतोऽस्मि** सम्प्रीतो भवामि । अतः **ते वरं** भवते अनुग्रहात्मकं वरं **साक्षात् दास्यामि** साक्षात्तया, स्वयंस्फूर्त्या इत्यर्थः, प्रददामि । **यथा ईप्सितं** यथाभिलषितं **प्रार्थयस्व** वृणीष्व ॥१५-१६॥

इति प्रसादसुमुखे भाषमाणे गणेश्वरे ।
प्रणम्य परया प्रीत्या व्याजहार विभीषणः ॥१७॥

आगमानुग्रहादेव भवतः शिवयोगिनः ।
दुर्लभा सर्वलोकानां समपद्यन्त सम्पदः ॥१८॥

तथापि प्रार्थनीयं मे किञ्चदस्ति गणेश्वर ।
सुकृते परिपक्वे हि स्वयं सिद्ध्यति वाञ्छितम् ॥१९॥

रावणो हि मम भ्राता माहेश्वरशिखामणिः ।
अदृष्टशत्रुसम्बाधं शशास हि जगत्त्रयम् ॥२०॥

यस्य प्रतापमतुलं सोढुमक्षमशक्तयः ।
इन्द्रादयः सुराः सर्वे राज्यलक्ष्म्या वियोजिताः ॥२१॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स कालवशेनैव स्वचारित्रविपर्ययात् ।
रणे विष्ण्वतारेण रामेण निहतोऽभवत् ॥२२॥

स तु रामशराविद्धः कण्ठस्खलितजीवितः ।
अवशिष्टं समालोक्य मामवादीत् सुदुःखितः ॥२३॥

व्याख्या – श्रीरेणुकप्रसादवचनं श्रुत्वा विभीषणस्तमाह – **इतीति** । **इति** एवं **प्रसादसुमुखे** अनुग्रहोन्मुखे **गणेश्वरे** श्रीरेणुकगणेन्द्रे **भाषमाणे** उक्ते सति, **विभीषणः** रावणानुजो विभीषणः **प्रणम्य** प्रणामं कृत्वा **परया प्रीत्या** परमया भक्त्या **व्याजहार** तमुक्तवान् ॥ किमुक्तवान् इत्यत्राह – **आगमेत्यादिना कुलकेन** । **शिवयोगिनः** परशिवयोगिनः **भवतः** तव **आगमानुग्रहादेव** आगमनरूपकृपाप्रसादादेव **सर्वलोकानां** सर्वजनानां **दुर्लभाः** लब्धुमसुलभाः **सम्पदः** सम्पत्त्योऽपि **समपद्यन्ते** प्राप्यन्ते ॥ **तथाऽपि** तथा सत्यपि **गणेश्वर** भो गणनायक, **मे** मया **किञ्चित् प्रार्थनीयं** किञ्चित् प्रार्थयितुं योग्यम् **अस्ति** वर्तते । **सुकृते परिपक्वे** पुण्ये फलनिष्पत्त्युन्मुखे सति **वाञ्छितम्** अपेक्षितं **स्वयं सिद्ध्यति** स्वयमेव सिद्धिं प्राप्नोति । **हि** इति प्रसिद्धौ ॥ **मम भ्राता** मदीयोऽग्रजः **माहेश्वरशिरोमणिः** माहेश्वर-श्रेष्ठः **रावणः हि** रावणो नाम प्रसिद्धः **अदृष्टशत्रुसम्बाधं** शत्रूणां सम्बाधः शत्रुसम्बाधः, शत्रुप्रतिबन्धः, अदृष्टः शत्रुसम्बाधः येन सः अदृष्टशत्रु-सम्बाधः, अदृष्टशत्रुसम्बाधः यथा भवति तथा अदृष्टशत्रुसम्बाधम्, क्रियाविशेषणम्, **जगत्त्रयं** लोकत्रयं **शशास** पालयामास ॥ **यस्य** यस्य रावणस्य **अतुलं प्रतापम्** असदृशं शौर्यं **सोढुम् अक्षमशक्तयः** प्रतिकर्तुम् असमर्थशक्तियुक्ताः (अक्षमाः शक्तयः येषां ते) **इन्द्रादयः सुराः सर्वे** इन्द्रप्रभृतयो देवाः सकलाः **राज्यलक्ष्म्या** स्वस्वराज्यसम्पदा **वियो-जिताः** दूरीकृताः ॥ **स तु** स च रावणः **कालवशेनैव** कालगत्या एव **स्वचारित्रविपर्ययात्** स्वशीलविपर्यासात् **रणे** युद्धे **विष्ण्वतारेण** विष्णोरवतारेण **रामेण** दाशरथिना रामेण **निहतः अभवत्** मारितो बभूव ॥ **स तु** स रावणेश्वरः **रामशराविद्धः** रामशरेण रामबाणेन **आविद्धः**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निघातितः कण्ठस्खलितजीवितः कण्ठगतप्राणः सन् सुदुःखितः अत्यन्त-दुःखमनुभवन् अवशिष्टं राक्षसेपु हतशेषं मां समालोक्य मां दृष्ट्वा अवादीत् अब्रवीत् ॥१७-२३॥

विभीषण विशेषज्ञ महाबुद्धे सुधार्मिक ।
अवशिष्टोऽसि वंशस्य रक्षसां भाग्यगौरवात् ॥२४॥

वयमज्ञानसम्पन्ना महत्सु द्रोहकारिणः ।
ईदृशीं तु गतिं प्राप्ता दुस्तरा हि विधिस्थितिः ॥२५॥

नवकं लिङ्गकोटीनां प्रतिष्ठाप्यमिह स्थले ।
इति सङ्कल्पितं पूर्वं मया तदवशिष्यते ॥२६॥

कोटिषट्कं तु लिङ्गानां मया साधु प्रतिष्ठितम् ।
कोटित्रयं तु लिङ्गानां स्थापनीयमतस्त्वया ॥२७॥

इति तस्य वचःश्रुत्वा दीनबुद्धेर्मरिष्यतः ।
तथा साधु करोमीति प्रतिज्ञातं मया तथा ॥२८॥

युगपच्छिवलिङ्गानां कोटित्रयमनुत्तमम् ।
प्रतिष्ठाप्यं यथाशास्त्रमिति मे निश्चयोऽभवत् ॥२९॥

लिङ्गकोटित्रयस्येह युगपत् स्थापनाविधौ ।
अविदन्नेकमाचार्यम् अहमेवमवस्थितः ॥३०॥

शिवशास्त्रविशेषज्ञ शिवज्ञाननिधिर्भवान् ।
आचार्यभावमासाद्य मम पूरय वाञ्छितम् ॥३१॥

व्याख्या – किमाह रावणः ? विभीषणः किं निश्चितवान् ? इत्यत्राह – विभिषणेत्यादिना श्लोकाष्टकेन (कुलकेन) । विभीषण हे विभीषण, विशेषज्ञ विशेषं जानातीति विशेषज्ञः, तस्य संबुद्धौ । महाबुद्धे हे महाज्ञानिन्,

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सुधार्मिकः परमधार्मिकः, **भाग्यगौरवात्** सौभाग्याधिक्यात् **रक्षसां वंशस्य** राक्षसान्वयस्य **अवशिष्टोऽसि**·हतेषु शिष्टोऽसि ॥ **वयं** वयं तु **अज्ञानसम्पन्ना** अज्ञानयुक्ताः **महत्सु द्रोहकारिणः** महापुरुषेषु द्रोहकारिणः द्रोहं कृतवन्तः सन्तः **ईदृशीं तु गतिं** एतादृशीं तु स्थितिं **प्राप्ताः** आसादिताः **विधिस्थितिः** विधिविहितगतिः **दुस्तरा** दुरतिक्रमा । हि इति प्रसिद्धौ ॥ **इह स्थले** इह लङ्कायां **नवकं लिङ्गकोटीनां** लिङ्गानां कोटिनवकं **प्रतिष्ठाप्यम् इति** स्थापनीयम् इति **पूर्वं मया** इतः पूर्वं मया **सङ्कल्पितं** प्रतिज्ञातम्, **तद् अवशिष्यते** तत्कार्यं अपूर्णतया स्थितम् ॥ **लिङ्गानां कोटिषट्कं** लिङ्गकोटीनां षट्कं **मया साधु प्रतिष्ठितं** मयैव सम्यक्तया स्थापितम् । **अतः** तस्मात् **कोटित्रयं तु लिङ्गानां** लिङ्गकोटीनां त्रयं **त्वया** भवता **स्थापनीयं** प्रतिष्ठापयितव्यम् ॥ **दीनबुद्धेः** दैन्यचित्तस्य **मरिष्यतः** मरणाभिमुखस्य **तस्य** रावणस्य **इति** एवं विषयकं **वचः** वचनं **श्रुत्वा** आकर्ण्य **तथा साधु करोमीति** तथैव सम्यक्तया करिष्यामीति **मया तथा प्रतिज्ञातं** मया तदनुसारं सङ्कल्पितम् ॥ **अनुत्तमं** न विद्यते उत्तमं यस्मात् तत्, श्रेष्ठमित्यर्थः, **शिवलिङ्गानां कोटित्रयं** शिवलिङ्गकोटीनां त्रयं **युगपत्** एककालमेव **यथाशास्त्रं** शास्त्रम् अनतिक्रम्य, शास्त्रानुसारत इत्यर्थः, **प्रतिष्ठाप्यं** प्रतिष्ठापनीयम् **इति मे निश्चयः अभवत्** इति मम निश्चयः आसीत् ॥ **अस्य लिङ्गकोटित्रयस्य** एवं निश्चितस्य अस्य लिङ्गकोटीनां त्रयं **इह** अस्मिन् स्थले **युगपत्** एककालमेव **स्थापनाविधौ** प्रतिष्ठापनविधाने **एकमपि आचार्यं** कोऽप्येकमप्याचार्यम् **अविदन्** अजानन् **अहम् एवम् अवस्थितः** अहम् एवमेव किमपि कर्तुमक्षमः स्थितः ॥ **शिवशास्त्रविशेषज्ञ** शिवशास्त्रविशारद, **शिवज्ञाननिधिः** शिवज्ञानशेवधिः **भवान् आचार्यभावं** भवानाचार्यपदवीम् **आसाद्य** संप्राप्य **मम वाञ्छितं** ममेच्छां **पूरय** पूर्णं करोतु । 'भवान् पूरय' इत्यात्र 'भवद्योगे न मध्यमः' इति वैयाकरणप्रसिद्ध्या 'पूरयतु' इति प्रथमपुरुषप्रयोगोऽपेक्षितः । तत्रार्षप्रयोग इति मध्यमपुरुषः समर्थनीयः ॥२४-३१॥

तस्येति वचनं श्रुत्वा राक्षसेन्द्रस्य धीमतः ।
तथेति प्रतिशुश्राव सर्वज्ञो गणनायकः ॥३२॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ततः सन्तुष्टचित्तस्य पौलस्त्यस्येष्टसिद्धये ।
कोटित्रयं तु लिङ्गानां यथाशास्त्रं यथाविधि ॥
त्रिकोट्याचार्यरूपेण स्थापितं तेन तत्क्षणे ॥३३॥

तादृशं तस्य महात्म्यं समालोक्य विभीषणः ।
प्रणनाम मुहुर्भक्त्या पादयोस्तस्य विस्मितः ॥३४॥

प्रणतं विनयोपेतं प्रहृष्टं राक्षसेश्वरम् ।
अनुगृह्य स्वमाहात्म्याद् रेणुकोऽन्तर्हितोऽभवत् ॥३५॥

विभीषणोऽपि हृष्टात्मा रेणुकस्य प्रसादतः ।
शिवभक्तिरसासक्तः स्थिरराज्यमपालयत् ॥३६॥

व्याख्या – श्रीरेणुको विभीषणस्याभीष्टं पूरयित्वाऽन्तर्हितो बभूवेति श्लोकपञ्चकेनाह – **तस्यैतीत्यादिना** । इति एकमुक्तं **तस्य धीमतः** तस्य बुद्धिमतः **राक्षसेन्द्रस्य** राक्षसाधिपस्य **वचनं श्रुत्वा** वाचम् आकर्ण्य **सर्वज्ञो गणनायकः** सर्वविद् रेणुकगणेन्द्रः **तथेति** तथैव भवेद् इति **प्रतिशुश्राव** स्वसंमतिं श्रावयामास ॥ **ततः** अनन्तरं **सन्तुष्टचित्तस्य** सन्तुष्टं संप्रीतं चित्तं मनः यस्य सः सन्तुष्टचित्तः, तस्य, **पौलस्त्यस्य** पुलस्त्यस्य अपत्यं पुमान् पौलस्त्यः, तस्य, विभीषणस्य **इष्टसिद्धये** अपेक्षितस्य सिद्ध्यर्थं **त्रिकोट्याचार्यरूपेण** त्रिकोटीनाम् आचार्याणां रूपेण रूपधारणेन **लिङ्गानां कोटित्रयं** लिङ्गकोटीनां त्रयं **यथाशास्त्रं** शास्त्रमनतिक्रम्य, शास्त्रानुसारं **यथाविधि** विधिमनतिक्रम्य, विध्यामुसारं च **तेन** श्रीरेणुकेन **तत्क्षणे** तत्सन्दर्भे **स्थापितं** प्रतिष्ठापितम् ॥ [पुलस्त्यो नाम ब्रह्मणः षट्सु मानसपुत्रेष्वेकतमः । कर्दमप्रजापतेर्दुहिता 'हविर्भुक्'-नाम्नी पुलस्त्यमहर्षेः पत्नी बभूव । पुलस्त्यस्तस्य द्वितीयपत्न्यां गोनाम्न्यां (इलविलायां) वैश्रवणाख्यं पुत्रं लेभे । वैश्रवण एव कुबेरः । वैश्रवणस्तु स्वपितरं विहाय ब्रह्माणमगच्छत् । ब्रह्मणोऽनुग्रहेण सोऽमरत्वं धनेशत्वं लोकपालत्वं च

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्राप्तवान् । तेन क्रोधाविष्टो भूत्वा पुलस्त्यः प्रतीकाराय स्वदेहाद्देहान्तरं सृष्टवान् । स एव विश्रवा इति नाम्ना ज्ञातः । पितरं क्रोधाविष्टं ज्ञात्वा तदनुग्रहप्राप्त्यै तिस्रो राक्षसस्त्रियस्तत्सेवार्थं प्रेषितवान् । तासां नृत्य-गीतादिसेवाभिः संप्रीतो वैश्रवास्ताभ्यः वरान् अनुजग्राह । तदा पुष्पोत्कटायां रावणकुम्भकर्णौ, मालिन्यां विभीषणः, राकायां च खरशूर्पणखे जन्म लेभिरे । (म. भा., वनपर्व, २७६.१-८) । एवं विभीषणो मालिनी-पुत्रः पौलस्त्यः ॥] **तस्य** श्रीरेणुकस्य **तादृशं** तथाविधं **माहात्म्यं** महिमानं **समालोक्य** संवीक्ष्य **विस्मितः** आश्चर्ययुक्तो **विभीषणः** लङ्काधिपो विभीषणः **तस्य** श्रीरेणुकस्य **पादयोः** चरणयोः **मुहुः** भक्त्या पुनः पुनः भक्तिपूर्वकं **प्रणनाम** प्रणामम् अकरोत् ॥ **प्रहृष्टं** प्रहर्षं गतं **विनयोपेतं** विनययुक्तं **राक्षसेश्वरं** राक्षसराजं **स्वमाहात्म्यात्** स्वमहिम्ना **अनुगृह्य** अनुग्रहं कृत्वा **रेणुकः** श्रीरेणुकगणेन्द्रः **अन्तर्हितोऽभवत्** अन्तर्धानं गतवान् ॥ **रेणुकस्य** गणनायकस्य श्रीरेणुकस्य **प्रसादतः** अनुग्रहतः **हृष्टात्मा** प्रहर्षितः **विभीषणः अपि** लङ्केशो विभीषणोऽपि **शिवभक्तिरसासक्तः** शिवभक्ति-रसे शिवभक्त्यास्वादे आसक्तो निरतः सन् **स्थिरराज्यम् अपालयत्** स्थिरं राज्यं स्थिरराज्यं शत्रुपीडाराहित्येन दृढतां प्राप्तं राज्यं पालयामास । दीर्घकालं राज्यं ररक्षेत्यर्थः ॥३२-३६॥

रेणुकोऽपि महातेजाः सञ्चरन् क्षितिमण्डले ।
प्रच्छन्नश्च प्रकाशश्च परमाद्वैतभावितः ॥३७॥

कांश्चिद् दृष्टिनिपातेन करुणारसवर्षिणा ।
अपरानुपदेशेन शिवाद्वैताभिमर्शिना ॥३८॥

अन्यांश्च सहवासेन समस्तमलहारिणा ।
कृतार्थयन् जनान् सर्वान् कृतिनः पक्वकर्मिणः ॥३९॥

दर्शयित्वा निजाधिक्यं शिवदर्शनलालसः ।
खण्डयित्वा दुराचारान् पाषण्डान् भिन्नदर्शनान् ॥४०॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यन्त्रमन्त्रकलासिद्धान् विमतान् सिद्धमण्डलान् ।
विजित्य स्वप्रभावेण स्थापयित्वा शिवागमान् ॥
आजगाम निजावासं कोल्लिपाक्यभिधं पुरम् ॥४१॥

तत्र संभावितः सर्वैर्जनैः शिवपरायणैः ।
सोमनाथाभिधानस्य शिवस्य प्राप मन्दिरम् ॥४२॥

पश्यतां तत्र सर्वेषां भक्तानां शिवयोगिनाम् ।
तन्वानो विस्मयं भावैस्तुष्टाव परमेश्वरम् ॥४३॥

व्याख्या – श्रीरेणुकगणेश्वरस्य महिमानं निरूपयति – **रेणुके-त्यादिना** कुलकेन । **महातेजाः रेणुकोऽपि** महत् तेजो यस्य सः महातेजाः, श्रीरेणुकगणेन्द्रोऽपि **परमाद्वैतभावितः** परमाद्वैतभावे निमग्नः **प्रच्छन्नश्च प्रकाराश्च** अदृश्यश्च प्रकटश्च, सप्तशतवर्षपर्यन्तमदृश्यः सप्तशतवर्षपर्यन्तं प्रकटश्चेति सम्प्रदायविदः ['अरिदु (प्रकटः) एळुनूरुवर्ष, अरियदे (प्रच्छन्न) एळुनूरुवर्ष.....' इति हरिहरः – 'रेवणसिद्धेश्वररगळे'-नाम्नि कन्नडकाव्ये]; **क्षितिमण्डले** भूमण्डले **सञ्चरन्** सञ्चारं कुर्वन् सन् **कांश्चित्** कांश्चन **करुणारसवर्षिणा** दयारसवर्षणशीलेन **दृष्टिपातेन** कटाक्षपातेन, **अपरान्** इतरान् **शिवाद्वैताभिमर्शिना** शिवाद्वैतम् अभिमृशतीति शिवा-द्वैताभिमर्शी, तेन, शिवाद्वैतप्रकाशनपरेण **उपदेशेन** बोधनेन, **अन्यांश्च** तदिरांश्च **समस्तमलहारिणा** समस्तान् मलान् हरतीति समस्तमलहारी, तेन, आणवादिमलनिवारकेन **सहवासेन** सहवासद्वारा च, एवं **सर्वान्** समस्तान् **कृतिनः** कृतकृत्यान्, **पक्वकर्मिणः** पक्वं कर्म आसामस्तीति पक्वकर्मिणः, तान्, विनाशमुखीभूतकर्मवतः **सर्वान्** सकलान् **जनान्** जीविनः **कृतार्थयन्** कृतार्थान् कुर्वन्; **शिवदर्शनलालसः** शिवदर्शनं शैव दर्शनम्, शैवशास्त्रं शिवाद्वैतं नाम, तस्मिन् **लालसः** अतीवासक्तः **निजा-धिक्यं** वैचित्र्यपूर्णस्वमाहात्म्यं **दर्शयित्वा** प्रकटीकृत्य **दुराचारान्** दुष्टाचारे निरतान्, **पाषण्डान्** वेदसम्प्रदायनिन्दकान् **भिन्नदर्शनान्** व्यतिरिक्त-दर्शनपरांश्च **खण्डयित्वा** युक्तिभिः निराकृत्य; **यन्त्रमन्त्रकलासिद्धान्**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यन्त्रमन्त्रकला यन्त्रमन्त्रप्रयोगकौशलम् तस्यां सिद्धान् निष्णातान् **विमतान्** विरुद्धमतावलम्बिनश्च **सिद्धमण्डलान्** गोरक्षादिसिद्धानां मण्डलान् समूहान् **स्वप्रभावेन** स्वमाहात्म्येन **विजित्य** निर्जित्य **शिवागमान्** कामिकादि-वातुलान्तान् शैवागमान् **स्थापयित्वा** प्रतिष्ठाप्य; **निजावासं** स्ववासस्थानं **कोल्लिपाक्यभिधं** कोल्लिपाक्याख्यं **पुरं** नगरम् **आजगाम** आससाद ॥ **तत्र** कोल्लिपाक्यभिधे पुरे **शिवपरायणैः** शिवभक्तैः **सर्वजनैः** सर्वैः पुरवासिभिः **सम्भावितः** सत्कृतः सन् **सोमनाथाभिधस्य शिवस्य** सोम-नाथाख्यस्य शिवस्य परशिवस्य **मन्दिरं** देवस्थानं **प्राप** प्राप्तवान् । **तत्र** मन्दिरे **सर्वेषां** सकलानां **भक्तानां** शिवभक्तानां **शिवयोगिनां** शिवयोग-सम्पन्नानां **च पश्यताम्** अवलोकयतां **विस्मयम्** आश्चर्यं **तन्वानः** विस्तरन् **भावैः** निर्मलभावैः **परमेश्वरं** परशिवं **तुष्टाव** स्तुतवान् ॥३७-४३॥

देवदेव जगन्नाथ जगत्कारणकारण ।
ब्रह्मविष्णुसुराधीश-वन्द्यमानपदाम्बुज ॥४४॥

संसारनाटकभ्रान्ति-कलानिर्वहणप्रद ।
समस्तवेदवेदान्त-परिबोधितवैभव ॥४५॥

संसारवैद्य सर्वज्ञ सर्वशक्तिनिरङ्कुश ।
सच्चिदानन्द सर्वस्व परमाकाशविग्रह ॥४६॥

समस्तजगदाधार-ज्योतिर्लिङ्गविजृम्भण ।
सदाशिवमुखानेक-दिव्यमूर्तिकलाधर ॥४७॥

गुणत्रयपदातीत मलत्रयविनाशन ।
जगत्त्रयविलासात्मन् श्रुतित्रयविलोचन ॥४८॥

पाहि मां परमेशान पाहि मां पार्वतीपते ।
त्वदाज्ञया मयैतावत्कालमात्रं महीतले ॥
अचारि भवदुक्तानामागमानां प्रसिद्धये ॥४९॥

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अतः परं स्वरूपं ते प्राप्तुकामोऽस्मि शङ्कर।
अन्तरं देहि मे किञ्चिदनुकम्पाविशेषतः ॥५०॥

व्याख्या – श्रीरेणुककृतं सोमेश्वरस्तुतिं निरूपयति – **देवेत्यादिना श्लोकसप्तकेन।** **देवदेव** देवानां देव, **जगन्नाथ** भुवनपते, **जगत्कारणकारण** जगतः कारणानि उपादानकारणादीनि, तेषां कारण, **ब्रह्मविष्णुसुराधीश-वन्द्यमानपदाम्बुज** ब्रह्मा, विष्णुः, सुराधीश इन्द्रः एतैः वन्द्यमाने पदाम्बुजे (पदे अम्बुजे इव) यस्य सः, तस्य सम्बुद्धौ, **संसारनाटकभ्रान्तिकला-निर्वहणप्रद** संसारः एव नाटकम्, तस्य भ्रान्तिः, भ्रमा, तस्याः कला कौशलम्, तस्य निर्वहणे निष्णातः, तस्य सम्बुद्धौ, **समस्तवेदवेदान्त-परिबोधितवैभव** समस्ते वेदवेदान्ते ताभ्यां परिबोधितं वैभवं यस्य सः समस्तवेदवेदान्तपरिबोधितवैभवः, तस्य संबुद्धौ, **संसारवैद्य** संसारामय-निवारणवैद्य, **सर्वज्ञ** सर्ववित्तः **सर्वशक्तिनिरङ्कुश** सर्वाभिः शक्तिभिर्निरङ्कुश, अनियन्त्रितशक्तियुक्त, **सच्चिदानन्द** सच्चिदानन्दस्वरूप, **सर्वस्व** सर्वसार, **परमाकाशविग्रह** परमाकाशस्वरूप, **समस्तजगदाधारज्योतिर्लिङ्गविजृम्भण** समस्तानां जगताम् आधारभूतं ज्योतिर्लिङ्गं विजृम्भयतीति समस्त-जगदाधारज्योतिर्लिङ्गविजृम्भणः, तत्सम्बुद्धौ, **सदाशिवमुखानेकदिव्यमूर्ति-कलाधर** सदाशिवप्रभृत्यनेकदिव्यमूर्तीनां कलाधरः प्रकाशधरः, तत्सम्बुद्धौ, **गुणत्रयपदातीत** सत्त्वादिगुणत्रयस्थानातीत, **मलत्रयविनाशन** आणवादि-मलत्रयं विनाशयतीति मलत्रयविनाशनः, तत्सम्बुद्धौ, **जगत्रयविलासात्मन्** जगत्रयविलासस्वरूप, **श्रुतित्रयविलोचन** ऋग्यजुः सामरूपं श्रुतित्रयं, तदेव विलोचनानि यस्य सः श्रुतित्रयविलोचनः, तत्सम्बुद्धौ, **परमेशान** परमेश्वर **पार्वतीपते** पार्वतीपतिः, तत्सम्बुद्धौ, **पाहि मां** रक्ष माम्; **त्वदाज्ञया** भवदाज्ञया, **भवदुक्तानां** भवता उपदिष्टानाम् **आगमानां** शैवागमानां **प्रसिद्धये** प्रचराय **महीतले** पृथिवीतले **एतावत्कालमात्रं** एतावत्समयपर्यन्तं **मया अचारि** मया सञ्चरितम्; **अतः परं** एतदनन्तरं, **शङ्कर** भो शङ्कर, **ते स्वरूपं** तव स्वरूपं **प्राप्तुकामः** प्राप्तुं कामः यस्य सः प्राप्तुकामः, **अस्मि,**

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अनुकम्पाविशेषतः दयाविशेषेण मे किञ्चिद् अन्तरं मह्यं प्रवेष्टुं किञ्चिदिव अवकाशं देहि ददातु ॥४४-५०॥

इत्युक्ते गणनायकेन सहसा लिङ्गात् ततः शाङ्करात्
वत्सागच्छ महानुभाव भवतो भक्त्या प्रसन्नोऽस्म्यहम्।
इत्युच्चैरगदद् वचस्तनुभृतामाश्चर्यमासीत्तदा
दिव्यो दुन्दुभिराननाद गगने पुष्पं ववर्षुर्गणाः ॥५१॥

श्रुत्वा लिङ्गाद् वचनमुदितं शाङ्करं सानुकम्पं
संहृष्टात्मा गणपतिरथो ज्योतिषा दीप्यमानः।
जातोत्कण्ठैः परमनुचरैर्योगिभिः स्तूयमानो
ज्योतिर्लिङ्गं परमनुविशत् स्वप्रकाशं तदानीम् ॥५२॥

लीने तस्मिन् शाङ्करे स्वप्रकाशे
दिव्याकारे रेणुके सिद्धनाथे।
सर्वो लोको विस्मितोऽभूत्तदानीं
शैवी भक्तिः सप्रमाणा बभूव ॥५३॥

व्याख्या – त्रिष्वेतेषु वृत्तेषु श्रीरेणुकगणेश्वरस्य लिङ्गैक्यं वर्ण्यते – **इत्युक्ते** इत्यादिना। **इति** एवं **गणनायकेन** श्रीरेणुकगणेन्द्रेण **उक्ते** गदिते सति, **सहसा** तत्क्षणे एव **ततः शाङ्करात् लिङ्गात्** तस्मात् शिवलिङ्गात्, **वत्स** पुत्र **महानुभाव** महायोगिन् **आगच्छ** आगम्यताम्। **भवतः भक्त्या** मां प्रति तव प्रीत्या **अहं प्रसन्नः अस्मि** अहं सुप्रीतो भवामि। **इत्युच्चैः** एवम् उच्चस्वरेण **वचः** वचनम् **अगदत्** जगाद। **तदा** तदानीं **तनुभृतां** तनुं बिभ्रति इति तनुभृतः, तेषाम्, शरीरिणाम् इत्यर्थः, **आश्चर्यम् आसीत्** विस्मयमभवत्। **गगने** आकाशे **दिव्यो दुन्दुभिः** देवभेरी **आननाद** आनदत्, **गणाः** देवगणाः **पुष्पं ववर्षु** पुष्पम् अवर्षन्त ॥ **अथो** अनन्तरं **लिङ्गात्** सोमेश्वरलिङ्गात् **सानुकम्पम्** अनुकम्पेन सहितम् **उदितम्** उत्पन्नं

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वचनं वचः **श्रुत्वा** आकर्ण्य **ज्योतिषा दीप्यमानः** प्रकाशेन देदीप्यमानः **गणपतिः** गणेश्वरः श्रीरेणुकः **संहृष्टात्मा** संहृष्टः आत्मा यस्य सः, प्रहर्षितात्मा, **जातोत्कण्ठैः** जाता उत्कण्ठा येषु ते जातोत्कण्ठाः, तैः, **अनुचरैः योगिभिः** सहचरैः शिवयोगिभिः **परं स्तूयमानः** अधिकतया प्रशंस्यमानः **तदानीं** तदा **स्वप्रकाशं** स्वयंप्रकाशं **परं ज्योतिर्लिङ्गं** श्रेष्ठं ज्योतीरूपं लिङ्गम् **अनुविशत्** प्राविशत् ॥ **दिव्याकारे** मनोहरस्वरूपे **सिद्धनाथे** सिद्धानां नाथे **रेणुके** श्रीरेणुके **स्वप्रकाशे** स्वयं प्रकाशे **तस्मिन्** **शाङ्करे** तस्मिन् सोमेश्वरलिङ्गे **लीने** लयं गते सति **तदानीं** तस्मिन् काले **सर्वो लोकः** सर्वं विश्वं **विस्मितोऽभूत्** विस्मयं जगाम, **शैवी भक्तिः** शिवसम्बन्धिनी भक्तिः **सप्रमाणा** प्रमाणैः सहिता च **बभूव** अभवत् ॥ अत्र 'इत्युक्ते' इत्यादिवृत्तं शार्दूलविक्रीडितम् । लक्षणमुक्तं प्राक् । (पश्यत – ३.८८ – व्याख्यायाम्) । 'श्रुत्वा' इत्यादिवृत्तं मन्दाक्रान्ता । तल्लक्षणम् – "मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्" (आप्टे, पृ. ६५४)) [– – – (मगण), – ∪ ∪ (भगण), ∪ ∪ ∪ (नगण), – – ∪ (तगण), – – ∪ (तगण), – – (गुरु गुरु)]। 'लीने' इत्यस्मिन् वृत्तं शालिनी नाम । लक्षणमुक्तं प्राक् । (पश्यत – १६.८४ – व्याख्यायाम्) ॥५१-५३॥

श्रीवेदागमवीरशैवसरणिं श्रीषट्स्थलोद्यन्मणिं
श्रीजीवेश्वरयोगपद्मतरणिं श्रीगोप्यचिन्तामणिम् ।
श्रीसिद्धान्तशिखामणिं लिखयिता यस्तं लिखित्वा परान्
श्रुत्वा श्रावयिता स याति विमलां भक्तिं च
मुक्तिं पराम् ॥५४॥

इति श्रीमहावीरमाहेश्वराचार्य-शिवयोगिविरचिते वेदागमपुराणादि-सारभूते श्रीसिद्धान्तशिखामणौ विभीषणाभीष्टप्रदानम् नामैकविंशः परिच्छेदः समाप्तः ॥२१॥

– श्रीसिद्धान्तशिखामणिः समाप्तः –

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

व्याख्या – अस्य ग्रन्थस्य माहात्म्यमुक्त्वा तमुपसंहरति – **श्रीवेदे-त्यादिना वृत्तेन । श्रीवेदागमवीरशैवसरणिं**, श्रीपदं मङ्गलार्थकम्, वेदश्च आगमश्च वेदागमौ, तयोः वीरशैवम्, तत्संमतं वीरशैवम्, तस्य सरणिः वेदागमवीरशैवसरणिरिव सरणिर्यस्य सः वेदागमवीरशैवसरणिः, तम्, मङ्गलमयवेदागमसंमतवीरशैवपद्धतिरेव पद्धतिर्यस्य सः, ['सरणिः पद्धतिः पद्या' इत्यमरः (२.१६)], तम्, **श्रीषट्स्थलोद्यन्मणिं** मङ्गलमयषट्स्थलानि, तेषां प्रकाशनोद्यतो मणिरिव मणिः, यस्य सः, श्रीषट्लोद्यन्मणिः, तम्, **श्रीजीवेश्वरयोगपद्मतरणिं** मङ्गलात्मकजीवशिवयोर्योगः स एव पद्मं कमलं तस्य, तस्य विकासनसमर्थः तरणिः सूर्यः श्रीजीवेश्वरयोगपद्मतरणिः, तम्, **श्रीगोप्यचिन्तामणिं** गोप्यं रहस्यम्, शैवसिद्धान्तरहस्यमिति यावत्, तद्रहस्याख्या-पनसमर्थश्चिन्तामणिः, तम्, **श्रीसिद्धान्तशिखामणिं** तादृशं तं श्रीसिद्धान्त-शिखामण्याख्यशिवाद्वैतबोधकग्रन्थं **यः** यो भक्तिमान् पुरुषः **लिखित्वा** स्वयं लिखित्वा **परान्** अन्यान् **लिखयिता** लिखितुं प्रेरयिता, **श्रुत्वा** स्वयम् आकर्ण्य अन्यान् **श्रावयिता** आकर्णयिता च, **सः** स पुरुषः **विमलां भक्तिं** निर्मलभक्तिं **परां मुक्तिं च** परामुक्तिं च **याति** प्राप्नोति । अत्र शार्दूलविक्रीडितम् नाम वृत्तम् । लक्षणमुक्तं प्राक् । (पश्यत – ३.८८ – व्याख्यायाम्) ॥५४॥

श्रीशालिवाहनस्यास्मिञ् शके मन्मथवत्सरे ।
अष्टत्रिंशोत्तरैकोन-विंशशते च वर्षके ॥
माघे कृष्णत्रयोदश्यां शिवरात्र्याः सुपर्वणि ।
सुसमाप्तिं गता सेयं शिवाद्वैतप्रदीपिका ॥

कर्नाटकराज्ये दावणगेरे-मण्डलस्य असगोडुग्रामे
कोटेबृहन्मठपरम्पराया आगतेन चन्नार्यपार्वताम्बासूनुना डाक्टर्-
उपाधिभाजा शिवकुमारस्वामिना विरचितायां श्रीशिवयोगि-
शिवाचार्यकृतश्रीसिद्धान्तशिखामणेः शिवाद्वैतप्रदीपिकाख्यव्याख्यायां
एकविंशः परिच्छेदः समाप्तः ॥२१॥

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिशिष्टम् – १

अकारादि-श्लोकार्धानुक्रमणी

(प्रतीकानां पश्चात् परिच्छेदसंख्याः श्लोकसंख्याश्च दत्ताः)

अकर्ताऽहमवेत्ता	१८.५२
अकारणमकार्यं	१९.४९
अकार: शिव आख्यातो	२०.३९
अकुण्ठशक्तिरव्याज	३.६२
अक्षयं फलमाप्नोति	११.६२
अखण्डज्ञानरूपत्वं	१५.५०
अखण्डपरमानन्द	१५.३९
अखण्डब्रह्मरूपेण	१८.१०
अखण्डसच्चिदानन्द	२०.१६
अखण्डसंविदाकार	१८.४०
अखण्डं येन चैतन्यं	१५.११
अखण्डानन्दसंवित्ति	१९.४७
अखण्डारातिदोर्दण्ड	३.६५
अखण्डे ब्रह्मचैतन्ये	५.४१
आगस्त्य खलु सिद्धान्ता	५.३
अगस्त्य मुनिशार्दूल	५.२
अगस्त्य मुनिशार्दूल	२०.८१
अग्निदग्धानि बीजानि	१९.३०
अग्निरित्यादिमन्त्रेण	७.३४
अग्निहोत्रं त्रयो वेदा	८.४३
अघोराद्भस्म संजातं	७.९
अघोरापापकाशीति	६.६२
अघोरापापकाशीति	१०.५९
अघोरापापकाशीति	१०.७४
अङ्गभूता: स्त्रिय:	३.४३
अङ्गलिङ्गस्थलं चाथ	१२.५
अङ्गलिङ्गी ज्ञानरूप:	१३.२
अङ्गलेपस्थलं	२०.४
अङ्गे लिङ्गं समारूढं	१२.४३
आचारे मन्त्रसंस्कारा	९.६२
अचलं ध्रुवमात्मानम्	१५.६८
अचारि भवदुक्तानाम्	२१.४९
अचेतनत्वात् पृथ्व्यादे	१०.५३
अच्छिद्रं कनकप्रख्य	७.५२
अजङ्गमं तु यल्लिङ्गं	९.६१
अजङ्गमे यथा भक्ति	९.६०
अज्ञातोपायसम्पत्ते	२.१६
अज्ञानकर्मयोगेन	१८.११
अज्ञानतिमिरोद्रिक्ता	१४.१२
अज्ञानमलिनं चित्त	१३.२५
अज्ञानमेघनिर्मुक्त:	१९.११
अज्ञानमेव सर्वेषां	१७.१२
अज्ञानराक्षसोन्मेष	१२.३१
अणिमादिकमैश्वर्यं	३.४७
अणुभूतो मलासङ्गा	१८.७
अतप्ततनुरज्ञो वै	६.६१
अत: परं स्वरूपं	२१.५०
अत्यन्तकठिनोत्तुङ्ग	३.३१
अत्यन्तगूढचैतन्यं	५.४३
अत्यन्ततामसोपाधि:	५.४०
अत्यन्तपापकर्माऽपि	११.५०
अत्र दानत्रयं प्रोक्तं	५.३०
अत्र प्रेरयिता शम्भु	५.४२
अत्र हृत्पङ्कजं वेश्म	१९.५६
अथ त्रिलिङ्गविषये	४.१
अथवाऽगस्त्य तेजस्विन्	४.३८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अथवा पादशब्देन १९.७
अथवा पूर्वकर्म स्यात् ९.३९
अथवा शिवभक्तानां ९.३४
अथागस्त्यवचः श्रुत्वा ५.१
अदृष्टशत्रुसम्बाधं २१.२०
अद्य मे सफलं जन्म २०.७६
अद्वितीयमनिर्देश्यं २.६
अद्वितीयशिवाकार १९.८६
अद्वितीयं परानन्दं ८.१९
अद्वैतकृतसिद्धान्तो १५.१६
अद्वैतपरमानन्द १५.६१
अद्वैतपरमानन्द १७.७३
अद्वैतबुद्धिपोतेन १४.११
अद्वैतबोधनिर्धूत २०.८
अद्वैतभावनाजातं १४.१४
अद्वैतवासनाविष्ट १८.५१
अद्वैतवासनोपायं १५.१५
अधमे चोतमे वापि ९.४
अधमे न स्पृशेत् १६.६१
अधिगम्य महायोगी १९.९
अध्यात्मविद्यानिरत २१.२४
अनन्तपरमानन्द ३.१३
अनन्यदेवसादृश्यं ११.३४
अनन्यमुखसम्प्रेक्षी २०.३४
अनयोः स्वामिभृत्यत्व १०.४०
अनश्वरमनिर्देश्यं २०.४६
अनादिनिधनं लिङ्गं १२.४७
अनादिमुक्तो भगवा १०.१२
अनाद्यविद्यामूला हि २०.२२
अनाद्यविद्याविच्छित्ति १९.२४
अनाद्यविद्यासम्बन्धात् ५.३४
अनित्यबुद्ध्या सर्वत्र ५.७५
अनिर्देश्यमनौपम्य १९.६७
अनुगतसकलार्थे १.३२
अनुगृह्णाति यल्लोकान् १७.५
अनुगृह्य स्वमाहात्म्या २१.३५
अनुग्रहाय लोकानां १.३०
अनुप्रविश्य तद्योगी २०.२६
अनेकजन्मशुद्धस्य २८.५७
अनेकजन्मशुद्धानां ९.१३
अनेन पञ्चयज्ञेन ९.२५
अनेन मूलमन्त्रेण ८.३४
अनेनैव निरुक्तेन ५.१७
अन्तरस्थलभेतेन ११.३
अन्तरं देहि मे किञ्चि २१.५०
अन्तराकाशबिम्बस्थ १९.५८
अन्तरेण गुरुं सिद्ध १३.२४
अन्तर्गतं चिदाकारं १२.१३
अन्तर्दधे महादेवं २१.१
अन्तर्धारयितुं लिङ्ग ६.४८
अन्तर्बहिश्च सर्वत्र १६.१८
अन्तर्मुखेन भावेन १६.७२
अन्तर्मुखेन मनसा २०.१२
अन्तर्लिङ्गानुसन्धान ६.४३
अन्तर्लिङ्गानुसन्धाने ६.४४
अन्तर्वासितचित्तानां १२.२८
अन्तर्विभावयेद्विद्वान् ६.४७
अन्तःक्रियारतस्यास्य १२.२१
अन्तःपवनसंस्पृष्टे १२.२४
अन्तःपुरद्वारगतौ २.३३
अन्तःपुरद्वारपालौ २.३२
अन्तःप्रकाशमानस्य १६.७१
अन्तःशिवे समावेशो १७.१६
अन्तः षट्चक्ररूढानि १२.२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अन्त:स्थितं परं लिङ्गं	१२.९
अन्त:स्थितं पराकाशं	१९.५३
अन्त्यजो वापि मुच्येत	११.७२
अन्त्यजो वा शिवे भक्त:	११.५४
अन्धपङ्गुवदन्योन्य	१६.११
अन्धो यथा पुरस्थानि	१६.३२
अन्नजाते तु भक्तेन	९.७४
अत्र शुद्ध्या हि सर्वेषां	११.९
अत्राद्यं सर्वभोज्यं	९.७१
अन्यत्र शम्भोरति	१०.७९
अन्यात्मविदितं	९.२०
अन्यांश्च सहवासेन	२१.३८
अन्येऽपि बहवो मन्त्रा	८.४०
अन्यैरापादितं भस्म	७.२८
अपगच्छतु सर्वस्वं	१०.२२
अपरानुपदेशेन	२१.३८
अपरिच्छिन्नमव्यक्त	६.३६
अपरिच्छिन्नमानन्दं	१९.९४
अपरिच्छेद्यमभवत्	१२.३०
अपरिच्छेद्यमात्मस्थ	१८.८२
अपरिच्छेद्यमात्मानं	१८.३२
अपरोक्षपरानन्द	१९.२७
अपोरोक्षिततत्त्वस्य	१३.२६
अपश्यदाश्रमं दिव्य	४.१७
अपूर्वरूपमभजन्	३.३६
अप्रत्यक्षो महादेव:	९.५३
अप्रपञ्चस्यादिदेव:	१८.५७
अप्रमेयमनिर्देश्यं	६.३३
अप्रमेये चिदाकारे	२०.४८
अप्राकृतगुणाधार	२.११
अप्राकृतैर्गुणै: स्वीयै:	१५.६१
अब्भक्षा वायुभक्षाश्च	८.३६
अभङ्गुरभुजङ्गस्त्री	४.१४
अभजन्त महादेव	३.५३
अभवच्छिवयोगीति	१.२०
अभिधानाभिधेयत्वा	८.६
अभिन्न: परमात्मेति	१९.६५
अभिषिच्य गुरु: शिष्य	६.२०
अभेदबुद्धौ जाताया	१८.३२
अभेदब्रह्मस्वारस्ये	१९.५०
अमुञ्चता सदा पार्श्व	३.६१
अमृतार्थ प्रपन्नाना	१.१२
अयथार्थप्रपञ्चोऽयं	१७.७७
अयं शिवो गुरुश्चैष	१४.३६
अर्घ्यपाद्यादिभि: सर्वै	२१.५
अर्चनं वन्दनं दास्यं	९.२
अर्चयन्ति शिवं लोके	११.५६
अर्चयेद् गन्धपुष्पाद्यै:	६.५४
अर्थजातमशेषं तु	२०.२०
अर्थहीना यथा वाणी	१६.१९
अर्पयित्वा निजे लिङ्गे	९.७१
अर्पितेनान्नपानेन	१०.१५
अल्पभक्त्यापि यो मर्त्य	९.१४
अवतीर्णमिदं शास्त्र	२०.७५
अवतीर्णमिमां भूमिं	४.५०
अवतीर्णं मया भूमौ	२०.८७
अवतीर्णो महीमेना	२१.८
अवमत्य सभामध्ये	३.७४
अवमानाद्भवेत्तस्य	९.६५
अवमानान्महाघोरो	९.२६
अवलम्ब्य प्रवृत्तो यो	१६.७९
अवशिष्टं समालोक्य	२१.२३
अवशिष्टोऽसि वंशस्य	२१.२४
अवादीत् सर्वलोकानां	२०.८४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अवान्तरस्थलान्यत्र ५.२७
अविचारेण मद्भक्तो ३.७७
अविदन्नेकमाचार्य २१.३०
अविद्याकल्पितं वस्तु १७.९
अविद्यामोहिता जीवा ५.४७
अविद्याराहुनिर्मुक्तो १९.२०
अविद्याशक्तिभेदेन ५.४५
अविशुद्धे विशुद्धे १८.४८
अव्यक्तं लिङ्गमित्याहु १२.३७
अशक्तं मुक्तिदाने तु १०.११
अशरीरोऽपि सर्वत्र १८.९
अशुद्धोपाधिरप्येव ५.४५
अशुद्धो वा विशुद्धो वा ८.३८
अशेषजगतां हेतुः ८.५
अश्नन् कर्मफलं १८.६
अष्टकृत्वाऽथ मूलेन ७.२१
अष्टत्रिंशत्प्रभेदेन ७.४९
अष्टौ विद्येश्वरा देव ३.४४
असदेव जगत् सर्व २०.२८
असन्मार्गनिरासाय १.२६
आस्ति सच्चित्सुखाकार ८.३
अस्पृशन् मानुषं भावं ३.८४
अस्पृष्टमखिलैर्दोषैः १.२७
अस्पृष्टमदसम्बन्धो १०.१७
अस्पृष्ट्वाधरमस्पन्दि ८.२९
अस्मदादिजगत्सर्व २.१८
अस्य ज्ञानसमाचारो २६.७६
अस्य माहेश्वरस्योक्तं १०.२१
अस्वतन्त्राश्च किञ्चिज्ज्ञाः १८.१४
अहङ्कारमदोद्रिक्त १७.४१
अहङ्कारस्य सम्बन्धा १८.२१
अहन्तां परमां प्राप्य २०.४०
अहमेव मुनीन्द्राणां ४.४६
अहर्निशमहं वन्दे १.१२
अहं चेति मतिर्यस्य १४.३६
अहंप्रत्ययवेद्यत्वाद् ५.५७
अहंभावस्य शून्य २०.५६
अहं ब्रह्मेति भावस्य १८.४५
अहं भृत्यः शिवः स्वामी १४.३७
अहं शिवो गुरुश्चाहं १४.३९
अहिंसा सत्यमस्तेयं १६.५९
आकाङ्क्षन्ते पदं येषां ३.५०
आगतस्त्वं महाभाग २०.७९
आगमानुग्रहादेवं २१.१८
आगमा बहुधा प्रोक्ताः ५.९
आचान्ते भवता पूर्व ४.४०
आचार एव सर्वेषां १६.१३
आचारहीनः पुरुषो १६.१३
आचारं महतां दृष्ट्वा १६.६५
आचार्यभावमासाद्य २१.३१
आचार्यवर्य संप्राप्तं ६.९
आचार्यस्योपशान्तस्य ९.५६
आचार्यं ज्ञानदं शुद्धं ११.२२
आचार्यः सममृत्विग्भि ६.१९
आचिनोति हि शास्त्रार्था १५.९
आच्छाद्यते यथा चन्द्रो १८.२४
आजगाम निजावासं २१.४१
आत्मज्योतिषि चिद्रूपे १७.४८
आत्मज्योतिषि सर्वेषा १६.७२
आत्मज्ञानावसानं १६.५६
आत्मतत्त्वविचारज्ञं ६.२
आत्मत्वमीश्वरत्वं च ५.३७
आत्मत्वेनानुसन्धानात् १९.७६
आत्मनस्तद्विनाशे १४.८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आत्मनोऽकर्तृभावं च ९.८३
आत्मन्येव विलीयन्ते २०.१९
आत्मभूतस्य देवस्य १०.५२
आत्मभोगाय नियतं ११.११
आत्मयोगप्रभावेण १५.११
आत्मवत् सर्वभूतानि १६.६२
आत्मशक्तिलतापुष्य ३.१३
आत्मशक्तिविकासेन १०.६६
आत्मशक्त्यमृतास्वाद ३.६३
आत्मस्थसकलाकारा १५.५२
आत्मस्थितिविवेकी यः ५.५०
आत्मस्वरूपविज्ञानं १८.१०
आत्मानन्दपरिस्फूर्ति २.२९
आत्मानन्देन तृप्तस्य १९.१६
आत्मानमखिलं १६.७५
आत्मान्तालवर्ति १८.२०
आत्माऽपि सर्वभूतानां १८.७
आत्मा मायाशरीरस्थः १८.९
आत्मारणिसमुत्थेन १२.२९
आत्मैकत्वानुसन्धान १९.९३
आदातृदातृदेयानां ९.८३
आदावन्ते च मध्ये च २०.६७
आदावात्मस्थलं प्रोक्त १८.२
आदितः क्रमशो वक्ष्ये १०.७
आदितः परिशुद्धत्वा ८.८
आदित्या वसवो रुद्रा ३.५३
आदिप्रसादिनामाथ १८.४
आदिप्रसादीत्युक्तोऽयं १८.५६
आदृतं ब्रह्मविष्ण्वाद्यै ११.१६
आदृतं मुनिभिः सर्वै ६.२९
आदौ नवस्थलानीह १५.४
आदौ भक्तस्थलं प्रोक्तं ५.८४
आदौ शरणमाख्यातं १३.३
आधारवह्नौ चिद्रूपे १४.४०
आधाराधेयभावेन १४.३०
आधारे कनकप्रख्यं ६.४०
आधारे हृदये वापि ६.३९
आधिदैविकमन्यच्च ५.६७
आधिदैविकमाख्यातं ५.७०
आधिभौतिकमेतद्धि ५.६९
आध्यात्मिकं तु प्रथमं ५.६७
आध्यात्मिकं द्विधा प्रोक्तं ५.६८
आध्यात्मिकादिना नित्यं ५.६६
आनन्दकणिका येषां ३.४९
आनन्दजलधेर्वृद्धि १९.२१
आनन्दस्यैक्यमेतेन १९.६
आनन्दं पश्यतां पुंसां १८.७२
आनन्दं प्राप्य बोधेन १९.१०
आन्तरा भावपूजा तु १५.४४
आप्ताधिकारिणः केचित् ३.४४
आबभाषे गणेन्द्रं २१.७
आग्नेयं भस्मना स्नानं ८.२५
आयुधालङ्कृतप्रान्ताः ३.५२
आयुःश्रियं कुलं कीर्ति ३.७०
आरूढपतितो ज्ञेयः ९.४०
आरोग्यकारणं पुंसा ११.१३
आर्द्रस्नानात् परं भस्म ७.२५
आर्द्रं तु प्रकृतिं विद्यात् ७.२६
आलवालजलास्वाद ४.१९
आलोकमात्रनिर्धूत २०.७४
आलोकमात्रनिर्भिन्न ४.८
आलोक्य करुणादृष्ट्या २०.८०
आलोक्य शैवतन्त्राणि १.२५
आश्रितो नित्य एवासा ५.५९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

आससाद पुरीं लङ्कां	२१.३
आसज्ञनं समस्तानां	१७.३९
आसेवन्त तमीशान	३.४०
आस्पदत्वादशेषाणां	८.९
आस्वाद्य रमते योगी	१९.११
आह्वानवर्जनं पश्चा	१०.५
इच्छाज्ञानक्रियारूप	३.२५
इच्छाज्ञानादिरूपेण	१.११
इत: परं मया नास्ति	२०.७७
इति चिन्तयत: साक्षात्	१८.५२
इति तस्य वच: श्रुत्वा	४.४५
इति तस्य वच: श्रुत्वा	२१.२८
इति निश्चित्य कथितं	२०.८२
इति पञ्चप्रकारोऽयं	९.२४
इति पृष्टो महायोगी	४.९
इति प्रश्ने कृते	१७.७५
इति प्रसादसुमुखे	२१.१७
इति ब्रुवाणं कल्याणं	२१.१२
इति भावयतो नित्यं	१७.५६
इति यत्पूज्यते सिद्धै	१५.३४
इति यश्चिन्तयेन्नित्यं	१०.५६
इति यस्य मतिर्नास्ति	१४.३७
इति यस्य मति: सोऽयं	१८.४१
इति यस्य स्थिरा बुद्धि:	१०.८
इति शुद्धेन शिष्येण	६.१०
इति श्रवणसंसक्तो	१७.६९
इति सङ्कल्पितं पूर्व	२१.२६
इति संचिन्त्य मनसा	१६.६९
इति संप्रार्थित: शम्भु	२.२०
इति संप्रार्थितो देवो	३.८२
इति संबोधित: शिष्यो	६.२८
इति स्तुवन्तं विनया	२०.८०
इत्याद्या मुनय: सर्वे	३.५५
इत्युक्त: परमेशेन	३.७८
इत्युक्ते गणनायकेन	२१.५१
इत्युक्त्वा परमेश्वर:	३.८८
इत्युक्त्वा पश्यतां तेषां	४.१३
इत्युक्त्वा पश्यतस्तस्य	२१.१
इत्युच्चैरगदाद् वचस्तु	२१.५१
इत्येवं प्रार्थित: शम्भु	२.२५
इदन्ताहव्यहोमेन	१४.३८
इदं मुख्यमिदं हीन	१५.५९
इदानीमेव मे जात	२०.७७
इन्दीवरवरज्योति	४.२१
इन्द्रादय: सुरा: सर्वे	२१.२१
इन्द्रियप्रीतिहेतूनि	१७.३६
इन्द्रियाणां तथात्मत्व	५.५६
इन्द्रियाणां बहिर्वृत्ति:	१७.१६
इन्द्रियाणां वशीकारो	१७.४३
इन्द्रियाणां समस्तानां	१७.१५
इन्द्रियाणां समस्तानां	१७.४२
इन्द्रियाणि मनोवृत्ति	१६.५२
इन्द्रियाणि समस्तानि	१७.४९
इन्द्रियानुग्रह: प्रोक्त:	१७.१४
इन्द्रियैरेव जायन्ते	१७.४५
इन्धनेष्वग्निदग्धेषु	११.५५
इष्टलिङ्गमिदं साक्षा	६.५१
इष्टलिङ्गमिदं स्थूलं	६.४९
ईदृशं शिवबोधस्य	२०.८३
ईदृशीं तु गतिं प्राप्ता	२१.२५
ईश्वर: सर्वभूतानां	१०.१०
ईषत्स्पृष्ट्वाधरपुटं	८.२८
उक्ताखिलाचारपरा	९.९४
उक्तो माहेश्वर: साक्षा	११.१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

उक्त्वा भवान् सकल	४.५४
उच्यते नाम सर्वेषां	१९.२
उत्तमाङ्गे ललाटे च	७.३२
उत्तमां गतिमाश्रित्य	९.४०
उत्थाय व्योममार्गेण	४.१३
उत्पत्य विलयं यान्ति	२८.३१
उदपश्यत् पुरा योग	७.४७
उदारगुणमोङ्कार	३.११
उद्धूलयेत् तेन देहं	७.२९
उन्मज्जन्ति निमज्जन्ति	१८.३०
उपतस्थे महादेव	३.३९
उपदेष्टोपदेशानां	१५.२१
उपमन्युभृगुव्यास	३.५५
उपमन्युः पुरा योगी	८.४६
उपशान्तिर्भवेत् पुंसा	१७.४४
उपशाम्यति यः स्वान्ते	१७.७०
उपाधिविहिता भेदा	१८.४१
उपाधिः पुनराख्यातः	५.४४
उपायमवदत् तस्मै	२.२०
उपायमीश्वरेणोक्तं	८.८१
उपायं वद मे शम्भो	२.१९
उपायं शृणुयाच्छिष्यः	२७.७३
उपायो घोरसंसार	१४.१३
उपासनार्थमन्तःस्थं	६.३६
उपैति लोकविख्यातं	६.२
उभयात्मा शिवो मन्त्रे	८.२२
उमया सममासीनं	३.३६
उमाख्यया महाशक्त्या	१२.२३
उल्लङ्घितः सभामध्ये	३.६९
उल्लङ्घ्य पार्श्वमगमत्	३.६७
उवाच शान्तया वाचा	४.३७
ऋगित्याह पवित्रं ते	६.५९
ऋजु श्वेतमनुव्याप्तं	७.३८
एक एव कथं चैष	१२.१
एक एव यथा सूर्य	१९.६४
एक एव शिवः साक्षा	५.३३
एक एव शिवः साक्षा	९.५९
एक एव शिवः साक्षा	१६.६३
एकत्वेन चिदाकारे	१४.३५
एकपुष्पप्रदानेन	९.८६
एकभाजनयोगेन	१४.२९
एकभावनिरूढस्य	१८.४६
एकभावेन सततं	१६.७५
एका शिवेन निर्दिष्टा	१०.३५
एकीकृते शिवे भावे	१९.४२
एकीभावमुपेतस्य	२०.६९
एकीभावमुपेतानां	२०.५३
एकीभूतस्य चिद्व्योम्नि	१८.४५
एकीभूतस्य सिद्धस्य	२०.५५
एकीभूते निजाकारे	१८.५४
एको वशीकृतः संवि	१९.६३
एतच्छ्रवणमात्रेण	२०.८७
एतच्छिवपुरं प्रोक्तं	१९.५६
एतदर्थविवेको यः	१९.५१
एतदस्ति द्वयं यस्य	१२.४३
एतन्नामावलम्बेन	८.१२
एतानि नामधेयानि	८.२३
एतानि पञ्च नामानि	७.४
एतानि मानभूतानि	५.४
एतानि शिवभक्तस्य	५.३०
एतावदुक्त्वा परम	२०.७१
एतेषां देहिनां साक्षी	५.५०
एतेष्वेतेन विधिना	८.३३
एतैर्युक्तो महायोगी	१३.१६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

एवमन्येऽपि बहवो ३.७६
एवमाचारसंयुक्तो ९.५०
एवमाद्या महाभागा ३.४६
एवमुक्त्वा समासीनं २०.७२
एवमुत्पत्तिभेदेन ७.५१
एवं कृत्वा गुरुर्लिङ्गं ६.२५
एवं नवविधं प्रोक्त १०.६
एवं नवविधा भक्तिः ९.३
एवं प्रचोदितः शिष्यो १७.८०
एवं रुद्राक्षधारी यः ७.५९
एवंविधं विभूत्या ७.४०
एवंविधानां चित्राणां ४.४१
एवंविधैर्भावशुद्धै १२.२०
एवं सल्लक्षणोपेतं ७.३८
एवं स्थिरे शिवाद्वैते १७.७९
एष त्वं रेणुकानेन ३.७७
एष मन्त्रो महाशक्ति ८.४१
एषामादिममुत्कृष्ट ७.१४
एष्वेकतममादाय ७.१९
ऐक्यमाचारसम्पत्ति १४.३
ऐक्यस्थलगतान् २०.१
ऐक्यस्थलमिदं १४.३
ऐहिके क्षणिके सौख्ये ५.६२
ॐकारतालवृन्तेन ३.३९
ॐकारपूर्वो मन्त्रोऽयं ८.१७
औपचारिकदेहित्वा १६.४३
कः कुर्यात् कर्मकार्पण्ये १६.८१
कटाक्षचन्द्रमा यस्य १५.२६
कटाक्षलेशमात्रेण १५.२८
कटाक्षस्तव कल्याणं ४.४८
कटीतटीपटीभूत ४.४
कण्ठनालजितानङ्ग ३.३०
कर्तारं सर्वलोकानां २.१४
कथमेष प्रसादीति ११.१
कथमेष समादिष्ट १३.१
कथय स्थलभेदं मे १९.१
कथं भाग्यविहीनानां २१.९
कथं मत्तगजान् ११.५३
कथं याति परिच्छेदं १६.५७
कथं विज्ञायते लोके ११.२९
कथ्यन्ते गुणसारेण १५.४
कदाचित् कुत्रचिद्वापि ६.२६
कदाचिदथ कैलासे ३.१
कदाचिद्भस्मना कुर्यात् ७.४०
कपिला कृष्णा च धवला ७.७
कर्मकालादिकार्पण्य ३.५१
कर्म ज्ञानग्निना १६.८२
कर्मणा किं कृतेनापि १९.३१
कर्मणा किं नु भाव्यं १४.१७
कर्मणा मनसा वाचा ११.४६
कर्मप्रधान्ययोगेन १२.२
कर्ममूलेन दुःखेन ५.६६
कर्मातीतपदस्थस्य १५.६९
करणार्पितमाख्यातं १७.३
करणेषु विवृत्तेषु १७.२६
करणैः सहितं प्राणं १७.२२
करिपोतकराकृष्ट ४.१५
कलकण्ठकुलालाप ३.३
कलङ्कवानसौ चन्द्रः १५.२३
कल्पं चैवानुकल्पं ७.१३
कल्पं तद्भस्म विज्ञेय ७.१६
कल्पितानि हि रूपाणि १५.४८
कल्याणपुष्पकलिका ३.१६
कश्चिदाचारसिद्धाना १.१३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

कस्य साक्षात्क्रिया १७.७४
काङ्क्षणीयफलो ३.५०
कामक्रोधमहामोह १३.१७
कामक्रोधादिनिर्मुक्तः १५.५८
काययोगेन सिद्ध्यन्ति १६.३७
कायवन्तो हि कुर्वन्ति १६.४१
कायं विना समस्तानां १६.२६
कायानुग्रहणं पूर्व १७.२
कारणं सर्वलोकानां ११.२८
कालातीतं कलातीतं १९.६८
कालिम्ना कालकूटस्य ३.१९
काष्ठं विना यथा १६.३८
काष्ठेषु वह्निदग्धेषु १०.३७
कांश्चिद् दृष्टिनिपातेन २१.३८
किञ्चित्कर्ता च किञ्चिज्ज्ञो ५.४७
किञ्चित्सत्त्वरजोरूपं ५.४०
किं तत्त्वं परमं ज्ञेयं १७.७४
किं तेन क्रियते तस्य १५.३८
किन्नरीगीतमाधुर्य ३.४
किं पूर्वकालिकैर्धर्मैः १०.३२
किमन्यैर्धर्मकलिलैः १०.२४
किमिह बहुभिरुक्तै ८.४९
किं यज्ञैरग्निहोत्राद्यैः १५.३५
किं वा प्रमाणं २०.२५
किं वा फलं न सिद्ध्येत ११.४४
किं वेदैः किं ततः ११.४८
किं सत्यं किं नु वासत्यं १७.६९
कुक्षौ हस्तस्थलं वापि ६.५२
कुङ्कुमस्तबकामोद ३.३
कुण्डमण्डलिकोपेता ३.१४
कुटीभावाद् यथा १०.६८
कुतस्तमोविकाराः १३.२१
कुतस्तस्येन्द्रिय १७.२५
कुतो देहेन सम्बन्धो १६.४५
कुतो ब्रह्मा कुतो विष्णुः १९.२६
कुर्वन्नपि महाकर्म १४.१८
कुर्वाणः संचरेद् योगी १५.६०
कुलक्रमागताचारं ६.४
कुसुमायुधकोदण्ड ३.२९
कुसुम्भकुसुमच्छाया ३.३३
कूटस्थमचलं प्राज्ञं १९.८१
कृतार्थयन् जनान् २१.३९
कृतार्था मे पुरी २१.११
कृताश्वमेधो दक्षोऽपि ३.७४
कृतोद्योगोऽपि निर्माणे २.१६
कृत्यानां तु भवान् कर्ता ४.४१
कृत्वानिष्टमभूद ३.७२
कृष्णा दशविधा जाता ७.५१
केन किं वेदनीयं १८.५४
केनचित् कारणेनाहं ४.११
केन वा धर्मभेदेन १०.१
केवलं कर्ममात्रेण १६.२६
केवलं चित्स्वरूपस्य २०.४४
केवलं सच्चिदानन्द २०.६८
केवलं सहजे दाने १०.२
केवलं संविदुल्लास १८.६८
केवले निष्प्रपञ्चौघे १८.३८
कैलासे मन्दरे १०.७४
कैवल्यकल्पतरवो १३.२७
कोटिसूर्यप्रतीकाशं २.११
कोटित्रयं तु लिङ्गानां २१.२७
कोटित्रयं तु लिङ्गानां २१.३३
कोटिषट्कं तु लिङ्गानां २१.२७
कोल्लिपाक्यभिधानोऽस्ति ३.८३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

को वा सूर्यं विना	१३.२३	गन्धर्ववामनयना	३.१
क्रमाल्लक्षणमेतेषां	११.५	गर्भस्थो जायमानो वा	११.७२
क्रमाल्लक्षणमेतेषां	१३.४	गम्भीरगुणयां वाचा	४.४५
क्रियागमस्थलं पूर्वं	१६.२	गलिताज्ञानबन्धस्य	१९.८७
क्रिया यथा लयं प्राप्ता	१५.३७	गलिताहङ्कृतिग्रन्थि:	१७.१३
क्रियारूपा तु या पूजा	१५.४४	गलिते ममताहन्ते	१८.३७
क्रियां विना तथान्तस्थो	१६.६	गले भुजद्वये चैव	७.३२
क्व जातिवासनायोग:	१८.४६	गवां कोटिप्रदानस्य	७.६३
क्व पदार्थपरिज्ञानं	१८.६४	गुणत्रयपदातीत	२१.४८
क्षणमन्त: शिवं	१७.१७	गुणत्रयविभेदेन	५.३८
क्षणं गन्धर्वराजानां	३.५७	गुणत्रयात्मिका शक्ति	५.३९
क्षणं देवमृगाक्षीणां	३.५८	गुणातीतमरूपं च	१५.८
क्षणं स शम्भुर्देवानां	३.५७	गुणातीतं गुकारं च	१५.८
क्षमाऽभिषेकसलिलं	१२.१६	गुरुजङ्गमलिङ्गात्मा	५.५९
क्षयातिशयसंयुक्ता	२०.२३	गुरुणा लभ्यते बोध	१९.१३
क्षयित्वादियुते स्वर्गे	५.६२	गुरुत्वात् सर्वभूतानां	९.७२
क्षान्ति: कारुण्यसम्पत्ति:	१३.१५	गुरुदेव: परं तत्त्वं	१८.७१
क्षीराब्धिरिव सिन्धूनां	१३.२८	गुरुप्रसादचन्द्रेण	१९.१८
खण्डयन् जैनचार्वाक	४.१२	गुरुभक्तिविहीनस्य	११.२४
खण्डयित्वा दुराचारान्	२१.३८	गुरुमाहात्म्ययोगेन	११.२५
गङ्गयेव कृताश्लेषं	३.२२	गुरुमेव शिवं पश्ये	१७.६१
गङ्गाजलेन तृप्तस्य	१९.१६	गुरुरूपो महादेवो	११.१९
गङ्गामृतं परित्यज्य	१३.७	गुरुरेव परं तत्त्वं	१३.२३
गच्छंस्तिष्ठन् स्वपन्	१४.२३	गुरुरेवात्र सर्वेषां	११.१९
गच्छंस्तिष्ठन् स्वपन्	१९.३५	गुरुलिङ्गादिमाहात्म्य	११.५७
गण्डमण्डलपर्यन्त	३.१९	गुरुलिङ्गादिमाहात्म्य	११.६७
गणेन्द्रं रेणुकाभिख्यं	४.३४	गुरुवाक्यामृता	१७.८१
गणेश्वरेण कथित	१.२९	गुरुशिष्यमयं ज्ञानं	१९.१२
गणेश्वरौ रेणुकदारुका	२.३३	गुरुशिष्यसमारूढ	११.३५
गतवैषम्यधीर्धीरो	१५.६२	गुरु: शिव: पर:	१३.२९
गन्ध: समाधिसम्पत्ति	१२.१७	गुरूपदिष्टे विज्ञाने	१७.७२
गन्धर्वपुरवद्	१०.७१	गुरूपासनशक्तिश्च	६.४३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

गुरोरभ्यर्चनेनापि	९.५१
गुरोराज्ञां न लङ्घेत	९.५७
गुरोरादेशमात्रेण	१७.६२
गुरोरादेशमासाद्य	१६.९
गुरोरालोकमात्रेण	६.१३
गुरोरालोकमात्रेण	१७.७२
गुरोर्लब्ध्वा महाज्ञानं	१७.६७
गुरोर्लिङ्गस्य माहात्म्य	११.४५
गुरोर्विज्ञानयोगेन	१५.३०
गुरोश्च बोधयोगेन	१८.५
गुरोः कटाक्षवेधेन	१७.६४
गुरोः कटाक्षसंसिद्धे	१३.२६
गुरोः कवलयत्याशु	१७.६३
गुरोः शिवस्य शिष्यस्य	१४.३४
गुरौ निजे गुणोदारे	१७.५९
गुरौ शिवे समानस्थः	१७.६०
गुर्वादिज्ञानशून्यान्ता	१५.३
गृहे यस्मिन् प्रसूता	९.४५
गृह्यते यदि भक्तेन	९.४२
गौरीपयोधराश्लेष	३.२१
घटाकाश इव च्छिन्नं	१९.५८
घटादिषु पृथग्भूतं	२०.४५
घटोपाधिर्यथाकाशः	१९.५२
घण्टाकर्णः पुष्पदन्तः	३.४५
घृतादिना यथा जिह्वा	१९.३३
घोरसंसारतिमिर	११.३८
घोरसंसारसन्ताप	११.३९
घोरसंसारसर्पस्य	१४.१०
चकोरस्तृषितः	१३.९
चक्रनेमिक्रमेणैव	५.४९
चक्षुर्हीनो यथा रूप	१६.२०
चक्षुरानन्दलतया	३.३५
चतुर्दशमुखं यज्ञ	७.५८
चतुर्भिः संविराजन्तं	३.२०
चण्डो यथा पुरा भक्त्या	११.५०
चन्द्रकान्ते यथा तोयं	५.३६
चन्द्रबिम्बायुतच्छाया	३.१५
चन्द्रवत् स्फाटिकं पीठं	३.२३
चन्द्रस्य मेघसम्बन्धा	१९.३२
चन्द्रार्धशेखरं शुद्धं	२.१०
चर्मपात्रे जलं	९.४२
चलच्चामरिकाहस्ता	३.४०
चामराणां विलोलाना	३.४१
चित्तद्रव्यं समादाय	१७.४७
चित्तवृत्तिषु लीनासु	१७.९
चित्तवृत्तिसमालीन	१४.१५
चित्तस्थसकलार्थानां	१७.५१
चित्तारविन्दसंगूढ	४.६
चित् प्रकाशयते विश्वं	१४.३२
चिदाकारं परब्रह्म	१२.८
चिदाकारे पराकाशे	१४.४१
चिदात्मनि शिवे न्यस्तं	२०.९
चिदानन्दनिजात्मस्थो	१५.६३
चिदानन्दपराकाश	१.३१
चिदानन्दमयः	१२.३४
चिदानन्दमये लिङ्गे	१२.११
चिदेकनिष्ठचित्तानां	१४.३२
चिदेकभाजनं यस्य	१४.३१
चिद्रूपं परमं लिङ्गं	६.३१
चिद्रूपं हि परं तत्त्वं	६.३२
चिद्वह्नौ जुह्वतामन्तः	१७.४७
चिद्विलासपरिस्फूर्ति	१७.३२
चिन्तयन् हृदयाम्भोजे	८.२५
चिन्तामणिः प्रपन्नानां	३.६५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

चिन्मये शाङ्करे	१०.२६	जाग्रत्स्वप्नसुषुप्ति	२०.२५
चूडालं सोमकलया	३.१६	जातस्य हि ध्रुवो मृत्यु	५.६३
चूतप्रवालसुषमा	३.३४	जाता मृता: पुनर्जाता:	१८.१६
चोदितान् वासयन्	३.६१	जातिभेदं न कुर्वीत	१०.३८
चोदिता: परमेशेन	१८.१५	जातेन निधनं प्राप्तं	५.६४
चोरत्ववदपि स्थाणौ	१०.७०	जातोत्कण्ठै: परम	२१.५२
छन्दोरूपमृषिं चास्य	६.२१	जात्यायुर्भोगवैषम्य	३.७९
छेदने कर्ममूलस्य	१२.३०	जात्यायुर्भोगवैषम्य	५.४९
जगत्त्रयविलासात्मन्	२१.४८	जानन्त्यतिशयाद्	११.३६
जगत्सिसृक्षु: प्रथमं	२.१४	जायते शिवकारुण्यात्	५.५३
जगत्सृष्ट्यादिसंसिद्ध्यै	१६.४०	जायते हंसयोर्लोपा	८.२०
जगदङ्गे परिग्रस्ते	१०.१५	जिज्ञासा शिवतत्त्वस्य	१३.३०
जगदेकात्मताभावा	१६.६२	जिज्ञासु: सर्वसंसार	६.१
जगदेतच्छरीरं स्याद्	१६.४६	जितकामा जितक्रोधा	११.३९
जङ्गमस्य तथा ह्येषां	५.२९	जीर्णस्ते जाठरे वह्नौ	४.४०
जङ्गमे च तथा नित्य	९.५८	जीवत्वं दु:खसर्वस्वं	१८.१७
जटाग्रे त्रिकभागे च	६.५३	जीवन्मुक्तश्चरेद् योगी	१७.१३
जटामुकुटसंयुक्तं	४.३	जीवन्मुक्तस्य धीरस्य	२०.१६
जननोत्थं मृतोत्थं	९.४३	जीवन्मुक्तिर्भवेत् सद्य	१६.५५
जन्तुरन्त्यशरीरोऽसौ	५.५४	जीवन्मुक्तो भवेच्छिष्य:	१५.२९
जन्तुर्मरणजन्मभ्यां	५.६३	जीवभावं परित्यज्य	१८.५
जन्मैव जन्म नान्येषां	११.६४	जीवितं च कृतार्थं	२१.११
जपति परमभक्त्या	८.४९	जुहोति ज्ञानयज्वा य:	१४.४०
जपस्तु त्रिविध: प्रोक्तो	८.२७	जुह्वन् समस्तविषयान्	१७.४८
जप: पञ्चाक्षराभ्यास:	९.२३	ज्ञाताप्यहं ज्ञेयमिदं	१९.५०
जपादि वाचिकी सेवा	९.१६	ज्ञातृज्ञेयादिभि: शून्यं	२०.६६
जपायोगाद्यथा राग:	१८.८	ज्ञाते पञ्चाक्षरीमन्त्रे	८.३
जपेत् पञ्चाक्षरीमेता	८.३३	ज्ञाते शिवे जगन्मूले	८.३
जपेत् पञ्चाक्षरीविद्यां	८.१	ज्ञाते शिवे तदज्ञानं	२०.२८
जपेत् समाहितो भूत्वा	८.२४	ज्ञातोपायस्तत: कुर्या	२.२४
जपेदेतां महाविद्यां	८.२६	ज्ञात्वा य: सतत	१२.४४
जले जलमिव न्यस्तं	२०.६१	ज्ञानचन्द्रसमुद्भूता	१९.१४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ज्ञानचन्द्रोदये जाते	१९.२२
ज्ञानदीपिकयाऽनेन	१५.१९
ज्ञानध्वस्तप्राकृता	१६.८४
ज्ञानपादोदकं चाथ	१९.३
ज्ञानमङ्गमिति प्राहु	१२.४२
ज्ञानमेव समभ्यस्येत्	१६.२९
ज्ञानशक्तिः परा येषां	३.४९
ज्ञानस्य नष्टभावेन	१८.५०
ज्ञानस्य व्यवहारे	१९.४४
ज्ञानस्य विषये तत्त्वे	१९.९३
ज्ञानहीनस्तथा देही	१६.३२
ज्ञानहीनं सदा कर्म	१६.२७
ज्ञानं चोदकशब्देन	१९.८
ज्ञानं परशिवाद्वैत	१६.३०
ज्ञानं ब्रह्मणि तन्नास्ति	२०.६०
ज्ञानं मुक्तिप्रदं प्राप्य	१६.८१
ज्ञानं वस्तुपरिच्छेदो	१६.१७
ज्ञानं विना तथा चित्ते	१६.३४
ज्ञानागमस्थलं चाथ	१६.३
ज्ञानाग्निना दहेत् सर्वं	१२.२९
ज्ञानाचारस्थलं	१६.४
ज्ञानाचारो यदुक्तोऽयं	१६.७६
ज्ञानाचार्यः समस्ताना	१५.२५
ज्ञानादाधिक्यसम्पत्ति	१७.७३
ज्ञानादिव्यवहारोत्थं	२०.६२
ज्ञानादेव परानन्दं	१८.७३
ज्ञानामृतमतिस्वच्छं	१९.११
ज्ञानामृतेन तृप्तस्य	१८.७३
ज्ञानामृतेन तृप्तोऽपि	१६.६५
ज्ञानिनः कर्मसंकल्पा	१६.८३
ज्ञानिनां योगयुक्ताना	१२.८
ज्ञानिनो यानि कर्माणि	१९.३०
ज्ञानी कर्मनिरूढोऽपि	१९.३३
ज्ञानेन योजयेत्	१६.८०
ज्ञानेन हीनः पुरुषः	१६.८३
ज्ञानेनाचारयुक्तेन	१६.१४
ज्ञानेन्द्रियाणि पञ्चापि	८.१४
ज्ञाने सिद्धेऽपि विदुषां	१६.१२
ज्ञायते तन्मयं सर्व	२०.९
ज्ञायते लिङ्गमेवैकं	१२.४५
ज्ञेयाभावाद्विशेषेण	२०.६६
ज्योतिर्मयमनिर्देश्य	११.२९
ज्योतिर्मयं परं लिङ्ग	१२.३९
ज्योतिर्लिङ्गं सदा भाति	६.३५
ज्योतिर्लिङ्गानुसन्धान	६.३९
ज्योतिर्लिङ्गे चिदाकारे	२०.११
ज्योतिर्लिङ्गे चिदाकारे	२०.१८
ज्योतिर्लिङ्गे चिदाकारे	२०.६९
झणत्कङ्कणजातेन	३.३९
त एव वर्णा विख्याता	७.१२
तच्छान्तौ योगिनां	१७.२७
तच्छुश्रूषारतः शिष्यः	१७.६८
तज्ज्ञानयोजनं	१९.९०
तज्ज्ञानलिङ्गमाख्यातं	१५.४५
तटित्सु वीचिमालासु	५.७१
तडित्पिङ्गजटाभारै	४.२६
तडिदङ्कुरसंकाशे	५.७२
ततः पञ्चाक्षरीं शैवी	६.२०
ततः शिवे यथा भक्ति	११.२४
ततः सेव्यस्थलं	१७.४
ततोऽकायस्थलं	१६.३
ततो नन्दीमहाकाला	३.४५
ततो निर्देशमुद्दिष्टं	१३.४
ततो भक्तस्य माहात्म्यं	११.५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ततो लिङ्गप्रशंसा च	११.४
ततो विवेकसंपन्नो	६.१
तत्कुलं हि सदा शुद्धं	११.६६
तत्क्रियालिङ्गमाख्यातं	१५.३७
तत्तच्छरीरयोगेन	१८.१२
तत्तच्छिवमयत्वेन	१४.२५
तत्तच्छिवे समर्प्यैष	१७.४०
तत्तत् समर्प्य देवाय	११.११
तत्तत् सर्वं शिवाकारं	१७.२१
तत्तत् स्वीकारयोगेन	११.१७
तत्तन्निवेदयन् शम्भो	१७.३८
तत्तृप्त्या तन्मयं	९.९१
तत्परा आगमा	१६.५
तत्परिज्ञानयोगेन	१८.२७
तत्प्रसादात्तु मोक्षार्थी	१७.५८
तत्प्राणलिङ्गमुद्दिष्टं	१२.७
तत्प्राणानुग्रहः	१७.२४
तत्फलं लभते मर्त्यै	७.६३
तत्र कुत्रचिदाभोग	४.१७
तत्र प्राणान् विहायापि	९.३५
तत्र लीनमभूत् पूर्व	२.७
तत्र सन्तुष्टचित्तस्य	२१.३३
तत्र सन्निहितं साक्षात्	१९.५७
तत्र सम्भावितः	२१.४२
तत्रस्थं भावयेच्छम्भुं	१२.२७
तत्राह्वानं न कर्तव्यं	१०.४८
तत्सम्प्रदायसिद्धेन	१.२९
तत्सामरस्यविज्ञानात्	१२.१२
तत्सामरस्यं शिष्यस्य	१९.१९
तत्सुखं कोटिवर्षेण	१४.१४
तत् सोपाधिकमाख्यातं	९.८१
तत्स्वीकृतप्रसादैक्य	२०.३
तथा गुरुवरे कुर्या	९.५२
तथा गुरोः प्रसादान्नं	११.१८
तथाज्ञालङ्घनेनापि	९.५७
तथाण्डेषु च पिण्डेषु	१९.६६
तथात्मनि प्रकाशे	१९.४५
तथात्मनि विलीयन्ते	२०.२३
तथात्मा देहसङ्घातै	१८.२४
तथात्मा व्यापकः साक्षा	१९.६०
तथात्मा शक्तिभेदेन	१९.६४
तथात्मेत्युपमानार्थ	१९.५९
तथा देहजुषोऽप्यस्य	१८.२२
तथा देहस्य सम्बन्धा	१९.३२
तथा देहात्मनैवास्य	१६.३९
तथा पञ्चाक्षरीमन्त्रा	८.२
तथा पञ्चाक्षरो मन्त्रः	८.१३
तथा पिण्डस्थितो ह्यात्मा	१९.५२
तथापि प्रार्थनीयं	२१.१९
तथा प्रकाशमात्मानं	१९.८९
तथा प्रसादं देवेश	३.८१
तथा प्रसादस्वीकाराद्	९.७७
तथा प्रसूतिकायाश्च	९.४४
तथा ब्रह्मापि चैतन्य	२०.४६
तथा भवति तद्रूपं	१७.३५
तथापि भावं कुर्वीत	१९.३८
तथा भान्ति पराकाशे	१९.७४
तथा भूम्यादिरूपेण	१०.७२
तथा मुक्तस्य जीवस्य	१८.६५
तथा मुक्तस्य जीवस्य	१८.६६
तथा योगी शरीरस्थः	१७.६
तथा योगी शरीरस्थो	१७.७
तथा शक्तिर्विमर्शात्मा	२०.४०
तथा शम्भुः समस्तात्मा	१९.६१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तथा शिवस्य विज्ञाने १७.११
तथा शिवाच्चिदाकाशा १९.७२
तथा शिवात् पराकाशा १९.७३
तथा शिवात् पृथिव्यां १०.४८
तथा शिवात्मनो ९.६७
तथा शिवात् समुत्पन्नं १०.६७
तथा शिवानुरागेण १३.३४
तथा सकायो लोकोऽयं १६.३५
तथा साधु करोमीति २१.२८
तथा सांसारिकं सर्व २०.२४
तथा स्वकीयभक्तेषु १०.७५
तथा स्वशक्तिभिर्व्याप्य १८.३४
तथाऽहङ्कारसम्बन्धा १८.८
तथा हृदयबीजस्थं २०.४१
तथेति प्रतिशुश्राव २१.३३
तथोपाधिगतं ब्रह्म २०.४५
तदक्षयमिति प्रोक्तं ९.६४
तदधिष्ठातृभावेन १०.५१
तदनन्तसुखं प्राप्य १३.१२
तदन्यविमुखः सोऽयं १३.५
तदप्रमेयमानन्दं १९.२८
तदभिन्नतया भाति १०.६९
तदर्पणं शिवे १७.५१
तदवान्तरभेदांश्च ५.२५
तदसज्ज्ञेयरूपत्वा १२.३६
तदाद्वैतसमापत्ति १०.४३
तदाधारः शिवः १७.२८
तदाधारा तनुर्ज्ञेया १७.२९
तदान्तरात्मभावो १८.१८
तदाप्रभृति भक्तोऽसौ ९.२८
तदा माहेश्वरः प्रोक्तो १०.३
तदारभ्य शिवस्तत्र १०.४५
तदासक्तमना योगी १३.११
तदासक्तमनोवृत्ति १३.३३
तदिच्छयाऽभवत् साक्षात् २.१३
तदिदं सर्वसिद्धान्त २०.८५
तदीया परमा शक्तिः २.१२
तदीयायुधधारिण्य ३.४३
तदेकतानता सिद्धिः १२.२३
तदेकत्वानुभावेन १८.७१
तदेकभावमननात् १२.२४
तदेकावेशरूपेण १८.७०
तदेव ज्ञानयोगेन १६.२७
तदेव तु स्वसंवेद्य ९.२०
तदेव लिङ्गं विज्ञेयं ११.२६
तदेव सदनं पुण्य ११.४२
तदेव सर्वभूताना ६.३४
तदेवं सर्वकालं तु ११.१०
तदेवाहमिति ज्ञानी १५.६७
तदेषां क्रमशो वक्ष्ये २०.५
तदैक्यचिन्तया योगी १९.७९
तदैक्यसम्पदानन्द १९.१९
तद् ब्रह्म तदहं चेति १९.४९
तद्भावज्ञापकं ज्ञानं १५.४५
तद्भावज्ञापकं ज्ञानं १५.५१
तद्भावो जायते १६.२२
तद्रूपलिङ्गविज्ञानी १२.३
तद्वरं जङ्गमं लिङ्ग ९.६१
तद्वानेष समाख्यातः १५.५१
तद्विना नास्ति वस्त्वेकं १८.५५
तद्वैषम्यात् समुत्पन्ना ५.३९
तनुरीशस्य चात्मायं १०.५३
तन्त्रीझङ्कारशालिन्या ३.३८
तन्निवृत्तौ कथं भूयः १७.१२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तन्वानो विस्मयं	२१.४३	तस्मादाभ्यन्तरे कुर्युः	५.२१
तपसां परिपाकेन	२०.७९	तस्माददद्वैतभावस्य	१४.१३
तपस्तत्कायमूलं हि	१६.४२	तस्माददद्वैतविज्ञान	१९.९६
तपः कर्म जपो ध्यानं	९.२१	तस्मादाचारवान्	१६.१४
तपो हि मूलं सर्वासां	१६.४२	तस्मादेतन्न भिद्येत	१०.६३
तमपृच्छन् जनाः सर्वे	४.९	तस्मादेते महाभागा	५.१५
तमागतं महाभाग	२१.४	तस्मादेष समाख्यातः	१७.५
तमागतं महासिद्धं	४.३४	तस्माद् गुरुं महादेवं	९.७८
तमालोक्य विभुस्तत्र	३.६८	तस्माद् ज्ञाते महादेवे	१६.१७
तमास्थानगतं देवं	३.१०	तस्माद् भावनया	१६.६८
तमोमूला हि सञ्जाता	१३.२०	तस्मान्नास्ति परं	९.८९
तयोर्नास्ति भिदा	९.५१	तस्मान्निःश्रेयसप्राप्त्यै	११.२३
तयोः समरसत्वं	१९.१२	तस्मान्माहेश्वरो	९.४८
तरङ्गादि यथा सिन्धोः	१९.७२	तस्मान्मुख्यतरं	८.११
तरङ्गाद्या यथा सिन्धौ	१९.८३	तस्माल्लिङ्गमिति ख्यातं	६.३८
तल्लिङ्गं तस्य तु प्राणे	६.२५	तस्माल्लिङ्गं परं ब्रह्म	१२.४१
तस्माच्छतगुणोपांशुः	८.३१	तस्मिन् केवलचिन्मात्र	२०.६५
तस्माच्छिवमयं	१०.६९	तस्मिन् प्रतिफलत्यात्मा	१९.६२
तस्माज्ज्ञानागमा	१७.८३	तस्मिन् प्रलयमापन्ने	१४.९
तस्मात् तत्पूजनादेव	१५.३२	तस्मै दत्तं तु यत्किञ्चि	९.८७
तस्मात्तपांसि यज्ञाश्च	८.३७	तस्मै निवेदितं सर्वं	९.७२
तस्मात्तमाचरन्	१६.६०	तस्मै प्रथमपुत्राय	२.१५
तस्मात् त्रिपुण्ड्रमेवैकं	७.२९	तस्य दक्षिणकर्णे तु	६.२१
तस्मात् पवित्रं तल्लिङ्ग	६.४९	तस्य देहेन सम्बन्धः	१८.४३
तस्मात् सर्वप्रयत्नेन	६.४७	तस्य पापकथा नास्ति	७.५९
तस्मात् सर्वप्रयत्नेन	९.६३	तस्य भासा सर्वमिदं	१२.३९
तस्मात् सर्वप्रयत्नेन	९.९२	तस्य मध्ये समासीनं	४.२५
तस्मात् सर्वप्रयत्नेन	१०.३८	तस्य वंशे समुत्पन्नो	१.१५
तस्मात् सर्वप्रयत्नेन	१०.६२	तस्य वाचकमन्त्रोऽयं	८.५
तस्मात् सर्वप्रयत्नेन	१३.१२	तस्य वीरशिवाचार्य	१.२०
तस्मात् स्थायिफल	१६.२८	तस्यानुभावं विज्ञाय	४.३५
तस्मादन्यत्र विमुखः	१०.५५	तस्यानुष्ठेयधर्माणां	५.२६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

तस्याभिधानमन्त्रोऽय ८.६
तस्यासीन्नन्दनः शान्तः १.१७
तस्यां रमन्ते ये शैवाः ५.१६
तस्येति वचनं श्रुत्वा २१.३२
तस्यै मायास्वरूपायै १.९
तस्यैव परकायस्य १६.५८
तं च कामविनिर्मुक्तं १६.६१
तादृशं तस्य माहात्म्यं २१.३४
तादृशौ तौ महाभागौ २.३१
तानि ज्ञानागमत्वेन १६.२४
तानि भावागमत्वेन १६.१५
तानि सर्वाणि वस्तूनि ८.१६
तापत्रयमहारोग ११.१३
तापत्रयमहावह्नि ५.६५
तामसत्यागसम्बन्धा १४.१
तामाहुः परमाकाशं १९.७१
तां धर्मचारिणीं शम्भोः १.८
तुर्यातीतपदं यत्तद् २०.२६
तृणवन्मन्यते १०.१३
तृणीकुर्वन् जगज्जालं १५.६५
तृणीकृतजगज्जालं ४.३२
तृप्तिं कुर्यात् सदाकालं ९.९२
तेजो विना सहस्रांशोः १७.७१
तेभ्यो जाता हि रुद्राक्षा ७.४८
तेषामुपरमो यत्र १९.८८
तेषामेतैर्व्रतैर्नास्ति ८.३६
तेषां गृहेषु भुञ्जीत ५.२९
तेषां तु शिवनिर्माल्य ९.७३
तेषां महात्मनां हस्ते १०.२३
तेषां समर्पणादीशे १७.४५
तेषु प्रमथवर्गेषु २.२६
तेषु शैवं चतुर्भेदं ५.१०
ते सारूप्यपदं प्राप्ताः ३.५१
तैः समं प्राणमारोप्य १७.२६
त्यजन् माहेश्वरो १०.३१
त्यागो देहाभिमानस्य १७.३४
त्रयोदशमुखान् ७.५७
त्रय्यन्तकमलारण्य ३.१०
त्रिकोट्याचार्यरूपेण २१.३३
त्रिपुण्ड्रधारणोत्कण्ठं ६.५
त्रिपुण्ड्रमुक्तस्थानेषु ७.३५
त्रिपुण्ड्रं धारयन्त्येव ७.४१
त्रिपुण्ड्रं धारयन्नित्यं ७.३१
त्रिपुण्ड्रं भस्मना ७.३३
त्रिमूर्तिभेदनिर्मुक्तं १५.४६
त्रिसन्ध्यमाचरेत् स्नानं ७.१९
त्रिस्रोतसेव सम्बद्ध ४.२९
त्रैलोक्यसम्पदालेख्य १.१
त्वत्पदाम्बुकणास्वादा ४.४९
त्वदाज्ञया मयैता २१.४९
त्वदीयधर्मसम्पत्ति २९.१५
त्वन्ताहन्तादिसंरूढं २०.६५
त्वन्ताहन्ताविनिर्मुक्ते २०.५५
त्वन्मुखाच्छ्रोतुमिच्छामि ४.५२
त्वया राजन्वती लोके ४.४४
त्वां विना कस्य २१.१३
त्वां विना शिव २०.८१
दग्धं चैवानुकल्पाख्य ७.१७
दग्धं प्रागुक्तविधिना ७.१८
ददर्श स महायोगी ४.३३
ददाति यः पतिज्ञानं १५.१५
दद्यात्तेभ्यः समादद्यात् ९.४९
दधानं योगदण्डं च ४.४
दधीचिर्गौतमश्चैव ३.५४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

दधौ तस्य महालक्ष्मी: ३.३७
दर्शनात् परकायस्य १७.१४
दर्शनात् स्पर्शनाच्चैव ७.६१
दर्शनात् स्पर्शनाद् १७.३७
दर्शनै: स्पर्शनै: १५.७०
दर्शयित्वा निजाधिक्यं २१.४०
दशसप्तपञ्चवक्त्रान् ७.५५
दानवा राक्षसा दैत्या ३.५३
दानं कुर्याद् यथाशक्ति ९.७९
दानं तु त्रिविधं प्रोक्तं ९.८७
दानं पूजा जपो ध्यान १६.५९
दानात् स्वर्णसहस्रस्य ९.८६
दास्यामि ते वरं २१.१६
दिक्कालाद्यनवच्छिन्नं २०.४२
दिव्यमप्राकृतं नित्यं २.९
दीक्षयाऽपगतद्वैतं १९.६
दीक्षया रहित: साक्षात् ६.६१
दीक्षागुरुरसौ शिक्षा १५.१२
दीक्षागुरुस्थलं पूर्व १५.५
दीक्षापादोदकं पूर्व १९.३
दीक्षा लिङ्गधृतिश्चैव ५.२८
दीपं विना यथा गेहे १६.३४
दीपाकारं यजन् १५.४२
दीयते च शिवज्ञानं ६.११
दीयते परमं ज्ञानं १५.७
दुराचारैरनाघ्रातं ४.५३
दुर्लभं पापचित्तानां ११.१५
दुर्लभं मानुषं प्राप्य ११.६५
दुर्लभं हि शिवज्ञानं ११.४१
दुर्लभा पापिनां लोके ९.३
दुर्लभा हि जगत्यस्मिन् १३.२७
दुर्लभा हि शिवे भक्ति: ११.४७
दुर्लभा: सर्वलोकानां २१.१८
दुष्टचित्ता दुराचारा ७.४६
दु:खहेतौ शरीरेऽस्मिन् ५.७४
दु:खैरेतैरुपेतस्य ५.७०
दृष्टे तस्मिन् परानन्दे १९.१५
देवतिर्यङ्मनुष्यादि ५.३५
देवतिर्यङ्मनुष्यादि ५.४८
देवतिर्यङ्मनुष्यादि १८.६३
देवदेव जगन्नाथ २१.४४
देवदेव महादेव २.२२
देव्यै पुरा भाषित २०.६२
देशकालाध्यवच्छेद १९.१०
देशकालानवच्छिन्न २०.५४
देशिको हि न लिप्येत १४.१६
देहद्वारेण यद्यत् १७.३८
देहयोगेऽपि देहस्थै १८.३९
देहवानपि निर्देहो १६.५४
देहस्तिष्ठतु वा यातु १६.५५
देहस्थितस्तथा १८.२३
देहस्थितोऽप्ययं १८.१९
देहस्थोऽपि सदा १८.२५
देहाभिमाननिर्मुक्त: १६.५७
देहाभिमानहीनस्थ १६.४३
देहिनां प्ररक: शम्भु ५.५१
देहिनोऽपि परात्मत्व १८.३६
देहिवद्भासमानस्य १४.२१
द्रष्टव्यं विद्यते १९.१५
द्रुमाणामिव भद्रश्री १३.२९
द्वारतोरणसंरुढ ३.६
द्वारं ज्ञानावतारस्य ११.१४
द्विजो न तस्यस्ति ७.३३
द्वितीयेन पदार्थेन २०.६७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

द्वित्रिद्वादशवक्त्राणि	७.५४
धम्मिल्लमल्लिकामोद	६.२६
धर्म एव समस्तानां	१३.६४
धर्मभेदसमायोगा	५.२३
धर्माचारस्थलं	१३.४
धारणीयं समस्तानां	७.४३
धारयन्ति सदाकाल	७.४२
धारयन्ति सदा लिङ्गं	६.५६
धारयन्त्यलिकाग्रेषु	६.५७
धारयेच्छाङ्करं लिङ्गं	६.२७
धारयेत् सार्वकालं तु	७.५८
धारयेदवधानेन	६.५८
धारयेद्यस्त्रिपुण्ड्राङ्कं	७.३८
धारयेन्नित्यकार्येषु	७.१०
धृतश्रीभूतिरुद्राक्षः	८.१
ध्यात्वा क्षणं महादेव	५.१
ध्यानं शिवस्य रूपादि	९.२४
ध्यानं शैवं तथा ज्ञानं	१५.५६
ध्यानेन बोधे च	१८.७६
ध्रियते येन स गुरुः	९.५४
न कर्मबन्धे न तपो	१८.७६
न किञ्चिदपि मुक्तस्य	१७.६७
न किञ्चिद्बाध्यते	१९.७६
न चास्ति देहमम्बन्धो	१७.११
न चेन्द्रियभवं दुःख	१६.४७
न जरा मरणं नास्ति	१७.१९
न ज्ञानमात्रं नाचारो	१६.१६
न ज्ञानं यत् ततो योगी	१६.३६
न तन्नैवेद्यमश्नीया	९.३१
न तयोरन्तरं कुर्याद्	११.२१
न तस्य निष्कृतिः	९.३७
न तस्य सूतकं	९.४३
न तारका महालिङ्गे	१२.३८
न तेषां पुनरावृत्ति	६.४२
न देवत्वं न मानुष्यं	२०.४७
न देवा न मनुष्याश्च	२०.६४
नन्दादीनां गवां वर्णाः	७.८
नन्दादीनां तु ये वर्णाः	७.१२
नन्दा भद्रा च सुरभिः	७.६
नन्दिना वेत्रहस्तेन	३.६०
न पश्चान्नैव पुरतो	२०.५१
न पश्यति जगज्जालं	१४.६
न पृथ्व्यादीनि भूतानि	२०.६४
न प्रपञ्चे निजे देहे	२५.६२
न बन्धो न च मुक्तिश्च	२०.५०
न बिभेति जरामृत्यो	१७.४९
न बुध्यति गुरोर्वाक्यं	१७.७१
न ब्राह्मकर्म तस्यास्ति	१८.७५
न भवेत् कर्मकार्पण्यं	१९.३६
न भाति पृथ्वी न जलं	२०.१०
न भावेन विना ज्ञानं	१९.४३
न मनुष्यो न तिर्यक् च	१८.१२
न मनुष्यो न देवोऽहं	१६.४८
नमस्तस्मै गुणातीत	१.४
नमस्तस्मै महेशाय	१.७
नमस्ते देवदेवेश	२.१८
नमस्ते सच्चिदानन्द	२.२३
नमः शब्दं वदेत् पूर्वं	८.७
नमः शिवाय साम्बाय	२.१
नमः शिवायेति भस्म	७.२९
न यथा विधिलोपः	१६.७
न योनियन्त्रपीडा	९.१५
नरकं स्वर्गमकरोत्	८.४५
न लङ्घयेद् गुरोरातां	२७.६५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

न लिङ्गमात्रे तन्निष्ठो २०.५५
नवकं लिङ्गकोटीनां ११.१६
नवचन्दनकान्तार ४.१४
नववल्कलवासोभि ४.२७
न विधिर्न निषेधश्च २०.४४
नश्वराणि शरीराणि ५.५९
न समर्थोऽभवत् कर्तुं २.२१
न संमानेषु सम्प्रीति १५.६०
न संयोगे वियोगश्च २०.४८
न सुखं नैव दु:खं च २०.५०
न सूर्यो भाति तत्रेन्दु १२.३८
न स्पृशेन्नैव वीक्षेत ९.३७
न स्वभाव इति १८.२१
नहि स्थावरलिङ्गानां ९.३३
नहुषो रोषलेशात् ते ४.३९
नाकाशे नापरं तत्त्वं २०.१०
नात्मनां जायते १६.२६
नानाकर्मविपाका १८.१३
नानापथमहाशैव २.३०
नानामार्गसमारूढा १८.१४
नानायोगसमापन्ना १८.१३
नान्नतोयसमं दानं ९.४८
नान्यच्छृणोति संदृष्टे २०.२७
नान्यत् तस्य किमेतेन १४.३१
नान्यत् पश्यति योगीन्द्रो २०.२७
नान्यदेवार्चकान् ९.३२
नाभिस्थानावलम्बिन्या ३.२२
नाभेरधस्ताल्लिङ्गस्य ६.५३
नाम्ना प्रतीयते लोके १.३१
नाम्ना रेणुकसिद्धोऽहं ४.११
नार्चयेदन्यदेवांस्तु ९.३१
नावमन्येत कुत्रापि ९.६५
नासामौक्तिकलावण्य ३.२७
नासौ देवो न गन्धर्वो १८.१२
नास्तिको भिन्नमर्यादो ७.४४
नास्ति चेच्छाङ्करी ११.४८
नाह्वानं न विसर्गं १०.४९
निजरूपमिति ध्यानात् १२.४१
नित्यतृप्तस्य मुक्तस्य १८.७४
नित्यनैमित्तिकस्नान ४.२२
नित्यप्रकाशनैर्मल्य ३.१२
नित्यसिद्ध: प्रकाशात्मा १९.५७
नित्यसिद्धा भवन्त्येव ११.७३
नित्यसिद्धेन देवेन ११.१२
नित्यसिद्धौ निरातङ्कौ २.३१
नित्यं नियमसम्पन्न: ८.३४
नित्यं भाति त्वदीयेषु १०.७६
नित्यं भासि तदीयस्त्वं १०.५९
नित्यं सन्तोषयुक्ताना १०.७६
नित्यानन्दचिदाकार ५.७३
नित्यानन्दपदे ५.७७
नित्यानन्दशिवप्राप्ति १०.२८
नित्यानन्दे निजाकारे १९.२५
नित्यानि काम्यानि ७.६६
नित्यानित्यविवेकिन: ५.७७
नित्ये निर्मलभावने १५.७१
नित्ये निर्मलसत्त्व १९.९७
निदानज्ञं विना वैद्य १३.२४
निधाने महति प्राप्ते २३.६
निपेतुस्तस्य नेत्रेभ्यो ७.४८
निमग्नमानसो योगी १८.३८
निरङ्कुशमहासत्त्वा ३.४६
निरस्तदेहधर्मस्य १८.३६
निरस्तदोषसम्बन्धं २.९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

निरस्तभेदजल्पस्य १८.५३
निरस्तभेदसद्भावे १०.७१
निरस्तमदनोन्मेषो १०.१८
निरस्तमलसम्बन्धं १८.३३
निरस्तविश्वविभ्रान्ति १५.६८
निरस्तविश्वकालुष्यं ६.३२
निरस्तविश्वसम्बाधो १४.४२
निरस्तविश्वसंभेदं १५.२२
निरस्तसर्वदोषत्वाद् १५.४०
निरस्तसर्वव्यापार १९.२३
निरस्तहृत्कलङ्कस्य ५.६१
निरस्तोपाधिसम्बन्ध १९.७५
निरस्तोपाधिसम्बन्धो १९.३४
निरस्यते गुरोर्बोधात् १८.१७
निरस्यन्ते तमोभावाः १३.१३
निराकृत्य तमोभागं २३.२२
निराधारः शिवः साक्षात् १७.२९
निरुपाधिकचिद्रूप ९.९३
निरुपाधिकमाख्यातं ६.४१
निरुपाधिकमाख्यातं ९.८२
निरोध्दुं न क्षमं कर्म ११.५३
निर्दग्धकर्मबीजस्य १४.२१
निर्दिश्यते तु यज्ज्ञानं १३.२२
निर्दिष्टमुत्तरे भागे ५.१४
निर्देश्ययोगादार्याणां १३.३०
निर्देही स भवेद्योगी २०.२१
निर्धूतमलसम्बन्धो १४.५
निर्धूतमलसंस्पर्शा ११.३७
निर्धूतसर्वसंसार ४.५
निर्धूते तत्प्रबोधेन १८.२८
निर्ध्यातुमसमर्थोऽपि १६.२३
निर्भावागमसंज्ञं १८.३
निर्ममो निरहङ्कारो १०.१७
निर्ममो निरहङ्कारो १५.५३
निर्ममो निरहङ्कारो १८.२५
निर्मलं शिवनामान १.३
निर्मलं हि शिवज्ञानं १६.७८
निर्मलैस्तत्परैर्धार्यं ९.७५
निर्माल्यं तत्तु शैवानां ११.७
निर्माल्यं निर्मलं शुद्धं ९.७५
निर्मुक्तदोषकलिला ७.२८
निर्विकल्पं निराकारं २.३
निर्विकल्पे परे धाम्नि १६.८०
निर्विकल्पो निराकारो ५.३४
निर्विकारं निराकारं २०.६३
निर्विघ्नं वर्तसे किं नु ४.३८
निवर्त्य जन्मजं दुःखं १९.४०
निवारणसमुद्योगी १०.१९
निषसाद तदभ्याशे २१.६
निष्कलङ्कचिदानन्द १९.७७
निष्कलङ्कमहासत्त्व ३.६४
निष्कलङ्कस्थितो ज्ञान १५.२३
निष्कलङ्कस्वभावाय १.५
निष्कलङ्कं निराकारं १६.२३
निष्कलः संविदाकारः ८.२२
निष्कलङ्के निराकारे १९.७९
निष्कलो हि महादेवः १६.४०
निष्कलो हि महादेवो ११.२०
निःस्पृहा निरहङ्कारा ११.४०
निःस्पृहोऽपि महायोगी १६.६४
नीडस्थितो यथा पक्षी १८.२३
नेत्रद्वितयसौन्दर्य ३.२७
नेत्रयुग्मप्रमाणेन ७.३७
नेत्रात् सूर्यात्मनः शम्भो ७.५०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

नेदं जगदिति ज्ञाते १७.१०
नेदं रजतमित्युक्ते १७.१०
नेन्द्रियाणां न देहस्य ५.५७
नैतत्साक्षान्महेशोऽयं १०.५०
नैतयोरन्तरं किञ्चि १७.६१
नैमित्तिकेषु भसितं ७.१०
नैरन्तर्येण सम्पन्ने १६.२२
नैर्मल्यं मनसो लिङ्ग ११.६
नैव सा शक्यते प्राप्तुं ९.१२
नोत्कृष्टत्वं न हीनत्वं २०.५१
न्यक्कृतप्राकृताहन्तं ४.३२
पञ्च गावो विभोर्जाता: ७.६
पञ्चधा कथ्यते सद्भि: ९.२१
पञ्चधा पञ्चधा यानि ८.१६
पञ्चब्रह्ममयैस्तत्र ६.१८
पञ्चब्रह्माणि पञ्चापि ८.१५
पञ्चभूतानि सर्वाणि ८.१४
पञ्चाक्षरजपस्यैते ८.४३
पञ्चाक्षरजपोद्योगी ९.१
पञ्चाक्षरं समुच्चार्य ८.४४
पञ्चाक्षरार्चनस्यैते ८.३७
पञ्चाक्षरीमिमां विद्यां ८.२४
पञ्चाक्षरीं समुच्चार्य ८.४२
पञ्चाक्षरेण मन्त्रेण ८.२१
पञ्चाक्षरोपदेशी च ९.४१
पञ्चाशद्धारयेद् विद्वान् ७.५६
पटीरदलपर्यङ्क ४.१६
पतत्येवं सदाद्वैती १८.४८
पतिव्रताया यच्छीलं १३.३४
पतिं विना यथा स्त्रीणां १३.३५
पति: साक्षान्महादेव: १०.४२
पत्रशाखादिरूपेण १०.७२
पत्रं पुष्पं फलं तोयं ११.१७
पदेन मणिमञ्जीर ३.२३
पद्मपीठे समासीनं १२.१५
परकाये क्रियापत्ति: १९.२९
परकायोऽयमाख्यात: १६.४९
परतत्त्वमयोपाधि ५.४०
परब्रह्म महालिङ्गं १२.२४
परब्रह्मवपुर्यस्य १६.५०
परमाकाशमव्यक्तं १९.७०
परमाकाशमात्मानं १८.४०
परमात्ममनुर्ज्ञेय: ८.२०
परमात्मस्थलं प्रोक्तं १८.३
परमात्मा शिव: प्रोक्त: १८.२९
परमात्मा स्वयंज्योती १८.३५
परमाद्वैतविज्ञान १५.२०
परमानन्द एवोक्त: १९.८
परलिङ्गे विलीनस्य १६.४५
परसंवित्प्रकाशात्मा १९.९
परस्त्रीसङ्गनिर्मुक्त: १०.१५
परस्य ज्ञानचिह्नानि १६.२४
परस्य देहयोगेऽपि १६.४४
परस्य या तनुर्ज्ञेया १६.३५
परं नास्तीति बोधस्य १५.६४
परं पवित्रममलं ११.२७
परं ब्रह्म महालिङ्गं ६.३४
पराकाशमये तस्मिन् २०.५२
पराकाशस्वरूपेण १९.५५
पराकाशं जगच्चित्र १९.७५
परात्परं तु यत्प्रोक्तं ६.५०
परात्परं तु यद् ब्रह्म १५.४९
परात्मनि क्रिया सर्वा १९.८२
परानन्दचिदाकारं १५.३१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परापरपरिज्ञान	२०.५३	पादाग्रेरणवो यत्र	११.४२
परापरसमापेक्ष	२०.६०	पादोदकं यथा भक्त्या	९.६७
पराहन्ताप्रविष्टस्य	१८.३७	पादौ प्रक्षालयामास	४.३५
पराहन्तामनुप्राप्य	१६.५३	पादौ सद्येन सर्वाङ्गं	७.२२
पराहन्तामयं प्राहु	२०.३३	पापानां भर्त्सनाद्भस्म	७.५
पराहन्तामये स्वात्म	१४.३८	पार्वत्या सहितो गणे	३.८८
पराहन्तासमावेश	२०.३२	पार्श्वस्थतिमिरं हन्ति	१५.२४
परिच्छेदकथाशून्यं	२.४	पार्श्वस्थपरिवाराणां	३.५६
परिज्ञाते शिवे साक्षात्	१३.६	पार्श्वस्थैरश्रुत: सोऽय	८.२९
परित्यज्य क्रिया: सर्वा	१५.३३	पाहि मां परमेशान	२१.४९
परिपूर्णनिजानन्द	१८.४९	पिण्डता पिण्डविज्ञानं	५.२७
परिपूर्णप्रबोधेऽपि	१९.३९	पिण्डाकाशस्थलं	१९.४
परिपूर्णमहाज्ञानं	१६.७९	पिण्डाण्डस्थं यथा	१९.६५
परिपूर्णमहानन्द	१९.३६	पिनाकिन: पार्श्ववर्ती	४.१०
परिपूर्णमहानन्दे	१९.४६	पीठस्थितेऽभिषिक्ते च	६.२३
परिभूता हताश्वासन्	३.७६	पीठिका परमा शक्ति	११.३२
परिभ्रमन्ति संसारे	५.४८	पुण्डरीकाकृति स्वच्छं	३.३७
परिवीतं मुनिगणै:	४.२७	पुण्याधिक: क्षीणपाप:	५.३२
परीक्षितेभ्यो दातव्यं	२०.८६	पुनरावृत्तिरहित	५.५१
परे ब्रह्मणि लीनात्मा	२०.६१	पुनस्तं प्रार्थयामास	२.१७
पर्याप्तचन्द्रसौन्दर्य	३.१७	पुनस्तं प्रार्थयामास	२.२२
पवित्रं तद्धि विख्यातं	६.६०	पुन: कर्मविशेषेण	१८.१६
पशुत्वं च पतित्वं च	१४.९	पुन: पुन: समुत्पत्ति	६.३७
पश्यत: किं न जायेत	१६.६३	पुरा त्रिपुरसंहारे	७.४७
पश्यतामन्तरात्मानं	१८.५१	पुरा देवेन कथितं	१.२८
पश्यतां तत्र सर्वेषां	२१.४३	पुरा सानन्दयोगीन्द्र:	८.४४
पश्यन्ति परमाकाशे	१९.१४	पुरा हैमवतीसूनु	४.४३
पश्यन्ति परमां काष्ठां	१९.२२	पूजनाच्छिवभक्तस्य	९.२६
पश्यन्ति हृदये लिङ्गं	६.४६	पूजयन्नपि देवस्य	१०.६४
पश्यन् सर्वाणि भूतानि	१५.५५	पूजयेत् तत्प्रसादान्नं	९.७८
पाञ्चरात्रस्य सांख्यस्य	५.६	पूजयेत् पतितो वापि	८.३८
पात्रं शिवप्रसादस्य	२०.८२	पूजयेत् परया भक्त्या	९.५०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

पूजयेदादरेणैव	९.६६	प्रणम्य परया प्रीत्या	२१.१७
पूजयेद् भावपुष्पैर्यो	१५.४१	प्रणवेनैकवर्णेन	८.१९
पूजयेद् भावयेन्नित्यं	१२.४४	प्रणवेनैव मन्त्रेण	८.२१
पूजाकर्माद्यसम्पत्ते	१०.३९	प्रतिक्षणं भवेत्तस्य	९.६९
पूजादिव्यवहार:	१०.४५	प्रतिष्ठाप्यं यथाशास्त्र	२१.२९
पूजाविधौ नियम्यत्वा	१०.६४	प्रत्यक्षादिप्रमाणाना	२.४
पूजितेन प्रसन्नेन	२१.६	प्रत्यक्षो गुरुरूपेण	९.५३
पूजिते परमेशाने	१६.९	प्रत्यङ्मुखमना भूत्वा	१२.२०
पूज्यते भावपुष्पै	१२.१३	प्रत्युन्मुखेन मनसा	१९.८०
पूज्यपूजकयोर्लिङ्ग	१०.३९	प्रत्युवाच शिवाद्वैत	४.१०
पूरणं सर्वतत्त्वस्य	११.२८	प्रत्येकं द्वादश	७.५७
पूर्वपक्षं समादाय	१५.१६	प्रध्वस्तवासनासङ्गात्	१७.३३
पूर्वाश्रयगतान्	१०.३०	प्रध्वस्ताश्रमवर्ण	१५.७१
पूर्वाश्रयनिरासश्च	१०.५	प्रपत्त्या किं न जायेत	११.६३
पृथिव्याद्यष्टमूर्तित्व	१०.५१	प्रपद्यते शिवं यत्तु	११.५८
पृथिव्याद्यात्मपर्यन्त	१०.५३	प्रपन्नपारिजातस्य	११.६३
पृथ्व्यादिकमिदं सर्वं	१०.५२	प्रपन्नानां महादेवं	११.६४
प्रकाशत इति प्रोक्तं	१९.८२	प्रपन्नानां विशुद्धनां	११.६८
प्रकाशते पराकाशे	१९.२०	प्रपन्नार्तिहरे देवे	१३.३१
प्रकाशते परानन्द	१९.२४	प्रबोधपरमानन्द	२.२६
प्रकाशते यथा नाग्नि	१६.६	प्रबोध्यते महादेव:	८.१८
प्रकाशते या सर्वेषां	२०.१४	प्रभवन्ति कथं देवा:	१३.८
प्रकाशमाने चिद्वह्नौ	१७.४६	प्रमथान् विश्वनिर्माण	२.२६
प्रकाशय महीभागे	३.८७	प्रवर्तय शिवाद्वैतं	२०.८७
प्रकाशिते शिवानन्दे	१९.४१	प्रवालवलभीशृङ्ग	३.८
प्रकृतेस्तु प्रहाणार्थं	७.२६	प्रवृत्तिरीदृशी लोके	४.५१
प्रकृष्टमणिसोपानै	४.२३	प्रशंसन्ति सदाकालं	१०.२९
प्रच्छन्नश्च प्रकाशश्च	२१.३७	प्रश्नोत्तरप्रवक्ता च	१५.१२
प्रज्ञागुरुस्थलं पूर्व	१५.५	प्रसन्नं परमाचार्यं	६.८
प्रज्ञाविभूतियोगेन	१३.२५	प्रसन्ने सति मुक्तो	९.१४
प्रणतं विनयोपेतं	२१.३५	प्रसादपूर्विका येयं	९.१२
प्रणनाम मुहुर्भक्त्या	२१.३४	प्रसादमूला सर्वेषां	११.७१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

प्रसादं सुलभं दातुं	३.६६
प्रसादादेव सा भक्ति	९.११
प्रसादार्थं महेशस्य	११.७०
प्रसादिस्थलमन्यत्तु	५.२४
प्रसादिस्थलमादौ	११.४
प्रसादिस्थलमित्येत	११.३
प्रसादिस्थलसंबद्धा:	१८.१
प्रसादेन विना शम्भो	११.७५
प्रसादे शाम्भवे सिद्धे	११.७४
प्रसादोऽनुभवस्तस्य	१८.६२
प्रसादोऽपि महेशस्य	११.६९
प्रसादोऽस्य परानन्द	१८.६९
प्राकृतानां न धर्मेषु	१०.३३
प्राकृतेन शरीरेण	१६.५०
प्राकृतैश्वर्यसम्पत्ति	१५.६३
प्राण एव मनुष्याणां	१७.२८
प्राणलिङ्गमिदं सूक्ष्मं	६.५०
प्राणलिङ्गं तदाख्यातं	१२.६
प्राणलिङ्गादियोगेन	१४.२
प्राणलिङ्गिस्थलं चादौ	१२.४
प्राणलिङ्गिस्थलं चैतत्	१२.४
प्राणलिङ्गिस्थलारूढान्	१८.१
प्राणवद्धारणीयं	६.२६
प्राणात्ययेऽपि सम्पन्ने	१०.२१
प्राणानुग्रहणं पश्चात्	१७.३
प्राणान् विमुञ्च सहसा	६.२७
प्राणापानसमाघातात्	१२.६
प्राणायामत्रयं कृत्वा	८.२५
प्राणो यत्र लयं याति	१२.७
प्राणो यस्य लयं याति	१७.२५
प्रात:काले च मध्याह्ने	७.३९
प्रात: संफुल्लकमल	३.१८
प्रादुर्भूतं तमालोक्य	४.२
प्राप्तविद्यो महादेवात्	२.१४
प्रामाण्यं सदृशं ज्ञेयं	५.१३
प्रायश्चित्तेषु सर्वेषु	७.११
प्रार्थयामास देवेशं	३.७८
प्रार्थयेदग्रत: शिष्य:	६.८
प्रीतोऽस्मि तव चारित्रै:	२१.१६
प्रेरकं यो विजानाति	५.६०
प्रेरकं शङ्करं बुद्ध्वा	१०.४१
प्रेषितं सकलं द्रव्य	९.३०
फलं क्रियावतां पुंसां	१६.२८
फलाभिसन्धिनिर्मुक्त	९.८२
फलाभिसन्धिसहितं	१६.१२
फलाभिसन्धिसंयुक्तं	९.८१
फलोत्पत्तौ विरक्तस्य	१६.११
फेनोर्मिबुद्बुदाकारं	१०.६४
बद्धेन्द्रियनवद्वारे	१२.१५
बध्नीयाद् य: शिवालाने	१७.४२
बन्धूककुसुमच्छाया	३.२९
बभाषे सस्मितो वाणीं	२१.१२
बहिरन्तस्तमश्छेदी	१५.२७
बहिर्वासनया विश्व	१२.२८
बहिस्तिमिरविच्छेत्ता	१५.२७
बहुजन्मकृतै: पुण्यै:	५.३१
बहुनात्र किमुक्तेन	९.१०
बहुनात्र किमुक्तेन	११.३१
बहुनात्र किमुक्तेन	११.७६
बहुनात्र किमुक्तेन	१२.३५
बहुनात्र किमुक्तेन	१३.३६
बाणं वा सूर्यकान्तं वा	६.८२
बाधकं परमाद्वैत	१४.९०
बाहुद्वितयसौभाग्य	३.३०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

बाहुयुग्मे ककुद्देशे	७.३३
बाह्यक्रियां परित्यज्य	१५.५०
बाह्यपीठार्चनादेतन्	६.५५
बाह्यमाभ्यन्तरं चेति	६.३०
बाह्यमाभ्यन्तरं चैव	९.१७
बाह्यं च धारयेल्लिङ्ग	६.४८
बाह्यार्थानामनुभवं	१७.१७
बाह्या स्थूलान्तरा सूक्ष्मा	९.६
बिम्बत्वं प्रतिबिम्बत्वं	५.३७
बीजे यथाङ्कुर: सिद्ध:	५.३६
बुद्धितत्त्वगतैर्बौद्धै:	५.५६
बुद्धियोगात्तदासक्तो	१०.१०
बुद्धिस्तदात्मिका शक्ति	१२.१९
बृहत्वाद् बृंहणत्वाच्च	६.३८
बोधकोऽयं समाख्यातो	१५.१३
बोधात् परात्मभावित्वा	१८.१९
बोध्यमान: स गुरुणा	१७.६८
बोध्यानि पञ्चभिर्वर्णै:	८.१५
बौद्धादिप्रतिसिद्धान्त	१.२६
ब्रह्मज्ञाने समुत्पन्ने	१९.१५
ब्रह्मणा विष्णुना पूर्व	११.३०
ब्रह्मभूयंगतो योगी	२०.४०
ब्रह्म यद्धध्यते तत्तु	१५.४६
ब्रह्मविष्णुसुराधीश	२१.४४
ब्रह्मविष्ण्वादय: सर्वे	१५.३६
ब्रह्मविष्ण्वादयो देवा	६.५६
ब्रह्मविष्ण्वादयो देवा	१९.२७
ब्रह्मविष्ण्वादयो देवा:	१२.३३
ब्रह्मविष्ण्वादिदेवेषु	८.४
ब्रह्मविष्ण्वादिभिर्देवै	३.५८
ब्रह्महा मद्यपायी च	७.६०
ब्रह्माण्डकुण्डिकाषण्ड	३.१४
ब्रह्माण्डबुद्बुदस्तोमा	१८.२०
ब्रह्माण्डबुद्बुदोद्भूतं	१७.६३
ब्रह्माण्डबुद्बुदोद्भेद	१४.७
ब्रह्माण्डशतकोटीना	२०.२९
ब्रह्मादय: सुरा येषा	३.४७
ब्रह्मादय: सुरा सर्वे	११.३३
ब्रह्मादिदेवताजाल	१०.११
ब्रह्मादिविबुधान्	११.५८
ब्रह्मादिसम्पत्सु	९.९४
ब्रह्मादिस्थानभूतानि	१२.२५
ब्रह्मादिस्थानविमुखो	१०.२
ब्रह्मादीनां च देवानां	८.४८
ब्रह्माद्या देवता: सर्वा	१६.४१
ब्रह्माद्या विबुधा: सर्वे	७.२७
ब्रह्माद्या विबुधा: सर्वे	११.७३
ब्रह्माद्या: किं नु कुर्वन्ति	१५.६९
ब्रह्मा विष्णुश्च रुद्रश्च	६.४५
ब्रह्मा विष्णुश्च रुद्रश्च	७.४९
ब्रह्माद्यैर्मलिनप्रायै	१०.९
ब्रह्मेति लक्षणं ज्ञानं	१९.९४
ब्रह्मेति लिङ्गमाख्यातं	६.६०
ब्रह्मेति विश्वधामेति	१२.४५
ब्रह्मेति व्यपदेशस्य	१.२
ब्रह्मोपेन्द्रमहेन्द्राद्या	३.५२
ब्राह्मण: क्षत्रियो वाऽपि	११.५४
ब्राह्मणो वान्त्यजो वापि	७.६२
ब्रूयात् तत्त्वं गुरुस्तस्मै	१७.७५
भक्तमार्गक्रिया चैव	५.२९
भक्तस्थलं प्रवक्ष्यामि	५.२५
भक्तस्थलं समाख्यातं	१०.१
भक्तादिधामार्पित	१४.४४
भक्तादिव्यवहारेण	५.२२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भक्ताद्यैक्यावसानानि १५.२
भक्तानामुपचारेण १५.३९
भक्तानां हृदयाम्भोजे १०.७३
भक्तिः शैवी महाघोर ४.४४
भक्तिः स्थिरीकृता ९.५
भक्तेर्यदा समुत्कर्षो १०.३
भक्तो माहेश्वरश्चेति १२.१
भक्तो माहेश्वरश्चैव १२.२
भक्त्या चूडामणिं कान्तं ३.४२
भक्त्या तदपि विख्यातं ९.८५
भक्त्या पञ्चाक्षरेणैव ८.३५
भक्त्या परमया युक्तः ९.२५
भग्नचक्रायुधः पूर्वं ३.७३
भद्रासने निजे रम्ये २१.५
भवदागमसंपत्ति ४.४६
भवदुक्तो ह्युपायो मे २.२४
भवद्दर्शनपुण्येन ४.४७
भवन्तमेकं शंसन्ति ४.४२
भव शर्व महेशान २.२३
भवादृशानां सिद्धानां ४.५१
भवेन्माहेश्वरः कर्मी १०.४०
भस्मत्रिपुण्ड्रधारी ७.४४
भस्मधारणसंयुक्तः ७.१
भस्मना विहितस्नानं ७.४५
भस्मना विहितं स्नानं ७.२३
भस्मस्नानयुताः सर्वे ७.२८
भस्मस्नानवतां पुंसां ७.२४
भस्मालङ्कृतसर्वाङ्गं ४.३०
भस्मोत्पादनमुद्दिष्टं ७.१३
भस्मोद्धूलननिष्णातं ६.५
भस्मोद्धूलितसर्वाङ्गं ४.३
भस्मोद्धूलितसर्वाङ्गा ७.६५
भस्मोद्धूलितसर्वाङ्गैः ४.२६
भाण्डस्थलं ततः प्रोक्तं २०.४
भारती यस्य विदधे १.१४
भाव एव हि जन्तूनां १७.५२
भाव एवास्य सर्वेषां १६.६७
भावकर्मसमायुक्तं १६.२५
भावचिह्नानि विदुषो १६.१५
भावनातीतमव्यक्तं ६.५१
भावनाविहितं कर्म १६.६८
भावनिष्पत्तिकं चाथ १९.४
भावप्रकाशनं पश्चात् १९.५
भावयन् परमो योगी १९.८४
भावयन् शिवरूपेण १०.५४
भावयन् सततं योगी १९.९६
भावयित्वा सदाकालं १२.१५
भावयेत्तत्र विमलं २१.२६
भावयेत् परमानन्द १६.१८
भावयेत् सर्वकर्माणि १६.७३
भावयेद् यः सुमनसा १९.५३
भावयेल्लीनमात्मानं १४.४२
भावलिङ्गस्थलं चाथ १५.६
भावशुद्धेन मनसा १६.२१
भावशुद्धौ भवेन्मुक्ति १७.५२
भावस्य शुद्धिराख्याता १७.५३
भावस्य स्थिरतायोगः १३.३१
भावहीनस्तथा योगी १६.२०
भावहीनां न गृह्णाति १६.२१
भावः प्रतीयमानोऽपि १९.३७
भावा बुद्ध्यादयः सर्वे १९.८३
भावाभावविनाशं च २०.५
भावाभावविनिर्मुक्तो २०.५६
भावार्पितमिदं प्रोक्तं १७.५०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

भावेन किं फलं पुंसां	१६.२५
भावेन गृह्यते देवो	१५.३८
भावेन नास्ति सम्बन्ध	१५.३७
भावेन यदुपस्थानं	१६.७१
भावेन हि मन:शुद्धि	१६.६९
भावो मानसचेष्टा	१६.६७
भावो यस्य स्थिरो	१७.५९
भावो विकारनिर्मुक्तो	१८.४४
भावो हि निहित	१९.३९
भाव्यते वर्णरूपेण	८.२९
भिक्षामात्रप्रदानेन	९.९०
भिक्षाशी समबुद्धिश्च	१५.५३
भिन्नाधारसमायुक्ता	५.३
भुज्यमाना यथायोग	२०.१८
भुञ्जीयाद् रुद्रभुक्तान्नं	९.७०
भूतिरुद्राक्षसंयुक्तो	९.१
भूत्वा कर्मवशाज्जन्तु	५.६५
भूयो भूय: समभ्यासात्	८.४०
भृगोश्च शङ्कुकर्णस्य	३.७२
भेदबुद्धिसमुत्पन्न	१४.११
भेदबुद्धि: समस्तानां	१८.४२
भेदशून्ये महाबोधे	१८.५०
भेदस्य कर्महेतुत्वात्	१०.४२
भेदात् तं पूजयेन्नित्यं	१०.३९
भो कल्याण महाभाग	६.९
भोक्ता भोग्यं प्रेरयिता	५.४१
भोक्ता भोग्यं भोज	१७.५०
भोक्तृताभावगलित:	१८.२६
भोक्तृत्वं चैव भोज्यत्वं	५.३८
भोक्तृभोज्यपरित्यागा	१८.२६
भोज्यमव्यक्तमित्युक्तं	५.४३
भ्रमन्ति घोरसंसार	१८.१६
भ्रान्तिमूलप्रपञ्चस्य	१२.१८
भ्रूमध्यादूर्ध्वभागे	१२.२६
भ्रूमध्ये स्फटिकच्छायं	६.४०
मणिकङ्कणकेयूर	३.२०
मणिताटङ्करङ्गान्त	३.२८
मण्डले स्थापयेच्छिष्यं	६.१७
मत्पादताडनादासीत्	३.७१
मत्समो नास्ति लोकेषु	२१.१०
मत्स्यकूर्मवराहाङ्गै	५.६४
मथिताच्छास्त्रजलधे	१९.१३
मदद्वैतपरं शास्त्रं	३.८६
मरालालापवाचालु	४.२०
मदीयलिङ्गसम्भूतं	३.८५
मद्भक्तेन दधीचेन	३.७३
मद्भाग्यगौरवादद्य	२१.९
मध्यमानामिकाङ्गुष्ठै	७.३७
मध्याङ्गुलित्रयेणैव	७.३६
मन:प्रसादमतुलं	११.१०
मन:प्रसादयोगेन	११.२
मन:प्रसादसिद्ध्यर्थ	११.८
मनो महेशध्याना	९.१८
मनो महेशप्रवणं	९.२०
मनो यत्र प्रवर्तेत	१७.२०
मनोवाक्कायभेदैश्च	९.१७
मन्त्रन्यासादिभूतेन	८.१८
मन्त्रपूते कलां शैवीं	६.२३
मन्त्रस्यास्यैव माहा	८.४८
मन्त्र: पञ्चाक्षरो ह्येष	८.७
मन्त्रेण तमसेवन्त	३.४२
मन्त्रेणानेन संसिद्धा	८.४७
मन्दस्मितमितालाप	३.१८
मन्दारचन्दनप्रायै	४.१८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मन्दारवकुलाशोक	३.२
मम प्रतापमतुलं	३.८७
मम भक्तमवज्ञाय	३.७१
मलकोशे शरीरेऽस्मिन्	५.७२
मल्लीमरन्दनिष्यन्द	३.२
महतां शिवतात्पर्य	११.४४
महाकाशस्थलं	१९.५
महातापत्रयोपेता	३.८०
महाभस्मेति संचिन्त्यं	७.२
महासत्ता महासंविद्	१८.५५
माणिक्यदीपकलिका	३.६
माणिक्यमुकुटज्योति	३.१५
मातरं तां समस्तानां	१.१०
मातृमेयप्रमाणाद्धि	२०.७
मातृहा पितृहा चैव	७.६०
माधवीमल्लिकाजाती	४.१६
मानसो हि जपः श्रेष्ठो	८.३२
मानुषाकारसम्पन्नं	२१.७
मानुषीं योनिमासाद्य	३.७९
मान्त्री दीक्षेति सा प्रोक्ता	६.१४
मा भैषीर्मम भक्तानां	३.८२
मायाकृता परे तत्त्वे	१८.६३
मायाब्धितारणोपाय	१५.१०
मायामलविनिर्मुक्तौ	२.२८
मायारजन्या विरमे	१९.२३
मायाविकल्पजं	१२.११
मायाशक्तिनिरोधा	१४.८
मायाशक्तिवशादीशो	५.४६
मायासम्बन्धराहि	१६.४३
मायासिन्धुर्लयं	१४.७
मायी महेश्वरस्तेषां	५.३५
मार्गेऽन्नपानदानं	९.४७
माहात्म्यं निजभक्तानां	३.६८
माहात्म्यं वाचिकस्यैत	८.३१
माहेश्वरप्रशंसादौ	१०.४
माहेश्वरस्थलं	१०.४
माहेश्वरस्थले सन्ति	१६.२
माहेश्वरस्थले सिद्धं	१६.१
माहेश्वरः प्रसादीति	१३.१
माहेश्वराणामन्तःस्थो	१०.७८
माहेश्वराः समाख्याताः	५.२१
माहेश्वरो न मुञ्चेत	१०.२२
मां विना कस्य लोकेषु	२०.७८
मिथ्या तदन्यदित्येषा	१९.४७
मिथ्येति भावयन् विश्वं	१७.५५
मुक्तः संशयपाशतः	१७.८६
मुक्तातारकितोदार	३.७
मुक्तावलयसम्बद्ध	३.१७
मुक्तिदश्चेति यो	१०.१२
मुक्तिरित्युच्यते सद्भिः	१७.४३
मुक्तिरूपमिदं	१२.४६
मुक्तिरेव परा तृप्तिः	१८.७४
मुक्तो भवति संसारा	१७.७८
मुख्यवृत्त्या तदन्येषां	८.१०
मुख्यार्थेऽसम्भवे	१९.९०
मुख्यार्थो लक्षणार्थश्च	२०.६
मुद्दवेति विख्याता	१.१६
मुद्देवाभिधाचार्यो	१.१५
मुद्दानात् सर्वजन्तूनां	१.१६
मुनयः सिद्धगन्धर्वा	६.४५
मुनिकन्याकरानीत	४.१९
मुनिर्विनयसपन्नो	४.३६
मुनिर्विनयसम्पन्नो	४.३६
मूर्तिं विना तथा योगी	१६.३८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

मूर्त्यात्मनैव देवस्य १६.३९
मूर्धन्यचन्द्रविगल १२.१४
मूर्ध्नि वा कण्ठदेशे वा ६.५२
मूलं विद्या शिवः शैवं ८.२३
मूलाधारे च हृदये ६.३५
मूलाधारेऽथवा चित्ते १५.४२
मृच्छिला विहिता १५.४०
मृणालवल्लरीतन्तु ३.३२
मृत्युकाले च रुद्राक्षं ७.६४
मोक्षलक्ष्मीपरिष्वङ्ग ३.४८
मोक्षश्रीर्बिम्बरूपेण १५.१८
मोक्षाय कारणं प्रोक्तं १९.४३
मोचयेत् सकलान् १८.६१
मोदते यः सुखी १७.६७
मोहग्रन्थिं विनिर्भिद्य १८.५९
मोहान्धकारतपनं ४.३३
मौनं घण्टापरिस्पन्द १२.१८
य इदं शिवसिद्धान्तं २१.२
यजुषा गीयते यस्मात् ६.६२
यज्ञादयः क्रियाः सर्वा १५.३४
यज्ञास्तपांसि मन्त्राणां ११.७०
यतेश्चत्वारि कर्माणि १५.५६
यत्कटाक्षकला ९.५५
यत्किञ्चिद् दीयते ९.८८
यत्किञ्चिद्भाषितं १४.२६
यत्तस्य धारणं चित्ते ६.३१
यत्र कुत्रापि वा द्वेष्टि १३.१८
यत्र चाचारनिन्दा ९.३७
यत्र तद्देशिकैरुक्तं १५.३७
यत्र नास्ति भिदायोगा २०.४९
यत्र यत्रेन्द्रियासक्तिं १९.८७
यत्र यान्ति लयं तेन १६.५२
यत्र विश्राम्यतीशत्व १.७
यत्र स्थावरलिङ्गा ९.३४
यत्फलं लभते ९.६४
यत्फलं लभ्यते ९.९०
यत्सूक्तिदर्पणाभोगे १५.१८
यत्सूक्तिधारा विमला १५.१७
यत्सौख्यं तत्समावेशे १३.२
यथाकाशमविच्छिन्नं १८.६६
यथाकाशो विभुर्ज्ञेयः १९.५९
यथा काष्ठादिकं १९.४०
यथागमः प्रमाणं १६.७
यथा गुरौ यथा लिङ्गे ९.५८
यथा चन्द्रे स्थिरा २०.३८
यथा ज्योतिषि भासन्ते १९.७४
यथा तथा न भिद्यन्ते ५.२०
यथा तन्तुभिरुत्पन्नः १०.६५
यथात्मशिवयो १०.४८
यथा देवे जगन्नाथे ९.५२
यथा न भिन्नमाकाशं १९.६६
यथाऽनादिर्महादेवः ८.१३
यथा पद्मपलाशस्य १८.२२
यथा पिण्डस्थ आकाश १९.५१
यथा पुष्पपलाशादि १९.७३
यथा मेघाः समुद्भूता २०.२३
यथा मे मानुषो भावो ३.८१
यथाविधि यथायोगं ६.१६
यथा व्याप्य जगत्सर्वं १८.३४
यथा शास्त्रोक्तविधिना ७.१४
यथा शिवप्रसादान्नं ११.१८
यथा शिवोऽनुगृह्णाति १७.६
यथा सूर्यसमाक्रान्तौ १९.८९
यथास्थानं यथावक्त्रं ७.५३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

यथा स्वप्नकृतं वस्तु	१७.११
यथैको वायुराख्यात:	१९.६०
यथैवाङ्कुरतो बीजं	९.११
यदाचार्यकुलाज्जाता	१.१९
यदा दीक्षाप्रवेश:	९.२८
यदा निरस्तजीव	१८.१८
यदा योगी निजं देहं	१७.३५
यदा शिवकलायुक्तं	१०.४७
यदाहु: संसृतेर्मूलं	१६.८२
यदि प्रमादात् पतिते	६.२७
यदीयकीर्तिपुष्पेण	१.२२
यथा वह्निरमेयात्मां	१९.६१
यदृच्छालाभसन्तुष्टो	१५.५४
यदेतद्रूपतां धत्ते	१२.४०
यद्गृहे शिवनिन्दा	९.३७
यद्गृहेष्वन्यदेवोऽस्ति	९.३२
यद्भासा भासते विश्व	१.४
यद्यच्चिन्तयते योगी	१४.२५
यद्यत्करणमालम्ब्य	१७.४०
यद्यत् पश्यति सामोदं	१४.२४
यद्यत् पश्यन् दृशा	१७.२१
यद्यत् प्रसादितं भुक्त्वा	११.१२
यन्त्रमन्त्रकलासिद्धान्	२१.४१
यन्मन:कुमुदं	१९.१८
यन्मात्रासहितं	१९.२८
यमादियोगतन्त्रज्ञं	४.७
यया दीक्षेति सा तस्यां	१५.७
यया महेश्वर: शम्भु:	१.९
यया विज्ञायते सम्यक्	१४.३९
यस्तस्य वाजपेयानां	८.४२
यस्माच्छिंवप्रसादात्	११.६७
यस्मादत: सदा जप्यो	८.१२
यस्मादत: समाख्याता	६.११
यस्मादेतत् समुत्पन्नं	१०.६५
यस्मिन् ज्योतिर्गणा:	१८.३१
यस्मिन् ज्योतिषि चिद्रूपे	२०.५८
यस्मिन्नप्राप्तकल्लोले	१९.१७
यस्मिन् प्रतिष्ठिता	२०.३६
यस्मिन् समस्त	१८.३२
यस्य कार्यदशा नास्ति	२०.७०
यस्य गेहं स्वयं	२१.१०
यस्य चित्तं शिवे	११.६६
यस्य ज्ञानं तमोमिश्रं	१३.१४
यस्य प्रतापमतुलं	२१.२१
यस्य रूपमिदं ख्यातं	२०.४२
यस्यैव परलिङ्गस्य	१२.३२
यस्योर्मिबुद्बुदाभास:	१.३
य: पिबेच्चिन्तयन् रुद्र	७.६४
य: प्राणलिङ्गार्चन	१२.४८
य: शिवत्वसमावेशो	६.१३
य: शिव: स गुरुर्ज्ञेयो	११.२१
य: सदा वर्तते योगी	१२.१०
य: सदा वर्तते योगी	१४.३३
य: सर्वभूताधिपतिं	९.३८
यामाहु: सर्वलोकाना	१.८
या या चेष्टा समुत्पन्ना	१४.२७
यावन्त: कर्मयज्ञाद्या	८.३०
युगपच्छिवलिङ्गानां	२१.२९
ये देहवृत्तिं कुर्वन्ति	१०.२५
ये धारयन्ति हृदये	६.४२
ये न जानन्ति ते	१२.४७
ये न जानन्ति देवेशं	११.६५
येन रक्षावती जाता	१.२३
येन संसारसम्बन्ध	१६.३०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

ये पश्यन्ति जगज्जालं ११.३७
ये प्रपन्ना महादेवं ११.६१
ये भजन्ति महादेवं ११.४६
ये भवन्ति महात्मान ७.६५
ये ये भावा: समुत्पन्ना १९.८५
ये लिङ्गधारिणो ९.७३
येषामस्ति शिवज्ञानं ११.३८
येषामीषत्करं विश्व ३.४८
येषामेतद् द्वयं ११.४१
येषां विक्रमसन्नाहा ३.५१
योगादुभयधर्माणा १८.२०
योगिन: सनकाद्याश्च ७.२७
योगिनो यत्र लीयन्ते ११.३१
योजयेत् स शिव: १७.२२
यो द्वेष्टि सकलान् १३.१९
यो लिङ्गधारी नियता ६.६३
योऽभस्मरुद्राक्षधरो ७.६६
योऽसत्यभावनायुक्त १३.१९
रक्षणात् सर्वभूतेभ्यो ७.५
रक्षा च मोक्षकार्येषु ७.११
रक्षा चेशानवक्त्राच्च ७.९
रज्जौ भुजङ्गवद् १९.२९
रज्जौ सर्पत्त्वबद्धाति १०.७०
रणे विष्णववतारेण २१.२२
रत्नसिंहासनं दिव्य ३.९
रराज राजहंसानां ३.४१
रसवेधाद् यथा लोहो १७.६४
रहस्यमेतत् सर्वज्ञ: २०.८४
रागद्वेषादयो भावा: १९.८८
रागद्वेषादिकलुषं १६.७८
रागद्वेषादिसंपन्न ५.६३
रागो वा जायते १७.१५
रावणो हि मम भ्राता २१.२०
रुद्रनेत्रसमुत्पन्ना ७.४९
रुद्राक्षधारणं पश्चात् ५.२८
रुद्राक्षधारणं वक्ष्ये ७.५३
रुद्राक्षधारणादेव ७.४६
रुद्राक्षधारणादेव ७.६०
रुद्राक्षधारणादेव ७.६१
रुद्राक्षधारणाल्लोके ७.६१
रुद्राक्षं धारयेत् प्राज्ञ: ७.५२
रुद्राघ्रातं सदा ९.७०
रुद्राध्यायादिका ९.२३
रेणुक त्वां गणाधीश २१.८
रेणुकं तं समालोक्य २०.७२
रेणुकं त्वां विजानामि ४.५०
रेणुको दारुकश्चेति २.२७
रेणुकोऽपि महातेजा २१.३७
रे रे रेणुक दुर्बुद्धे ३.३९
लक्ष्यीकृते शिवे १७.४३
लक्ष्म्यादिशक्तय: सर्वा ६.५७
लङ्घनं मम भक्तानां ३.७०
लब्धवान् परमेशाना ८.४६
लभ्यते शिवरूपत्वं ९.५५
लयं गच्छति यत्रैव ६.३७
लय: सर्वपदार्थाना १८.६२
लिङ्गकोटित्रयस्येह २१.३०
लिङ्गधारणमाख्यातं ६.३०
लिङ्गधारणमाख्यातं ६.५८
लिङ्गधारणसंयुक्तं ६.६
लिङ्गधारी सदा शुद्धो ६.५४
लिङ्गनिष्ठस्य किं तस्य १०.२८
लिङ्गनिष्ठादिभावेन ११.२
लिङ्गनिष्ठापरं २०.२९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

लिङ्गनिष्ठापरो १०.४९
लिङ्गपूजादिकर्म १०.४४
लिङ्गपूजापर १०.४५
लिङ्गपूजामकृत्वा १०.२३
लिङ्गमित्युच्यते १२.३४
लिङ्गमित्युच्यते १९.६९
लिङ्गमेव परं ज्योति १५.३२
लिङ्गस्थलानि कथ्यन्ते १५.१
लिङ्गस्थलानि कानीह १५.२
लिङ्गस्य धारणं पुण्यं ६.२९
लिङ्गस्यापि च माहात्म्यं ११.२५
लिङ्गं च द्विविधं ९.६०
लिङ्गं चिदात्मकं ब्रह्म १२.३
लिङ्गं ज्योतिर्मयं १९.७०
लिङ्गं तु त्रिविधं प्रोक्तं ६.४९
लिङ्गं सद्रूपतापन्नं १५.३१
लिङ्गाङ्गयोगतत्त्वज्ञं ६.६
लिङ्गाङ्गस्थलभेदज्ञं ६.६
लिङ्गान्नास्ति परं १२.४९
लिङ्गार्चनपर: १०.४६
लिङ्गार्चनपरो १०.२७
लिङ्गार्चनरतायाश्च ९.४४
लिङ्गार्चनरतिर्यस्य १५.३५
लिङ्गी महेश्वरश्चेति १२.३७
लिङ्गे प्राणं समाधाय ९.८
लिङ्गे यस्य मनो लीन १०.२७
लिङ्गैकनिष्ठहृदय: १०.३०
लिङ्गैक्ये तु समापन्ने २०.२१
लिङ्गै: शिवस्य चोद्दिष्टै ९.१९
लिप्यते नैव संसारे २०.४३
लीने तस्मिन् शाङ्करे २१.५३
लीयते यत्र चिल्लिङ्गे २०.१४
लीयन्ते यत्र गम्यन्ते १२.३३
लीलाभाजनतां १८.१४
लोपामुद्राकरानीतै ४.३५
लोपामुद्रापदन्यास ४.२१
लौकिकस्तु सदाचार: १४.२०
वडवाग्निशिखाजाल ४.३१
वदस्व स्थलभेदं १७.१
वनेषु गोमयं यच्च ७.१६
वन्दारुदेवमुकुट ३.९
वन्दे तां परमानन्द १.११
वन्दे माहेश्वरीं शक्तिं २.२
वयमज्ञानसम्पन्ना २१.२५
वराहदंष्ट्रिकाध्वस्त ४.१५
वर्णाश्रमसदाचारै १४.२०
वर्णाश्रमसमाचार १५.६६
वर्णाश्रमादिधर्मा १०.३५
वर्तते यो महाभाग १६.७४
वर्तते शाङ्करी भक्ति: ९.४
वर्तन्ते ये महाभागा ७.२
वर्तन्ते योगिन: सर्वे १५.३३
वशीकृततत्वात् प्रकृते १६.४९
वशीकृते शिवे १७.४२
वसानं वल्कलं नव्यं ४.३०
वसिष्ठवामदेवाद्या ८.४७
वसिष्ठाद्या महाभागा ७.४२
वसिष्ठो वामदेवश्च ३.५४
वस्त्रेणोत्तारितं भस्म ७.१७
वाचिक: स तु विज्ञेय: ८.२७
वाचिकात् तदुपांशोश्च ८.३२
वाचो यस्य प्रवर्तन्ते १५.१४
वाजिनां दिननाथस्य ११.५२
वातपित्तादिजं दु:खं ५.६८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

वातुलान्तानि शैवानि १.२५
वामपार्श्वनिवासिन्या ३.२४
वामहस्ततले भस्म ७.२०
वामहस्ततले भस्म ७.३४
वामं च दक्षिणं चैव ५.१०
वारुणाद्यैरलं स्नानै ७.२४
वालाग्रशतभागेन १८.६
विक्रिया प्रतिबिम्बस्था १९.३१
विजित्य स्वप्रभावेण २१.४१
विदधतु मतिमस्मिन् १.३२
विदधान: क्षणं देव्या ३.५८
विद्यते चित्स्वरूपस्य २०.५७
विद्यते तद् द्वयं यस्य १२.४२
विद्यातत्त्वप्रकाशिन्या ३.२५
विद्यायां रमते तस्यां ५.१८
विद्यायां रमते यस्मा ५.१७
विद्यायां शिवरूपायां ५.१५
विद्यावैशद्यकरणं ११.१४
विधातुमखिलान् २.१७
विधि: शिवनियोगोऽयं १६.८
विना प्रसादमीशस्य १८.६०
विना सूर्योदयं लोके १८.६०
विन्ध्यो निरुद्धो भवता ४.३९
विपरीतफलं च ११.४९
विपरीतसमायोगे १७.५३
विभीषण महाभाग २१.१३
विभीषण विशेषज्ञ २१.२४
विभीषण: समालोक्य २१.४
विभीषणोऽपि हृष्टात्मा २१.३६
विभूतिपट्टं दत्त्वाग्रे ६.१८
विभूतिर्भसितं भस्म ७.३
विभूतिर्भूतिहेतुत्वा ७.४
विभूतिं शिवभक्तेभ्यो ६.१५
विमर्शभाण्डविन्यस्त २०.३४
विमर्शाख्या परा शक्ति २०.३०
विमर्शाख्या परा शक्ति २०.३६
विमर्शो भासते यत्र २०.३५
विमुक्तभोगलालस्यो ११.६०
विमुक्तेतरसर्वार्थ १०.२६
विरक्तानां प्रबुद्धानां ९.१३
विलक्षणं महादेवं १०.५६
विलीनचित्तवृत्तस्य १९.७८
विलीनचित्तवृत्तीनां १४.४१
विलीनचेतसां १९.२५
विलीनं निखिलं तत्त्वं १९.११
विलीन: किं नु जानाति २०.४८
विलीनात्मा महायोगी १८.४७
विवेकिनो विरक्तस्य ५.७६
विवेकी रमते देहे ५.७३
विवेकी शुद्धहृदयो ५.७४
विशिष्टं कोटिगुणितं ६.४१
विशुद्धज्ञानकरणं २.११
विशुद्धभस्मकृतया ४.२९
विशुद्धमन्त्रजातं हि ११.९
विशुद्धा: प्राकृता १०.३४
विशुद्धेषु शिवनिर्माल्ये ९.७७
विशुद्धेषु विरक्तेषु १०.७७
विशृङ्खलतया तस्य २०.६
विश्वतो भासमानो १८.३५
विश्वसंमोहनी २०.१७
विश्वस्मादधिको १०.८
विश्वं यत्र लयं याति २०.३१
विश्वं शिवमयं चेति १४.२८
विश्वातीतं परं ब्रह्म १५.६७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

विश्वाधारमहासंवि २०.३३
विश्वाधिपत्यमीशस्य ११.३४
विषयभ्रान्तिराहित्यं १२.१९
विषयानन्दकणिका १४.४
विषयासक्तचित्तोऽपि १७.८५
विषयेभ्यो यदुत्पन्नं १७.३७
विस्मितात्मसमावेश १९.४२
विस्मिता मानुषाः सर्वे ३.८५
विहाय त्वत्पदाम्भोज ३.८०
विहाय बाह्यलिङ्गस्था १२.९
विहाय बाह्यलिङ्गानि १५.४१
वीरमाहेश्वरग्राह्यं २०.८६
विस्मिताः प्राणिनः सर्वे ४.८
वीरशैवमहातन्त्र १.३०
वीरशैवशिखारत्नं १.१८
वीरशैवास्तु षड्भेदाः ५.२२
वीरसिद्धान्तनिर्वाह ४.८
वीशब्देनोच्यते विद्या ५.१६
वृक्षस्थं पत्रपुष्पादि २०.४१
वृत्तिशून्ये स्वहृदये १४.३३
वेदधर्माभिधायित्वात् ५.१२
वेदमार्गविरोधेन १.२६
वेदवेदान्तसर्वस्वं २०.८५
वेदशास्त्रपुराणेषु ६.५८
वेदसिद्धान्तयोरैक्य ५.१३
वेदः प्रधानं सर्वेषां ५.५
वेदानुसरणादेषां ५.५
वेदान्तजन्यं यज्ज्ञानं ५.१८
वेदान्तवाक्यजां विद्यां १२.३६
वेदान्तसारसर्वस्व २.३०
वेदान्तिनो जगन्मूल १.२
वेदैकदेशवर्तित्वं ५.६
वेदैकदेशवर्तिभ्यः ५.७
वेधारूपा क्रियारूपा ६.१८
वैराग्यज्ञानयुक्तानां ६.४४
वैराग्यसंपदो मूलं ११.५५
व्यतिरेकात् स्वरूपस्य १८.४४
व्यावर्तमानो मिथ्येति १९.४८
व्यासादीनां क्षणं कुर्वन् ३.५९
व्योमवत् परमं ब्रह्म २०.६३
व्रजन् कैलासमचलं २१.१५
शक्तिपातं समालोक्य ६.१०
शक्तिप्रधानं वामाख्यं ५.११
शब्दस्पर्शादिसम्पन्ने १०.१४
शब्दादयोऽपि विषया २०.१९
शमीगर्भे यथा १०.५९
शमो दमो विवेकश्च १३.१५
शम्भोराह्वानसन्तोष ३.६७
शम्भोरेकत्वभावेन १४.१८
शम्भोः प्रियः स ९.५
शम्भोः शिवप्रसादेन १८.५९
शरणस्थलमाख्यातं ५.२४
शरणस्थलमाश्रित्य १९.२
शरणाख्यस्य भूयोऽस्य १४.१
शरणाख्यः शिवेनैक्य १४.२
शरण्यः सर्वभूतानां ११.५९
शरीरभूतादेतस्मात् १०.५४
शरीरमेव चार्वाकै ५.४५
शरीरात् पृथगात्मान ५.६०
शरीरात्मविवेकेन ५.५५
शरीरेन्द्रियबुद्धिभ्यो ५.५८
शाखाशिखरसंलीन ४.१८
शातकुम्भमयस्तम्भ ३.५
शान्तत्वात् प्राणवृत्तीनां १७.२७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शान्तो दान्तस्तपश्शील: १७.६०
शासनीयो भवेद्यस्तु १७.५८
शास्त्रं तव मुखोद्गीर्णं २०.७८
शास्त्रं तु वीरशैवानां ५.२३
शास्त्राभ्यासाद्धि यत्नेन १६.२९
शिखायामेकमेकास्यं ७.५४
शिर ईशानमन्त्रेण ७.२१
शिरसा धारयेद्यस्तु ९.६९
शिलामृद्दारुसंभूत १५.४३
शिव इत्यक्षरद्वन्द्वं ८.१०
शिव इत्युच्यते ८.८
शिव एव जगत्सर्व १९.८४
शिव एव परं तत्त्वं १७.७६
शिव एव परं पात्रं ९.८७
शिव एव समस्तानां १३.१०
शिवक्षेत्रोत्सवमहा ९.४७
शिवज्ञानकरं वक्ष्ये ५.२
शिवज्ञानकुठारेण १३.२०
शिवज्ञानप्रदं ८.८४
शिवज्ञानमहासिन्धु १.१८
शिवज्ञानमृगेन्द्रस्य १२.१७
शिवज्ञानसमापन्न १४.२२
शिवज्ञानसमायोगा १४.२३
शिवज्ञानं महाघोर ९.५४
शिवज्ञाने समुत्पन्ने १३.११
शिवज्ञाने समुत्पन्ने १३.२१
शिवज्ञानैकनिष्ठस्य १६.४७
शिवतत्त्वपरिज्ञान १.२४
शिवतत्त्वपरिज्ञान २.२९
शिवतत्त्वस्वरूपेण १९.८१
शिवतत्त्वात् परं नास्ति ८.२
शिवतत्त्वात् समुत्पन्नं १०.६६
शिवतत्त्वावलम्बी १६.५१
शिवत्वं भावयेद्यत्र १५.२८
शिवदर्शनमप्याहु: १६.३३
शिवदर्शनसम्पत्ति १४.२४
शिवद्वेषी स विज्ञेयो १३.१८
शिवधर्मोत्तरं नाम ४.४३
शिवध्यानपरं शान्तं ६.४
शिवध्यानं तु संसार १२.३१
शिवनामरता वाणी ९.१८
शिवनिन्दाकरं दृष्ट्वा ९.३६
शिवपादाम्बुसंस्पर्शात् ९.४५
शिवपूजाङ्गभावेन १७.४९
शिवपूजापरो भूत्वा ९.३९
शिवप्रसादमाहात्म्य ११.५
शिवप्रसादसम्पत्त्या १८.५८
शिवप्रसादहीनस्य ११.७१
शिवप्रसादं यद् द्रव्यं ११.७
शिवप्रसादं स्वीकुर्वन् ११.८
शिवप्रसादाज्जीवोऽयं ५.५२
शिवप्रसादे सति ११.७७
शिवप्राप्तिसमुत्कण्ठा १३.३२
शिवप्रीतिकराण्येव १६.७३
शिवभक्तिरसासक्त: २१.३६
शिवभक्तिर्न सन्देह ९.१०
शिवभक्तिविहीनस्य ११.४९
शिवभक्तिविहीनानां ९.७६
शिवभक्तिविहीनानां ११.५१
शिवभक्तिसमावेशे ११.५५
शिवभक्तिसुधासिन्धु १.१४
शिवभक्ति: परो धर्म: १३.१६
शिवभक्ति: स्थिरा यस्मिन् १.१९
शिवभक्तो महातेजा: ९.२७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवभावनया युक्त:	१७.८
शिवभावनया सर्वं	१६.७०
शिवभावयुतो योगी	१७.८५
शिवभावे समुत्पन्ने	१७.८४
शिवभावे स्थिरे जाते	१९.८५
शिवमभ्यर्थयन् मोक्षं	११.६०
शिवमेव जगत् पश्यन्	१७.८०
शिवयात्रोत्सवं नित्यं	९.४६
शिवयोगरतो योगी	१६.१०
शिवयोगविशेषज्ञ	२०.७३
शिवयोगसमाधिश्च	१२.५
शिवयोगिनि यद् दत्तं	९.६३
शिवयोगिनि सन्तृप्ते	९.९१
शिवयोगीति नामोक्ति:	१.२१
शिवयोगीति विख्यात:	१.१३
शिवयोगी महत्पात्रं	९.८९
शिवयोगी शिव: साक्षा	९.६६
शिवयोगी शिव: साक्षा	९.८८
शिवरुद्रमहादेव	२.६
शिवरूपादिचिन्ता	९.१६
शिवलिङ्गप्रसादस्य	९.७७
शिवलिङ्गस्य पूजा	९.७
शिवलिङ्गार्चनादेव	११.३३
शिवलिङ्गे शिवाचार्ये	९.७९
शिवशक्तिमयं ब्रह्म	२०.३९
शिवशक्तिसमायोगं	११.३२
शिवशक्तिसमुत्पन्ने	५.३२
शिवशब्दाभिधेयो	८.९
शिवशास्त्रविशेषज्ञ	२१.३१
शिवसंस्कारयुक्तेषु	१०.३७
शिवसंस्कारयोगेन	१०.३२
शिवसंस्कारयोगेन	१०.३३
शिवसंस्कारहीनानां	१०.३६
शिवसंस्कारिण:	१०.३४
शिवसिद्धान्ततत्त्वज्ञं	६.३
शिवसिद्धान्तनिर्णेता	१.१७
शिवस्तिष्ठति सर्वात्मा	१०.७७
शिवस्तुतिरसास्वाद	१०.१६
शिवस्तोत्रमिदं सर्वं	१४.२६
शिवस्त्वमिति निर्दिष्टो	१७.६६
शिवस्थानानि तीर्थानि	९.४६
शिवस्य दर्शनात् पुंसां	१६.३३
शिवस्य नाम कीर्तिं च	६.१७
शिवस्य परकायस्य	१७.२४
शिवस्य पररूपस्य	१७.३४
शिवस्य परिपूर्णस्य	१९.७६
शिवस्य परिपूर्णस्य	१९.७७
शिवस्य बोधलिङ्गं यद्	११.२६
शिवस्य लिङ्गरूपस्य	११.६
शिवस्य सर्वगत्वेऽपि	१०.६३
शिवस्येव यतस्तस्मा	१६.४४
शिवस्वीकृतमन्नाद्यं	११.१६
शिवं भावय चात्मानं	१७.७९
शिवं विना तथान्येषां	१३.३५
शिवं विश्वं गुरुं साक्षाद्	१४.३५
शिवं शिवङ्करं शान्तं	७.३५
शिव: शरीरयोगेऽपि	१७.७
शिव: सर्वगतश्चापि	१०.५९
शिवाख्यं ज्ञायते येन	१५.४९
शिवाख्यं ज्ञायते येन	१९.४९
शिवाख्यं परमं ब्रह्म	१९.६९
शिवारामपरिज्ञान	१.२२
शिवारामसुधासिन्धु	४.६
शिवागमार्थविज्ञानं	९.२४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवागारमिदं प्रोक्तं १९.५४
शिवाग्न्यादिसमुत्पन्नं ७.३
शिवाचारे शिवध्याने १७.६२
शिवात्मकमिदं सर्वं १६.३१
शिवात्मकं विश्वमिदं १०.७९
शिवात्मध्यानसम्पत्तिः १२.२१
शिवात्मबोधैकरतः १३.३७
शिवात्मैक्यमहाबोध ४.५३
शिवादन्यज्जगज्जालं १८.५८
शिवादन्यज्जगन्मिथ्या १७.६६
शिवादन्यत्र विज्ञाने १३.३३
शिवाद्यादिसमुत्पन्न १.१०
शिवाद्वैतपरं ज्ञानं १६.७७
शिवाद्वैतपरानन्द ४.४२
शिवाद्वैतपरिज्ञान ४.५
शिवाद्वैतपरिज्ञान १८.६८
शिवाद्वैतपरिज्ञाने १४.१७
शिवानन्दपरिस्फूर्ति १४.१५
शिवानन्दमहासिन्धु १४.४
शिवानन्दं समासाद्य १३.७
शिवानन्दे समुत्कण्ठो १०.१४
शिवापकर्षसंप्राप्तौ १०.२०
शिवाभिधं परं ब्रह्म २.८
शिवाभिधं परं ब्रह्म १२.३५
शिवाभिधानं चिन्मात्रं ११.२७
शिवाभिधानं यत्प्रोक्तं ७.१
शिवाय शिवभक्ताय ९.८५
शिवाराधनबुद्ध्यैव १६.८
शिवार्चनपरो नित्यं ७.४५
शिवार्चा कर्म विज्ञेयं ९.२२
शिवार्थकार्यसम्पन्न १०.१५
शिवार्थं भावयन् १७.५७
शिवार्थं मुक्तजीवश्चे ९.३५
शिवार्थे देहसंशोष ९.२२
शिवावेदकरे ज्ञाने १५.२९
शिवाश्रितानां जन्तूनां ११.५२
शिवाश्रितेषु ते शैवा ५.२०
शिवासक्तपरानन्द १३.१३
शिवासक्तेन मनसा १७.६५
शिवाहितमना योगी १७.१८
शिवाहितेन्द्रियस्यास्य १७.१९
शिवेन चिद्व्योम १४.४४
शिवेन विहितो यस्मा १६.६०
शिवे निवेश्य सकलं १६.७४
शिवे निश्चलभावेन १७.५०
शिवेनैक्यं समापन्न १४.६
शिवे प्राणो विलीनोऽपि १७.३०
शिवे मनसि संलीने १७.२०
शिवे यत्तदिदं १७.३९
शिवे विलीनचित्तस्य १९.४६
शिवे विलीनः सर्वात्मा १७.३२
शिवे विश्वमिदं सर्वं १४.३०
शिवैकज्ञानयुक्तस्य १६.३७
शिवैकत्वमुपेतस्य २०.१७
शिवैकनिष्ठः सर्वात्मा १०.२०
शिवैकनिष्ठाहित १३.३७
शिवैकभावनापन्न १४.१६
शिवैकभावयुक्तानां १४.१९
शिवैकभाजनात्मत्वा १४.२८
शिवैकीभूतसर्वात्मा १७.३३
शिवैक्यज्ञानरूढस्य १८.७५
शिवोत्कर्षप्रमाणानां १०.१६
शिवो भवति निर्धूत १७.८
शिवोक्तधर्मनिष्ठा १०.३६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

शिवोपचारनिरत:	९.१९	शृङ्गारोद्यानसंरम्भ	३.३३
शिवो महेश्वरश्चेति	५.१९	शृणोति शुद्धमनसा	२१.२
शिवोऽहमिति भावस्य	१७.८४	शेषत्वं नैव शेषित्वं	२०.७०
शिवोऽहमिति भावेन	१४.५	शैवतन्त्रमिति प्रोक्तं	५.८
शिवोऽहमिति भावेन	१७.७८	शैवं पाशुपतं सोमं	५.८
शिवोऽहमिति भावोऽपि	१६.१६	शैवागमेषु वेदेषु	८.४३
शिवोऽहमिति यस्यास्ति	१८.४३	शैवागमेषु वेदेषु	८.१७
शिवोऽहमिति या बुद्धि	१६.३१	शैवागमेषु सर्वेषु	१.२८
शिवोऽहमिति यो बुद्ध्यात्	१६.४८	शैवी भक्ति: समुत्पन्ना	५.२६
शिवो हि परम: साक्षात्	१६.५	शैवैर्माहेश्वरैश्चैव	५.१९
शिष्यस्थलं तत: प्रोक्तं	२०.३	शोषयेत् पुरुषेणैव	७.१५
शिष्यश्चोदकशब्देन	१९.७	श्रद्धा धूपो महाज्ञानं	१२.१७
शिष्टौदनस्थलं तत:	१७.४	श्रवणं कीर्तनं शम्भो	९.२
शिष्यस्य प्राणमादाय	६.२४	श्रीवेदागमवीरशैव	२१.५४
शिष्याणां हृदयालेख्यं	१५.१९	श्रीशैलस्योत्तरे भागे	३.८३
शिष्यो नियुज्यते येन	१५.१३	श्रीसिद्धान्तशिखामणि	२१.५४
शीलमित्युच्यते	१३.३६	श्रुतिस्मृतिभ्यामिह	७.६७
शीलं शिवैकविज्ञानं	१३.३२	श्रुतिहीना यथा	१६.१९
शुकसंसत्समारब्ध	४.२४	श्रुत्वा मे मोदते	२०.७५
शुक्तौ रजतवद्	१९.३७	श्रुत्वा लिङ्गाद् वचन	२१.५२
शुद्धमुक्ताफलाभास	२.१०	श्रुत्वा श्रुत्वा गुरो	१७.७०
शुद्धाचारे शुद्धभावो	१६.८४	श्रूयते यस्तु पार्श्वस्थै	८.२७
शुद्धा नियमसंयुक्ता:	११.५६	श्वेतस्य मम भक्तस्य	३.७५
शुद्धान्त:करणे जीवे	५.५३	श्वेता: षोडश संजाता:	७.५०
शुद्धान्त:करणो देही	५.३१	षट्त्रिंशत्तत्त्वघटितं	१९.५४
शुद्धोपाधि: परा माया	५.४४	षट्त्रिंशद्धारयेन्मूर्ध्नि	७.५५
शुभमासे शुभतिथौ	६.१५	षट्स्थलोक्तसदाचार	१५.१
शुश्रूषुरेव सर्वेषां	१७.८१	षडङ्गुलायतं मान	७.३६
शून्यकल्पं पराकाशं	२०.६८	षडध्वातीतयोगेन	१५.१०
शून्यज्ञानादिसङ्कल्पे	२०.६९	षडष्टवदनान् कण्ठे	७.५५
शून्ये चिदम्बरे स्थाने	१८.४७	षण्मासान् वत्सरं वापि	६.७
शृङ्गारतटिनीतुङ्ग	३.३२	स एव तुर्य: परि	१२.४८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सकलो गुरुरूपेण	११.२०	सदा संतुष्टहृदय	१०.१८
सकृदुच्चारमात्रेण	८.३९	सदेहोऽतिभ्रमस्तस्य	१६.५३
सकृदुच्चारणादेव	८.४१	सद्य: कृतार्थयितु	४.५४
स चाभ्यासवशा	१७.३१	सद्य: सिद्धिकरं पुंसां	४.५३
सच्चिदानन्दजलधौ	२०.१३	सद्येन वामदेवेन	७.१७
सच्चिदानन्दरूपस्य	८.११	सद्योजाताद्विभूतिश्च	७.८
सच्चिदानन्दरूपाय	१.१	सद्रूपं वाप्यसद्रूपं	२०.५८
सच्चिदानन्दरूपाय	२.१	स धर्म: सर्वलोकाना	१६.५८
सच्चिदानन्दसर्वस्व	२१.४६	स धारयेत् सर्वमला	६.६३
संचरत्प्रमथश्रेणी	३.८	सन्देहवनसन्दोह	१५.१७
संजाता पाशविच्छित्ति	२०.७६	सप्तकोटिषु मन्त्रेषु	८.४
सतीव रमणे यस्तु	१३.५	सप्तमातृपरं मिश्रं	५.११
स तु कालवशेनैव	२१.२२	सभान्तरगतं तन्त्र	३.६६
स तु रामशराविद्धः	२१.२३	समबुद्ध्या चरेद् योगी	'१५.५८
सत्तात्मनाऽनुवृत्तं	१९.४८	समर्थौ सर्वकार्येषु	२.३२
सत्तानन्दचिदाकारं	१७.५५	समर्प्य विषयान्	१७.४६
सत्तानन्दचिदात्मके	१७.८६	समर्प्य सकलान्	२०.१३
सत्तानन्दपरिस्फूर्ति	६.३३	समलोष्टाश्मकनका	११.३९
सत्ता प्राणमयी शक्ति:	१२.१२	समवृत्तिर्भवेद् योगी	१५.५४
सत्त्वं हि ज्ञानयोगस्य	१३.१४	समस्तजगदण्डानां	२०.३५
सत्यमाभरणं प्रोक्तं	१२.१६	समस्तजगदात्मापि	१०.७१
सदाकालं वसत्येव	९.६२	समस्तजगदात्मापि	२०.४३
सदाचारप्रिय: शम्भु:	१६.६६	समस्तजगदाधार	२१.४७
सदाचारं विना तस्य	१६.६६	समस्तदेवकैङ्कर्य	३.८०
सदात्मनि यथा शुक्तौ	१७.७७	समस्तदेवताचक्र	३.१४
सदानन्दमय: साक्षात्	२०.३१	समस्तभुवनाधीश	३.६२
सदा लिङ्गैकनिष्ठानां	११.६८	समस्तलोकनिर्माण	२.१२
सदाशिवमुखानेक	२१.४७	समस्तलोकनिर्माण	३.२४
सदाशिवमुखाशेष	१.५	समस्तलोकसंदोह	४.४९
सदाशिवमुखाशेष	२.२	समस्तलोकान्निर्मातुं	२.१६
सदा शिवार्चनोपाय	१६.१०	समस्तवेदवेदान्त	२१.४५
सदा शिवैकनिष्ठानां	९.३३	समस्तवेदशास्त्रादि	२०.७३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समस्तशास्त्रसारज्ञं	२१.१४
समस्तसिद्धसन्तान	४.७
स महावीरशैवानां	१.२४
समानमधिकं चापि	११.७६
समाप्तं सकलं यस्य	९.९३
समासीनं मुनिवरं	४.३७
समा: शत्रौ च मित्रे च	११.४०
संमिश्रोपाधय: सर्वे	५.४२
स मुक्तो देहयोगेऽपि	१२.४६
समुज्ज्वलजटाजालै	४.२८
सम्पत्सु कर्ममूलासु	५.७१
सम्पूज्य तं यथाशास्त्रं	४.३६
सम्पूर्णचन्द्रसौभाग्य	३.२७
सम्भावयंस्तथा चान्या	३.६१
सम्भूय लयमायान्ति	१८.३२
सम्यग् ज्ञानप्रद:	१५.२१
सम्यग् ज्ञानाग्नि	१६.५१
स यथार्थस्तदन्यस्य	१७.७६
स रौद्रधर्मसंयुक्त	७.४९
सर्वगत्वनिरासश्च	१०.६
सर्वगत्वं महेशस्य	१०.६०
सर्वगत्वे महेशस्य	१०.५७
सर्वगामि तमो हन्ति	१५.२४
सर्वगोऽपि स्थित:	१०.५८
सर्वचिद्रूपविज्ञाना	११.३५
सर्वज्ञ वद मे साक्षा	४.५२
सर्वज्ञस्य महेशस्य	१०.५५
सर्वज्ञं सर्वगं शान्तं	२.५
सर्वज्ञ: प्रेरक: शम्भु	५.४३
सर्वज्ञ: सकला विद्या	२.१५
सर्वज्ञ: सर्वकर्ता च	५.४६
सर्वज्ञ: सर्वकर्ता च	१९.७९
सर्वज्ञ: सर्वग: साक्षी	२०.३२
सर्वज्ञ: सर्वशक्तिश्च	२.१८
सर्वतत्त्वपरिगतं	१२.२२
सर्वतत्त्वोपरि प्रोक्तं	१८.३३
सर्वतन्त्रप्रयोगज्ञं	६.३
सर्वतोमुखसम्पन्नं	१९.६७
सर्वत्र संचरेद् योगी	१५.५९
सर्वप्राणिगतो भाति	१९.६३
सर्वमङ्गलमाङ्गल्यं	९.६८
सर्वमङ्गलसौभाग्य	३.११
सर्वलक्षणसम्पन्ने	६.२३
सर्वविद्याविशेषज्ञौ	२.२८
सर्ववेदानुसारित्वा	५.७
सर्ववेदार्थरूपत्वात्	५.८
सर्वसंविन्मयं भाति	१९.९५
सर्वसिद्धिकरं पुंसां	९.६८
सर्वसिद्धिकरं पुंसां	११.४३
सर्वस्वं वीरशैवानां	१.२७
सर्वं कर्मार्चनं	१७.५६
सर्वं शिवमयं विश्वं	११.७४
सर्वाकारत्वमाख्यातं	२०.४७
सर्वाकारे चिदानन्दे	२०.५२
सर्वाङ्गोद्धूलनं	७.३०
सर्वात्मना प्रपन्न	११.५९
सर्वात्मना शिवापत्ति:	११.५७
सर्वात्मनि परे तत्त्वे	२०.६२
सर्वात्माऽपि परि	१०.७५
सर्वाद्वैतविचारस्य	१०.३८
सर्वाधिष्ठातृक:	१८.५६
सर्वानप्यर्थविषयान्	२०.१२
सर्वानुग्राहक: शम्भु:	१८.६१
सर्वान्तर्गतमात्मानं	३.५६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सर्वार्थसाधकज्ञान	१५.२५
सर्वालङ्कारसंयुक्तं	८.२६
सर्वासामपि विद्यानां	४.३१
सर्वे च ज्ञानयोगेन	६.४६
सर्वे ते जपयज्ञस्य	८.३०
सर्वेन्द्रियगतं सौख्यं	१७.५७
सर्वेन्द्रियनिरूढोऽपि	१७.१८
सर्वेन्द्रियप्रवृत्त्या च	१७.२३
सर्वेन्द्रियाणां व्यापारे	१९.८०
सर्वेषामपि जन्तूनां	८.३९
सर्वेषामपि यज्ञानां	११.६०
सर्वेषामात्मभेदानां	१८.२९
सर्वेषां देहिनामन्त	१९.६२
सर्वेषां प्रेरकत्वेन	१८.२७
सर्वेषां वीरशैवानां	६.५५
सर्वेषां शैवतन्त्राणा	१.३१
सर्वेषु वर्णाश्रम	७.६५
सर्वोत्कृष्टं स्वमात्मानं	१५.६६
सर्वो लोको विस्मितो	२१.५३
स शम्भुर्भगवान्	२.१३
ससर्जात्मसमप्रख्यान्	२.२५
ससंस्कारेषु लिङ्गेषु	१०.४८
सहचारी सदाकाले	१०.१९
सहजं चेति निर्दिष्टं	५.३०
सहजं चेति सर्वेषां	९.८०
सहजं दानमुत्कृष्टं	९.८४
सहभोजनमाख्यातं	१४.३४
सहभोजनमित्येषां	१४.३
संवित्साक्षात्कृतिं	२०.२७
संविदेव परा काष्ठा	१९.७१
संविद्व्योम्नि शिवे	१९.९७
संविल्लिङ्गपरामर्शी	१२.१०
संसारकालरात्रिस्तु	१४.१२
संसारचक्रनिर्वाह	११.७५
संसारतिमिरच्छेदी	१५.२६
संसारतिमिरच्छेदे	१३.८
संसारतिमिरोन्माथि	१५.१४
संसारदु:खविच्छेद	५.७६
संसारनाटकभ्रान्ति	२१.४५
संसाररोगनिर्माथी	१५.२०
संसारविषकान्तार	३.२६
संसारविषकान्तार	१७.४४
संसारविषमूर्च्छालु	३.१२
संसारविषवृक्षस्य	१२.३०
संसारवैद्य सर्वज्ञ	२१.४६
संसारसर्पदष्टानां	४.४८
संसारहेयताबुद्धि	५.६१
संसारार्त: शिवं	१३.९
संसाररोरगदष्टानां	१३.१०
साक्षात्करोति या	१५.२२
साक्षात्कृतपरानन्द	१९.२६
साक्षात्कृतमहा	२०.७८
साक्षात्कृतशिव:	१७.७२
साक्षात्कृतं परं	१०.४३
साक्षात्कृते परे	१८.६४
साक्षान्मोक्षप्रद:	१०.२४
साक्षिणी सर्वभूतानां	२०.३०
सांख्यं योग: पाञ्चरात्रं	५.४
साङ्गा न्यूना च या	९.१५
सा दीक्षा त्रिविधा प्रोक्ता	६.१२
सानन्दवरयोगीन्द्र	३.४
सा पुनर्भिद्यते त्रेधा	९.१६
सा भक्तिर्द्विविधा ज्ञेया	९.६
साभ्यन्तरा भक्तिरिति	९.९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

सामरस्यात् परात्म	१८.२८
सामरस्यान्महायोगी	१९.१७
साम्योक्तिं यो न सहते	१०.९
सा यत्र वर्तते साक्षात्	११.४७
सा यस्मिन् वर्तते	९.९
सा सा पूजा महेशस्य	१४.२७
सा सा प्रतीतिमात्रेण	१९.३४
सिक्थे सिक्थेऽश्वमेधस्य	९.७४
सिद्धं भक्तस्य माहात्म्यं	११.४५
सिद्धान्ताख्ये महातन्त्रे	५.१४
सिद्धाः स्वस्वपदे	१५.३६
सिद्धेन वाप्यसिद्धेन	१६.७७
सिद्धे साध्ये चिरेणापि	१९.४१
सिद्ध्या पञ्चाक्षरस्यास्य	८.४५
सिंहासने शुद्धदेशे	९.७
सुकुमारदलच्छाया	४.२५
सुकृतं दुष्कृतं चापि	११.५१
सुकृती दुष्कृती वापि	१४.१९
सुकृते परिपक्वे	२१.१९
सुखदुःखादिभावेषु	२०.५७
सुखस्फूर्तिस्वरूपेण	१८.६७
सुखानि सुखचिद्रूपे	१७.३६
सुवर्णब्रह्मसूत्राङ्क	३.२१
सुषुप्तस्य यथा वस्तु	१८.६५
सुहृत्सु बन्धुवर्गेषु	५.७५
सूक्ष्मरन्ध्रं विजानीयात्	१२.२७
सूक्ष्माण्यपि च तैः	१५.४८
सूर्यस्योदयमात्रेण	१७.७२
सूर्योदयेऽपि किं	१६.५६
सृष्टिं विधेहि भगवन्	२.२४
सेवेत परमाचार्यं	६.७
सेव्यप्रसादिकं	१८.४
सेव्यो गुरुः समस्तानां	१८.६९
सेव्यो गुरुः स्मृतो	१८.७०
सैषा विद्या परा ज्ञेया	१४.४३
सोऽपि गच्छेच्छिवस्थानं	८.३५
सोमनाथाभिधानस्य	२१.४२
सोमेश्वरमहालिङ्गात्	४.१
सोमेश्वराभिधानस्य	३.८४
सोऽलिङ्गी स दुराचारी	९.४१
स्थलभेदा नव	१७.२
स्थलभेदास्त्वया	२०.१
स्थलभेदाः प्रकीर्त्यन्ते	१५.३
स्थलभेदाः समाख्याताः	१९.१
स्थलमेतत्समाख्यातं	१३.३
स्थलानां नवकं चैक्य	२०.२
स्थलानां नवकं प्रोक्तं	१६.१
स्थलानां नवकं प्रोक्तं	१८.२
स्थलानि तानि चोक्तानि	१७.१
स्थानभूतो विमर्शो	२०.२९
स्थानं वा तत्परिं	९.३६
स्थानेषु पञ्चदशसु	७.३१
स्थापयिष्यसि भूलोके	३.८६
स्थाप्यतां सर्वलोकेषु	२०.८३
स्थिरमङ्गलभृङ्गार	३.३४
स्थिरमद्य शिवज्ञानं	४.४७
स्थिरयौवनलावण्य	३.३१
स्थिरयौवनसौरभ्य	३.६३
स्थूलसूक्ष्मपदातीते	१५.४७
स्थूले क्रियासमापत्तिः	१५.४७
स्नातं शुक्लाम्बरधरं	६.१६
स्नानकाले करौ पादौ	७.२०
स्नानेषु वारुणाद्येषु	७.२३
स्पर्शनं पापशमन	११.४३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

स्पर्शलक्षितवैडूर्य	३.७
स्फाटिकं शैलजं वापि	६.२२
स्फुरत्सौदामिनीकल्पैः	४.२८
स्मयमानः परानन्दे	१५.५५
स्मृतीतिहासकल्पेषु	७.४३
स्वकर्मणा न लिप्येत	१४.२२
स्वकर्मपरिपाकेन	५.५२
स्वकर्ममुक्तः शिव	११.७७
स्वच्छन्दचरितो	२०.७४
स्वच्छन्दचारी लोके	४.१२
स्वच्छन्दचारी सर्वज्ञ	१७.२३
स्वच्छन्दाचारसन्तुष्टो	१५.५२
स्वच्छन्दाचाररसिकः	२१.३
स्वजातिकुलजान्	१०.३१
स्वतन्त्रः सर्वकृत्येषु	१५.६५
स्वपरज्ञानविरहात्	२०.५४
स्वप्नजातं यथा	१९.४५
स्वप्नवज्ज्ञाननिष्पत्त्या	१९.४४
स्वप्ने दृष्टं यथा वस्तु	२०.२४
स्वप्रकाशमनिर्देश्य	१२.२२
स्वप्रकाशविराजन्त	२.५
स्वभावो देहिनां	१९.३५
स्वमार्गाचारनिरताः	९.२९
स्वमार्गाचारवर्तिभ्यः	९.४९
स्वमार्गाचारविमुखै	९.३०
स्वयमाचरते यस्मा	१५.९
स्वयमेव स्वयं भूत्वा	१५.५७
स्वयमेव स्वयं भूत्वा	१५.६४
स्वयं चरं परं चेति	१५.६
स्वरूपज्ञानसम्पन्नो	१५.५७
स्वरूपमादधे किञ्चित्	२.८
स्वरूपं पृथगेतेषां	१९.५
स्वर्गं वा नरकं वापि	१८.१५
स्वर्गे वा यदि वा भूमौ	५.७०
स्वशक्तिवासना	१७.३०
स्वस्थं मनस्तथा कृत्वा	९.८
स्वस्य सर्वस्य लोकस्य	१४.२९
स्वस्वरूपतया ते तु	११.३६
स्वस्वरूपं शिवाकारं	१६.५४
स्वात्मज्योतिषि बोधेन	२०.१५
स्वात्मनैवास्थितो	२०.२०
स्वात्मलीनं जगत्कार्यं	२.७
स्वात्मैकबोधात्तन्नाशे	२०.२२
स्वानुभूतिप्रमाणस्थं	१९.६८
स्वानुभूतिप्रमाणेन	१५.४३
स्वान्तःस्थशिवलिङ्गस्य	१२.३२
स्वाभाविकमहैश्वर्य	३.६४
स्वेच्छया संचरेद्	१५.७०
स्वेच्छाकृतत्रिलोकाय	१.६
स्वेच्छाविग्रहयुक्ताय	१.६
स्वे महिम्नि विलीनस्य	१८.५३
स्वेष्टलिङ्गे महादेवं	१०.६२
स्वेष्टलिङ्गे यजन्	१०.६३
स्वेष्टलिङ्गे शिवाकारे	१०.४६
हस्तापादादिसाम्येन	११.२२
हंसरूपं परात्मानं	१२.२३
हारनीहारकर्पूर	४.२२
हारनूपुरकेयूर	३.३५
हास्यनृत्यं क्षणं पश्यन्	३.६०
हितमेव चरेन्नित्यं	९.५६
हूयमानाज्यसन्तान	४.२४
हृत्प्रदेशमघोरेण	७.२२
हृदाकाशगुहालीनो	१९.५५
हृदयेषु च भक्तानां	१०.७४
हेमारविन्दकलिका	३.५
हेमारविन्दनिष्यन्द	४.२०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिशिष्टम् – २

व्याख्योद्धृतानां वाक्यानाम् अकारादिसूची

१ वाक्यम्	२ मूलम्	३ व्याख्यायां परिच्छेदश्लोक संख्या
अंशो नानाव्यपदेशात् ।	ब्र. सू. २.३.४०	५.३३-३५
अकर्तरि च कारके संज्ञायाम् ।	पा. अ. ३.३.१९	१९.७
अकारान्तोत्तरपदो द्विगुस्त्रियामिष्टः ।	सि. कौ. सू. ७२८ बालमनोरमा	१.१., ८.२
अकारो वै सर्वा वाक् ।	ऐ.आ. २.३.६	२०.३९
अग्निरिति भस्म.....पशुपाशविमोक्षाय ।	अथ. शिर. उ. ५	७.३३-३४
अग्निर्यथैको......प्रतिरूपो बहिश्च ।	कठ. उ. ५.९	१९.६०-६३
अङ्कुरोऽभिनवोद्भिदि ।	अमर. २.५४	९.२२
अक्षराणामकारोऽस्मि ।	भ. गी. १०.३३	२०.३९
अङ्गस्थलं त्रिधा......त्रिधा भवेत् ।	अनु. सू. ४.५	५.२२, १४.४१
अङ्गुष्ठमात्रः पुरुषो....अमृतास्ते भवन्ति ।	श्वे. उ. ३.१३	१९.५६-५७
अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ।	कठ. उ. ४.१३	१२.६, १२.८, १२.४०-४१, १७.१४, १८.६, १९.५४-५५
अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।	कठ. उ. ४.१२	१०.७५, १२.४०-४१, १७-१४, १८.६, १९.५४-५५
अचिन्त्यं चाप्रमेयं च......मनःसङ्कल्पमस्तु ।	शि. सं. उ. १२	१५.४५
अचो ञ्णिति ।	पा.अ. ७.१.११५	२.९, ९.५०, ९.५२, ९.५४
अणोरणीयानहमेव......न चाम्बरं च ।	कै. उ. २०.२३	१८.२८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
अणोरणीयान् महतो....महिमानमात्मनः ।	कठ. उ. २.२०, श्वे. उ. ३.२०	१५.११, १८.६, १८.६२
अत इनिठनौ ।	पा.अ. ५.२.११५	१०.१५-२०, १६.५१
अतिदीर्घे जीविते को रमेत ।	कठ. उ. २.२८	१८.१२-१४
अतोऽस्मि लोके......पुरुषोत्तमः ।	भ. गी. १५.१८	९.५९
अत्याश्रमं पाशुपतं....निगमान्तेषु गीयते ।	का. आ., उ. भा., क्रि. पा. २.९	९.५०
अन्तः प्रकाशमानस्य......विदुः ।	सुप्र. आ. ७.१०	९.३९, १६.७१
अन्तर्धारणशक्तेन......शिवतत्त्वविदो वदन्ति ।	सदा. उ., उ. सं. द्वि.भा. पृ. ३७९	९.४८
अन्त्यजो वाऽधमो......पाशबन्धनात् ।	पार.आ. ११.२६	८.३८
अत्रायं पुरुषो...... ।	बृ. उ. ४.३.९	२.३-६
अथ चतुर्विधं......शतकल्पं च ।	बृ.जा.उ. २.३४	७.१३-१७
अथ प्रणवेन......विधिस्थानमिदम् ।	बृ.जा.उ. ४.२-३	७.१९-२१
अथ यदिदं......विजिज्ञासितव्यमिति ।	छां. उ. ८.१.१	१२.१४-१५, १९.५६-५७
अथ वक्ष्ये महादेवि......उपचारकैः ।	का.आ., उ.भा., क्रि.पा.६.२३-२४	१२.१४-१५
अथ वा मस्तकं......नाभिरेव च ।	बृ. जा. उ. ४.३०	७.३१-३२
अदीक्षासंस्कृता......भवति ध्रुवम् ।	का. आ., उ. भा., क्रि. पा. २.७-९	१६.११
अदीक्षासंस्कृता......सती ततः ।	का.आ., उ.भा., क्रि.पा.२.६८-६९	९.५६-५७
अद्वैतं परमार्थो......न विरुद्ध्यते ।	माण्डूक्य. ३.१८	२०.८
अनन्यप्रोक्ते......अणुप्रमाणात् ।	कठ. उ. २.८	१५.५८-६२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
अनन्यांश्चिन्तयन्तो......वहाम्यहम् ।	भ. गी. ९.२२	११.६२
अनादिमलसंश्लेष......उच्यते ।	वा. सं.	८.८
अनादिमलसंश्लेष......विभुः ।	वा. शु. आ.	८.८
अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः ।	सि. शि. ५.३४	१८.७
अनित्याशुचिदुःखानात्मसु....ख्यातिरविद्या ।	यो. सू. २.५	१२.३०-३१, १६.५६
अनीशश्चात्मा बध्यते भोक्तृभावात् ।	श्वे. उ. १.८	५.४६-४८
अनौपम्यमसादृश्याद्......तथेश्वरम् ।	स्वायं. आ., शैव. प. पृ. २९	२.३-६
अन्धो यथा......प्राप्तुमिच्छन्ति मूढधीः ।	सू. आ., उ. भा., क्रि. पा. ५.२६	१७.६५
अन्यश्च वृत्तयो......परात्मिकाः ।	पौ. आ., विन्दुपटल. ११-१२	१.१०
अन्योऽऽन्तर आत्माऽऽनन्दमयः ।	तै. उ. २.५	१३.२
अपश्यन्नन्धको......सापेक्षे ज्ञानकर्मणी ।	चं. आ., उ. भा., क्रि. पा. १२.६	१६.११
अपूर्णमन्यतारूपम् आणवमलम् ।	प्र. हृ., सू. ९	६.१३-१४
अप्रकाशोऽप्रवृत्तिश्च....विवृद्धे कुरुनन्दन ।	भ. गी. १४.१३	१३.१-३
अप्रमेयमनिर्देश्यं.....ध्रुवमव्ययमीश्वरम् ।	स्वायं. आ., शै. प. पृ. २९	२.३-६
अप्रमेयमनन्तत्वाद्...... ।	स्वायं. आ., शै. प. पृ. २९	२.३-६
अभयं सत्त्वसंशुद्धिः....अभिजातस्य भारत ।	भ. गी. १६.२-३	१३.१५-१६
अभूततद्भाव इति वक्तव्यम् ।	वार्तिकम्, सि. कौ. सू. २११७	४.२५-३३
अभ्यासवैराग्याभ्यां तन्निरोधः ।	यो. सू. १.१२	१०.२६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
अमरा निर्जरा......सुमनसः ।	अमर. १.७	१९.१३
अयमात्मा ब्रह्म ।	ऐ. उ. पृ. ३, बृ. उ. २.५.१९	१२.२२-१३, १२.३६, १३.२६, १६.१६
अयं शरीर आत्मा......अन्वारूढः ।	बृ. उ. ४.३.३५	१६.३२
अयं हृदि......संसारमोचकः ।	पञ्च. ब्र. उ. ४१	८.२३
अय्या......कूडलसङ्गमदेव (कन्नड) ।	चन्न. व. सं. १५४	७.३१-३२
अयुक्तः प्राकृतः......तामस उच्यते ।	भ. गी. १८.२८	१३.१९
अविद्या क्षेत्रमुत्तरेषाम् ।	यो. सू. २.४	१९.८८
अविद्यायामन्तरे......नीयमाना यथान्धाः ।	मुं. उ. १.२.८	१६.२८
अविद्यायां वहुधा......हीनतरं वा विशन्ति ।	मुं.उ. १.२.९-१०	१८.१६
अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः ।	यो. सू. २.३	१९.८८
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।	भ. गी. १३.१६	२.३-६
अशब्दमस्पर्शम्......प्रमुच्यते ।	कठ. उ. ३.१५	११.२७-२९, १५.८, १९.९, १९.६७-६९
अष्टमूर्त्यष्ट......अष्टावितीरिताः ।	बृ.जा.उ. १५-१६	७.३१-३२
अष्टावरणेषु......क्रमात् ।	का. आ., उ. भा., क्रि. पा. १.१२८	९.२७
असक्तबुद्धिः सर्वत्र......अधिगच्छति ।	भ. गी. १८.४९	१६.६१
असन्नेव स भवति......ततो विदुः ।	तै. उ. २.६	२.३-६
अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ।	यो. सू. २.३७	१६.५९
अस्पर्शयोगी वै......अभये भयदर्शिनः ।	माण्डूक्य. ३.३९	१८.३८
अस्पर्शयोगो नामायं.....प्रसिद्ध उपनिषत्सु ।	माण्डूक्य. ३.३९ - शाङ्करभाष्यम्	१८.३८
अस्मान् मायी......मायया तन्निरुद्धः ।	श्वे. उ. ४.९	९.५३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
अस्य महतो......अथर्वाङ्गिरसः ।	बृ. उ. २.४.१०	११.२७-२९
अस्य महतो......निःश्वसितानि ।	बृ. उ. २.४.१०, ४.५.११	१२.३३
अहं ब्रह्मास्मि ।	छां. उ. १.४.१०	५.३३-३५, १२.१३, १२.२२-२३, १२.२८, १२.३६, १३.१६, १४.२६, १५.१०, १५.१९, १५.२८-२९, १५.६७, १६.१६, १६.२५, १६.३२, १७.६६, १८.४९, १९.८४-८५
अहं सर्वस्य प्रभवः ।	भ. गी. १०.८	१२.२२-२३, २०.३२
अहं शब्दस्य......जीवात्मवस्तुनि ।	सू. सं.	१२.२२-२३
अहङ्कारं बलं दर्पं......ब्रह्मभूयाय कल्पते ।	भ. गी. १८.५३	१३.२०, २०.४०
अहङ्कारं बलं......आसुरीष्वेव योनिपु ।	भ. गी. १६.१८-१९	१३.१९
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ।	भ. गी. ३.२७	१९.३१
अहमादिर्हि देवानाम् ।	भ. गी. १०.२	१२.२२-२३, २०.३२
अहमस्मि प्रथमजा ऋतस्य ।	तै. उ. ३.१०.६	२.१२-१३, १०.३२, १२.२२-२३
अहमेको......न तं पश्यामि यो मम ।	देवी. आ. ४९	१४.९
अहमेव जगत्स्रष्टा......मम रूपकम् ।	पार. आ. ४.७	५.२२
अहिंसा सत्यम्......अभिजातस्य भारत ।	भ. गी. १६.२-३	१५.५८-६२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ।	यो. सू. २.३५	१६.५९
आकाशं लिङ्गमित्याहुः......लिङ्गमुच्यते ।	चं. आ., उ. भा., क्रि. पा. ३.५१	१२.३५
आकाशं लिङ्गमित्याहुः.....सिद्धिमात्मनः ।	चं.आ., उ.भा., क्रि.पा.३.५१-५३	१५.३२
आकाशशरीरं ब्रह्म......शान्तिसमृद्धम् ।	छां. उ. १.६.२	१८.४०
आकाशो वै नाम......स आत्मा ।	छां. उ. ८.१४.१	१५.२२, १९.६५-६६
आ गावो......भस्म सम्पादनीयम् ।	बृ.जा.उ. ३.५-३१	७.१३-१७
आचारलिङ्गमाख्यातं......प्रकीर्तितम् ।	सू.आ., उ.भा., क्रि.पा. ३.२८-३०	८.१४-१५
आचार्यः पूर्वरूपम्......विद्या सन्धिः ।	तै. उ. १.२-३	११.३५, १५.१२
आचार्यः आचारं......बुद्धिम् इति वा ।	नि. १.२	१५.९
आतोऽनुपसर्गे कः ।	पा. आ. ३.२.३	९.४-५, ९.८-९
आत्मा त्वं......शम्भो तवाराधनम् ।	शि. मा. पू. स्तो. ४	१४.२३, १७.५६
आत्मक्रीड आत्मरतिः.....ब्रह्मविदां वरिष्ठः ।	मुं. उ. ३.१.४	१५.२०
आत्मानमरणिं......दहति पण्डितः ।	कै. उ. १.११	१२.२९
आत्मनैवात्मानं पश्यति ।	बृ. उ. ४.४.२३	१६.३२
आत्मवत् सर्वभूतानि ।	सि. शि. १६.६२	१६.५९
आत्मानं रथिनं विद्धि......भोक्तेत्याहुः ।	कठ. उ. ३.३-४	१८.१०
आत्मा वा अरे द्रष्टव्यः......सर्वं विदितम् ।	बृ. उ. २.४.५	५.३१, १६.३२
आत्मा वा इदमेक एवाग्र आसीत् ।	ऐ. उ. १.१.१	१९.५३
आत्मैवेदं सर्वम्......कामचारो भवति ।	छां. उ. ७.५.२	१५.५७, १६.२४, १९.५३
आत्मैवेदमग्र आसीत् ।	बृ. उ. १.४.१	१९.५३
आदौ नमः......षडक्षरी ।	चं. आ., उ. भा., क्रि. पा. ८.५	८.७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
आदौ नमः......सर्वश्रुतिशिरोगतः ।	चं. आ., उ. भा., क्रि. पा. ८.५	८.७
आधारे कनकप्रख्यं......प्रकीर्तितम् ।	चं. आ., उ. भा., क्रि. पा. ३.३३	६.४०
आधारे दहरेऽव्यक्ते....तदन्तर्धारणं विदुः ।	सदा. उ., उ. सं., पृ. ३७८	६.३९
आनन्दं ब्रह्मणो......न विभेति कुतश्चन ।	तै. उ. २.९	१५.४९, १९.८
आनन्दं ब्रह्मेति व्यजानात् ।	तै. उ. ३.६	१.१, ११.२७-२९, १४.४, १५.४९, १९.८, १९.६७-६९
आनन्दो ब्रह्मेति......प्रयन्त्यभिसंविशन्ति ।	तै. उ. ३.६	१२.३४, १४.४
अनायः पुंसि जालं स्यात् ।	अमर. २.२७२	११.३७-३८
आनीदवातं स्वधया तदेकम् ।	ऋ.वे. १०.१२९.२	१२.१२, १९.४८
आपूर्यमाणम्......न कामकामी ।	भ. गी. २.७०	२०.१८
आपो वा इदं......सर्वा भूतान्यापः ।	तै. आ. ७.२२	१६.२१
आश्चर्यो वक्ता कुशलोऽस्य लब्धा ।	कठ. उ. २.७	१५.९, १५.२०, १७.५८
आसीनो दूरं......याति सर्वतः ।	कठ. उ. २.२१	१५.६८
आहारशुद्धौ......विप्रमोक्षः ।	छां. उ. ७.२६.२	१२.९-१०
इदं तु ते गुह्यतमं......मोक्ष्यसेऽशुभात् ।	भ. गी. ९.२	१६.२४
इदं शरीरं कौन्तेय....इति तद्विदः ।	भ. गी. १३.१	५.५९-६०
इदं सर्वं यदयमात्मा ।	बृ. उ. २.४.६	१३.१८
इन्द्रियाणां मनो......लयमाश्रयः ।	वराह. उ. २.८०	१७.४२
इन्द्रियेभ्यः परा......परा गतिः ।	कठ.उ. ३.१०-११	११.२७-२९
इमं मे गङ्गे यमुने सरस्वति ।	तै. आ. ७.१	१६.२१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
इष्टप्राणभावेषु लिङ्गधारणं वदन्ति ।	लिं. उ., उ. सं. पृ. ३११	५.३६
इष्टापूर्तं मन्यमाना......वा विशन्ति ।	मुं. उ. १.२.१०	१६.२८
इष्टं स्थूलतनोः......तनुत्रयगतं त्रयम् ।	चं. आ., उ. भा., क्रि. पा. ३.४५	५.३६
इह चेदशकद् बोद्धुं.....शरीरत्वाय कल्पते ।	कठ. उ. ६.४	११.६५
इहैव तैर्जितः......स्थितं मनः ।	भ. गी. ५.१९	१४.१८
ईक्षणं नयनं......अम्बकम् ।	वैजयन्ती	८.९
ईशानः सर्वविद्यानां......सदाशिवोम् ।	तै. आ. ७.४८	९.७२, १०.१०
ईशानः पुरुषश्चैवम्......कलाः स्मृताः ।	वा. शु. आ. ब्रह्म-भेदपटलः १९-२१	१९.६७-६९
ईशानाद्यानि......यथाक्रमम् ।	पार.आ., ११.१६	८.५-६
ईशानो भूतभव्यस्य ।	कठ. उ. ४.१३	९.७२
ईशावास्यमिदं सर्वम् ।	ईश. उ. १	९.८३, १३.१८
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।	भ. गी. १८.६१	९.७२, १९.५४-५५
ईश्वरः सर्वभूतानां.....सर्वभावेन भारत । तत्प्रसादात्.....शाश्वतम् ।	भ.गी. १८.६१-६२	१०.१०, ११.६३, १२.८
ईश्वरायैव कर्म करोमि न मम फलाय ।	भ. गी. ५.११ शां. भा.	१४.१७
उत्तयाङ्गे ललाटे....द्वात्रिंशत्स्थानमुत्तमम् ।	बृ. जा. उ. ४.१७-१९	७.३१-३२
उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।	कठ. उ. ३.१४	११.६५, १२.४७
उदकं च ।	उणादिसूत्रम् १९७	१९.७
उन्नो वीराँ अर्पय......भिषजां श्रृणोमि ।	ऋ. वे. २.३३.४	१३.३०
उपमा यत्र सादृश्यलक्ष्मीरल्लसति द्वयोः ।	कु. आ. ६	१.१५-१६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।	मम्मट	१५.२३-२४
उपेन्द्रवज्रा प्रथमे लघौ सा ।	आप्टे. पृ. ६५०	२.३३
ऊर्ध्वपुण्ड्रं भवेत्......त्रियायुषम् ।	बृ. जा. उ. ५.१	७.३८-३९
ऊर्ध्वं प्राणम्......विश्वे देवा उपासते ।	कठ. उ. ५.३	१२.६
ऊर्ध्वमूलोऽवाक्शाखः....नात्येति कश्चन ।	कठ. उ. ६.१	२०.२९
ऊर्ध्वमूलमधः शाखं......भूयः ।	भ. गी. १५.१-४	२०.२९
ऋक्सूत्रस्यास्य......तद्वत्कृपानिधेः ।	उल्लेखः – एन्नार्	९.७४
ऋतं सत्यं परं ब्रह्म......ध्येयमास्तिकैः ।	चं. आ., उ.भा., क्रि. पा. ३.२१	११.३१, १२.३४
ऋदूदरः सुहवः ।	ऋ. वे. २.३३.१२	१३.३१
ऋहलोर्ण्यत् ।	पा. अ. ३.१.१२४	१५.९
एक एव हि भूतात्मा......जलचन्द्रवत् ।	अमृत. विं. उ. १२	१९.५१
एकमूर्तेस्त्रयो......गुरुर्लिङ्गं च जङ्गमः ।	चं. आ., उ. भा., क्रि. पा. ५.१५	९.५८, १४.२९, १९.६
एकमेवाद्वितीयं ब्रह्म ।	छां. उ. ६.२.१	२.३-६, ८.१९, १९.५३, १९.८४-८५
एकमेव तद्भवति......स्वप्रकाशम् ।	नृ. ता. उ. ८	१४.४
एकमेव परं......स्थलमित्यभिधीयते ।	अनु. सू. २.२-३	१४.४१
एकस्तथा......प्रतिरूपो बहिश्च ।	कठ. उ. ५.९	२.३-६, २०.४५-४६
एकेन जन्मना......परम् ।	वीरागमः – उल्लेखः – त. प्र.	९.१४
एकेनैव तु पिण्डेन......कारणमेव हि ।	पञ्च. व. उ. ३५, ३७	१७.८०

CC-0 . Jangamwadi Math Collection. Digitized by eGangotri

१	२	३
एको देवः सर्वभूतान्तरात्मा । कर्माध्यक्षः......केवलो निर्गुणश्च ॥	श्वे. उ. ६.११	२.३-६, ५.३३-३५, ६.११, १०.१०, १८.२९, १९.५३, १९.६०-६३, २०.४५-४६
एको वशी......शाश्वतं नेतरेषाम् ।	श्वे. उ. ६.१२	१९.६०-६३
एको वशी......बहुधा यः करोति ।	कठ. उ. ५.१२	१.४, १९.६७-६९
एको हि रुद्रो न द्वितीयाय तस्थुः ।	श्वे. उ. ३.२	२.३-६, १०.८, १६.२४, १९.५३, १९.८४-८५
एचोऽयवायावः ।	पा. अ. ६.१.७८	१९.८२
एतज्ज्ञेयं नित्यमेव......किञ्चित् ।	श्वे. उ. १.१२	२०.६६-६७
एतदालम्बनं श्रेष्ठं......महीयते ।	कठ. उ. २.१७	१.१
एतस्यैवानन्दस्य......उपजीवन्ति ।	बृ. उ. ४.३.३२	१.४, १९.६७-६९
एतैर्मुक्तः......परां गतिम् ।	भ. गी. १६.२२	१३.१९
एवं क्रमेण......तेनेदं सूच्यते ।	पार. आ. ७.२८	१०.३०
एवं विदित्वा......परमात्मरूपम् ।	कै. उ. २४	१४.९, १८.२८
एष परम आनन्दः ।	बृ. उ. ४.३.३२	१५.४९
एषा पञ्चाक्षरी प्रणवाद्या षडक्षरी ।	पार. आ. ११.२१	८.१७
एषा ब्राह्मी......नैनां प्राप्य विमुह्यति ।	भ. गी. २.८२	२०.१८
एषोऽणुरात्मा चेतसा वेदितव्यः ।	मुं. उ. ३.१.९	१९.२४
एषोऽस्य आनन्दः ।	बृ. उ. ४.३.३२	१३.१२
ऐ..दात्म्यमिदं......तत्त्वमसि श्वेतकेतो ।	छां. उ. ६.८.७	१६.६६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
ऐश्वर्यस्य समग्रस्य......भग इतीरणा ।	------	१०.११-१२
ऐहिकामुष्मिका......सर्वकामफलप्रदः । ......परमेश्वराः ।	चं. आं., उ. भा., क्रि.पा.४.२९-३०	९.६३-६४, ११.४२-४३
ओं तथेति......रक्षा जाता ।	बृ. जा. उ. १.१०-१४	७.६-८
ओमात्मा परशिव......शिव एव लिङ्गम् ।	रुद्र. उ., उ. सं. पृ. ३०८-३०९	१७.६१-६२
ओमित्यक्षरं......परं ब्रह्म ।	अथ. शिखा. ३, १	८.१९
कर्मजं......गच्छन्त्यनामयम् ।	भ. गी. २.५१	१९.३३
कर्मणि कौशलम् ।	भ. गी. २.५०	१९.३३
कर्मणैव हि......जनकादयः ।	भ. गी. ३.२०	१९.३५
कर्मण्येवाधिकारस्ते......अकर्मणि ।	भ. गी. २.४७	९.८२
कर्मयज्ञस्तपोयज्ञो......इमे स्मृताः ।	सू. आ., उ. भा., क्रि. पा. ६.२६	९.२१-२४
कर्मयज्ञो द्विधा......मोक्षदम् ।	सू. आ., उ. भा., क्रि. पा. ६.२७-२९	९.२१-२४
कश्चिद्धीरः......अमृतत्वमिच्छन् ।	कठ. उ. ४.१	१९.८०
कश्चित्स्वतःसिद्धः......लक्षणः ।	सू. आ., उ. भा., क्रि. पा. १.१४	२.३-६
कामस्तदग्रे......प्रथमं यदासीत् ।	ऋ.वे. १०.१२९.४	२.८, १२.१२
कामान्यः......प्रवीलीयन्ति कामाः ।	मुं. उ. ३.२.२	१६.४५
कामा येऽस्य हृदि स्थिताः ।	बृ. उ. ४.४.७	१७.८१
कायेन मनसा......त्यक्त्वात्मसिद्धये ।	भ. गी. ५.११	१४.१७
कालोऽस्मि लोकक्षयकृत् ।	भ. गी. ११.३२	१९.६७-६९
किं कारणं ब्रह्म......ब्रह्मविदो व्यवस्थाम् ।	श्वे. उ. १.१	१५.२१, १७.७४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
कुम्भकेन समायुक्तः......प्रशस्यते ।	पार. आ. ११.८९	८.२५-२६
कुर्वन्नेव हि कर्माणि......शतं समाः ।	ईश. उ. २	१६.७३, १९.३५
केनेषितं पतति......नेदं यदिदमुपासते ।	केन. उ. १.१-३	१५.२१
केवलं जपमित्युक्तं......न किञ्चन ।	देवी. आ. १८	२०.६६-६७
क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः ।	मुं. उ. ३.२.१	१९.७६
क्लेशमूलः कर्माशयो......जात्यायुर्भोगः ।	यो.सू. २.१२-१३	५.४९
क्षरं प्रधानम्......आप्तकामः ।	श्वे.उ. १.१०-११	१३.२२
क्षिप्रं भवति......न मे भक्तः प्रणश्यति ।	भ. गी. ९.३०	११.६२
क्षीणवृत्तेर्......समापत्तिः ।	यो. सू. १.४१	१२.२१
गच्छंस्तिष्ठन्......शुद्धदेही ।	सि. शिखा. उ., उ. सं., द्वि. भा. पृ. ३८१	६.५४-५५
गताः कलाः पञ्चदश......एकीभवन्ति ।	मुं. उ. ३.२.७	१४.२८
गवामनेकवर्णानां......गवां यथा ।	अमृत. बिं. उ. १९	१९.९०
गुकारोऽन्धतमः......कथमेष्यति ।	का. आ. उ. भा., क्रि. पा. १.१४०	१३.२३
गुणवचनब्राह्मणादिभ्यः कर्तरि च ।	पा. अ. ५.१.१२४	१.१, ९.३४-३५
गुरावत्यन्तभक्तस्य......सुलभं सदा ।	चं. आ., उ. भा., क्रि. पा. २.४६	९.५५
गुरुदीक्षापरिप्राप्त......प्राप्तवान् द्विजः ।	म. आ., उ. भा., च. पा. १२.९	१४.२
गुरुदीक्षा......प्राप्तवान्नरः ।	म. आ., उ. भा., च. पा. ७.३	९.१४
गुरुदैवतयोर्......भवेत् ।	पार. आ. १४.६६	११.२१
गुरुपूजैव पूजा....आत्म शुद्धिकरं भवेत् ।	चं आ., उ. भा., क्रि. पा. २.९४	९.६७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
गुरुप्रसादपात्रं यः......गुरुसत्कृताम् ।	चं. आ., उ. भा., क्रि. पा. २.१६	१६.१७
गुरुप्रियकरः......धर्मांस्तथार्हति ।	चं. आ., उ. भा., क्रि. पा. २.४७	९.५६-५७
गुरुबोधाग्निना......कथमेष्यति ।	का. आ., उ. भा., क्रि. पा. १.१३८-१४०	९.५६-५७
गुरुभक्तिविहीनस्य......व्रतवच्छिवे ।	पार. आ. १४.८३	११.२४
गुरुमन्त्रात्मदैवेषु....सत्यवादिनमास्तिकम् ।	पार. आ. २.७१-७२	१७.६०
गुरुमेवाभिगच्छेत् ।	मुं. उ. १.२.१२	१७.७३
गुरुरेव महादेवः......मामुपाश्रिताः ।	सू. आ., उ. भा., क्रि.पा. ५.१०-१२	११.२१, ११.६८
गुरुर्यतोऽहं......परिपालयेत् ।	का. आ., उ. भा., क्रि. पा. ५.१५	११.२१
गुरुर्लिङ्गं जङ्गमश्च......अष्टावरणसंज्ञिताः ।	चं. आ., उ. भा., क्रि. पा. २.२	६.१-७
गुरुस्तु गुणवान्......न तु चापरः ।	चं. आ., उ. भा., क्रि. पा. २.४८	१३.१८-१९
गुरुसंस्कृतभावः......समाचरेत् ।	उल्लेखः – त. प्र.	१०.३०
गुरुस्थानं......अष्टमं भवेत् ।	बृ. जा. उ. ४.२९	७.३१-३२
गुरुं स्वगृहमायान्तं......नत्वा क्षमापयेत् ।	चं. आ., उ.भा., क्रि.पा.१.२१-२५	९.५२
गुरूच्छिष्टं......पावित्र्यदायकः ।	चं. आ., उ. भा., क्रि. पा. ५.३५	११.१८
गुरूपदिष्टमेवाथ......स उच्यते ।	सू. आ., उ. भा., क्रि. पा. ८.४८	१०.२५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
गुरोर्हितं प्रियं......कार्यं समाचरेत् ।	चं. आ., उ. भा., क्रि. पा. २.२०	९.५६-५७
गुरौ देवे समा......साम्राज्यशालिनाम् ।	एन्नार्	९.६६
गुरौ लिङ्गे......त्रिविधस्थली ।	निर्वचनम्	९.५८
घटादिषु प्रलीनेषु......इहात्मनि ।	माण्डूक्य. ३.४	१८.६६
घृतमिव पयसि......मन्यानभूतेन ।	ब्रह्म. बिं. उ. २०	१२.२९
चक्रनेमिक्रमेणैव......कर्म केवलम् ।	सि. शि. ५.४९	१६.८२, १८.१२-१४
चरलिङ्गस्थलस्य......समुपागतम् ।	सू. आ., उ. भा., क्रि. पा. ८.२८	१५.५१
चरेऽधिका......भक्तिमाश्रयेत् ।	चं. आ., उ. भा., क्रि. पा. ४.३१	९.६२
चरो लोकहितार्थी......शिवशासनम् ।	चं. आ., उ. भा., क्रि. पा. ४.३५	९.६७
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।	भ. गी. ४.१३	१४.२०
चित्तमेव हि......बन्धनात् ।	मै. उ. १.६५, ७	११.६
चित्तस्य हि प्रसादेन सुखमक्षयमश्नुते ।	मै. उ. १.६	११.६
चिद्रूपं हि परं तत्त्वम् ।	सि. शि. ६.३२	११.२७-२९
चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।	कु. आ. ५०	११.५२-५३
चैतन्यविशिष्टः कायः पुरुषः ।	बार्हस्पत्यसूत्रम्	५.५५-५६
च्चौ च ।	सि.कौ., सू.२११२०	४.२५-३३
जगज्जन्मस्थिति......अस्यैतदेव हि ।	मृ. आ. २.३	१.८,५.४६-४८,८.१४-१५
जगदगल......चुळुकादिरय्य ।	बसवण्ण वचन सं. ७४४	११.३०
जगत्प्रवाहः सत्योऽयं......जड-जीव-भिदा सदा ।	म. भा. ता. नि. १.६९.७०	१४.१०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
जङ्गमं त्रिविधं......इत्यभिधीयते ।	चं. आ., उ. भा., क्रि. पा. ४.६-७	९.६०
जङ्गमं पूजयेत्......न संशयः ।	पार. आ. ६.११	९.६३-६४
जङ्गमं स्थावरं......रूपद्वयं स्मृतम् ।	चं. आ., उ. भा., क्रि. पा. ४.४	९.६०
जङ्गमानसमच्यैव......शिवशासनम् ।	चं. आ., उ. भा., क्रि. पा. ४.३६	९.६२
जङ्गमे निजलिङ्गैक्ये ।	सू. आ., उ. भा., क्रि.पा.५.४५,७.३३	९.६१
जठरे लीयते......लिङ्गसंज्ञकम् ।	चं आ., उ. भा., क्रि. पा. ३.८	६.३७
जनको हि वैदेहः......विष्णुराह ।	बृ.जा.उ. ७.५-६	७.३८-३९
जलकुम्भाग्रव्याप्त......समुपवेशयेत् ।	का. आ., उ. भा., क्रि. पा. १.१२२, १२४	६.१३-१४, १०.४७
जलकुम्भाग्रसद्व्याप्त......समुपवेशयेत् ।	सू. आ., उ. भा., क्रि. पा. १.१२२, १२४	१०.२६
जाग्रत्स्वप्नसुषुप्तिषु......मनीषा मम ।	मनीषा. प. ५	२०.२५
जातस्य हि ध्रुवो.....न त्वं शोचितुमर्हसि ।	भ. गी. २.२७	५.६३
जाताशोचमृताशौचादौ.....योग्यताश्रवणात् ।	श्रीकर.भा., भाग-१, सू.१.१.१, पृ.२२-२३	९.४४
जायते अस्ति......षड्भावविकाराः ।	नि. १.२	१८.३५
जीवो मदंशो ज्ञानात्मा......दृश्यते ।	पार.आ., २१.८०	५.३३-३५, १५.१६-१७
ज्ञाज्ञौ द्वावजाव्......विन्दते ब्रह्ममेतत् ।	श्वे. उ. १.९	१०.४२

CC-0 : Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
ज्ञात्वा देवं मुच्यते सर्वपाशैः ।	श्वे.उ. १.८,१.२३, ४.२६, ५.२३	१६.२५
ज्ञात्वा देवं सर्वपाशापहानिः ।	श्वे. उ. १.११	१६.२५
ज्ञाननिष्ठा हि......विमुच्यते ।	का. आ., उ. भा., क्रि. पा. २.४२	१०.२४
ज्ञानं परमेशस्य......ज्ञानकर्मणी ।	चं.आ., उ.भा., क्रि.पा. १२.५-६	५.१९-२१
ज्ञानमिति सुखसाहचर्यात्.....बन्धानुपपत्तेश्च ।	भ. गी. १४.६., शां. भा.	१३.१४
ज्ञानादेव तु......ब्रूहि तत्त्वतः । (देवी) ज्ञानादेव......ज्ञानायाधिकृतो भवेत् । (महदेवः)	का. आ., उ. भा., क्रि. पा. २.३-४, ५-६	१६.११
ज्ञानेनाचारयुक्तेन......भवति सिद्धये ।	चं. आ., उ. भा., क्रि.पा.९.१७-१९	१६.२३
ज्योतिर्लिङ्गमिदं......मोचयतेऽचिरात् । ज्योतीरूपं तदेव......मोचयतेऽचिरात् ।	चं. आ., उ. भा., क्रि.पा. ३.३४-३६	१२.९, १२.४५-४६
ठस्येकः ।	पा.अ. ७.३.५०	९.८८
ढ्रलोपे पूर्वस्य दीर्घोऽणः ।	पा.अ. ६.३.१११	१२.९
ण्वुल्तृचौ ।	पा.अ. ३.१.१३३	८.१, ८.१०, ८.२३, ९.५२, ९.५४, १०.८, ११.२०
तच्चित्तममलं......स्मृतः ।	सू. आ., उ. भा., क्रि. पा. ८.३४	१०.३
ततः परं ब्रह्म......सर्वगतः शिवः ।	श्वे. उ. ३.७, ११	१०.५८
ततः सन्ध्यामुपासीत......देवतास्म्यहम् ।	का. आ., उ. भा., क्रि. पा. ३.५५	९.३९, १६.७१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
तत्कर्म कृत्वा......स तत्त्वतोऽन्यः।	श्वे. उ. ६.३-४	१२.३
तत् त्वमसि।	छां. उ. ६.८.७	१.१२, ५.३३-३५, १५.१०, १५.१९, १५.२१, १५.२८-२९, १६.१६, १७.६६, १७.६७, १८.१९, १९.८४-८५
तत्त्ववित्तु नाहं......तत्फलमभिसन्धत्ते।	भ. गी. २.१०, शां. भा.	१९.३४
तत् परं ब्रह्म......स महादेवः।	अथ. शिर. उ. ४४	१०.११-१२
तत्प्रकृतवचने मयट्।	पा. अ. ५.४.२१	३.१-८
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।	ईश. उ. ७	१९.२२
तत्र प्रत्ययैकतानता ध्यानम्।	यो. सू. ३.२	९.२१-२४, १६.५९
तत्र सत्त्वं......ज्ञानसङ्गेन चानघ।	भ. गी. १४.६	१३.१४
तत्सृष्ट्वा तदेवानुप्राविशत्।	तै. उ. २.६	२.३-६, ५.३६, ११.२७-२९, १६.१८, १८.७, १८.११
तथापि मायया......न तु मुख्यया।	स्कन्द. पु., सू. सं., शैव. प., पृ. २९	२.३-६
तदनन्यत्वम् आरम्भणशब्दादिभ्यः।	ब्र. सू. १.१.१४	१०.६५-६६, १७.७९
तदस्य तृतीयं जन्म।	ऐ. उ. ४.४	५.५२-५४
तदस्यास्त्यस्मिन्निति मतुप्।	पा. अ. ५.२.९४	१०.११-१२
तदित्यनभिसन्धाय......मोक्षकाङ्क्षिभिः।	भ. गी. १७.२५	७.९.१०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
तदेतद् ब्रह्म......अनुशासनम् ।	बृ. उ. २.५.१९	१९.५६-५९
तदेवं वेदानुवचनं......तपसाऽनाशकेन ।	बृ. उ. ४.४.२२	११.७०
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।	कठ. उ. ६.१	१५.१९
तदैक्षत बहु स्यां प्रजायेयेति ।	छां. उ. ६.२.३	२.८, १६.७५
तद्धितार्थोत्तरपदसमाहारे च ।	पा. अ. २.१.५१	१.१, ८.१
तद्धितेष्वचामादेः ।	पा.अ. ८.२.११७	१.१
तद्ब्रह्म तदमृतं स आत्मा ।	छां. उ. ८.१४.१	१५.१९, १५.२१
तद्ब्रह्म लिङ्गसंज्ञकम् ।	चं. आ., उ. भा., क्रि. पा. ३.८	११.३१, १५.३१
तद्यथेह कर्मचितो......क्षीयते ।	छां. उ. ८.१.६	५.६२, १६.२५
तद्यथा प्रियया स्त्रिया......वेद नान्तरम् ।	बृ. उ. १४.३.२१	१३.२
तद्रुद्राक्षे वाग्विषये......द्विसहस्रगोदान-फलं भवति ।	रु. जा. उ. २०	७.४४
तद्रुद्राक्षे......कोटिगोदानफलं भवति ।	बृ. जा. उ. ७.१७	७.६१
तद्विज्ञानार्थं स......ब्रह्मनिष्ठम् ।	मुं. उ. १.२.१२	५.७४-७६
तद्विष्णोः परमं पदम् ।	कठ. उ. ३.९	११.६३
तनुत्रयगत......लिङ्गत्रयमुपादिशेत् ।	का. आ., उ. भां., क्रि. पा. १.१०	६.१३-१४
तपः कर्म......नान्यार्थवेदनम् ।	पार. आ. १२.१७-१९	९.२१-२४
तपसा ब्रह्म विजिज्ञसस्व ।	तै. उ. ३.२	१५.१९
तं महान्तं विभुम्......न शोचति ।	कठ. उ. ४.४ – शां. भा.	१६.२६
तं दुर्दर्शं......हर्षशोकौ जहाति ।	कठ. उ. २.१२	१६.८१
तमीश्वराणां......भुवनेशमीड्यम् ।	श्वे. उ. ६.७	१०.४२, १७.२५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
तमेव भान्तमनुभाति सर्वम् ।	कठ. उ. ५.१५	२.३-६, ११.२७-२९
तमेव विदित्वाऽतिमृत्युमेति ।	श्वे. उ. ३.८	११.२७-२९
तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ।	श्वे. उ. ४.१५	१६.२५
तमेव शरणं गच्छ......शाश्वतम् ।	भ. गी. १८.६२	१८.१२-१४
तरति शोकमात्मवित् ।	छां. उ. ७.१.३	१६.२६
तव श्रियै......निधायि ।	ऋ. वे. ५.३.३	११.३३
तस्मात्परमात्मैकत्वप्रत्यये......अनुपपत्तिः ।	बृ. उ. २.४.१४ – शां. भा.	१८.५०
तस्मात्सर्वगतः शिवः ।	श्वे. उ. ३.११	१६.३१
तस्मात्स्वज्ञानजं......निबध्नाति भारत ।	भ. गी. १४.८०	१३.१३
तस्मात् षडक्षरो......वीरशैवरतस्य च ।	पार. आ. ११.२७-२८	८.४०-४१
तस्मादपि......प्रकीर्तिताः ।	सू. आ., उ. भा., क्रि. पा. ८.९२	८.५-६
तस्मादसक्तः सततं......कर्तुमर्हसि ।	भ. गी. ३.१९.२०	५.१९-२१
तस्मादिदं......मोक्षसाधकम् ।	का. अ. उ. भा., क्रि. पा. २.४२	१०.२४
तस्माद्यत्......तत्कर्म करोति ।	बृ. जा. उ. १.१	९.१६
तस्माद्यज्ञादिकं......वीरशैवक्रमो भवेत् ।	सू. आ., उ. भा., क्रि. पा. ६.३३, ३५-३६	९.२१.२४
तस्माल्लिङ्गं परं ब्रह्म सच्चिदानन्दलक्षणम् ।	सू. आ., उ. भा., क्रि. पा. ६.११	६.३८, ११.३१
तस्येदम् ।	पा.अ. ४.३.१२०	९.४२, ९.६९
तस्य भावस्त्वतलौ ।	पा.अ. ५.१.१२९	१५.३१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
तस्य भासा सर्वमिदं विभाति ।	कठ. उ. ५.१५, मुं. उ. २.२.१०, श्वे. उ. ६.१४	१.१४, ११.३६, १२.३६, १५.११, १९.६७-६९
तस्य विकारः ।	पा.अ. ४.३.१३४	९.४२
तस्यैव तेजसा......दिवानिशम् ।	सू. आ., उ. भा., क्रि. पा. ६.९	१२.३८
तारकोऽयं......ब्रह्मोपदेशः ।	भ. जा. उ. २.४	८.१३
तिथिवृद्ध्याचरेत्......चान्द्रायणं चरन् ।	या. स्मृ. ३.३२३	९.२१-२४
तिलादिस्निग्धवस्तूनां......उदाहृतम् ।	भाव. प्र.	९.४३
ते तं भुक्त्वा......विशन्ति ।	भ. गी. ९.२१	५.६२
तेन त्यक्तेन भुञ्जीथाः ।	ईश. उ. १	१६.५९
तोषयेत्तं प्रयत्नेन......गिरा ।	चं. आ., उ. भा., क्रि. पा. २.६८	९.५६-५७
त्रिपुण्ड्रं कारयेत्......मूलमन्त्रितम् ।	चं. आ., उ. भा., क्रि. पा. ६.४३	७.३३-३४
त्रिपुण्ड्रं धारयेत्......मूलमन्त्रितम् ।	बृ. जा. उ. ४.१०	७.३३-३४
त्रिपुरवधार्थं......न शक्नोमि ।	रु. जा. उ. २	७.४५-४६
त्रिपुराणां वधार्थाय......अनुग्रहकारणम् ।	चं. आ., उ. भा., क्रि. पा. ७.४-५	७.४५-४६
त्रियायुषं याजुषं......अध्याहार्यम् ।	बृ.जा.उ. ५.१ – उपनिषद् ब्रह्मयोगी	७.३८-३९
त्रिविधं नरकस्येदं......त्रयं त्यजेत् ।	भ. गी. १६.२१	१३.१७
त्रिरुन्नतं स्थाप्य......भयावहानि ।	श्वे. उ. २.८	१७.१४
त्रिषु धामसु......सदाशिवः ।	कै. उ. १८	५.५०
त्रैगुण्यविषया......भवार्जुन ।	भ.गी. २.४५	९.२१-२४
त्रैविद्या मां......कामकामा लभन्ते ।	भ.गी. ९.२०-२१	११.६२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
त्वादत्तेभी रुद्र......चातयस्वा विपूचीः।	ऋ. वे. २.३३.२	९.७५, १३.३१
दक्षः प्रजापतिः......अकरोत्तदा।	सू. आ., उ. भा., क्रि.पा. २.३६-३७	९.३६
दर्शनादर्चनात्तस्य......पुनस्तत्परायणः।	यो. आ. उल्लेखः — त. प्र.	९.६३-६४
दह्रं विपाप्मं......तदुपासितव्यम्।	तै. आ. ७.१०	१९.५६-५७
दानुः शये सहवत्सा न धेनुः।	ऋ. वे. १.३२.९	७.१६-१८
दिव्यज्ञानोपदेष्टारं.....गुरोर्देवस्य चात्मनः।	योग. शि. उ. ५.५७-५९	१८.६९-७१
दीक्षायां गुरुणा......न दुष्यति।	सू. आ., उ. भा., क्रि.पा. ७.५३-५५	६.२७-२८
दीक्षापवित्रिताङ्गत्वात्.....पूजा प्रयत्नतः।	का. आ., उ. भा., क्रि. पा. २.७७	९.४४
दीक्षासंस्कृतिसंसिद्धे......भवति ध्रुवम्।	का. आ., उ. भा., क्रि. पा. २.९	११.१५
दीयते लिङ्गसम्बन्धः......दीक्षेति निगद्यते।	का. आ., उ. भा., क्रि. पा. १.१२	६.११
दीयते लिङ्गसम्बन्धः......कथ्यते।	सू. आ., उ. भा., क्रि. पा. ८.११	६.११
दुःखानां त्रयं......निबन्दनम्।	सा. त. कौ., का. १	५.६८-७०
दुःखानुशायी द्वेषः।	यो. सू. २.८	१२.३०-३१
दुर्वर्णं रजतं रूप्यम्।	अमर. २.६८८	१७.७७
दृक्दर्शनशक्त्योरेकात्मतैवास्मिता।	यो. सू. २.६	१२.३०-३१
दृष्टिः स्थिरा......स सेव्यः।	यो. आ — उल्लेखः — त. प्र.	१७.८१
दृष्टिः स्थिरा......इत्युपनिषत्।	ना. बिं. उ. ५६	१५.२२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
देवदानवगन्धर्वाः......सचराचरम् ।	सू. आ., उ. भा., क्रि.पा. ६.२३-२५	१२.३३
देवाः षोडशलक्षाणि......सप्तजन्मान्यमूनिवै ।	स्कन्द. पु – उल्लेखः – त. प्र.	१९.५४-५५
देशकालविमुक्तोऽस्मि......अस्म्यहम् ।	मै.उ. ३.१९-२१	१५.२२
देशिकस्य प्रसादेन......मृत्युः प्रयास्यति ।	का. आ., उ. भा., क्रि. पा. १.१३७-१३९	११.२४, १३.२४
देहदानात्......स्थिरं भवेत् ।	यो. आ. उल्लेखः – त. प्र.	९.७९
देहः शिवालयः......पिण्डजं लिङ्गमुच्यते ।	वा. आ. उल्लेखः – त. प्र.	१९.५४-५५
द्रष्टुं रूपान्तरं......नऽपरं मनः ।	लिङ्ग. पु.– त.प्र.	१०.२७
द्वात्रिंशत्स्थानके......योजयेत् ।	बृ. जा. उ. ४.१६	७.३१-३२
द्वादशान्तं पदं स्थानम् ।	द. मू. उ. २४	२.३-६
द्वादशान्तशब्देन......उपलब्धिस्थानत्वात् ।	द. मू. उ. २४ – उपनिषद्ब्रह्मयोगी	२.३-६
द्वा सुपर्णा सयुजा......अभिचाकशीति ।	ऋ.वे. १.१६४.२०, मुं.उ. ३.१.१, श्वे.उ. ४.६	५.३३-३५, १०.४२
द्विगोः ।	पा. अ. ४.१.२१	१.१, ८.१
द्वे विद्ये वेदितव्ये......अशेषतः ।	ब्रह्म. बिं. उ. १७-१८	१२.३६
धारणं यस्य......न पश्येत् ।	लिं. उ., उ. सं., द्वि. भा. ५.३१०	६.५१
धूमवती पृथिव्यां......पुष्टौ स्यात् ।	विरू.प. २५-२६	१८.३४
ध्यायतो विषयान्.....बुद्धिनाशाप्रणश्यति ।	भ.गी. २.६२-६६	१३.१७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
न कर्तृत्वं न कर्माणि.....स्वभावस्तु प्रवर्तते ।	भ. गी. ५.१४	१४.१७, १५.५२-५७
न कर्मणा न प्रजया......शुद्धसत्त्वाः ।	तै. आ. ७.१०	१६.२६
न कर्म लिप्यते नरे ।	ईश. उ. २	१९.३५
न गुरोरधिकं......विद्यते तयोः ।	योग. शि. उ. ५.५६-५७	९.५२
न च नामानि......शिवस्य परमात्मनः ।	स्कन्द. पु., सू. सं., शै. प. पृ. २९	२.३-६
न चक्षुषा गृह्यते......ध्यायमानः ।	मुं. उ. ३.२.१	१५.४५, १९.२४
न जातु कामः......भूय एवाभिवर्धते ।	म. भा.	१३.१७
न तत्र सूर्यो......सर्वमिदं विभाति ।	कठ. उ. ५.१५, मुं. उ. २.२.१, श्वे. उ. ६.१४	१२.३८, १९.२५, १९.६७-६९
न तत्समश्चाभ्यधिकश्च दृश्यते ।	श्वे. उ. ३.४	११.३४
न तत्समोऽभ्यधिकश्च ।	श्वे. उ. ६.८	१९.६७-६९
न तस्य कार्यं......न चाधिपः ।	श्वे. उ. ६.८-९	१०.९, १९.४९
नन्दिग्रहपचादिभ्यो ल्युणिन्यचः ।	पा.अ. ३.१.१३४	९.५५, १२.१५-२०, ११.६०, १५.१६-१७
नद्यादिकान्......मलस्नानम्...... ।	का. आ., उ. भा., क्रि. पा. ३.२४	७.१९-२१
ननमयययुतेयं मालिनी...... ।	आप्टे, पृ. ६५३	१.३२
ननु 'मनुष्योऽहं'......देहेन्द्रियव्यतिरिक्तो जीवः ।	त. दी. पृ. १२	५.५७-५८
न पुनरावर्तते न पुनरावर्तते ।	बृ. जा. उ. ७.२	९.१५
न प्रहृष्येत् प्रियं......ब्रह्मणि स्थितः ।	भ. गी. ५.२०	१४.१९
न बुद्धिभेदं जनयेद्......मुक्तः समाचरेत् ।	भ. गी. ३.२६	१०.३९.४०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
नमः शब्दं......षडक्षरमिति स्मृतम् ।	सू. आ., उ. भा., क्रि. पा. ३.१३	८.७
नमः शिवाय च शिवचराय च ।	तै. सं. ४.५.८	६.२०-२१
नमस्ताराय नमः शम्भवे च ।	तै. सं. ४.५.८	८.१७
न मे पार्थास्ति कर्तव्यं......प्रजाः ।	भ.गी. ३.२२-२४	५.४६-४८, १५.७१
नमःस्वस्तिस्वाहाऽलंवषड्योगाच्च ।	पा. अ. २.३.१६	१.१, ८.७
नरो देवयवो मदन्ति ।	ऋ. वे. १.१५४.५	११.६३
न लिप्यते लोकदुःखेन बाह्यः ।	कठ. उ. २.११	१४.१६
न विना गुरुणा......भवन्त्यलम् ।	चं. आ., उ. भा., क्रि. पा. २.५	१७.६५
नष्टो मोहः......वचनं तव ।	भ. गी. १८.७	१५.१६-१७
न संदृशे तिष्ठति......न चक्षुणा......अमृतास्ते भवन्ति ।	कठ. उ. ६.९, ६.१२	११.२७, ११.२७-२९, १९.६७-६९
न हि कश्चित्......तिष्ठत्यकर्मकृत् ।	भ. गी. ३.५	१९.३५
न हि ज्ञानेन सदृशं......कालेनात्मनि विन्दति ।	भ. गी. ५.३८	६.४५-४६
नादरूपः शिवः......नादबिन्दुकलात्मकम् ।	सू. आ., उ. भा., क्रि. पा. ६.३-४	६.६२, ११.३२, १२.१२
नानार्थाश्रयः श्लोषो...... ।	कु. आ. ६४	१.१३-१४
नान्यत्पश्यति......स भूम ।	छां. उ. ७.२४.१	१९.९
नाऽशिवः शिवं....नाऽशिवः शिवमाप्नुयात् ।	चं. आ., उ. भा., क्रि. पा. ११.३८	८.३४
नासतो विद्यते भावः ।	भ. गी. २.१६	२.७
नास्ति ज्ञानात्......पञ्चाक्षरः परः ।	पार.आ. १०.९०	८.४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
नाहं मनुष्यो......निजबोधरूपः ।	यो. आ. – त. प्रा.	१५.६३
नित्यं विभुं सर्वगतं...... ।	मुं. उ. १.२.६	२.३-६
नित्यानन्दं......तं नमामि ।	शु. र. उ. १ ध्यानम्	९.५१
नित्यो निरञ्जनः शुद्धो...... ।	सू. आ., उ. भा., क्रि. पा. १.१४	२.३-६
नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् ।	अमर. २.४५५	४.३३
निर्दग्धकर्मबीजस्य......लौकिकी ।	भ. गी. ४.१९	१९.३०
निर्द्वन्द्वो हि......परलिङ्गमुदाहृतम् ।	सू. आ., उ. भा., क्रि. पा. ८.१२	१५.६५
निष्कलं निर्मलं......स्मृतम् ।	ब्रह्म. विं. उ. २१	१२.२९
निष्कलं निष्क्रियं......तन्महालिङ्गमुच्यते ।	चं. आ., उ. भा., क्रि. पा. ३.२०	१२.३८
निष्कलं निष्क्रियं.....दग्धेन्धनमिवानलम् ।	श्वे. उ. ६.१९	१८.५६
निहितो गुहायाम् ।	कठ. उ. २.२०	१८.६
नीनोलियित्ते......पाप । (कन्नड)	चन्नबसवण्ण व. सं. ५०५	९.११
नीलङ्गस्तु क्रिमिः ।	अमर. २.२३४	१६.२२
नेह नानास्ति किञ्चन ।	कठ. उ. ४.११	१५.२१
नेहाभिक्रमनाशोऽस्ति......महतो भयात् ।	भ. गी. २.४०	१०.३०
नैव वाचा न मनसा......तत्त्वभावः प्रसीदति ।	कठ. उ. ६.१२-१३	१५.३१, १९.९, १९.६७-६९
नैवोर्ध्वं धारयेच्चित्तं......कुर्यान्निराश्रयम् ।	देवी. आ. ३८	१८.४४
नैष्कर्म्यसिद्धिं......सद्योमुक्त्यवस्थाम् ।	भ. गी. ३.२२ शां. भा.	१६.६१
नैष्ठिकानां......विद्यते ।	म. आ., उ. भा., च. पा. १०-१६	९.४३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
न्यग्रोधफलमत......श्रद्धत्स्व सोम्येति ।	छां. उ. ६.१२. १-२	२०.४१
पञ्चभिर्नामभिर्......रक्षेति ।	बृ. जा. उ. १.१५	७.४-५
पञ्चब्रह्ममन्त्राः । सद्योजातं प्रपद्यामि, इत्यादयः ।	तै. आ. ७.४३-४७, म. ना. उ. १७.१-५	७.१३-१७
पञ्चभिर्ब्रह्मभिर्......त्रिपुण्ड्रंमय कथ्यते ।	चं. आ. उ. भा., क्रि.पा. ६.४१-४२	७.१९-२१
पञ्चाक्षरमनुं......परं शिवम् ।	पार. आ. १२.५६	८.११-१२
पञ्चाक्षरमयीं विद्यां......शाङ्करमच्युतम् ।	पार. आ. १२.५७-५८	८.४२
पञ्चाक्षरात्......कलौ युगे ।	चं. आ., उ. भा., क्रि. पा. ८.८३	८.११-१२
पञ्चाक्षरो महामन्त्रः......मन्त्रराजाह्वयः परः ।	सू. आ., उ. भा., क्रि. पा. ४.३५	८.१७
पत्रं पुष्पं......सदाशिवम् ।	चं. आ., उ. भा., क्रि. पा. ५.२४	९.७०-७१, ११.१७
पदरुजविशस्पृशो धञ् ।	पा. अ. ३.३.१६	१९.७
पद्मासने समासीनः....त्रपालस्यादिवर्जितः ।	सू. आ., उ. भा., क्रि. पा. ३.४०	८.२५-२६
पराचः कामान्......न प्रार्थयन्ते ।	कठ. उ. ४.२	१५.१२
पराञ्चिखानि......अमृतत्वमिच्छन् ।	कठ. उ. २.१	१७.१५
परात्परं तु यत्......शिवाभिधम् ।	वा. आ. उल्लेखः — त. प्र.	१५.४५
परात्परं तु यत्प्रोक्तं तृप्तिलिङ्गं तदुच्यते ।	सि. शि. ६.५०	१५.४५
परास्य शक्तिर्विविधैव...... ।	श्वे. उ. ६.८	५.३९, १९.७७
परिणामः क्रियार्थश्चोद्विषयी विषयात्मवा ।	कु. आ. २१	१५.२७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
पवित्रं ते विततं......तत्समाशत ।	ऋ. वे. ९.८३.१	६.५९, ११.२७-२९
परमेवाक्षरं प्रतिपद्यते......तदेष श्लोकः ।	प्र. उ. ४.१०	१६.४३
पादतीर्थं त्रिधा......तद्भवत्यहो ।	चं. आ., उ. भा., क्रि. पा. ५.५	९.६७, १९.६
पादतीर्थं सदा......पिबेत्तदा ।	चं. आ., उ. भा., क्रि. पा. ५.६-९	९.६७
पारतन्त्र्यं तु......बुधोत्तमैः ।	का. आ., उ. भा., क्रि. पा. २.७०	६.५६-५७
पाशमोक्षं पशूनां......शिव इष्यते ।	स्कन्द. पु.	९.५१
पुङ्खानुपुङ्खविषयेक्षण......नटीव ।	वराह. उ. २.८२	१७.४२
पुत्रदारधनादीनां......दुःखोत्तरणहेतवे ।	पार.आ. २२.४१-४३, ५४	५.७५-७६
पुरुषः......प्रकृतिजान् गुणान् ।	भ. गी. १३.३१	७.२५
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।	ऋ. वे. १०.९०.२	१६.३१, १९.८४-८५
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ।	कठ. उ. ३.७	१२.४०-४१
पुर्यष्टकं नाम......सूक्ष्मो देहः ।	सर्व.द.सं. पृ.१८४	१६.५१
पूजयन्निष्टलिङ्गं......छिनत्ति सः ।	चं. आ., उ. भा., क्रि.पा. ६.४६-४७	९.८-९, १०.४४
पूजयन्निष्टलिङ्गं तु....तस्माल्लिङ्गं प्रपूजयेत् ।	चं. आ., उ. भा., क्रि.पा. ३.४८-५०	९.६७
पूजयेद्भावपुष्पैर्यः भावलिङ्गीति कथ्यते ।	सि. शि. १५.४१	१५.३७
पूर्णमदः पूर्णमिदं......पूर्णमेवावशिष्यते ।	ईश.उ. शान्तिमन्त्रः	१४.३०, १६.६२, १६.७९
पूतं प्रातरुदयाद् गोमयं ब्रह्मपर्णे निधाय ।	भ. जा. उ. १	७.१३-१७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
पूर्वमेकार्णवे......लिङ्गसंज्ञकम् ।......	चं. आ., उ. भा., क्रि. पा. ३.५-८	१२.३३
पूः स्त्री पुरी......पुरम् ।	अमर. १.२१	७.४५-४६
प्रकृतिर्नाम....वर्तमानजन्मादावभिव्यक्तः ।	भ. गी. ३.३३ — शां. भा.	१८.१२-१४
प्रजहाति यदा......प्रज्ञा प्रतिष्ठिता ।	भ.गी. २.५५-५७	११.३९-४०
प्रज्ञानं ब्रह्म ।	ऐ. उ. ५.३	१.१, १२.३६, १३.२५, १९.७०-७१
प्रतियिल्लद लिङ्गवु.....चन्नसङ्गमदेव। (कन्नड)	चन्नबसवण्ण. व. सं. ६५३	६.२७-२८
प्रत्ययैकतानता ध्यानम् ।	यो. सू. ३.२	१६.१७
प्रत्यवमर्शात्मासौ......सत्यहन्ता ।	विरू. प. ९	१४.३९
प्रपञ्चोपशमं शान्तं...... ।	माण्डूक्य. ७	२.३-६
प्रमाणातीतमचलं...... ।	पार. आ. २१.२४	२.३-६
प्रमादात् पतिते......प्राणं परित्यज ।	सू. आ., उ. भा., क्रि. पा. ५.४८	६.१७-१८
प्रयोजनम् ।	पा.अ. ५.१.१०९	९.८८
प्रलयाकलेषु......निखिलासु कर्मवशात् ।	सर्व.द.सं. पृ.१८४	१६.५१
प्रसादपात्रं यः स हि......गुरुसत्कृपाम् ।	चं. आ., उ. भा., क्रि. पा. २.९६	१५.२८-२९
प्राणान् प्रपीड्येह......धारयेताप्रमत्तः ।	श्वे. उ. २.९	१७.२४
प्राणान् सर्वान्......प्रणवः ।	अथ. शिखा. उ. १.१०	८.२०
प्राणायाम समायुक्तः......जप उच्यते ।	चं. आ., उ. भा., क्रि. पा. ३.४०	८.२४-२६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
प्राणे लिङ्गं......सदा भव ।	का. आ., उ. भा., क्रि. पा. १.१०५	६.२६
प्राणेष्वन्तर्मनसो लिङ्गमाहुः ।	अथ. शिर. उ. ६६	१२.६
प्राणेष्वन्तर्मनः स्थानं.....मुख्यं महेशितुः ।	चं. आ., उ. भा., क्रि. पा. ३.३५-३६	६.३९
प्राप्य वरान् निबोधत ।	कठ. उ. ३.१४	५.७५-७६
प्लवा ह्येते अदृढा......पुनरेवापि यन्ति ।	मुं. उ. १.२.७	१५.३४, १६.२८
बळसदिरद्वैतवनु......मनदोळेको-भावदिंदिरु । (कन्नड)	सर्पभूषण शिवयोगी	१४.१८
बहिर्यागरतानां......सदाशिवः ।	सू. आ., उ. भा., क्रि. पा. ६.३१	९.२२-२४
बाह्यादाभ्यन्तरं......भवेच्छतगुणाधिकम् ।	पार. आ. १२.२१	९.८-९
बाह्याभ्यन्तरविषयापेक्षी चतुर्थः ।	यो. सू. २.५१	१७.२५
बाह्ये चाभ्यन्तरे......निष्ठां समाचरेत् ।	पार. आ. १२.२०	९.८-९
बिन्दुनादात्मकं......जगत् ।	सू. आ., उ. भा., क्रि. पा. ३.१२	११.३२
बिन्दुनादात्मकं.....नादरूपः शिवः पिता ।	चं. आ., उ. भा., क्रि. पा. ३.१६-१७	१२.४५-४६
बुद्धियुक्तो जहातीह....गच्छन्त्यनामयम् ।	भ. गी. २.५०-५१	१६.७०
ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ।	यो. सू. २.३८	१६.५९
ब्रह्मण उपलब्ध्यधिष्ठानम् ।	छां. उ. ८.१.१	१९.५६-५७
ब्रह्मणः सृष्टिकर्तृकं फलम् ।	पद्म. पु.	११.३३
ब्रह्मण्याधाय......नैष्ठिकीम् ।	भ. गी. ५.१०-१२	१६.७४
बृहच्च तद्दिव्यम्......गुहायाम् ।	मुं. उ. ३.१.७	१५.५०
बोधयुक्तो विशुद्धात्मा......इति धारयत् ।	भ. गी. ५.७-९	१४.१७
ब्रह्म तं परादाद्......सर्वं वेद...... ।	बृ. उ. २.४.६	१८.४६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
ब्रह्मभूतः प्रसन्नात्मा......लभते परान् ।	भ. गी. १८.५४	१३.२०, १८.४८
ब्रह्मविदाप्नोति परम् ।	तै. उ. २.१	१४.२
ब्रह्म वेद ब्रह्मैव भवति ।	मुं. उ. ३.२.९	१४.२, १९.७९
ब्रह्मविष्ण्वादयो......अवाप्नुयुः ।	स्कन्द. पु.	११.३३
ब्रह्मविष्णुरुद्रेन्द्राः......परित्यज्य ।	अथ. शिखा. उ. ४	१०.९, १०.५२
ब्रह्मा च......देवताश्च प्रकीर्तिताः ।	बृ. जा. उ. ४.२६	७.३१-३२
ब्रह्मादिस्तम्बपर्यन्तं......कर्ममलादिकम् ।	सू. आ., उ. भा., क्रि. पा. ५.३०	५.४१-४३
ब्रह्माद्याः स्थावरान्ताश्च......पशून् पतिः ।	चं. आ., उ. भा., क्रि.पा. १.१०-११	५.४१-४३
ब्रह्मैवेदममृतं......वरिष्ठम् ।	मुं. उ. २.१.११	१६.३१, १७.९, १९.६७-६९
ब्रह्मैवेदं सर्वम् ।	छां. उ. ७.२५.२	१३.२८, १६.३१, १९.५३, १९.८४-८५
ब्रह्मैव सन् ब्रह्माप्येति ।	बृ. उ. ४.४.६	१४.२, १६.३१
ब्राह्मणा क्षत्रिया......न संशयः ।	पार. आ. २.५८	१२.५४
भकाराद्भव इत्युक्तः......इत्युच्यते बुधैः ।	सू. आ., उ. भा., क्रि. पा. ९.४०	११.४५
भगश्श्रीकाम......कीर्तिषु ।	अमर. ३.१८३	१०.११-१२
भक्तस्थले क्रियाशक्ति.....समरसाख्यया ।	का. आ., उ. भा., क्रि.पा. ७.६०-६५	९.७०-७१
भक्तस्य सकलं......करपङ्कजम् ।	पार. आ. १३.८, १०, १६	६.५४-५५
भक्तिर्माता पिता......स्यात् विमुच्यते ।	पार. आ. ६.४४-४७	११.५१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
भक्त्यभ्यासात्.....सिद्धो विमुच्यते ।	पार. आ. २२.६१	१७.६७
भक्तो माहेश्वरश्चैव.....मम प्रियम् ।	पार. आ. ६.८	५.२८
भस्मज्योतिः......शिवदर्शनमश्नुते ।	चं. आ., उ. भा., क्रि. पा. ६.६४-६६	७.३८-३९
भस्मना विहितं......उत्तमम् ।	का. आ., उ. भा., क्रि. पा. ३.४४	७.२२
भस्मस्नानविधिं......ब्रह्मभिः पुनः ।	चं. आ., उ. भा., क्रि. पा. ६.३७-३९	७.१९-२१
भस्मेदं......शिवदर्शनमश्नुते ।	चं. आ., उ. भा., क्रि. पा. ६.६६	७.१-२
भावग्राह्यमनीडाख्यं......ये विदुस्ते जहुस्तनुम् ।	श्वे. उ. ५.१४	९.५५
भावप्रणेष्टलिङ्गानि......यतः ।	सू. आ., उ. भा., क्रि. पा. ६.४४	९.८-९
भावप्राणेष्टलिङ्गानि पूजयेदेकभावतः ।	सू. आ., उ. भा., क्रि. पा. ६.४४	६.३६
भावप्राणेष्टलिङ्गानि पूजयेत्......पूजनम् ।	सू. आ., उ. भा., क्रि. पा. ६.४४-४७	१५.४७
भावो मानसचेष्टात्मा परिपूर्णः शिवात्मकः ।	सि. शि. १६.६८	१८.४४
भासनाद्भसितं......रक्षकरी यतः ।	पार. आ. १७.६०-६१	७.४-५
भिद्यते हृदयग्रन्थिः......दृष्टे परावरे ।	मुं. उ. २.२.८	१७.८१
भिषक्तमं त्वा भिषजां श्रृणोमि ।	ऋ. वे. २.३३.४	११.१२
भुवो भावे ।	पा. अ. ३.१.१०७	२०.४०
भूरेर्दातारं......भेषजा रास्यस्मे ।	ऋ. वे. २.३३.१२	१३.३१
भोक्ता भोग्यं प्रेरितारं च......ब्रह्ममेतत् ।	श्वे. उ. १.१२	५.३७-३८, ९.८३, १०.४१, ११.७४, १६.७५, १७.५४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
भ्रमद्भ्रमरचिन्तायां......भवेद् ध्रुवम् ।	वी. आ.	९.१४
मत्प्रसादमना देवि गुरुमेव शरणं व्रजेत् ।	सू. आ., उ. भा., क्रि. पा. ५.१३	१५.२८-२९
मदर्पितं प्रसादैक......वर्ण्यते कथम् ।	चं. आ., उ. भा., क्रि.पा. ५.३३-३४	११.२३-२४
मन एव......बन्धमोक्षयोः ।	ब्रह्म. बिं. उ. २	११.६, १४.१४-१५, १७.५२
मनः संयम्य......आशीत मत्परः ।	भ. गी. ६.१४	१७.२२
मनोदृश्यमिदं द्वैतं......द्वैतं नैवोपपद्यते ।	माण्डूक्य. ३.३१	१४.३६
मनसैवानुद्रष्टव्यं......नानेव पश्यति ।	बृ. उ. ४.४.१९	१९.४९
मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन......गौतम ।	कठ. उ. ४.११,१५	१५.१८, १७.१७-१८
मन्त्रान्तरेषु......भवन्ति हि ।	चं. आ., उ. भा., क्रि.पा. ८.९२	८.५-६
मन्त्राणामपि......पञ्चाक्षरी शिवे ।	सू. आ., उ. भा., क्रि.पा. ३.५-६	८.११-१२
मन्त्रस्त्वक्षरतः......संस्थितस्तयोः ।	पार. आ. ११.१७-१८	८.५-६
मन्थानो मन्थदण्डकः ।	अमर. २.६६३	१९.१२
मन्मना भव......प्रियोऽसिमे ।	भ. गी. १८.६५	९.२९-३३
ममापरावताराणां......दिवसं वसेत् ।	सू. आ., उ. भा., क्रि.पा. ६.६७-७०	९.३६
ममैवांशो जीवलोके जीवभूतः सनातनः।	भ. गी. १५.७	२.२२, ५.३३-३५, १५.१५-१७, १८.११
मयत्यस्माज्जगद्विश्वं माया तेन समीरिता ।	पौ. आ. मायापटलः १	२.२, ८.३३, १२.११

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।	भ. गी. ९.४	१३.१८
महाप्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः ।	श्वे. उ. ३.१२	१८.६१
महालिङ्गं त्रिधा......त्रिविधं मतम् ।	चं. आ., उ. भा., क्रि. पा. ३.२३	६.३६
महालिङ्गं प्रसादाख्यं......माया ।	अनु. सू. ३.१८-२०	५.२२
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।	भ. गी. २.४७	१६.१२
मा गृधः कस्यस्वीद्धनम् ।	ईश. उ. १	१६.५९
मात्तौ गौ चेच्छालिनी वेदलोकैः ।	आप्टे. पृ. ६५१	१६.८४
मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।	पा. अ. ८.२.९	१०.११-१२
मायामात्रमिदं द्वैतं......द्वैतं न विद्यते ।	माण्डूक्य. १.१७-१८	१९.१२
मायां तु प्रकृतिं विद्यान्मायिनं च महेश्वरम् ।	श्वे. उ. ४.१०	१.९, ९.५३, १२.३७, १८.६३
मुधैव चेष्टामात्राः ।	भ. गी. ४.१९ – शं.भा.	१४.२१
मूलं विद्या......मुनयो मनोः ।	पार. आ. ११.४४	८.२३
मूलं विद्या......पञ्चाक्षरस्तथा ।	चं. आ., उ. भा., क्रि. पा. ८.१७	८.२३
मृगयित्वापि......त्यजेद्देहमतन्द्रितः ।	पार. आ. १५.१४	६.२७-२८
मेधावी ज्ञानविज्ञानतत्परः ।	अमृत. बिं. उ. १८	१६.२४
मोघमन्नं विन्दते......केवलादी ।	ऋ. वे. १०.११७.६	१६.५९
मोक्षदः करुणोपेतो वीतरागो विमत्सरः ।	चं. आ., उ. भा., क्रि. पा. २.४९	१३.२७
मोक्षमेव धारणं विद्यात् ।	लिङ्ग. उ., उ. सं., द्वि. भा., पृ. ३११	६.५१
मोक्षस्य दीक्षासम्प्राप्त्यै......भवन्त्यलम् ।	चं. आ., उ. भा., क्रि. पा. २.५	९.५४, ११.१९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
य इदं त्रिपुण्ड्रं....सर्ववेदाध्ययनजन्यफलम् ।	श्रुतिः – उल्लेखः – त. प्र.	७.३८-३९
य ओंकारः......स महेश्वरः ।	अथ. शिर. उ. ३	८.१८
य एवं वर्तते......तदकैतवम् ।	पार. आ. १७.८३-८५	१०.५१
यः सर्वज्ञः सर्वविद्यस्य......ज्ञानमयं तपः ।	मुं. उ. १.१.९	२.३-६
यः सर्वज्ञः सर्वविद्यस्य......व्योमन्यात्मा प्रतिष्ठितः ।	मुं. उ. २.२.७	१९.६४
यः पृथिव्यां तिष्ठन्......अमृतः ।	बृ.उ. ३.७.३-२३	१०.५१
यज्ञकर्मणि व्यापृतानां....ज्ञानवर्जितत्वात् ।	मुं. उ. १.२.७ – शां. भा.	१६.२८
यतः प्रवृत्तिः......विन्दति मानवः ।	भ. गी. १८.४६	१६.२३
यतीनां च वनस्थानां......विद्यते ।	चं. आ., उ. भा., च. पा. ६.१३	९.४३
यतेन्द्रियमनो......मुक्त एव सः ।	भ. गी. ५.२८	१४.५
यतो वाचो......मनसा सह ।	तै. उ. २.४, ब्र. उ. २२	१२.२२-२३, १८.४७, १९.९
यतो वा इमानि......तद्ब्रह्म ।	तै. उ. २.१	६.३७, ११.२७-२९, १२.४०-४१
यत्तदद्रेश्यमग्राह्यं.....परिपश्यन्ति धीराः ।	मुं. उ. १.१.६	१०.६०
यत्र हि द्वैतमिव.....केन विजानीयादिति ।	बृ. उ. २.४.१४	१८.५०, २०.२७
यत्र सुप्तो न कश्चन......तृतीयः पादः ।	माण्डूक्य. १.५	१३.१२
यत्रोपरमते......पश्यन्नात्मनि तुष्यति ।	भ. गी. ६.२०	१७.२२
यथाऽऽदर्शे तथात्मनि ।...... ब्रह्मलोके ।	कठ. उ. ६.५	११.६५, १२.४७, १३.२६, १५.७०, १६.१८, १६.१९-२०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
यथा गार्ग्य मरीचयो.....मनस्येकीभवन्ति ।	प्र. उ. ४.२	१८.३१
यथा गुरुस्तथैवेशो......देवस्य चात्मना ।	यो. शि. उ. ४.५८-५९	१९.१३
यथा दीपो निवातस्तु नेङ्गते सोपया स्मृता ।	भ. गी. ६.१९	१७.२४
यथा नद्यः स्यन्दमानाः......पुरुषमुपैति दिव्यम् ।	मुं. उ. ३.२.८	१८.३२, १९.७९, २०.६१-६२
यथा नृपः......तद्धर्मधर्मितः ।	शि. दृ. शा. १.३७	१८.११
यथा न्यग्रोधबीजस्थः.....जगदेतच्चराचरम् ।	प. त्रि. २	२०.४१
यथा पुष्करपलाशः......न श्लिष्यते ।	छां. उ. ४.१४.३	१६.८३, २०.४२
यथा सुदीप्तात्......चैवापि यन्ति ।	मुं. उ. २.१.१	२.३-६, ५.३३-३५
यथा सोम्य......विज्ञानं स्यात् ।	छां. उ. ६.१.४	२०.१०
यथैधांसि समिद्धोग्निर्......कुरुते तथा ।	भ. गी. ४.३७	१६.२६, १७.४७
यथोर्णनाभिः......संभवतीह विश्वम् ।	मुं. उ. १.१.७	२.७, १०.६५-६६
यदपां क्रूरं यदमेध्यं......तदपगच्छतात् ।	तै. आ. ७.१	१६.२१
यदा चर्मवदाकाशं......भविष्यति ।	श्वे. उ. ६.२०	१८.६०
यदा तमस्तन्न....तस्मात् प्रसृता पुराणी ।	श्वे. उ. ४.१८	१.३
यदादित्यगतं......विद्धि मामकम ।	भ. गी. १५.१२	१९.६७-६९
यदात्मतत्त्वेन......मुच्यते सर्वपाशैः ।	श्वे. उ. ३.१५	१२.२९, १८.१९
यदा पश्यः......परमं साम्यमुपैति ।	मुं. उ. २.१.३	१५.७१
यदा विनियतं......इत्युच्यते सदा ।	भ. गी. ६.१२	१७.२४
यदा सर्वे प्रमुच्यन्ते......समश्नुते ।	कठ. उ. ६.१४, बृ. उ. ४.४.७	५.५२-५४
यदिदं लिङ्गं......कारणे तत्परं च ।	सदा. उ., उ. सं., द्वि. भा., पृ. ३७९	६.४९-५०
यदिदं लिङ्गं......शक्यते गुरोः ।	चं. आ., उ. भा., क्रि. पा. ८.७४	८.३४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
यद्धि मनसा ध्यायति....तत्कर्मणा करोति ।	बृ. जा. उ. १.१	११.४६
यद्यदाचरति श्रेष्ठः......लोकस्तदनुवर्तते ।	भ. गी. ३.२१	१५.७१
यद्भोग्यं भोजकं नैकं......इष्यताम् ।	पौ.आ. मायापटलः ३३-३४	८.३३
यमिनां पुष्पितां......न विधीयते ।	भ.गी. २.४२-४४	९.८१
यमेवैष वृणुते......तनूं स्वाम् ।	कठ. उ. २.२३	५.५२-५४, ११.४७
यस्तु विज्ञानवान्....सदश्वा इव सारथेः ।	कठ. उ. ३.६	१७.१४, १७.३९
यस्तु सर्वाणि भूतानि....एकत्वमनुपश्यतः ।	ईश. उ. ६-७	१६.६२
यस्य कस्यचित्......भस्मज्योतिरिति ।	बृ. जा. उ. ७.१४	७.१-२
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैता......महात्मनः ।	श्वे. उ. ६.२३, यो. शि. उ. २.२२	११.२४, १७.६०, १८.६९-७१
यस्य सर्वे समारम्भाः......पण्डितं बुधाः ।	भ. गी. ४.१९	१४.२१, १९.३०
या च कुण्डलिनी......मृत्तिका यथा ।	पौ.आ. बिन्दुपटलः ३०-३१	१.१०
या ते रुद्र......अघोराऽपापकाशिनी ।	तै. सं. ४.५.१.१, श्वे. उ. ३.५	६.६२, १०.६१, १०.७६
यान्यनवद्यानि कर्माणि......सेवितव्यानि नो इतराणि ।	तै.उ. १.११-१२	१६.५
या निशा सर्वभूतानां......सा निशा पश्यतो मुनेः ।	भ. गी. २.६९	१९.२३
याऽस्य प्रथमा......भस्मना करोति ।	जा. उ., उ. सं. द्वि. भा. पृ. ६२८	७.३३-३४
युक्त इत्युच्यते.....समलोष्टाश्मकाञ्चनः ।	भ. गी. ६.८	१७.६०
युक्ताहारविहारस्य......योगो भवति दुःसहा ।	भ. गी. ६.१७	१७.२४

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
युञ्जन्नेवं सदात्मानं......पश्यन्नात्मनि तुष्यति ।	भ.गी. ६.१५-२०	१७.२२
युवं वस्त्राणि पीवसा ।	ऋ. वे. २.२.२२	१६.२१
युवोरनाकौ ।	पा. अ. ७.१.१	८.१, ८.१०, ८.१३, ८.२७-२९, १०.८, ११.१२, १५.१६-१७, १६.२७, १९.७
येयं प्रेते विचिकित्सा......वरस्तृतीयः ।	कठ. उ. १.२०	१५.२१
ये पश्यन्ति जगज्जालं......शिवयोगिनः ।	सि. शि. ११.३७	१३.१८
योगः कर्मसु कौशलम् ।	भ. गी. २.५०	१६.८, १६.१२
योगयुक्तो......कुर्वन्नपि न लिप्यते ।	भ. गी. ५.७	१९.३३
योगश्चित्तवृत्तिनिरोधः ।	यो. सू. १.२	१०.२६, १२.१६, १२.२१, १६.२०
योगसंन्यस्तकर्माणं......धनञ्जय ।	भ. गी. ४.४१	५.१९-२१
योगाङ्गैक्यं शरणस्थलं......पारमार्थिकैः ।	अमु.सू. ४.१२-१३	५.२२
योगिनः कर्म कुर्वन्ति......त्यक्त्वात्मशुद्धये ।	भ. गी. ५.११	१९.३४
यो गुरुः स शिवः......संज्ञितः ।	चं. आ., उ. भा., क्रि. पा. २.७	९.५३, १५.२५-२६, १७.६१-६२
यो देवानां प्रभवः......महर्षिः ।	श्वे. उ. ३.४	१०.८
योऽन्तःशिखो......ब्रह्मभूतोऽधिगच्छति ।	भ. गी. ६.२४	१४.५
यो ब्रह्माणं विदधाति पूर्वं......प्रपद्ये ।	श्वे. उ. ६.८	२.१५, १२.३३, १८.५६
यो भूमा तत्सुखम्, नाल्पे सुखमस्ति ।	छां. उ. ७.२३.१	१९.९, १९.१६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
यो विद्वान्......न स पुनरावर्तते ।	जा. उ., उ. सं., प्र. भा. पृ. ६२१	७.३८-३९
यो वै भूमा तदमृतम् ।	छां. उ. ७.१४.१	१९.९, १९.११
यो वै भूमा तत्सुखम् ।	छां. उ. ७.२.३	१५.४९
रजकश्चर्मकारश्च......चान्त्यजाः स्मृताः ।	....	११.७२
रसायनो विहङ्गमे......औषधे ।	हैमः	११.१२
रागी कमफलप्रेप्सुर्......राजसः परिकीर्तितः ।	भ. गी. १८.२७	१३.१८
राजाहःसखिभ्यष्टच् ।	पा. अ. ५.४.९१	३.५७-६५, ४.४५-५४
रुद्रस्य नयनाद्......रुद्राक्षत्वमिति ।	बृ.जा.उ. ७.४-५	७.४५-४६
रुद्राक्षधारणात्......प्रमुच्यते ।	रु. जा. उ. ४४	७.५७-५८
रुद्रेणात्तममृतं......कामयन्ते ।	उल्लेखः – एन्नार्	९.७५
रुद्रेणात्तमश्नन्ति......जिघ्रन्ति ।	जाबालिकी श्रुतिः, उल्लेखः - त. प्र.	९.७०-७१
रो रि ।	पा. अ. ८.३.१४	१२.९
रौद्रं लिङ्गं......औषधे ।	पारा. पु.	११.३३
लयादि भेदः......बिन्दुरिति गम्यताम् ।	पौ. आ. बिन्दु-पटलः, १-३	८.३३
लिकारो लयबुद्धिस्थो......लिङ्गमुदीरितम् ।	सू. आ., उ. भा., क्रि. पा. ६.५-६	६.३७
लोके हि पञ्चधा......पञ्चाक्षरमयनिहि ।	सू. आ., उ. भा., क्रि. पा. ४.६०	८.१६
लोपः शाकल्यस्म ।	पा. अ. ८.३.१९	१९.८२
लिङ्गधारणतत्पूजा......स्यादितितुल्यम् ।	लिं.धा.चं. ५.१९८	९.४४
लिङ्गं पतिः सती चाहं......वीरशैविनाम् ।	सू. आ., उ. भा., क्रि. पा. ७.५२	१३.२

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
लिङ्गं ब्रह्म सनातनम् ।	सि. शि. ६.२६	१५.४६
लिङ्गभक्तिर्लिङ्गपूजा......लिङ्गनिष्ठेति गीयते ।	सू. आ., उ. भा., क्रि. पा. ९.४-९	९.२७
लिङ्गस्थलं त्रिधा ज्ञेयं......त्रिविधं स्मृतम् ।	अनु. सू. ३.५-६	१४.४१
लिङ्गाचारः......इति स्मृतः ।	चं. आ., उ. भा., क्रि. पा. ९.४-९	९.२७
लिङ्गादिनाशाद्दैवेन......पुनः ।	पार.आ. १५.४९	६.२७-२८
लिङ्गे प्राणं......ध्यात्वैकभावतः ।	सू. आ., उ. भा., क्रि. पा. ५.४.४	६.२४-२५
ल्युट् च ।	पा.अ. ३.३.११५	१६.२६
वदन्ति वर्ण्यावर्ण्यानां......दीपकं बुधाः ।	कु. आ. ४६	५.७१
वरं स्यादुत्तरोत्तरम् ।	सू.आ. उ. भा., क्रि. पा. ३.४३	८.३१-३२
वर्णाश्रमधर्माणां......कदाचन ।	सि. शि. १०.३५-३८	१४.२०
वर्तमानेऽपि देहे....जीवन्मुक्तस्य लक्षणम् ।	वि. चू. ४८३-४८६	१७.५७
वाचा वक्तुम्......अस्मि विलक्षणः ।	वि. चू. ४८३-४८६	१७.३१-३२
वायुर्यथैको भुवनं......प्रतिरूपो बहिश्च ।	कठ. उ. ५.१०	१९.६०-६३
वालाग्रशतभागेन......चानन्त्याय कल्पते ।	श्वे. उ. ५.९	१८.६
विकल्परहितं तत्त्वं...... ।	स्कन्द. पु., शैव. प. पृ. २९	२.३-६
विकल्परहितं शैवं वीरशैवं प्रचक्षते ।	क्रि. सा., भाग-२, पृ. ११	९.५०
विज्ञानमनन्दं ब्रह्म ।	बृ. उ. ३.९.२८	१५.४९, १८.७३, १९.१९, १९.६७-६९, १९.७०-७१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
विज्ञानसारथिर्यस्तु......परमं पदम् ।	कठ. उ. ३.९	११.६
वितर्काहिंसादयः......प्रतिपक्षभावनम् ।	यो. सू. २.३४	१६.५९
वित्तशाट्यं......परमां गतिम् ।	चं. आ., उ. भा., क्रि. पा. २.७१	९.७९
विदो लटो वा ।	पा. अ. ३.४.८३	९.१७
विद्याविनयसम्पन्ने......समदर्शिनः ।	भ. गी. ५.१८	१४.१८, १५.५२-५५
विद्यासु श्रुतिर्......शिव इत्यक्षरद्वयम् ।	का. आ., उ. भा., क्रि. पा. ८.४	८.२
विधियज्ञाज् जपयज्ञो......मानसः स्मृतः ।	मनु. २.८४	८.२७-२९
विविक्तदेशे च......ब्रह्मयोनिम् ।	कै. उ. ५	१७.५
विशब्दो वा......रहितार्थकः ।	क्रि. सा., भाग-१, ५.११	९.५०
विश्वाधिको रुद्रो महर्षिः...... ।	श्वे. उ. ३.४	२.१४, ११.३४
विषय्यभेद......रूपकं तत् ।	कु. आ. २७	१.१
विष्णोः पदे परमे मध्व उत्सः ।	ऋ. वे. १.१५४.५	११.६३
विष्टभ्याहमिदं......स्थितो जगत् ।	भ. गी. १०.४२	१८.११
वीरत्वं नाम......शिवयोगिनः ।	पार.आ. ८.७-१६	९.५०
वीरत्वमस्य......न परोऽस्ति कश्चित् ।	वी. घ. शि. १.१६	९.५०
वेत्तेर्लटः......वा स्युः ।	सि. कौ. सू. २४६४-वृत्तिः	९.१७
वेदा साङ्गाः......पुनस्ततः ।	सू. आ., उ. भा., क्रि. पा. ३.७५	८.२
वेदाहमेतं......विद्यतेऽयनाय ।	श्वे. उ. ३.८	१३.६-११
व्योमाकारं महासूक्ष्मं......क्रिमिर्यथा ।	देवी. आ. २४	१९.६५-६६
शक्तिः प्रवृत्तिराख्याता विवृत्तिर्भक्तिरीरिता ।	अनु. सू. २.२७	६.१०

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
शब्दस्पर्शरूप......तानि सन्ततम् ।	चं. आ., उ. भा., क्रि. पा. ५.२५-२७	९.७०-७१
शतं मा पुर......जवसा निरदीयम् ।	ऐ. उ. ४.५	५.५२-५४
शमो दमस्तितिक्षोपरतिः......ध्रुवम् ।	पार. आ. १०.७२-७३	१७.६०
शरीरमाद्यं खलु धर्मसाधनम् ।	कु. सं. ५.३३	११.६५
शान्तो वा कुपितो......जपेत् ।	पार. आ. १०.८७	८.३८
शम्भवव्रतशुद्धेषु......सर्वज्ञानैकसागर । (पार्वती)	म. आ., उ. भा., च. पा. १०.१-२, ५-७	९.४३
शम्भवव्रतशुद्धानां......इति निश्चिनु । (शिवः)		
शास्त्रज्ञोऽपि......अन्वेषणं कुर्यात् ।	मुं. उ. १.२.१२ – शां. भा.	१७.७१
शास्त्रपुरुषरिर......गुहेश्वर निम्म शरण । (कन्नड)	अल्लमप्रभु. व. सं. ११३	१०.७४
शिरोललाट......व्रतमेतच्छाम्भवम् ।	श्रुतिः – उल्लेखः – त. प्र.	७.३१-३२
शिव एको ध्येयः शिवंकरः...... ।	अथ. शिखा. उ. २	८.२, ८.४, १०.७९, ११.५८
शिव एव परं ब्रह्म......हि कीर्तितः ।	चं. आ., उ. भा., क्रि. पा. ९.७	१३.३३
शिवपञ्चाक्षरं जप्त्वा......न संशयः ।	पार. आ. १०.९५	८.३८
शिवदीक्षां विना......अभक्तितः ।	पार. आ. १.७६	६.६०-६१
शिवरुद्रादि शब्दानां......मनस्विनः ।	पार. आ. ११.२३-२५	८.१७
शिवमद्वैतं चतुर्थं स आत्मा स विज्ञेयः ।	माण्डूक्य. ७	१९.५३

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
शिवं शक्तिं च......समीरितौ ।	बृ. जा. उ. ४.१९-२०	७.३१-३२
शिवशक्त्यात्मकं जगत् ।	पार. आ. २१.५०	५.३२
शिवस्तु......परमेश्वरः ।	सू. आ., उ. भा., क्रि. पा. १.२३	२.२-६
शिवस्य शिवभक्तानां......शीलमुच्यते ।	चं. आ., उ. भा., क्रि.पा. ९.५६-५७	९.४१
शिवात् सत्यपरानन्द......चेतानात्मकम् ।	स्कन्द. पु. शै. प. पृ. ३७	२.८
शिवेन भुक्तं......धर्मः सनातनः ।	चं. आ., उ. भा., क्रि. पा. ५.२२	९.७०-७१
शिवोक्तां जाति......इति ज्ञेयः ।	शं.सं., वी.ध.शि.	९.२९-३३
शिवो मे अस्तु सदाशिवोम् ।	तै. आ. ७.४७	८.१७
शिष्यमस्तके......सम्पूजयेत् ।	सि. शि., त. प्र.	६.२३
शीर्षकि......प्रतीष्ठायाम्...... ।	बृ. जा. उ. ४.२२-२३	७.३१-३२
शीर्षे कण्ठे......मुख्यमुक्तम् ।	सि.शि.उ., उ.सं., द्वि.भा., पृ.३८२	६.५२
शुद्धस्फटिवर्णाय......सुखरूपिणे ।	पार. आ. ६.८०, ८१, ९६, १००	२.९-१२
शुद्धस्फटिकसंकाशः......लिङ्गार्चने रतः ।	उल्लेखः – एन्नार्	२०.२४
शुद्धत्वाच्छिवमुद्दिष्टम् ।	वा.शु.आ. १.२२	
शुक्तिः शङ्खनके शङ्खे कपालखण्डद्रुग्रजोः ।	हैमः	१७.७७
शैवीं कलां......मूलमन्त्रमनुस्मरन् ।	का. आ. उ. भा., क्रि. पा. १.१२०	६.१३-१४
श्रद्धावान् लभते ज्ञानं......अधिगच्छति ।	भ. गी. ४.३९	१३.१५-१६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
श्रेयश्च प्रेयश्च......वृणीते।	कठ. उ. २.२	११.२३, १६.६४
श्रयान् द्रव्यमयाद् यज्ञात्......।	भ. गी. ४.३३	१७.४७
श्रेयोऽर्थी यदि......ज्ञानसंपत्तिमश्नुते।	चं. आ., उ. भा., क्रि. पा. २.१०	१७.६५
श्रोणः पङ्गौ।	अमर. २.३१४	१६.११
श्रोत्रियाय......धारणान्नरः।	चं. आ., उ. भा., क्रि. पा. ७.६-७	७.६१
श्लोके षष्ठं गुरुं......दीर्घमन्ययोः।	आप्टे. पृ: ६४९	१.१
श्वश्श्रेयसं शिवं......शुभम्।	अमर. १.१४९	८.९
षडक्षरेण मन्त्रेण......अवाप्नुयात्।	सू. आ., उ. भा., क्रि. पा. ३.५५	८.३४
स एको रुद्र स ईशानाः......।	अथ. शिर. ४४	१.७
संवित्तिजननं......आनन्ददर्शकः।	चं. आ., उ. भा., क्रि. पा. १.५५	१३.१७
संसारदावदहनज्वाला......तत्सदृशो भवेत्।	सू. आ., उ. भा., क्रि. पा. ५.१४	९.४५, १७.६३-६४
स एव सर्वं......विमुक्तये।	कै. उ. ९	१०.११-१२
सक्ता कर्मण्यविद्वांसो......लोकसङ्ग्रहम्।	भ. गी. ३.२५	१०.३९-४०
सच्चित्सुखमयं......भावलिङ्गं प्रकीर्तितम्।	चं. आ., उ. भा., क्रि. पा. ३.३७	१५.४५
सत्यं ज्ञानम् अनन्तं ब्रह्म।	तै. उ. २.१	१.१, १६.७६, १८.७३, १९.२७, १९.६७-६९
सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।	यो. सू. २.३६	१६.५९
सत्यं ब्रूयात्......एष धर्मः सनातनः।	मनु. ४.१३८	१६.५९
सत्यमेव जयते नाऽनृतम्।	मुं. उ. ३.२.६	१६.५९

CC-0 . Jangamwadi Math Collection. Digitized by eGangotri

१	२	३
सदृशं चेष्टते......निग्रहः किंकरिष्यति ।	भ. गी. ३.३३	१८.१२-१४
सदेव सोम्य इदमग्र आसीत् ।	छां. उ. ३.१४.२	२.७, १९.४८
सद्योजातादि......न पुनर्भवाय ।	जा. उ., उ. सं., प्र. भा., ५.६२८	७.३३-३४
सनातनेऽच्युते । पितॄणां......शाश्वते ।	हैमः	५.५७-५८
सन्मूला सेम्येमाः सर्वाः प्रजाः ।	छां. उ. ६.८.४	२.७, १९.६७-६९
स ब्रूयान्नास्य जरया.....तमेवोपजीवन्ति ।	छां. उ. ८.१.५	१८.५
स भूमिं विश्वतो.....अत्यतिष्ठद्दशाङ्गलम् ।	ऋ. वे. १०.९०.१	२.३-६, १६.१८, १७.५५
समः शत्रौ......समः सङ्गविवर्जितः ।	भ. गी. १२.१८	१७.६०
समर्पणं द्विधा......सूक्ष्ममीरितम् ।	चं. आ., उ. भा., क्रि. पा. ५.२८-३१	९.७०-७१
समर्पितं प्रसादैक......पावित्र्यंदायकः ।	चं. आ., उ. भा., क्रि. पा. ५.३३, ३५	९.६७
समाश्रयेद् गुरुवरं......मोक्षमवाप्नुयात् ।	सू. आ., उ. भा., क्रि. पा. ५.२२	१५.२८-२९
समाः स्निग्धाः दृढाः......विवर्जयेत् ।	रु.जा.उ. ११-१२, चं. आ., उ. भा., क्रि. पा. ७.१४	७.५०
समूलो वा एष परिशुष्यति....अभिवदंति ।	प्र. उ. ४.१	१६.५९
सम्भावना स्यादुत्प्रेक्षा ।	कु. आ. ३२	३.५६
स यथा दुन्दुभेः......शब्दो गृहीतः ।	बृ. उ. २.४.७-९	१८.४४
स यो ह वै......विमुक्तोऽमृतो भवति ।	मुं. उ. ३.२.९	१७.७९
सर्वकर्माणि मनसा......न कारयन्नास्ते ।	भ. गी. ५.१३	१६.६१
सर्वकर्मा सर्वकामः सर्वगन्धः...... ।	छां. उ. ३.१४.२	२.३-६

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
सर्वं खल्विदं ब्रह्म......शान्त उपासीत ।	छां. उ. ३.१४.१	३.३७, ९.८३, १२.४०-४१, १३.१८, १४.३३, १४.४९, १५.५७, १६.३१, १७.२६, १७.६८, १८.७५, १९.२३
सर्वचिन्तां समुत्सृज्य......विलीयते ।	नाद. उ. ४२	१२.१६-२०
सर्वज्ञः पञ्चकृत्यसम्पन्नः......पशुपतिः ।	जा. उ. २	५.४६-४८, १९.७९
सर्वतीर्थाभिषेकाच्च......गरीयसी ।	चं. आ., उ. भा., क्रि. पा. ४.३३	९.६२
सर्वदिवात्मकश्चासौ......ज्ञानसम्पत्तिं...... ।	चं. आ., उ. भा., क्रि. पा. २.९-१०	९.५६-५७
सर्वधर्मान् परित्यज्य......मा शुचः ।	भ. गी. १८.६६	१२.६२
सर्वपापोपशमनं......मुक्तिदायकम् ।	चं. आ., उ. भा., क्रि.पा. ५.२२-२४	९.६८
सर्वप्रयत्नेन तस्याज्ञां शिरसा वहेत् ।	चं. आ., उ. भा., क्रि. पा. २.९	१७.६५
सर्वभूतस्थमात्मनं......चित्सदाहम् ।	कै. उ. १०.१८-२१	२०.४०
सर्वमयस्तद्यदेतद्......तथा भवति ।	बृ. उ. ४.४.५	१६.१५
सर्वमावपनं भाण्डम् ।	अमर. २.६२	२०.१९
सर्वमिदं ब्रह्मविष्णु......सर्वेश्वरः शम्भुः ।	अथ. शिखा. ३.४	६.४५-४६, १९.८४-८५
सर्वव्यापिनमात्मानं......सर्पिरिवार्पितम् ।	श्वे. उ. १.१६	१९.६०-६३
सर्वाणि सर्वभूतानि......महमनोः ।	सू. आ., उ. भा., क्रि.पा. ४.५८-५९	८.१४-१५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
सर्वाणीन्द्रियाणि......ज्ञानदीपिते ।	भ. गी. ४.२७	१७.४६
सर्वा दिशः......अनड्वान् ।	श्वे. उ. ४.५	१९.६७-६९
सर्वाननशिरोग्रीवः......शिवः ।	श्वे. उ. ३.११	१.२
सर्वाधिष्ठानमद्वन्द्वं......न हि क्वचित् ।	रु.हृ.उ. ३.२६-२७	१७.८०
सर्वे कामा मनोगता......भवति ।	परम. उ., अन्तिमभागः	१९.२०
सर्वेभ्योऽन्तस्थानेभ्यो......प्रकाशः ।	अथ. शिखा. उ. २.४	८.२०
सर्वेभ्यो द्रव्ययज्ञेभ्यो......अभिवादयेत् ।	का. आ., उ. भा., क्रि. पा. ३.६२	९.२२-२४
सर्वो वै रुद्रः ।	म. ना. उ. १३.२	९.९१
स वा एष पुरुषोऽन्नरसमयः ।	तै. उ. २.१	७.२५
स वेदैतत् परमं......अतिवर्तन्ति धीराः ।	मुं. उ. ३.२.२	१६.४९
स वै नैव रेमे......स हैतावानास ।	बृ. उ. १.४.३	१८.११
साङ्ख्ययोगौ पृथग्बाला....विन्दते फलम् ।	भ. गी. ५.४	५.१९-२१
सामान्यगुरुमाश्रित्य......समाचरेत् ।	सू. आ., उ. भा., क्रि.पा.५.२७-२८	१३.२८-२९
साम्बं सर्व......विशन्ति ।	अप्रटिकितोपनिषदः, पृ. ३८०	८.४
सुखानुशायी रागः ।	यो. सू. २.९	१२.३०-३१
सुदीर्घेणाऽऽभ्यन्तरेण......अनुभूयते ।	स्वामी विवेकानन्दः	१७.२५
सुप्यजातौ णिनिस्ताच्छील्ये ।	पा.अ. ३.२.७८	११.७१
सुयजोर्ङ्वनिप् ।	पा.अ. ३.२.१०३	१४.४०
सूतके मृतके......त्रिकरणेरपि ।	म. आ., उ. भा., च. पा. १०.२८	९.४३
सूर्याश्वैर्यदि मः सजौ सततगयाः शार्दूलविक्रीडितम् ।	आप्टे., पृ. ६५५	३.८८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
सूर्योदये तमो......मूढधीः ।	सू. आ., उ. भा., क्रि.पा. ५.२३-२६	११.२४, १३.२३
सूर्योदये तमो यद्वत्......सत्सदृशो भवेत् ।	सू. आ., उ. भा., क्रि.पा. ५.२३.२४	१५.२५
सूर्यो यथा सर्वलोकस्य......न लिप्यते लोकदुःखेन बाह्यः ।	कठ. उ. ५.११	१९.६४
सोऽकामयत बहुस्यां प्रजायेयेति । स तपोऽतप्यत......तदेवानुप्राविशत् ।	तै. उ. २.६	१.३, २.८, १६.४४, १८.१०
सोम्य.....अहं तु ते....न श्लिष्यत इति ।	छां. उ. ४.१४.३	१४.२२
स्तेयं परस्वापहरणम्, तदभावोऽस्तेयम् ।	यो. सू. २.३७	१६.५९
स्थाणुरयं भारहारः......न विजानाति योऽर्थम् ।	नि. १.१८	१६.१९-२०
स्थावरं च......मानुषैर्भवेत् ।	चं. आ., उ. भा., क्रि. पा. ४.४-५	९.६०
स्थिरेभिरङ्गैः पुरुरूप उग्रः ।	ऋ. वे. २.३३.९	१.६
स्थीयते लीयते......स्थलतत्त्वविशारदैः ।	सू. आ., उ. भा., क्रि. पा. ५.५४	५.२२
स्थूलं तर्पयते......निबोधत ।	माण्डूक्य. उ. १.४	१३.१२
स्नानं कृत्वा......पञ्चाक्षरं जपेत् ।	चं. आ., उ. भा., क्रि.पा. ८.५.५२-५५, पार.आ. ११.७९-८३	८.२५-२६
स्यादिन्द्रवज्रा यदि तौ जगौ गः ।	आप्टे. पृ. ६५०	२.३३
स्वकर्मकाले संशुद्धिः......परित्यजेत् ।	चं. आ., उ. भा., च. पा. ६.२६	९.४३
स्वच्छन्दचारी......स उच्यते ।	सू. आ., उ. भा., क्रि. पा. ८.२०	१५.५७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२	३
स्वदेहमरणिं कृत्वा......योऽनुपश्यति ।	श्वे. उ. १.१४-१५	१२.२९
स्वप्नान्तं जागरितान्तं......न शोचति. ।	कठ. उ. ४.४	१६.२६, २०.५५
स्वरसवाही......अभिनिवेशः ।	यो. सू. २.९	१२.३०-३१
स्वशक्तिप्रचयो विश्वम् ।	शिव. सू. ३.३०	१६.४३
स्वशक्तिक्षोभमात्रेण......स्मृतम् ।	अनु. सू. २.१०	१४.४१
स्वस्थं शान्तं......सुखमुत्तमम् ।	माण्डूक्य. ३.४७	१८.६७
हन्त ते कथयामि......अप्रमादतः ।	का. आ., उ. भा., क्रि.पा. १०.३०-३६	६.२७-२८
हिंसाधातोः......कश्यपो यथा ।		८.८
हृदा मनीषा......भवन्ति ।	श्वे. उ. ३.२३, ४.२०	१९.१३, १९.६७-६९
हृदि प्राणो......सर्वशरीरगः ।	शब्द. कौ. भा. ४. पृ. १६७४ (पञ्चप्राण)	१२.६
हे ब्रह्मणस्पते......न अश्नुते ।	लिं. धा. चं. पृ. १२४, १३३	६.४९

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

परिशिष्टम् – ३

परामृष्टग्रन्थसूची अकारादि-संकेताक्षरसहिता

१ संकेताक्षराणि	२ ग्रन्थनामानि
अत्रि. सं.	अत्रिसंहिता – उल्लेखः - त. प्र.
अनु. सू.	अनुभवसूत्रम्, वीरशैवानुसन्धानसंस्थानम्, बेंगलूरु, २००३
अमर.	अमरकोशः एशियन् एजुकेषनल् सर्वीसस्, चेन्नै, १९८८
अ. व. सं.	अल्लमप्रभुदेवर वचनसंपुट, कन्नड प्राधिकार, बेंगलूरु
अ. वे.	अथर्ववेदः, स्वाध्यायमण्डली, परडि, महाराष्ट्र
अथ. शिखा. उ.	अथर्वशिखोपनिषत्, शैव उपनिषद्स् (पृ. १०), अड्यार् लैब्ररी अण्ड रिसर्च सेण्टर्, चेन्नै, १९८८
अभि. को.	अभिदानकोशः – उल्लेखः - त. प्र.
आप्टे	आप्टे – स्टूडेण्ट्स् संस्कृत-इंग्लिष् डिक्स्नरी, मोतिलाल् बनार्सिदास, देहली, १९७३
आ. य. प.	आपस्तम्बयज्ञपरिभाषा (सायणस्य ऋग्भाष्यभूमिका)
ई. उ.	ईशावास्य उपनिषत्, रामकृष्णाश्रम-प्रकाशनम्
उ. सू.	उणादिसूत्राणि, वैयाकरणसिद्धान्तकौमुदी, चौखाम्बा प्रकाशन, वाराणसी, २०१२
उ. भा.	उत्तरभागः
उ. सं.	उपनिषत् संग्रहः (सं. पण्डित जगदीश शास्त्री), मोतीलाल् बनार्सीदास, देहली, १९९८
ऋ. भा. भू.	ऋग्भाष्यभूमिका (सायणीया), वैदिक संशोधनमण्डलम्, पुणे, ऋग्वेदसंहिता, वाल्यूम्-१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
ऋ. वे.	ऋग्वेदः, स्वाध्यायमण्डली, परडि, महाराष्ट्र
एन्नार्	एन्. आर्. करिबसवशास्त्रिणः सिद्धान्तशिखामणीयं कन्नड-व्याख्यानम्
ऐ. आ.	ऐतरेयारण्यकम्, अरमने प्रकाशनम्, मैसूरु
ऐ. उ.	ऐतरेयोपनिषत्, शांकरोपनिषद्भाष्यम् (सं. हरिरघुनाथ भागवत) अष्टेकर अण्ड् को., पुणे, १९१८
क. क. च.	कन्नड कवि चरिते – संपुट-२
कठ. उ.	कठोपनिषत्, शांकरोपनिषद्भाष्यम्, (सं. हरि रघुनाथ भागवत) अष्टेकर अण्ड् को., पुणे; १९१८
का. आ.	कारणागमः, शैवभारती शोध प्रतिष्ठान, जंगमवाडी मठम्, वाराणसी, १९९४
कु. आ.	कुवलयानन्दः, निर्णयसागर प्रेस्, मुम्बै, १९०३
कु. सं.	कुमारसंभवम्, निर्णयसागर प्रेस्, मुम्बै
कू. पु.	कूर्मपुराणम्, नाग पब्लिषर्स, जवाहरनगर, दिल्ली, २००२
कै. उ.	कैवल्योपनिषत्, शैव उपनिषद्स्, अड्यार लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
क्रि. श.	क्रिस्तशके
क्रि. पा.	क्रियापादः
क्रि. पू.	क्रिस्तपूर्वम्
क्रि. सा.	क्रियासारः, ओरियेंटल् रिसर्च इन्स्टिट्यूट्, मैसूरु, १९८८
च. पा.	चर्यापादः
च. ब. व.	चन्नबसवण्णनवर वचनगळु, कर्नाटक विश्वविद्यालय, धारवाड, १९७१

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
चं. आ.	चन्द्रज्ञानागमः, शैवभारती शोध प्रतिष्ठानम्, जंगमवाडीमठम्, वाराणसी, १९९४
छां. उ.	छान्दोग्योपनिषत्, शांकरोपनिषद्भाष्यम् (सं. हरि रघुनाथ भागवत्), अष्टेकर अण्ड् को., पुणे, १९१८
जा. उ.	जाबल्युपनिषत्, उपनिषत्संग्रहः, भागः-१, पृ. ६२७
जाबाल. उ.	जाबालोपनिषत्, शैव उपनिषद्स्, अड्यार् लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
त. प्र.	तत्त्वप्रदीपिका (श्रीमरितोण्टदार्यस्य श्रीसिद्धान्तशिखामणि व्याख्या)
त. सं.	तर्कसंग्रहः (तर्कदीपिकासहितः), चौखाम्बा संस्कृत सीरीस्, वाराणसी
तै. आ.	तैत्तिरीयारण्यकम्, आनन्दाश्रम सीरीस्, पुणे
तै. उ.	तैत्तिरीयोपनिषत्, शांकरोपनिषद्भाष्यम् (सं. हरि रघुनाथ भागवत), अष्टेकर अण्ड् को., पुणे, १९१८
द. मू. उ.	दक्षिणामूर्त्युपनिषत्, शैव उपनिषद्स्, अड्यार लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
दासगुप्तः	दासगुप्तस्य हिस्टरी आप् इण्डियन् फिलासफी, वाल्यूम्स् १-५, मोतिलाल् बनार्सिदास् देहली, १९७५
देवी. आ.	देवीकालोत्तरागमः, शैव भारती शोध प्रतिष्ठानम्, जंगमवाडीमठम्, वाराणसी
नाद. बि. उ.	नादबिन्दूपनिषत्, उपनिषत्संग्रहः, भागः-१, पृ.२६३
नृ. उ. ता. उ.	नृसिंहोत्तरतापनीयोपनिषत्, उ.सं. भागः-१, पृ.२२७
पं. च.	पण्डिताराध्यचरित्र (तेलुगु), सं. चिलकूरि नारायणराव, आंध्र ग्रन्थमाला, आंध्र पत्रिका मुद्रणालय, चेन्नै, १९३९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
पञ्च. ब्र. उ.	पञ्चब्रह्मोपनिषत्, शैव उपनिषद्स्, अड्यार् लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
परम. उ.	परमहंसोपनिषत्, उपनिषत्संग्रहः, भागः-१, पृ. १६५
परा. त्रि.	परात्रिंशिकाशास्त्रम् (उल्लेखः – त. प्र.)
पा. अ.	पाणिनीया अष्टाध्यायी, वैयाकरणसिद्धान्तकौमुदी, चौखाम्बा संस्कृत सीरीस्, २०१२
पार. आ.	पारमेश्वरागमः, शैवभारती शोध प्रतिष्ठानम्, जंगम-वाडीमठम्, वाराणसी, १९९५
पौ. आ.	पौष्करागमः (उल्लेखः – त. प्र.)
प्र. उ.	प्रश्नोपनिषत्, उपनिषत् संग्रहः, भागः-१, पृ. १०
प्र. क.	प्रबुद्ध कर्नाटक (कन्नड), मैसूरु विश्वविद्यालयः, संपुट-२०, संख्या-४, १९४९
प्र. भा.	प्रथमभागः
प्र. हृ.	प्रत्यभिज्ञाहृदयम्, काश्मीरसंस्कृतग्रन्थावलीः, श्रीनगर, १९११
ब. व.	बसवण्णनवर वचनगळु (कन्नड), कर्नाटक विश्वविद्यालय, धारवाड, १९६८
ब्र. उ.	ब्रह्मोपनिषत्, उपनिषत् संग्रहः भागः-१, पृ. १६७
ब्रह्म. बि. उ. (अमृत. विं. उ.)	ब्रह्मबिंदूपनिषत्, उपनिषत् संग्रहः, भागः-१, पृ. १४१ (अमृतबिन्दूपनिषत्)
ब्र. सू.	ब्रह्मसूत्रम्, (सं. एम्. जि. नञ्जुण्डाराध्यः) ओ. आर्. ऐ., मैसूरु, १९७७, १९७८
बृ. उ.	बृहदारण्यकोपनिषत्, शांकरोपनिषद्भाष्यम् (सं. हरि रघुनाथ भागवत) अष्टेकर् अण्ड् को. पुणे, १९१८

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
बृ. जा. उ.	बृहज्ञाबालोपनिषत्, शैव उपनिषद्स्, अड्यार् लैब्ररी अण्ड् रिसर्च् सेण्टर, चेन्नै, १९८८
भ. गी.	भगवद्गीता, शांकरभाष्यम्, (सं. हरि रघुनाथ भागवत) अष्टेकर् अण्ड् को. पुणे, १९१६
भ. जा. उ.	भस्मजाबालोपनिषत्, शैव उपनिषद्स्, अड्यार् लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
भा. पु.	भागवतपुराणम्, नाग पब्लिषर्स, जवाहरनगर, दिल्ली
म. आ.	मकुटागमः, शैवभारती शोध प्रतिष्ठानम्, जंगमवाडी मठम्, वाराणसी, १९९४
मनु.	मनुस्मृतिः, क्षेमराज श्रीकृष्णदास, मुम्बै, वि. सं. १९४५
म. ना. उ.	महानारायणोपनिषत्, उपनिषत् संग्रहः, भागः-१, पृ. १५२
म. भा.	महाभारतम्, गीता प्रेस्, गोरखपुर
म. भा. ता. नि.	महाभारततात्पर्यनिर्णयः (मध्वाचार्यः), सं. वन्नञ्जे गोविन्दाचार्यः, ए. बि. एम्. एम्., १९६९
मनीषा. पं.	मनीषापञ्चिका, उल्लेखः – त. प्र.
माण्डूक्य.	माण्डूक्यकारिका, शांकरभाष्यम् (सं. हरि रघुनाथ भागवत) अष्टेकर अण्ड् को., पुणे, १९१८
मु. उ.	मुक्तिकोपनिषत्, उपनिषत् संग्रहः, भागः-१, पृ. ६५७
मुं. उ.	मुण्डकोपनिषत्, शांकरोपनिषद्भाष्यम् (सं. हरि रघुनाथ भागवत) अष्टेकर अण्ड् को., पुणे, १९१८
मृ. आ.	मृगेन्द्रागमः, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर, १९३०
मै. उ.	मैत्रेय्युपनिषत्, उपनिषत्संग्रहः, भागः-१, पृ. २३७

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
या.	यास्कस्य निरुक्तम् (सं. विनायक गणेश आप्टे) आनन्दाश्रम सीरीस्, पुणे, १९२१
या. स्मृ.	याज्ञवल्क्यस्मृतिः, समाजपुस्तकालयः, धारवाड, २००७
यो. आ.	योगजागमः (उल्लेखः – त. प्र.)
यो. शि. उ.	योगशिखोपनिषद्, उ. सं., भागः-१, पृ.६५६
यो. सू.	योगसूत्रम्, रामकृष्णमठम्, मैलापुर, चेन्नै, २००३
र. वं.	रघुवंशः, निर्णयसागर प्रेस्, मुम्बै
रु. उ.	रुद्रोपनिषत्, उपनिषत्संग्रहः, भागः-२, पृ.३०८
रु. जा. उ.	रुद्राक्षजाबालोपनिषत्, शैव उपनिषद्स्, अड्यार् लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
रु. हि.	रुद्रहिम्स् (आर. एल्. कश्यप्) अरबिन्दो कपालिशास्त्री इन्स्टिट्यूट् आफ् वेदिक् कल्चर्, ब्लाक् ४-ईस्ट, जयनगर बेंगलूरु, २००३
रु. हृ. उ.	रुद्रहृदयोपनिषत्, उपनिषत्संग्रहः, भागः-१, पृ. ५५०
रे. र.	रेवणसिद्धेश्वर रगळे, हरिहरन रगळेगळु, (सं. फ. गु. हळकट्टि) धारवाड, १९६८
रे. वि.	रेणुकविजयः (सं. हरीश्वरशास्त्री) मैसूरु, १९२६
लिङ्ग. उ.	लिङ्गोपनिषत्, उपनिषत् संग्रहः, भागः-२, पृ. ३११
लिं. धा. चं.	लिङ्गधारणचन्द्रिका, शैवभारती शोध प्रतिष्ठानम्, जंगमवाडी मठम्, वाराणसी, १९८८
लिं. पु.	लिङ्गपुराणम्, पुब्बड वेंकटराय, काञ्ची, १८७९
वराह. उ.	वराहोपनिषत्, उपनिषत् संग्रहः, भागः-१, पृ. ६०३
वातुल. आ.	वातुलागमः, उल्लेखः – त.प्र.

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
वा. शु. आ.	वातुलशुद्धागमः, ओरियण्टल् रिसर्च् इन्स्टिट्यूट्, मैसूरु, १९८८
वायु. उ.	वायुपुराणम्, नाग पब्लिषर्स, जवाहरनगर, दिल्ली
वा. सं.	वाजनेयी संहिता, स्वाध्यायमण्डलि, परडि, महाराष्ट्र
वि. चू.	विवेकचूडामणिः (सं. स्वामी चिन्मयानन्दः) सेण्ट्रल् चिन्मय मिषन् ट्रष्ट्, पोवय् पार्क ड्रैव्, मुम्बै, १९८७
वि. पु.	विष्णुपुराणम्, नाग पब्लिषर्स, जवाहरनगर, दिल्ली
वि. भै.	विज्ञानभैरवम्, मोतीलाल बनार्सीदास, वाराणसी, १९८४
विरू. पं.	विरूपाक्षपञ्चाशिका (उल्लेखः – त. प्र.)
वी. ध. शि.	वीरशैवधर्मशिरोमणिः (उल्लेखः – एन्नार)
शं. सं.	शंकरसंहिता (स्कन्दपुराणम्), खेमराज श्रीकृष्णदास, मुम्बै, वि. सं. १९६५
शब्द. कौ.	शब्दार्थकौस्तुभः (चक्रवर्ती श्रीनिवास गोपालाचार्यः) संपुटषट्कम्, बाप्को प्रकाशन, बेंगलूरु प्रेस्, बेंगलूरु, २०११
शिव. उ.	शिवोपनिषत्, उ. सं., भाग-२, पृ.३२४
शि. दृ. शा.	शिवदृष्टिशास्त्रम्, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर, १९३४
शि. मा. पू. स्तो.	शिवमानसपूजास्त्रोत्रम् (शंकराचार्यः) वैदिक शिवपूजा विधि, पञ्चाचार्य एलेक्ट्रिक् प्रेस्, मैसूरु, १९८८
शि. आ. सौ.	शिवागमसौरभ (कन्नड) (सं. एम्. जि. नञ्जुण्डाराध्यः) ज. च. नि. अध्ययनपीठम्, बसवनगुडि, बेंगलूरु
शिव. सं. उ.	शिवसंकल्पोपनिषत्, उ. सं., भाग-२, पृ.३१९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
शु. र. उ.	शुकरहस्योपनिषत्, उपनिषत्संग्रहः, भागः-१, पृ.२४७
शैव. प.	शैवपरिभाषा, (उल्लेखः – त. प्र.)
श्रीकर. भा.	श्रीकरभाष्यम्, संपुटद्वयम्, ओरियेण्टल् रिसर्च् इन्स्टिट्यूट्, मैसूरु, १९७७, १९७८
श्वे. उ.	श्वेताश्वतरोपनिषत्, शैव उपनिषद्स्, अड्यार् लैब्ररी अण्ड् रिसर्च् सेण्टर्, चेन्नै, १९८८
सदा. उ.	सदानन्दोपनिषत्, उपनिषत् संग्रहः भागः-२, पृ. ३७८
सर्व. द. सं.	सर्वदर्शनसंग्रहः, वि.ओ.आर्.ऐ., पुणे, १९७८
सा. त. कौ.	साङ्ख्यतत्त्वकौमुदी (वाचस्पतिमिश्रः)
सि. शिखा. उ.	सिद्धान्तशिखोपनिषत्, उ.सं. भागः-२, पृ.३८०
सि. कौ.	सिद्धान्तकौमुदी (भट्टोजीदीक्षितः), मोतीलाल बनारसीदास, नवदेहली
सि. शि.	सिद्धान्तशिखामणिः (आंग्ल भूमिकानुवाद – टिप्पणी सहितः) सं. डा॥ एम्. शिवकुमारस्वामी, शैवभारती शोध प्रतिष्ठानम्, जंगमवाडीमठम्, वाराणसी, २००७
सि.शि. मत्तु श्री.भा.	सिद्धान्तशिखामणि मत्तु श्रीकरभाष्य निजद निलुवु, डा॥ इम्मडि शिवबसवस्वामिगळु, संवहन, मैसूरु, २००३
सि. सा.	सिद्धान्तसारावलिः, शैवभारती शोध प्रतिष्ठानम्, जंगममठम्, वाराणसी
सु. सू.	सुश्रुतसूत्रम् (उल्लेखः – त. प्र.)
सुप्र. आ.	सुप्रभेदागमः, वीरशैव सदाचार संग्रहः, वारद मल्लप्पा ग्रन्थमाला, शोलापुर, १९०५

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

१	२
सू. आ.	सूक्ष्मागमः, शैवभारती शोध प्रतिष्ठानम्, जंगमवाडी-मठम्, वाराणसी, १९९४
सू. सं. (स्कन्द. पु.)	सूतसंहिता, स्कन्दपुराणम्, खेमराज श्रीकृष्णदास, मुम्बै, वि. सं. १९६८
स्वायं. आ.	स्वायंभुवागमः, शिवागमसौरभ (सं. एम्. जि. नञ्चुण्डाराध्य) ज. च. नि. अध्ययनपीठ, बसवनगुडि, बेंगलूरु
हं. उ.	हंसोपनिषत्, उपनिषत्संग्रहः, भागः-१, पु. १४६
हा. क. र.	हाविनहाळु कल्लय्यन रगळे, हरिहर (सं. एस्. एस्. बसवनाळ्)
ह्याण्ड्बुक्	ह्याण्डबुक् आफ् वीरशैविजम्, एस्. सि. नन्दिमठ, मोतीलाल् बनारसीदास, देहली, १९७९

*

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

अन्ये परामृष्टग्रन्थाः

१. गढ्वाल् का इतिहास्, (हरिकृष्ण रथूडी) भागीरथी प्रकाशन गृह, टेह्री गढ्वाल्, १९९५

२. हिन्दुत्व, शिव प्रसाद गुप्त, सेवा उपवन, वाराणसी, १९३८

३. हिस्टरि आफ् सौत इण्डिया, के. ए. नीलकण्ठशास्त्री, आक्स्फर्ड यूनिवर्सिटी प्रेस्, आक्स्फर्ड, १९६६

४. मोहेञ्जो-दारो अण्ड् इण्डस् सिविलायजेषन्, सर् ज्हान् मार्शल्, वाल्यूम्-१ लण्डन्, १९३१

५. वेदिक् आर्यन्स् अण्ड् आरिजन्स् आफ् सिविलायजेषन्, एन्. एस्. राजाराम अण्ड् डेविड् फ्राव्ली (महादेवशास्त्री), वायस् आफ् इण्डिया, नव देहली, १९९७

६. दि. आर्यन् इन्वेजन् थियरी, श्रीकान्त जि. तलगेरी, आदित्य प्रकाशन्, नवदेहली, १९९३

७. हिस्टरी आफ् इण्डियन् लिटरेचर्, एम्. विण्टर्निट्ज्, वाल्यूम्-१, मोतीलाल बनार्सीदास, देहली, १९८७

८. इण्डस् स्क्रिप्ट् अण्ड् दि मिथ् आफ् आर्यन् इन्वेजन्, एन्. एस्. राजाराम्, (विद्वन्मानसहंस, डा. एम्. शिवकुमारस्वामी अभिनन्दनग्रन्थः), १९९८

९. झा'स् डिसैफरमेण्ट् आफ् इण्डस् स्क्रिप्ट्, एन्. एस्. राजाराम्, मिथिक् सोसैटी जर्नल्, बेंगलूरु, वाल्यूम् ७७, नं. ४, १९९६

१०. वीरशैव भव्य परम्परे (कन्नड), डा. एम्. शिवकुमारस्वामी, श्रीमद्वीरशैव सद्बोधन संस्थे, वीरसिंहासन महापीठम्, बाळेहोन्नूरु, २००४

११. वीरशैवद उगम मत्तु प्रगति (कन्नड), श्री. टि. एन्. मल्लप्प, गुब्बि तोटदप्प धर्मसंस्थे, बेंगळूरु, १९७९

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri

समीक्षा

भारतीयधर्मदर्शनग्रन्थेषु श्रीसिद्धान्तशिखामणिर्वैशिष्ट्यपूर्णो वर्तते। **द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञके। वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः॥** इति श्रीकरभाष्योक्तदिशा श्रीसिद्धान्तशिखामणेर्वैशिष्ट्यं तावद्द्वैताद्वैतश्रुतिसमन्वयः। अन्यदपि वैशिष्ट्यमस्य सिद्धान्ताख्यशिवागमोत्तरभागधर्मदर्शनविचारैः सह सर्वश्रुतीनां च समन्वयः। अस्य ग्रन्थस्यैकविंशतिपरिच्छेदेषु पञ्चमपरिच्छेदादारभ्य विंशतितमपरिच्छेदपर्यन्तं षट्स्थलात्मक-वीरशैवसाधनमार्गान्तर्गतत्वेन निरूप्यमाणानां चतुश्चत्वारिंशदङ्गस्थलानां सप्तपञ्चाश-ल्लिङ्गस्थलानां चाहत्यैकोत्तरशतस्थलानां सिद्धान्तः प्रतिपादितः। शिवागमानामुत्तरभागेभ्यः समुद्धृतधर्मदर्शनविचारवत्त्वादयमागमोत्तरसिद्धान्त इति प्रसिद्धिं भजते। शैवपुराणानां वेदसंहितोपनिषदां च प्रभावनिर्भरत्वादयं वीरशैवसिद्धान्तो निगमागमसमन्वयसिद्धान्तत्वेनापि परिगृह्यते। अत्र संस्कृतव्याख्याकृद्भिः डा. शिवकुमारस्वामिमहाभागैरुपलभ्यमानमूलाकरान् परामृश्य प्रमाणभूतानि वाक्यानि प्रतिश्लोकं व्याख्यायाम् उदाहृतानि सविमर्शं विशदीकृतानि च। अत एवानिवार्यतया व्याख्याया विस्तारः जातः। अनेन विषयवैपुल्यं जातम् वैदुष्यं च प्रकटतां प्राप्तम् । तस्मादेते व्याख्याकर्तारः श्रीशिवकुमारस्वामिमहोदयाः सानन्दं सानुग्रहं चाऽस्माभिरभिनन्दनीयाः। इतोऽप्यतिशयं वीरशैवसिद्धान्तक्षेत्रे संशोधनच्छात्रमार्गदर्शनाभ्यां परिश्रमं विधाय स्वजीवनसार्थक्यं भजन्तामिति शुभाशीर्वादसुमनोभिस्ताननुगृह्णीमः। एवमेवेतेषां समस्तकुटुम्बवर्गस्योपरि कृपावर्षं विसृजन्त्विति भगवन्तं विश्वनाथं मातरमन्नपूर्णां श्रीजगद्गुरुविश्वाराध्यं च प्रार्थयामहे। अस्य ग्रन्थस्य प्रकाशनार्थम् आर्थिकसाहाय्यं कृतवद्भ्यो राष्ट्रीय-संस्कृत-संस्थानम् (मानितविश्वविद्यालयः) इति संस्थाप्रमुखेभ्यः हार्दाः शुभाशयाः प्रदीयन्ते।

इत्याशिषः

शैव भारती शोध प्रतिष्ठान

डी.३५/७७, जंगमवाडीमठ, वाराणसी - २२१००१

ISBN : 978-93-82639-22-0

Price : 447.00

CC-0 . Jangamwadi Math Collection. Digitzed by eGangotri